लोकप्रियसाहित्यग्रन्थमाला-१९

## मञ्जुनाथग्रन्थावलिः

(मञ्जुनाथोपाह्वभट्टश्रीमथुरानाथशास्त्रिणां काव्यरचनानां सङ्ग्रहः)

## द्वितीयभागे

### प्रथमखण्डः

# उपन्यासाः कथाश्च

प्रधानसम्पादकः
**प्रो. राधावल्लभत्रिपाठी**
कुलपतिः

सम्पादकौ
**देवर्षि-कलानाथशास्त्री**
**डॉ. रमाकान्तपाण्डेयः**

**राष्ट्रियसंस्कृतसंस्थानम्**
मानितविश्वविद्यालयः
नवदेहली

प्रकाशकः
कुलसचिवः
**राष्ट्रियसंस्कृतसंस्थानम्**
५६-५७, इंस्टीट्यूशनल एरिया
जनकपुरी, नवदेहली-११००५८

e-mail : rsks@nda.vsnl.net.in
website : www.sanskrit.nic.in

© राष्ट्रियसंस्कृतसंस्थानम्

ISBN : 978-93-86111-55-5

प्रथम संस्करण : २०१०

मूल्यम् : ₹ ३१०/-

मुद्रकः
अमर प्रिंटिंग प्रेस, दिल्ली-९
E-mail - amarprintingpress@gmail.com

# पुरोवाक्

संस्कृतभाषा यथा चिरपुरातनी सनातनी तथैव प्रतियुगं पुन:पुनर्जायमाना उषा इव नवविच्छित्तिं नूतनां च छविमाविर्भावयन्ती वरीवर्तते, अभिनवप्रभाभास्वरं प्रभातं विभावयितुं क्षमा इदानीमपि स्वे महिम्नि प्रतिष्ठिता चास्त इति जानन्त्येव सर्वे सुरभारतीसमुपासका:। वस्तुत: आधुनिके काले अपूर्वैव समृद्धिर्दरीदृश्यते संस्कृतरचनाया:। अतश्च विंशशताब्दी संस्कृतसाहित्यस्य कश्चन स्वर्णयुग इति युक्तमुक्तवान् कविवरोऽभिराजराजेन्द्रमिश्र:। साम्प्रतिकेऽस्मिन् समये अस्या भाषाया नवोन्मेष: कामपि अभिख्यां तनोति। नैके प्रौढा विदग्धाश्च उदीयमानास्तरुणास्तेजस्विन: पण्डिता: प्रकटयन्ति शास्त्रवैभवमस्या:, तथा च कवयन्ति पर:शतं सुकवय: निबध्नन्ति च विविधान् ग्रन्थान् अगणिता: साहित्यरचनानदीष्णा: सरस्वत्या: सुपुत्रा अस्यामेव भाषायाम्। परन्तु तेषु परै: क्षुण्णं मार्गं परिहृत्य अक्षुण्णमध्वानं श्रयन्त: स्वयमेव स्वीयं पन्थानं रचयन्तो भवन्ति भव्या अभिनवभावजगन्निर्माणनदीष्णा विरला एव, येषां कृतित्वेन–

**अन्धास्ते कवयो येषां पन्था: क्षुण्ण: परैर्भवेत्।**
**परेषां तु यदाक्रान्त: पन्थास्ते कविकुञ्जरा:।।**

(गङ्गावतरणमहाकाव्ये १.७७)

इति सुकवेर्नीलकण्ठदीक्षितस्य वचनं चरितार्थतां याति।

एतादृशेष्वपि विरलसाहित्यकारेषु सम्पूर्णे युगे कश्चन एक एव स्यात् युगप्रवर्तको भविष्यद्द्रष्टा, स्रष्टा नूतनविधानाम् आविष्कर्ता चाकृष्टक्षेत्राणां, कर्ता च नवोन्मेष-संवलितरचनावचनावलीनाम्। एतादृशा एव साहित्यकारा आसन् भट्टश्रीमथुरानाथशास्त्रिण: मञ्जुनाथापरनामान:। नवीना: परिकल्पना: नवीनविषयवस्तूनामवतारो नवनवविधानां चैदम्प्राथम्येन संस्कृतसाहित्ये प्रचार: इति एतेषामेव स्पृहणीयं कार्मण्यमभवत्। एते तर्केषु कर्कशधियो वयमेव नान्ये काव्येषु कोमलधियो वयमेव नान्य इति प्राचीनानां वच: क्वचित् प्रमाणीकुर्वन्ति, क्वचिच्च–

**कश्चिद् वाचो रचयितुमलं श्रोतुमेवापरस्तां**
**कल्याणी ते मतिरुभयथा विस्मयं नस्तनोति।**
**नह्येकस्मिन् भवति सुभग: सन्निपातो गुणानां**
**एक: सूते कनकमुपलं तत्परीक्षाक्षमोऽन्य:।।**

इति वा कालिदासोक्तिं स्मारयन्ति।

एते भट्टमथुरानाथशास्त्रिणः घनाक्षरी-कवित्त-सवैया-दोहा-सोरठादि-व्रजभाषाच्छन्दांसि संस्कृतकाव्यधारासु साधु स्नपयामासुः। उपन्यास-नभोवाणीरूपक-ललितनिबन्ध-यात्रावृत्त-प्रभृतिनूत्नविधासु ऐदम्प्राथम्येनासाधारणनैपुण्यप्रभवा एतेषां लेखनी निबबन्ध नैकान् निबन्धान्। संस्कृतगजलगीतेः परिष्कृतं स्वरूपमेते स्थिरीचक्रुः। अस्मिन्नतिविचित्रकविपरम्परावाहिनि संसारे द्वित्रान् विहाय केनचिदेकेन साहित्यकारेण एतावतीषु विधासु समं दक्षतया रचनापाटवं प्रतिभाप्रागल्भ्यं च न प्रकटीकृतं स्यात्। वाल्मीकि-व्यास-कालिदासादीनामिव अतितरां विस्तृतं तेषां कृतित्वम्।

अथैतेषां युगप्रवर्तकमहाकवीनां साहित्यं सम्प्रति सुदुर्लभं जातमिति राष्ट्रियसंस्कृत-संस्थानेन तस्य पुनः प्रकाशनमुपक्रान्तम्। अस्मिन् क्रमे मञ्जुनाथग्रन्थावल्याः प्रथमो भागः पूर्वं प्रकाशितोऽभवत्। यत्र द्वयोः खण्डयोः भट्टकवीनां जयपुरवैभवम्, गोविन्दवैभवम् साहित्यवैभवं चेति त्रीणि काव्यसङ्कलनानि प्राकाश्यतां नीतान्यभवन्। तत्रापि प्रथमभागस्य प्रथमे खण्डे जयपुरवैभवम्, गोविन्दवैभवं च विलसतः। जयपुरवैभवं नाम काव्यं भट्टश्रीमथुनाराथशास्त्रिणां १९४७ तमे क्रिस्त्वब्दे जयपुरादेव प्रकाशितम्। विविधछन्दोभङ्गीभिर्जयपुरनगरस्यानुपमा छटात्र कविना विशदं निरूपिता। अत्र परिस्फुरति जयपुरनगरस्यैतिह्यम्, देदीप्यते नगरसंस्कृतिः, पुरपरिसरस्य नयनाभिरामा शोभा चात्र भाविकालङ्कारविन्यासविशेषमनोहारिणी जायते। भाविकालङ्कारस्वरूपं च भामहदण्डिनिरूपितमित्थम्-

**तद् भाविकमिति प्राहुः प्रबन्धविषयं गुणम्।**
**प्रत्यक्षा इव दृश्यन्ते यत्रार्था भूतभाविनः।।**
**चित्रोदात्ताद्भुतार्थत्वं कथायाः स्वभिनीतता।**
**शब्दानाकुलता चेति तस्य हेतुं प्रचक्षते।।**

(काव्यालङ्कारे ३/५३, ५४)

**भावः कवेरभिप्रायः काव्येष्वासिद्धिसंस्थितः।**
**परस्परोपकारित्वं सर्वेषां वस्तुपर्वणाम्।**
**विशेषणानां व्यर्थानामक्रिया स्थानवर्णना।**
**व्यक्तिरुक्तिक्रमबलाद् गम्भीरस्यापि वस्तुनः।**
**भावायत्तमिदं सर्वमिति तद् भाविकं विदुः।**

(काव्यादर्शे, २।३६४-६५)

रुय्यकस्तु- न केवलं कवेरपितु सहृदयस्यापि अतीतानागतानां प्रसङ्गानां हस्तामलकवत् साक्षात्कारं भाविकेऽपेक्षितं मनुते। युक्तमुक्तवान् कुवलयानन्दव्याख्यायाम् आशाधरभट्टः- भावाय साक्षात्काराय प्रभवतीति भाविकम्। भाविकालङ्काररचनायां कविरीश्वरभावेऽवस्थितो रचयतीति युक्तमुक्तवान् विमर्शिन्यां जयरथः। एतादृशेन 'चिरनिवृत्तमप्येतत् प्रत्यक्षमिव दर्शितमि'त्यादिकविवचःस्मारकेन भाविकालङ्कारस्य सटीकं प्रयोगेण महीयते जयपुरवैभवम्। काव्यास्यास्य भट्टश्रीमथुरानाथशास्त्रिभिर्ब्रजभाषाच्छन्दोनिबद्धं शीर्षकमपि निरदेशीत्यपरोऽपि विशेषस्तेषां काव्यसंसारस्य, यथा-

**छन्दोमयगुञ्जे 'मञ्जुकवितानिकुञ्जे' चारु-**
**चित्रयुतं 'जयपुरवैभवम्' इदं बुधेन,**
**जयपुरभूमिपतिपरम्परापूज्यमान-**
**श्रीकृष्णाभिधानकविकलानिधिवंशजेन**
**देवर्ष्यवटङ्कधरतैलङ्गान्वयाभिजात-**
**काव्यकलाख्यात-मञ्जुनाथपरनामकेन**
**साहित्याचार्यभट्टश्रीमन्मथुरानाथकवि-**
**शास्त्रिणा कृतं प्रकाशितं च जयपुरात्तेन।। १।।**

गोविन्दवैभवं च भट्टवर्याणां भक्तिभावमयी रचना। वैभवकाव्यमालायामिदं तेषामन्तिमः पुष्पहारो यत्र तेषां प्रज्ञा भक्तिभावे परिणमति।

प्रथमभागस्य तृतीये खण्डे भट्टमहोदयैः प्रणीता हालकृतगाथासप्तशत्याः समच्छन्दोऽनुवादरूपा संस्कृतगाथासप्तशती व्यङ्ग्यसर्वङ्कषाख्यटीकया सह प्रकाशिताऽभवत्। एतेषु त्रिषु खण्डेषु भट्टकवीनां यथोपलब्धानि पद्यात्मकानि सर्वाण्यपि काव्यानि प्रकाशितान्यभवन्।

द्वितीयो भागोऽयं तेषां गद्यकृतीनां प्रकाशनार्थं कल्पितो वर्तते। तत्रापि द्वितीयभागस्य प्रथमे खण्डे भट्टमहाभागानां त्रय उपन्यासग्रन्थाः षष्टिप्रायाः कथाश्च प्रकाश्यन्ते। इयं हि कथाविधा हिन्द्यां 'कहानी' आङ्ग्लभाषायां च 'शॉर्ट स्टोरी' इति पदेन व्यपदिश्यते। भट्टमहाभागा नूनम् अस्या नवविधाया उन्नायकेषु सन्ति। संस्कृतरत्नाकरप्रभृतिपत्रिकासु प्रकाशिता एताः कथाः सामग्र्येण इदम्प्रथमतया ग्रन्थावल्यामस्यां प्रकाशिता भवन्ति। अत्र काश्चन अप्रकाशितपूर्वा अपि कथाः सन्ति सङ्कलिताः, यथा हृदयव्रणः यथा वा जीविते ममता।

कथास्वेतासु भट्टमहोदयानां गद्यरचनाचातुर्यं सामाजिकपरिवेशादिचित्रणवैशिष्ट्यं द्रष्टुं शक्नुवन्ति सुधियः सहृदयाः। संस्कृते कस्यापि कथाकारस्य एतावती कथासम्पत्तिरेकस्मिन् संस्करणे नैव प्रकाशिता स्यादिति संस्कृतगद्यसाहित्ये खण्डस्यास्य वैशिष्ट्यं स्वीकरिष्यन्त्येव सुधियः सहृदयाः।

इयं ग्रन्थावलिः विद्वद्धौरेयाणां कवितल्लजानां विविधभाषानिपुणानां कलामर्मज्ञानां कलानाथशास्त्रिणां सुचिन्तितैः भूमिकावचोभिर्विभूषितेति सविशेषं परितोषमनुभवामः। देवर्षिकलानाथशास्त्रिणश्च स्वनामधन्यानां प्रातःस्मरणीयानां भट्टमथुरानाथशास्त्रिणां सुयोग्यास्तनयाः, यान् दर्शं दर्शम्–

**'न कारणात् स्वाद् बिभिदे कुमारः प्रवर्तितो दीप इव प्रदीपात्'**

इति महाकविकालिदासवचसोऽसकृत् स्मरामः। अथ च सुयोग्यः युवाऽपि प्रौढपाण्डित्यवैभवमण्डितः पण्डितः श्रीरमाकान्तपाण्डेयो ग्रन्थावल्या अस्या सम्पादने एतेषां सुकविवर्याणां कलानाथशास्त्रिणां साहाय्यमाचरत्। वस्तुतः अपारं मञ्जुनाथसाहित्यमधिकृत्य सत्यमेव रमाकान्तपाण्डेयोऽप्रतिमां विशेषज्ञतां गाहते, यतो बहोः कालात् पूर्वमयं मञ्जुनाथवाग्वैभवे स्वकीयं दीक्षाचणत्वं प्रकटीचकार भट्टमथुरानाथशास्त्रिवर्यमधिकृत्य अखिलभारतीयसङ्गोष्ठ्या आयोजनेन, तत्सामग्र्याः सम्पादनप्रकाशनेन तथा च मञ्जुनाथगद्यगौरवमिति स्वसम्पादिते ग्रन्थे तेषामेव श्रीमद्भट्टमथुरानाथशास्त्रिणामप्राप्त-दुर्लभगद्यरचनानामाविष्कारपुरस्सरं सम्पादनेन च।

एतस्या मञ्जुनाथग्रन्थावल्याः प्रकाशनम् अमुष्मिन् नवीने सहस्राब्दे संस्कृत-साहित्यजगतः काचन अनितरसाधारणी घटना वरीवर्तीति न संशीतिः। भट्टमथुरानाथशास्त्रिवर्यैः संस्कृतस्य नवोऽभ्युदयकाल आयानवलोकितोऽलौकिकेन चक्षुषा। प्रकाशनमिदं संस्कृतसाहित्यरचनाक्षेत्रे सम्भावनानां नवद्वारमपावृणुयादित्याशास्महे।

**राधावल्लभः त्रिपाठी**
कुलपतिः
राष्ट्रियसंस्कृतसंस्थानम्

# मञ्जुनाथप्रशस्तयः

अन्तः सद्रससम्भृतातिमधुरद्राक्षासदृक्षाक्षरः
स्फूर्जत्प्रौढतमार्थगौरवधरः शृङ्गारितः स्वैर्गुणैः।
श्रीमान्काव्यनिकुञ्ज एष स मनोहारी निगुम्फोऽद्भुत-
स्तुल्यो यस्य नवीनरीतिललितो नाद्यावधि प्रेक्षितः।।

(भट्टश्रीनन्दकिशोरशास्त्रिणः)

नृत्यत्प्रायपदध्वानेऽवधानं यच्छतो मम।
विनैवार्थानुसन्धानमुदिता कापि निर्वृतिः।।
मञ्जुनाथः कविर्नूनं प्रशस्योऽमृतमञ्जुवाक्।
चिरं जयतु चेतांसि रञ्जयन् सरसात्मनाम्।।

(सरस्वतीभवनाध्यक्षस्य खिस्तेनारायणशास्त्रिणः)

रम्यः कश्चित् सुगन्धो विलसति नगरे पाटलाभेऽविरामो
नाऽयं पुष्पाटवीतः प्रभवति विपणेर्नाऽप्ययं गान्धिकानाम्।
वाग्देवी-सौधदीपोज्ज्वलन-नव-नव-प्रातिभद्रव्ययुक्तेः
कीर्तेरेषोऽनुभावोऽप्रतिमकविपतेर्मञ्जुनाथस्य नूनम्।।

(आचार्यगोविन्दचन्द्रपाण्डेयस्य)

# सम्पादकीयं निवेदनम्

अस्माकमुपास्या सेयं गीर्वाणगिरा यावती पुरातनी भाषाऽस्ति, तावत्येव नवीना। सहस्राब्दीनामनेकासां कालो व्यतियातो यदवधि साहित्यसर्जनमस्यां विधीयमानमस्तीति यावान् पुरातनोऽस्या इतिहासो विख्यायते, तावत्येव नूतनताऽप्यस्यामस्ति, चिरयौवनवती सेयं भाषेति विद्म एव वयम्। अत एव वेदकालीनाया ऋषिकाया लोपामुद्राया उषःसूक्तानुसारं यथा सेयमुषाः ''पुराणी युवति'' रित्याख्यायते स्म (पुराणी देवि युवतिः पुरन्धिः), तथैव संस्कृत-भाषाऽपि पुराणी युवतिरस्तीति सर्वदा सहर्षमुल्लिखामो वयम्। अत एव प्रतियुगं नूतनं साहित्यमस्यां सृज्यमानमवलोकयितुं शक्यते। भास-कालिदासादीनारभ्य वर्तमानयुगीन-कविकथाकारादिपर्यन्तं काव्य-नाटक-कथोपन्यासादिसाहित्यं यद्यत्वे ''सर्जनात्मक-साहित्या''भिधानेनोल्लिख्यते, निरन्तरमस्यामवतार्यमाणमस्त्येव। एतस्य परिधौ, विधाविशेषेषु च विस्तार एव संजायते, न नैयून्यम्।

एकोनविंश्याः शताब्द्या अवसानस्य, विंश्याः शताब्द्याः प्रारम्भस्य च कश्चन कालखण्डो निर्विवादं पुनर्जागरणयुगत्वेन भारतीय-साहित्येतिहासेऽपि समभिधीयते, भारतीय-समाजेऽपि। मुद्राणालयानां प्रसारेण, पुस्तकानां, पत्र-पत्रिकाणां च विस्तारेण संस्कृतभाषाया इतिहासेऽपि नवजागरणयुगमिदमासीदिति सर्वे वयं मन्यामहे। तदैव भारते विश्वविद्यालयशिक्षा प्रसारमाप, तत्र च संस्कृतभाषाया महत्त्वं सविशेषमाख्यापितमाङ्गल-शासकैरपि, संस्कृत-साहित्यस्याभिज्ञानशाकुन्तलप्रभृति नवनीतं पाश्चात्यभाषास्वनूद्य यदवधि प्रासारि विलियम-जोन्सप्रभृतिभिराङ्ग्लैः, शार्मण्यदेशीयैश्चाऽपि, तदवधि संस्कृतं विश्वजनीनत्वेन महत्त्वम-धादित्यपि मन्यामहे वयम्। तदानीं खलु विश्वविद्यालयेषु संस्कृतस्याध्ययनाध्यापनादि सविशेषं प्रासरत्। तादृशस्याध्यापनस्य, परीक्षाणां च माध्यमं त्वभूदाङ्ग्लभाषैव। तदानीं खलु भारतीये संस्कृताध्येतृसमाजे धाराद्वयं प्राचलत्।

एका धाराऽभूत्तादृशानां विश्वविद्यालयादिवरिष्ठशिक्षासंस्थानेषु समधितस्थुषां विदुषां येष्वाङ्ग्ला वैदेशिकाश्चाऽप्यभूवन्, भारतीया अपि, ये संस्कृतभाषां तत्साहित्यं च क्लासिकल (श्रेण्य) वाङ्मयत्वेन गभीरस्य शोधस्यानुसन्धानस्य च विषयं मन्यन्ते स्म, वेदोपनिषत्पुराणा-दीनां, श्रेण्यसाहित्यस्य चानुशीलनं, तदनुवादनं, तदुपरि शोधानुसन्धानादि चाङ्गलभाषायां, कदाचिच्च वङ्ग-हिन्द्यादिभाषास्वपि क्रियेत, इत्येतदेवाऽऽसीद् भारतीयानां विश्वविद्यालयाना-मुद्देश्यम्। प्राचीन-ग्रीक-लैटिनादिवदियमपि पुरातनी भाषाऽस्ति यस्यां मन्त्रपाठादिकं,

कर्मकाण्डादिकं चानुष्ठीयते, यस्या: प्राचीनं साहित्यं शोधार्थिभिरनुशील्यते, अनुसन्धीयते च। न कश्चिदद्य प्राचीनग्रीकभाषायां लैटिनभाषायां वा काव्यरचनामुपन्यासलेखनं वा कर्तुं कल्पयेदपि। अत: संस्कृतभाषाऽपि क्लासिकलभाषात्वेन ग्रीक-लैटिनादिवदनुसन्धानपात्र-मेवाऽस्तीति मन्वानानां विदुषामभूत्सा धारा।

अन्याऽभूदेका तादृशी धारा यस्या विद्वांसो ''जीविताना'' माधुनिकभाषाणां पङ्क्तौ संस्कृतं परिगणयन्ति स्म, संस्कृते सम्भाषन्ते स्म, कवयन्ति स्म, पत्रलेखनादि कुर्वन्ति स्म, कविसम्मलेनादीनामायोजनं कुर्वन्ति स्म, कथालेखनं, विनोदालापांश्चापि कुर्वन्ति स्म। एतस्यैवाऽभूदयं परिणामो यद् यदा मुद्रणालयानां प्रसारवशात् ''पत्रकारता'' प्रारभ्यत भारतीय-भाषासु, तदा संस्कृतपत्रपत्रिका अपि ''विद्योदय'' सदृश्य: प्राकाश्यन्त (न केवलं पण्डितप-त्रिकासदृश्य:) या अवलोक्य चित्रीयन्ते स्म वैदेशिका:। एवंविधासु पत्रिकासु सर्जनात्मक-साहित्यं विपुलमात्रायां प्रकाशयितुमारेभिरे सम्पादका:। सहस्रश: संस्कृतसर्जकास्तु विद्यन्ते स्मैव तदानीं देशे।

एतस्यायमभूत् स्वाभाविक: परिणामो यदूनविंश्या: शताब्द्या अन्तिमे चरणे विंश्या: शताब्द्या पूर्वार्धे च सुमहति परिमाणे संस्कृतभाषायां काव्य-नाटक-कथोपन्यास-निबन्धादिकस्य ''सर्जनात्मक''-साहित्यस्य सर्जनमभूद् देशे यस्य प्रकाशनं कदाचित् पूर्वं पत्रिकास्वभूत्, तदनु ग्रन्थाकारेषु, कदाचिच्च ग्रन्थरूप एव तदवततार। पं. अम्बिकादत्तव्यासस्य सुविदित उपन्यास: ''शिवराजविजया''ख्य: पूर्वं क्रमिकरूपेण संस्कृतचन्द्रिकापत्रिकायां प्राकाश्यत, तदनु ग्रन्थरूपेण।

इत्थमस्या नूतनधाराया: प्रयासानां परिणामवशात् संस्कृते जीवन्तीष्वाधुनिकभाषास्विव तादृशं सर्जनात्मकसाहित्यमनवरतमवततार। तत्र च पत्रकारताया: सर्वाधिकमुल्लेखनीयमवदान-मभूत्। अत एव बहवस्तादृशा: संस्कृतपत्रकारा: प्रादुरभूवन्, ये सुललित-सर्जनात्मक-साहित्यस्य प्रणेतारोऽप्यभवन्, पत्रकारा अपि। तादृशेषु सर्जकेषु सर्वप्रथमुल्लेखनीयोऽस्ति वाङ्गो विद्वत्तल्लज: पं. हृषीकेशभट्टाचार्यो यो हि वङ्गदेशात् सूदूरं पश्चिमोत्तरप्रदेशे लाहौरनगरे विश्वविद्यालयीयशिक्षातंत्रेणाऽऽकारितस्तत्र प्रापत्; ''विद्योदय'' नामकस्य संस्कृतपत्रस्य चाऽऽरम्भमकरोत् यत्र सर्जनात्मकं साहित्यं सुभृशं प्राकाश्यत। सपद्येव तदनु पत्रमिदं वङ्गदेश-मागमत्। अत्र हि भट्टाचार्यैर्ललितकथाललित-निबन्ध-विनोदव्यंग्यादि हृदयावर्जकं साहित्यं प्रकाशयितुमारब्धम्। सेयं धारा संस्कृतचन्द्रिका-संस्कृतरत्नाकरादिविविधपत्ररूपेण सततं प्रावहत्, भूयांसं च साहित्यभाण्डागारमवतारयामास संस्कृते। संस्कृतचन्द्रिकासम्पादक: पं. अप्पाशास्त्री राशिवडेकरोऽपि सर्जनात्मकसाहित्यस्य सुविदित: प्रणेताऽभूत् (महाराष्ट्रीय:), संस्कृतरत्नाकरसम्पादको देवर्षिभट्टमथुरानाथशास्त्री अपि कविशिरोमणि:, कथाकारो,

ललितनिबन्धकारश्चाऽभूत् (राजस्थानीयः)। तदनु ''संस्कृतप्रतिभा'' (भारतीय साहित्य-अकादम्याः संस्कृतमुखपत्र) सम्पादको डॉ. वेङ्कटराघवन् (दक्षिण भारतीयः) अपि स्वयं नाटककारः कविश्चाऽभूत्, तमेव पन्थानं चानुससार।

सर्जनात्मकसाहित्ये नवजागरणस्य येयं धारा संस्कृते प्रावहत् तत्परिणामस्वरूपमेवा-द्यत्वे सुविपुले परिमाणेऽभिनवं संस्कृतसाहित्यमुपलभ्यते यस्येतिहासोऽपि प्रारभ्यताऽभिलेखितुं विद्वद्भिः। स्व. डॉ. बलदेव उपाध्यायानां प्रधानसम्पादकत्वे प्रकाशितस्य ''संस्कृत वाङ्मय का बृहत् इतिहास'' नामक-ग्रन्थराशेः सप्तमखण्डरूपेण, अन्येषु च ग्रन्थेषु, तादृशं विवरणं प्राप्यते। अतएव तत्राऽऽधुनिक-कालीनस्य संस्कृतसाहित्यस्य यद् युगविभाजनं व्यधीयत, तस्य नामकरणमपि सर्जक-पत्रकार-युगप्रवर्तकत्वेन महतीं भूमिकां निरूढवतां विदुषां नामभिरक्रियत-अप्पाशास्त्री राशिवडेकरयुगम् (१८९०-१९३० ई.) भट्टमथुरानाथशास्त्रियुगम् (१९३०-१९६० ई.), डॉ. राघवन् युगं (१९६०-१९८० ई.) चेत्यादि।

अस्मिन् विपुले नूतन-साहित्यभाण्डागारे नूतनविधानां, नूतन-विषय-शिल्प-शैल्यादीनां चाऽवतारणां विधाय विलिखितं काव्य-कथा-नाटक-निबन्धादिसाहित्यं विस्मयावहां लोकप्रियतामभजत्। तदैव तु विंटरनिट्जादयः शार्मण्यदेशीयाः साहित्येतिहासकारास्तदिदं कथयितुं विवशा अभूवन् यत् संस्कृतसदृशी प्राचीना, क्लासिकलभाषा एतादृशीं जीवन-शक्तिं धारयतीति कः खलु विश्वसेद् यदस्यां पत्रपत्रिकाः प्रकाश्यन्ते, कवि-सम्मलेनानि भवन्ति, सजीवं नूतन-साहित्यं च निर्मीयते।

अनेनैव नूतनसाहित्येन संस्कृतगिरं केवलं पुस्तकस्थां, क्लासिकलभाषां, शोधपात्रीभूतां भाषां, मृतभाषां वा व्यपदिशतां पाश्चात्यमतानुवर्तिनां मुखमुद्रणं कृतमभूत्। अत एव तदानीं पं. हृषीकेशभट्टाचार्यस्य ''उद्भिज्जपरिषद्'' इत्यादीन् निबन्धान् ''आत्मवायोरुद्गार'' इत्यादि-विनोदगर्भा आत्मवृत्तादिविधाश्च लोकप्रिया अनुभूय प्रसेधितान्यभूवन्नेतादृशानि पद्यानि-

**मुद्रयति वदनविवरं मृतभाषावादिनां मुहेराणाम्।**
**स्मरयति च भट्टबाणं भट्टाचार्यस्य सा वाणी।।**

(मुहेरो मूर्खः)

तादृशं सर्जनात्मकं साहित्यमद्यावधि विपुले परिमाणे सृज्यते, प्रकाश्यते, समीक्ष्यते, समाद्रियते, पुरस्क्रियते च साहित्य अकादमी-संस्कृत अकादमी प्रभृतिभिः संस्थाभिरिति सुमहत् सौभाग्यमस्माकममरभाषासेवकानाम्। अद्यापि भारतीयेषु बहुसंकायीयेषु विश्वविद्यालयेषु मानविकी-संकायान्तर्गतः संस्कृतविभागोऽपि विद्यते यत्र संस्कृतस्य वाङ्मयम्, अर्थात् प्राचीनं वरेण्यसाहित्यं वेदोपनिषन्महाकाव्यनाटकादिरूपं पाठ्यते,

तदुपर्यनुसन्धानकार्यं क्रियते, पीएच. डी. इत्यादय उपाधयः प्रदीयन्ते। एवंविधस्य शिक्षणस्य, परीक्षणस्य, लेखनस्य च माध्यमरूपेण हिन्दीभाषा, आङ्गलभाषा, अन्याश्च भारतीया भाषा उपयुज्यन्ते प्रायशः। संस्कृतमाध्यमेन तत्राल्पीय एव कार्यं भवति, न वा भवति। अपरतस्तु गताया विंश्याः शताब्द्या उत्तरार्धे प्रवृत्तायाः संस्कृतविश्वविद्यालयस्थापनपरम्परायाः कारणात् संस्कृतस्यैव विविधविषयाणाम–नुशीलनाय संस्थापितानां विश्वविद्यालयानां शिक्षणपरीक्षण–लेखनादिकार्येषु संस्कृतभाषैव माध्यमत्वं बिभर्ति।

द्वयोरपि विश्वविद्यालयप्रकारयोरनयोः पाठ्यक्रमेषु यत् ''साहित्यं'' साहित्यविषय–मङ्गीकृतवत्सु छात्रेषु पाठ्यते, तत्र कालिदासादयः प्राचीना महाकवयः, जगन्नाथपण्डितराजादयो मध्यकालीना विद्वांसो वा पाठ्यक्रमेषु निर्धार्यन्ते, नवयुगीना अर्वाचीनाः साहित्यसर्जकाः प्रायशः पाठ्यक्रमेषु नावतरन्ति स्म कतिपयदशकेभ्यः पूर्वम्। वाराणस्यादिनगरीयैः पाठ्यक्रमनिर्धारकैः कृपापूर्वकमर्वाचीनेषु साहित्यकारेषु दयमानैः केवलमम्बिकादत्तव्यासोपरि कृपा कृताऽभूद् यत्तस्य ''शिवराजविजया''ख्य उपन्यासः पाठ्यक्रमे निरधार्यत। नापरः साहित्यकारः प्रवेशमलभत बहोः कालात्। इत्थं केवलं क्लासिकल–साहित्यपाठनस्य परिणतिरियमभूद् यत्तादृशः स्नातकः शास्त्रीयान् विषयान् संस्कृते वक्तुं, लेखितुं चावश्यं प्रभवति किन्त्वाधुनिके युगे यादृशं जीवनं प्रवर्तते, या घटना घटन्ते, तासां वर्णनं कर्तुं संस्कृते न प्रभवति। कथं क्षमेत स तथा कर्तुम्?

''बाष्पयान (रेल) विश्रमस्थले (स्टेशन) यदा चिटिका (टिकिट) क्रयणायाहं गतोऽभूवं तदा मम पटपुटकं छिन्नम् (जेब कट गई)'' इत्यादिवास्तविकवृत्तस्य लेखनं यदि संस्कृते करणीयं स्यात् तदा वराकः साहित्याचार्यपरीक्षोत्तीर्णोऽपि कथं प्रभवेत्? रेल–स्टेशन–टिकिट इत्यादीनि प्रमेयानि शिवराजविजये तु न सन्ति, न कालिदासे, न बाणभट्टे। कुत्र लभेत स तत्कृते शब्दराशिम्? अतस्तादृशीष्वभिव्यक्तिष्वपि छात्राणां बुद्धिः प्रसरेदित्येतदर्थं बहुभिर्विवेकिभिर्विश्वविद्यालयैराधुनिकसाहित्यान्तर्गतानि पुस्तकान्यपि पाठ्यक्रमेषु विनिर्धारितानि यत्राधुनिकाः शब्दाः प्राप्येरन्। एवंविधेषु विश्वविद्यालयेषु दयालबाग आगरा–प्रभृतयोऽप्यभूवन्, राजस्थानीया विश्वविद्यालया अप्यभूवन्। बहुभिस्तु पुराणपथपथिकैः पाठ्यक्रमनिर्धारकैरेवंविधस्य नूतनयुगीनविकासस्यावश्यकतैव नानुभूता स्यादिति तु कथान्तरम्।

किन्तु तदिदं तु स्पष्टतया सर्वैरनुभूयेतैव यदद्य यदि द्वितीयधारानुरूपं संस्कृतभाषा ''जीविता'', आधुनिकी, प्रयुज्यमाना च भाषा साधयितुमिष्यतेऽस्माभिस्तर्हि वर्तमानयुगीनानां सर्वविधानामभिव्यक्तीनामवतारणा संस्कृते करणीया स्यात्। संस्कृते जीवनानुभवान् अभिव्य–ञ्जयितुमस्माकं छात्रा अपि समर्थीकरणीयाः स्युः। तदर्थमाधुनिकं संस्कृतसाहित्यमेवैकमात्रं साधनं भवितुमर्हति, नान्यः पन्था विद्यतेऽयनाय। अत एव नूतनं साहित्यं संस्कृते सृज्येत

इत्यप्यावश्यकं, तत् प्रकाश्येत इत्यप्यावश्यकं, तस्य निर्धारणं पाठ्यक्रमेषु क्रियेत, इत्यप्यावश्यकम्।

सुमहत् सौभाग्यमस्माकं यदेवंविधा अपेक्षा: प्रति किञ्चिदवधानं वरिष्ठै: प्रशासकै:, शिक्षाशास्त्रिभिश्च प्रदातुमारब्धमस्ति। नूतनसाहित्यसर्जनं प्रोत्साह्यत इति तु सूचितचरमेवोपरितनासु पंक्तिषु, बहुत्र पाठ्यक्रमेष्वपि नूतनसाहित्यं निर्धार्यते। नूतनसाहित्यसमीक्षणाय ''दृक्'' सदृश्य: पत्रिका अपि प्रकाश्यन्ते, ग्रन्थप्रकाशनमपि प्रोत्साह्यते। तादृशेषूपक्रमेषु भारतसर्वकारीयं राष्ट्रियसंस्कृतसंस्थानं यद्धि शासनस्य सर्वत: प्रमुखं संस्थानमस्ति, विपुलं समर्थनं वित्तीय-साहाय्यादिकं च प्रददातीति सुतरां हर्षावहम्। अनेन संस्थानेन नूतनसाहित्यप्रकाशनस्य तदर्थं वित्तीयानुदानस्य, तत्समीक्षणस्य, विविधभाषासु सृष्टस्योत्कृष्टस्य साहित्यस्यानुवादानां प्रवर्तनस्यापि च कार्यक्रमा: परिचाल्यन्त इत्यपि प्रमोदावहम्।

संस्थानस्यास्य कुलपतिभि:, डॉ. राधावल्लभत्रिपाठिभि: स्वयं नूतनसाहित्यसर्जनलब्धयशस्कैर्यदवधि कार्यभारोऽस्य गृहीतस्तदवधि तै: कतिपये तादृशा उपक्रमा अपि प्रारभ्यन्त यै: संस्कृते नवयुगीनविकासस्योपबृंहणं प्रतिफलितं दृश्येत। तादृशेष्वेवोपक्रमेष्वेकतमोऽस्ति संस्कृतस्यार्वाचीनानां साहित्यकाराणां समग्र-ग्रन्थमालाया: प्रकाशनम्। लोकप्रियग्रन्थमालानाम्ना तादृशानां साहित्यसर्जकाणां समस्तानां कृतीनां ग्रन्थरूपेणावतारणं महदुपयोगि स्याद् यै: प्रभूते परिमाणे विविधासु विधासु संस्कृते सर्जनात्मकं साहित्यमवतार्य संस्कृतं जीविता भाषा ख्यापिताऽभूत्, नवजागरणस्य स शङ्खनाद: कृतोऽभूद् यस्य विवरणं मया गतेषु प्रघट्टकेषु प्रस्तुतमस्ति।

एवंविधा एव साहित्यसर्जका अभूवन् मम पितृचरणा: कविशिरोमणि-देवर्षि-भट्टश्रीमथुरानाथशास्त्रिपादा: यै: संस्कृतकाव्यसर्जनायां नूतनच्छन्दसां, नूतनशैलीनां, नूतनकथ्यानां चाऽवतारणा कृताऽभूत्, गजलगीतिरचनाया: प्रवर्तनं कृतमभूत्, ललितनिबन्धा जनिता अभूवन्, कथासर्जनस्य नैका विधा: प्रावर्त्यन्त, विनोदोक्तीनां प्रकाशनं प्रारब्धमभूत्, ग्रन्थसमीक्षणं प्रवर्तितमभूत्, संस्कृतपत्रकारतायां नूतनं युगमानायितमभूत् ''संस्कृतरत्नाकर''-''भारती'' प्रभृतिपत्राणां सम्पादनद्वारा। तेषां संस्कृते साहित्यसृष्टिर्लक्षाधिकेषु पृष्ठेषु प्रसृताऽस्ति। तेषां बहवो ग्रन्था: प्राक् प्रकाशिता अद्य सुदुर्लभा:। तत्सम्पादितपत्रिकादीनां प्राप्तिरप्यद्य कठिना। तेषां लोकप्रियाणां सर्जनात्मक-साहित्यकृतीनामवतारणा ग्रन्थमालारूपेण क्रियेतेति संस्थानस्य शुभसङ्कल्पो यदा मह्यमसूच्यत, सुमहान् सन्तोष: ''सार्थकता''-बोधश्च कश्चिदुदियाय मन्मनसि। पद्ये, गद्ये (कथोपन्यासादिषु) च तेषां सर्जनस्यास्ति विपुलं परिमाणम्। तत्सूचना भूमिकाभागे प्राप्येत पाठकै:। अत: क्रमिकरूपेण विभिन्नेषु भागेषु प्रकाश्यते सेयं ग्रन्थमाला।

प्रथमे पद्यखण्डे तेषां मञ्जुकवितानिकुञ्जाख्य: काव्यसन्दोह: प्रकाश्यते यत्र प्रामुख्येण नूतनेषु शिल्पप्रकारेषु, छन्द:सु, गीतिषु च निबद्धा काव्यरचना परिदृश्येत पाठकै:। विंश्या:

शताब्द्या आरम्भेऽपि समस्ते देशे व्रजभाषाच्छन्दःसु प्रणीयमाना सा काव्यरचना लोककण्ठ-हारत्वमाप्ताऽभूद् यादृशाी काव्यपरम्परा तुलसीदासस्य कवितायां, विहारिणो दोहाच्छन्दःसु देव-भूषण-ठाकुर-रत्नाकरादीनां कवित्तच्छन्दःसु च निभाल्यते स्म। व्रजभाषा खलु तदानीमखिलेऽपि देशे काव्यभाषात्वेन प्रतिष्ठिताऽभूत्। केरलीया अपि व्रजभाषायां कवयन्ते स्म। तत्रापि घनाक्षरीत्याख्यायमानं दण्डकं लोकप्रियमभूत्। अत एव कवित्त नाम्ना (कवित्व-प्रतीकत्वेन) तस्य ख्यातिर्व्यजृम्भतेति लेखकीयायां भूमिकायां सविस्तरं स्पष्टीकृतमस्ति। तदानीमेव देशे उर्दूभाषाऽपि सुप्रतिष्ठिताऽभूत्, तस्याश्च गजल-नामा गीतिप्रकारः सुतरां लोकप्रियोऽभूत्। सर्वेष्वेतेषुछन्दःसु विविधा काव्यरचना भट्टश्रीमथुरानाथशास्त्रिभिर्व्यधीयत।

अस्यां हि शिल्प-विधास्वमूषु तैः सर्वविधाः काव्यविषया न्यबध्यन्त। ऋतुवर्णन-नायिका-भेद-नवरसनिबन्धनादिपरम्पराऽपि तैरनुसृता, नवसभ्यतायाः, नूतनयन्त्राणां चापि वर्णनेन नूतनतां प्रति स्वाभिप्रायः प्रकटीकृतः। तदानीं हि कवितायां कुत्रचन कविनामसङ्केतोऽपि सूच्येतेति परम्परा सुप्रचलिताऽभूत्। व्रजभाषायामेवंविधा नामसूचना भनत इति व्यपदिश्यते स्म, यथा सूरदास तुलसी इत्यादि सङ्केतस्तेषां पद्येषु द्रष्टुं शक्योऽद्यापि तथैव कविनाम प्रतिपद्यं सूच्येत इत्येतदर्थं भट्टपादैः स्वकीयं काव्यनाम मञ्जुनाथ इति स्वीकृतमासीत्। ततो मञ्जुकवितानिकुञ्ज इति काव्यमालाया नामापि तैर्निर्धारितम्। प्रतिपद्यं कवित्तच्छन्दसस्तृतीयचरणे मञ्जुनाथ इति नामसूचनाऽपि प्राचां पद्धतिमनुसृत्य गुम्फिता। सा विलोक्येत पाठकैर्ग्रन्थामलायाम-स्याम्। कवित्तच्छन्दसि चरणचतुष्टयमवश्यं भवति, प्रतिचरणमन्त्यानुप्रासोऽपि भवति किन्तु वाक्यपूर्तिर्द्वितीयेन चतुर्थेन च चरणेन मन्यते। अतः प्रथमचरणानन्तरं तृतीयचरणानन्तरं च न किञ्चित् विरामचिह्नं दृश्येत, वाक्यपूर्तेरभावात्। तदनुसार्येव मुद्रणमत्र दृश्येत पाठकैः।

प्रथमतः साहित्यवैभवाख्यं काव्यसङ्कलनं 1930 ई. वत्सरे मुम्बईस्थ- निर्णयसागर-प्रेसतो मुद्रापयित्वा तैः प्राकाश्यत यत्र आगराविश्वविद्यालयकुलसचिवस्य पं. श्यामसुन्दरशर्मणः प्रयाग- विश्वविद्यालयकुलपतेः डॉ. गङ्गानाथझामहाभागस्य, काशीहिन्दूविश्वविद्यालयकुलपतेः प्रो. ए. बी. ध्रुवमहाभागस्य, वाराणसेय संस्कृतमहाविद्यालयाध्यक्षस्य डॉ. गोपीनाथकविराजस्य च भूमिका आङ्गलभाषायां, नाथद्वारविद्याविभागाध्यक्षस्य शीघ्रकविनन्दकिशोरशास्त्रिणः काशीस्थसरस्वतीभवनाध्यक्षस्य पं. नारायणशास्त्रिखिस्ते महोदयस्य च संस्कृते काव्यमयं प्ररोचनाद्वयं स्वकीयया संस्कृतनिबद्धया भूमिकया सह प्राकाश्यन्त। तदानीं हि भारते विद्यानां कलानां च पुनर्जागर्तिः काचन परिदृश्यते स्म, मुम्बईमहानगरी चापि तस्याः केन्द्रभूताऽसीत्, अतस्तत्र एम. धुरन्धरम्हात्रेप्रभृतयश्चित्रकाराः स्वकीयतूलिकानिर्मितैश्चित्रैर्जनमनांसि मोहयन्ति स्म, लक्ष्मीआर्टप्रभृतिभ्यो मुद्रणालयेभ्यश्चित्रगुम्फाः (आल्बम) काव्यबन्धालङ्कृता अपि प्रकाश्यन्ते स्म। भट्टमहाभागास्तादृशीनां कलाकृतीनां गुणग्राहका अप्यभूवन्, ग्राहका अपि।

शतशस्तादृशानि सचित्रपुस्तकान्यद्यापि तेषां सङ्ग्रहे शक्यन्ते द्रष्टुम्।

अतस्तैः स्वकीय-संस्कृतकाव्यगुम्फनेन सह बहूनि तादृशानि चित्राण्यपि (प्रायशः एम. धुरन्धरचित्रितानि, तूलिकया, न तु कैमराख्ययन्त्रेण) ॠतुवर्णन-नायिकावर्णनादिभिः सह मुद्रापितानि साहित्यवैभवे। अनेकासां काव्यरचनानां तु प्ररेणैव तादृशैश्चित्रैः प्रत्ताऽभूत्। अतः पद्यैः सह स्वटीकायां चित्रविशेषस्याप्युल्लेखस्तैस्तत्र तत्र कृतः परिदृश्येत पाठकैः। प्रतिपद्यं सेयं टीका स्पष्टावबोधार्थं प्रकाश्यते किन्तु सर्वाणि तानि चित्राणि न शक्यन्ते मुद्रापयितुमिति तानि नाऽत्र विलोक्येरन्।

मञ्जुकवितानिकुञ्जाख्यस्यास्य काव्यसन्दोहस्य प्रथमो भागो ''जयपुरवैभवम्'' शीर्षकं बिभ्राणः 1947 ई. वर्षे प्राकाश्यत। अत्र हि ''अपरा काशीति'' ख्यातस्य जयपुराख्यनगरस्य काव्यमयं वर्णनं गुम्फितमस्ति। महाकवेरस्य पूर्वजाः श्रीकृष्णभट्टकविकलानिधिप्रभृतयो जयपुरनरेशैः प्रभूतभूसम्पत्समर्पणपुरस्सरमत्रानाय्य ससम्मानं वासिताः। अस्मिन् कुले जयपुर-राजवंशेतिहासस्य काव्ये निबन्धनं शताब्दीभ्यः कविकर्मत्वेनानुवर्तते यतः श्रीकृष्ण-भट्टकविकलानिधिना ''ईश्वरविलासा''ख्ये महाकाव्ये इदम्प्रथमतया जयपुरनगरस्थापनायाः प्रत्यक्षदृष्टं विवरणं समावेशयता जयपुर-राजवंशेतिहासो व्यलेख्यत, स हि अष्टाविंशीं शताब्दीं यावदितिवृत्तं प्रस्तौति। तदनन्तरं व्रजभाषायां तद्वंशजैरितिहासकाव्यान्यलेख्यन्त। अस्यामेव परम्परायां साम्प्रतिकं जयपुरं काव्यशैल्यां वर्णयत् काव्यं प्रणीयेत यत्र जयपुरस्योद्यानानि, दर्शनीयस्थलानि, प्रमुखा महापुरुषा इत्यादयो विषया अपि वर्ण्येरन्निति जयपुरमहाराजस्य मानसिंह (द्वितीय) स्यानुरोधमनुसृत्य संस्कृते विविधेषुच्छन्दस्सु भट्टश्रीमथुरानाथशास्त्रि-भिर्जयपुरवैभवाख्यः काव्यतल्लजः प्राणीयत। अस्य हि विशेषोऽयमेवास्ति यदत्र ऊनविंश्याः शताब्द्या उत्तरार्धे विंश्याश्च पूर्वार्धे जयपुरनगर्यां कथं विकासकार्याणि समजनिषत, के के सामन्ता विद्वांसश्च नगरीमिमां गौरवान्वितां चक्रुरित्यादि ''यथार्थ'' विवरणं समुपलभ्येत पाठकैः शोधार्थिभिश्च।

स्वकीयाया जन्मभूमेर्वृत्तमुपनिबध्य सारस्वतमृणं परिशिशोधयिषता कविशिरोमणिना सोऽयं काव्यसन्दर्भः प्रथम-भागत्वेन मनोनीतोऽभूदतः समग्रस्य मञ्जुकवितानिकुञ्जस्य भूमिकाऽस्मिन्नेव भागे प्राकाश्यत। अत्रैव भारतविश्रुतानां विद्वन्मूर्धन्यानां म. म. पं. गिरिधिर-शर्मचतुर्वेदानां प्रारम्भिकं वक्तव्यमपि प्राकाश्यत। भारतेन विंश्याः शताब्द्याः पूर्वार्धे स्वातन्त्र्यमधिगतम्। राजतन्त्रस्य स्थाने प्रजातन्त्रमस्थाप्यत। तस्य वर्णनमप्यत्र जयपुरवैभवे प्राप्यते। जयपुरवैभवमिदं मञ्जुकवितानिकुञ्जस्य प्रथमः खण्डः, 'साहित्यवैभवं' च द्वितीय इति तेषां हार्दमभूत्। अतो भूमिकाभागो जयपुर- वैभवेन सह प्राकाश्यत।

भट्टपादानामन्तिमं काव्यमासीद् भक्तिकाव्यं ''गोविन्दवैभव'' नामकम्। आजीवनं नरकथामुद्दिश्य सांसारिकान् विषयान् वर्णयन्ति काव्यानि मया व्यरच्यन्त। इत्थं हि नरकथयाऽऽ-विलीकृतां वाणीं नारायणस्मरणेन पावयितुं भगवद्गुणानुवादपरां काव्यरचनां गोविन्दचरणयोः समर्प्य काव्यप्रणयनपरम्परां समापयिष्यामीत्यभिलाषस्तेषां 1957 ई. वर्षे गीताप्रेस (गोरखपुर) तः प्रकाशितेन गोविन्दवैभवकाव्येन सम्पूरितः। अत्र विविधेषु च्छन्दःसु भक्तिकाव्यं गुम्फितमस्ति। एतदनन्तरं तैर्न काऽपि काव्यरचनाऽक्रियत, गद्यप्रणयनमेव स्वःप्रयाणावधि कृतम्।

सर्वेभ्य एतेभ्यः काव्येभ्यः पूर्वं तैः काव्यप्रणयनविनोदविधया हालसङ्कलिताया गाथासप्तशत्याः संस्कृते समच्छन्दोऽनुवादः कृतोऽभूत्। प्राकृतगाथा इमाः सर्वात्मना हृदयावर्जिकाः किन्तु मूलप्राकृतभाषा नैषु दिनेषु सर्वेषां बोधगम्या, पाठकाः खलु गाथानां संस्कृतच्छायामधीत्य तासां रसास्वादनं कुर्वन्ति, छाया सेयं न च्छन्दोबद्धा अतो रसनीया न भवति। सर्वमिदं विचिन्त्य तैर्गाथानामासामार्यासु संस्कृतानुवादो व्यधीयत, सर्वविधं व्यङ्ग्यजातं विशदयन्ती व्यंग्यसर्वङ्कषाख्या टीकाऽप्यलिख्यत। संस्कृतगाथा-सप्तशती-नाम्ना ग्रन्थोऽयं मूल-प्राकृतगाथा-संस्कृत-छाया-टीकादि-सहितः प्राकाश्यत निर्णयसागर प्रेस (मुम्बई) तः 1933 ई. वर्षे।

ग्रन्थावल्यामस्यां विभिन्नेषु खण्डेषु ये ग्रन्थाः प्रकाश्यन्ते तेषु भट्टमहोदयैर्विलिखिताः संस्कृतटीकाष्टिप्पण्यो वा, ये ग्रन्थावगमे साहाय्यमाचरेयुः, पद्यैः सह प्रकाश्यन्ते। हिन्द्यनुवादोऽपि बहुषु ग्रन्थेषु प्रथमतः सहैव प्राकाश्यत। स नाऽत्र परिगृह्यते। ग्रन्थभूमिकादीनां ते ते भागा ये तदानीन्तनपरिदृश्यं स्पष्टीकुर्युः, त इह प्रकाश्यन्ते। इत्थं प्रायः शताब्दीमे-कामनुव्याप्य, १९०४ ई. तोऽद्यावधि भट्टमहाभागानां या साहित्यरचना ग्रन्थेषु, पत्रपत्रिकासु, रचनासंग्रहेषु वा प्रकाशमभजत् तस्याः संग्रहोऽत्र यथाशक्यं तस्मिन्नेव स्वरूपे समर्प्यते विदुषां प्रसादाय क्रमशः।

एवंविधे संग्रहे 'सम्पूर्णता', सर्वगुणसम्पन्नता च न कथमपि विनिश्चाययितुं शक्या, इति जानन्त्येव सुधियस्तथापि परिशुद्धतायै प्रयतितमस्माभिः। इदमपि स्पष्टं यच्छास्त्रीयमर्यादा-मनुसरद्भिरपि साम्प्रतिकैर्मुद्रकैर्बहुधा परसवर्णस्य स्थानेऽनुस्वारो विवशतयाऽनवधानतया वा मुद्र्यते, मर्षयिष्यन्ति विद्वांसस्तादृशानि स्थलानि। मुद्रणसौविध्यानुरोधादन्यविधमपि 'शैथिल्यं' समयानुरोधाद् विद्वद्भिः पाठकैः क्षंस्यते इत्याशासानैरस्माभिः प्रस्तूयते सङ्ग्रहोऽयम्।

ग्रन्थावल्यामस्यां पद्यमया ग्रन्थाः, कथोपन्यासगद्यादिमयाश्च पृथक् पृथग् भागेषु प्रकाश्यन्ते। मञ्जुकवितानिकुञ्जाख्या काव्यशृङ्खला प्रथमं प्रकाश्यते यस्यां जयपुरवैभवम्, गोविन्दवैभवं चेत्याख्यं काव्यद्वयं कानिचित् मुक्तकानि च प्रथमे खण्डे, साहित्यवैभवाख्यं काव्यसङ्कलनं च द्वितीये खण्डे प्रस्तूयते। तृतीये खण्डे संस्कृतगाथासप्तशती प्रकाश्यते यस्या उल्लेखोऽस्माभिरत्र कृतपूर्वः। अत्र हि हालसंकलितानां प्राकृतगाथानां संस्कृते आर्याछन्दोबद्धं

रूपान्तरणं भट्टश्रीमथुरानाथशास्त्रिणा प्रस्तुतं यत् 'समच्छन्दोऽनुवाद' पदेनाऽपि व्यपदिश्यतेऽन्यान्यभाषासु। सहैव व्यङ्ग्यसर्वङ्कषाख्या व्याख्यापि प्रकाश्यते, तल्लिखिता विस्तृता भूमिकापि यस्यां प्राकृतगाथानां काव्यसौन्दर्यं तु विवृतमेव,अमरुशतकेन, गोवर्धनकृतयाऽऽर्यासप्तसत्या च सह प्राकृतगाथानां वर्ण्यवस्तुनः कृतिशिल्पस्य च तौलनिकमध्ययनं विशिष्य विहितमस्ति, तदनु व्रजभाषायाः सुप्रथितायां कविवर्यविहारीविरचितायां दोहाच्छन्दोबद्धायां विहारिसप्तसत्यां कथं प्राकृतगाथासप्तसत्याः स्पष्टः प्रभावः परिलक्ष्यते इत्यपि विस्तृत्य विवेचनमस्ति। तौलनिकस्याध्ययनस्य निवेशं कृत्वा सम्पाद्य ग्रन्थस्य सर्वाङ्गीणं विवेचनं प्रस्तुवन्तीनां भूमिकानां परम्परा पाश्चात्यविवेचनप्रथानामांशिकं प्रभावं गृह्णन्ती ऊनविंश्याः शताब्द्या उत्तरार्धे साहित्यपुनर्जागरणयुगे भारते प्रससारेति विदुषां मतम्। तादृशी परम्परा मुम्बईस्थनिर्णयसागर-मुद्रणालयात् प्रकाशितेषु ग्रन्थेष्वपि तदानीं दृष्टिगोचराभूत्। काव्यमालाख्यग्रन्थमालायाः प्रकाशनेषु तदिदं द्रष्टुं शक्यते (यथा म.म.पं. दुर्गाप्रसादद्विवेदसम्पादिते साहित्यदर्पणाख्यग्रन्थे तादृशी भूमिकाऽस्ति)। भाषेतरकृतीनां तौलनिकमध्ययनं क्रोडीकुर्वती विमर्शवहा सेयं संस्कृत-गाथासप्तशतीभूमिका तुलनात्मकाध्ययनगर्भभूमिकानां संस्कृते प्रथममवतरणं मन्यते(1933वर्षे)।

मञ्जुनाथग्रन्थावल्या द्वितीयो भागस्तेषां गद्यरचनानां प्रकाशनार्थं कल्पितोऽस्ति। खण्डस्यास्य प्रथमेऽस्मिन् भागे भट्टमहाभागानां त्रयः उपन्यासग्रन्थाः षष्टिप्राया लघुकथाश्च प्रकाश्यन्ते। कथा एताः शिल्पदृष्ट्या भाषाभावादिदृष्ट्या च कथाकाराणामुपजीव्यभूताः सन्ति।

कस्मिंश्चिदप्येकस्मिन् सङ्ग्रहे केनचिदेकेन कविना प्रणीता एतावत्यो कथाः प्रायशो नैवोपलभ्यन्ते। अत्र सङ्गृहीतकथासु काश्चन भृशं प्रशंसिताऽभूवन् सहृदयसमवाये। ता एताः समवाप्य विदांसो नूनमनुभविष्यन्ति हर्षप्रकर्षमिति नो विश्वासः।

ग्रन्थावलीप्रकाशनस्य समग्राऽपि परिकल्पना राष्ट्रियसंस्कृतसंस्थानकुलपतीनां स्वयमुत्कृष्टसर्जकानां, दूरदृष्टिं व्यापकं च समीक्षणसामर्थ्यं बिभ्रतां प्रो. राधावल्लभत्रिपाठिनामेव प्रसादः, अतस्ते सर्वात्मना सर्वेषामस्माकं कार्तज्ञ्यं, धन्यवादांश्चार्हन्ति। जयपुरपरिसरे साहित्यविभागोपाचार्येण कर्मठेन विदुषा डॉ. रमाकान्तपाण्डेयेन स्वप्रतिभया श्रमेण च सम्पादनकार्ये सामग्रीसङ्कलने च यत्प्रशस्यं साहाय्यमनुष्ठितं, तत्कृते सस्नेहं शतशो धन्यवादैराशीराशिभिश्चाऽभिनन्द्यतेऽयम्। अस्य खण्डस्य पृष्ठादिसंयोजने सुषमाशर्म-चिरञ्जीविन्या यत्साहाय्यमनुष्ठितं तत्कृते सा साधुवादमर्हति।

अत्र प्रकाशिता दुर्लभकथाः समवाप्य सहृदयलोकः स्वागतं करिष्यति खण्डस्यास्येत्याशास्ते।

**देवर्षि-कलानाथशास्त्री**

# भट्टश्रीमथुरानाथशास्त्रिप्रणीतटीकादिग्रन्थानां परिचयः

साहित्यवैभव-जयपुरवैभव-गोविन्दवैभवादिप्रबन्धप्रणयनप्राप्तप्रथिम्ना भट्टश्रीमथुरानाथशास्त्रिणा यथा साम्प्रतिकसंस्कृतसाहित्यस्य समुल्लासाय विरचिता विविधविधासंवलिताः काव्य-कथा-गीति-गजल-नाट्यादयो ग्रन्थास्तथैव शास्त्रसन्ततेः सातत्यं सारल्येनाविष्कर्तुं प्राचीनकाव्यानां सम्यगर्थावबोधाय च तैः केचन टीकाग्रन्थाः समीक्षाग्रन्थाश्चापि प्रणीता अभवन्। अथेह तेषां ग्रन्थानां वैशिष्ट्यं विज्ञापयितुं क्रमशः संक्षेपेण परिचयः पुरस्क्रियते।

**१. रसगङ्गाधरसरला-**

भारतीयकाव्यशास्त्रे पण्डितराजजगन्नाथेन नव्यन्यायशास्त्रीयपारिभाषिकपद-परिपूर्णपरिष्कारपद्धतिमवलम्ब्य प्रणीतो रसगङ्गाधराख्यः सन्दर्भः सम्प्रत्यपि सुधीसमवाये पाण्डित्यनिकषत्वेन समादृतो वर्तते। अवच्छेदकावच्छिन्न-प्रतियोगिता-अनुयोगिता-विषयता-विषयिताप्रभृतिनव्यन्यायप्रसिद्धपदप्रयोगं समवाप्य साहित्यिका ग्रन्थस्याऽस्याऽध्ययने न तथा समुत्सहन्ते। ग्रन्थेऽस्मिन् भट्टश्रीनागेशप्रणीता मर्मप्रकाशाख्यैव काचन व्याख्या लभ्यते स्म। भट्टमहाभागैः सममर्मप्रकाशव्याख्यस्य रसगङ्गाधरस्य स्वीयया सरलाख्यटीकया संवलितं संस्करणं निर्णयसागरमुद्रणालयात् प्रकाशमनायि। सेयं सरला ग्रन्थग्रन्थिभेदने तन्निगूढरहस्योद्बोधने च अध्येतर्णामुपकारिका। नागेशेनाऽस्या मतभेदोऽपि दृश्यते पदे पदे। निर्णयसागरमुद्रणालयात् गुरुमर्मप्रकाशसनाथितरसगङ्गाधरेण सह सरलायाः प्रकाशनं १९३९ तमे वर्षेऽभूत्। १९४५ वर्षं यावद् ग्रन्थस्याऽस्य षट्संस्करणानि प्रकाशितान्यभवन्निति महत्त्वमस्य स्वयमेव सिद्धम्।

रसगङ्गाधरपरिशीलने सरलाया वैशिष्ट्यं बहुभिः खलु मनीषिभिः पुरस्कृतम्। अथात्र राष्ट्रपतिसम्मानितानां विश्रुतवैदुषीकाणां पण्डितविश्वनाथमिश्रमहोदयानां तद्विषयकं मतमुपस्थाप्यते-

रसगङ्गाधरोपरि वर्तमानासु अनेक व्याख्यासु महाविदुषो नागेशभट्टस्य व्याख्या तथा विद्वद्वरस्य भट्टमथुरानाथशास्त्रिणश्च सरला व्याख्या चेति द्वे व्याख्ये स्तः महत्त्वपूर्णे। अद्यत्वे वर्तमानानां समासां व्याख्यानामाधारभूमिः सरलाव्याख्यैवेति शक्यते वक्तुम्। प्रथमाननेऽल्प-कलेवरापीयं द्वितीयानने वैशद्यमादधाना स्फोरयति रसगङ्गाधरीयं रहस्यं निपुणम्। क्वचिच्च निराकृतं नागेशाभिमतमप्यनया। ग्रन्थोऽयं गभीरतरो विवेच्यविषयाश्चाऽनेके तथापि

कतिपयान्येव स्थलानि आनीयन्तेऽत्र विचारपदवीम्।

इदम्प्रथमतया तावद् विचार्यते काव्यलक्षणमेव। पण्डितराजोऽस्ति शब्दपर्याप्तकाव्यतावादी। अतएव रमणीयार्थप्रतिपादकः शब्दः काव्यमिति लक्षणयाञ्चकाराऽसौ। अर्थनिष्ठा रमणीयता च लोकोत्तराह्लादजनकज्ञानगोचरतारूपा। लोकोत्तरत्वं चाह्लादगतश्चमत्कारत्वापरपर्यायोऽनुभवसाक्षिको जातिविशेषः। लोकोत्तराह्लादस्य कारणञ्च काव्यार्थस्य पुनः पुनरनुसन्धानात्मको भावनाविशेष एव। इत्थञ्च–चमत्कारजनकभावनाविषयार्थप्रतिपादकशब्दत्वं काव्यत्वमिति।

लक्षणस्यास्य पदकृत्यं स्पष्टयन् नागेशो लिखति यत् अस्मिन् लक्षणे शब्दपदमपहाय रमणीयार्थप्रतिपादक एव काव्यमित्येव यदि कथितं स्यात् तदा अनुरागस्य व्यञ्जको रमणीकटाक्षोऽपि काव्यत्वं यायात्। लक्षणेऽत्र प्रतिपादकशब्दं त्यक्त्वा यदि वाचकशब्दो लिखितः स्यात् तदाभिधेयार्थस्योपस्थापकस्य वाचकशब्दस्यैव काव्यत्वं स्यात्, अपगतञ्च स्यात् व्यङ्ग्यार्थप्रतिपादकस्य काव्यत्वम्। रमणीयता चार्थगतैवाऽभिप्रेताऽत्र। तेन तत्प्रतिपादकस्यैव शब्दस्य काव्यत्वं न तु रमणीयशब्दनिष्पादकस्य व्याकरणशास्त्रस्यापि काव्यत्वं कथञ्चन। लक्षणमिदं संघटयन्ती सरला वदति–चमत्कारजनिका या भावना तादृशभावनाया विषयीभूतो योऽर्थस्तत्प्रतिपादकः शब्दः काव्यम्। अस्मिन् काव्यलक्षणे ज्ञानपदमपहाय भावनापदनिवेशनमत एव कृतं यत् यस्मिन् कस्मिंश्चित् सरसपद्ये श्रुतिपथमागते सति उद्बोधकान्तरवशात् घटादयोऽप्यर्थाः तत्र परापतन्तश्चेत् तद्वाचका घटादयः शब्दा अपि कथं न भजेरन् काव्यत्वम्? अतो लक्षणे भावनापदनिवेशः। ज्ञाने भासन्तां बाह्यार्थाः किन्तु ज्ञानधारायां भावनायां तेषां भासनं तु नैव संभवति। भावनायामपि बाह्यार्था भासिष्यन्त एवेति चेदाग्रहस्तदा अपहाय प्रथमलक्षणं कृतं द्वितीयं काव्यलक्षणमित्थम् यत्प्रतिपादितार्थविषयकभावनात्वं चमत्कारजनक–तावच्छेदकं तत्त्वम्। लक्षणमिदं सरलायामेवं स्पष्टीकृतम्– येन यैर्वा शब्दैरुपस्थापितस्य (अर्थात् यादृशानुपूर्वीप्रतिपादितस्य) अर्थस्य भावनया (पुनः पुनरनुसन्धानेन) चेतसि चमत्कार–जननं भवति तादृशचमत्कारजनकताया अवच्छेदके तादृशानुपूर्वीमत्वमेव काव्यत्वं भवतीत्याशयः। एवं सति सकलयाऽनुपूर्व्या यत्र चमत्कारो नोत्पद्यते किन्तु धारावाहिकरूपेणान्यदपि (अचमत्कारोऽपि) प्रतीयते तत्स्थलस्य निरासः।

अत्र पण्डितराजः चमत्कारनिष्ठजन्यतानिरूपितजनकतावच्छेदकं भावनात्वं स्वीकुरुते यतो हि काव्यार्थविषयक–पुनःपुनरनुसन्धानात्मिकया भावनयैव चमत्कारो जन्यत इति भावनात्वमेव चमत्कारजनकतावच्छेदकं वाच्यम्, किन्तु सरला तु भवनया चमत्कारजननं स्वीकुर्वत्यपि चमत्कारजनकतावच्छेदकं शब्दानुपूर्वीमत्वमेव स्वीकरोतीति स्पष्टमेवाऽत्र

विप्रतिषेध: पण्डितराजेन सह।

वस्तुत: पण्डितराजस्य काव्यलक्षणपरिष्कारे व्याख्यातर्णिां द्विधा प्रवृत्ति: दृश्यते। सन्त्येके शब्दपर्याप्तकाव्यतावादिन:, इतरे च मम्मटानुयायिनो रसचन्द्रिकाकृदादयश्चेति। सरला तु प्रथमपङ्क्तौ तिष्ठति व्याख्याति च पण्डितराजोक्ततत्त्वानि सारल्येन।

एवं रसगङ्गाधरोक्ततत्त्वपरिष्कारे सरलाया: समुपकारस्तु विद्यत एव। इयं क्वचित् पाठभेदादिसंशोधनेऽपि प्रवर्तत इत्यपरोऽपि विशेष:।

**२. कादम्बरीचषकम्**-

भट्टमहाभागै: कादम्बर्यां निबद्धा चषकेत्याख्या टीका भानुचन्द्रगणि-सिद्धिचन्द्रगणिभ्यां प्रणीताया: कादम्बरीटीकायाष्टिप्पणीरूपा वर्तते। इयं खलु ग्रन्थ- ग्रन्थिभेदनपुरस्सरं पाठादिसंशोधने तन्निर्धारणे चापि प्रवर्तते। प्राचीनटीकाकाराणां भ्रान्तयोऽप्यत्र महाभागैरेभि: बहुत्र पुरस्कृता दृश्यन्ते।

सर्वप्रथमं टिप्पणीयं भानुचन्द्रगणिसिद्धिचन्द्रगणिभ्यां प्रणीतया टीकया सह मुम्बईनगर-स्थनिर्णयसागरमुद्रणालयात् प्रकाशितोऽभवत्। भट्टमहाभागै: कादम्बर्या: पाठसंशोधने निर्धारणे च संस्करणेऽस्मिन् सुमहान् प्रयासो विहित इति ग्रन्थदर्शनेन ज्ञातुं शक्नुवन्ति सुधिय:। ततोऽप्य-धिकं टीकाकर्त्रो: प्रमादसंशोधने प्रयतितं महाभागैरेभिरिति पदे पदे तद्व्याख्यानं दृष्ट्वा ज्ञायते। अथ ग्रन्थस्याऽस्य सम्पादने भट्टमहाभागै: भूमिकायां निर्दिष्टा: केचन अनुभवा: प्रकाश्यन्ते-

श्रीभानुचन्द्रगणि-तच्छिष्यसिद्धचन्द्रगणिमहोदयाभ्यां विरचिता सेयं व्याख्या मोगलसम्राजोऽकबरस्य समये निरमीयत। यतो हीमौ अकबरसम्राजा सभाजिताविति ताभ्यामेव पुष्पिकायां स्वहस्तेन लिखितम्। गुरवे भानुचन्द्रगणिने सम्राजा महोपाध्यायपदमर्पितम्। महाभागेन चानेन 'शत्रुंजय' करो मोचित:। शिष्योऽपि सम्राजा 'षुस्युदमा' इत्युपपदेनालङ्कृत:। सेयं व्याख्या प्रत्येकपदस्य पर्यायप्रकटन एव व्यग्रा, कामं स पर्यायशब्द: 'इन्द्रस्य टीका बिडौजा:' एव किं न भवेत्। एको य: शब्द: पर्यायत्वेनादौ परिगृहीत:, अन्तपर्यन्तमपि स एव पदे पदे व्यवह्रियते। यथा-ग्रन्थे यत्र यत्रापि सुखपदमायातं तत्र तत्र 'सातम्' इत्यनेनैव व्याख्यातं महाभागेन। 'भ्रान्ति: आरेका, जरा विस्रसा, कुवलयं कुवेलम्' इत्यादिरूपेणैव सर्वत्र व्याख्यातवानयम्। पर्यायशब्दनिवेशो हि जिज्ञासूनां सारल्येन बोधनायैव भवति। सरलस्यापि पर्यायपदनिवेश: करणीय एवेति न ब्रह्मवाक्यम्, किन्त्वेतस्योपरि न मनागपि दृष्टिनिक्षेपष्टीकाकर्तु:। स्नानप्रकरणे आगतं 'स्नान' पदं कादम्बरीमारभमाणस्य कृते न वज्रसारं स्यात्, किन्तु स्नानपीठस्य पर्यायपदम् 'आप्लवनचतुष्किकाम्' इत्येव कृत्वाऽयं

कृती भवति। कुत्रचित्तु मूलपदं सर्वैर्बोध्यं भवति, टीकाकर्तुर्व्याख्या तु ज्ञातमप्यर्थं भ्रमिचक्रे निपातयति। यथा 'इन्द्रगोपैः (वर्षाकीटैः)' इत्यस्य व्याख्या 'अग्निरजोभिः' इति। कोऽस्यार्थ इति हि विदन्तु विद्वांस एव। 'विन्ध्यः जलबालकः, निगडः अन्दुकः, मदनः जराभीरुः, धूमो दहनकेतनः, जानु नलकीलकः' इत्यादिरूपेण कृता व्याख्या कियते उपकारायेति विमृशन्तु मनीषिण एव।

कुत्रचित्तु व्याख्यापाटवं तथा प्रकाशयति यथा कृतबुद्धिरपि वराको ग्रन्थस्वारस्यं विहाय व्याख्यापदानामर्थबोधायैव व्यग्रो भवति। नगरं 'द्रङ्गम्' इति कृत्वा व्याख्याति। 'लता' पदस्य हि सुप्रसिद्धोऽर्थः। किन्तु टीकाकारस्तदर्थमाह- 'सरलवृक्षः'। अत्र हि तन्नामको वृक्षविशेषः सर्वस्यैव बुद्धिनिष्ठो भवेत्। भूयस्सु स्थलेषु तु टीकाकारस्य व्याख्यामालोक्य क्षमाशीलस्यापि मानसमुद्वेलं भवति। 'निर्लक्षणा पाण्डुरपृष्ठा', 'दावानलशङ्का वनवह्निद्वापरः', 'वसन्त इव इष्य इव', इत्यादिव्याख्या कस्य क्षोभाय न भवेत्?

काव्ये च साहित्ये च टीकाकारमहोदयस्य कियत्पाण्डित्यमिति त्वग्रे निवेदयिष्यामि, किन्तु पर्यायशब्दान्वेषणे सर्वमपि वैदुष्यमेव निःशेषयतीति तु प्रत्येकमार्मिकस्यैवाऽवगतं भवेत्। 'निष्पतन्तीम्' इत्यस्य टीकां करोति 'अधःसंयोगफलिकां क्रियां कुर्वन्तीम्'। 'श्वसन्ती' इत्यस्यार्थमाह 'एतनं गृह्णन्ती'। 'एतनं गृह्णन्ती' इत्यस्यार्थ एतस्मिन्काले किमु सहसैवोदयेत्? परं सर्वस्यापि पदस्य यत्किञ्चित्पर्यायपदमवश्यं निवेश्यम्। पर्यायस्थापनेनैव टीका सुटीका भवतीति महोदयस्यास्य विचारः। किन्तु पर्यायनिरपेक्षस्य पदस्य बलात्पर्यायसंनिवेशे कुत्रचित्कुत्र-चित्कीदृशोऽनर्थः संभवतीति तु नास्य महाभागस्य विचारशक्तिरपि।

सूक्ष्ममीक्ष्यतां तावत्-गद्यकाव्यं हि कवीनां कृतित्वपरीक्षायै निकषो नाम। गद्य-काव्येष्वपि 'कथा'-काव्यमतिमनोहरम्, यद्धि वर्तमानकालिक 'उपन्यास (ह्श्र1द्द्य)' स्थापनीयम्। तत्रापि- वाचयतामाहाररुचिमपि तिरोदधत्तदिदं काव्यमस्ति यस्य लेखको मार्मिकाणां शिरोमणिः श्रीमान्बाणः। तस्यैव काव्यस्य नायिकायाः सौन्दर्यसारसंघटितायाः देवाङ्गनायाः (कादम्बर्याः) सौन्दर्यवर्णने महोदयोऽयं 'नाभिम्' व्यपदिशति 'तुन्दकूपीम्' इति! तुन्दपदं हि प्रचण्डोदरायाः कस्याश्चित्पम्फुल्यमानमुदरं सूचयत् (यतः प्रफुल्लोदस्तुन्दिल इत्युच्यते) गहनान्धकारितं महान्तं नाभीगर्तं चेतसि चित्रयतीति मन्ये न वक्तव्यं भवेन्मार्मिकाणां कृते। किन्तु सर्वतो निमीलितनयनोऽयं न किञ्चित्पश्यति। येन केनापि रूपेण पर्यायपदस्थापनायैव सहस्रनयनः सन् सोऽयं जागरूकः। अन्यदपि व्याख्यानं दृश्यताम्- 'तडिद्भिः ऐरावतीभिः', 'शुष्काणि वानानि', 'पिपासा उदन्या', 'वल्कलोपान्तेन चोचाञ्चलेन'। वल्कलोपान्तमित्यस्य योऽर्थं न ज्ञातवान् तदर्थं ह्येषां व्याख्याऽ-पेक्षिता, तस्य कृते चोचाञ्चलमिति किं सुखबोध्यं भवेत्? प्रसिद्धाऽप्रसिद्धयोरन्तरं न विदन्नेव किं 'निरन्तरव्याख्या'कारो भवति?

टीकाकारमहाभागस्य व्याकरणज्ञानमप्यलौकिकम्। कर्म-कर्तृवाच्ययो: सर्वत्रापि निरर्गलं प्रयोग:।'कृतान्तमुखकुहरादिव विनिर्गतमात्मानं मन्यमान: (अहम्)' इत्यत्र 'मन्यमान:' इति कर्तृवाच्यक्रियाया: 'ज्ञायमान:' (पृ ७४) इति व्याख्या। एवं प्राय: सर्वत्रैव। आत्मनेपद-परस्मैपदव्यत्यया: पदे पदे। 'व्रजमानानीव' संचरमाणानीव' (तृतीयान्तयोगं विनापि)। 'निमज्जप्रानम्' 'कम्पति सति' 'उत्पश्यमान:' (पृ. ७५) 'अजनिषम्' इत्यादीनि स्थाने स्थाने। लिङ्गव्यत्यया: प्रतिपदम्- 'बाहुवल्ल्यालिङ्गनान्' 'दन्तक्षतान्' 'कर्णावतंसानि' 'त्यज्यमानासु सत्सु', 'श्वेतायमानासु सत्सु' (पृ. ५४७)। ध्वनिशब्दस्य, 'रक्तिमा' इत्यादि इमनिच्प्रत्ययान्तानां च प्राय: स्त्रीत्वमेव प्रयुक्तम्।'पुस्तकान् शास्त्रान्' (२०५)।'अप्रापम्, अप्रार्थयत,' इत्याद्यपि बहुत्र। शिष्या इत्यस्य लोकोत्तरा व्याख्या 'शिष्यिणी' इति (पृ. २२०)। 'पराभवितस्य' 'रुदनम्' (पृ. ६८२) 'कार्यताम्' इत्येतस्य व्याख्या 'काराय्यताम् इत्यादि ('कराइये' इति 'हिन्दीं दृष्ट्वा') (पृ. ६६३)।

एवं कादम्बरीग्रन्थस्य टीकासम्पादने भट्टमहाभागैर्यो हि प्रयासो विहित: स तेषां कथनेनाऽनेन ज्ञातुं शक्यते। वस्तुत: भट्टमहोदयानां टिप्पणीं विना टीकाया अस्या एकमपि पदं ज्ञातुं न शक्यते। महाभागैरेभि: पदे पदे टीकाकारस्य व्याख्याने संशोधनपूर्वकं ग्रन्थस्य शुद्धपाठा अपि निर्दिष्टा: सन्ति। बहुत्र 'इति नोचितम्' 'इति उचित: पाठ:' इत्येवं निर्दिशद्भि: ग्रन्थस्य टीकायाश्च संशोधनमकारि भट्टमहोदयैरत्र। तत्सर्वं ग्रन्थं दृष्ट्वा ज्ञातुं शक्नुवन्ति सुधिय:।

**३. संस्कृतगाथासप्तशती-**

हालकृताया गाथासप्तशत्या: संस्कृतानुवादरूपोऽयं ग्रन्थ:। गाथानामर्थबोधार्थं भट्टमहाभागैरत्र सर्वङ्कषानाम्नी टीकाऽपि लिखिताऽभूत्। अयं ग्रन्थ: १९३३ वर्षे निर्णयसागर-मुद्रणालात् प्रकाशित:।

**४. शिलालेखललन्तिका-**

भट्टमहाभागै: नैकेषां शिलालेखानां सङ्कलनं सम्पादनं च कृत्वा ग्रन्थेऽस्मिन् प्रकाशनं कृतमभूत्। अयमपि ग्रन्थ: १९४१ ई. वर्षे मुम्बईनगरस्य निर्णयसागरमुद्रणालयात् प्रकाशितोऽभवत्।

महाभागैरेभि: कानिचित् पाठ्यपुस्तकान्यपि लिखितान्यभवन्। तेषु सुलभसंस्कृतम् संस्कृतसुबोधिनी चेति द्वौ पाठ्यग्रन्थावस्माभिर्दृष्टौ। कविकलानिधि-श्रीकृष्णभट्टस्य ईश्वरविलासमहाकाव्ये विलासिनीटीका श्रीमद्भि: प्रणीताऽभवत्। टीकयाऽनया सनाथितस्य ईश्वरविलासमहाकाव्यस्य प्रकाशनं १९५८ ई. वर्षे राजस्थान-प्राच्यविद्याप्रतिष्ठानत: समभूत्। ग्रन्थस्याऽस्य पुन: प्रकाशनं २००६ तमे वर्षे जयपुरस्थजगदीशसंस्कृतपुस्तकालयात् हिन्दी-

व्याख्यया सह सञ्जातमस्ति। कविकलानिधेः पद्यमुक्तावल्यां वृत्तमुक्तावल्यां चापि भट्टमहाभागैः टीका लिखिता। एतेषां टीकया सह ग्रन्थयोरनयोः क्रमशः १९५९ तमे तथा च १९६२ ई वर्षे राजस्थानप्राच्य-विद्याप्रतिष्ठानात् प्रकाशनं समभवत्।

भट्टमहाभागानां जीवनं साहित्यं चोपजीव्य बहुभिः खलु विद्वद्भिः ग्रन्थाः प्रणीता अभवन्। नैकेऽनुसन्धित्सवश्छात्रा महाभागानामेतेषां साहित्ये शोधोपाधिमपि लब्धवन्तः। जिज्ञासूनां शोधार्थिनां समुपकाराय केचन प्रमुखा ग्रन्था अत्र निर्दिश्यन्ते।

**१. मञ्जुनाथगौरवम्-**

गङ्गाधरभट्टमहोदयानां सम्पादकत्वे भट्टमहोदयानां जीवनं साहित्यं चाश्रित्य लिखितानां निबन्धानां सङ्कलनरूपोऽयं ग्रन्थः १९९० तम ई. वर्षे राजस्थानसंस्कृतअकादमीतः प्रकाशनमवाप।

**२. श्रीमथुरानाथशास्त्रिणः कृतित्वसमीक्षणम्-**

डॉ. प्रभाकरशास्त्रिणां सम्पादकत्वेऽस्य प्रकाशनं १९९५ ई. वर्षे राजस्थान-संस्कृतअकदमीतोऽभवत्।

**३. मञ्जुनाथगद्यगौरवम्-**

आचार्यराधावल्लभत्रिपाठिप्रवर्तितायाः प्रख्याग्रन्थमालायाः षष्ठः स्पन्दः मञ्जुनाथग्रन्थ-गौरवमिति नाम्ना डॉ. रमाकान्तपाण्डेयस्य सम्पादकत्वे २००४ ई. वर्षे नवदेहलीस्थप्रतिभा-प्रकाशनेन प्रकशतामानीतः। अत्र भट्टमहोदयानां प्रमुखा गद्यरचनाः सङ्कलिताः सन्ति।

**४. मञ्जुनाथवाग्वैजयन्ती-**

शिमलानगरस्थभारतीय-उच्च-अध्ययन-संस्थानम् इत्याख्यायाः संस्थायाः सहकारेण मञ्जुनाथस्मृतिसंस्थानम् २००४ ई. वर्षस्य अप्रैलमासे (३-४-दिनाङ्कयोः) ''संस्कृत वाङ्मय में भट्टश्रीमथुरानाथशास्त्री' इत्यस्मिन् विषये राष्ट्रियसंगोष्ठीं समायोजयत्। अत्र देशस्य विभिन्नेभ्यः प्रान्तेभ्यः समागतानां विदुषां व्याख्यानानि समभवन्। देवर्षि-कलानाथशास्त्रिणां सम्पादकत्वे प्रकाशितेऽस्मिन् ग्रन्थे तान्येव व्याख्यानानि भट्टमहोदयानां साहित्यसमीक्षणपराणि प्रकाशितानि सन्ति।

जयपुरात् प्रकाश्यमानाया भारतीपत्रिकाया भट्टमथुरानाथशास्त्रिस्मृतिविशेषाङ्केऽथ च स्वरमङ्गलाया भट्टजन्मशताब्दीविशेषाङ्के भट्टमहोदयानां साहित्यादिसमीक्षणे काचिदभिनवा दिगुन्मीलिता सहृदयमनीषिभिः। विविधेषु विश्वविद्यालयेषु भट्टमहोदयानां साहित्यमाश्रित्य शोधकार्याण्यभवन् भवन्ति चाद्यापीति तत्सर्वं विद्वद्भिर्भिर्गवेषणीयमिति शम्।

**-रमाकान्तपाण्डेयः**

# विषयानुक्रमणिका

**भट्ट-श्रीमथुरानाथशास्त्रिणां जीवनं साहित्यसेवा च** **xxvii**

**भूमिका** **xli**

# मञ्जुनाथग्रन्थावलिः

**उपन्यासखण्डः**

**उपन्यासः** **पृ.सं.**

१. आदर्शरमणी १-२३

२. मोगलसाम्राज्यसूत्रधारो महाराजो मानसिंहः २४-६५

३. भक्तिभावनो भगवान् ६६-८१

**कथाखण्डः**

**ऐतिहासिककथाः**

१. अलक्ष्येन्द्रश्च दस्युश्च ८३-८४

२. वीरबालकः ८५-८७

३. वीरपरीक्षा ८८-९१

४. धन्योऽसि धर्मवीर ९२-९४

५. अत्याचारिणः परिणामः ९५-९८

६. सिंहदुर्गे सिंहवियोगः ९९-१०३

७. पुरुराजस्य पौरुषम् १०४-१०६

८. अङ्गुलिमालः १०७-११०

९. पृथ्वीराजपौरुषम् १११-११५

१०. आल्हा च ऊदलश्च ११६-११९

११. मातृसेवायां चिरममरे द्वे बलिदाने १२०-२५

१२. सामन्तसङ्ग्रामः १२६-१२८

१३. भारतध्वजः बालवीरः १२९-१३४

१४. अनुतापः १३५-१३९

१५. चन्द्रहासः १४०-१४५

१६. कृत्रिमबुन्दी १४६-१४८

१७. वीरवाणी १४९-१५२

१८. प्राणानां भाषा १५३-१५५

१९. विजयिघण्टा १५६-१६०

२०. कर्णश्चार्जुनश्च १६१-१६३

२१. सत्यो बालचरः १६४-१६९

२२. धन्यो भारतीयवीरः १७०-१७२

२३. शस्त्रपाणि: क्षत्रियाणी १७३–१७९
२४. भाग्यरेखा १८०–१८८
२५. अमूल्यं वस्तु १८९–१९०

**सामाजिककथाः**

२६. असमसाहसम् १९१–१९६
२७. पश्यतोहर: १९७–२०३
२८. सरला २०४–२०९
२९. दयनीया २१०–२१६
३०. अनादृता २१७–२२०
३१. प्रत्युत्पन्नमतिर्हालिक: २२१
३२. क्षत्रियशोणितम् २२२–२३०
३३. चतुरवञ्चक: २३१–२३४
३४. ममाध्यापनम् २३५–२४०
३५. प्रतिशोध: २४१–२४५
३६. हृदयव्रण: २४६–२५०
३७. स्वावलम्बनम् २५१
३८. स्वामिभक्त: २५२–२५४
३९. दीक्षा २५५–२६०

**प्रणयकथाः**

४०. प्रेम्णो विजय: २६१–२६५
४१. निराशप्रणय: २६६–२७३
४२. प्रेम्ण: प्रतिदानम् २७४–२७७
४३. जले ज्वाला २७८–२८३

**हास्यकथाः**

४४. मिस्टरस्य 'गीताज्ञानम्' २८४–२८८
४५. चपण्डुक: २८९–२९७
४६. शिष्या २९८–३०५
४७. फाल्गुनगोष्ठी ३०६–३१०

**मनोवैज्ञानिककथा**

४८. विषमसमस्या ३११–३१५

**विविधविषयिण्यः कथाः**

४९. करुणा कपोती च युवती च ३१६–३१९
५०. मृगयु: ३२०–३२२
५१. दानी दीनेश: ३२३–३२८
५२. वीरो बालचर: ३२९–३३०
५३. धर्मधनयोर्युद्धं धर्मस्य विजयश्च ३३१–३३८
५४. न्यायाधिकारी ३३९–३४७
५५. द्वे स्पर्द्धे ३४८–३५०
५६. जरीयान् ज्यौतिषी ३५१–३५२
५७. जीविते ममता ३५३–३५७
५८. वीरवाणी ३५८–३६०
५९. भट्टश्रीमथुरानाथशास्त्रिणां कृतय: ३६१–३६९

# भट्ट-श्रीमथुरानाथशास्त्रिणां जीवनं साहित्यसेवा च

**वंशः पूर्वजाश्च -**

भट्टश्रीमथुरानाथशास्त्रिणो जन्म राजस्थान-वासिनाम् उत्तरभारते निवसतामान्ध्राभिजनानां विद्वद्ब्राह्मणानां कुले जयपुरेऽभूत्। प्रायश्चतुष्पञ्चशताब्दीतः पूर्वं विभिन्नैर्हेतुभिर्दक्षिणदिग्देशाद् बहूनि विद्वत्कुलानि सामूहिक-रूपेणोत्तर-भारतं प्रति प्रव्रजनमत्र विभिन्नेषु प्रान्तेषु प्रवासं च प्रारेभिरे। वल्लभाचार्यप्रभृतीनां वैष्णवाचार्याणां भक्तिधारा-प्रवाह-प्रचारोद्देश्यकेषु प्रवासेषु, वाराणस्यादिविद्याकेन्द्रेषु शास्त्रार्थाद्युद्देश्यकेषु पर्यटनेषु च सहचारित्वमापन्नानि बहूनि ब्राह्मणकुलानि समागच्छन्नुत्तर-भारते, अत्र च राजसम्मानादिना प्रश्रयं प्राप्य स्थायिरूपेण निवासं चक्रिरे। स्वयं वल्लभाचार्य आन्ध्राभिजनोऽ-भूदुत्तर-भारते च न्यवसत्। एवंविध एव तैलङ्गब्राह्मणानां कृष्णयजुर्वेदान्तर्गत-तैत्तिरीयशाखाध्यायिनां वंश एको मोगलकाले आन्ध्रप्रदेशादुत्तर-भारते समाययौ यस्य मूलपुरुषो बावीजी दीक्षितोऽभूत्। आङ्गिरस-आयास्य-गौतमेति त्रिप्रवरान्विते गौतमसगोत्रे वंशेऽस्मिन् बहवः परिनिष्ठिता विद्वांसोऽभूवन्। 'देवर्षि' इति अवटङ्कधरोऽयं वंशो 'देवलपल्ली' 'देवरकोंड' इत्याख्याद् वा प्रदेशान्निर्गत इति बहूनां धारणा, अत एव संस्कृत्य 'देवर्षि' इत्यभिजनाभिधानं समभूत इति तेषामाशयः। अन्ये तु दक्षिणभारतात् काशीं, काशीतः प्रयागं, प्रयागाद् रीवाँ नगरं च गत्वा तत्र राजसम्मानस्वरूपं 'दिवरिखिया' इत्याख्यं ग्रामं बान्धवनरेशाद् गोपालसिंहात् प्राप्तवान्। पूर्वपुरुषो मण्डलदीक्षित इति तमिमं 'देवरिख' ग्रामं व्यपदिश्य संस्कृतं नाम 'देवर्षि' इत्यवटङ्कस्य समभूदिति कथयन्ति।

भवतु तावत्किमपि कारणं, किन्तु देवर्षि इत्यवटङ्कधरोऽयं परिवारः काश्यां, प्रयागे, रीवांनगरे, अनूपशहरे च निवासं विधाय कवित्वख्यातिवशाद् विभिन्नैः राजवंशैः कुलपरम्परया सम्मानितो राजस्थानप्रान्ते बुन्दीनगरं प्राप यत्र ग्रामादिसम्पत्ति-प्रदानसम्मानेन वासितः। बून्दीपतेर्बुधसिंहस्य राजभाषाया रत्नं देवर्षिश्रीकृष्णभट्टः कविकलानिधिः संस्कृत-प्राकृताऽपभ्रंशव्रजभाषादीनां तलस्पर्शी विद्वान् विश्रुतः कविरलङ्कारशास्त्री चाऽभूद् यस्यैतिहासिकानि 'ईश्वरविलास' प्रभृतिकाव्यानि, 'पद्य-मुक्तावली' प्रभृतिमुक्तकसङ्ग्रहाः, 'वृत्तमुक्तावली' प्रभृति छन्दःशास्त्रग्रन्थाः संस्कृते, 'अलंकारक-लानिधि' 'शृंगार रसमाधुरी'

प्रभृतयो रीतिग्रन्थाश्च व्रजभाषायां प्रकाशिता:। प्रायो विंशतितोऽप्यधिका रचना अप्रकाशिता विविधेषु ग्रन्थागारेषूपलभ्यन्ते।

सोऽयं श्रीकृष्णभट्टो बून्दीपतेर्बुधसिंहस्य राजसभातो (बून्दीनरेशाद् याचनापुर:-सरं) जयपुरनरेशेन तत्संस्थापकेन सवाईजयसिंहेनाऽऽनीतस्तेनानुष्ठितेऽश्वमेधमखे सक्रियां भूमिकां निरवहत्, राजाज्ञया बहून् ग्रन्थांश्च प्रणिनाय। सवाईजयसिंहेन 'कविकलानिधि' रित्युपाधिना सम्मानित: सोऽयं मनीषी जयपुरनगरे एवं सप्तदश्यां शताब्द्यां (१६७५-१७६१ ई.) स्थायिरूपेण प्रत्यष्ठिपत् स्वकीयं परिवारम्। तदनु वंशेऽस्मिन् बहवो विद्वत्कवय: समभूवन् येषु श्रीकृष्णभट्टतनयो वाणी-भारतीत्याद्युपनामधारी श्रीद्वारकानाथभट्ट: संस्कृत-व्रजभाषादीनां विख्यात: कविरासीत्। जगदीशभट्ट-वासुदेवभट्ट-मण्डनभट्टादयो बहवो वंशजा अस्य राजकवयो मनीषिणो लेखकाश्चाभूवन्।

**शिक्षा-**

मण्डनभट्टो जयपुरराजवंशेन प्रभूतं सम्मानित: कविरासीत्। अस्यैव कुले श्रीलक्ष्मीनाथ-भट्ट-सुतस्य श्री द्वारकानाथभट्टस्य पत्नी श्रीजानकीदेवी मथुरानाथं संवत् १९४६ वैक्रमे वर्षे आषाढ-कृष्ण-सप्तम्यां (१८८९ई०) प्रासौत्। एतत्पिता द्वारकानाथभट्ट: सांसारिकव्यवहारविमुख: आध्यात्मिकप्रवृत्तिपर: श्रीमद्भागवतादिवाचने जप-पूजादिषु चाधिकां रुचिमन्वभूत्। पितामह: श्रीलक्ष्मीनाथ एव परिवारे प्रबन्धादिषु प्रमुखोऽभूत्। संस्कृतवैदुष्यपरम्परापरिपूतेऽप्यस्मिन् कुले ''राजवृत्तिसम्मानादि (तदानीन्तन) राजभाषायामुर्दूभाषायामधिकं लभ्यते'' इति धारणाऽऽसीत्। अत: शिशोर्मथुरानाथस्य शिक्षा उर्दूभाषायां भवतु येन सोऽयं न्यायालयादिषु सम्मानितं किञ्चित्पदमधि-गच्छेदित्यासीदेतत्पितामहस्य वाञ्छा। किन्तु स्वभाविकी रुचिरस्य शिशो: संस्कृतेऽभूत्। एवं च यत्किञ्चिदुर्दूभाषां पठित्वा कुलपरम्परापरिगतानि संस्कृत-पुस्तकान्यनेन रुचिवशात् पठितुमारब्धानि। तदनु प्राथमिककक्षासु शिक्षायै सोऽयं जयपुरीये महाराज-संस्कृत-कॉलेजे प्रवेशित:।

तत्र प्रवेशिकाध्यापकै: पं. काशीनाथशास्त्रिप्रभृतिभि: संस्कृतव्याकरणे लघुकौमुद्यादिषु भृशं सपरिश्रममध्यापितोऽसौ स्वल्पीयस्येव वध्यसि प्रवेशिका-परीक्षामुदतरत्। प्रवेशिकापरीक्षायामार्हन्तीं प्राप्तवन्तमेनं साहित्य-न्याय-व्याकरणेति शास्त्रत्रयस्य विद्वांसोऽध्यापका: स्वस्वविषयं पठितुं प्रैरिरन्। बहुविध-विचारानन्तरं निर्धारितं यदयं साहित्यव्याकरणेति शास्त्रद्वयं समकालमेव पठतु। तदानीं विषयविभाजनं, परीक्षाप्रणाली च नूत्नतया प्रवर्तिताऽभूत् कतिपयवर्षपूर्वमेवाति-कठोरा अभूवन् नियमास्तथापि तत्कालीनेन

शिक्षासञ्चालकेन श्रीसञ्जीवनगङ्गोपाध्यायेन विषयद्वयं पठितुं विशेषानुमतिरस्मै प्रदत्ता। साहित्याध्यापकाः नांगल्याभिजनाः श्री गोपीनाथदाधीचाः व्याकरणाध्यापकाः राजगुरुहरिदत्तझाममहाभागाश्चाभूवन्नस्याऽध्यापकाः। सोऽयं साहित्योपाध्याय-परीक्षां १९०१ ई. वर्षे व्याकरणोपाध्यायपरीक्षां च १९०३ ई० वर्षे समुदतरत्। साहित्यव्याकरणयोः प्रत्येकं वर्षत्रयव्यापी सोऽयं पाठ्यक्रमो वर्षषट्कमग्रहीष्यत्, विशेषानुमतिर्यदि नाऽलप्स्यत।

तदनु व्याकरणशास्त्रिपरीक्षाऽनेन सर्वप्राथम्यं लब्ध्वा प्रथमश्रेण्या १९०७ ई० वत्सरे समुत्तीर्णा। महाभाष्य-शेखर-मनोरमादि-विमर्शग्रन्थेषु सुबहु परिश्रम्य कॉलेजाध्यक्षाणां पं. लक्ष्मीनाथशास्त्रिणां शिष्यत्वे, न केवलं कॉलेजे एव, अपितु तेषां गृहेऽपि निरन्तरमध्ययनेनाऽनेका रात्रीरतिवाह्य, कष्टशतं सोढ्वा, गृहवाससुखानि परित्यज्य च 'गुरुकुलक्लिष्टेन' छात्रेणाऽनेन सपरिश्रममस्यां साफल्यं लब्धमभूत्। काशीस्था म.म.पं. शिवकुमारमिश्रप्रभृतयो भारतविश्रुता विद्वांसस्तदा परीक्षका अभूवन्। आसीत्तदा सेयं परिपाटी यत्प्रौढिम्नः पूर्णतः परीक्षिकास्वमूषु परीक्षासु ससम्मानमुत्तरतां परीक्षार्थिनां प्रमाणपत्रेषु परीक्षकाः स्वहस्ताक्षराण्यकुर्वन्, बहुधा च स्वकीन्याभिमतान्यपि व्यलिखन्। एतस्य प्रमाणपत्रे परीक्षकेण "लेखपटुरयं बटुः" इति टिप्पणी प्रत्ताऽभूत्।

एतस्मात् पूर्वं १९०६ ई० वत्सरे पंजाब-विश्विविद्यालयीयायां सर्वोच्चायां शास्त्रिपरीक्षायामयं प्रथमश्रेण्यां सर्वस्मिन्नपि विश्वविद्यालये प्राथम्यमलभत्। १९०९ ई. वर्षे पं. श्रीकृष्णशास्त्रिद्राविडस्य शिष्यरूपेणाऽयं महाराजसंस्कृतकॉलेजीयच्छात्रत्वेन साहित्याचार्य-परीक्षायां साफल्यमभजत्। समीक्षा-चक्रवर्ति-श्रीमधुसूदन-ओझामहाभागादप्ययं वेद-ब्राह्मणोपनिषद्-दर्शनग्रन्थानध्यगीष्ट।

अध्ययन-समकालमेव सम्पादनस्य साहित्यरचनायाश्च या प्रवृत्तिरस्मिन् परिलक्षिताऽभूत्तां विशदीकृत्य साहित्यसर्जनाया या भागीरथी भट्टमहोदयेन अजस्रं प्रवाहिता तस्याः परिचयोऽनुपदमेव प्रदीयते। अत्र तज्जीवनयात्रायाः संक्षिप्तमितिवृत्तमुल्लिख्यते पूर्वम्। सुन्दरलालभट्टस्य राजसम्मानिते ग्राम-सम्पत्तिस्वामिनि चाधिष्ठाने उत्तराधिकारित्वेन सुन्दरलालभट्टेन दत्तकपुत्रत्वेन गृहीतः सोऽयं भूसम्पत्तेः प्रबन्धं, प्रतिष्ठानोपरि यद् ऋणमुपचितमभूत्तस्य परिशोधनं च कृत्वा वित्तीयां स्थितिं दाढर्यं नीतवान्। ओरछा-(मध्यप्रदेश) राजगुरोः श्रीरघुनाथदेवदाऊजू महाभागस्य सुतया सावित्रीदेव्या सहाऽस्य विवाहः १९०९ई० वत्सरे समजायत। तिस्रः सन्ततयोऽपि समभूवन् किन्तु शैशव एव निधनं प्रयाताः। ततोऽजयगढ़ (मध्यप्रदेश) स्थस्य पं. नारायणरावस्य पुत्र्या मथुरादेव्याः पाणिग्रहणमनेन कृतं किन्तु कालगत्या मथुरादेवी वर्षावधावेव स्वर्गमारूढा। तदनु १९२२ ई० वत्सरे जयपुरसन्निकटस्थस्य महापुराग्रामस्य निवासिनः पं. शिवानन्द-गोस्वामिवंशजस्य पं. श्री

गोपीकृष्णगोस्वामिनः सुतया रामादेव्या सहाऽस्य विवाहः समजायत। विवाहबन्धनमिदं चिरस्थायि प्रतिपन्नम्। १९३४ ई० वर्षे कलानाथनामानं सुतं, १९३७ वर्षे जयानाम्नीं कन्यां, १९४० वर्षे विजयानाम्नीं कन्यां, १९४५ वर्षे च कमलानाथनामानं सुतमियं रामादेवी प्रासौत्।

**अध्यापनं राज्यसेवा च-**

साहित्याचार्य-परीक्षामुत्तीर्य महाराजसंस्कृतकॉलेजे प्राध्यापकपदे सेवामारब्धुमयं प्रोत्साहितो वयस्यैः। संस्कृतरत्नाकरादिमासिकपत्रेषु लेखकत्वेन सम्पादकत्वेन चास्य साहित्यसेवा तदानीं प्रसिद्धिं प्रारभमाणाऽभूत्। प्रतिभाऽप्यस्य सुविदिताऽऽसीत् किन्तु तदानीन्तनेन महाराज-संस्कृतकॉलेजाध्यक्षेण महामहोपाध्याय- पं. दुर्गाप्रसादद्विवेदेन पं. गोपीनाथधर्माधिकारिनामा विद्वानेकः प्राध्यापक-पदे नियुयुजे। एवं हि कालेजस्यास्य सेवापराङ्मुखोऽयं संस्कृत-हिन्द्यादिभाषासु काव्यादिरचनां कृत्वा हिन्दी-संस्कृताध्येतर्निं स्वगृहेऽध्याप्य च साहित्यजगतः शिक्षाजगतश्च सेवां कर्तुमारेभे।

भूसम्पत्तेः स्वामी राजसम्मानित-प्रतिष्ठानस्य चोत्तराधिकारी सोऽयमभूदिति कृत्वा नैवंविधानां तदानीन्तनानां विदुषां सम्मुखे आजीविकायास्तादृशी समस्याऽभूत्।

तदैव १९२४ ई. वर्षे जयपुरमहाराजस्य श्रीमानसिंहस्य प्रथमो विवाहमहोत्सवो जोधपुर-नगरे समायोजितोऽभूत्। समारोहेऽस्मिन् सोऽयं तत्र सङ्गतेन तत्कालीन-शिक्षा-सञ्चालकेन श्रीश्यामसुन्दरशर्मणा (यो ह्यस्याभिन्नं मित्रं परस्तात् समजायत, यश्चैतस्य मृत्योर्दिनद्वयात् पूर्वमेव दिवमारूढः) समनुरुद्धो यत्संस्कृतकॉलेजे साहित्याध्यापकपदमयं स्वीकुर्यादिति। एतत्फलस्वरूपं २६/१/२४ दिवसेऽयं म.म. दुर्गाप्रसादद्विवेदानामध्यक्षत्वकाले एव तत्राऽध्यापकपदं जग्राह। तदानीं जयपुरे आङ्गलशिक्षापद्धत्यनुसारं सामान्यशिक्षाप्रकारस्य विश्रुतो महाविद्यालयो महाराजासंस्कृतकॉलेज इति नाम्ना प्रचलति स्म, यत्र संस्कृत-विषयोऽपि शिक्ष्यते स्म। अत्र संस्कृतप्राध्यापकपदे पं. मधुसूदन ओझा, पं. वीरेश्वरशास्त्री, पं. बदरीनाथशास्त्री, पं. सूर्यनारायणाचार्य इत्यादयो विद्वांसोऽधितस्थिवांसः आसन्। १९२५ई० वर्षे एव कालेजेऽस्मिन् प्राध्यापकस्यावश्यकतामनुभूय पं. श्यामसुन्दरशर्मणाऽयं तत्र नियुक्तः। अस्मिन् कॉलेजे १९३१ वर्ष-पर्यन्तमयं छात्रान् सरलया पद्धत्या संस्कृतं पाठयामास। प्राथमिक-संस्कृत-शिक्षण-पुस्तकानां लेखनायाऽस्मै सोऽयं प्रसङ्ग एव प्रेरणामदात्।

एतदनन्तरं जयपुर-राज्याश्रितानां संस्कृतपाठशालानां निरीक्षकपदे सोऽयं राज्यशासनेन समाकारितो यत्र १९३१ वर्षात् १९३४ वर्षपर्यन्तमयं कार्यमकरोत्। तदानीं संस्कृत-कॉलेजे महामहो-पाध्यायगिरिधरशर्मचतुर्वेदाः कालेजाध्यक्षपदे, साहित्यविभागाध्यक्षपदे च पं. श्री बिहारीलालशर्मणः (डबलाचार्य इति प्रथिताः) कार्यं कुर्वाणा आसन्। बिहारीलालशर्मणां

निधनोत्तरं भट्टमहोदयः साहित्यविभागाध्यक्षपदे २५/०२/१९३४ दिनाङ्कात् न्ययोज्यत यत्राऽयं ई. १९४२ वर्षावधि कार्यं कृत्वा सेवानिवृत्तोऽभूत्। नाऽऽसीदेतस्मात् पूर्वं देशीय-राज्यशासनेषु तादृशं कठोरमेकरूपं सेवानिवृत्ते-र्बन्धनम्। न वा राजकीयेष्वभिलेखेषु जन्मतिथेः प्रमाणनस्य सुदृढाऽभूत् परम्परा।

१९४२ ई० वर्षे सोऽयं भट्टमहोदयः केवलं ५३ वर्षदेशीय एवाऽभूत् किन्तु संयोगवशाद् राज्यसेवाऽभिलेखे कदाचन प्रारम्भे जन्मवर्षं संवत् १९४४ इति समभूल्लेखितम् (संवत १९४६ इति स्थाने) अतो यदा ५५ वर्ष-वयस्कानां राज्यसेवकानां सेवानिवृत्तिदृशा निर्धारणं क्रियमाणमभूत्तदाऽन्यैः सह भट्टमहोदयस्यापि सेवानिवृत्तिः क्रियतामिति विचारः समसूच्यत। भट्टमहोदयेन जन्मतिथि-संशोधनाय, सेवाया अवधिवृद्धये (एक्सटेंशन) वा न जात्वपि प्रयतितम्। सोऽयं बहुधा कथयति स्म ''मया सेवायै न कदापि प्रार्थनापत्रं प्रदत्तम्, स्वयं राज्याधिकारिभिरेव मम साहित्यसेवागुणानां बहुमानरूपेणाऽहं सेवायां गृहीतः। एवं हि यदा ते सेवानिवृत्तेरादेशान् दित्सवस्तर्हि किमित्यहं तद्विरोधे प्रयत्नान् कुर्याम्?'' इति।

एवं त्रिपञ्चाशद्वर्षीये वयसि भट्टमहाभागो राजकीयसेवातो निवृत्तोऽभूत्, न तु साहित्य-सेवातः। प्रत्युत सेवानिवृत्तेरनन्तरं सर्जनात्मककार्येषु समधिकं व्यापृतिः सञ्जाता। सेवासमकालमपि सम्पादनकार्येषु, काव्यरचनायां, हिन्दी-व्रजभाषादिसाहित्यसेवायां, ग्रन्थानां सम्पादन-टीकालेखनादिकार्येषु चाऽयं सर्वदैव व्यापृत एवाऽस्थात्।

महाराजाकॉलेजे पाश्चात्यशिक्षाक्रमे प्रवृत्तांश्छात्रान् सरलया पद्धत्या संस्कृतं पाठयितुमनेन 'संस्कृत-सुबोधिनी' नामकं पाठ्यपुस्तकमलेखि, पुस्तकमिदं स्वयं तेन प्राकाशि। संस्कृतकॉलेजे शास्त्रिपरीक्षां दित्सूंश्छात्रान् कादम्बरीं पाठयताऽनेन तस्याः सम्पादनं विधाय 'चषक' नाम्नी टीका व्यलेखि, साहित्याचार्यश्रेण्याश्छात्रान् ''रसगङ्गाधरं'' पाठयन्नयं तस्य मुद्रितपाठं भृशमशुद्धं प्राप्य तस्य संस्करणं सम्पादनं च विधाय 'सरला' नाम्नीं टीकामलिखत्। शिलालेखानां सङ्कलनं कृत्वा ''शिलालेख-ललन्तिका'' नामकं पुस्तकं सम्पादयामास। पुस्तकत्रयमिदं निर्णयसागरमुद्रणालयेन मुम्बईस्थेन प्राकाशि। एवं पाठनसहयोगीनि पुस्तकानि प्रणेतुं प्रेरणाऽस्मै राज्यसेवाप्रसङ्गेनैव प्राप्ता। किन्तु सेवानिवृत्तेरनन्तरं विविधासु समितिषु, संस्थासु च सक्रियां भूमिकां निर्वहताऽनेन भूयसी साहित्यसेवा विहिता, स्वयमनेके ग्रन्थाः प्रणीताः प्रकाशिता अपि। सर्वेषामेषां विवरणमग्रे प्रदास्यते।

**जीवनयात्रा** -

सोऽयं प्रारम्भादेव राजकीयभूसम्पत्तिभोगी आसीदिति वेतनादिरायः केवलं गौणरूपेण, द्वैतीयकं सहायकं वाऽऽयस्रोतोऽस्याभूत्। इदमेव कारणं यत्सेवानिवृत्तिस्तदानीमार्थिक-

सन्तुलनमस्य न जात्वपि विषमीकर्तुमक्षमत। निवृत्तिवेतन (पेंशन) मस्मै द्वाचत्वारिंशद् - रूप्यकात्मकं जयपुरराज्येन निर्धारितम्। ''मदीयस्यैकस्य भृत्यस्य मासिकवेतनाय पर्याप्तं भवतीति सुमहद् योगदानमस्य सोऽयं परिहासे कथयति स्म।'' भूसम्पत्तेरायेन सोऽयं नगरसीमायामेकं भवनमक्रीणात्, नवीनायां वसतौ भवनं निर्मापयामास, पुत्र्योः पुत्रस्य च विवाहसमारोहानायोजयामास।

अखिलभारतीय-हिन्दी-साहित्य-सम्मेलनस्य द्वात्रिंशत्तमेऽधिवेशने स्वागतमन्त्रित्वेन जयपुरे सुमहान्तं हिन्द्याः साहित्यकं समारोहं १९४४ ई. वर्षे, अ.भा. संस्कृत-साहित्य-सम्मेलनस्याष्टादशेऽ-धिवेशनेऽखिलभारतीय-कविसंम्मेलनसभापतित्वेन संस्कृतविदुषां सुमहानां सम्मलेन १९४५ वत्सरे च सोऽयं सफलयास। १९४३ ई.वत्सरे महात्मागान्धिने समर्पितेऽभिनन्दनग्रन्थेऽस्य संस्कृत-काव्यबद्धः सम्मानाञ्जलिरस्य स्वातन्त्र्य-सङ्ग्रामेण सहानुभूतिं प्रमाणयति। भारतस्य स्वातन्त्र्यानन्तरं जयपुरादि-राज्यानि भारतीय-सङ्घे सममिलन्, अनुपदमेव भूसम्पत्ति- (जागीर) धारकाणां ''जागीरा''ख्या सम्पत्तिरपि राजसात्कृता सर्वकारेण, किन्तु नेदमपि दृढ-सेवाव्रतिनोऽस्य जीवने विचलनमापादयामास यतो ह्यस्य जीवनं तपोनिष्ठानां, संयमिनां, निःस्पृहाणां मुनीनामिव सरलमाडम्बरहीनं चाऽभूत् प्रारम्भादेव। सोऽयं स्ववस्त्राणि स्वयं प्रक्षालयति स्म, प्रतिदिनं भ्रमणाय प्रयाति स्म, प्रतिदिनं संस्कृते किंचन लेख्यमेवेति व्रतमपि निसर्गतो धारयति स्म।

एतस्यैवेयं परिणतिर्यदनेन संस्कृते लिखितानां पृष्ठानां गणनाऽपि कर्तुमद्य न पार्यते। प्रभूतानामेतल्लिखितानां ग्रन्थानां, सम्पादितानां पत्रिकाणां, लेखानां, कथानामन्यासां च रचनानां पृष्ठसंख्या लक्षादप्यधिका सम्भवेदिति स्फुटं प्रतीयते। विविधभाषाऽभिज्ञोऽयं भारतीये शास्त्रीयसङ्गीते सुभृशं रुचिशीलोऽभूत्। आकाशवाण्याः प्रमुखसङ्गीताधिकारिणा ठाकुरजयदेवसिंहेनाऽनुरुद्धोऽयं 'ध्रुपद' शैल्यां गीतान्यप्यलिखत्, गजल, ठुमरी-प्रभृतिशैलीषु गेयपदानि त्वयमाबाल्यं प्रणयति स्मैव। सुदृढ-घटितगात्रस्यास्य व्यायामे रुचिः शैशवकालादेवाऽभूत्। जलसन्तरणं विशेषत उच्चस्थलेभ्यो जले कूर्दन-निमज्जनोन्मज्जनादिक्रीडासु (डाइव) चाप्यस्य कौशलं वार्धक्येऽपि जनान् विस्मापयति स्म। इदमेवाऽभूत् कारणं यन्मधुमेहादयो रोगा नैनमस्पृशन्। सप्ततिवर्षायुष ऊर्ध्वं हृदयरोगस्य लक्षणानि समुदभवन्। तथापि विविधकार्येषु लेखने च व्यापृतोऽयं न विश्रमं स्पृहयति स्म। यद्यपि नायं ग्रामान्तरस्य नगरान्तरस्य वा यात्राभिरोचयति स्म, तथापि सम्मेलनेषु, इतरेषु च समारोहेषु, व्याख्यानादेः कवितापाठस्य वा कृतेऽयं प्रमुख-साहित्यिकसंस्थाभिः सर्वकारैर्विश्वविद्यालयैश्चाऽऽमन्त्र्यते स्म, प्रयाति स्म च कतिधा तद्विधेषु प्रसङ्गेषु। कविसम्मेलनेषु तु प्रायश एवायं सभापतिपदमारोढुमामन्त्र्यते स्म।

एवं निरन्तरं साहित्य-सेवाव्यापृतस्याऽस्य निधनं ७५ वर्षावस्थायां जयपुरे हृदयाभिघात-वशात् ४ जून १९६४ दिनाङ्के समभूत्। सर्वकारेण, राज्यपालादिभिः, पत्रपत्रिकाभिः समग्रस्यापि देशस्य विद्वद्भिश्चाऽस्य निधनं साहित्यजगतोऽपूरणीया क्षतिरुदघोष्यत, शोकप्रस्तावाः पारिताः श्रद्धाञ्जलिविशेषाङ्कोऽपि 'भारती' संस्कृतमासिकेन प्राकाश्यत।

**साहित्य-सर्जना-**

प्रायः पञ्चसप्ततिवर्षात्मके समग्रेऽप्यायुषि भट्टमथुरानाथशास्त्रिणाऽविरतं संस्कृत-साहित्यसेवाव्रतं निरूढम्। कैशोरे वयसि हिन्दी-उर्दू-वङ्गभाषा-गुर्जरभाषादीनां ज्ञानमासाद्य तासां साहित्यमप्यनेनाऽधीतं, तत्र च यद् वैशिष्ट्यमनुभूतं तस्याऽवतारणा संस्कृतेऽपि कथं भवेदित्यस्य विशेषतः प्रयत्नोऽनेनाऽक्रियत।

तस्मिन् हि काले काव्य-जगति व्रजभाषाया महत्त्वमक्षुण्णमासीत्। अभूत् सेयं भाषा प्रायः समग्रस्यापि भारतस्य काव्यभाषात्वेन प्रतिष्ठिता पञ्चशताब्दीर्यावन्मध्यकालीनेतिहासे। कबीरदासस्य तुलसीदासस्य च समयादारभ्य रीतिकालं यावत् (प्रायः पञ्चदशीं शताब्दीमारभ्यैकोनविंशीं यावत्!) प्रमुखैः कविभिरस्यां सुललिता काव्यरचना व्यधायि। एतस्याः प्रमुखं छन्दोऽभूद् 'घनाक्षरी' त्याख्यं यत् 'मनहरण', कवित्त इत्यादि संज्ञाभिरप्यभिधीयते। अस्मिन् छन्दसि अन्त्यानुप्रासस्य, लयबद्धाया-श्छन्दोगतेः, दण्डक-सहजस्य विस्तारस्य च यश्चमत्कारः स काव्यमञ्चेषु कविसम्मेलनेषु च श्रोतृणां हृदयान्यावर्जयति स्म, अत एव छन्द इदं कवित्वस्य निकषायमाणममन्यत, तत एव 'कवित्त' इत्याख्याऽस्य प्रथिता।

भट्टमहोदयस्य पूर्वजाः संस्कृत-प्राकृतादिवद् व्रजभाषाया अपि सुकवयोऽभूवन्। तेषां परम्परामनुसरताऽनेनाऽपि व्रजभाषायां काव्यरचना प्रारब्धा किन्तु तस्या लालित्यं संस्कृतेऽवतारयितुं व्रजभाषाछन्दःसु संस्कृतकवितामप्ययमारेभे। उर्दू - प्रचलितासु 'गजल' गीतिषु प्रयुज्यमानानां वृत्तानां बन्धेऽपि संस्कृत-गीतिरनेनाऽवतारिता। तस्मिन् समये प्रथितासु ठुमरी-दादरा-प्रभृति-शैलीषु सरल-गेय-लयेषु चापि गीतयोऽनेन निबद्धाः। सर्वेणानेन सर्जना-व्यापारेणाऽस्य प्रतिपिपादयिषितमभूद् यत् संस्कृतमद्यापि जीविता भाषा, न मृता। जानन्ति काव्य-मर्मज्ञा यत् कविसम्मेलनेषु मुशायराख्यसभासु च गीतयो गजल-गीतयश्च श्रोतॄन् कथमाप्याययन्ति। शैल्यामस्यां निबद्धा गीतयो विशेषतश्च घनाक्षरीच्छन्दोबद्धा सानुप्रासा सुरम्या च कविता यदाऽनेन जयपुरीयविद्वत्सभासु श्राविता श्रोतृमण्डल्यामलौकिकमिव किञ्चित् कार्मणं प्रसारितवती तदा तत्कालीनैरधिकारिभिः, म.म.पं. गिरधरशर्मप्रभृतिभिर्विद्वद्भिश्चायं घनाक्षरीच्छन्दःसु काव्यरचनायै प्रोत्साहितः।

एतस्यैव परिणामोऽभूत् ''मञ्जुकवितानिकुञ्ज'' इत्याख्यायाः काव्यशृङ्खलायाः प्रणयनं यस्यां ''मञ्जुनाथ''इति नाम्नाऽयं काव्यसङ्कलनत्रयम् प्रकाशयामास। ''साहित्यवैभवम्'' इत्याख्ये संग्रहे रसालङ्कारदिघटिता ऋतुवर्णन-नवरसवर्णन-प्रेम-गीति-नीति-अन्योक्ति-प्रभृतिविषयिणी कविता १९३० ई. वत्सरे निर्णय-सागरमुद्रणालये मुद्रापयित्वाऽनेन प्रकाशिता। जयपुरनगरस्य तद्राजवंशस्य नागरिकाणामुद्यानानामन्येषां च स्थलानां वर्णनपरा काव्यरचना १९४७ ई. वर्षे 'जयपुरवैभवा' ख्यग्रन्थे प्राकाशि। भक्तिरचनानां संग्रहः १९५७ ई. वर्षे 'गोविन्दवैभव' नाम्ना गोरखपुरस्थेन गीता प्रेसेन प्रकाशितः। एषु काव्येषु व्रजभाषाच्छन्दसां प्रयोगस्त्वभूदेव, उर्दूच्छन्दसां संस्कृतच्छन्दसामपि सर्वेषां नर्कुटकाश्वघाटी-मन्दाक्रान्ता-शिखरिण्यादीनां प्रचुरः प्रयोगोऽस्ति। १९५७ ई. वर्षे गोविन्दवैभवं यदा प्रकाश्यमानमासीत्, अनेनाऽयं स्वकीयश्चरमः कविताग्रन्थ इति घोषितमुक्तं च यदाजीवनमहं नरवर्णनादिषु, शृङ्गारवीरादिरसनिबन्धने च स्ववाणीं व्यापारयन्नभूवम्। सम्प्रति गोविन्दगुणवर्णनेन पावितां वाणीं नाहं नरकथयाऽऽविलीकरिष्यामि। तत आरभ्याऽनेन गद्य एव लेखनी व्यापारिता, नैकमपि पद्यं लिखितम्। एवं विविध-विषयक-काव्यरचनया, नवीनच्छन्दसां संस्कृतेऽवतारणया चाऽस्य कवित्वयशः सर्वत्र प्रथितं, कविशिरोमण्यादय उपाधयश्च संस्कृत-संस्थाभिरदीयन्त। काव्यरचनाऽतिरिक्तेऽपि विविधे क्षेत्रेऽस्य साहित्यसर्जना सुभृशमुल्लेखनीया।

सूचितचरमिदं यत् संस्कृताध्ययनेन समकालमेव व्रजभाषासाहित्यस्य हिन्दीभाषायाः, बङ्गभाषायाः, आङ्ग्लभाषायाश्चाप्यध्ययनमनेन स्वकीयरुचिवशाद् विहितम्। आसीत्तदा जयपुरनगरे व्रजभाषाकवीनां राजसम्मानितानां कवीश्वराणां च भूयान् समुदायः। तत्प्रेरणया 'कविमण्डल' इत्याख्या हिन्दी-कवि-संस्था तदानीं प्रचलति स्म यस्याः सक्रियः कार्यकर्ताऽभूदयम्। हिन्दीसाहित्य रात्रिपाठशाला-नाम्नीं सायङ्कालीनां पाठशालामप्यसौ स्थापयामास यस्यां छात्राः हिन्दी-साहित्यमपठन्, हिन्दीसाहित्य-सम्मेलन (प्रयाग)स्य प्रथमा-विशारद-साहित्य-रत्नादि-परीक्षासु च प्राविशन्।

**पत्रकारता-**

संस्कृत-साहित्यसेवा त्वनेन छात्रावस्थात एव प्रारब्धाऽभूत्। जयपुरीयो महाराजसंस्कृत-कालेजस्तदानीं भारतविश्रुतं वैदुष्यकेन्द्रमभूद्यत्र विविधशास्त्र-निष्णाता विद्वांसोऽध्यापकपदमलमकुर्वन्। छात्रा अपि तदानीं भूरि- प्रतिभाशालिनोऽभूवन्। एवंविधे प्रतिभोद्दीपके वातावरणे कालेजीयैः कतिपयैःप्रतिभाशालिभिश्छात्रैः ''संस्कृत-चन्द्रिका'' ऽऽख्यायाः संस्कृतसाहित्यपत्रिकायाः साहित्यरचनारुचिप्रेरितैः १९०४ ई. वत्सरे निश्चितं यज्जयपुरादपि संस्कृतस्य मासिकपत्रं किञ्चित्प्रकाशमेतु। एतस्याऽभूत्परिणामो यत्

''संस्कृतरत्नाकर'' नामकं मासिकपत्रं जयपुरात्प्राकाश्यत येन संस्कृत-पत्रकारताया इतिहासे नवीनस्य युगस्यावतारणा कृता।

व्यतियाति काले पत्रमिदमखिलभारतवर्षीय - संस्कृतसाहित्यसम्मेलनस्य मुखपत्रत्वेन स्वीकृतिमलभत। तदिदं प्रायोऽर्धशताब्दीं यावज्जयपुरात् प्राकाश्यत, ततः काशीतः कानपुरतश्च प्रकाशं लब्ध्वा दिल्लीनगरीं मुख्यालयत्वेन प्रापत्। एतस्य संस्थापकेषु युवकेषु म.म. गिरधरशर्मा चतुर्वेदी, राजगुरु पं. चन्द्रदत ओझा, व्याकरणाचार्यः सूर्यनारायणशर्मा भट्टश्रीमथुरानाथः शास्त्री च प्रमुखा अभूवन्। सर्वेऽप्येते विद्वांसस्तदानीं कालेजीयच्छात्राः स्नातका वा अभूवन्। सर्वप्रथमोऽस्याङ्को ''जयपुर-विद्वन्मण्डल- द्वारा सम्पादित'' इति मुद्रिताक्षरोऽभूत् किन्त्वस्य सम्पादने 'सम्पादकीय' लेखने च प्रमुखतया सोऽयं किशोरो भट्टमथुरानाथ एव प्रामुख्येन प्रवृत्तोऽभूत्। प्रथमं सम्पादकीयमप्ययमलिखित्। परस्तात् सहकारि-सम्पादकत्वेन लेखांष्टिप्पणीश्चालिखत्। तदनु प्रभूतं कालं प्रधान-सम्पादकोऽस्थात्। प्रायः पञ्चाशद्वर्षावधावस्मिन् द्विः पर्यायद्वये, पत्रमिदं प्राकाशि। प्रायः सर्वस्मिन्नप्यस्मिन्नवधौ मथुरानाथशास्त्री सम्पादकरूपेणाऽनेन सह सम्बद्धोऽस्थात्। अनेन प्रसङ्गेनाऽयं संस्कृतपत्रकारतायां युगप्रवर्तनमिवाऽकरोत्। वङ्गभाषायां निपुणेन, तत्साहित्याध्येत्राऽनेन तदानीं वङ्गभाषायाः ''प्रवासि'' - प्रभृतीनां विश्वप्रथितानां मासिकपत्राणां, डॉ. रामानन्दचट्टोपाध्याय-प्रभृतीनां सम्पादकाचार्याणां च शैलीं संस्कृतेऽवतार्यानेके नूतनाः स्तम्भा, विधाः, सरण्यश्च संस्कृते समारब्धाः।'विनोद-वाटिका' इति शीर्षकेण व्यङ्ग्यविनोदानां (चुटकुले), ''संवादाः सम्पादकाभिप्रायाश्च'' इति शीर्षकेण सामयिकघटनानां तत्सम्बन्धे सम्पादकीयटिप्पणीनां वङ्गमासिकपत्र- 'प्रवासि' सम्पादकादिभिः प्रचालितस्य 'कष्टिपाथर' (निकष) स्तम्भस्याऽनुरूपमेव 'साहित्यकुसुमवाटिका' शीर्षकेण नूतनसाहित्य-समालोचनस्य च स्तम्भानयं नियतीकृतवान्, लघुकथाः, यात्रावृत्तानि (रिपोर्ताज), काल्पनिककथाः (फंतासी), एकाङ्कनाटकानि, ललितनिबन्धान्, शोधलेखान्, लघूपन्यासान् (धारावाहिकरूपेण), अन्याश्च विविधा नूतनविधाः समावेश्य पत्रस्याऽस्य माध्यमेन सोऽयं संस्कृतपत्रकारतायां नवीनानि कीर्तिमानान्यरयचत्।

आदर्शरमणी, अनादृता, असमसाहसम् इत्यादयो बहवः संस्कृतोपन्यासा वङ्गभाषीयोपन्यास-शैली-प्रेरितेनाऽनेन लिखिताः पत्रेऽस्मिन् धारावाहिक-शृङ्खलासु प्राकाश्यन्त। बहवो लेखकाः प्रेरिताः स्थापिताश्चानेन, पत्रस्याऽस्य बहवो विशेषाङ्काः विषय-विशेषमवलम्ब्य प्रभूतं साहित्यं प्रस्तुवन्तः प्रकाशमभजन्। वेदाङ्कः (विद्यावाचस्पति-श्रीमधुसूदनओझा-महाभागाय समर्पितो वेदविद्याविवेचनपरः) आयुर्वेदाङ्कः (स्वामिलक्ष्मीराम-भिषगाचार्याय समर्पितः), शिक्षाङ्कः (शिक्षापरिष्काराय प्रकाशितः), दर्शनाङ्कः (म.म.पं.

गिरिधरशर्मणे समर्पितः) इत्यादयो विशेषाङ्का ऐतिहासिकं महत्त्वं दधति। इत्थं हि सन् १९०४ वर्षादारभ्य ई. १९४९ वर्षपर्यन्तं, यदवधीदं पत्रं जयपुरात्प्राकाश्यत, सोऽयं सम्पादकत्वमस्य निरवहत्। (कतिपयं कालं व्याकरणाचार्याः पं. सूर्यनारायणशर्माणोऽपि सम्पादकत्व-मन्वतिष्ठन्)। १९५० ई. वर्षात्काशीं प्रति प्रस्थितवत्यस्मिन् पत्रे १९५२ ई. वत्सरे जयपुरात् प्रकाश्यमानाया 'भारती' संस्कृतमासिक-पत्रिकायाः सम्पादनमनेनाऽऽरब्धं यन्मृत्युपर्यन्तं निर्व्यूढम्।

**अनुवादाः -**

विविधभाषागतस्य साहित्यस्य संस्कृतेऽनुवादमाध्यमेनावतारणाऽप्यस्य प्रमुखमवदानम्। प्राकृतभाषायाः प्रसिद्धस्य मुक्तकसंग्रहस्य 'गाथासप्तशतीति' ख्यातस्य हालकविविरचितस्य वाचनं कुर्वाणेनाऽनेनाऽनुभूतं यत्प्राकृतमिदानीं न तावत् परिचितमिति प्राकृतगाथास्त्वरितमेव न हृदयङ्गमा जायन्ते। यदि तासां संस्कृते समच्छन्दोऽनुवादः स्यात्तर्हि सजीवता सुभृशमनुभूयेत। एतस्याऽभूत् फलं यत्सर्वासामपि गाथानां संस्कृते निबन्धनं कृत्वा, आलोचनात्मक-तुलनात्मक-विवेचनपरकया-भूमिकया सह ''संस्कृत-गाथा-सप्तशती''ति शीर्षकेण तामिमां कृतिमसौ निर्णयसागरमुद्रणालयात् प्रकाशयामास। अस्या व्यङ्ग्य-सर्वङ्कषानाम्नीं टीकामप्ययमलिखत् या सहैव प्राकाशि १९३३ ई. वर्षे।

व्रजभाषाकवेः विहारिणः सप्तशतीमप्ययमनूदितवान् संस्कृते दोहाच्छन्दःस्वेव। एवंविधानि संस्कृतदोहाच्छदांसि बहूनि 'विहारिविलास' इति शीर्षकान्तः 'साहित्यवैभव' काव्ये प्रकाशितानि सुबहु चर्चितान्यभूवन्। वङ्ग-भाषाया बहूनामुपन्यासानां हिन्दीकथाकाराणां प्रेमचन्द-प्रभृतीनां बह्वीनां लघुकथानां, वङ्गीयानां गल्पानां (लघुकथानाम्) निबन्धानामन्यासु च विधासु विलिखितस्य प्रभूतस्य साहित्यस्यानुवादा अनेन विहिताः। एवंविधसाहित्यस्यच्छायां गृहीत्वा तदनुहारिण्यां शैल्यां संस्कृते तद्विधा रचना विधायानेन संस्कृतेऽभिव्यक्तिविधानां विस्तारं चाऽऽनायितुं प्रयतितम्।

**संस्कृत-भाषाया जीवितत्वख्यापनम्-**

एवं हि सर्जनात्मकलेखनेन पत्रकारतया च संस्कृते नूतनं जीवनं सञ्चारियितुमस्य प्रयासाः सोद्देश्या अभूवन्। तदानीं हि संस्कृते विदुषां वर्गद्वयमभूत्। एको वर्गोऽभूत् पाश्चात्यशोधपरम्पराप्रभावितानां विदुषां ये संस्कृतमन्यान्यप्राच्यभाषावत् क्लासिकलभाषां मत्वा तस्यामनुसन्धानस्य प्राच्यविद्याशोधस्य च क्षेत्रमेवाऽपश्यन्, आङ्ग्लभाषामाध्यमेन, इतर-भाषासु वा तस्या दर्शनानां शास्त्राणां प्राचीन-साहित्यस्य गवेषणामनुवादान् विवेचनां चैव फलप्रदाममन्यन्त। इतरो वर्गोऽभूत्तेषां विदुषां ये संस्कृतं मातृभाषावद् भाषन्ते स्म, जीवितां

जाग्रतीं च भाषाममन्यन्त, तस्यां मौलिकं सर्जनात्मकं च लेखनमनवरतं प्रचाल्यान्यान्याऽऽधुनिक-भारतीयभाषावत्तामप्याधुनिकीं भाषां मत्वा तस्यां पत्रपत्रिकाणां प्रसारं, कविसम्मेलनाऽऽदीनामायोजनं च सार्थकमनुभवन्ति स्म, जीवितभाषावत् प्रतिष्ठापयितुं च तामाजीवनं प्रायतन्त। भट्टमहोदया अस्यैव वर्गस्य विद्वांसोऽभूवन्।

अत एवाऽसकृत्ते एवंविधाः स्थितीरन्वभवन् यदा पूर्वमुल्लिखितस्य वर्गस्य शोधविद्वद्भिः संस्कृतभाषा केवलं प्राचीना भाषा व्यपदिष्टा, तस्यां नूतन-साहित्य-निर्माणमकिञ्चित्करमिव च प्रतिपिपादयिषितम्। एंवविधासु स्थितिषु साऽऽटोपं, विविधैः प्रमाणैः प्रत्यक्षमनुभावितैश्च चमत्कारैरेते संस्कृतामाधुनिकभाषावत् जीवितां साधयन्ति स्म, एवंविधानि बहून्यान्दोलनानि च परिचालयन्ति स्म यैः संस्कृतभाषा पूर्णतो जीविता सिध्येत्।

एवंविधेषु प्रयत्नेष्वेकोऽभून्नूतनविधासु, नूतनच्छन्दस्सु नूतनविषयेषु च साहित्यसर्जना, अपरोऽभूद्विविधनवयुगीन-साहित्यस्य विभिन्न-भाषाभ्यः संस्कृतेऽनुवादः, इतरश्च संस्कृतेऽभिव्यक्ति-पद्धतीनां विस्तारः।

सन् १९३० वत्सरे वाराणस्यां सञ्जजातेऽखिल-भारतीय-संस्कृत-साहित्य-सम्मेलनस्याऽ-धिवेशनेऽनेन प्रदर्शितं यदेकं वाक्यं संस्कृते कथं परःशतं प्रकारैर्वक्तुं शक्यते। एतेषु कतिपयानि वाक्यानि नवम्बर १९३९ मासस्य ''सुप्रभातम्'' (वाराणसी) इत्याख्ये मासिकपत्रे 'संस्कृतभाषाया महत्त्वम्' 'इति शीर्षकान्तर्गतं प्रकाशितान्यपि। एतदतिरिक्तं तैः पत्र-पत्रिकासु लेखमालामाध्यमेन, विदुषामभिमतानि सङ्कलय्य तानि च प्रकाश्य प्रत्यक्षमेकमान्दोलनमपि प्राचाल्यत यत्र 'किं संस्कृतभाषा मृतभाषा?' इति प्रश्नमुद्भाव्य तस्या जीवितत्वमख्याप्यत। संस्कृतरत्नाकर (जयपुर) मासिकपत्रे (वर्षम् १२ अंकः ४, वर्षम् १४ अंकः९) ''गन्धर्वसेनस्य स्वर्गयात्रा'' इति शीर्षकेणैतद्विषयकं लेखमेकं लिखित्वा संस्कृतस्य मृतभाषात्वप्रवादस्य निःसारतामेते स्फुटीचक्रुः।

वाराणस्याः शोधमासिके ''सारस्वती सुषमा'' इत्याख्ये (सप्तम-वर्षस्य) द्वितीयेऽङ्के ''अपि नाम सेयमव्यावहारिकी'' इति शीर्षकेण संस्कृतभाषाया जीवितभाषात्वमेते साधयामासुः।

एवं हि संस्कृते सर्जनात्मकस्य लेखनस्य, पत्रकारताया नूतनविधानामन्येषामभि-व्यक्ति-प्रकाराणां च संस्कृतेऽवतारणस्यैकमुद्देश्य-मिदमप्यभूदेषां दृष्टौ, यदनेन संस्कृतभाषा विश्वस्य भारतस्य चाऽन्यान्या-ऽधुनिकभाषाणां समष्टौ जीविताया आधुनिक्याश्च भाषाया रूपे प्रतिष्ठितं स्थानं लभेतेति।

**सम्पादनं टीकालेखनं च-**

पत्रसम्पादनेन साहित्यिक-पत्रकारताक्षेत्रे भट्टमहोदयैर्नवीन-युगावतारणा यथा विहिता, तथैव प्राचीनग्रन्थपरिष्कारे, सम्पादने, भूमिकालेखने, टिप्पणादिलेखने चापि सुमहत्परिश्रान्तम्। पूर्वमुल्लिखितं कादम्बर्याः सम्पादनं 'चषक' -टिप्पणीलेखनं रसगंगाधरस्य पाठपरिष्कारः, ''सरला'' टीकालेखनं, तदतिरिक्तं गीतगोविन्दस्य सम्पादनं पादटिप्पणीलेखनं चानेन निर्णयसागर-मुद्रणालयानुरोधेन विहितम। ग्रन्थत्रयमिदं तस्मादेव मुद्रणालयात् प्रकाशितं, संस्कृतविद्वत्सु बहूनि वर्षाणि लोकप्रियं सुप्रसृतं चाभूत्। सेवानिवृत्त्यनन्तरमनेन, स्वपूर्वजेन श्रीकृष्णभट्टेन लिखितस्यैतिहासिक-महाकाव्यस्य ''ईश्वरविलास'' नामकस्य दुर्लभा पाण्डुलिपिः पुणेस्थभाण्डारकरशोधप्रतिष्ठानादधिगत्य सम्पादिता, विस्तृतभूमिकया, ऐतिहासिक-टिप्पणीभिः, स्वनिर्मितया ''विलासिनी'' टीकया च सह राजस्थान-प्राच्य-विद्या-प्रतिष्ठानात् (जोधपुरात्) प्रकाशिता। तदिदं महाकाव्यं राष्ट्रिय-संस्कृत-संस्थानस्य जयपुर-परिसरे साहित्यविभागीयप्राध्यापकेन डॉ० रमाकान्तपाण्डेयेन हिन्दीभाषायामनूद्य २००७ ई. जयपुरात् प्रकाशितमभवत्। यत्र भट्टमहाभागानां विलोसिनी टीकाऽपि संयोजिताऽस्ति। श्रीकृष्णभट्टलिखितायाः पद्यमुक्तावल्याः (मुक्तकसङ्ग्रहस्य) टीका ''गुणगुम्फनिका'' -ऽनेन लिखिता, ग्रन्थस्य सम्पादनं भूमिकया सह कृतं, ग्रन्थश्चायमपि राजस्थान-प्राच्य-विद्या-प्रतिष्ठानात्, प्रकाशितः। श्रीकृष्णभट्टस्य छन्दः शास्त्रग्रन्थो वृत्तमुक्तावल्याख्योऽपि पुणेस्थभाण्डार-करशोधसंस्थानादानाय्य सभूमिकोऽनेन राजस्थान-प्राच्य-विद्या-प्रतिष्ठानात् प्राकाशि। शिलालेखरूपेण च यानि दानपत्राणि प्राचीनैर्नरेशैः सुललितसंस्कृतभाषायां विलेखितानि, तेषामध्ययनं संस्कृतपाठ्यक्रमे समावेशितमभूद्विभिन्नै राज्यैः। एवंविधस्याऽध्ययनस्य कृते पाठ्यपुस्तकरूपेण कतिपयशिलालेखादीनां सङ्कलनं, सम्पादनं, टिप्पणीलेखनं च विधाय 'शिलालेखललन्तिका' नाम्नाऽयं ग्रन्थो निर्णयसागरात्प्राकाशि भट्टमहोदयैरिति पूर्वं सूचितमेव।

**नाट्यकृतयः -**

काव्यलेखनेऽस्य नैपुण्यं तु विश्रुतमेव, अनेन महाराजसंस्कृतकॉलेजे साहित्य-विभागाध्यक्ष-पदमधितिष्ठता 'उत्तररामचरित' नाटकस्य मञ्चोपयोगि रूपान्तरणं विधाय तस्य नाटकस्य कालेजीयनाट्य-संघद्वारा रामप्रकाशाख्ये प्रेक्षागृहे मञ्चावतारणे सुमहद् योगदानमनुष्ठितम्, मध्ये मध्ये स्वनिर्मिताः संस्कृतगीतयोऽन्तर्वेशिताश्च (१९३१ ई. वर्षे)। ततश्च महाभारत-कथामाधारीकृत 'पाण्डव-विजया'ख्य-नाटकस्य मञ्चोपयुक्ता पटकथा विविधप्राचीन-नाटकानामाधारेण रचिता, १९४० ई. वर्षे तस्मिन्नेव नाट्यगृहे मञ्चिता च। जयपुरे आकाशवाणीकेन्द्रस्य प्रारम्भादनन्तरं तदधिकारिभिरनुरुद्धोऽसौ ''मञ्जुला''ख्यं

ध्वनिनाट्यं लिलेख। प्रसारितमिदं जयपुरीयाऽऽकाशवाणीकेन्द्रात् १६/१/५७ दिनाङ्के ८/८/५८ दिनाङ्के च तदेतदपि मञ्जुनाथगद्यगौरवम्' इत्याख्ये ग्रन्थे प्रकाशितम्।

**गद्य-रचनाः -**

संस्कृत-गद्येऽप्यस्य लेखनं विपुलमस्ति। शताधिकाः संस्कृतलघुकथाः, दशाधिका उपन्यासाः, बहवो ललिता-निबन्धाः, काल्पनिककथाः (फन्तासी), व्यङ्ग्यलेखाः, यात्रावृत्तानि, रूपककथाः (एलेगरी), प्रतीक-कथा, विनोदा (चुटकुले) अन्यासु च विधासु लिखिताः सर्जनात्मकरचना गणनातीता एव। शोधलेखाः समालोचनात्मकलेखाः, साहित्यालोचनटिप्पण्यः, सामयिक-टिप्पणानि, समाचारसारादयश्चापि भूरिशो व्यलेख्यन्ताऽनेन। वाराणसी-जयपुर-दिल्ली प्रभृतिकेन्द्रेभ्यः प्रकाशितेषु सर्वेष्वपि पत्रेष्वस्यैवंविधा रचनाः प्राकाश्यन्त यासां सूची सुदुष्करा साङ्गोपाङ्गत्वेन निर्मातुम्। तथापि बहुभिः शोधार्थिभिरेवं-विधरचनासु बह्वीनां सूचीकरणस्य प्रयत्नाः सन्त्यनुष्ठिताः। तत एवैवंविधा सूची शक्येत द्रष्टुम्।

**हिन्दी रचनाः -**

हिन्दीभाषायामप्यनेन बहवो ग्रन्थाः, लेखाः, लघुकथाः, कविताश्चालिख्यन्त। वाल्मीकीये रामायणे विभीषण-शरणागति-प्रसङ्गमवलम्ब्य सुरुचिरं विवेचनात्मकं नूतनमेव पन्थानमनुसरत् पुस्तकं 'शरणागतिरहस्य' नाम्नाऽऽनेन लिखितं यद् गीताप्रेसात् (गोरखपुर) प्रकाशितं लोकप्रियमभूत्। 'सरस्वती'- 'माधुरी'-'कल्याण'-जयभूमि-राष्ट्रभाषा-प्रभृति-पत्र-पत्रिकासु लिखिता अस्य लेखा लघुकथाश्च हिन्दीजगत्यप्येनं सुविदितमकार्षुः। विविधेष्वभिनन्दन-ग्रन्थेषु तत्सम्पादका एनमुपसृत्य विविधविषयकान् लेखानस्य गृहीत्वा प्रकाशितवन्तः।

**समाजे सम्मानः -**

इदमभूत्स्वाभाविकं यदस्य सुदीर्घायै संस्कृतसैवायै परितुष्यद्भिर्विद्वद्भिः, संस्थाभिः, सर्वकारैश्च विविध-सम्मानोपाधिप्रदानद्वारा, सदस्यताप्रदानद्वारा चास्य सम्माननं क्रियेत। अतः सेवाकाले एवायं वाराणस्यादिविविधविद्याकेन्द्राणां परीक्षकः, प्रमुख-वक्ता, समारोहाणामध्यक्षो, मुख्यातिथिर्वा निर्धार्य समामन्त्रितः सादरम्। वाराणस्यां सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयस्य स्थापनानन्तरं तस्य दीक्षान्तसमहारोहावसरे समायोजितस्याखिल-भारतीय-कविसम्मेलनस्या-ध्यक्षपदे, अखिलभारतीय-संस्कृत-साहित्यसम्मेलनेन समायोज्यमानानां कविसम्मेलना-नामध्यक्षपदे, राजस्थान-संस्कृत-साहित्य-सम्मेलनस्य बीकानेरनगरेऽधिविष्टस्य द्वितीया-धिवेशनस्याध्यक्षपदे (१९५०ई.), विविधानामन्येषां समारोहाणां चाध्यक्षपदेऽसकृदयं सानुरोधं

प्रतिष्ठापितोऽभूत्। राजस्थान-सर्वकारेण स्थापितायाः (सन् १९५७ ई.) साहित्य-अकादम्याः संस्थापकसदस्योऽयमभूत्। राजस्थान-राज्येन संस्कृत-शिक्षायाः नीतिनिर्धारणाय नियुक्ताया विशेषज्ञसमितेः संस्कृत-मण्डलस्य च सदस्योऽयमभूत् (१९५२-१९६२)। बड़ौदा-विश्वविद्यालयेन रससिद्धान्तानां काव्यसिद्धान्तानां च विषये व्याख्यानानि विधातुमयमा-मन्त्रितोऽभूत् (१९५६ई.)। उज्जयिन्यां कालिदाससमारोहस्य परम्परां प्रारब्धवती कालिदास-समितिरेनं सदस्यं निर्माय समारोहावसरे समायोज्यमानानां कविसम्मेलनानामध्यक्षं च विधाय स्वगौरवमेधितवती। तस्याः प्रमुखः श्रीसूर्यनारायणव्यासस्त्वेनम् "अभिवनकालिदास" पदेनैव सम्बोधयति स्म।

सन् १९३६ ई. वत्सरे जयपुरेऽधिविष्टेन (पञ्चविंशाधिवेशने) अखिलभारतीय-संस्कृत-साहित्य-सम्मेलनेनास्मै कविशिरोमणिः इत्युपाधिः, वाराणसीस्थ-भारतधर्म-महामण्डलेन साहित्यवारि-धित्युपाधिः, बम्बईस्थ-वेल्लनाटीय-तैलङ्गसभया "कविसार्वभौम" इत्युपाधिश्चास्मै स्वर्णपदक-सम्मानोत्तरीयादिभिः सह सादरमुपायनीकृतः। १९६१ वत्सरे यदा राजस्थान-सर्वकारेण संस्कृतविदुषां कृते पुरस्कारयोजना प्रारभ्यत, तदा सर्वप्रथममस्मै त्रिसहस्रमुद्रात्मकं पुरस्कारं प्रदाय योजनाया अस्याः शुभारम्भो विहितः। बह्वीभिः संस्थाभिर्मरणोत्तरमस्मै सम्मानाः प्रदत्ताः।

**निःस्पृहता -**

पूर्वमुल्लिखितमेव यद् भट्टमहोदयो जयपुर-राज्येन प्रदत्तायाः प्रभूतभूसम्पत्तेः स्वामी आसीदिति नानेनार्थकष्टमनुभूतं यौवने। बाल्ये तु सुमहतीमार्थिकीं विपत्तिं सोढ्वा, स्वमतिबलेन विविधान् सङ्कटानुत्तीर्य स्वकीयं राजसम्मानितं संस्थानमनेन कथं सङ्कटादुद्धृतमित्यस्य वर्णनमनेन 'साहित्यवैभव' काव्ये कृतमस्ति। द्वारकानाथभट्टस्य सुतोऽयं यदा सुन्दरलालभट्टस्य दत्तकोऽभूत्तदानेन ज्ञातं यत् समग्राऽपि भूसम्पत्तिः पूर्वजैः बन्धकतया उत्तमर्णानामधिकारे निक्षिप्ताऽस्ति, न कोऽप्यायः, ऋणं वर्धते यतस्तस्य कुसीदमनुदिनं प्रवर्धते। निःसन्तानं दिवङ्गतेन श्री सुन्दरलालेन, अन्यैश्च स्वेच्छाचरणा-नुरागिभिरनवधानिभिः पूर्वजैः स्वकीयकार्यार्थं विभिन्नेभ्यो जनेभ्यः ऋणानि गृहीतान्यभूवन्, तस्यायं परिणामोऽभूत्। प्रबन्धका भ्रष्टाचरण-परवशा मध्ये सुबहु वित्तं भुञ्जते स्म। अनेन सर्वापि व्यवस्था कैशोर्यादेव सावधानं परीक्षिता, प्रबन्धो निजसात्कृतः, भूसम्पत्तिर्बन्धकत्वान्मोचिता, ऋणं परिशोधितम्, आयः संवर्धितः। एवं प्रायस्त्रिंशद्वर्षात्मके वयस्ययं स्व-निर्भर ऋणमुक्तश्चाजायत। तदनन्तरमधिके-नोत्साहेन साहित्यसेवापरः समजायत।

एवं च साहित्यसेवात: पुस्तकलेखनादिकार्येभ्यश्च नायं कदापि किञ्चन लिप्सुरभूत्। एतस्य परिणामोऽपि तथाविध एवाभूत्। विपुलग्रन्थ-लेखकेनाऽप्यनेन नैकमपि रूप्यकं कस्मादपि प्रकाशकाद् 'रॉयल्टी' रूपेणाधिगतम्। निर्णयसागर-मुद्रणालय: सम्पादनस्य नाममात्रं किञ्चन पारिश्रमिकं प्रारम्भ एव ददाति स्म, न स्वामिस्वं (रॉयल्टीं) निर्धारयति स्म। राजकीयपाठ्यपुस्तक-मण्डलेन यत् संस्कृतपाठ्यपुस्तकमनेन लेखितम्, तस्य पारिश्रमिक-रूपेण सकृदेकश: कश्चन राशिरवश्यमस्मै प्रत्तोऽभूत्, 'संस्कृतसुधा' -ख्यपाठ्यपुस्तकस्य लाभस्तु य: कोऽप्यभूत्, मध्यस्थव्यक्तिभि: सानन्दं भुक्त:।

**परिवेश: परिसरश्च-**

यस्मिन् युगे भट्टमहाभागैराजन्म संस्कृतसेवाव्रतं निरूढं तद् युगमेवंविधानां नि:स्वार्थ-सरस्वती-सेवकानामेवाऽभूत्। अनवरतसाहित्य-सर्जनासत्रमेतदेभिर्न कस्मैचिल्लाभलोभाय, न वा यशोलिप्सया, न च कस्यचन बन्धनेन प्रेरणया वा परिचालितम्, आसीत्सा काचनान्त:प्रेरणैव यया खल्वेभिर्निश्चितमासीत् यत् प्रतिदिनं संस्कृते किञ्चन लेखनं विना भोजनं नैव करणीयम्। वाराणस्यां जयपुरेऽन्येषु च संस्कृतविद्याकेन्द्रेष्वभूवंस्तदानीमेवंविधा एव नि:स्वार्थसंस्कृत-सेवका मनीषिणो येषां पुण्यान्यद्यास्माभिरुपभुज्यन्ते। भट्टमहाभागानां ज्येष्ठतनुजत्वसौभाग्येन ममाऽप्यभूदवसरस्तदानीन्त-नानामेवंविधानां मनीषिणां दर्शनस्य, तेषां वैदुष्य-सुरभितासु चर्चागोष्ठीषु प्रवेशस्य, यासु न राजनीतिर्न व्यवसायो, न वाऽन्यविधं किञ्चन वस्तुजातमभूच्चर्चाविषय:, संस्कृतसम्बन्धिन्यश्चर्चा:, शास्त्रसन्दर्भ-संवलिता एव विनोदा:, काव्यालापसन्दानिता: परिहासा: एवंविधा एव व्यासङ्गास्तेषां समवाये, जलविहारोपवनविहारादिषु सर्वविधेषूत्सवावसरेषु चाभूवन्नित्यमधुना स्मरामि। कथं युगमेवेदानीं विपरिवृत्तम्। आस्तां तावत्।

भट्टमहोदयानां सुहृत्परिकरे जयपुरीया: स्वामिलक्ष्मीराममहाभागा आयुर्वेदमार्तण्डा:, म.म.पं. गिरिधरशर्माण:, पं. चन्द्रधरगुलेरिणोऽनुजा: पं. सोमदेवगुलेरिण:, राजगुरु-चन्द्रदत्तमैथिला:, पं. सूर्यनारायणशर्माण:, प्रशासका: श्री श्यामसुन्दरपुरोहिता:, वेदविज्ञा: पं. मोतीलालशर्माण:, पं. गिरिजाप्रसादद्विवेदा:, कलिकातास्था: (शेखावाट्यभिजना:) श्रीझाबरमल्लशर्माण:, पुणेस्था: डॉ. पी.के. गोडेमहोदया:, बम्बईस्था गोस्वामिगोकुलनाथा: पं. पुरुषोत्तमचतुर्वेदाश्च, वाराणसेया नारायणशास्त्रिखिस्तेमहोदया:, रायकृष्णदासमहोदयाश्च, वाङ्गा असितकुमारहालदारा: (प्रसिद्धाश्चित्रकारा ये जयपुरीयकला-कालेजस्याध्यक्षा अभूवन्) दाक्षिणात्या: पं. पट्टाभिरामशास्त्रिण:, झालरापाटनस्था नवरत्नगिरिधरशर्माण: अन्ये च विभिन्नेषु प्रान्तेषु स्थिता विद्वांस: परिगणयितुं शक्यन्ते। पं. चन्द्रधरगुलेरि-णाऽस्य कवित्वचर्चा मित्रत्वेन बहुत्र कृताऽभूत् (''पुरानी हिन्दी'' पृ. १६, नागरी प्रचारिणी, काशी)।

एतेषां शिष्येषु, स्व. गणेशरामशर्माणः, स्व. पं. वृद्धिचन्द्रशास्त्रिणः, स्व. वैद्यमुकुन्ददेवाः, पं. गोपालनारायणबहुरा, स्व. दीनानाथ त्रिवेदी मधुपः, उद्योगपतिः स्व. श्री कन्हैयालालतिवाडी, प्रशासकाः श्री शेरसिंह-द्वारकानाथपुरोहितप्रभृतयः शिक्षकाः स्व. श्रीराधागोविन्दशर्मप्रभृतयः, जननेतारः श्रीसिद्धराजढड्ढा-पूर्णचन्द्रजैन-जवाहरलालजैन-युगलकिशोरचतुर्वेद-हीरालालशास्त्रिप्रभृतयो बहवः सन्ति ये महाराजाकालेजाख्ये पाश्चात्य-पद्धत्यनुसारिणि महाविद्यालयेऽथवा महाराजा संस्कृतकालेजाख्ये पाश्चात्य-पद्धत्यनुसारिणि महाविद्यालयेऽथवा महाराजा संस्कृतकालेजाख्ये-प्राच्यपद्धत्यनुसारिणि महाविद्यालये, वा गृहे भट्टमहोदयात्संस्कृतं साहित्यशास्त्रं वाऽधीतवन्तः।

आसां पंक्तीनां लेखकोऽपि तत्सुतत्वेन तेभ्यो न केवलं काव्यशास्त्रकाव्य-रचनान्यायवैशेषिक-सांख्य-पुराणेतिहासादिविषयान् अपि तु व्रजभाषाकाव्य-हिन्दी-कवितादि-विषयानपि तदाशीर्वचोभिः स्नेहसम्भारेण च सहाऽध्यगीष्ट, स एव चाऽऽशीःपुण्यराशिरद्य तस्य समग्रो निधिः।

**देवर्षि-कलानाथशास्त्री**

# भूमिका

मञ्जुनाथग्रन्थावल्याः प्रथमभागस्य त्रिषु खण्डेषु भट्टमथुरानाथशास्त्रिणां पद्यरचनाः प्रकाशिताः। तत्र प्रथमभागस्य प्रथमे खण्डे जयपुरवैभवं गोविन्दवैभवञ्चेति द्वे काव्ये द्वितीये खण्डे साहित्यवैभवं तृतीये च संस्कृतगाथासप्तशतीति चत्वारि काव्यानि सङ्कलितानि। मञ्जुनाथग्रन्थावल्या द्वितीयभागोऽयं तेषां गद्यरचनानां प्रकाशनार्थमुपकल्पितोऽस्ति। तत्रापि द्वितीयभागस्य प्रथमखण्डे विश्रुतकथाकृतां भट्टश्रीमथुरानाथशास्त्रिणां त्रय उपन्यासग्रन्थाः षष्टिमिताश्च कथाः द्वितीये च खण्डे भट्टमहाभागैर्निबद्धाः प्रमुखाः केचन निबन्धाः पुरस्क्रियन्ते। कथानां लघुकथानां निबन्धानां वाऽवतारः नवाविष्कारत्वेनाऽभिनन्द्यते संस्कृतसाहित्ये। विधाया अस्या उन्नायकेषु भट्टश्रीमथुरानाथशास्त्रिणो नूनं सन्ति धुरि कीर्तनीया इति विदन्त्येव साहित्यतत्त्ववेत्तारो विद्वांसः।

गद्य–पद्यभेदेन स्वीकुर्वन्ति द्वैविध्यं काव्यस्य तत्तत्त्वविद इति सुविदितमेव सुधियाम्। पद्यकाव्यापेक्षया गद्यकाव्यस्य महत्त्वमपि। यथा च भणितिः – '**गद्यं कवीनां निकषं वदन्तीति**'।

संस्कृतसाहित्ये गद्यस्य प्रादुर्भावो वैदिककाल एव सञ्जात आसीदित्यत्र नाऽस्ति संशीतिः, कृष्ण–यजुर्वेदादिषु ब्राह्मणारण्यकोपनिषद्ग्रन्थेषु च तत्प्रयोगो विद्यत एव। पुराणसाहित्ये, दर्शनग्रन्थेषु च यद्यपि तत्प्रयोगो दृग्गोचरीभवति, तथापि गद्यापेक्षया पद्यबन्धेषु दृश्यते महती प्रीतिः कालेऽस्मिन् रचनाकृताम्। सुबन्धु–बाणभट्टप्रभृतिभिः यो हि रचनामार्गः प्रदर्शितः, स नूनं साम्प्रतिकैः कतिपयैरग्रेसारित इति विविधविधासु कवयन्तः कवय एते नवप्रस्थानद्वारमपि संस्कृतगद्यसाहित्यरचनाया उद्घाटयामासुरिति प्राचीनाऽर्वाचीनसाहित्यविधासु निबद्धाः केचन, केचन चात्याधुनिकगद्यलेखनविधाश्रिता ग्रन्थाः संस्कृतगद्यसाहित्ये राजन्ते।

'**ओजस्समासभूयस्त्वमेतद्गद्यस्य जीवितम्**' इति कस्यचिदुक्तिर्यद्यपि सुबन्धु–बाणभट्टप्रभृतीनां गद्यरचनासु सङ्घटते, किन्तु वैदिको मन्त्रद्रष्टा ऋषिर्यो हि संस्कृतगद्यसाहित्यस्य प्राचीनतमं स्वरूपमुपायनीकरोति साहित्यजगति, स न विश्वसिति एतादृक्शब्दाडम्बरेषु। सरला समासरहिता भाषा, ह, वै, उ इत्याद्यव्ययानां वाक्यालङ्कारत्वेन प्रयोगः, उपमारूपकादीनां केषाञ्चिदलङ्काराणां स्वाभाविकता च वर्तते वैदिकगद्यसाहित्यस्य वैशिष्ट्यम्। यद्यपि कृष्णयजुर्वेदाथर्ववेदयोः ब्राह्मणारण्यकोपनिषद्ग्रन्थेषु च तत्प्रयोगबाहुल्यं लभ्यते तथापि तत्र सर्वत्र सारल्यमेवाऽनुभूयते सहृदयैः।

ब्राह्मणग्रन्थानामपि गद्यं भजते तथात्वमेव। अत्राऽपि सरलसरलया भाषया कथ्यं वर्ण्यते –

**''अग्निर्वै देवानामवमो विष्णुः परमस्तदन्तरणे सर्वा अन्या देवताः''**

उपनिषत्साहित्ये त्वितोऽप्यधिकतरं रमणीयं गद्यस्वरूपं लभ्यते –

**''यत्र नाऽन्यत् पश्यति नान्यच्छृणोति नान्यद् विजानाति तद् भूमा। यत्रान्यत् पश्यति अन्यच्छृणोति अन्यद् विजानाति तदल्पं यो वै भूमा तदमृतमथ यदल्पं तन्मर्त्यम्''** (छान्द. ३२४)

अनेनैतदायाति यत् वैदिककविर्गद्यस्य सरलं सहजं च स्वरूपमङ्गीकरोति। शब्दाडम्बरे तस्य श्रद्धा नाऽस्ति। एषैव परम्परा पौराणिकैरनुकृता गद्यलेखनस्य। वस्तुतस्तु पौराणिकं गद्यं लौकिकवैदिकगद्यबन्धानां सोपानभूतम्। क्वचिदलङ्काराणां पक्षपातः पुराणेषु दृश्यते, तथापि प्रसादोपेतया भाषया पुरस्करोति पौराणिकः कविः समग्रमपि गद्यसौन्दर्यं वर्णनक्रमे। यथा च विष्णुपुराणे –

**''यथैव व्योम्नि वह्निपिण्डोपमं त्वमहमपश्यं तथैवाद्याग्रतो गतमप्यत्र भगवता किञ्चिन्न प्रसादीकृतम्। विशेषमुपलक्षयामीत्युक्ते भगवता सूर्येण निजकण्ठादुन्मुच्य स्यमन्तकं नाम महामणिवरमवतार्य एकान्ते न्यस्तम्** (४.१३.३४)

गद्यस्य विकासे दार्शनिकानामपि अवदानं वर्तत एव। ग्रन्थेष्वेतेषु यद्यपि सूत्राणां पद्यबन्धानां कारिकाणां च विलोक्यते प्राधान्यं, तथापि कैश्चित् शास्त्रिभिस्तत्रापि गद्यस्य प्रयोगः कृतो विद्यते। अर्थाभिव्यक्तिमभिलक्ष्य प्रणीता एते ग्रन्था यद्यपि शब्दसौन्दर्यं साहित्यसौन्दर्यं च न पुरस्कुर्वन्ति तथापि भावाभिव्यञ्जकता नैतेषां कुत्रचिदपि व्याहन्यते। जयन्तभट्टसदृशाः प्रौढाः केचन गद्यलेखकाः नीरसेऽपि विषये कामपि संवादात्मकतामुत्पादयन्ति।

पातञ्जलमहाभाष्ये शबरस्वामिनः शाबरभाष्ये शङ्कराचार्यस्य ब्रह्मसूत्रभाष्ये जयन्तभट्टस्य च न्यायमञ्जर्यां गद्यस्य वैलक्षण्यमवलोक्यते। नितान्तं नीरसमपि विषयं स्वगद्यप्रयोगमहिम्ना सरसं विदधाति भगवान् पतञ्जलिः। तत्र छात्रोऽनुभवति सम्मुखमासीनमिव गुरुम्। इयमेव गद्यप्रणयनशैली शबरस्वामिनो मीमांसासूत्रभाष्ये लभ्यते।

साक्षाच्छिवावतारभूतो भगवान् शङ्कराचार्य आत्मानात्मतत्त्वविवेचनेऽपि गद्यस्य साहित्यिकं मधुरं प्रसादपेशलं स्वरूपं पुरस्करोति। ''नहि पद्भ्यां पलायितुं पारयमाणो जानुभ्यो रंहितुमर्हति'' इत्येतादृशाः प्रयोगाः आचार्यस्य गद्यप्रणयनचातुर्यं पिशुनयन्ति।

तर्ककर्कशं न्यायशास्त्रं पठन्नपि पाठको न्यायमञ्जर्यां साहित्यिकमास्वादं प्राप्नोति। अत्र गद्यगरिमा सहृदयहृदयानुरञ्जनायाऽलम् –

**आः क्षुद्रतार्किक! सर्वथाऽनभिज्ञोऽसि, ब्रह्मैव जीवात्मानो नहि ततोऽन्ये। नहि दहनपिण्डाद् भेदेनाऽपि स्फुलिङ्गा अग्निस्वरूपा भवन्ति। तत् किं ब्रह्मण एवाऽविद्या ?**

वैदिकसाहित्ये पुराणेषु शास्त्रीयग्रन्थेषु चोपलब्धं गद्यं यद्यपि संस्कृतगद्यसाहित्यस्य विकासक्रमज्ञानाय समीक्षकाणां सहायकं, तथापि तेन गद्यकाव्यानां तात्त्विकानुसन्धानकल्पना न सम्भाव्यत इति लौकिकगद्यबन्धानां संक्षेपेण चर्चेह क्रियते।

**लौकिकं संस्कृतगद्यसाहित्यम् –**

संस्कृतसाहित्ये गद्यकथानां प्रादुर्भावः कात्यायनकालात् पूर्वमेवाऽभूदिति ''आख्यानाख्यायिकेतिहासपुराणेभ्यश्च'' इत्यस्मिन् वार्तिके आख्यानाख्यायिकाशब्दनिर्देशात् ज्ञायते। किन्तु सुबन्धोर्वासदत्तानाम्नी कथारचनैव संस्कृतसाहित्ये प्रथमकृतित्वेनोपलभ्यते। सुबन्धुना प्रवर्तिता बाणभट्टेन च लालिता गद्यकथापरम्परेयमधुना नूत्नविधाव्याजेन प्रणीतकथालघुकथोपन्यासादिसाहित्यसम्पत्साहाय्येन विकासशिखरं चुम्बति। अतो लौकिकगद्यसाहित्यं भिद्यते द्विधा–

१. प्राचीनं संस्कृतगद्यसाहित्यम्

२. आधुनिकम् अत्याधुनिकं च गद्यसाहित्यम्

**१. प्राचीनं संस्कृतगद्यसाहित्यम् –**

यथोक्तमस्माभिः संस्कृतगद्यसाहित्ये सुबन्धोर्वासवदत्तैवोपलब्धा प्रथमा कृतिः। अत्र राजपुत्रस्य कन्दर्पकेतोर्वासवदत्तया प्रणयसम्बन्धो वर्ण्यविषयत्वेनाङ्गीकृतः। ग्रन्थेऽस्मिन् स्वल्पो निर्जीवश्च कथांशः कविना स्वप्रातिभशक्त्या चमत्कारमुपनीतः। सुबन्धोः श्लेषयोजने नैपुण्यं तत्पुराणपटुत्वं वैदिकपौराणिकाख्यानचातुरी पदवाक्यप्रमाणादिशास्त्रपाण्डित्यं च ग्रन्थस्याऽस्य समीक्षणेन स्फुटीभवन्ति। शब्दाडम्बरस्य पक्षपाती कविरयं श्लेषयोजने भजते वैशिष्ट्यम्। यथा –

**नन्दगोप इव यशोदयाऽन्वितः, जरासन्ध इव घटित – सन्धिविग्रहः, भार्गव इव सदा नभोगः, दशरथ इव सुमित्रोपेतः सुमन्त्राधिष्ठितश्च, दिलीप इव सुदक्षिण- याऽन्वितो रक्षितगुश्च।**

अत्र प्रसन्नश्लेषयोजना कवेः शब्दप्रयोगनैपुण्यं पिशुनयति। उपमोत्प्रेक्षाद्यलङ्कार-प्रयोगादपि न सुबन्धुः पलायते, तथापि तत्र सर्वत्र श्लेषयोजनैव चमत्कारपोषिका। यत्र अक्षराडम्बरव्यामोहः कवेः प्रशमितस्तत्र नूनं वासवदत्ता गद्यस्य किमपि चमत्कारि स्वरूपं पुरस्करोति।

प्राचीनसंस्कृतगद्यसाहित्यस्य शिखामणिः गद्यसाहित्यस्य चोन्नायको बाणभट्टः सुबन्धोः परवर्तिकाले सञ्जात इति सत्यम्, किन्तु तस्य कथाप्रणयनशैली शब्दप्रयोगपटुता चाऽद्यापि सुकविसमवाये प्रशस्येते। कथाऽख्यायिकाभेदेन द्विविधं गद्यसाहित्यं प्रतिष्ठापितं शास्त्रविद्भिः। कविनाऽनेन हर्षचरिताख्यगद्यरचनया आख्यायिकाप्रणयनस्य कादम्बरीप्रणयनव्याजेन च कथारचनाया निदर्शनं कृतम्। हर्षचरितस्य त्रिषूच्छ्वासेषु बाणेन स्वजीवनवृत्तं पञ्चसु च राज्ञो हर्षवर्धनस्य प्रभाकरवर्धनप्रमुखाणां चाऽन्येषां राज्ञां वर्णनं कृतम्। एवं ग्रन्थोऽयं न केवलं साहित्यिकदृष्ट्या ऐतिहासिकदृष्ट्याऽपि महत्त्वं भजते। वीरोऽत्र अङ्गीरसस्तथापि करुणस्य चमत्कारः हृदयावर्जकः।

कादम्बरी-नाम्नी बाणभट्टस्य विद्यते द्वितीया कृतिः। संस्कृतगद्यसाहित्ये वैलक्षण्यमस्या वीक्ष्य केनचिद् रसिकेणोक्तम् -

**रुचिर-स्वर-वर्णपदा रसभाववती जगन्मनोहरति।**
**सा किं तरुणी ? नहि नहि वाणी बाणस्य मधुरशीलस्य॥**

पुण्डरीकचन्द्रापीडादीनां जन्मत्रयावगाहिनी कथा कविना कादम्बरीमिषेण निबद्धा। विदिशाधिपते राज्ञः शूद्रकस्य राजसभायां चाण्डालकन्या काऽपि पिञ्जरबद्धशुकहस्ता समायाति। शुक एव कादम्बरीकथां श्रावयति। महाश्वेतापुण्डरीकयोः कादम्बरीचन्द्रापीडयोश्च प्रणयवर्णने बाणो भजतेऽनुत्तमताम्। कादम्बर्याः पूर्वार्धः बाणभट्टेन उत्तरार्धश्च तत्पुत्रेण पुलिन्दभट्टेन प्रणीत इति ग्रन्थस्याऽस्य उत्तरार्धे मङ्गलाचरणमिषेणोक्तम्।

अर्थस्य नूतनता स्वाभावोक्तेः चारुता श्लेषस्य स्पष्टता अक्षराणां विकटबन्धता च कृतेरस्या महत्त्वं निगदन्ति। शब्दानां वर्ण्यविषयानुसारी प्रयोगः कवेर्वैशिष्ट्यम्। रौद्रादिवर्णनस्थलेषु कवेर्विकटबन्धता सरसस्थलेषु च शब्दनम्रता नूनं मनोहारिणी। अलङ्काराणां स्वाभाविकयोजनैवेह कृता। यथा च रसानोपमा -

**क्रमेण च कृतं मे वपुषि वसन्त इव मधुमासेन, मधुमास इव नवपल्लवेन, नवपल्लवेन इव कुसुमेन, कुसुम इव**

मधुकरेण, मधुकरेण इव मदेन नवयौवनेन पदम्।

**एवमेव परिसङ्ख्यायाश्चारुताऽपि बाणस्य वैशिष्ट्यं पुरस्करोति – यत्र च महाभारते शकुनिवधः, पुराणे वायुप्रलपितम्, वयः परिणामे द्विजपतनम्, उपवनचन्दनेषु जाड्यम्, अग्नीनां भूतिमत्त्वम्, एणकानां गीतव्यसनम्, शिखण्डिनां नृत्यपक्षपातः भुजङ्गमानां भोगः, कपीनां श्रीफलाभिलाषः, मूलानामधोगतिः।**

बाणस्य गद्यशैली विद्यते कवित्वस्य अवधिः। ये खलु समीक्षकाः कठिनपदप्रयोगं तत्र प्रतिपादयन्ति, नूनं ते शब्दप्रयोगतत्त्वं न जानन्ति। पाञ्चालीरीतेरपूर्वयोजना बाणस्य कादम्बर्यां विद्यते। समासबाहुल्यमोजसश्च प्राधान्यं कादम्बर्यां यद्यपि पदे पदे दृश्येते, तथापि तत्सर्वं काव्योत्कर्षाय आवश्यकम्। भावाभिव्यञ्जकस्थलेषु तथाविधशब्दानां प्रयोगो न दृष्टिपथमायाति। यथा मदनव्यथासन्तप्तं पुण्डरीकं प्रबोधयन् वक्ति ब्रह्मचारी पुण्डरीकः –

**सखे पुण्डरीक! नैतदनुरूपं भवतः, क्षुद्रजनक्षुण्ण एव मार्गः। धैर्यधना हि साधवः! किं यः कश्चित् प्राकृत इव विकली-भवन्तमात्मानं न रुणत्सि। क्व ते धैर्यम्? क्वाऽसौ इन्द्रियजयः?**

बाणस्य शब्दसाम्राज्यं विस्तृतं सुदीर्घं च वर्तते। कामिनीनां रूपलावण्यवर्णने कवेः शब्दावली भजते लालित्यम्। अरण्यादिवर्णने च सैव दृश्यते कठोरवर्णयुक्ता शब्दाडम्बरयुक्ता च। कादम्बरी संस्कृतगद्यसाहित्यस्य प्राणतत्त्वमित्यत्र न काऽप्यतिशयोक्तिः।

प्राचीनसंस्कृतगद्यसाहित्यस्य तृतीयः प्रतिनिधिकविरस्ति महाकविर्दण्डी। कवेरस्य दशकुमारचरितम्, अवन्तिसुन्दरीकथा चेमे द्वे गद्यरचने उपलभ्येते। दशकुमारचरिते भाग्यस्य प्रतिकूलतावशाद् अनेकदेशेषु कष्टापन्नं जीवनं निर्वाह्य समागतानां कुमाराणां कथाऽस्ति। राजवाहनं प्राप्य ते सर्वे स्वीयं वृत्तं तस्मै निवेदयन्ति।

दशकुमारचरितमाऽऽख्यानकाव्यविधाया अनुत्तममुदाहरणम्। विषयोपस्थापने पदानां प्रयोगे चेह कविर्वैशिष्ट्यमवगाहते। कथानकानां पारस्परिकं सामञ्जस्यं तेषां धारावाहिकता सरला प्रसादगुणोपेता भाषा च दण्डिनो गद्यप्रणयनप्रटुत्वं विषयप्रतिपादनप्रटुत्वं च ख्यापयन्तीति सर्वमेतत्काव्यगतं सौष्ठवं प्रसमीक्ष्य केनचित्समीक्षकप्रवरेणोक्तम् – **दण्डिनः पदलालित्यमिति।**

दण्डी सुबन्धुबाणयोरनुकर्ता कविर्नाऽस्ति। तस्य स्वीया वर्णनशैली विद्यते। यस्यां सहृदयोऽर्थस्य स्पष्टतां रसस्य च विशिष्टामनुभूतिं प्राप्नोति। तस्य पदानां लालित्यज्ञानाय पङ्क्तयः काश्चनोदाह्रियन्ते –

**कामस्तु विषयासक्तचेतसोः स्त्रीपुंसयोर्निरतिशयसुख - स्पर्शविशेषः। परिवारस्त्वस्य यावदिह रम्यमुज्ज्वलं च। फलं पुनः परमाह्लादनं परस्परविमर्दजन्मस्मर्यमाणमधुरम् उदीरिताभिमानमनुत्तमं सुखपरोक्षं स्वयं संवेद्यमेव।**

अवन्तिसुन्दरीकथाया गद्यांशोऽयं तस्य पदप्रयोगदक्षताया निदर्शकः -

**रज्जुरियम् उद्बन्धाय सत्यवादितायाः, विषमियं जीवित-हरणाय महात्म्यस्य, शास्त्रमियं विशसनाय सत्पुरुष-वृत्तान्तानाम्, अग्निरियं निर्दहनाय धर्मस्य, सलिलमियं निमज्जनाय सौजन्यस्य, धूलिरियं धूसरीकरणाय चरित्रस्य ?**

बाणादीनां रचनासु कल्पनायाः प्राधान्यात् याथार्थ्यस्य सर्वथाऽभावः। दण्डिनो ग्रन्थयोः पुनर्यथार्थवर्णनस्य दृश्यते प्राधान्यम्।

बाणभट्टस्य रचनापद्धतिमवलम्ब्य परवर्तिभिर्नैके गद्यबन्धाः प्रणीता। तेषु कवेर्धनपालस्य तिलकमञ्जरी इदानीमुपलभ्यते। ग्रन्थेऽस्मिन्नेकतो बाणभट्टस्य भाषानुकृतिरपरतश्च गद्यस्य व्यावहारिकं स्वरूपमुपलभ्यते। सन्दर्भानुसारिणी शब्दयोजना नूनमिह मनोहारिणी। उपमोत्प्रेक्षाद्यलङ्कारणां प्रयोगेऽपि कविर्भजते वैलक्षण्यम्।

संस्कृतगद्यलेखकेषु गद्यचिन्तामणिकारस्य वादीभसिंहस्याऽपि स्थानं महत्त्वपूर्णमस्ति। जिनसेनस्य महापुराणे प्राप्ता जीवन्धरस्य कथैवेह एकादशलम्बेषु वर्णिता। प्राचीनसंस्कृत-गद्यकाव्याधारायां वामनभट्टबाणविरचितं वेमभूपालचरितमपि उल्लेखमर्हति। वेमभूपालः कवेरस्य आश्रयदाता राजा स्वयमपि महाकविरासीत्। तस्य वर्णनं ग्रन्थेऽस्मिन् कृतं कविना।

प्राचीनसंस्कृतगद्यसाहित्येऽन्या अपि गद्यरचनाः स्युः किन्तु सुबन्धुबाणभट्ट-वामनबाणभट्टादि-षट्कवीनामेव कृतय उपलभ्यन्त इदानीम्। दण्डिबाणयोर्गद्यलेखने यद्यपि महान् अधिकार आसीत्, तथापि परवर्तिभिः गद्यस्य प्रयोगः पद्यापेक्षया न्यूनतरमेव कृतमिति ज्ञायते इतिहासग्रन्थानामध्ययनेन। आधुनिकैर्विश्वेश्वरपाण्डेयप्रभृतिभिः गद्यरचनायां गौरवाभिवृद्ध्यर्थं कश्चन नूतन एव प्रयासो विहित इति नैका गद्यरचनाधारा युगेऽस्मिन् प्रादुरभूवन्। अम्बिकादत्तव्यासेन शिवराजविजयाख्यग्रन्थस्य रचनया संस्कृतसाहित्ये उपन्यास-लेखनपरम्परोद्भाविता। एवमन्ये ग्रन्थकारा अपि नूतनकाव्यधारायां कवयन्तो दृश्यन्ते। विंशशतकस्योत्तरार्द्धोऽयं संस्कृतगद्यरचनायाः स्वर्णयुगत्वेन व्यपदेशमर्हति, यस्मिन् भट्टमथुरानाथशास्त्रिप्रभृतयः प्राचीना रामकरणशर्म-राजेन्द्रमिश्र-केशवचन्द्रदाशप्रभृतयश्च

साम्प्रतिका नैके गद्यकारा लेखनव्यापृता वर्तन्ते। अत्र नातिविस्तरेण आधुनिकात्याधुनिकगद्यसाहित्यस्य चर्चा क्रियते।

**२. आधुनिकम् अत्याधुनिकं च संस्कृतगद्यसाहित्यम्** –

आधुनिकगद्यसाहित्यस्य पृष्ठभूमिर्न केवलं प्रणयवर्णनं न वाऽऽश्रयदातृराज्ञो गुणानुवादः। अद्यतनीयः कविः सामाजिक-राजनीतिकदशावर्णने भारतस्य स्वातन्त्र्यसङ्ग्रामचित्रणे नारीणां दशानिरूपणे च दृश्यते बद्धपरिकरः। एवं वस्तुविवेचनदृष्ट्या शैलीदृष्ट्या चाधुनिकं गद्यसाहित्यं बहुविधान् वर्ण्यविषयानात्मसात्करोति। कथा लघुकथा उपन्याससाहित्यं यात्रासाहित्यं जीवनवृत्तवर्णनं चेत्यादयो नैके मार्गा आधुनिकसंस्कृतगद्यसाहित्यस्य विशेषाः। साहित्यस्याऽस्य विधानुसारि विवेचनमिहोपस्थाप्यते।

**१. कथा लघुकथाश्च** –

आधुनिककथासाहित्ये लघुकथानामेव प्राधान्यम्। विद्वन्मूर्धन्यस्य श्रीमतो विश्वेश्वरपाण्डेयस्य मन्दारमञ्जरी बाणभट्टस्य भाषानुकृत्या प्रणीता कालखण्डस्याऽस्य गद्यकृतिः। ग्रन्थेऽस्मिन् पुष्पपुरस्य राज्ञो राजशेखरस्य वर्णनमस्ति। पर्वतीयो विश्वेश्वरः सर्वतन्त्रस्वतन्त्रपण्डित आसीदिति तस्य ग्रन्थसम्पत् प्रमाणमत्र। बाणस्य गद्यरचनाभावभावितोऽपि कविर्मौलिकचिन्तनरहितो न दृश्यते। अलङ्काराणां भव्ययोजना गद्यप्रणयने श्रीमतः पाण्डेयस्य वैशिष्ट्यं निरूपयति। परिसङ्ख्याया वैपुल्यमिह नितरां हृदयावर्जकम् –

> **गौणार्थपरिग्रहः शब्देषु न क्रियासु, पृष्ठदर्शनं सामप्रयोगेषु न सङ्गरेषु, अदृष्टपर्वत्वं विशिखत्वं च सायकेषु, न तत्तद्विहितक्रियापदेषु, द्विजपरीक्षणं लक्षणाविचारेषु न दानेषु, श्रुतिलङ्घनं वधूनां कटाक्षेषु न जनेषु समभवत्।**

एतादृशकथानां प्रणयने साम्प्रतिकानां मतिस्तथा न प्रवर्तते। उपन्यासविधाया युगेऽस्मिन् प्रादुर्भावः सञ्जात इति नैके गद्यकारा तस्यामेव विधायां कवयन्तो दृश्यन्ते। वस्तुतस्तु विविधपरिचर्यासु व्यापृतः पाठकः लघुग्रन्थानपेक्षते सम्प्रति। प्राचीनैः काव्यशास्त्रिभिर्यद्यपि लघुकथासदृशरचनायाश्चर्चा न कृताऽस्ति तथापि साम्प्रतिका राधावल्लभ-राजेन्द्रमिश्रादयो विधाया अस्या लक्षणादिपरिष्कारे प्रयत्नं कुर्वन्तो दृश्यन्ते। **कथायां सरसं वस्तु गद्यैरेव विनिर्मितम्** इत्युक्तिरियं वर्ण्यविषयदृष्ट्या कथञ्चित् तत्रापि सङ्गच्छते। संस्कृतलघुकथानां सम्बन्धः हिन्दीभाषायाः कहानी-विधया आङ्ग्लभाषायाश्च शॉर्टस्टोरीति विधया वर्तते।

एकोनविंशशतकस्याऽन्तिमदशके संस्कृतगद्यसाहित्ये लघुकथारचनायाः प्रयासो विहितः शिवराजविजयकारेण अम्बिकादत्तव्यासेन। तस्य रत्नाष्टकमिति नाम्ना प्रकाशिते कथासङ्ग्रहे हास्यरसप्रधाना उपदेशप्रधानाश्च अष्टौ कथाः सङ्गृहीताः सन्ति। किन्तु कथाकुसुम इत्याख्यकथासङ्ग्रहे भावूपर्णाः कथाः प्रकाशिताः। येन संस्कृतगद्यरचनाक्षेत्रे प्रादुरभूत् काचिन्नवीना क्रान्तिः। १८९८ ईस्वीयवर्षात् १९१० ईस्वीयवर्षं यावत् सहस्राधिका लघुकथाः प्रणीताः। यासां प्रकाशनं विविधसंस्कृपत्रपत्रिकासु समभवत्। वेङ्कटरामशास्त्रिणा कालेऽस्मिन् कथाशतकम् इति नाम्ना शतकथान्वितः प्रबन्धः प्रकाशमनायि। केचन मौलिकाः कथकसङ्ग्रहाः केचन चाङ्ग्लादिभषाभ्योऽनूदिताः कथाः प्रकाशिताः। शतकस्याऽस्यादौ द्वौ कथासङ्ग्रहौ प्रकाशितौ बभूवतुः। तौ च स्तः –

| | | |
|---|---|---|
| १. कथासङ्ग्रहः | – | कोइतम्बुरानकृतोऽयं मौलिककथासङ्ग्रहः। |
| २. कथामञ्जरी | – | अनन्ताचार्यकोण्डकेन प्रणीता १८०१ वर्षे प्रकाशिता।<br>इतरे च कालान्तरे प्रकाशिताः सङ्ग्रहाः सन्ति – |
| ३. नाटककथासङ्ग्रहः | – | अनन्ताचार्यकोण्डकेनैव प्रणीतः प्रकाशितश्च। |
| ४. कथासप्तति: | – | मन्दिरकलरामशास्त्रिणः कृतिः १८०४ वर्षे प्रकाशिता। |
| ५. गद्यकथा | – | तिरुनारायण अयङ्गरकविना प्रणीता कृतिरियं १८१० वर्षे प्रकाशनं प्राप्ता। सर्वेऽपि कथासङ्ग्रहा एते मौलिककथा-रचनाधारां दृढीकुर्वन्ति। |

कालेऽस्मिन् विविधाः कथासङ्ग्रहाः कथाश्च प्रकाशिता अभवन्। केचन शास्त्रीयविषया अपि कथारूपेण परिणमय्य प्रकाशिताः। एतेषु रामशरणशास्त्रिणः कौमुदीकथाकल्लोलिनी उल्लेखमर्हति।

आधुनिकसंस्कृतकथासाहित्यस्य विषयानुसारि विवेचनमिह संक्षेपेणोपस्थाप्यते –

**१. पौराणिक्यः कथाः** – पौराणिककथा अधिकृत्याऽपि कैश्चित् कविभिः कथाः प्रणीताः। ताः सन्ति– उषो हरणम् (उपेन्द्रनाथसेनस्य) शिवहास्यम् (मनुजेन्द्रदत्तस्य) सत्यदेवकथा (रामावतारशर्मणः) भद्रसोमा (चारुचन्द्रवन्द्योपाध्यायस्य) मणिकुण्डलोपाख्यानम्, दधीच्युपाख्यानम्, पौराणिकी काचित् कथा (अप्पाशास्त्रीराशिवडेकरस्य)।

**२. उपदेशकथाः बालकथाश्च** – विंशशतके यद्यपि उपदेशकथाः प्रणीताः कविभिस्तथापि बालसाहित्यस्य तत्र अभावोऽस्त्येव। केशवचन्द्रदाशस्य 'महान्' इति कथासङ्ग्रहे काश्चन बालकथाः सङ्गृहीताः सन्ति।

उपदेशप्रधानकथानां प्रकाशनं तु जयचन्द्रसिद्धान्तभूषणभट्टाचार्यादिभिः कृतम्। तासु व्याघ्रीविवाहार्थी शृगालः, वशीकृतभूतः, धर्मस्य सूक्ष्मा गतिः, ईश्वरस्य धनदानक्रमः, राक्षसप्रश्नः, बुद्धिमाहात्म्यम्, अदूरदर्शिता, संशयात्मा विनश्यति (द्वारकानाथशर्मणः) शत्रुसङ्कीर्णे कथं वस्तव्यम् (नन्दलालशर्मणः) दशापरिणतिः, चित्रकारचातुर्यम्, कुटिलमतिर्नाम गोमायुः, वक्रचापलम्, भगवद्भक्तः किमर्थम्, सद्गुरुः (अप्पाशस्त्रिराशिवडेकरस्य) इत्युपदेशकथाः प्रमुखाः सन्ति।

१९७० तमे वर्षे गोविन्दभावेमहाभागेन प्रकाशनं प्रापिते संस्कृतकथातरङ्गिणी इति नाम्नि कथासङ्ग्रहेऽपि सप्तविंशतिकथा उपदेशशैल्यां प्रणीताः सन्ति। अत्र शिक्षाया उपयोगिता सच्चारित्र्यस्य च माहात्म्यं प्रदर्शितं कविना। 'कुपात्रे नैव दातव्यम्', भगवान्, दानी वत्सलः, लालयेत् पञ्चवर्षाणि दशवर्षाणि ताडयेत् इत्येताः कथा इह लोकव्यवहारप्रामाण्यात् धर्मशास्त्रप्रामाण्याद् वा प्रणीताः।

राजस्थानसंस्कृताकादेम्या प्रकाशिते गणेशशर्मणः संस्कृतकथामृतम् इति नाम्नि कथासङ्ग्रहे विचारप्रवणया भाषया काश्चन कथा निबद्धाः। अत्र सिद्धो रासायनिकः, अकिञ्चनस्यौदार्यम्, भ्रातृस्नेहः वीरपरीक्षा चेति नैकाः कथाः प्रभावोत्पादिकाः सन्ति।

**३. भावप्रधाना मनोवैज्ञानिक्यश्च कथाः** – भावप्रधानकथारचनासु भट्टमथुरानाथ-शास्त्रिणोऽप्पाशास्त्रिराशिवडेकरमहाभागस्य च कथाः, मनोवैज्ञानिककथासु च रामनाथशास्त्रि-प्रभृतीनां रचना अत्रोल्लेखमर्हन्ति। विषमा समस्या, बालकभृत्यश्चैते द्वे कथे भट्टमथुरानाथशास्त्रिणो भावप्रधानकथाप्रणयननैपुण्यं प्रकटयतः। दरिद्रतामेव व्याधिं मत्वा चिकित्सकोऽत्र निदानं करोति। एवमेव के. श्रीनिवासमहोदयस्य साधुमणिः, उपेन्द्रचन्द्रस्य रामो नाऽस्तीह भूतले, चन्द्रचूडशर्मणश्छायापथः, राशिवडेकरमहोदयस्य प्राधान्यवादः, विप्रलब्धा च, रामनाथशास्त्रिणः मदीयः स्वप्नः क्रमेऽस्मिन्नुल्लेखनीयाः कथाः सन्ति। भट्टमथुरानाथशास्त्रिणां 'बालकभृत्य' इति कथा कैश्चित्समीक्षकैर्ललितनिबन्धत्वेनाङ्गीकृतेत्यस्माभिरपि ललितनिबन्धसङ्ग्रहे सेयं प्रकाशिता।

कवे राधावल्लभस्य "न ममार न जीर्यति" कथा मनोवैज्ञानिककथास्वन्यतमा। कविनेह डॉ. शरणस्य कुष्ठपीडितायाश्च तन्मातुश्चित्रणं नैपुण्येन कृतम्।

**४. हास्यव्यङ्ग्यकथाः** – कथास्वेतासु हास्यस्य व्यङ्ग्यस्य वा प्राधान्यं निरूप्यते कविभिः। चन्द्रचूडशर्मणः दर्दुरविलापः, अप्पाशास्त्रिणः वेषमाहात्म्यम्, व्यसनविमोक्षः, पुरोहितधौर्त्यम्, भट्टमथुरानाथशास्त्रिणः लालाव्यायोगः, चपण्डुकः, शिष्या, फाल्गुनगोष्ठी, वाई. महालिङ्गशास्त्रिणश्च कलिप्रादुर्भाव इत्येताः कथा हास्यव्यङ्ग्यप्रतिपादनशैल्यां प्रणीताः।

कवय एते सामाजिकमेव विषयं कथायां हास्यव्यङ्ग्यत्वेनोपस्थापयन्ति। यथा शिष्या इति भट्टमथुरानाथशास्त्रिणः कथायां शिष्यः कश्चन सावगुण्ठनः सन् गुरोः समीपं याति। एतादृशीनां कथारचनानां हास्यमेव प्रयोजनम्। कथानां शैली सरला ललिता चास्ति। सामान्योऽपि पाठकः कथ्यमवगन्तुं शक्नोति।

**५. सामाजिककथाः** – सामाजिककथासु सामाजिकदशावर्णनमेव प्रधानपदेऽभिषिक्तं भवति। सामाजस्य नैकाः समस्या अत्र चित्रिताः। विश्वेश्वरशर्मणः मम गृहरहस्यम्, उपेन्द्रनाथसेनस्य पल्लिच्छविः, राशिवडेकरमहाशयस्य श्रीमती विद्यासुन्दरी देवी, चारुचन्द्रवन्द्योपाध्यायस्य स्त्रीचरितम् नैष्ठिकब्रह्मचारी विधुशेखरभट्टाचार्यस्य अपत्यविक्रमः क्षुत्कन्यका, द्विजेन्द्रब्रह्मचारिणः वासन्ती, भट्टमथुरानाथशास्त्रिणश्च एकवारं दर्शनम्, दयनीया, अनादृता इत्येताः कथाः सन्ति।

संस्कृतलघुकथासाहित्ये पण्डिताक्षमाराव-देवर्षिकलानाथशास्त्रि-अभिराजराजेन्द्रमिश्र-केशवचन्द्रदाशप्रभृतयः कवयः सामाजिकदशावर्णने वैशिष्ट्यं भजन्ते। एतेषां रचनासु वस्तुतत्त्वस्य सम्यग्विवेचनं प्रौढशैल्या कृतं विद्यते। समाजस्य यथार्थविषयं स्वीकृत्य काश्चन कथा लिखिताः कविभिरेभिः। स्त्रीणां दशावर्णने क्षमारावमहाभागायाः शैली श्लाघनीया। प्रभुनाथद्विवेदिनः कथाकौमुदी श्वेतदूर्वा च कृष्णलालस्य अनन्तमार्गः, केशवचन्द्रदाशस्य उर्मिचूडा, वीणापाणिपाटनीमहाभागाया अपराजिता, राजेन्द्रमिश्रस्य इक्षुगन्धा राङ्डा चित्रपर्णी चेत्येते कथासङ्ग्रहा अपि सामाजिकदशावर्णनपराः कथाः पुरस्कुर्वन्ति। शिक्षणसंस्थानेषूपाधिदानपरम्परां विलोक्य प्रणीता कवे राधावल्लभस्य वायवाः, इच्छाराद्विवेदिनश्च निरीक्षणम् इति द्वे कथे समाजस्य यथार्थभूमिमवगाहेते।

**६. प्रणयवर्णनपराः कथाः** – प्रणयर्णनपरासु कथासु नायकनायिकयोः प्रणयसम्बन्धः नैपुण्येन न्यरूपि कविभिः। विच्छेदानन्तरं तयोर्मिलनसम्भावना विच्छेदकारणानि चाऽत्र वर्ण्यविषयतां भजन्ते। चारुचन्द्रवन्द्योपाध्यायस्य यथार्थप्रेमिकः, आदर्शपतिः, भट्टमथुरानाथस्य च प्रेम्णः प्रतिदानम् प्रेमवर्णनपरा उत्कृष्टतमाः कथाः सन्ति। पण्डिता क्षमारावमहाभागा प्रेमरसोद्रेकः इत्यस्यां कथायां प्रेम्णः कञ्चन दुर्लभमेव पक्षं न्यरूपयत्।

प्रणयवर्णने साम्प्रतिककविशिरोमणिरभिराजराजेन्द्रमिश्रः सिद्धहस्तो दृश्यते। पोतविहगौ इत्यस्यां कथायां कवेरस्य वर्णनशैली नूनं मनोहारिणी –

**मुग्धे! पोतविहगावावाम्। परस्परं प्रविहाय नावयोः**
**काऽप्यन्या गतिः। महुलि! यथा जलपोतविहगोऽनन्ताकाशे**
**प्रोड्डीय परिश्रम्य च विवशीभूय पुनस्तत्रैवागच्छति शरण-**

> **मन्विच्छन्, आवयोरपि सैव स्थितिः। प्रिये जलपोतसन्निभमिदं लघुकुटीरम्। इदमेवाऽस्माकं शरणस्थलम्। इदमेवाऽस्माकं प्रणयमन्दिरं प्रिये! यत्रावाभ्यां प्रणयाधिष्ठातृदेवो भगवान् रतिनायकस्समर्चितः। नैतत् परित्यज्य क्वाऽप्यन्यत्र गन्तव्यम्।**

**७. ऐतिहासिक्यः कथाः** – ऐतिहासिकघटनाश्रयेण कविभिर्नैकाः कथाः प्रणीताः। कथास्वेतासु वीराणां त्यागशैर्यादीनां वर्णनं प्राधान्येन कृतम्। रामकिशोरमिश्रमहोदयस्य खड्गेन तं हनिष्यामि इति कथायां वीरस्य अनिरुद्धसिंहस्य त्यागवर्णनं यथा –

> **प्रिये! वीरास्तु हन्यन्ते। आवां शीघ्रं वन्दिनौ भविष्यावः। अहं मुगलकारागारं नैव जिगमिषामि। अतस्त्वं ममान्तं कुरु। विलम्बेन किम्? इति स जगाद।**

राजेन्द्रमिश्रस्य राङ्गडेति कथासङ्ग्रहे बालीद्वीपस्य ऐतिहासिकं वृत्तं प्राप्यते। प्राचीनैः भारतीयैतिह्यमाश्रित्य कथा निबद्धाः किन्तु पाश्चात्त्यघटनावलीनां चित्रणं संस्कृतसाहित्ये मिश्रमहाभागैरेव कृतमिति विशेषस्तेषाम्। द्वारकानाथशर्मणः, बहूपचिकीर्षा पन्नाधायः, विधुशेखरभट्टाचार्यस्य, क्षत्रकथा, गौतमबुद्धः, परशुरामशर्मणः संयोगितास्वयंवरः, हरिप्रसादनर्मदेश्वरस्य क्षत्रियपराक्रमः भट्टमथुरानाथशास्त्रिणश्च पृथवीराजपौरुषम्, आल्हा च ऊदलश्च, पुरुराजपौरुषम् इत्यादिकथाः सन्ति संस्कृतलघुकथासाहित्ये ऐतिहासिकवर्णनपराः।

अद्यतनीयः कविः कल्पनादरिद्रः, शब्ददरिद्रो विषयदरिद्रो वा नाऽस्ति। समसामयिकं सामाजिकं राजनैतिकं वा विषयमाश्रित्य स कथारचनायां प्रवर्तते। आधुनिकयन्त्राणां वस्तूनां च बोधाय स नूतनशब्दानां निर्माणं करोति। यथा वी.आई.पी. इत्यस्य कृते विशिष्टातिविशिष्टः, फोनरिसीवर इत्यस्य च कृते प्रापक इति शब्दः। क्वचित् शब्दसाम्येनाऽपि नूतनशब्दा निर्मीयन्ते। यथा कालगर्ल इत्यस्य कृते कालगरला इति।

**अनूदिता रूपान्तरिताश्च कथा –**

आधुनिककथासाहित्येऽनूदितं रूपान्तरितं च कथासाहित्यमपि समृद्धं विद्यते। संस्कृतेतरभाषाभ्योऽनूदिता नैके कथासङ्ग्रहाः सम्प्रति सहृदयेभ्यः समर्पिताः –

**१. कथाकल्पद्रुमः** – अप्पाशास्त्रिराशिवडेकरमहाभागैः प्रकाशितः सङ्ग्रहोऽयं अरेबियन नाइट्स इति कृतेरनुवादः।

**२. शेक्सपियरनाटककथावली** – मेडपल्लीवेङ्कटरमणाचार्येण प्रकाशितोऽयं ग्रन्थः मेरीलम्ब इति नाम्नः कवेः टेल्स फ्राम शेक्सपीयर इत्याख्यकृतेरनुवादः।

**३. शेक्सपियरनाटककथाचतुष्कम्** – कौण्डिन्यवेङ्कटेश्वरसुब्रह्मण्यशास्त्रिणा अनूदिताः वेनिसनगरवणिक्, विनयम्, हेमन्तकथा, प्रकम्पनश्चैताश्चतस्रः कथाः सङ्ग्रहेऽस्मिन् प्रकाशिताः।

**४. टॉल्ससटॉयकथादशकम्** – अनेनैव विदुषा टॉल्सटॉयकथासङ्ग्रहतः वृथाक्रोधः, यत्र प्रेम तत्र ईश्वरः, वृद्धौ, प्रश्नत्रयम्, देवपुत्रः, भ्रातरौ, मुनित्रयम्, विश्रान्तिसदनम्, इत्याद्या दशकथा अनूद्य प्रकाशिताः। अनुवादेऽप्यत्र पञ्चतन्त्रस्यास्वादः।

**५. टॉल्सटॉयकथासप्तकम्** – सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य अनुसन्धानसंस्थान–निदेशकचरेण पं. भागीरथप्रसादशास्त्रिणा सप्तकथा अत्र सङ्ग्रहेऽस्मिन्ननूद्य प्रकाशिताः।

**६. कथामञ्जरी** – अरविन्दाश्रमस्य जगन्नाथेन फ्रेञ्चभाषाया वल्जिस्त्वार इत्याख्यपुस्तकस्य संस्कृतानुवादो कथामञ्जरीति नाम्ना प्रस्तुतः। सद्‌गुणप्रेरणादाने समर्थाः कथा इमाश्छात्राणां चरित्रनिर्माणे उपयोगिन्यः।

**७. विपञ्चिका** – नागराजेन हिन्दीकथाकारस्य प्रेमचन्द्रस्य पञ्चकथाः संस्कृतेऽनूद्य सङ्ग्रहेऽस्मिन् प्रकाशिताः। अत्र ज्येष्ठो भ्रातृवर्यः, रसिकः सम्पादकः, धिक्कारः, निष्कारणयशः, लॉटरी इति पञ्चकथाः सन्ति।

**८. कथारत्नाकरः** – बॉक कन्बे महोदयस्य कथानामनुवादोऽत्र विहितः।

**९. ईसब्नीतिकथाः** – नारायणकृष्णगोडबोलेमहोदयेन सदाशिवनाथचितलेमहोदयस्य नीतिकथानामनुवादोऽत्र प्रस्तुतः।

**१०. शरत्सप्तकम्** – विश्रुतबङ्गभाषाकवेश्शरच्चन्द्रस्य सप्तकथानामुनवादोऽत्र बिहारीलालमिश्रेण विहितः। ज्येष्ठान्तिका, मध्यमान्तिका, विन्दोर्वालः, रामस्य सुमतिः, परेशः, चित्रम्, अनुराधा चेति सप्तकथा इमाः, सङ्ग्रहेऽस्मिन् सङ्गृहीताः।

कथासरः, कथासप्तकम्, श्रीरामकृष्णकथामृतम्, बालनीतिकथाः (अष्टभागेषु प्रकाशितः सङ्ग्रहः) नीतिकथाभाण्डागारम्, बालकथाकुञ्जः, बालसाहित्यसरिता चेत्यादयः कथासङ्ग्रहाः विविधभाषाभ्योऽनूदितानां कथानां निदर्शकाः।

रघुवंशादिविविधसंस्कृतग्रन्थानां कथारूपान्तरणमपि तैस्तैराचार्यैः प्रकाशितम्। येन संस्कृतगद्यसाहित्यश्रीरेधते। रूपान्तरिताः केचन कथासङ्ग्रहाः सन्ति –

**१. रघुवंशसारः** – (१९००) दत्तात्रेयवासुदेवनिगुडकरमहोदयेन कालिदासप्रणीतस्य रघुवंशमहाकाव्यस्य गद्यरूपं ग्रन्थस्याऽस्य मिषेण प्रस्तुतम्।

**२. भासकथासारः** – वाई. महालिङ्गशास्त्रिणा १९६५ वर्षे भासविरचितनाटकानां गद्यरूपान्तरणं प्रकाशितम्।

**३. कादम्बरीकथासारः** – बाणभट्टस्य अमरकृतेः सरलया गिराऽनुवादो विहितः नन्दलालशर्मणा, प्रकाशितश्चाऽयं १९०० इस्वीयवर्षे। आर.वी. कृष्णमाचार्यमहोदयेन १८७४ वर्षे त्र्यम्बकशर्मणा च १९२६ वर्षे कादम्बर्याः सरलगद्यानुवादः प्रकाशित आसीत्। कृष्णमाचार्यमहोदयेन हर्षचरितसारनाम्ना हर्षचरितस्यापि रूपान्तरणं विहितम्, प्राकाशि चेदं १८७४ वर्षे।

**४. चन्द्रापीडचरितम्** – अनन्ताचार्येण कादम्बर्याश्चन्द्रापीडचरितं सरलगद्यविधिना १९०९ ईस्वीयवर्षे प्रकाशितम्। अनेनैव विदुषा हर्षचरितसारनाम्ना हर्षचरितस्याऽपि सरलानुवादः कृतः।

**५. उदयनचरितम्** – व. अनन्ताचार्येण अष्टादशाऽध्यायेषु उदयनस्य चरितं वर्णितम्।

सद्य एव प्रकाशिताः केचन कथासङ्ग्रहाः दृष्टिपथमायान्ति। तेषां प्रमुखाः केचन सन्ति –

१. कथासप्तकम् – नलिनी शुक्लायाः

२. मन्दोर्मिमाला – महाभारतकथावल्लरी, श्रीधरभास्करवर्णेकरस्य

३. हा हा, एकादशी च – इच्छारामद्विवेदिनः

४. कथासंवर्तिका – भागीरथप्रसादत्रिपाठिनः

५. अनाघ्रातं पुष्पम् – प्रशस्यमित्रशास्त्रिणः

६. उवाच कण्डुकल्याणः –प्रमोदकुमारनायकस्य

७. सहपाठिनी– प्रमोदभारतीयस्य

८. वृहत्सप्तपदी – दुर्गादत्तशास्त्रिणः

९. गल्पकुसुमाञ्जलिः – कालिकाप्रसादशास्त्रिणः

१०. संस्कृतकथाकुञ्जम् – गणेशरामशर्मणः

११. मञ्जुनाथगद्यगौरवम् (डॉ. रमाकान्तपाण्डेयेन सम्पादितम्) अत्र भट्टमथुरानाथशास्त्रिणः नैकाः कथाः सङ्कलिताः सन्ति।

१२. आख्यानवल्लरी – कलानाथशास्त्रिण:

१३. कथासार: – वि. वेलणकरस्य

१४. शुष्को वृक्ष: – कृष्णदत्तशर्मण:

१५. यौतकवर्तनम् –नन्दकिशोरगौतमस्य

१६. कथावलि: – तिरुवेङ्कटाचार्यस्य

१७. कथामञ्जरी – कर्णवीररागेश्वररावस्य

१८. अभिनवसंस्कृतकथा – नारायणशास्त्रिकाङ्करस्य

१९. रञ्जनकथामाला – कमल–अभ्यङ्करस्य

२०. चारुचित्रावलि: – सिद्धगोपालस्य

२१. लघुकथासङ्ग्रह: – मिहिरराजशर्मण:

२२. कथामृतम् – गुणपतिशुक्लस्य

२३. नीरवस्वन: – वनमालीविश्वालस्य

२४. इक्षुगन्धा, राङ्गडा चित्रपर्णी चेति अभिराजराजेन्द्रमिश्रस्य

२५. लघुकथासङ्ग्रह: – साहित्य–अकादमी, दिल्ली

२६. हत्याकारी क: – नारायणदाशस्य

२७. स्मितरेखा – त्रिपाठिनो राधावल्लभस्य

इच्छारामद्विवेद–वनमालिश्वासप्रभृतिकथाकाराणां केचन अन्येऽपि कथासङ्ग्रहा: प्रकाशिता दृग्गोचरीभवन्ति। राजस्थान संस्कृत–अकादेम्याऽपि केचन कथासङ्ग्रहा: प्रकाशिता:, नारायणदाशस्य 'वासन्ती' पत्रिकायामपि काश्चन कथा: सङ्कलिता: सन्ति। विस्तरभिया समेषां तेषां चर्चा नेह क्रियते।

भट्टश्रीमथुरानाथशास्त्रिणां कथा: विविधविषयानाश्रित्य प्रवर्तन्ते। तेषामनुभव–संसारोऽतीव विस्तृतो व्यापकश्चास्तीति कथ्यस्य सम्प्रेषणे पाठकानामुन्मुखीकरणे च सविशेषं प्रभवन्ति ते। तेषां सङ्कलनेऽस्मिन् प्रकाशितेषु उपन्यासेषु 'आदर्शरमणी'त्याख्य उपन्यास: स्त्रीसमस्यामधिकृत्य निबद्धो वर्तते। 'मोगलसाम्राज्यसूत्रधारो महाराजो मानसिंह' इत्युपन्यासोऽयमैतिहासिकीं भावभूमिमवगाहते। मानसिंह–राणाप्रतापयो: विवादम् अकबर–मानसिंहयोश्च मैत्रीं विषयत्वेनाङ्गीकृत्य निबद्धेऽस्मिन्नुपन्यासेऽज्ञातान्यप्यैतिहासिकतत्त्वानि सन्ति निगुम्फितानि। अतो न केवलं काव्यदृष्ट्या ऐतिहासिकदृष्ट्यापि महत्त्वमेधत एव

उपन्यासस्याऽस्य।

'भक्तिभावनो भगवान्' इत्युपन्यासे बालविधवाया 'दलितकन्याया' कमलाया वर्णनं वर्तते। समाजपरित्यक्ता भगवतो दर्शनार्थमितस्ततोऽटाट्यमाना कमलाऽन्ते तत्त्वज्ञानं प्राप्नोति। सा वदति–

**''अपि चरणामृतम्? चरणामृतं कुत्र दास्यसि? मुखे स्थानं नाऽस्ति। समस्तदेहस्योपरि भगवतो मदनमोहनस्याऽधिकारः संवृत्तः। मस्तके मदनमोहनः, जिह्वायां मदनमोहनः, हस्ते मदनमोहनः। क्व दास्यसि चरणामृतम्?''**

संस्कृतसाहित्ये दलितसाहित्यस्य प्रतिनिधिभूतोऽयमुपन्यासग्रन्थः।

ग्रन्थस्याऽस्य कथाखण्डे प्रकाशिताः कथा अपि वर्ण्यविषयानुसारेण सङ्कलिताः सन्ति। कासुचित् कथासु विद्यते एतिहासिकतत्त्वानां प्राधान्यं कासुचिच्चाऽन्यस्य कस्यचित्तत्त्वस्येति तत्तद्वर्ण्यतत्त्वमुपजीव्यकथानामेतासां विभागः कल्पितोऽस्ति।

सङ्ग्रहेऽस्मिन्नाहत्य ५८ कथाः सङ्गृहीताः सन्ति। यासु काश्चन अप्रकाशितपूर्वा अपि सन्ति– यथा जीविते ममता यथा वा हृदयव्रणः। भट्टमहाभागानां कथानां प्रथमोऽयं स्वतन्त्रः सङ्ग्रहः। पूर्वं केषुचित् विविधकथाकृतां कथासङ्ग्रहेषु तेषामपि कथाः सङ्कलिता अभूवन्। मया सम्पादिते मञ्जुनाथगद्यगौरवेऽथ च कथाकल्लोलिनीग्रन्थे काश्चन कथाः सहृदयैर्दृग्गोचरीकृता अभवन्। तेषां कथोपन्यासानामेतावान् विशालोऽयं प्रथमः सङ्ग्रह इति नूनमाधुनिकसंस्कृतसाहित्यक्षेत्रेऽपूर्वेयं घटनेति सहृदयसाहित्यतत्त्वविदां कथारसिकानां स्यादेव मनोमोदाय। भट्टमहाभागानामितोऽपि विशालतमं कथासाहित्यं विद्यते किन्तु कृतेऽपि प्रयासेऽस्माभिः काश्चन कथा नैवाधिगता इति तत्कृते पुनः प्रयासो विधास्यत एव।

मञ्जुनाथग्रन्थावल्याः सम्पादनयज्ञेऽस्मिन् मां योजितवद्भ्यो राष्ट्रियसंस्कृतसंस्थान-कुलपतिभ्यो विश्रुतसर्जकेभ्य आचार्यराधावल्लभत्रिपाठिमहोदयेभ्यो भट्टमहोदयानां ज्येष्ठसुपुत्रेभ्यो गुरुकल्पेभ्यो विविधविद्याप्रस्थानपारङ्गतेभ्यश्च देवर्षिकलानाथशास्त्रिमहोदयेभ्यः प्रणतिततयो वितीर्यन्ते। नूनं भट्टमहोदयानां साहित्यान्वेषणक्रमे शास्त्रिवर्यैर्भृशं प्रयतितम्। तस्यैव श्रमस्य परिणामोऽयं सङ्ग्रह इति दिक्।

**– रमाकान्तपाण्डेयः**

# उपन्यासखण्डः

- आदर्शरमणी
- मोगलसाम्राज्यसूत्रधारो महाराजो मानसिंहः
- भक्तिभावनो भगवान्

१

# आदर्शरमणी

## प्रथमः परिच्छेदः

अहो अद्य निकामं तमोऽन्धीकृतदशदिशावकाशा भयङ्करी निशा। ततोऽपि मुशलधारावर्षं वर्षता पयोभृता नितान्तमेव सन्तमसाडम्बरं समुज्जृम्भितम्। अस्यां निद्रितसमस्तजीवायां त्रियामायां जीर्णशीर्णबृहदट्टालिकाकोष्ठे मुमूर्षुरेको मलसङ्कुलशयनीयमधिशेते। शयनी-यस्याऽधस्ताच्च वत्सरमात्रवयस्कां कामपि कन्यकां क्रोडे गृह्णती युवती तिष्ठति। सैषाऽविरलगलद्बाष्पनिष्प्रभनयनयुगा वारं वारं निरीक्षते भर्तुर्मुखम्। बालिका च प्रगाढनिद्राभिभूता।

कतिपयक्षणानन्तरं कथङ्कथमपि कष्टादुक्तं मुमूर्षुणा ''प्रभावति''!

युवत्या पत्युर्निकटे वदनं नियम्य पृष्टम् ''किमस्ति''?

**मुमूर्षुः** – मदग्रे कुरु प्रतिज्ञाम्।

**युवतिः** – कीदृशी प्रतिज्ञा?

**मुमूर्षुः** – इयं बालिका यथा पैतृकसम्पत्तेः स्यादधिकारिणी तथैव प्राणपणात्प्रयतिष्य इति।

**युवतिः** – प्रतिज्ञास्ये किन्तु -----

**मुमूर्षः**– अवश्यं कर्तुं पारयिष्यसि। धर्मपथमनतिक्रामन्त्याः श्रीमान्धर्म एव सहायस्ते भविष्यति।

युवत्या धर्मोत्तेजितमत्या प्रतिज्ञातम्। ''यथैव यौष्माकीणां सम्पत्तिं यौष्माकी कन्या लप्स्यते तथैवाऽऽप्राणपातं यतिष्ये। धर्मः साक्षी श्रीगुरुश्च साक्षी''।

मुमूर्षुणा पुनः प्रत्युक्तम् ''तैः साकं न त्वया शात्रवभावोऽवलम्बनीयः। तथा सति न किमपि कर्तुं पारयिष्यसि। सरल उपायस्ते क्रोड एव'' ............

एतावत्येव धराधाम कम्पयन्प्रादुरभूद्भीषणभीषणो वज्रध्वनिः। गृहस्थो निर्वाणोन्मुखो दीपो हन्त हन्त कथाशेषोऽभवत्! मन्ये दैवेन वज्रनिनादच्छद्मना मुमूर्षुमन्तव्ये कृतोऽट्टहासः। अथवा तत्कथायाः समर्थनमेव कृतं स्यात्।

## द्वितीयः परिच्छेदः

अस्ति गोदावरीसरित्तीरे हरितक्षेत्राभिरामः पद्मपुरनामको ग्रामः। अहो एषु वैशाखदिवसेषु समधिकमनोरमो दृश्यतेऽयं ग्रामः। तत्रापि प्रत्यूषसमयेनाऽधुनाऽमुष्य शोभा भूयसीं गुरुतां नीता। नाधुना जातो भगवतो दिनाधिनाथस्य लोकमङ्गलोदयः समुदयः। अत एव दृश्यते इतस्ततः प्रसृत्वरा मनाक् तमोलहरी। नाप्यधुना प्रातःसमयमङ्गलपाठकानां श्रूयते वयसां श्रवणमनोहरः स्वरः। अस्मिन्समये तरलतुरङ्गममारूढौ द्वौ नवयुवकौ पद्मपुरग्रामात्पूर्वतो मन्दं मन्दं गच्छतः। यावता चेमौ ग्राममुल्लङ्घ्य कियन्तमप्यध्वानमतिक्रामतस्तावतैव पूर्वस्यां दिश्यदृश्यत पूर्वाकाशे मनागरुणिमा। यमिमौ पन्थानमवलम्ब्य गच्छतस्तदुभयप्रान्ते गगनाभोगसङ्गिनः सन्ति श्रेणिनिबद्धा महीरुहाः। ते चाधुना प्रातः समीरणरयात् शाखाः प्रशाखाः कम्पयन्तो मधुरमधुरं शब्दायन्ते। समधिकशीतलमारुतबीज्यमानौ चेमौ परस्परं समालपन्तौ सानन्दं गच्छतः।

उभावप्युज्ज्वलगौरवर्णौ, उभयोरपि भ्रमरकृष्णाः केशाः उभयोरपि मीनयुगमधः कुर्वत्कृष्णतारकं नयनयुगलम्, उभयोरपि मांसलां बलव्यञ्जिकाञ्च तनूमवलोक्य बाल्यकालादेवाऽनुमीयते व्यायामचर्चा। ताविमौ वेषभूषादिभिर्वाङ्गावित्यनुमीयेते। एतयोस्तुरङ्गौ तुङ्गौ, तेजस्विनौ, तथा सैनिकतुरगवत् सुशिक्षितौ दृश्येते। एतयोरेकोऽश्वः समधिककृष्णोऽपरस्तु रजतविजित्वरकान्तिः।

श्वेताश्वारोहिणा सहचरं सम्बोध्य गदितं ''जगदिन्दो! बुद्ध्यते कदापि नायातो भवानिमं ग्रामम्?''

कृष्णाश्वारोहेण योऽस्माकं जगदिन्दुनाम्ना परिचितः। प्रत्युक्तम्, शैशवावस्थायामेकवारं सुगृहीतनामधेयैस्तातचरणैः साकमागतोऽभूवं ग्राममिमम्। परं नायं परिचितचरः पन्थाः। तातचरणैः साकं तु मार्गान्तरेणैवाऽऽगच्छम्।''

**सहचरः** - भवदीयः कर्मचारी तु मन्येऽद्यातीव सम्भ्रान्तो भवेत्।

**जगदिन्दुः** - मया तु बहुशो वारितो न मदर्थं समधिकमायोजनं कार्यमिति। परं किं तैरिदं श्रुतं स्यात्। मुख्याधिकारिमहाशयोऽतीव सज्जनः। श्रुतं मया श्रीमत्या मातुः सकाशाद्यदस्माकं ग्रामादिसम्पत्तिमुद्दिश्य यदा कनकपुरनिलयेन कुमुदरञ्जनेन साकमभूदभियोगस्तदा प्राचीनतमस्यास्यैव कर्मचारिणः प्रयत्नेन बुद्धिकौशलेन चास्माकीना सम्पत्तिर्न विनाशं चुम्बितवती।

**सहचरः** - अहमप्येवंविधमेकं लोकमन्विष्यामि। अहं द्वादशापि मासान्विदेशे निवसामि। उपयुक्तं प्रबन्धकारिणं विना नितान्तं विशृङ्खलता जायते।

सम्प्रति पाठकेभ्यो बन्धुद्वयस्याऽस्य परिचयो दातुमावश्यकः द्वयोरपि सहचरयोर्यस्य जगदिन्दुरिति नाम सोऽधुना पूर्ववङ्गस्य सम्पन्नो भूमिस्वामी। सोऽयमाबाल्यादेव कलिकातानगरेऽध्ययनाय निवसति। शैशव एव परलोकपथिकतां गतवति पितरि पुरातनस्य सुयोग्यमन्त्रिणो रामपालितमहाभागस्य निस्तुलेन प्रयत्नेन नाभूदस्य भूसम्पत्तौ काऽपि हानिः। प्रत्युत पुरातनकर्मचारिणां समयादप्यमुष्य मन्त्रित्वे समभूत्समधिकमायवृद्धिः। अस्यैव च महाभागस्य समुद्योगेन नाभूज्जगदिन्दोः पठनादिषु व्याघातः। क्रमाच्चायं विश्वविद्यालयादधि-जगाम बी०ए० इत्युपाधिम्।

जगदिन्दोः सहचरश्चासौ प्रमदारञ्जनाख्यः सत्कुललब्धजन्मा उभावपीमौ समवयस्कौ सहैवाध्यैषाताम्। इदानीं प्रमदारञ्जनः प्राप्त बी.ए. (क्ल.) इति विरुदो हुगलीप्रान्ते द्वितीयः प्राड्विवाकः अस्य च पैत्रिकं सद्म पद्मपुर एवास्ति। आधुनिकधनिकानामिव नासीदस्य मनागपि निजग्रामत्यागपूर्वकं कलिकातानगरनिवासपक्षपातः। एष हि गोदावरीचञ्चल्लहरीप्रसरधौतपरिसरं नालिकेरतालहिन्तालपरिवृतं बहु मेने निजं पद्मपुरग्रामम्। कलिकातानगरेऽध्ययनसमयेऽपि चायं बहुधा जगदिन्दोरङ्कयामास हृदि पल्लीग्रामचित्रम्। येन जगदिन्दुः कल्पनासाहाय्येन प्रशान्तं नीरवं निकुञ्जवनवेष्टितं कलकलनिनादिनदीतीरस्थितं क्षुद्रग्रामं भीषणकर्दमाक्तेन कोटिकण्ठनिः – सृतकोलाहलमुखरितदशदिगन्तेन कलिकातापत्तनेन निभृतं तुलयाञ्चकार।

जगदिन्दोः पैत्रिकपरिवारः कलिकातानगर एवाऽवात्सीदतस्तस्यासीत्समधिकं पल्लीग्रामदर्शनौत्सुक्यम्। अधुना च प्रमदारञ्जनमहाभागो मासत्रयावकाशमादाय समागतो निजग्रामं ससम्मदमामन्त्रयामास निजसुहृदं जगदिन्दुम्। परिणतचिरचिन्तितमनोरथस्य चास्य जाताः पञ्चषा दिवसाः। प्रमदारञ्जनेनाऽपि नूतनरीत्यनुसारेण भूयसी कृता निजग्रामोन्नतिः।

पद्मपुरग्रामात्सार्द्धक्रोशत्रयान्तराल एव समधिकमनोरमो वसन्तपुराभिधो ग्रामः। वसन्तग्रामोऽपि जगदिन्दोः पैत्रिकभूपरिसरमध्यगतः। अस्मिन्नेव च ग्रामे पुरातनयोग्यमन्त्री रामपालितमहाशयः सपरिवारो निवसति। मन्त्रिमहाशयेन यदा श्रुतं स्वस्वामिनः पद्मपुरागमनं तदैव स्वयमुपस्थाय कृतं समुहृदोऽस्यामन्त्रणम्। निमन्त्रणरक्षणार्थमेव चेमौ सहचरौ पद्मपुरात्सम्प्रति वसन्तपुरं गच्छन्तौ मध्येमार्गं नयनगोचरौ बभूवतुरस्माकम्।

## तृतीयः परिच्छेदः

वसन्तपुरान्तर्दक्षिणतो लताप्रतानवेष्टितो विराजते द्वितलः सौधः। तत्रत्यानां ग्राम्यकृषकाणामिदं हर्म्यं ''मन्त्रिसदनम्'' इति बहुशः परिचितम्। पाठकमहाभागानामपि नापरिचितमिदं भवेद्यदस्य सौधस्य मन्त्री रामपालितमहाभाग एवाधिकारी।

अद्य दिवसोदयादेव मन्त्रिसदने लोकानां महान्सङ्घट्टः। अद्य निमन्त्रणे वसन्तपुराधिकारी, पद्मपुरवास्तव्यप्राड्विवाङ्महाशयश्च मण्डयिष्यति निकेतनमिदमिति विधीयते समधिकमायोजनम्। मन्त्रिमहाशयस्याऽधीनाः सर्वे कर्मचारिणोऽप्यायोजनदत्तचितास्तत इतो यातायातं कुर्वन्ति।

गृहाङ्गणमपि तत्तद्वस्तुविस्तरणे समाकीर्णमिवाऽस्ति। कुत्रापि समधिकसौगन्ध्य-सुरभिताभितोभागाः सज्जीक्रियन्ते सुमनोमालिकाः। कुत्रापि च हरितहरितपेलवपल्लवैः प्रकटीक्रियन्ते पत्रपुटकानि। प्रकाण्डे चैकस्मिन्गृहप्रकोष्ठे रजतपाण्डुरं स्वच्छमास्तरणमास्तृतमस्ति। तत इतश्च शुभ्रवस्त्रावृतानि स्थूलकायान्युपधानानि निहितानि सन्ति। श्वेतास्तरणस्य कियानपि भागो विविधचित्रचित्रितेनोर्णावस्त्रेणाच्छादितोऽस्ति। तदिदमनुमीयते केवलं निमन्त्रितयोः प्रधानमहाशययोरेव स्थितिमपेक्षते। सदनस्यैकतरे भागे च मन्त्रिमहोदयश्चान्ये च ग्रामभद्रपुरुषाः कर्मचारिणश्चोच्चजातीया यथोचितं तिष्ठन्ति। द्वित्राणि च रौप्याणि धूम्रपानपात्राणि हस्ताद्धस्तं गच्छन्ति गडगडाशब्दैर्मुखरयन्ति गृहप्राङ्गणम्।

अलिन्दभूमौ च प्रहरिगणा अरुणवस्त्रावृतमूर्द्धानो गृहीततैलमसृणसुदीर्घवंशदण्डाः पायं पायमुत्सृजन्ति धूमधोरणीः। मध्ये मध्ये सहासं वार्ता अपि कुर्वन्ति परं सुमृदुना स्वेरण।

गृहस्वामिमहाशयश्च मध्ये मध्येऽन्तःपुरजवनिकान्तर्नीतवदनस्तारस्वरेण पृच्छति कदाचित् ''किं दासघोषेण नाधुनाऽप्यानीतमसलिलं दधि'' ''कालदीर्घिकातः केनानीता मत्स्याः'' ''कुमुदिकया कच्चिदानीतानी नागरवल्लिदलानि'' इत्यादि।

अस्मिन्नेव समये भृशं श्वसता प्रहरिणैकेन गृहपतये निवेदितम् ''कमलवापिकापार्श्वे द्वावश्वारोहावित एवायान्तौ दृश्येते। मन्ये कावपि गौराङ्गौ स्याताम्।''

आकर्ण्य चेदं ''धिङ् मुग्ध! ससुहृद् ग्रामपतिमहाभागः समायाति'' इति वदन्सपरिजनो मन्त्रिमहाशयः स्वामिस्वागतायाऽग्रेसरो बभूव।

कियन्तमप्यध्वानमतिक्रम्य सर्वैरवलोकितं यदश्वारोहिद्वयं तत्सम्मुखमेवायाति। भद्रपुरुषपरिवृतश्च मन्त्रिमहाशयः सपर्यायै सज्जोऽभवत्।

अल्पेनैव कालेनाऽश्वारोहिद्वयं मन्त्रिमहाशयं समया समागत्य तरलतुरगादवततार। मन्त्रिमहाशयकृतेङ्गितौ च द्वौ भृत्यौ खलीनखणखणत्कारमुखरितमुखभागौ तुरगौ बल्गायामग्रहीषाताम्।

जगदिन्दुः पितृकल्पं विद्यावयोवृद्धं ब्राह्मणं मन्त्रिमहाशयं सविनयं प्रणनाम। प्रमदारञ्जनोऽपि यथोचितं चकार नमस्कारम्। समवेताः कर्मचारिणो नतमस्तका ग्रामस्वामिनं बद्धाञ्जलिपुटाः प्रणेमुः। कतिपयैर्ग्रामविप्रैश्चोत्तोलितकरैः कृतः सुस्मितप्रसन्नान-नयोर्द्वयोरप्याशीर्वादः। भृत्यप्रहरिकादिभिर्दण्डपातं पतद्भिः कृतः स्वामिमहाशयाय सविनयं

प्रणाम:। ससहचर: स्मेराननानुमीयमानोत्साहो जगदिन्दुरपि सर्वान्यथोचिताचारेण सम्भावयन्सर्वै: परिवृतो गृहाग्रेसरो बभूव।

द्वावपि बान्धवौ पृथग्विनियोजिते कक्षे वस्त्रपरिवर्तनादिकं विधाय मन्दमधुरपादक्षेपै: सभागृहे मुख्यासनमलञ्चक्रतु:। सकला च सभ्यमण्डली निजनिजोचितमासनमधिष्ठितवती। त्रिचतस्रश्च परिचारका वीजयाम्बभूवुर्वृहद्वृहद्भिस्तालवृन्तै:।

अस्मिन् समये मन्त्रिमहाशयेन मणिमुक्ताजालजटिल: स्वर्णहार एक: स्वामिसेवाया: प्रधानं चिह्नमिव जगदिन्दो: कन्धरायां साग्रहं विनिवेशित:। सविनयमुक्तञ्च– ''अहं भवत: कर्मचारी प्रजा चेति श्रीमते उपहारप्रदानं कर्तव्यं मे।''

अनन्तरञ्च मन्त्रिमहाभाग: सर्वानपि समवेतग्रामभद्रपुरुषान् श्रीमतो जगदिन्दो: प्रमदारञ्जनस्य च चकार योग्यताप्रदर्शनपुरस्सरं परिचितान्। समस्तैरपि च तत्रत्यैर्निजनिजयोग्यतानुसारं ग्रामपतिमहाशयाय दत्त: सविनयोपहार:।

जगदिन्दुमहाशय: पूर्वं कदाचिदपि नागत आसीदिमं ग्रामम्। अत एव भूयोभि: कर्मचारिभिर्नासौ प्रत्यक्षीकृत आसीत्। अद्य नूतनं निजस्वामिनं परिपीय लोचनचषकैस्तद्योग्यतां नम्रतां गुणज्ञताञ्चावधारयद्भिर्धन्यान्याकलितानि भागधेयानि ग्रामवासिभि:।

## चतुर्थ: परिच्छेद:

सम्प्रति सञ्जातो मध्याह्नसमय:। प्रखरतरकिरणैस्तापयति धरातलं भगवान् सहस्रकिरण:। तिग्मतरैर्भास्करकरैर्गृहप्राङ्गणान्याकीर्णानीवोपलक्ष्यन्ते। वसन्तपुरनिवासिनश्चास्मिन् समये पादपनिकरवारितापे गृहाङ्गणे यथासुखं तिष्ठन्तो यापयन्ति रौद्रातपतापमयं मध्याह्नसमयम्। पशुगणाश्च प्रच्छायशीतले तरोस्तले स्वैरमासीना रचयन्ति रोमन्थम्। आतपभयादिव वायुरपि कदाचित् कदाचित् महीरुहशाखा: कम्पयति। निबिडतरतरुकोटरे निलीना: पक्षिणो वाचमपि न चिराय मुञ्चन्ति। शतशतनरपरिवृतमपि जलाशयतटं सम्प्रति शून्यमालक्ष्यते। प्रतप्तबालुके च पथि नैकोऽपि पथिको गतागतं कुर्वाणोऽवलोक्यते।

अस्मिन्समयेऽवसितेऽभ्यवहारादिकार्येऽन्त:पुरस्थैकस्मिन् प्रकोष्ठे प्रवीणा मन्त्रिगृहिणी स्वामिना साकं सुमृदुना स्वरेण किमपि मन्त्रयमाणा तिष्ठति। मन्त्रणा चेयं प्रायो नितान्तमेव मन्दस्वरेण भवति। मध्ये मध्ये चापेक्षाकृतेनोच्चस्वरेणाऽपि भवति संलाप:। कियत्कालानन्तरमुक्तं गृहिण्या ''न जाने कुतो वा मे सङ्कुचति चेत: । पुराऽयं मयावलोकितस्तदायमासीन्नितान्तमबोध: शिशु:। इदानीञ्चाऽयमेक: प्राड्विवाक:। कथङ्कारमस्य सन्निधौ मन्त्रयिष्ये ।

**स्वामी** – अयि किमिदम्। भवतीमन्तरा यदीदं कार्यमसेत्स्यत्तदाहं न भवतीमस्मिन् कार्ये न्ययोजयिष्यम्। प्रमदाञ्जनस्तु साम्प्रतं तव बालकल्पः। त्वमिहास्स्व, तमहमानयामि। अगत्या गृहिणी भर्तुराज्ञापालनाय सज्जाऽभवत्।

कक्षान्तरे यस्मिन्प्रतिष्ठितयोर्निमन्त्रितयोरासीदावासस्तत्र मन्दं मन्दं पदौ निक्षिपन्

जगाम मन्त्रिमहाभागः। ददर्श च यज्जगदिन्दुरेकं मासिकपत्रमुन्मुक्तं हृदि निधाय खेदसन्दोहविमुक्तां निद्रामनुभवति। जगदिन्दोः पार्श्व एव चैकतरोपधानधृतवक्षोभरः प्रमदारञ्जनोऽप्येकतानः सन् दैनिककार्यपुस्तकमुन्मुच्यालोचयतीति। शोभनोऽयमवसर इति मृदुमधुरेण स्वरेण जगाद प्रमादारञ्जनं मन्त्रिमहाशयः।

''श्रीमता साकं किमपि गुप्तं मन्त्रयितव्यमस्ति''

श्रवणानन्तरमेव च बहिरागत्य सविनयमवादीत्प्रमदारञ्जनः।

''किमु मया साकम्?''

**मन्त्री**– आं महाशय! कष्टकरमपि श्रीमान् स्वीकरोत्वन्तःपुरगमनम्। अस्मद्गृहिणी श्रीमते दातुमभिलष्यत्याशीर्वादम्।

**प्रमदारञ्जनः** – किमु मह्यम्?

**मन्त्री** – श्रीमतो मन्ये स्मरणं नास्ति यद्धरिपुरग्रामे जगाम भवान् मातृष्वसुः सदनम्। तत्र च मद्गृहिणी भवन्तमङ्के कृत्वा बहुधा प्रादर्शयद् भूयांसमादरम्। अस्मच्छ्वशुरनिवासो हरिपुर एवास्ति। मद्गृहिणी श्रीमतो मातुः स्वसा चाकल्पयतां परस्परं भगिनीभावम्।

**प्रमदारञ्जनः** – अहो सम्प्रति स्मरामि श्रीमतो गृहिणी खलु मम मातुः स्वसुर्भगिनी भवति। तर्हि नाहं श्रीमतोः परकीयः श्रीमान् हि मे मातृष्वसृपतिकल्पः। एषोऽहं प्रयामि श्रीमतीं मातृष्वसारं प्रणमामि।

एतदालापोत्तरं मन्त्रिमहाभागेन साकं पूर्वोक्तकक्षे प्रविश्य किञ्चिदवगण्ठनमण्डितां प्रणनाम मन्त्रिधर्मपत्नीं प्रमदारञ्जनः। प्रोवाच च ''मातृष्वसृमहाभागे! अपि सुखं स्थीयते?''

गृहिणी पूर्वमासीदत्यर्थं सङ्कुचिता, परं प्रमदारञ्जनमुखान्मातृष्वसृसम्बोधनं निशम्य मुमोच सङ्कोचम्। आशिषः प्रदाय च सस्नेहमवादीत्। ''वत्स! भवति सुखिते वयं सुखिनः स्मः। भवन्माता कच्चिदस्त्यनामया?''

**प्रमदारञ्जनः** – आं माता सुखं तिष्ठति। सम्प्रति वार्द्धक्येनाक्रान्ता।

**गृहिणी** – कुतो वा न स्यात्। सा चाहञ्चोभे अपि समवयस्के। प्रत्युत भवन्माता मत्तः किञ्चिज्ज्यायस्येव स्यात् ,अहमेव सम्प्रति प्रत्यापन्ना वार्द्धकम्। अयि वत्स! भूयान्

कालोऽभून्न दृष्टा श्रीमतो जननी।

**प्रमदारञ्जनः** – श्रीमती यदाऽभिलष्यति तदैवेदं तु सम्भवति। इत्यादिनानाविधमधुरसंलापोत्तरं चकार प्रकृतकार्यकथां मन्त्रिगृहिणी। शनैः शनैः शिरः शाटीमधो विदधती नतानना निजगाद।

''ननु वत्स! त्वमेवास्माकं भूस्वामिमहाभागस्य दक्षिणहस्तः। तेषां मुखादश्रौषं यच्छ्रीमन्तौ परस्परमभिन्नसुहृदौ। श्रीमान् यदि वदति किञ्चिन्नैतन्महाशयो न गृह्णाति। पश्य! तत्रभवतस्तस्य माता वर्तमानाऽस्ति परं साम्प्रतमवर्तमानेषु गणनीया। भवत्प्रियसुहृच्च द्वादशाऽपि मासान् कलिकातानगरे निवसति। स्वग्रामगमनस्य नामपि न जातु गृह्णाति। जरती जननी चापि काशीं यामि, काशीं यामीति करोति। अमुष्य महाभागस्य वयोऽपि समुचितं जातं किन्तु नाद्यापि कृतो दारपरिग्रहः। भूसम्पतिश्च तत्र भवतो भवन्मातृष्वसृस्वामिमहाशयेनैव रक्षणनिरीक्षणै –रक्षता रक्षितेति स्यादेव ते विदितम्। परं पश्य वत्स! सम्पत्तिसम्पादनादेव किं सिध्यति। तस्मिन्नकृतपरिग्रहे कः खलु रक्षिष्यति सम्पदमिमाम्। तद्यदि भवाँस्तत्रभवन्तममुं परिणेतुमनसं कुर्याच्चेत्सर्वं सम्यक् स्यात्। भवन्तमन्तरा च नेदं श्रीमते वक्तुं कश्चित्पारयिष्यति।

**प्रमदारञ्जनः** – ननु यदाह भवती तत्सर्वं समुचितम् परं जगदिन्दुः साम्प्रतं नवयुवकः। नवीनाञ्च नीतिरीतिं मनसा स्निह्यति। दीनकन्या सुरूपसम्पन्ना स्यात्तदैवासौ परिणेष्यति। धनिककन्याञ्च नासौ परिणेष्यतीति प्रतिज्ञातममुना। किं बहुना तस्य भूयान् विचारनिचयः। एतेषु च दिवसेषु विषयेऽमुष्मिान्नभून्मे संलापः। न जानेऽमुष्मिन्विषये तन्मतपरिवर्तनं जातं न वेति।

**गृहिणी**– अस्मत्सदने साम्प्रतमस्ति कन्यैका, सा चातिचतुरा सुरूपरुचिरा च। यदि भवद्वयस्यो वाञ्छति शक्नोति सायंसमये समालोकितुमिमाम्। अहो! कन्येयमर्हति राजसिंहासनमारोढुम्।

**प्रमदारञ्जनः** – बाढम्, श्रीमत्या तत्समये समानेयाऽसौ। अहमपि कौशलसाहाय्येन साधयिष्यामि साधनीयम्।

सपरिग्रहो मन्त्रिमहाभागो भूयसीभिराशीर्भिर्योजयन् प्रमदारञ्जनं जगाद। ''कन्यायां नूनमहमेवाभिभावकः। अत एव साम्प्रतमहमस्मि व्यस्तः। कन्याऽपि विवाहोचितं वय आपन्ना। त्रयोदशं वत्सरमतिक्रम्य चतुर्दशं वर्षमलङ्करोति।''

अनन्तरञ्च गृहिणीं प्रणम्य प्रमदारञ्जनो निजनिवासनिकेतनं प्रत्यावर्तिष्ट।

## पञ्चमः परिच्छेदः

निद्राभङ्गोत्तरं व्यलोकयज्जगदिन्दुर्यत्प्रमदारञ्जनो बङ्गभाषामयमेकं पुस्तकं साभिनिवेशं समीक्षत इति।

मन्त्रिमहाशयवेश्मनि भूयसी खलु साहित्यचर्चा। पुस्तकालयेऽपि काचकपाटिका-मण्डितासु कोष्ठिकासु (आलमारी) विचित्रवर्णानि नानावर्णावरणानि च पुस्तकानि यथास्थानं सन्ति विनिवेशितानि। सुश्लक्ष्णवसनाच्छादितासु च काष्ठमञ्चलिकासु (टेबुल्) संस्कृत-बङ्गभाषामयानि संवादपत्राणि शोभन्ते। कुतो वा न स्यात् ''मन्त्रिणो रामपालितमहाभागस्य भूयसी खलु साहित्यप्रीतिः।''

बन्धुं सम्बोध्य जगाद जगदिन्दुः ''मन्ये मनागपि भवन्नयनयुगलं न चुम्बितवती भगवती निद्रा।''

**प्रमदारञ्जनः**- (सहासम्) ननु परसेवामारचयन्तो निद्राहारविहारं दूरतः परित्यजन्ति।

**जगदिन्दुः**- सेयं सेवाया मन्ये पराकाष्ठा। एवंविधामुन्नतकक्ष्यामधिरूढवन्तोऽपि न्यूना एव स्युः।

एवंविधैः परस्परप्रमोदमयैरालापैरतिवाह्य कियन्तमपि कालं, जगदिन्दुरुत्थाय च वातायनधृतभृङ्गारकापोहितेन विमलशीतलसलिलेन प्रक्षालयामास मुखम्। अनन्तरञ्चाना-वृतवातायने नीत्वा वदनं जगाद प्रमदारञ्जनम्।

''अहो उत्तरदिवसस्याप्यतिक्रान्ताश्चतस्रो घटिकास्तथापि नाधुना यातः प्रशान्तिमातपतापः। नापि च पथिकजनचरणचुम्बनानुचिताभिः सिकताभिरवलम्बितः शान्तभावः। नापि साम्प्रतं तरुनिकरमूर्द्धशोषं शोषयति मध्याह्नमतिसङ्क्रान्तो मनागपि शीतिमा। एष च भगवान्मरीचिमाली क्रमञ्चुम्बन्नपि पश्चिमाकाशावकाशं नेदानीमपि संहरति प्रखरतरं किरणनिकरम्।

समये चास्मिन् न शक्यते ग्रामादस्मात्प्रस्थातुम्। तस्मान्मण्डयति गगनाभोगं भगवति रजनीप्राणनाथे ज्योत्स्नापूरविध्वस्तध्वान्तेनाऽध्वना प्रयास्यावः समीहितं देशम्।''

एतत्संलापोत्तरमेव मण्डयामास सदनमध्यं मन्त्रिमहाशयः। बभूव च भूयांसं समयं यावन्मन्त्रिमहाभागेन साकं जगदिन्दुमहाभागस्य ग्रामादिसम्पत्तिविषये भूयान् विचारः। मध्ये मध्ये प्रमदारञ्जनस्यापि सम्मतिः समगृह्यत। विचारमध्य एव च पप्रच्छजगदिन्दुः ''मन्त्रिमहाशयाः! अस्माकं वात्सरिकः कियानायः स्यात्। कर्मचारिणां वेतनादिप्रदानोत्तरं ग्रामात्कियदुत्तिष्ठते?''

मन्त्रिमहाशयो नीरवः सन् विचाराञ्चकार किञ्चित्। कियत्क्षणानन्तरञ्च गम्भीरभावमवलम्ब्य प्रोवाच ''यदि सुवृष्टिः स्याद्दैवाद्युपद्रवाश्च न स्युरादेयद्रव्यमपि समस्तं हस्तगतं स्यात्तर्हि त्रीणिलक्षाणि कियन्ति सहस्राणि च मुद्राणामवशिष्येरन्। परं सर्वाण्यपि वर्षाणि न भवन्ति समानानि न च समस्तेष्वपि वत्सरेषु समानमादेयं भवति। एतदुत्तरमपि राज्याभियोगादिषु भूयान् व्ययः सम्पद्यते, परं वात्सरिकानुमानेन लक्षत्रयं मुद्राणां ग्रामेभ्यः सम्भवतीति पार्यते निरूपयितुम्।''

जगदिन्दुरिदमाकर्ण्य लज्जामुत्कण्ठाञ्च किञ्चिदुदञ्चयन् प्रोवाच– ''श्रीमतामस्मत्सम्पत्तेः कियती वृत्तिर्नियमितास्ति।''

**मन्त्रि०** – आयुष्मतस्तातचरणानामाधिपत्ये मम मासिकवेतनं त्रीणि शतानि रजतमुद्राणामभवत्। ततः परं क्रीतेषु बहुषु ग्रामेषु समृद्धिमापन्नेषु च वात्सरिकेषु द्रव्येषु मासिकवेतने मे मुद्राशतद्वयवृद्धिरभवत्। तदद्यावधि पञ्चशतं मुद्राणां मासिकवेतनं मे नियतम्।

जगदिन्दोरिदमाकर्ण्य बभूव भूयसी लज्जा। लज्जारुणगलकपोलमण्डलश्च विचारयाञ्चकार किञ्चिच्चेतसि। किञ्चित्क्षणानन्तरञ्च सविनयमवादीत् ' भवन्तः पितृचरणानां बान्धवस्तथा तेषां सहकारिणस्ततो ममापि श्रीमन्तः पितृतुल्याः। अश्रौषञ्च श्रीमत्या मातुः सकाशाद्यदियं भूसम्पत्तिः श्रीमतामेव बुद्धिकौशलेन निस्तुलेन प्रयत्नेनानुपमेन च प्रोत्साहेनाभवत्सुरक्षिता। श्रीमतां रक्षणावेक्षणाभावेऽस्माकमियं सम्पत्तिः किमवस्थाऽभविष्यदिति तु वयं विचारयितुं निरूपयितुञ्चापि न पारयामः। भवन्तः स्वकीयेऽस्मिन्नादेयद्रव्ये कियतीञ्चन वृद्धिं कुर्वन्त्विति भूयान्मेऽभिलाषः। किञ्चामुष्मै मासिकद्रव्यायेतः परं वेतनशब्दं न प्रयोक्ष्यथ। वेतनशब्दमाकर्ण्य भृशमहं लज्जितो भवामि। अथ वर्तमानमासमारभ्य भवन्तो दशसहस्रं मुद्राणां वात्सरिकीं वृत्तिं कल्पयन्तु''।

वृद्धो मन्त्रिमहाशयः कियन्तमपि कालं यावन्निस्तब्धः संस्तथौ। आनन्दसन्दोहेनात्मानमपि विसस्मार मन्त्रिमहाभागः। अननुमेयः प्रमोदप्राग्भारः प्रादुरभूद्वेतनवृद्धिमनुनिशम्य, किन्तु स्वर्गगतः प्रभुर्मृत्युसमये इमं बालकं हस्ते समर्पितस्सोऽयं कुमारो नम्रतायां योग्यतायां गुणज्ञतायां कृतज्ञतायाञ्चादर्शभूतः सम्पन्न इति गौरववृद्धस्य मन्त्रिमहाशयस्य नयनयुगलमानन्दाश्रुकलाकुलमभवत्। यद्यन्यथाप्रवृत्तचितो मन्त्रिमहाशयो मनस्यकरिष्यत्तर्हि शतत्रयात्मकं किं सहस्रत्रतयात्मकमपि मासिकवेतनमात्मनः कल्पयितुं प्राभविष्यत्, कृतान्यायपथावलम्बनश्च शिशुं प्रभुकिशोरकं पादघातं हत्वा स्वयमेव वा भूस्वामितामात्मनः सम्पादयितुमपारयिष्यत्, प्राभविष्यच्चात्मनो निकेतनं कनकमयं कर्तुम्। परक्षणप्रभाप्रभाविनश्वरस्य द्रव्यस्य कृते न मनागप्याग्रहो मन्त्रिणो मनस्यासीत्। अत एव द्रविणनिमित्तं न लेशतोऽपि मन्त्रिणः प्रमोदोऽभवत्। समभवत्खलु स्वहस्तरोपितस्य नूतनतरोः सुधामयफलं समवलोक्य, निजनिर्मापितस्य सरोवरस्याऽमृतस्यन्दि पानीयं समुपलभ्य, जनकविहीनस्याऽप्रौढस्यापि भूमिस्वामिनो दयां दाक्षिण्यं कृतज्ञतां विनयञ्च समवलोक्य।

प्रमदारञ्जनो बुद्धिवयोवृद्धस्य मन्त्रिणो मनोभावमवबुद्धय च मनोविनोदननिमित्तं कथान्तरं प्रवर्तयितुमवदत् ''ननु मन्त्रिमहाशयाः! श्रीमतां सन्धाने काचिदेका सुरूपसम्पन्ना कायस्थकन्याऽस्ति? सा चौत्तरकायस्थकन्या स्यात्। परं कन्याऽतीव सुश्रीः शुभलक्षणा सुदक्षिणा चापेक्ष्यते।''

सुचतुरो मन्त्रिमहाशयः प्रमदारञ्जनमनोगतमभिप्रायं सुभृशमवबुद्ध्य सरलभावेनाऽवोचत ''ईदृशी कन्या सम्प्रति क्व शक्यते लब्धुम्? औत्तरकायस्थकन्या सुरूपसम्पन्ना च? आम् अस्त्येका कन्या तादृशी, परमहं जाने सा नास्त्येव, कापि नास्ति तादृशा कन्या।

**प्रमदा०** - अहो यां कन्यामुद्दिश्यास्तीत्युच्यते सा नास्तीति कथं सङ्घटते।

**मन्त्रि०**- सा हि न खलु किञ्चिदपि मन्दश्रीर्न चापि हीयते कथञ्चिदपि कल्याणैर्लक्षणैः। तथापि सा बाढं दुःखिनी नितान्तं दीना भिक्षुरित्येकेन प्रकारेण शक्यते वक्तुम्।

**प्रमदा०**- नितान्तं दीना? तावता किं वा भवति? दीनकन्यां स्वीकृत्य का वा क्षतिर्जायते। परं सम्प्रति सा कन्या क्वाऽस्ति?

**मन्त्रि०**- अस्मिन्नेव वेश्मनि सा निवसति।

जगदिन्दुरुभयोः परस्परालापमिममाकर्ण्य नितान्तं चकितः सहचरं सम्बोध्य पप्रच्छ- ''अये! सम्प्रति कन्यायाः किं भविष्यति?''

**प्रमदा०** - विवाहो भविष्यति। नूनमन्यत्कन्यायाः किं भविष्यति?

**जगदि०**- परमिदमाकलय, विवाहं कः करिष्यति?

**प्रमदा०**- अस्त्यस्माकमेकतर आत्मीयः। स हि सम्बन्धेन मे भ्राता भवति। भूयश्च विश्रम्भभाजनम्, बहिश्चराः प्राणा इति शक्यते वक्तुम्।

**जगदि०**- ननु भवांस्तु दाक्षिणात्यकायस्थः।

**प्रमदा०**- अयि भोः किमौत्तरकायस्थेन साकमात्मीयताऽपि न शक्यते धारयितुम्? तथा सत्युभयोरावयोरपि न घटेत साम्प्रतमेषाऽऽत्मीयता। यतो हि भवानपि तु औत्तरकायस्थः?

मन्त्रिमहाशयः प्रकृतकार्यं साधयितुमना मनागुदात्तेन स्वरेण निजगाद। ''यदि श्रीमद्भिरभिलष्यते न च किञ्चिदावश्यकं हीयते चेत्तामहं दर्शयितुमपि पारयामि परमिदं तत्रापि, सा कन्याऽतीव दीना।''

जगदिन्दुः पूर्वमेव विस्मयावहञ्च, अविदितपूर्वापरसन्दर्भञ्च कौतूहलगर्भञ्च परस्परालापमिममाकर्ण्य नितरामासीदसीमकौतूहलोत्तेजितमतिः। सम्प्रति च द्विचतुर्वारं मन्त्रिमहाशयमुखात् ''दीना दीना'' इति शब्दं श्रुत्वा जगदिन्दोर्मानसिकविचारस्रोतः

समभूदेकवारमेव वेगवाहि। वेगोद्गारञ्च न्यञ्चयितुमपारयन् किञ्चिदाकुञ्चितभ्रूलतः प्रोवाच–

''महाशयाः! किन्तु कन्या दीनेति विवाहे हीयते किञ्चित्, उत चारुलक्षणाऽपि मानसमाह्लादयन्त्यपि दीनकन्येति कारणात्किमुचिता त्यक्तुम्, आहोस्विन्निर्धनकन्येति दर्शनपथादपि परिहरणीया। किञ्च यदि रोचेत चेतसे ततोऽपि किं द्रविणनिमित्तं विवाहोऽवरुद्धः स्यात्?''

पूर्वमवादीत्प्रमदारञ्जनः ''जगदिन्दुर्नवयुवकः। नवीनरीतिनीतिञ्च मनसा स्निह्यति, इत्यादि'' तदनुकूलमेव च जगदिन्दोरमुमभिप्रायं बुद्ध्वा जगाद मन्त्रिमहाभागः– ''श्रीमतां विचारः सर्वथा निरवद्यस्तथाऽपि पूर्वोक्तकन्याविषये वर्तते महीयान्कथाभागः। सारञ्च पुरात्वे कमलालयाविमलापाङ्गविशेषवीक्षिताया आसीदमन्दानन्दमेदुरा ह्यमुष्या दशा। परं परस्पराऽभियोगा (मुकद्दमा)- दिभिः समभूदेतस्याः पिता नितरामेव निर्धनः साम्प्रतञ्च नास्त्यस्मिंल्लोकेऽस्याः पिता। माता केवलमस्ति। तयाऽपि नितान्तमेव भीषणं प्रतिज्ञातं यद्'' ''न कदाचित्कस्मादपि कथञ्चिदपि किञ्चत्साहाय्यं वाचिकं वाऽर्थिकं वा शारीरिकं वा ग्रहीष्यामि इति अस्मादेव च हेतोर्नाद्यावधि जातोऽस्याः परिणयः। न चेदहमेव सम्पाद्य समग्रं सम्भारं विवाहमेतस्याः कर्तुमपारयिष्यम्।''

कन्यायाः करुणाजनकमितिहासमिममाकर्ण्य जगदिन्दोः कौतूहलं नितान्तमेवोदजृम्भत। प्रोवाच च किञ्चिदञ्चित्सङ्कोचः प्रियवयस्यम्– ''ननु कन्याया विलोकनमात्रे काऽस्माकं क्षतिः।''

प्रमदारञ्जनो मनागन्यमनस्क इव मन्थरं जगाद ''का नामैतावत उपक्षेपस्याऽऽवश्यकता? कश्च दरिद्राणां दर्शने विचार एतावान्। एहि, गच्छामः साधयामश्चात्मनः समीहितम्।''

प्रमदारञ्जनमतिवैभवमुदितहृदयो मन्त्रिमहाशयस्तयोस्तत्कालिकमभिप्रायं विदित्वा कोष्ठकादस्मादुदतिष्ठत्। तावपि च पश्चाद्गामिनौ बभूवतुः।

साम्प्रतं सन्निहितोऽस्ति सायंसमयः। भगवान्मरीचिमाली किरणनिकरमात्मीयमुपसंहरन्नस्तगिरिशिखरं समया समालम्बते। वरुणदिगनुरागरञ्जिते च भगवति भास्वति दत्तदीनदृष्टिर्वराकः कोकस्तारतरं रारटीति। लोहितलोहितैश्च भास्करकरैस्तरुशिखराणि नूतनरागलोहितान्यालक्ष्यन्ते। दिवसावसाने आहारविहारविरताः पक्षिणोऽपि पादपविटपेष्वासीनाः कल्पयन्ति सायन्तनस्मरणमिव। प्रशान्तोष्मा च भूमिभागः साम्प्रतमभितः शीतायते। मन्दं मन्दं च यूथिकापरिमलवाही मारुतो बीजयति विटपव्यजनैः, वसन्तपुरनिवासिनश्चास्मिन्समये स्वस्वकार्यात्प्रत्यावृत्ताः कलयन्ति सायन्तनसम्मोदम्। मधुरमधुरहुङ्कृतमुखरितगहनानि च गवां कदम्बकानि स्वस्वावासं प्रत्यावर्तन्ते। यो हि जलाशयोद्देशः कियत्कालपूर्वं मानुषमूर्तिमात्रविरहित आसीत्स एव सम्प्रति कटितटनिवेशितकलशाभिर्ग्रामरमणीभिर्मूर्तिमतीं रामणीयकतामुद्वहति।

समये चास्मिन्मन्त्रिमहाभागो निमन्त्रितमहाशयाभ्यां साकं किमपि मन्दं मन्दं मन्त्रयमाणो ''मन्त्रिसदनात्'' उत्तरतो नातिसूक्ष्मेण पथा गच्छन्नालोक्यते। मार्गश्चायं कनकपिङ्गलाभिर्वालुकाभिर्निर्वाहितकोमलास्तरणकार्योऽस्ति। पन्थानञ्चाभितो नातिलघीयांसश्च नान्युच्छ्रिताश्च तरवः पल्लवव्यजनैर्वीजयन्ति मार्गस्थान्।

कियदन्तरमतिक्रम्य ददृशुर्दूरतः पृथगिवोपलक्ष्यमाणं गृहपरिसरम्। क्षणानन्तरमेव चेमे त्रयोऽपि प्राविक्षन्वृक्षपरिवृतं नातिमहीयांसं प्राङ्गणोद्देशम्।

प्राङ्गणे चास्मिन् सायंसमयसमीरसेवनार्थमासीनाः कतिपया नवीनाः प्रवीणाश्चाङ्गना नानाप्रकारं परिहासेनात्मानं प्रसादयन्त्यः कलयन्त्यश्च परस्परं कथानकमतिष्ठन्। परं मन्त्रिमहाशयस्य कण्ठरवं निशम्य सर्वा अपि रभसात्प्राविक्षन्गृहप्रकोष्ठानि। आगन्तुकैश्चामीभिश्चामीकरभूषणझणत्कार एव केवलमश्रूयत।

प्रविश्य चास्माकमागन्तुकैर्व्यलोकि यद्गृहप्राङ्गणस्य दक्षिणतः सुधया लिप्तं ग्रामोचितञ्चैकं प्रकोष्ठकमस्ति। यच्चास्मिन् समये किञ्चिदपावृतकपाटमवलोक्यते। प्रकोष्ठकमध्यतश्च परिहाससरसेऽनालक्षिताऽक्षरसंविभागो मृदुलमृदुलो रमणीकण्ठस्वरः श्रूयते। येन चानुमीयते प्रतिवेशिनीनां कामिनीनां समागमपरिचयः।

प्राङ्गणस्य सम्मुखीनायाञ्च दिशि तृणकुटीरकमेकं भवति।

यद्ध्यस्मिन् समयेऽभ्यन्तरतो दृढदत्तदण्डार्गलमवलोक्यते। तृणकुटीरकाच्चैतस्मान्न कोऽपि मानुषकण्ठस्वरो नाप्यन्यादृशो रवः श्रूयते। केवलमस्मिन्समये सविशेषनिस्तब्धमस्ति। कुटीरकद्वारदेशे च हरिचन्दनबिन्दुसुन्दराणि यूथिकापुष्पाणि, पीताक्षतानि चेतस्ततो विकीर्णान्यालक्ष्यन्ते।

प्राङ्गणस्योत्तरस्यां दिशि च शोभते सुपरिष्कृतैका त्रिद्वारिका। काष्ठस्तम्भाश्चैतस्याः शेखरवल्लीवलयिताः सन्ति। छदिप्रदेशोऽपि लताप्रतानसञ्चारेण भूरि भासुरो विभाति। त्रिद्वारिकायाश्चाऽस्यास्तलं श्वेतवाससाऽच्छादितमस्ति। तदुपरि च महार्हमूर्णासनद्वितयं विराजते। गृहस्यैकतमे कोणे च काष्ठचतुष्पदिकासु दृश्यन्ते सुसज्जिता लघुस्थालिकाः। यासु मधुरमधुराणि फलानि मिष्टान्नञ्च किञ्चिन्निहितमस्ति। स्थाल्यां चैकस्यां विमलजलपूरितानि त्रीणि रौप्यपात्राणि सन्ति निहितानि। तत्पार्श्व एव च विविधरागरञ्जितवेत्रनिर्मितपात्रे ताम्बूलानि, एलाः कर्पूरपुष्पाणि च कानिचित्सुसज्जितानि।

एतद्भवनान्तराल एव च द्वारोपान्ते पुरातनमपि महार्हमूर्णासनमेकमास्तृतमस्ति। तदन्तिक एव च तालवृन्तमेकं पतितमस्ति।

मन्त्रिमहाशयः सहचारिणौ द्वावपि सादरमभ्यर्थ्य सविनयमवादीत् ''महाभागौ!! नूनमहमेवेह कन्यापक्षीयः। यतः साम्प्रतमहमेव कन्यापक्षे रक्षणावेक्षणकर्ता। ततः सादरमभ्यर्थनं

यथावसरं लौकिकाऽऽचारावबोधनञ्च मे नानुचितं स्यात्। लौकिकाचारानुरोधीनि न कतिचन माङ्गलिककर्माणि श्रीमतोर्न भविष्यन्ति चेतसः प्रतीपानीति सुभृशमाशासे।'' इति वदन्नेव च मन्त्रिमहाशयः सदाक्षिण्यं निचिक्षेप त्रिद्वारिकान्तश्चरणयुगलम्। स्वयञ्च सविनयं प्रवेशयामास सहचारिद्वयम्।

मन्त्रिमहाशयः साभिनिवेशमुपवेशयामास जगदिन्दुञ्च प्रमदारञ्जनञ्चोर्णासनोपरि। स्वयञ्च श्वेतास्तरणोपरि निषसाद। जगाद च किञ्चिन्मृदुना स्वरेण ''ननु श्रीमन्तौ! नूनमिदं श्रीमतोरतिरोहितमेव भवेद्यत्सनातनधर्मावलम्बिनो जना निखिलेष्वपि माङ्गलिककार्येषु विशेषतश्च वैवाहिकव्यापारारम्भेषु सम्भावयन्ति प्रायो मधुरान्नास्वादनं प्रधानतया। तत इदं किञ्चिदास्वादनीयं श्रीमद्भ्याम्।''

समभिधाय चैवं मन्त्रिमहाशयः सहचरयोरुभयोरपि पुरतो निदधौ मिष्टान्नस्थालिकां सलिलभाजनञ्च।

जगदिन्दुर्मन्त्रिमहाशयस्य सुदूरमायामिनीमिमां भूमिकामभ्यालोच्य प्रथमत एव सुभृशमासीन्मनसि विस्मयरसस्तिमितः। तदुपरि च मधुरान्नास्वादनायाऽनुरुध्यमानो भृशं लज्जानतशिरोधरः क्षणं तस्थौ। अन्ततस्तु यथाकथञ्चिदभ्यवहाराय करमग्रेसरं चकार।

प्रमदारञ्जनस्तु मन्त्रिमहाशयस्य प्रकृतकर्मणि पाटवञ्च विनयञ्चाभिनिवेशञ्चाभिनिशम्य नितरां प्रीतमना मनाक् स्मितायाऽवकाशं ददौ। परं निजसुहृदे न कथञ्चिदपि निजहृदयाभिप्रायाऽवगमायाऽवकाशलेशमपि वितीर्णवान्।

विचारितसमुचितसमयः सविनयं प्रोवाच मन्त्रिमहाशयः– ''यदि श्रीमतोर्नाऽरुचिकरं तर्हि बालिका तामिहैव साम्प्रतमानयामि।''

प्रमदारञ्जनो जगदिन्दोरभिप्रायप्रतीक्षामकृत्वैव त्वरितमुदतीतरत् ''भवतु को दोषः''?

मन्त्रिमहाशयश्चैतन्निशम्य सोत्साहं बहिर्बभूव त्रिद्वारिकायाः। जगाम च दक्षिणस्मिन् प्रकोष्ठके। तत्र च प्रतिवेशिनीभिः कामिनीभिः साकं किमपि तथा मन्दमन्दस्वरेण मन्त्रयामास यथा निमन्त्रितयोरनयोर्न किमपि कर्णगोचरमासीत्।

केवलं कामिनीकण्ठस्वरेण परस्परमनन्वितानीमानि कतिपयानि पदान्येवाऽनयोः कर्णयोरुपस्थापितानि। ''मृणालिनी ....... किमस्माकं ............ सौभाग्यवती .............. जगदीश्वर ........... इति।''

जगदिन्दोः स्फटिकविमले चेतसि मृणालिनीति नाम न जानीमः कस्मादकस्मादुत्कीर्णमिवासीत्, यज्जन्मावधि नापससार हृदयपटलादेतस्य। महता च प्रयत्नेन रणरणकाधिरूढमभिवारयामास हृदयं जगदिन्दुः।

कियत्कालकलानन्तरमेव मन्त्रिमहाशयः परावृत्य निमन्त्रितयोरनयोः सविधमुपागमत्। त्रिद्वारिकाद्वारान्तिकञ्चाऽऽगत्य अपेक्षाकृतेनोच्चस्वरेण निजगाद– ''हला मृणालिनि! एकवारमिह त्वागच्छ!''

एतत्क्षणकालोत्तरमेव च दक्षिणप्रकोष्ठकमपावृतकपाटमासीत्। तदभ्यन्तरतश्चालोक-सामान्यलावण्या बालिकैका बहिर्निश्चक्राम। नतशिरोधरस्यापि जगदिन्दोर्बालिकामुखे पपात विस्मयरसस्तिमितं नयनयुगलम्। तथा च सुभृशमवदधानस्यापि बाढमायत्तीकृतचेतसोऽपि सुनिर्भरशिक्षानिभृततमस्यापि सुदृढं विनयोपगूढस्यापि नितान्तञ्च मन्त्रिसान्निध्याऽपत्र-पानिरुद्धस्यापि जगदिन्दोरेकवारमेव चेतश्चञ्चलं बभूव। नूनमत्यर्थं प्रयत्नसहकारेणाऽवधृतादपि वक्त्रात् ''अहो'' इति बलान्निश्चक्राम शब्दः। विस्मयार्थको वा करुणार्थको वा प्रशंसार्थको वाऽयमहोकार इति तु जगदिन्दोरान्तरमेव विजानीयात्।

## सप्तमः परिच्छेदः

मन्त्रिमहाशयस्त्रिद्वारिकाद्वारात्किञ्चिदुपसृत्य लज्जाभरमन्थरगमनां विनयदाक्षिण्यनि-भृताञ्च तां करेऽवलम्ब्य निभृतमानिनाय त्रिद्वारिकान्तः। मधुरमुवाच च वचनम् – ''कारुणिकौ द्वावपि निमन्त्रितमहाशयौ सादरं प्रणम्य तदिदमूर्णासनमध्यास्स्व।''

कुमारिका चेयं मन्त्रिमहाशयादेशानुसारं विनयेन च दाक्षिण्येन च गौरवेण च तथा प्रणनाम यथा नाम द्वाभ्यामप्यस्माकमागन्तुकाभ्यां निपुणमभ्यन्वज्ञायि पाटवमेतस्याः। परं हन्त हन्त! जगदिन्दोर्मध्येहृदयमावर्तमानो नानाविधविचारतन्तुसन्तानो नामुना मनागपि विरलतामगमत्प्रत्युत निविडं घनीभावमेवाऽयासीत्। चित्रञ्च नाम यन्मृणालकोमलं मृणालिन्या वपुरेव न ननाम, जगाम च भङ्गं ''न सम्प्रति प्रतिपत्स्ये विवाहमहमिति'' जगदिन्दोश्शिरोपरूढा सुदृढा प्रतिज्ञा।

अनन्तरञ्चासौ मन्त्रिनिर्दिष्टं द्वारोपान्तनिविष्टमूर्णासनमध्यासांबभूव। बभूव च क्षणमधोनिबद्धनिश्चललोचनयुगला लज्जावनतशिरोधरा नाम। श्रीमतो जगदिन्दोः प्रमदारञ्जनमहा भागस्य च बालिकामिमां निपुणामभिध्यायतोर्बभूव हृदि यथाहि नाम निजसौरभभर-निर्भरीकृतदिगन्तरः प्रस्फुटनोन्मुखश्च स्थलकमलगुच्छक एकः सम्मुखमभिविराजते यस्य हि निकटे नाधुना कुसुमरसास्वादननिसर्गरसिकस्य कस्यापि चपलमधुकरस्य सञ्जातोऽस्ति सञ्चारः। नापि च कुसुमामोदनिकामलम्पटेन केनापि हस्तेन नूनमस्ति परामृष्टः। किं बहुना सकल कुसुमानि निर्भरमनायासमेव परिनर्तयतो भगवतो वायोरपि यत्र न पराक्रान्तं पराक्रमेण।

अहो नाम येभ्यः स्वयमेव परमेश्वरेण सौन्दर्यविभूषणमङ्गेष्वासञ्जितं न तेषां खलु

भूय उपकरोति लौकिकमाभरणजालम्। तद्धि केवलमङ्गेषु भारायितं भवतीति नूनमुत्प्रेक्षामहे। तथाह्यमुष्या: खलु निसर्गरमणीयाया बालिकाया: काये न कोऽपि तादृशोऽस्ति भूषणसम्भारो येन वयं तद्वर्णनेन लावण्यमेतस्या: शतगुणितमाभरणजालैरिति कल्पनासाम्राज्यमुपजीवन्तो नि:शङ्कमुपन्यस्याम:। तथापीश्वरवितीर्णमेवाऽस्या लावण्यं सर्वाङ्गीणमाभरणसंयोगं न जातु तृणायाऽपि मन्यते। यानि चैकद्वानि[१] दृश्यन्ते भूषणानि तान्यपि निसर्गरुचिरैरवयवैरेतस्या भूषितानीव सन्ति। न पुनर्मनागप्यस्या: स्वभावसुन्दराणामङ्गानां भूषणाऽऽवश्यकता।

कुमारिकाया: स्थलकमलशोभामधरयतोरुभयोर्भुजयोश्चत्वारि चत्वारि हरितवर्णानि काचकङ्कणानि[२] सन्ति। यानि हि गारुडमणिमध्यनिहिता मरकतमणय इव समधिकं शोभन्ते।

मृणालनालकुण्डलायितयो: श्रवणयोश्चोभयोर्जातरूपमये द्योतेते खलु क्षुद्रे कर्णपुष्पे[३]। ये हि कोमल किसलयोपगूढे विकचकनक[४] यूथिका कुसुमे इव भूयस्तरां विभात:।

लम्बसरलायां नासिकायां च किञ्चिदायामि लम्बते विमलमेकं मौक्तिकम्[५]। यद्धि तिलकुसुमसङ्गिकुन्दकोरकमिव हरति प्रसभं मानसं रसिकानाम्। भूषणनाम्ना बालिकाया इयानेवाऽऽभरणसंयोग:।

वस्त्रेषु च लोहितान्तप्रदेशा शाटिकाऽस्या: शरीरे विलसति। या हि चम्पकदामोपमं वपुरस्या: समासाद्य चरितार्थयति सुवर्णसौरभसंयोगकिंवदन्तीम्।

निर्भरसुरभिस्नेहस्नाता भ्रमरकृष्णा: कुञ्चिताश्च कुन्तला भारभुग्ना इव नितम्बं चुम्बन्ति। सपारिपाट्यं द्विधा विभक्ताश्चेमे भाविनीं सिन्दूरच्छुरणच्छटाप्रथमप्रणालीमिव मध्ये दर्शयन्ति सरलां सीमन्तलेखाम्।

कण्ठदेशे च पीतकुसुमदत्तान्तरा स्थूला यूथिकाकुसुममालिकाऽस्ति। या हि यौवनविलासारम्भसम्भावनासूचकयो: किञ्चदुद्भिन्नयो: कुचयोरुपरि विलसति चुम्बति गभीरनाभिनिम्नस्थलम्।

प्रतिवेशिनीभि: कामिनीभि: साभिनिवेशमन्वरुध्यत बालिकामाता यद् ''भूस्वामिमहाशयो द्रक्ष्यति बालिकामद्य तत्रापि भवत्या दु:साधा प्रतिज्ञा साधनीया। यदि न स्याद्बालिका मनोऽभिरुचिता तर्हि कथङ्कारमिमां प्रतिज्ञां पारयिष्यति भवती साधयितुम्। तस्मात्कतिपयैरन्यदीयैर्भूषणैर्भूषय बालिकाया: स्वभावसुन्दरं शरीरम्। सौवर्णतन्तुसन्ततां चैकां वाराणसेयशाटिकां परिधापय रचय च कुचयो: कञ्चुलिकामेकां काञ्चनतन्तुजालजटिलाम्। येन निसर्गरमणीयाऽपि सेयमाभरणादिभिरुज्जृम्भितसौन्दर्यसर्वस्वा प्रसभं हरेन्मानसं विलोकयत:।''

---

१. एकं वा द्वि वा। २. चूडी, ३. कर्णफूल, ४. सोनजुही, ५. बुलाक

परं तेजस्विन्या बालिकाजनन्या तदिदमचिरात्प्रत्याख्यायते स्म यद्– ''नाहमेवंविधाभिः कपटकुघटनाभिरात्मनं पातकभागिनं विधातुमभिलष्यामि। अस्मत्सविधे वर्तमानं धनं वा जनं वा यथेष्टमिति विविच्य यः कश्चन महाशयो दयार्द्रहृदयः सादरमिमामभागिन्याश्चिरदुःखिन्याः कन्यां ग्रहीष्यति तस्मायैव समर्पयिष्यामि जीवितनिर्विशेषामिमां कन्याम्। धन्यानि चात्मनो भागधेयानि कलयिष्ये। परं परोपयाचितैश्चातिपरिश्रमोपनतैर्वसनाभरणैः परिकल्प्य मनोनीतमाकल्पम्, अन्य जनमानसमोहनाय कुप्रवृत्तिर्मे कदापि मास्तु। इदमेव च भूयो भूयो भगवतोऽभ्यर्थये। सहजसरला भवत्योऽपि नास्मिन्विषये भूयो मामनुरोत्स्यन्ति।''

प्रतिवेशिनीभिरपि तेजस्विन्याः कन्याजनन्याः स्वभावगौरवोपबृंहितानि समाकर्ण्य वचनानि न पुनः किमप्यस्मिन्विषये प्रोच्यत। किं बहुना समागतमहाशयेभ्यः प्रदर्शयितुं कन्यां कियतेचित्समयाय समयाच्यत मन्त्रिसदनगमनं मृणालिन्याः परं कन्याजनन्या न स्वीकृतमेतावदपि।

प्रमदारञ्जनो मन्त्रिमहाशयमुखात्कन्यायाः कुलशीलसौन्दर्यप्रशंसामाकर्ण्य कन्यां सामान्यतो रूपवतीं मन्यते स्म। परं साम्प्रतमलोकसामान्यसौन्दर्यशालिनीं मृणालिनीं प्रत्यक्षं वीक्ष्य मन्त्रिमहाशयकृता रूपगुणप्रशंसा सुभृशं न्यूनेत्यमन्यत मनसि। मानसविचारासक्त-चेतसश्चास्य मुखादकस्मान्निश्चक्राम ''सत्यमियमर्हति निसर्गधन्या कन्या समारोढुं महाराज्ञीपदम्।''

परं पाठकमहाभागाः! जगदिन्दोः खलु विलोक्यते विचित्राऽवस्था। स हि निर्वातनिष्कम्पः प्रदीप इव भित्तिनिहितशरीरभरः केवलमालोकयति निश्चलो धरणीम्। तन्मनसि च विचाराणां परिवर्तते सम्प्रति सवेगं चक्रम्।'' अद्यावधि या खलु समनोयोगं मृग्यते स्म तामिमामेतत्समयान्तरे प्रत्यक्षं चक्षुषोरग्रे पश्यामि ? मार्गे गच्छतोऽकस्माद्रत्नं हस्तगतं भविष्यतीति पूर्वं कस्यासीद्विश्वासः ? दरिद्रगृहे सैवेयमेतादृशसुन्दरी ? का खल्वेतावद्विलोक्यते दरिद्रा ? का चैतावद्विलोक्यते सुन्दर्येव ?'' पुनः प्रकाशमाभाषत– ''अर्थाभावान्न जातोऽद्यावधि कुमार्या अमुष्या विवाह इति निकामं विस्मयः। अथवा विचित्रा खलु लोकरीतिः। परं दरिद्रवंशेऽस्याः कन्याया समभूदुद्भव इति न मनागपि प्रतीयते चेतसा। मन्त्रिमहाशयाः! कतरं वंशमियमात्मजन्मना मण्डयामास ?

**मन्त्री** – कनकपुरनिलये घोषवंशेऽस्या जातं जन्म।

**जग०** – किं खलु कनकपुरवास्तव्याद् घोषकुलादियमुत्पन्ना।

**मन्त्री** – आं महाशय!

**जग०** – तर्हि कथमियमवलोक्यतेऽस्या विरूपाऽवस्था ? कस्य खल्वियं कन्या ?

**मन्त्री** – स्वर्गीयकुमुदरञ्जनमहाशयस्य।

जगदिन्दोरिदमाकर्ण्य विस्मयमयमिव, करुणामयमिव, प्रमोदमयमिव, समजायत

हृदयम्। यावच्च किञ्चिद्वक्तुं काङ्क्षते तावदेव पार्श्ववर्तिनस्तृणकुटीरकादश्रूयत सुदीर्घो निःश्वासशब्दः।

## अष्टमः परिच्छेदः

प्रमदारञ्जनोऽपि पूर्वत एवाऽसीत्सुभृशं विस्मयाकुलमानसः। साम्प्रतञ्च कन्याया विचित्रमिमं वंशपरिचयमाकर्ण्य नितान्तमेवोदजृम्भत विस्मयरसस्रोतः। पर्यन्ततश्चाऽपृच्छन्मन्त्रिमहाशयम्– ''अहो! कुमुदरञ्जनमहाशयस्य तनया तृणकुटीरकमेतदधिवसति? हन्त हन्त? कथमेतावान् भाग्यविपर्ययः?''

परमबुद्धिमता सम्यगवबुद्धं मन्त्रिमहाशयेन यद् ''दर्शितं सुफलमस्मन्नीतिलतया। स्थाने प्रयुक्ता चौषधिर्दर्शितवती गुणमात्मीयम्।''

प्रमदारञ्जनमहाभागोऽपि तात्कालिकीभिर्नानाविधाभिश्चेष्टाभिः सम्यगवाबुद्धत जगदिन्दोर्हृद्गतं भावातिरेकम्।

प्रमदारञ्जनमनोगतं बुद्ध्वा प्रकाशञ्चोत्तरयामास मन्त्रिमहाशयः – ''नूनमभियोगपिशाचावेशादेषामियमवस्थाऽभूत्। हन्त हन्त! अभियोगदुर्योगत एव सञ्जातोऽस्याः सर्वनाशः।''

किञ्चिद्विलम्ब्य पुनरवादीत्प्रमदारञ्जनः– ननु जगदिन्दुना साकमेव तु कुमुदरञ्जनमहाशयस्य समभूदभियोगः?

**मन्त्री** – आं महाशय! अन्यत्किमुच्यतां तस्मादेव दुर्योगजातादभियोगात्समभवेदेतेषां सर्वनाशसन्निपात इत्येव युज्येत वक्तुम्।

प्रमदारञ्जनः समुचितोऽयं समय इति निध्याय पुनः सविस्मयमभाषत– ''महाशय! किमु अन्येन केनचित्साकमपि समभूदभियोगः कुमुदरञ्जनमहाशयस्य?''

**मन्त्री** – अथकिम्! विपुलमर्थं तोयवर्षं वर्षता कुमुदरञ्जनमहाशयेन सुखप्राप्य एव सममन्यत विजयोऽभियोगे। परं कुमुदरञ्जनस्य साऽऽशा केवलं दुराशारूपेणैव परिणता। समभूद्भीषणः पराजयोऽभियोगे। तदुपरि विपुलार्थव्ययो विशेषकोटौ जातः। हन्त हन्त! तस्मिन्समये कुमुदरञ्जनमहाशयस्याऽसीद्भूयः शोचनीया दशा।

परं हन्त हन्त! श्येनपातं पतता दुर्दैवेन न विश्रान्तमधुनाऽपि। पुनरपि प्रावर्त्तत दौर्भाग्यचक्रोपक्रमः। बहोः कालादवसरं प्रतीक्षमाणैरेतस्य सजातीयविद्वेषिभि–

रात्ममनोरथपथकण्टकायितस्य कुमुदरञ्जनस्य सर्वनाशाय प्रारभ्यत भूयसा सम्भारेणाऽभि-योगस्तदुपरि। आसीच्च तेषामयमभिप्रायो यद्विकटेनार्थसङ्कटेन पाशितस्याऽस्य समस्ताऽपि भूसम्पत्तिरवश्यं विक्रेष्यते राजद्वारा। तदा च वयं विपुलार्थसहकारेण तद्भूमिसम्पत्तिमात्म-सात्करिष्यामः। करिष्यामश्चात्मनः परिपन्थिनं कुमुदरञ्जनं जीवनमृतमेवेति।

परं नैषामियमाशा सफलतामयासीत्। यतो हि श्रीमतो जगदिन्दोः पितृमहाशयः करुणाभरमन्थरीकृतेन चेतसा कुमुदरञ्जनस्येमां दुर्दशामात्मनिबन्धनां मत्वा सुभृशमतप्यत। जातमपि च विजयं पराजयमिवाऽमन्यत। आत्मनश्च विचारनिचयं परिरोद्धुमपारयन्बहुधा कुमुदरञ्जनमहाशयसविधे प्रहित्य मां सजातीयकलहं कथञ्चिदपि समुप-

शमयितुमदापयत्सत्परामर्शम्। परं हा हन्त! हन्त! विधेश्चिकीर्षितं कः प्रतीपयितुं प्रभवेत्? यद्धि दुर्दशापिशाचिकाविष्टेन कुमुदरञ्जनेन सोऽयं कर्तृमहाशयोपदर्शितः सत्परामर्शः शत्रुताविजृम्भितमिति मत्वा न मनागप्यमन्यत। प्रत्युत तदुत्तरमेवाऽरभ्यत सरभसमभियोगे भूयानर्थव्ययः। परिणतौ च तत्तेषामभवद्येनाऽद्याऽपि तत्परिवारोऽनुभवति समधिकविषमां दशाम्। सजातीयैः साकमभियोगे समभवत् पराजयः। राजपुरुषैर्विचिक्रीषिता भूमिसम्पत्तिस्तु कर्तृमहाशयेन (जगदिन्दुपित्रा) भूयसाऽर्थव्ययेन स्वयमेव क्रीता। नीताश्च कुमुदरञ्जनशत्रवो भूयोऽर्थव्ययेन साकं विफलमनोरथतामपि।

किन्तु नैतावताऽपि पर्यशाम्यत भीषणः कोपो दुर्दैवस्य। यद्धि, असमीक्ष्यमाणापरतटं भूयांसमर्थसङ्कटमनुभूय हन्त हन्त! सन्त्यक्तवान्पर्यन्तनीरसं भुवस्तलं कुमुदरञ्जनमहाशयः। तस्मिन्समये च कुमुदरञ्जनसहधर्मिणी प्राणप्रियतमां वर्षत्रयमात्रवयस्कामिमात्मजां क्रोडे कृत्वा पतिशोकनिस्सहशरीरा बहिर्बभूव भवनात्।

तन्मयतया निपुणमवधारयतोरुभयोः सहचरयोर्मनसं दुःखाकुलमभवत्। जगदिन्दोश्च चक्षुषोरदृश्यताश्रुलेशः यो हि तत्कालमेव सर्वेषां दृष्टीः परिहृत्य तेनाऽलुप्यत।

पुनः प्रावर्तत वक्तुं मन्त्रिमहाभागः- ''कुमुदरञ्जनमहाशयस्य दीक्षागुरुर्मम भगिनीपतिर्भवति तद्द्वारा चाहं प्रवर्त्य भूयांसमनुरोधं, प्रकल्प्य चानल्पां नीतिकल्पनां, प्रयुज्य च निकाममुद्योगसम्भारं भूयसः समयादुत्तरमस्मिन् ग्रामे निवासमेतस्याः कल्पितवानस्मि। दीक्षागुरुगौरववशंवदा चेयमपि कथञ्चिदन्वमन्यत तत्। परमेतत्समयान्तरे भूयसीः साध्यसाधनाः प्रयुञ्जानोऽप्यहं नापारयमिमामार्थिकीं सहायतां कथञ्चिदपि ग्राहयितुम्। सुगृहीतनामधेयः स्वर्गीयः कर्तृमहाशयः (जगदिन्दुपिता) समादिदेश मामवसानसमये यत्- ''अस्मदीयाभियोगदुर्योगात्स-मधिकभीषणं दशाविपर्याससमापन्ना कुमुदरञ्जनमहाशयस्य गृहिणी दुहिता च यथा न मनागपि क्लेशमुपयायातान्तथैव यावन्मतिवैभवं भवान्प्रयतताम्।'' तमेव च कर्तृमहाशयनिदेशमनुरुन्धानेन मया प्रयुक्ताः प्रचुरा युक्तयः, कल्पितानि विपुलानि कौशलानि, प्रदर्शिताश्च भूयांसः स्वकार्यमार्गास्तथापि नेयमङ्गीचकार कामप्यर्थिकीं वाऽन्यां, वा काञ्चन सहायताम्। कथं कथमपि

तु दीक्षागुरुगौरवञ्च मामकीयानुरोधसम्भारञ्च वञ्चयितुमपारयन्ती मनागन्वमन्यत केवलमेतद्ग्रामवासम्। स्वयञ्चेमे वसनादिषु हस्तशिल्पप्रदर्शनम्, एवं विधैः कुलकामिनीकार्यैः, पेशलैः कार्यैर्दिवानिशं निजशरीरमुपशोषयन्त्यौ यत्किञ्चिदुपार्जयतस्तेनैवानयोर्माता दुहित्रोः प्रायः शोकभरगुरुकृतो दिनपोतो भवति। किन्तु, भूयसा, नितान्तमुपचितमनयोः सन्तापमपाकर्तुमपारयत, क्लेशमपि चामुयोर्द्रष्टुमप्रभवता मया कियानपि भूभागो निष्करीकृत्य मातादुहित्रोरनयोर्योगक्षेमाय पृथगकल्पत, परमिदमपि नासीदस्याः सम्मतमिति तदपि कल्पयितुं नाहमपारयम्''।

निसर्गपेलवचेतसः श्रीमतो जगदिन्दोर्मध्येहृदयमावर्तमानः करुणरसप्रवाहः समगादेतावता नितान्तमेवोद्वेलताम्। तच्च भूयसापि प्रयत्नेन निरोद्धुमपारयन्नकस्मादुत्तस्थौ स्वासनात्। पप्रच्छ च किञ्चिदुपसृत्य, निमन्त्रितयोरुभयोरपि तात्कालिकभावानुबन्धं निपुणमवेक्षमाणं मन्त्रिमहाशयम्।

**जग०**- ''मन्त्रिमहाशयाः! क्वास्ति निसर्गधन्याया अमुष्याः कन्यायाः श्रीमती माता? या हि मदुपयोजिताभियोगदुर्योगादेव समासादितवती निकामविषमामिमां दशाम्।''

मन्त्रिमहाशयः स्वयमारोपिताया नीतिलतायाः परिणामरमणीयामिमां कुसुमसम्पत्तिमालोक्य मनसि निकाममेव प्रासीदत्। अचिराच्चोत्पत्स्यमानं फलमप्यमुष्याः सन्निहितमेवाऽमन्यत। किञ्चिच्चेतसि स्मयमान इव च प्राङ्गणसम्मुखस्य तृणकुटीरकमदर्शयज्जगदिन्दुमहाभागम्।

अस्माकमागन्तुकाभ्यामुभाभ्यामपि प्राङ्गणप्रवेशसमये सम्मुखस्थमेतत्तृणकुटीरकमभ्यन्तरतो दत्तदण्डार्गलमवालोक्यत तद् द्वारोपन्तं च यूथिकाकुसुममिश्राणि पीताक्षतानि चावकीर्णान्यवाऽलोक्यन्त।

सम्प्रति मन्त्रिमहाशयनिर्दिष्टस्य तस्यैव तृणकुटीरकस्य सम्मुखमुपजगाम जगदिन्दुः।

जगदिन्दोर्द्वारोपान्तगमनसमकालमेव कुटीरकमध्यादश्रूयत कोमलकोमलः पदनिक्षेपशब्दः। अचिराच्च बहिः स्थितैः सर्वैरपि दृष्टं यत्कुटीरकद्वारं शनैरुद्घटितावरणं भवतीति। सर्वेषां च चक्षूंषि तत्रैव विस्मयरसस्तिमितानि संलग्नान्यभूवन्।

## नवमः परिच्छेदः

प्राङ्गणस्थितैः सर्वैरपि समवलोक्यत यत्कुटीरकद्वारमुद्घाटितावरणमस्ति। तन्मध्ये च चरमं वयश्चुम्बन्ती काचन योषित्सन्तिष्ठते। यस्याश्च चक्षुषोर्बद्धधारं नीरं निपतति।

योषाया अमुष्याश्चत्वारिंशद्वत्सरानतिक्रान्तं वयस्याया अपि नाधुना कृतमस्याः शरीरे

वार्द्धक्येन पदम्। साम्प्रतमपि शोभनं वदनं नूनमनुमापयति पूर्वतनं सौन्दर्यसम्भारमेतस्याः। चक्षुषोः सुरुचिरमारुण्यं बोधयति कविभिर्दीयमानां प्राक्तनीं नैकान्ततो गतार्थामुपमाम्। अस्नेहस्निग्धे चास्याः कुन्तलसञ्चये भूयसाऽन्वेषणेन कुत्रचन लभ्यते धवलो मूर्द्धजः।

योषितोऽस्याः शरीरमेकया धवलशाट्याऽऽच्छादितमस्ति। शाटी च सर्वाङ्गान्या-वृण्वत्यपि साम्प्रतमस्याः सम्मुखभाग एव भूयस्तया पुञ्जीभूता। करौ चामुष्याः साम्प्रतं चन्दनलवलाञ्छितावलोक्येते। अक्षतान्यपि कानिचन तत्र संलग्नानि दृश्यन्ते। ललाटभागश्चास्याः सूचयति चिन्तासन्तानैकतानम्। परं चक्षुषोर्युगलममुष्या निजकर्त्तव्यसुस्थिरतामनुमापयति। मुखे चामुष्याः किमपि विचित्रविभवमनिर्वचनीयरमणीयञ्च ज्योतिर्विभाति। परमस्मिन् समये भावान्तरेण शबलीकृतमेतदालोक्यते।

प्रवीणा रमणी चेयं द्वारोपान्तमायान्तं जगदिन्दुमालोक्य निर्यियासुरपि द्वारमध्य एव सम्मुखनिहितजललोचना तस्थौ।

जगदिन्दुरपि द्वारात्कियद्दूरमागत्य तस्थौ। उवाच च सविनयकरुणाप्रदर्शनम्।''मातः! नूनं मत्पितृचरणा एव कथमप्यसमुचितया श्रीमत्याऽनुभूयमानाया दुर्विषहदारुणाया अमुष्या दशायाः प्रधानहेतुरभवन्। यतो हि तत्पक्षोपयोजितादेव दुरभियोगाद्भवती समभूदित्थं पथि भिक्षुः। निकामं दीना सहायहीना च हन्त हन्त भवती तत एव समभूत्।परमधुना मन्त्रिमहाशयमुखादवाकर्ण्यत यदेतन्निमित्तं तातचरणानामनुतापोऽपि निकाममुदभूत्-''यदस्मत्कृताभियोगादेव कुमुदरञ्जनमहाशयस्य कान्ता सुता च समुपागच्छतामत्यन्तदुःखदारुणामिमामवस्थामिति।'' यतो हि दृढमनुतापसन्तापितचेतसैव श्रीमता तातचरणेन समुचितसाहाय्यनिमित्तमुपायोज्यत मनाङ् मन्त्रिमहाशयः। परं कः खलु विप्रतिकूलपरिपाकं दैवं प्रतीपयितुं पारयेज्जन्तुः। हन्त हन्त! तादृशं तमात्मनोऽनुतापं यावत्कार्यरूपेण परिणमयितुं प्रयतन्ते तातचरणास्तावदेव दैवेन प्रकटिता जन्तूनामनारम्भसम्भ्रमा भीषणा गतिः। यत् हा हन्त सन्त्यक्तवन्तः परिणामनीरसं भुवस्तलं तातचरणाः। मा भूत्तातचरणानां युष्मासु साहाय्य-प्रदर्शनावसरः। परमधुना यथा पैतृकसम्पत्तिर्गृहीता तथा पितृचरणसञ्चितमृणमपि मया परिगृहीतम्। यथा च पितृचरणानां भूसम्पत्तिः सप्रमोदसम्भारमुपभुज्यते तथैव पैतृकमृणमपि निष्कल्मषेन चेतसा परिशोधयिष्यते। येन खलु भवती कृता पथिभिक्षुस्तस्यैवाऽद्योपारूढविनयस्तन-यस्तातकृतमृणं परिशोधयितुकामः साम्प्रतं भिक्षुकभावेन भवत्याः सम्मुखमागतोऽस्ति। एषोऽहमुन्मुकुलीकृतकरसम्पुटो भिक्षुभावमावहन् भवत्यास्तनयाया विकचकमलकोमलं पाणिं भिक्षामाकाङ्क्षे।

''पितृचरणैरपराद्धं पुत्रो दण्डं प्रदातुमुद्युक्तः''

समुचितोऽयं न्यायः। अहं हि सर्वस्वमप्यात्मनः श्रीमत्यै समर्प्य कम्पितहृत्काण्डा-दमुष्माद्दण्डादात्मानमनुपरोधमुन्मोचयितुमिच्छामि। किन्तु करुणामनुरुन्धानया श्रीमत्या

स्वसमीहिताभिमुखो भिक्षुरेष न प्रत्याख्यातव्यः।''

जगदिन्दोः सहसा सञ्जायमानमिमं भावातिरेकं दृष्ट्वा प्रमदारञ्जनो मन्त्रिमहाशयश्चोभावपि मनसि समारोहतां परां काष्ठां हर्षस्य। द्वारोपान्तगता रमणी तु निर्माय हृदयप्रोद्बोधितानुभावसिन्धोर्जगदिन्दोरिममालापमाकर्ण्य समुपारूढहर्षप्रकर्षा वाष्पगद्गदकण्ठकुण्ठिताक्षरसंयोगस्वरसंविभागा प्रण्यगादीत्।

''दिष्ट्या किमद्य दैवमनुकूलमुपदर्शयति कलम्? हन्त हन्त तं खलु प्रियजनविप्रयोगविषमयं समयं स्मरामि यत्र हि स्वर्गगतः सुगृहीतनामधेयः स्वामिमहाशयो मृत्युशय्यामधिशयानः स्वमनःशल्यमुज्जिहीर्षुर्मां प्रतिज्ञाबद्धामकरोत्– ''यत् यथा हि भविष्यदनुमीयमानसद्गुणशालिनी सेयं मृणालिनी पैतृकीं सम्पत्तिमुपलभ्यते तथैवाप्राणपातं प्रयतिष्य इति''। अहो! बहोः कालात्कथमप्यनुकूलतां समुपेयुषा विधात्रा किमद्य सैव दुःसाधा प्रतिज्ञा पूरणोन्मुखी दर्शिता? अपि पुनरपि समुज्जृम्भितसौभाग्यं सन्निधत्ते भाग्यम्? नाहमेतामापातरमणीयां विषयसम्पत्तिं मनागपि वाञ्छामि। नापि च कामये परिणामनीरसेऽस्मिन् शरीरे नानाविधविषयविलाससम्भारमारभमाणम्। केवलं सुदूरमभागिन्याश्चिरदुःखिन्याः कन्यामिमां निजचरणनिकटे समागतामूरीकृत्य प्रतिज्ञापाशदृढनिबद्धां मां मोचय नूनम्। चिरादद्य दर्शितो भगवता.........''

नास्मात्परं किमपि बालिकाजनन्या वक्तुमपार्यत। हर्षविषादकारुण्यानां सवेगं भ्रमता चक्रेणाऽस्या हृदयमेकवारमेवाऽकुलमभवत्।

एतावत्कालपर्यन्तं शोकशबलितेन रमण्याः कथानकेनाऽनेन सर्वेषामपि हृदयं कुत्रचन करुणरसमयं कुत्रचिच्च विषादमयं क्वापि च हर्षमयमभवत्। नास्मिन्नवसरे कस्यापि चित्तवृत्तिर्मनागप्यन्यत्र लग्नाऽभूत्। परमेतदवसाने सर्वैरपि विलोकितं यत्प्रमदारञ्जनः सम्मुखस्थात्प्रकोष्ठकान्मन्दं मन्दं परावर्तमान इत एवागच्छति। अस्य च हस्ते क्षौमवस्त्राच्छादिता काचन स्थाली, हृदये हर्षश्चाऽधरयोश्च हासः समुल्लसति।

## दशमः परिच्छेदः

निजोचितचरिताभिमानिन्या बालिकाजनन्याः सरसञ्च मधुरञ्च करुणाभरमन्थरञ्चेममुपन्यासं सुनिपुणमाकर्णयतो जगदिन्दोः पूर्वमेव मानसं प्रमोदमेदुरञ्च विस्मयमयञ्च करुणरसाप्लुतञ्चाभवत्ततोऽपि माङ्गलिककौशेयावृतां स्थालीं काञ्चन करे वहन्तं, सर्वेषु प्ररूढपरिचयमिव च स्वच्छन्दमागच्छन्तं, प्रमदारञ्जनमालोकयतश्चास्य विस्मयो नितरामेवोदजृम्भत। यावच्च किञ्चन तं प्रष्टुं कामयते तावदेव सम्मुखस्थात्प्रकोष्ठकादश्रूयत

खटत्खटेतिशब्दस्तन्मिश्र एव च काचकङ्कणझणत्कारः।

शब्दञ्चेममाकर्ण्य चकितचकित इव प्रमदारञ्जनो जगाम सम्मुखस्थप्रकोष्ठकाभिमुखम्। तत्र च दृष्टं सर्वैर्यत्कपाटान्तराले स्थितः कस्याश्चन प्रवीणायाः शृणोति सादरं वचनानि। किन्तु तया भणितमिति न तत्रत्यैः किञ्चनाप्यवगतं नापि च वयं वक्तुं पारयामः।

कियत्क्षणानन्तरमेव च प्रमदारञ्जनस्तत्याज तत्प्रकोष्ठकद्वारम्। सम्मुखमागच्छतश्चास्य मुखमालोकयद्भिः सर्वैरप्यवगतं यत्कञ्चन सुनिगूढं भावं भूयसा प्रयत्नेन गोपयन्नपि नैष सफलमनोरथो भवति। प्रकटीकरोति भावमिमं मुखमेवास्य। जगदिन्दुः प्रियसुहृदं करे धृत्वा त्रिद्वारिकायामानीतवान्।

मन्त्रिमहाशयो व्यतिकरमिममालोक्य प्रोवाच साभिप्रायम् ''दिष्ट्याऽद्य सफलमनोरथोऽस्मि, येन बहोः कालात्सङ्कल्पितोऽयमात्माभिलाषः स्वर्गीयकर्तृमहाशयाभिप्रायश्च पेशलं पूरणोन्मुखम् इति।''

प्रमदारञ्जनः सरभसमुपसृत्य सहर्षगद्‌गदं निजगाद–''मन्त्रिमहाशयाः! तर्हि शुभमिदं गोधूलिलग्नं नार्हति मनागपि विलम्बावलम्बम्।''

अभिधाय चेदं, व्यतिकरेणाऽनेन नितान्तमेव लज्जाधिकतामानतमुखीं प्रस्फुटनोन्मुखस्थलकमलशोभाशालिनीं मृणालिनीं सम्मुखमानिनाय बालिकां कण्ठाश्लेषसुखिताञ्च तां। यूथिकामालिकामादाय सहसा निचिक्षेप लज्जावनतकन्धरस्य जगदिन्दोः स्कन्धयोः। जगदिन्दुकण्ठाच्च मन्त्रिमहाशयोपाहतं मुक्तापटलमञ्जुलं काञ्चनहारं गृहीत्वा मृणालिन्याः कण्ठे परिधापितवान्। कौशेयमपवार्य च स्थालीमध्यगतैः कुङ्कुमाक्षतैर्द्विगुणितशोभमुभयोश्चकार निटिलतटम्। ददौ चोभयोर्मुखे ताम्बूलवीटिकायुगलम्।

समये चास्मिन् सन्ध्यासुन्दर्यपि सिन्दूरसुन्दरीकृतसीमन्तलेखा तारकानिकरविभ्राजमाना भगवतः सुधादीधितेरभ्युदयमभिवीक्षमाणा नितरां विराजते। निजनिजकुलायगमनाय त्वरयन्तः पक्षिणो मधुरमधुरैः स्वरैर्मेदुरयन्ति मानसमाकर्णयताम्। ग्रामवासिन्यो नितम्बिन्यश्चास्मिनसमये गृहाङ्गणेषु दीपानुद्दीपयन्त्यो गायन्ति सायन्तनमाङ्गलिकगीतानि।

## उपसंहारः

पाठकमहाभागाः! श्रीमान् जगदिन्दुरुत्तरोत्तरमभ्युदयमभ्युपेयान्, निजभूसम्पत्तिसुखं प्रमदारञ्जनसौहृदसुखाञ्चानुभवन् सम्प्रति यापयति प्रमदरसमयं समयम्। यदा कदाचन प्रमदारञ्जनो ''दीना सुरूपा च कन्या अपेक्ष्यते'' इत्यादिभिः परिहासैः स्मारयति पूर्ववृतान्तं तदा सहासं

परावर्तयति वदनं जगदिन्दुः। अथवाऽभ्यन्तरं गतो गृह्णाति तत्परिवर्तनं सस्मितायाः कस्याश्चन सकाशात्।

**''सर्वो भद्राणि पश्यतु''**

**देवर्ष्युपाह्वभट्टश्रीमथुरानाथशर्म्मणा।**

**निर्मितोऽयमुपन्यासः समाप्तिमधुना गतः।।**

## २

# मोगलसाम्राज्यसूत्रधारो महाराजो मानसिंहः

## ( १ )

## सम्राडकबरेण परिचयः

वैरिनिरोधादिना साहाय्यमादधानं बैरमखानं संरक्षकपदेन सन्तोष्य त्रयोदशवर्षीयोऽकबरः स्वयमारुरोह दिल्लीसिंहासनम्। शिक्षादीक्षाशून्योऽप्यासीत्स हि स्वाभाविकप्रतिभाशाली। अतएव स हि सर्वमपि राज्यप्रबन्धं संरक्षकादात्महस्ते निनाय युक्त्या। किन्तु तस्याधिकारे किमासीद्विस्तृतं साम्राज्यं तदा? नैव, राज्यशक्तिरासीत्केवलं दिल्ली-आगरासमीपवर्तिनः कतिपये ग्रामा एव। प्रबलोत्साहसम्पन्नस्य तद्हृदयस्य सम्मुखे समभूत्कठिना समस्या यत्कैरुपायैः स हि सम्पद्यते भारतस्य सम्राट्। स हि राजनैतिकदृष्ट्या व्यचारयच्चेतसि, - व्यत्यगुः कतिपयशताब्द्यो भारते यवनानां, किन्तु नाद्यापि तेषां सुदृढा संस्थितिः। अवश्यमत्र किञ्चित्कारणं मूले, तदपि न नाम साधारणम्।

बहुतरं सम्मन्त्र्य स हि निश्चिकाय यन्मुसलमानशासका नाद्यावधि प्राभूवन् शासितानां भारतीयानां हृदयं परिचेतुम्। ते हि तान् पशुबलेन केवलं दमयामासुः, न तैः कदाचिदपि मानवचरित्रस्य सुन्दरं चित्रमास्थापितं भारतभूवासिनां समक्षे। सङ्कुचितेन दृष्टिकोणेन ते सर्वदा मुसलमानानेव निजप्रजाः प्रजज्ञुः, तेषामेव च संरक्षायै समुन्नत्यै गौरवाय च ते परमं प्रायतन्त। निरैक्षन्त सर्वदा घृणादृष्ट्या सत्यबन्धूनिमान् हिन्दून्। अतएव भारतीयास्तदिमे नेमान् यवनानात्मनो हृदयेन निजशासकान् स्वीचक्रुः। प्रत्युत यदा यदावसरः प्राप्तो हिन्दुभिर्विशेषतश्च राजपुत्रैस्तदा तदा स्थिरीकृतापि तेषां राजशक्तिः सर्वदार्थं निर्मूलिता तैर्नूनम्।

आन्तरिकं कारणमन्यदपि। भारतीया संस्कृतिर्मोसलिमसंस्कृतितो भूयस्तरामुन्नता। भारतीयान् शासितुमपेक्ष्यते तावच्छासकानां मानसो विकासः, आध्यात्मिकबलं च नूनम्। किन्तु यवनैरात्मनो निर्दयताया बलेन, धर्मान्धताया आग्रहेणैव भारतीयास्तदिमेऽद्या-वध्यधीनीकृताः। परं यत्रैव तेषां पशुबलं न्यूनीभूतं तत्रैव हिन्दूनां सम्मुखतस्तेषामयोग्यता प्रत्यक्षमीक्षिताऽभूत्। परिणामोऽस्य यो भवितुमुचितः सोऽनुभूत एव सर्वैरपि शासकैः। किञ्च यवनाः केवलं विजयप्रणयिनो न शासनप्रणयिनः। तेषां शासनव्यवस्था एकपक्षीया, अतएव न केवलमपूर्णा नाम, अपि तु दोषपूर्णा चापि। भारतवर्षमिदं चन्द्रगुप्त-अशोकादीनामादर्शराज्य-

व्यवस्थां पुरा परिचिकाय, कथमनया दोषपूर्णया शासनशैल्या भवेत्तस्य परितोषो नाम?

निजशासनव्यवस्थां स हि सर्वतः समीक्ष्य निर्भरं निर्धारयामास– महाराजो भारमल्लस्तस्य पितुः (हुँमायोः) सुहृत्। यदि तस्य सुदृढा मैत्री समवाप्येत तर्हि भारतीयराजपुत्राणां प्रबलैका शक्तिस्तस्य सहायिका सम्पद्येत। राजपुत्राः कामं परस्परं युध्यमानाः, किन्तु यदि ते केनचित् प्रणेन प्रतिबद्धाः स्युस्तर्हि विदेशिनामपि निजमित्राणां साहाय्ये न कदाचिदपि पृष्ठं दर्शयेयुः। यदि तु मित्राणां तेषां पक्षात्कश्चिदुपकारोऽपि कृतः स्यात्तर्हि तु राजन्या भवन्ति वशगम्मन्या एव, काममत्र निजसम्बन्धिनां रक्तपात एव तेषां कुतो न सम्मुखगः स्यात्। अवश्यमियमेका अकबरस्य कूटनीतिः।

स हि भारमल्लतनयमाकारयामास भगवन्तदासम्। महता समादरेण तन्मैत्रीं सम्प्रार्थ्य सर्वदा निश्छलभावेन तत्समुन्नतिं मैत्रीं चानुरोद्धुं चक्रे प्रतिज्ञाम्। राजनीतिकुशलो महाराजः सर्वामपि परिस्थितिं परिचिकाय पूर्वत एव। जानाति स्म स मर्मतस्तथ्यसंवादं भारतमुपगतानां यवनानामेषाम्। अत एवाऽकबरस्य हार्दं परिज्ञाय स हि समवोचत्–

'श्रीमतः पिता ममासीत्पितुर्मित्रम्। अतएव भवन्मैत्रीमवलम्बितुं न मे कश्चित्सङ्कोचः। श्रीमानहं च शासनसूत्रमादाय सुस्फुटमेकश्रेणिं भुक्तौ। देशस्य संरक्षणम्, खण्डखण्डभावाद् भविष्यन्तीं तस्य दुर्बलतां दूरीकृत्य विशालसाम्राज्ये परिणमनं च नूनं देशस्य सेवैव सेयम्। भारतीयाः क्षत्रियाः परस्परं विगृह्य निजनाशेन सह देशस्याऽप्यहितं साधयन्तीति सुस्पष्टमालोच्यताम्। यदि सर्वे ऐक्यमवलम्बेरँस्तर्हि भारतस्य श्रियं शक्तिञ्च सुदृढामापादयेयुरिति समयप्राप्तं कर्तव्यं तेषाम्। अतएव देशस्यैकसूत्रतासम्पादने मम च भवतश्चैकमुद्देश्यमिति स्वतः प्राप्ता मैत्री सेयम्। किन्तु राजपुत्राणां या मानमर्यादा, यच्च तेषां धार्मिकं दृढव्रतं विदेशागामिनः शासकास्तयोरपरिचयात्प्रायस्तत्रैव हस्तं क्षिप्त्वा भवन्ति भाजनं विरागस्य भूपालानामिति भूयस्तरां भूतार्थः।

अकबरः (प्रसन्नो भूत्वा) – अहह यदि भवादृशविचारैरन्येऽपि भूपाश्चेदभविष्यन्नु-दारास्तर्हि कियद् भद्रमभविष्यत्? परस्परवैमनस्यं निरस्य सर्वाभिः शासकशक्तिभिरेकं विशालं साम्राज्यं सम्पादयिष्यन्नहं हैन्दव-यवनानामेकचित्ततां वाञ्छामि तत्रैव च भवतः साहाय्यमप्यर्थयामि, मन्ये नेदं भवेद् भवद्विचारविपरीतं नूनम्? अवशिष्यते हिन्दूनां मानमर्यादासंरक्षणम्। तत्राहं सुदृढं प्रणं करवाणि यन्मत्साम्राज्ये हिन्दवो मुसलमानाश्च समीक्ष्येरन् समानया दृष्ट्या। समर्प्येत समानरूपेण राज्यप्रबन्धो द्वयोरेव हस्तयोः। साम्प्रतमहं वाञ्छामि यद् द्वावप्यावां भवेव मित्रभावेन सम्बद्धौ।

महाराजो भगवन्तदासो मुसलिममनोवृत्तितो भूयस्तरामासीत्परिचितः। सोऽयमिदं सम्यगजानाद् यदेवंविधाः पुरुषाः स्वार्थवृत्तेः परिपोषणाय समाचरन्तीत्थम्भूतां लीलाम्। इदमपि च सोऽयं सम्यगबुध्यत यत्साम्प्रतिकाः क्षत्रियाः परिजानन्ति केवलं युद्धमात्रमेव। न तेषां

शासनपाटवं परिचितम्। अतएव भारतमिदमेकस्मिन्दिने परेषामवश्यमवश्यं भवेत्। किन्तु तस्मिन्समये आम्बेरराज्यपरिस्थितिरवश्यं सङ्कटगा स्यात्। अत एवाऽकबरस्य विश्वाससमुत्पादनं समयप्राप्तमेव साम्प्रतम्। अस्मिन् साहाय्यप्रदाने भूयस्तरां सुसम्भवो निजभ्रातॄणामपि रक्तप्रवाहः, इत्यपि पूर्वतः परिबोद्धव्यं स्यात्, किन्तु भारतेऽस्मिन् सुव्यवस्थितशासनाय, देशवासिनां निष्कण्टकनिवासाय च तदेतदनिवार्यं नूनम्। सत्यामावश्यकतायां स्वयमाम्बेरराज्यमपि मुगलानां विरोधे शस्त्रमुच्छ्राययेत् परतः, परन्त्वधुना साम्राज्यस्थिरीकरणाय अकबरस्य मैत्री सेयमालम्बनीयैव नीत्येति सर्वं विचिन्त्य प्रावोचत्प्रकाशम्– ''श्रीमन्! राजन्यैः कृता मैत्री न कदाचिद् विश्रम्भविघातिनी सिध्येत्।''

अकबरः (हार्दिकं प्रसादमाविष्कृत्य)– अद्यप्रभृति न प्राप्येतावयोरन्तरं किञ्चित्। सर्वे वयं निकटसम्बन्धिन इव साम्राज्यनिर्माणकार्ये भवेम नूनं दत्तचिताः। या व्यक्तिरस्माकमभिन्नतामार्गे बाधामुपस्थापयेत्सा यदि कदाचित्संसारे स्थानमासादयेत्तथापि देहान्तकाले शान्तिस्तत्कृते नितान्तमन्वेषणीया भवेत्।

महाराजभगवन्तदासो जनयामास विश्वासमकबरस्य। आसीत्तस्याभिसन्धिर्यदग्रे यः कोऽपि मोगलसाम्राज्यशासको भवेत्तदुपरि भवेद्धिन्दूनां प्रकृष्टः प्रभावः।

परावर्तिष्ट महाराजो राजसौधम्। तत्र सर्वमपि संवादमकबरेण मैत्र्याः सन्निशम्य नानाधा सन्दिदिहुः सर्वेऽपि। न कोऽपि प्राचीकशत्सन्तोषम्। किन्तु महाराजो यदा सर्वमपि रहस्यमवबोधयामास यद्भारतसाम्राज्यमवश्यमग्रे परहस्तगतम्, मुसलमानभाग्याधीनं भवेदिति विधेर्विधानमिव। एवंविधस्थितौ शनैर्हिन्दूनां प्रकामप्रभावोद्भावनस्य द्वारमुचितमनुचितं वा? निजवचनानुपालव्यग्रश्चेदकबरो दर्शयेदस्मादृशेषु समादरं तर्हि तत्पुत्रोऽस्माकं प्रभावेण ततोऽप्यधिकं प्रभावितो भवेदिति निश्चितम्। एवं किलराजनीत्या शनैः स्वायत्तीकृते शासने किं हिन्दूनामभ्युदयदिनं दूरे? प्रकटदर्शने सेयं कृतिरवश्यं विरूपा विमानजननी च, यतो हि सेयं नीतिरद्यावधि क्षत्रियाणां कृते नवीना नूनम्। नासीदियमादृतो कदाप्यस्माभिः। परमाम्बेरराज्यस्य या परिस्थितिः साम्प्रतं तत्कृते हार्दिकभावानामपूर्वमिदं बलिप्रदानमकर्तव्यत्वेऽपि कर्तव्यमापतितम्।

तर्केणानेन समभूवन् सर्वेऽपि प्रभाविताः। सन्धेः समारोहः सोऽयं सानन्दं परिसमाप्यत। कुमारो मानसिंहः कालेनैतावता युद्धविद्यायां शस्त्रसञ्चालने अश्वारोहगजारोहणादिषु चासीत्कुशलः। महाराजः स्वयमासीदेतासु विधासु भारते तदाऽद्वितीयः। अतएव स्वनिरीक्षणे स्वशिक्षणे च तदिदं सानन्दमपूर्यत। महाराजः कुमारमशिक्षयत्सर्वामपि सामयिकीं नीतिम्, अवोचच्च प्रणयेन यत्'मया समारोपितमिमं नीतिवृक्षं भवानेव पुष्पितं फलितं चावलोकयेदिति।'

महाराजः समनयदेकदा कुमारमकबरसन्निधौ। अकबरस्तस्य वयःसन्धिमालोक्य सुतरां प्रासीदत्। स हि कुमारमिमं निजसंरक्षकतायामारक्षितुं प्राकाशयत्परममाग्रहम्। अतएव

कुमारस्तद्दिनादकबरेण सह सानन्दमध्यवातसीदाग्रानगरम्। निजयोग्यतया वीरतया चासौ भूयस्तरां समाकर्षदकबरसाम्राजम्।

एकदा समपृच्छत्सम्राट् सपरिहासम्– 'यदा परमेश्वरगृहाज्जनैः सौन्दर्यादयो गुणाः सङ्गृहीतास्तदा भवान् क्व प्रायासीत्? कुमारेण प्रत्युक्तम्– ''अहं तदा वीरतावदान्यतादिगुणानां सङ्ग्रहव्यग्रोऽभवं तावता बाह्यचमत्कृतिचकितैर्जनैरालुण्ठितं लावण्यमात्रं नूनम्।''

उत्तरेणानेन सुतरां समतुष्यत्सम्राट्। कुमारस्य गुणान् दिनं दिनं परिचित्य अनर्घ्यमिदं रत्नमित्युत्तरोत्तरमकार्षीत्समादरं तस्य।

## (२)

## प्रारम्भिकी वीरता

तत्कालमेव साम्राज्याधिरूढोऽकबरो नाद्यावधि तद् यथावदधिकर्तुमप्यपारयत्। अठगीनाभूमिपतयः प्राक्तनमुसलमानशासकानामत्याचारैश्चूर्णीभूता निजहृदये धारणामिमामवहन् यद् येन केनाऽप्युपायेन भूस्वामिनां दमनं वित्तहरणं च यवनशासकानां नूनं कर्तव्यम्। अकबरमपि तथैव सम्भाव्यं संघटितैः सर्वैरकबरस्य विद्रोहे कृता तावद् दुर्दमा समरघोषणा।

सम्राडासीन्नवयुवको वीरहृदयश्चोत्साही च। अतएव महाराजं भगवन्तदासं कुमारं मानसिंहमेव च सहादाय स्वल्पयैव निजसेनया तमुपद्रवं दमयितुमकरोदभियानमुत्साहेन। आसन् ग्रीष्मस्य दिवसाः। भानुः कृशानुमिव समवर्षन्निजकरैः। उपरि सन्तापयन्नातपः, अधः प्रतापयन्ती बालुका। ततः सैनिकानां स्थूलो दुर्वहश्च वेषः। तदुपरि गतेः शीघ्रता। एतैः सर्वैरेव कारणैरक्रियन्त विह्वलाः सर्वेऽपि सैनिकाः। अग्रे समभिसर्तुमप्रभवन्तश्छायास्थानेष्वितस्ततः समभवन्नात्मानं गोपयितुं परवशाः। अतिष्ठदेकाकी सम्राट्। नासीच्च पानीयमपि समीपे। व्याकुलः सम्राट् पानीयं पानीयमित्यसकृदाह्वातुमभूत्परवशः।

एतस्मिन्नेवावसरे भूम्यधिकृतैर्यदा विदितं यत्सम्राट् साम्प्रतमेकाकी तदा तत्कालमेव सम्भूताः सर्वे समकार्षुः समाक्रमणं सम्राडुपरि। दुरुत्तरेऽस्मिन् सङ्कटावसरे सम्राजः सहायकः कोऽभूत्सन्निधौ? वीरोऽकबरो निःसहायमेव समयुद्ध्यत सर्वैरपि। किन्तु कियत्कालम्? एकाकी एतावद्भ्यः कियत्प्रभवेदात्मानं गोपयितुम्। एतस्मिन्नेव जीवनसंशये कुमारमानसिंहेन सह निजरक्षायै सरभसमुपागच्छन् भगवन्तदासः समभून्नयनगोचरः सम्राजः। स हि सम्राजमरिभिर्भयङ्कररूपेण समाक्रान्तमवलोक्य भयानकं संहारकाण्डमारभत तेषां पृष्ठतः। महाराजेन सह समभूवंस्तस्य शरीररक्षका रणधीरा राजपुत्रवीरा अपि। तेषां प्रचण्डखड्गाघातेन

रणाङ्गणमिदं भयनिस्तब्धमिवाऽलक्ष्यत। अभूद् भूरिकालमयं समरसमारोहः। कुमारो मानसिंहोऽस्मिन् महति सङ्गरसङ्कटे प्रादर्शयदद्भुतां वीरताम्। स हि प्राप्तप्रायान्मृत्युमुखात्सहसैव समभ्यरक्षत्सम्राजम्। अकार्षीन्मदमर्दनमरीणाम्। सुदृढमभान्त्सीन्निगडबन्धनेषु विद्रोहकारिणो भूस्वामिनः। अकबरो दैवीं सहायतामेतां, या हि मानवसहायतारूपे समागच्छद्, भूयस्तरां सममन्यत सुतरां प्रासीदच्च। गद्गदकण्ठः सोऽयं वक्षसा समालिङ्गन्मानसिंहम्। आसीत्परिश्रान्तः सम्राट् महता ग्रीष्मेण समरेण च भीष्मेण। स हि तरोश्छायायां व्यश्राम्यत्। कुमारो मानसिंहः स्वकरेणानीयानीय पानीयमपाययत्सम्राजम्। अहो तावत्कालस्य पिपासा साम्प्रतं निरयासीत्, एवं च निरवासीत्।

आगराराजधानीं परावृत एवाऽकबरो महता राजसम्मानेन ('मनसब') समभवायत् कुमारमानसिंहम्।

साम्प्रतमकबरस्य विचारो द्वितीयपार्श्वं समभ्यसरत्। मेदपाटस्य शासकाः साम्राज्या-दूरेऽपसरन्तस्तस्य शक्तिमपहन्तुं प्रतिपदमाचेष्टन्ते स्म। साम्राज्योत्साही अकबरो नेदमभ्यरोचयद् हृदयेन। स हि भारते संघटितसाम्राज्यमास्थापयितुमुदकण्ठत। मेदपाटस्याधिपतिरुदयसिंहो मोहम्मदैः सह सन्धिसमास्थापनं नानुचितं मेने किन्तु तदधीना वीरा नेदं कथञ्चिदप्यन्वमन्यन्त। मेदपाटीयैर्यदाऽऽम्बेरादिशासकानां साम्राज्यसहायकत्वमवगतं तदा ते नितरामक्रुध्यन्। किन्तु युद्धमात्रवेदिनस्ते राजनीतेः प्रगतिं समस्य परिस्थितिं च कथङ्कारं वा विद्युः ?

एतस्मिन्नेवावसरे मिर्जाइब्राहिमहुसैनं दमयितुमकरोन्मालवान्प्रत्यभिसरणमकबरः। स हि समुपगतेऽवसरे मानसिंहेन सह पर्यचालयत्साम्राज्यसंस्थापनस्य चर्चां मेदपाटीयानां विद्रोहकाण्डं च। सानुरोधं तत्सहायताममार्गयत् सम्राट्। एकसाम्राज्यस्थापने दत्तवचनो महाराजकुमारः सम्राजोऽनुरोधमामेने नीतेरनुरोधेन। अतएव बाल्यादेव राजनीतिमार्मिकतां समरपरिस्थितिं चाऽनुप्रविशन्कुमारः समसूचयद् 'यदि मेदपाटाभिस्कन्दस्य विचारस्तर्हि तत्कृते नास्मादधिकः सदवसरः। सर्वेऽपि मालवाऽभिसरणं सम्राजो जानन्ति, अतएवाऽस्मिन्नवसरे सहसा समाक्रमणं भवेत्सद्यः फलदायि।' सम्राट् सर्वात्मनाऽन्वमन्यत चित्तौराक्रमणम्। अकारि तदनुसारमाक्रमणं चित्रकूटदुर्गोपरि। सुदृढं-विषमस्य तस्य पराजये समापतन्नानाविधा असुविधाः, किन्तु कुमारमानसिंहस्य मन्त्रणया सर्वत्रापि विजयप्राप्तिरधिगताभूदिति न परोक्षमितिहासविदाम्। अधिकृतमभूच्चित्रकूटदुर्गम्। सहैव तेन मेदपाटाधिकृतं सुप्रसिद्धमैतिहासिकं दुर्गं रणस्तम्भवरमपि कुमारमानसिंहपराक्रमेण साम्राज्यभुक्तमभूत्। आसीदिदमपि दुर्गं चित्रकूटवत्परमदुर्जयम्। किन्तु मानसिंहस्य नीतिनिपुणतां रणशूरतां च सर्वात्मना सुपरीक्षितवानकबरस्तत्परवश एव चकाराभिस्कन्दनं तद्दुर्गस्यापि, यत्र तस्मिन् काले मेदपाटराज्यस्याऽऽयत्तो रावसुरजनहाडा संरक्षकोऽभूत्। स हि मेदपाटाधिपतेः उदयसिंहस्य नवीनपराभवात्साम्प्रतमात्मनः साहाय्याभावं मानसिंहादीनामसामान्यं वीरभावं च परिजानन्प्रथमाक्रमण एव दुर्गस्य सन्दिदिहे। अतएव सामयिकप्रगतिमनुवर्तमानः सान्त्वनेनैव समर्पयामास दुर्गमिदं कुमारमानसिंहाय।

अकबरस्य सौभाग्यसूर्यः साम्प्रतमप्रतिरुद्धगत्या भारतगगनमधिरुरोह। आसन्मानसिंहसदृशा अप्रतिमवीरा मोगलसाम्राज्यस्य प्रभुत्वमुत्तरभारते परितः प्रसारयितुमग्रसराः। चित्रकूट-रणस्तम्भवर-सदृशान्यजेयदुर्गाण्यासन् साम्राज्याधिकृतानि। साम्प्रतमेव च कालञ्जर-मेडताप्रभृतिदुर्गाण्यपि साम्राज्यभुक्तान्यभूवन्। सुदृढसुस्थिराऽभूत्साम्राज्यस्य संस्थितिः।

## ( ३ )

## गुर्जरविजयः

सम्प्रति गुर्जरान्विजेतुमवर्द्धतोत्कण्ठा सम्राजोऽकबरस्य। स हि साम्राज्यस्य परिपोषकं मानसिंहमेव सर्वात्मना भावयंस्तमेव सञ्चालकं तस्य समकल्पयत्। समरनीतिकर्मठः कुमारमानसिंहः संव्यभजत्सेनामिमां द्वयोर्भागयोः। एकं भागं स्वयमुपादाय सम्राजाऽकबरेण सह गुर्जरानभ्यषेणयत्। द्वितीयं भागं च तत्रैव संन्यवेशयद्येन सहसैव समुत्पद्यामानमुपप्लवं क्वचित्सरलतयैव पारयेत्प्रतिकर्तुमिति।

सिरोहीं विजित्य यथैव सम्राजः सेना गुर्जरान्प्रत्यवर्द्धत तथैव गुप्तचरैः संवादः प्रापितो यत्- 'शेरखाँ फौलादी ससैन्यः सपरिवारश्च ईडरराज्यं प्रत्यभिसरति। शेरखानस्तस्मिन्समये भारतप्रसिद्धानां युद्धवीराणामन्यतमोऽभूत्। तस्य शौर्यप्रभावो भारतस्य दूरदूरपर्यन्तमभिव्याप्यत। देशप्रसिद्धेषु युद्धवीरेषु निजभुजोष्मनिर्वापणकौतुकशाली कुमारमानसिंहः समुचितोऽयमवसर इति विभाव्य समभाषत सम्राजम्- 'श्रीमन्! वाञ्छाम्यहं, यत्किञ्चित्सैन्यमादाय स्वयमहं शेरखानं योधयेयम्। आत्मन्यखर्वगर्वशालिनस्तस्य मदनिर्वापणस्य हस्तगतोऽयमवसरः। अवशिष्टां वाहिनीमादाय श्रीमानग्रेऽभिसरतु यावदहमिदं खण्डयुद्धं परिसमाप्य सेवायामुपतिष्ठे।'

सत्येन शौर्योत्साहेन सुप्रसीदन् सम्राट् सप्रणयमदादनुमतिम्। मानसिंहः सोत्साहकौतुकं तत एव प्रययौ यतो हि शेरखानस्योपगमसम्भावमासीत्। स्वल्प एव समये सैन्यमेकं, तस्याग्रतश्च विशालकायमेकं वीरयुवकमागच्छन्तमालुलोके। आजुहाव तं समराय कुमारमानसिंहः। आसीत्सोऽपि वीरः समरेषु लब्धविजयश्च। आह्वानमिदं श्रुत्वैव सावधानः सोऽप्यभूत्समरायोद्यतः। द्वयोरपि वीरयोः समघटत समीक्षणीयं समीकम्। शेरखानो नासीत्पराक्रमे मानसिंहादूनः, परं स्थूलशरीरोऽसौ मानसिंहस्य शीघ्रगतिं नाशक्नत्तुलयितुम्। अभूत्स्वल्पकाल एव परास्तः। तस्य कोषः सम्पूर्णोऽपि पराक्रमिणो मानसिंहस्यासीद्धस्तगतः।

देशप्रसिद्धमेकं वीरं पराजित्य प्रसन्नमुखो मानसिंहः शीघ्रगत्या प्राप सम्राजम्, निरभिमानभावेनावर्णयच्च सर्वमपि युद्धवृत्तान्तम्। अतितरां समतुष्यत्सम्राट्, सदा स्मरणीयं चादात्तस्मै प्रणयोपहारम्।

सम्राजः सेना सम्प्रति गुर्जराणामतिनिकटगाऽऽसीत्। गुर्जराः साम्प्रतं मुजफ्फरशाहस्य तृतीयस्याधिकारेऽभूवन्। यदा हि समाकर्णयदसौ सैन्योपगमं तावता सम्राजः सेना तस्य द्वार एव समवास्थित। व्यगलत्तस्य धैर्यम्। निजरक्षाया उपायान्तरमलक्षयन्नसौ राज्यात्पलायाञ्चक्रे, किन्तु दुर्दैवात्तस्यामेव दिशि पलायितो यत्र हि सम्राजोऽकबरस्य सेना कृतसन्निवेशाभूत्। स्कन्धावारमालोक्य कान्दिशीकोऽसौ केदाराभिमुखं प्रद्रवन् वृक्षगहने निलिल्ये। किन्तु लक्षितोऽभूदसौ सैनिकैः। अन्ते निगडितोऽसौ सम्राजोऽधीनतां स्वीचक्रे। अकबरस्तस्याऽऽजीवनाय प्रदेशमेकं कल्पयित्वा निजधात्र्याः सुतं मिर्जाअजीजकोकाम् (खाने आजम) तत्प्रान्तस्याधिपतिं चक्रे।

मिर्जापरिवारो यो हि प्रान्तेऽस्मिन्पुरतः प्रभावशाली समभूद्, वृत्तान्तमिमं समाकर्ण्य सुतरामकुप्यत्। मिर्जाइब्राहिमहुसेनमात्मनः प्रमुखं निर्वाच्य ते सर्वतो विद्रोहं प्रासारयन्। देशे समन्तात्समुदतिष्ठद्घोरः कलहः। परितोऽप्युच्छृङ्खलता चाऽव्यवस्था चालक्ष्यत। साम्प्रतमिब्राहिमहुसेनस्याधीनतया पर्याप्ता सेनाऽपि समगृह्यत। इतो गुर्जरदेशीया मोगलसाम्राज्यस्याधीनतां न सहसा स्वीकर्तुमासन् सम्मताः। अतएव गुर्जरेषु प्रारभ्यत घोरो विप्लवः। संवादमिममाकर्ण्य सुभृशं चुकोप सम्राट्। एषां दमनाय वाहिनीं प्रेषयितुमाज्ञापयत्। एतस्य मन्त्रिणो रात्रौ शत्रूनाक्रमितुं समनह्यन्त किन्तु वीरोऽकबरो नेदं सममन्यत। राजपुत्राणां सङ्गत्या तस्य हृदयमुच्चं विचाराश्चोदाराः समपद्यन्त। अतएव स प्रकाश्यरूपेण शत्रूनाक्रमत्। मानसिंहोऽपि सम्राजो निश्चयमाकर्ण्य सुभृशमतुष्यत्। सुप्रसन्नः सोऽपि सम्राजः साहाय्याय सेनैकदेशमादाय द्वितीयमार्गेण 'सारनालं' समभ्यसरत्। द्वाभ्यामपि पार्श्वाभ्यां सेना तथा रभसेन प्राप्यत यथा प्रतिपन्थिनश्चकितचित्रिता अभूवन्।

मिर्जा इब्राहिमहुसेनो नासीदत्र। स हि सैन्यसङ्ग्रहाय समचेष्टिष्ट। एकतः स्वयं सम्राट्, अपरतः श्रीकुमारमानसिंह इत्युभयतः समाक्रान्ताः शत्रवः क्लेशापन्ना अपि वीरभावेन समयुध्यन्त। अकबरस्य सैन्यमग्रे प्रासरत्, किन्त्वासीदग्रमार्गो नितरां सङ्कीर्णः। उभयतोऽपि वंशोत्तुङ्गो घननिबिडश्च स्नुही (थूहर) गुल्मो दूरपर्यन्तं विस्तीर्णोऽभूत्। अतएव नासीदेकपदमपि इतस्ततो भावनस्यावकाशः। एवं सङ्कीर्णावसर एव त्रयः सशस्त्राः सैनिकाः सम्राजमकबरमेव लक्ष्यीकृत्य प्राहरन् घोरैः शस्त्रैः। हन्त घोरसङ्कीर्णेऽस्मिन् स्थले त्रय एव सैनिका महामहतीमप्येकां सेनामलमासन्नवरोद्धुम्। सङ्कुले स्थले अस्मिन् सहसैव युगपत्समापततः सैनिकानयोधयद्वीरतयाऽकबरः किन्त्वतर्कितमाक्रमद्भिस्तैः सङ्कटगतोऽभूत्सम्राट्।

महाराजो भगवन्तदासो यथैवाकबरं सङ्कटमुखे व्यैक्षत तथैवायमग्रे प्रसृत्य सादिनमेकं जघान। साम्प्रतं मानसिंहोऽपि तदभिमुखमाययौ, किन्तु सम्राट् स्वयमेव सैनिकाभ्याममूभ्यां सह योद्धुमैच्छत्। अतएव कुमारमग्रे प्रसर्तुमवारयत्। शौर्याविशे निरोद्धुमैच्छदकबरस्ताविमौ। किन्तु वीरावेतौ द्रुततरमुत्प्लुत्य सम्राजं शस्त्रविक्षतं कर्तुमग्रे प्रासरताम्। साम्प्रतं नाशकद्धैर्यमवरोद्धुं महाराजो भगवन्तदासः। प्रावादीदसौ– ' कुमार! किमिदानीं निरीक्षसे? सम्राजो जीवनं घोरसङ्कटे।

किमिति नाग्रे प्रसरसि ?

**कुमारः** – सम्राजस्तादृश एवाऽऽदेशः किमहं कुर्याम् ?

**भगवन्तदासः**– नायं समयः सम्राजः प्रसन्नतामप्रसन्नतां वा प्रतीक्षितुम्।

किमिदानीमासीत्। लोकैकवीरो मानसिंहः खड्गमादायसरभसमधावदग्रे। सैनिको यावता भिनत्ति भल्लेन वक्षोऽकबरस्य तावता मानसिंहस्य खड्गः सैनिकस्य मस्तकमपाहरत्कन्धरातः। कुन्तफलकस्य परिवर्ते सैनिकस्यास्य मस्तकमेव सम्राजो वक्षसि न्यपतत्। अकबरो मानसिंहस्य शौर्ये नितरामतुष्यत् किन्तु नासीत्सन्तोषप्रकटनस्यायमवसरः। सम्मुख एव समायासीद्दलं मिर्जापरिकरस्य। समभूदवहितः सम्राट्। प्रावर्तत घोरः संयुगः। निर्भरं पराजिग्ये मिरजामण्डली। केचिदहन्यन्त, केचिज्जीवग्राहमगृह्यन्त।

अवसरेऽस्मिन् सुप्रसन्नः सम्राट् महाराजभगवन्तदासं कुमारमानसिंहं च परोलक्षमुद्राणामुपायनमन्तरा 'विजयभेरिसम्मानेन वैजयन्तीप्रदानसमादरेण च सभाजयति स्म सुभृशम्। नायं सम्मानोऽद्यावधि कस्मैचिदपि हिन्दूनरपालाय प्रादीयत सम्राजा। गुर्जरदेशः साम्प्रतमभूत्सर्वथा सम्राजोऽधीनः। अजीयत तदैव सूरतस्य महद् दुर्गम्। यावता साम्राज्यसैनिका गुर्जरान्निर्जयन्ति तावता मानसिंहः सैन्यैकदेशमादाय 'डूंगरपुरप्रान्तं प्रति प्रतस्थे। नासीत्तस्य काठिन्यं तस्य विजये। एवं किल मानसिंहः स्वकीयविजयकाण्डस्य चक्रे रोचकं प्रारम्भम्।

## ( ४ )

## विनाशस्य सूत्रपातः

महाराजो भगवन्तदासः प्रासीदन्मनसि यन्मदुपक्रान्तं साम्राज्यनिर्माणकार्यं कुमारमानसिंहः समुद्दता नैपुण्येन निर्वहतीति। एकैकं सर्वाण्यपि राज्याणि साम्राज्यसूत्रे सम्बध्य महतीमेकतां शक्तिञ्चानुभवन्ति स्म। ह्यो ये भूपालाः स्वल्पं स्वल्पं भूखण्डमादाय मिथोरक्तप्रवाहेण व्यस्ता आसंस्तेऽपि साम्प्रतमन्योऽन्यं प्रणयन्ति, आखेटक्रीडादिभिश्च विनोदमनुभवन्ति। क्वचिच्च पुरुषातिशायिनो बलप्रयोगान्मध्येसभं प्रदर्शयन्तः सम्राजो मनस्तोषेण साकं निजशक्तिसञ्चयं जनतासु प्रभावातिशयं चोपार्जयन्ति स्म। एकैकं प्रति भयस्य चाविश्वासस्य च ये दुर्भावास्ते व्यलुप्यन्त शनैः।

आसीदुदयपुरराज्यमेकसम्बद्धम्, यद्धि साम्राज्यप्रवाहे कण्टकमिवाऽऽस्खलति स्म मानसे सम्राजः। एतस्य मृदूकरणाय मानसिंहस्य बुद्धिवैभवमन्तरा नान्यदासीदवलम्बनं सम्राजः। स हि कुमारमाहूय व्यवृणोन्निजाभीप्सितम्। प्रत्युक्तं मानसिंहेन– 'कार्यमिदं न नाम साधारणम्।

उदयपुरस्य महानयं गर्वो यन्नाद्यावधि यवनैस्तेन सम्बन्धो रक्षितः। प्रतापसिंहो युद्धप्रियः, स हि निजजीवने सन्धिमूरीकुर्यादिति न मे प्रतिभाति।

**अक०** – यदि भवानिदं कार्यं स्वीकुर्यात्तर्हि युद्धे विस्फुरन्नपि नीतावप्रभवन्मेद-पाटभूपतिरवश्यं भवदनुरोधं रक्षेत्।

'यावच्छक्यमहमास्थास्यामि यत्नम्' इत्युक्त्वा प्रययौ मानसिंहो मेदपाटम्।

महाराणा महता सम्भ्रमेण सम्मानयामास मानसिंहम्। मन्त्रणागृहे महाराणा कुमारो मानसिंहश्चातिष्ठताम्। कुमार एव प्रारेभे प्रसङ्गम्– 'महाराणा! मन्ये विदितमेव भवतो यद्राजस्थानस्य भूमिपतयो विशृङ्खलभावेनाऽवस्थिता न केवलं देशशक्तिं दुर्बलीकुर्वन्त्येव, अपि तु मिथो विरोधेन भारतमिदमन्यान्यदेशानामभिभोग्यमापादयन्ति। अत एव सर्वेऽपि महीपतयः सम्भूय साम्राज्यमेकमभिप्रबलकर्तुमभिलषन्ति। एतस्मिन् सम्भूय समुत्थाने सम्मानीयस्य भवादृशस्यावलम्बनमाकाङ्क्षन्ति सर्वेऽपि। अकबरः सम्राट् राजपुत्राणां मर्यादाऽभिवेदी। स हि सम्मानेन साकं भवतः सहयोगं वाञ्छति।'

प्रत्युक्तमुदयपुराधीशेन 'मेदपाटो नाद्यावधि यवनानां सम्पर्कं सेहे न चाऽग्रेऽपि तथा वाञ्छति। मेदपाटः स्वतन्त्रोऽभूत्। अग्रेऽपि च तथैवावतिष्ठेत। अहमपि खिद्येऽनेन यद्राजसन्ततयः शनैः शनैर्यवनैः संसृज्यन्ते।

**मान०** – जातीयगौरवमवश्यनुवर्तनीयम्। किन्तु यत्र जातीयता राष्ट्रियताया बाधिका भवेत्तत्र राष्ट्रियतामेवाऽभिनन्दन्ति नीतिज्ञाः। राष्ट्रे रक्षिते एव जातिरक्षा सम्भविनी।

**महारा०** – भारते जातीयतैवाऽऽसीन्न राष्ट्रियता।

**मान०**– नैतदार्याणां प्राक्तनम्। जगत्यार्यैरेव सा राष्ट्रियता निदर्शिता यामन्ये श्रुत्वापि न प्रतीयेरन्। बहोः कालाद्विलुप्ता सैव राष्ट्रियता सम्प्रति सम्प्रतिष्ठिता भारते।

''भारतमेकराष्ट्रं न कदाचिद्भवेत्।''

''मम दृढो विश्वासो यदन्यान्यदेशवद् भारतमप्येकराष्ट्रमवश्यं सम्भवेत्।''

''कथमिव ?''

''इतः पूर्वमहमेव सविनयं पृच्छामि– राष्ट्रियतां पराकृत्य जातीयतामवलम्बमानैः किं यवना भारतादपाकृताः ? मेदपाट एव वा किमस्मिन् सफलोऽभवत् ?''

''मेदपाटे न यवनानां पादौ स्थिरीभूतौ''

''तत्रभवतो विचारे मेदपाट एव समस्तं भारतम् ?''

''नाहमन्यान् राजन्यान् भावयामि।''

''इदमेव कारणं यद् भारते एकराष्ट्रस्य स्थापना नाद्यावधि जाता। यथा मेदपाटो मेदपाटमेव भारतममन्यत, तथाऽन्यान्येऽपि नरपालाः स्वराज्यमेव भारतमभावयन्। मिथः सम्भूय सम्मिलितराष्ट्रोत्थानस्य चिन्ता न केनचित्कृता। एतस्याः सङ्कुचितमनोवृत्तेः परिणामस्वरूपमिदमागमनं भारते यवनानाम्। इदमपि च सम्यग् विदितं श्रीमता यन्माहम्मदैः साम्प्रतमीदृशी परिस्थितिरुत्पादिता यत्ते न देशात्पराकर्तुं शक्याः।''

''आम्, देशात्तेषां निराकरणमसम्भवमेव साम्प्रतम्।''

''ते यत्रापि शासनं करिष्यन्ति, केषामुपरि?''

''आर्यसन्तानानामुपरि।''

''किमेतदभिरोचयति भवान्?''

''नैव।''

''किं भवानकबरमुन्मूल्य हिन्दूराज्यमास्थापयितुं प्रभवेत्? यदि भवान्मे विश्वासमास्थपयेद् यद् भारतीयभूपालाः सर्वेऽप्येकमनसो भूत्वा अहम्मन्यतायाः कुलीनतायाश्च गर्ह्यगन्धं गलहस्तयन्तोऽकबरस्य विरोधाय सर्वथा सन्नद्धाः सन्ति, तर्हि निःसंशयं सोऽहमग्रेसरो भवदनुगमनाय।''

'स्वयमहं संशयानो ह्यस्यामेकतायाम्। तत्रापि मेदपाटीया नाभिलष्येयुर्भवतः साहाय्यम्।'

''किमिति?''

''एतदर्थं यत्...''

''स्पष्टमुच्यताम्।''

''भवता मोगलैः सह सन्धिर्विहितः।''

''महाराणा! स्पष्टमिदमाकर्ण्यताम्, नाऽयं समयो विचाराणामेवंविधानाम्। अहं वा मे पूज्यः पिता वा न स्वार्थवशः सन्नकबरस्य साहाय्यं कुर्वः, अपि तु हिन्दुत्वस्य रक्षायै। यदा हि हिन्दुभिर्यवनानां कार्ये हस्तक्षेपो न व्यधीयत तदा स्पष्टं दृष्टं स्याद् यद्धिन्दूनां देवमन्दिराणि धर्मशास्त्राणि, एतदेव किम्, तेषां जीवनपर्यन्तप्यासीद् घोरसङ्कटे। किन्त्वद्य मोगलसाम्राज्ये हिन्दवो मोदन्ते, प्रतिष्ठां लभन्ते, तेषां पूर्णं नाम धार्मिकं स्वातन्त्र्यम्। भारते पुराऽप्येवमभूत्। अनेका दस्युजातयोऽत्र समापतन्। भारतमलुण्ठन्, व्यदलयन्, किन्त्वार्यास्तदेतस्मिन् भ्रूक्षेपमात्रमप्यविधाय विश्वव्यापिन्या निजगभीरताया जठरे सर्वास्ता जातीः शनैः शनैस्तथाऽजरयन् यथा तासामस्तित्वमेव व्यलुप्यत। भारते पुनर्हिन्दूनामेव दुन्दुभयो नेदुः। कनिष्कः कोऽभूत्? हूणाः कां वा न्यूनतामकार्षुर्भारतीयसंस्कृतिविलोपाय? शाकद्वीपीयाः मोगला अपि न शक्यन्ते

साम्प्रतं पराकर्तुम्। राणासांगा न चेद्बाबरमत्राह्वास्यत्तर्हि किं मोगलसाम्राज्यस्थापनस्यात्राव-सरोऽभविष्यत्? तथ्यनिवेदनं न नूनमपराधाय। देशे ज्वलनं विकीर्य मेदपाटः साम्प्रतं निजस्वातन्त्र्यस्य स्वप्नं वीक्षते।

अस्ति साम्प्रतमपि समयः। मोगलैः सह राजनीतिपाटवप्रदर्शनस्याऽयमवसरो न घृणाप्रकटनस्य। तैः सह सन्धाय शनैः शनैस्तेषु निजप्रभावविस्तारस्यावश्यकता, न शुष्ककलहस्य। तान् मुष्टौ कृत्वा तेषां मस्तिष्कपरिवर्तनस्याऽयमवकाशो न तैः सह दुःसहसमरेण देशे रक्तपातस्य। यद्यस्मिन् सूक्ष्मसमये स्वल्पमप्यनवधानं स्यात्तर्हि बहिः प्रदर्श्यमानाया घृणाया बीजं तथा दृढं भवेद्यथा हिन्दूनां बिन्दुरपि घृणाभाजनं भवेद्देशे। भारते, रामकृष्णयोः पदपङ्कजपरागपवित्रीकृतेऽस्मिन्नार्यावर्ते आरव्यभाषोपनिबद्धाः कुरानोपासना एव सर्वतः प्रगल्भेरन्। विद्वेषवह्निस्तथा प्रज्वलेद् यः परमप्रयत्नैरपि न नाम नूनं निर्वायात्, प्रत्युत परम्परया प्रवर्द्धेतैव। अहं दृढं विश्वसिमि यद् भारतीयभूपालाः साम्प्रतमपि न नाम राजनीतिं विस्मृतवन्तः। भारतीयेषु साम्प्रतमपि तथाविधमात्मबलं वर्तते यस्य प्रभावे निपत्य रक्तपिपासवः स्वभावबर्बरा अपि यवना न तावदात्मानं निःस्पृष्टमास्थापयितुं प्रभवेयुः। अस्माभिरकबरः कीदृशेन प्रभावेण वशीकृतस्तदिदमद्य न चेत् अग्रे विवेकिनो राजनीतिज्ञाः सूक्ष्मतमं पर्यवेक्ष्य भोत्स्यन्ते, मोगलाश्चानुतप्स्यन्ते।''

एतस्मिन्नेवावसरे सेवकोऽसूचयद्भोजनस्यावसरम्। राणा कुमारमामन्त्रयद्भोजनाय। कुमारः सरभसमभाषिष्ट – 'सम्यगिदम्, वयं सर्वेऽपि भोजनतो निवृत्त्य गभीरेऽस्मिन्विषये मिथो विचारविनिमयेन कर्तव्यनिर्णयं स्थिरीकुर्मः।'

राणाऽवादीत्– 'न मे क्षुधा साम्प्रतम्, निर्वर्तयतु भवान् भोजनम्।'

कुमारस्तात्पर्यमेतस्य तत्कालमवाबुध्यत्। नायमपमानः सह्योऽभूत्संयमिनोऽपि मनस्विनः। क्रोधात्स तत्कालमुत्तिष्ठन् प्रावदत्– 'राणा! मानसिंहं मानिमनुष्या अपि मानयन्ति। अवबुद्ध्यते स सर्वम्। किन्तु स्मर्तव्यं, सैषा सङ्कुचितमनोवृत्तिर्मिथ्यादम्भश्च सङ्कटमुपस्थापयेन्निकटे।' राणा पुनरवदत्– 'उदयपुरभूपालो भ्रष्टैर्भोजनं नाभिरोचयेत्।'

'अदूरदर्शिन् देशविद्रोहिन् राणा! अग्रे न ममोपालम्भो देयो यन्मानसिंहेन मेदपाटो विपाटितः। विवेचयिष्यन्ति राजनैतिका एव यत् एकव्यक्तेर्मिथ्यादम्भरक्षायै परोलक्षप्रजानां प्राणाः सङ्कटापन्नाः, देशश्च सर्वदार्थं विनाशमुखे।

''मेदपाटः स्वनिश्चये निश्चलः!''

''तर्ह्याम्बेरभूपालोऽपि निजनिर्णये निष्कम्पः। एकमुदयपुरं किम्, शतमुदयपुराण्यपि यदि भवेयुस्तदापि साम्राज्यनिर्माणकार्यं निरुध्य हिन्दुजातेश्चूर्णीभावो न शक्यते सम्प्रति कर्तुम्। रक्तपातमात्रवेदिन् राणा! एकस्य भवतः कृते न केवलं वराको मेदपाट एव, अपि तु भारतमात्रमिदमवलोकेत रसातलम्!'' इत्युक्त्वैव परावर्तिष्ट मानी मानसिंहः।

## ( ५ )

## गुर्जराणां विहार-वङ्गानां च समराङ्गणे

अकबरः साम्प्रतमध्यतिष्ठत् फतेहपुरसीकरीस्थानम्। त्वरितमवापत्तत्र मानसिंहः। अकबरोऽभूत्तस्य प्रतीक्षायामेव। नैतदर्थं यद् राणासम्बन्धे भृशमुत्कण्ठासीत्, अपि तु समुपस्थिताया विषमसमस्यायाः समीकरणार्थम्। गुर्जरेषु पुनर्मिरजापरिकरेणोपद्रवः प्रारब्धोऽभूत्। अकबरेण स्पष्टमनुभूतमात्महृदये यत् मुसलमानसेनानायका न मे सत्यहितैषिणः। अत एव प्रत्येकसमरे क्षत्रियान्, विशेषतश्च कुमारमानसिंहं विना न तस्य किञ्चिदपि कार्यं समपद्यत।

लोहिताभे लोचने स्फुरन्तमधरं चावलोकयन् कुमारस्य, गहनघटनामनुममौ सम्राट्। त्वरिततरं स प्रतिसमादधे 'किं राणा साम्प्रतमपि नोपागात्सरलमार्गम्? द्रुतं मे सूचय, यदि नाद्याऽपि युद्धायाऽवश्यमामन्त्रयेयम्।

**मान०** – प्रयतितं मया बहुधा, किन्तु नासावनुमन्यते सन्धिम्। एकसाम्राज्यनिर्माणं च तस्य दमनमावश्यकं मनुते। तद्यदि भवतो नानुमतं स्यात्तदाऽपि तमेनमहमात्मबलेनाऽपि युद्धायाऽवश्यमामन्त्रयेयम्।

**अक०**– प्रिय मान! नेदं कदाचिदपि भावयेर्यदकबरः कृतघ्नः। अहं भवतो गुणानुपकारांश्च प्रत्यहं भावयाम्यान्तरे। भवतोऽयमपमानः साक्षात्साम्राज्यस्यावमानः। किं वा स्वस्य तस्य सौभाग्यस्य, देशाभ्युत्थानस्य वा सोऽयं पादाघातः। अहं सम्प्रति हृदयान्तस्तलेन राणापराभवमवधारयामि।

एतस्मिन्नेव समये सैनिक एकः पत्रमेकं सम्राजे समर्प्य तदिङ्गितेन तत्कालं मन्त्रणाभवनाद्बहिरभूत्। आसीत्पत्रमिदं गुर्जरेभ्यो राजसिंहेनाऽऽलिखितम्– 'यत् मिर्जामुहम्मदहुसेनो भयानकरूपेण सम्राजो विरोधे समुत्थितः। साम्राज्यसेनां दूरगतां विभाव्य अहमदनगरादिषु चक्रे निजाधिकारम्। आजम अजीजकोका न प्रभवति तत्पराभवे। प्रजानां सम्राजः सेवकानां च जीवनं सङ्कटगतं विभाव्य त्वरिततमं प्रतिविधातव्यम्' इति।

पत्र पठित्वा प्रावादीदकबरः – 'मानसिंह किमिदानीं कर्तव्यमिति व्यवतिष्ठस्व! वारंवारमुपप्लवमानैरमीभिर्भूरि खेदितम्, सम्प्रति तथा दमनीया यथाऽन्येऽपि प्रान्ताः प्रतिबुध्येरन्।'

**मान०** – पूर्णतया तथ्यमिदम्, अन्यथा अन्येऽपि जनाः शिरः समुच्छ्रयेयुः। किन्तु युद्धनीतिरिदमेवोपदिशति यत्तत्र सैन्यं तथा त्वरितं प्राप्नुयाद्येन सर्वे ते चकितसम्भ्रान्ता न किञ्चित्प्रतिविधातुं शक्नुयुः। विलम्बे सत्यन्येषामपि समुत्थानस्याशङ्का।

**अक०** – सर्वथा सम्यगिदम्, किन्तु राणाविषयेऽपि किञ्चिदधुनैव प्रतिविधेयम्?

''नास्मिन्विषये किञ्चिच्चिन्तयितव्यम्। ततः प्रतिनिवृत्त्यापि सर्वमिदमायोज्येत। तावत्कालं कदाचित्तस्य मतिरपि परिवर्तेत। न सहसा समरेण किञ्चिद्राजसंस्थानं सर्वथोन्मूलनीयमिति मे मतिः प्राच्यनीतिश्च।''

अकबरो मानसिंहानुमत्यैव त्वरिततममकरोद्रणप्रस्थानं गुर्जरान्। सेनायाः प्रधानपरिचालकावास्तां महाराजभगवन्तदास-मानसिंहौ। अतित्वरितगत्या प्राचलद्वाहिनी। एकैकस्मिन्दिने पञ्चविंशतित्रिंशत्क्रोशपर्यन्तमलङ्घयत्पन्थानम्। द्वादशदिनैस्त्रिशतं क्रोशानुल्लङ्घ्य प्राविशद्वाहिनी गुर्जराणां प्रवेशद्वारम्।

सम्राड् गुर्जरेषु पदनिक्षेपं कुर्वाण एवासीदेतावतैव महाधनो जातीयस्तस्य तुरगः सहसोपाविशत्। अकबरो भूयस्तरामभूच्चकितश्च सम्भ्रान्तश्च। अस्मिन्नेव समये महाराजो भगवन्तदासः सरभसमुपसृत्य सम्राजः सौभाग्यमभिनन्दन्नूचे- 'श्रीमन् ! तदिदं शुभशकुनं भवतो विजयसूचकम्। भारतीयविशेषज्ञा यात्रासमये त्रितयमिदमभिनन्दन्ति भूयसा-प्रवेशावसरे तुरगस्याऽऽसनम्, पृष्ठवर्ती पवनः, चिल्लानां वायसानां च युगपदुपगमनं चेति।

शुभसंवादेनानेन भृशमतुष्यत्सम्राट्। स हि मानसिंहसम्मत्या सेनां त्रिषु भागेषु विभज्य तिसृषु दिक्षु समाक्रमत्परिपन्थिनः। मानसिंहस्य युद्धनीतिरत्रापि सम्पूर्णं सफलाभवत्। मुहम्मदहुसेनो यथैव सम्राट्पृतनाया घोरमारवमशृणोत्तथैव भयविह्वलः सुबहानकुलिनमपृच्छत्- 'अयं कर्णबधिरीकारः कोलाहलः कुतः समागच्छति?'

''सम्राजोऽनीकिनी समागता तस्या एव तुमुलो ध्वनिः।''

''नेदं सम्भवि, मया निश्चितमाकर्णितं सम्राट् साम्प्रतं फतहपुरे।''

''इदं निश्चितमेव त्वां निश्चलमकरोत् पश्य, सम्मुखे कोऽयमभ्युपैति?''

यथैव मिर्ज़ामुहम्मदहुसेनेन सम्मुखमालोकितं तथैव सज्जां वाहिनीं द्रुतगत्या समाकर्षन्नकबरो दृष्टिमुपागमत्। सम्राजः सेना परिपन्थिनामनीकादासीत्संख्यायां न्यूना। अत एवाऽकबरोऽभूच्चेतसि चिन्ताकुलः। किन्तु भगवन्तदासः सर्वमिदमवगत्य सुस्फुटमसान्त्वयत्सम्राजम्- 'संख्यायां न्यूना अपि राजपुत्रवीराः समरे कियन्तः सम्भवन्तीति समये समवगतं स्यात्। न तत्र भवता किञ्चिदपि विमनायितव्यम्।'

उत्साहितः सम्राट् सैन्यमादाय समावर्धिष्ट समरे। इतो मिरजाचमूरपि समभ्यसरद्। द्वयोर्घोरसङ्घर्षे प्रथमाक्रमण एव सम्राट्सैन्यमकरोत्पश्चात्पदम् मिरजावाहिनी। किन्तु यथैवाऽकबरं विषमस्थलमलोकयतामङ्गरक्षकौ भगवन्तदासमानसिंहौ त्वरितमग्रे प्रवृद्धय शत्रुसैन्यमामर्दयतामुग्रगत्या। अभवत्तुमुलम्। विजयश्रीरभवत्सम्राजो हस्तगता। अगृह्यत मिरजाहुसेनः। सहस्रद्वयमिताः शत्रवः प्राणेभ्यो व्ययुज्यन्त, सहस्रानुमिताश्च क्षताः पलयिताश्चाभूवन्। सम्राट्सेनायां च शतं सैनिका अम्रियन्त।

मानसिंहसम्मत्या तदेवं द्वितीयवारं पुनरक्रियत गुर्जराणां विजयः। उपद्रव-कारिणामक्रियत कठिनं दमनम्। भगवन्तदासमानसिंहयोर्मध्येविजयसभमकारि सम्राजा सन्तुष्टहृदयेनाऽभिनन्दनम्, अदीयत च तयोः स्वरूपानुरूपमतिबहुमूल्यमुपायनम्।

गुर्जरविजयं कृत्वा सीकरीस्थाने परावृत्तः सम्राट् मार्गश्रममपि न यथावद्विगमयामास तावतैव संवादः समागात्-मगधेषु (बिहारप्रान्ते) सुल्तानतनयो दाऊदः सम्राड्विरोधे घोरमत्याचरतीति। मन्त्रणाभवने पुनः सममिलत्प्रमुखसेनापतीनां सभा। सर्वमुखो मानसिंहो निरदिशत्- 'अस्मिन्वारे विहारवङ्गयोर्विजयाय न पर्याप्ता भवेत्केवलं स्थलसेना। नैतावद्दूरमियत्याः पृतनायाः प्रापणं सुकरम्, किञ्चैतावति काले शत्रुरपि भवेत्प्रबलः।

पृष्टमखिलैः सदस्यैः - तर्हि किं प्रतिविधीयतामत्र?''

'रणपोतपटल' स्यैकस्यावश्यकता, यं विलोक्य विहारवङ्गावुभावेव भवेतां चकितौ। यात्रायां अनेन सुकरता शीघ्रता चाप्यनायासं भविता।' सेयं मन्त्रणा सममन्यत सर्वैः। स्वल्पैरेव दिनैः समरपोताः समनह्यन्त। जलयात्रायाः पूर्णं सन्नाहमायोज्य बीरबल-शाहबाजखाँ, कासिमखाँ, प्रभृतीनामूनविंशतिनायकानां मध्ये भगवन्तदासमानसिंहौ प्रमुखौ कृत्वा सम्राडकबरो जलमार्गेण प्रतस्थे मगधान्।

आसीत्पूर्णा प्रावृट्। नद-नदीषु प्रावर्द्धन्त पयःपूराः परितः अतएव न्यमज्जन्बहवो रणनौकाः, किन्तु ततोऽपि पर्याप्ताऽवशिष्टा सेना सर्वतः पूर्वं हाजीपुरं विजित्य पाटलिपुत्रं पर्यवृणोत्। सेनाया आगमनं श्रुत्वैव दाऊदः पलायिष्ट वङ्गान्। लुण्ठने परः कोटिमुद्राणां द्रव्याणि हस्तगतान्यासन्। विहारराजधान्याः पाटलिपुत्रस्य विजयो नासीत्साधारणं कार्यं किन्तु मानमतिवैभवेन तदपि साधारणमभूत्।

आसीत् दाऊदस्य निग्रहणमावश्यकम्। अतो वङ्गविजयाय टोडरमलस्याधीनतायां प्राहीयत राजसेना। पराजितो दाऊदः सन्धिं प्रार्थयामास । टोडरमलो दाऊदस्य नीचतां विजानन्नानुमेने सन्धिं किन्त्वकबरस्योदारतया अदूरदर्शितया वा स्वीचक्रेऽसौ सन्धिं, यस्य फलमचिरादेवोपलब्धमकबरेण । विहारवङ्गयोर्विजयपरितुष्टोऽकबरो मानसिंहमभिनन्दन् समाययौ राजधानीम्। विजयोत्सवसमारोहैरमोदत मोगलराजधानी।

## ( ६ )

## सम्मुखसमरे

विजयोल्लासे मत्तोऽकबरःसर्वं पूर्वनिश्चयं व्यस्मरत्। मानसिंहः कथाप्रसङ्गे समसूचयत्-

'भारतीयभूपालनां त्यागप्रवृत्तिर्विलासकीटेषु मौहम्मदशासकेषु नावाप्येत नूनं गवेषिताऽपि। स्वोद्देश्यं स्थिरीकृत्य तदनुसारं जीवनपरिचालनं मन्ये आर्यसन्तानैरेवात्मसात्कृतम्।

श्रुत्वैवेदमकबरहृदयमाहन्यत। आत्मनः प्रमादमवधानेन भावयतस्तस्य स्मरणमभूद् यदस्मिन्नेव भवने, एतस्मिन्नेव भूप्रदेशे मया मानसिंहसमक्षे यत्प्रतिज्ञातमासीत्तस्य हन्त व्यतीतास्त्रयः संवत्सराः! सङ्कुचितः सम्राट् तत्कालमब्रूत–'सखे मानसिंह! स्वीकरोम्यहमात्मनः प्रमादम्। सेयं राजसत्ता सत्यमुन्मादिनी मानवस्य।

अभिनिविष्टः श्रीमान्मानसिंहःपुनरवोचत्–''श्रीमन्! सर्वां राजसत्तां कथं निःसम्भ्रमं तुलयसि। न विलोकयसि किमस्मान्, ये भवनपरिजनान्विहाय, जीवनस्य प्रमोददायिनीं सर्वामपि सामग्रीं परित्यज्य दूरे निपतिताः स्मः। सर्वमेत्किन्निमित्तम्? नास्य निमित्तमिदं यद्वयं मोगलनरपतीनां विभवेन जीवामः। नापि चैतस्य कारणं यच्चाटुकारितया जीवनस्यामूल्यानभिनन्दनीयांश्च क्षणान्व्यर्थं विगमयितुमिच्छामः। एतस्येदमेव प्रयोजनं यद्देशव्याप्तामनेकतामपनीय भारते एकराष्ट्रस्थापनस्य मङ्गलमर्जयामः। अस्माभिरत्रभवतः साहाय्यमर्थितम्। अतएव श्रीमताऽपि स्वस्योत्तरदायित्वं न जातुचिद्विस्मरणीयम् ।''

ओजस्विनीमिमां वक्तृतामभिनिशम्य हतप्रभोऽभूदकबरः। किमासीदेतस्योत्तरम्? स ह्यात्मनः प्रमादमङ्गीचक्रे। आसीदितिहासप्रसिद्धः सोऽयमेव गुणोऽस्मिन्नकबरसम्राजि। तत्कालमेव स प्रमुखसामन्तानाहूय पञ्चसहस्रसादिसेनां तदायत्तीकृत्य मेदपाटविजयाय विससर्ज। प्रस्थानसमये स्वप्रतिनिधिं मानसिंहमाह स्म सम्राट्–प्रियसुहृन्मान! राजपुत्रगौरवे सम्राट्सम्माने च न काचिन्न्यूनतानुष्ठीयेतेति न मन्ये सुखतो वक्तव्यं स्यात्। मोगलसाम्राज्यस्य सर्वस्वभूताद्धिरराजकुमारान्मम का सुमहती प्रत्याशेति स्वयं भवान्वेद। केवलमिदमेव सूचनीयं यत्स्वोद्देश्यनिर्वाहे प्राणपणेनाऽपि यतनीयम्, सत्यावश्यकत्वे च त्वरितमहमासूचनीयो येन तत्कालमेवाहं प्रचुरसेनया भवतः समीपमुपगच्छेयम्।

मानसिंहो माण्डलगढं मध्ये विसृज्य हल्दीघाटीसन्निधौ वर्णाशनद्यास्तटे स्कन्धवारमास्थापयामास। राणा अपि संवादेनानेन निश्चिक्ये तदिदमेव यत्पर्वताश्रयेणैव सम्प्रति योद्धव्यमिति। अतएव सेनां संवहन् 'गोगूँदा' स्थानमामुञ्चन्,स हि मानस्कन्धावारात्क्रोश–त्रितयान्तराले निजनिवेशमातिष्ठिपत्।

सर्वतः पूर्व गुप्तचरान्समन्ततः सम्प्रेष्य तदिदं जज्ञे कुमारो यत्कियती सेना मेदपाटेशितुरिति। यदा चास्य विदितमभूद् यत्सौकर्येण सेयं विजेतव्या , तदा सोऽयमायोधनस्यायोजनं चक्रे। सम्प्रति स्वाधीनसेनापतिं सतर्कतया सज्जयामास सोऽयम्। यतोऽयं सर्वथा जानाति स्म यदधुना योद्धव्यो न नाम साधारणः! मेदपाटिनः पार्थिवाः कामं कपटपटुमलाउद्दीनमात्मगृहमाह्वयेयुः किन्तु समराङ्गणे प्राणेषु सत्सु न कदाऽपि ते परावर्तेरन्। एकदा मानसिंहस्याऽभूद्विदितं यद् राणा स्वल्पानेव सैनिकानादाय मृगयायै निर्गत इति। आसीच्च

बहुनां परामर्शो यद्राणानिग्रहस्य सोऽयं सदवसर इति। किन्तु मानी मानसिंहस्तदिदं वीरनीतेः विशेषतश्च स्वस्वरूपस्यानुरूपं नानुमेने।

प्रारम्भे सम्मुखसमरः। राणा निजसैन्यं द्विधा चक्रे। एकमात्मनोऽधीनतायाम्। अपरमन्यस्य निजसामन्तस्याधीनतायाम्। एतदनुसारं मानसिंहोऽपि द्वेधा विभक्तवान्सेनाम् – एका निजस्य सैनापत्ये, द्वितीया यवनसेनानायकस्याऽधीनतायाम्। प्रथमदलस्य (अर्थात् राणा– मानसिंहयोर्हिन्दुदलस्य) यदा प्रारम्भे सङ्घर्षस्तदा द्वयोरपि राजपुत्रदलयोः क्षत्रिया न मिथः परिचीयन्ते स्म यदयं राणापक्षीयः, अयं च सम्राड्दलभुक्तः। मोगलसैनिका मोगलसेनापतिं पप्रच्छुः कस्मिन्दले प्रहराम इति।

हन्त सोऽयं सेनापतिर्मुस्लिममनोवृत्तेरासीत्। मुस्लिममनोवृतिः केवलं मुसल्माना– नामेव पक्षं पोषयति, कामं ते सत्यपक्षस्था भवेयुरथ गर्ह्यपक्षस्थाः। तेषां संसार इस्लामस्य संसारः। मुसल्मानं विहायाऽन्यजातीयःकश्चित्पुरूषो यदि मुस्लिममनोवृतेः पुरूषस्य प्राणतिगामपि सहायतां कुर्यात्तथापि सत्यवसरे स हि उपकारकेण सह कृतघ्नताव्यवहारं न मानयत्यनुचितम्। प्रत्युत इस्लामेतरस्यापकरणं ते स्वधर्मस्य महत्त्वपूर्णं पालनं मन्यन्ते। अत एव सेनापतिरसौ प्रादादुत्तरम् – ज़ेहर तरफ किशवद कुश्ता सुदे इस्लामस्त (कोऽपि कस्मिन्नपि दले म्रियताम्, इस्लामदलस्य लाभ एव ) मुस्लिमसैनिका उभयपक्षीयेष्वेव हिन्दुषु बाणादीन्निचिक्षिपुः। उभयत एव हिन्दवो विससृजुः प्राणान्। अत एवास्य युद्धस्य परिणामः स्पष्टं परमेश्वरायत्त एव।

सम्प्रति समरे प्रावर्द्धिष्ट राणासैन्यमग्रे। मानसिंहः प्रवृद्ध्य निरूरोध तदिदमाक्रमणम्। द्वयोरपि दलयोर्न्यबध्यत दन्तिनां मिथो युद्धम्। प्रतापश्च मानश्च द्वावेव निजनिजशौर्यस्य ददतुः पूर्णं परिचयमेतस्मिन्सङ्ग्रामे। पन्नगो यथा विकृतिं प्रापित एव भयङ्करतामवलम्बते तथा द्वयोर्दलयोः क्षत्रिया अपि निजमानमर्यादां सङ्कटगतामवेत्य प्राणपणेन तद्रक्षायै भयानकमयुद्धयन्त। राजन्येषु नैवंविधःसमरः शताब्दीष्वेतासु जातः स्यादित्यैतिहासिकानामुदीरितम्। कदाचिन्मेदपाटीयाः समभूवन्विजयिनस्तर्हि कदापि कच्छपघाताः प्रादर्शयन्प्रकामवीरताम्। भयङ्करे ग्रीष्मे भयानकोऽयं समरो वीरहृदयेष्वपि क्षोभम्, वीरप्रणयिनाममराणां मनसि च कौतुकमुत्पादयामास।

सम्राट्सुतः सलीमोऽपि दन्तिमेकमारूढो देशैकवीरयोरनयोर्द्वन्द्वयुद्धमपूर्वं पश्यन्नासीत्। सहसा प्रतापप्रेरितः पृषत्क एकः सम्राट्मतङ्गजे प्रापत् । सलीमो दैवेन रक्षितः किन्तु तदाधोरणस्तदैव प्रापत्पञ्चताम्। मानसिंहः स्वयमुपागमत्सूक्ष्मेऽस्मिन्नवसरे। स हि निजबाणैः प्रतापमाहतं मूर्च्छितं च चक्रे। चेतकनामकस्तदीयोऽश्वः स्वामिनो विपत्तिमनुमाय तदैव सङ्ग्रामाद्दूरं निन्ये।

सम्प्रति सेनासु प्रावर्द्धत तुमुलम्। मेदपाटीयाः पराभवमवापन्। सहस्राधिकाः प्रापुः

परलोकपथिकताम्। अभून्मानसिंहो विजयी। समरे समाप्त एव स हि सर्वतः पूर्वं द्वयोरपि पक्षयोराहतानामुचितपरिचर्या मृतानां सत्करणस्य चक्रे प्रबन्धम्। अद्यावधिजातेषु हिन्दु-मुसलमानसमरेषु सर्वतः प्रथमः सोऽयमेव सङ्ग्रामोऽभूद्यत्र विजयशालिना मुसलिमपक्षेण क्षतविक्षतानां विपक्षीयहिन्दूनां प्राणरक्षायै प्रबद्धं स्यात्।

प्रतापसिंहं पूर्णतया पराजित्य, चित्रकूटे निजवैजयन्तीं निधाय च मानसिंहः सेनयाऽवशिष्टया सह परावृते राजधानीम्। आसीदकबरो दिल्ल्यामेव तदानीम्। मार्गे अप्रार्थिताऽपि स्नेहवशात् प्रहिता सम्राड्वाहिनी मिलिता तस्य, या तत एव परावर्त्य नीता तेन सार्द्धं स्वेन्। अकबरो यदेमं विजयसंवादमशृणोत्तदा धावन्नसौ मानसिंहेन सङ्गन्तुमागादभिमुखम्, तथा चाश्लिक्षत यथैकं पिता विजयिनं प्रियपुत्रमालिङ्गति। यदा स युद्धस्य सर्वं वृत्तान्तमशृणोत्तदा मानसिंहस्य वीरतामुन्मुक्तहृदयेन प्राशंसीत्। वार्ताऽपि सेयं सत्यैवासीत्। पर्वतप्रान्तेऽवस्थितस्य मेदपाटस्य विजयो मोगलसेनाया नासीत्कथञ्चिदपि सुकरः। सेयं मानसिंहस्यैव वीरतासीद्यया तदिदं दुष्करमप्यकारि।

मानसिंहेन समये विदितमासीद् यद् द्वितीयो मोगलसेनापतिरस्मत्सैनिकानपि निहन्तुमाज्ञापयत्समरे। तदिदमवगत्य सुतरामकुप्यन्मनस्वी मानसिंहः। यदा ह्यकबरस्तस्मै पुरस्कारं प्रादात्तदा निर्भयमवादीन्मानसिंहः-'श्रीमन् ! पुरस्कारस्तु राजपुत्राणां कृते सोऽयमेव यद्दीयेत तेभ्यो मृत्युः ! एतस्य स्वीकृतिरपि प्रादीयत पूर्वम्।'

अकबरः सासूयमुदतरत्- 'अहो किमिदममङ्गलमाभाषसे। मृत्युः स्याद् भवतः शत्रूणाम्। त्वं जीव, सहस्रं शरदश्च जीव। भवद्भुजयोरेव मे साम्राज्यमवलम्बितम्। सत्यमहं वच्मि- भवदुपकारान्नाहमाजीवनमपि विस्मरेयम्। अत एव किञ्चिदिमं पुरस्कारं मे कृतज्ञतास्मारकरूपेण स्वीकर्तुं प्रसीद।'

निःसाध्वसमुक्तं मानसिंहेन-'एकस्य मुसलमानशासकस्य मुखाद् हिन्दुरेको, यो हि तस्य विजये प्रधानसहायकोऽभूद् यद्विधस्याऽऽदेशस्याऽऽशां कर्तुं पारयते सा ह्याज्ञा साम्प्रतमेव उदयपुरविजये प्राप्ता मया, किमधुनापि किञ्चिदन्यदवशिष्टम्?'

वराकोऽकबरो नाद्यावध्यपि किञ्चदवाबुध्यत, चकितोऽवोचत सः- 'किमिदमाभाषसे, किं काचिदघटत दुर्घटना? यावत्कालं नावबोधयसि मां सर्वं वृतं, न तावन्मे हृदये निश्चिन्तता।'

सम्राजो निर्मायमन्तःकरणं विदित्वा समग्रमपि वृतान्तमवाबोधयन्मानसिंहस्तम्। श्रुत्वैवाऽकबरः परमं प्राकुप्यत्। मध्येसभमेव मुसलमानसेनापतिमिमं निजपदतः प्रच्याव्य क्रूरतरं दण्डयामास। स्पष्टतरं घोषयामास-'यो मे शासने दूषितानेवंविधान् भावान्प्रसारयितुं प्रयतेत देशद्रोहिणस्तस्य जीवनं धनं च मे निकटे भूरि सङ्कटे पतेदिति सर्वैः सर्वदा बोद्धव्यम्।' मानसिंहं चावोचत्'एतदद्य सूचयित्वा भवता मे भविष्यदर्थे सावधानता विहिता। अहं निश्चितं विश्वसिमि। यन्मे राज्ये नैवंविधा दुर्घटना पुनः संघटेत। यदापि हिन्दून् प्रति मुसल्मानस्य

कस्यचिद्दुर्व्यवहारं भवान् शृणुयात्तत्कालमेव निस्संशयं मां सूचयेत्। प्रिय मान ! सम्प्रति स्वीकुरू मे तदिदं प्रणयोपायनम्।'

मानसिंहः प्रसन्नमुद्रया परःकोटिमुद्राणामुपहारमिमं स्वीचक्रे ।

## ( ७ )

## ताटस्थ्येन सम्मुखसमरे

राणाप्रतापः पराजयमिमं हृदयकण्टकमिव न शशाक विस्मर्तुम्। शक्तेः सञ्चयेऽपि मुहुर्मुहुरसफलता, स्त्रीपुत्रादीनां वनाद्वनमाहिण्डनम् ,वन्यफलैर्जीवनं चेत्यादि कियद्वा तस्य सह्यं स्यात्? अत एव विवशतयाऽकबरस्याधीनतां प्रत्यभिमुखीभवन्नपि मन्त्रिणो भामाशाहस्याभूतपूर्वेण त्यागेन प्रोत्साहितः पुनरसौ सैन्यसङ्ग्रहमकरोत्। देशभक्तो भामाशाहः सर्वामप्याजन्मसञ्चितां सम्पत्तिं समार्पिपत् स्वामिने। सम्प्रति पर्वतनिलया भिल्लादयोऽपि प्रतापस्य सेवां स्वीचक्रुर्येषामद्भुताऽऽसीत् क्षमता शरसन्धाने। एवं नवीनशक्तिसञ्चयेन शनैः शनैरसौ अपहारितानि निजस्थानानि पुनरधिचक्रे। पुनरस्य प्रभावस्तत्प्रान्ते परितः प्रासरत्।

यथासमयमेव संवादः प्राप्नोन्मोगलराजधानीम्। विषीदन्नकबरः पुनराह्वयन्मानसिंहम्। मानसिंहः सर्वमिदमवगत्याऽवोचत्–'निःसंशयं प्रताप एको वीराग्रणीः। तस्य शौर्यं देशाभिमानं च प्रत्येकं मेदपाटीयः पूजयति। स यत्कर्तुमिच्छति नाऽसम्भवं तत्। '

मानसिंहो मुसलमानसेनापतेर्हिन्दून् प्रति दुर्व्यवहारं नाद्यापि व्यस्मरत्। तस्यासीदभिलाषो यद् अस्मिन्वारे कञ्चिद् यवनमेव प्रेषयेदकबरो येन मे साहाय्यस्य शौर्यस्य च तारतम्यं परिचिनुयादसौ। साम्प्रतं त्विदमपि परिज्ञानं नासीत्कस्यचिद् यत्प्रतापः कस्मिन् स्थाने तिष्ठतीति। अकबरस्येच्छानुसारं मानसिंह एव गणेषणाभारमिममगृह्णात्। भिल्लानां भयङ्करमाक्रमणम् गिरिगह्वराणां मार्गाणां च विषमताम् अहर्निशं शत्रुभिर्निजपरिवारणस्य भयमित्यादीन्यखिलान्यपि सङ्कटानि विषह्य कठिनतया मानसिंहः प्रतापस्य निवासानुसन्धानमकरोत् किन्तु नासीत्साध्यं तस्य निग्रहणम्। यतः स न्यलीयत कस्मिञ्श्चिद् गिरिगह्वरे।

मानसिंहोऽस्मिन्वारे सैनापत्यायासीत्तटस्थः। अत एवाऽनिच्छन्नप्यकबरः शहबाजखानं प्रधानसेनापतिं नियम्य महतीं सेनां प्रैरयत्प्रतापस्य निग्रहाय। तत्सहायतायै च प्राहिणोन्मानसिंहम्।

शहबाजखानस्य दुष्प्रकृतिं पूर्वत एव पर्यजानान्मानसिंहः। इतः शहबाजोऽपि भगवन्तदासमानसिंहयोः प्रत्येकयुद्धविजयैः सम्राट्समादरैश्चान्तरीर्ष्याकलुषः प्रासीदन्मानसे यन्मानसिंहः साम्प्रतं सहायकः केवलं , न नाम नायकः सेनायाः। किन्तु मानसिंहः सत्यमासीन्मित्रं

सहायकश्च सम्राजः। अतएव क्षत्रियाणां मनोवृत्तेरनभिज्ञस्य शाहबाजख़ानस्य समये समये जायमानं प्रमादं स मुहुर्मुहुरसूचयत्सत्यपि तस्य कोपे। किन्त्वन्ते सेनापतेः कुटिलमनोवृत्तिः प्रतिपदमरुन्तुदाऽभून्मानसिंहस्य। अतएव तत्र निवासमयशस्करं भावयन्नवोचदेकान्ते सेनापतिम्– 'सेनापतिमहोदय! प्रतिक्षणं नास्य विस्मरणं स्याद् यदस्मिन्वारे यैः सह संयोद्धुं श्रीमानुपगतस्ते किल लोकातिशायिनः प्राणिनः। तेषां जीवनचर्यां प्राणातिशायि साहसं चालोक्य प्रपलायिष्ट वीरमानिनामपि साहसम्। एतदुपरि साम्प्रतं ते निजमातृभूमेर्भक्तिभावेनाऽनुप्राणिताः प्राणानपि तृणीकृत्याऽन्तिमयुद्धाय सन्नद्धाः। एवमवस्थायायां स्वल्पेऽप्यनवधाने विजयाऽऽशायाः स्थाने प्राणाशापि भवेदुर्लभा। नैवं भवेद् यत्किञ्चिन्मात्रप्रमादादेव अद्यावधिसमधिगता पूर्वाऽपि सफलता विफला भवेत्। अहं नैकवारम्, अपि तु वारं वारं भवतः प्रमादमसूचयम् किन्तु शोधनस्य परिवर्ते क्रोधनभावमुपगतो भवान्। अतएव नीतिमिमामनभिरोचयन्नहं नाऽत्र मनाक् तिष्ठामि। हितसूचनामिमां न विस्मरेद्भवान्' इत्युक्त्वैव मानसिंहो निजपित्रा सह परावर्तिष्ट समीपे सम्राजः।

शहबाजः प्रासीदन्मानसे यत्कण्टको व्यपगतः, प्रतापविजयस्य यशोभागहमेव साम्प्रतं भवेयम्। सूचयेयं सम्राजे यत्सोऽयं विजयो हलदीघाटीविजयादपि महत्त्वशाली। प्रारभ्यत सङ्गरः। प्रतापः पुरातननिजनीतेः प्रत्यकरोत्पुनरावृत्तिम्। अर्थात् पर्वतगहने प्रतिपन्थिनं परिवेष्ट्य स्वयमसंस्पृष्टः पर्यगच्छत्। पर्वतमार्गाणामनभिज्ञः शहबाजस्तत्रैव परिभ्रमन्महता कष्टेन सहायकस्यैकस्य द्वारा प्रेषयामास सहायताप्रार्थनां सम्राजः समीपे। मानसिंहात्सर्वं वृत्तमवगत्याऽकबरः पूर्वमेवासीदसन्तुष्टः, साम्प्रतं संवादेनाऽनेन समकुप्यत्सुतराम्।

किन्तु निजस्याऽनिच्छायामपि साम्राज्यस्य लज्जारक्षायै प्राहिणोद्विवशः सैन्यमकबरः। परं व्यर्थमखिलम्। असम्भवमासीत्साम्प्रतं शहबाजस्य कृते प्रतापस्य निग्रहणम्। क्षत्रियमल्लानां भिल्लानां भल्लानां चोभयेषामेव मर्मणि मर्मणि परिचितोऽसौ सम्प्रहारे न प्राप पलायनस्यापि पन्थानम्। अभूत्पराजयो मोगलानाम्। हारितानि निजदुर्गाणि पुनः प्रत्यधिकर्तुं प्रारेभे राणा। कुटिलाधिराजः शाहबाजः साम्प्रतमजानान्मानसिंहस्य शौर्यं च शिक्षां च। मोगलसाम्राज्यमात्रे मानसिंह एवासीद् राजपुत्रवीराणां गतेर्मतेश्च विज्ञाता। मेदपाटक्षत्रिणां नीतेस्त्वेकमात्रमासीदसावेव परीक्षानिकषः। प्राज्येऽपि मोगलसाम्राज्ये न कश्चिदासीदेवंविधो यः सम्मुखसमरे पराजयेत प्रतापम्।

## ( 8 )

## भारतस्य पश्चिमोत्तरप्रान्ते

जनितातुलहर्षाः समागमन्वर्षाः। वियति विशङ्कटा नीरदघटा अपूर्वामेवच्छटां

विच्छुरयामासुः। कादम्बिनीमधिरुह्य नयनोन्मादिनीमवलम्बते स्म शोभां सौदामिनी। प्रवहन्तीनां सरः–स्रवन्तीनां तटे हरितहरितोद्यानानां निकटे सप्रमोदमनुभवन्ति स्म शोभामिमां भ्रमणविलासिनः। सम्राडकबरोऽपि मित्रैः सह समवस्थितो विलोकयति स्म परितो विसारिणीं शोभामिमाम्। भारतस्य प्राकृतशोभया विवशीकृतहृदयो नियोजयामास वाचमिमामसौ सत्यमीश्वरो भारते यामनुकम्पां विदधे न सा विविधेष्वप्यन्यदेशेषु। हरितहरिता भूमयः प्रवहन्त्यो नदी–नालिकाः , सुन्दरसुन्दरा गिरिकन्दराः क्वाऽन्यस्मिन्देशे विलोक्येरन् भारतमन्तरा।

**मान०** – भवेयुरन्येऽपि देशाः सुन्दराः, किन्तु कस्मिंश्चिद्देशे काचिन्न्यूनता तर्हि काचिदधिकताऽपि। कुत्रचिज्जलस्यैकान्तमभावस्तर्हि कस्मिंश्चिद्देशे जलस्यैव सर्वतः प्राचुर्यम्। परं भारते प्राकृतसौन्दर्यस्योल्लासकाः सर्व एवावयवाः समानरूपेण प्राप्येरन्। अत एव भारतमिदं भूखण्डेऽप्यखण्डे परिगण्यते तावदप्रतिमम्।

समभूत्सम्राजः प्रस्तावः–'अस्मिन्मानसोन्मादके रम्यसमये गानमावश्यकम्'। तत्कालमाकार्यन्त देशदुर्लभा वेशवनिताः। अभूद्रम्यैर्वाद्यैः सुमधुरसङ्गीतम्। पूर्वं तु निसर्गमधुराः स्त्रियस्ततोऽपि वाराङ्गनास्तत्रापि प्रणयगीतिः, तदुपरि प्रस्फुरन् ऋतोः प्रभावः। सर्वैरपि सम्भूय प्रमदमुपनीतं मानवमनः। सहैव प्रमोदबन्धुरा सुरापि स्फटिकभाजनेष्वितस्ततः समखेलत्। सर्वैरमीभिरुपकरणैरदम्योत्साहसमुत्तेजितस्तानसेनोऽपि विरहवेदनागीतिमेकामकस्मादगायत्। गानं किमासीत्, अलौकिकः सम्मोहनमन्त्रः। मेघा अवर्षन्, प्रचुरं चावर्षन् गगनतलान्नयनयुगलाच्च।

विनोदस्यास्याऽनन्तरं प्रारभ्यत भोजनम्। भोजने नानाविधव्यञ्जनान्यन्तरा समभूवन् पुष्कलानि फलानि। विलम्बपर्यन्तं समभूवन् विश्रम्भसंलापाः सहैव भोजनं चापि। न्यवर्तयश्चिरात्पानभोजनम्। ततो निवृता एव जनाः स्वस्वावासोन्मुखा अभूवन्। समग्रदिवसस्य परिश्रमः सर्वानप्यकरोद्विवशान्विश्रमाय। परावर्तन्त गृहान् सर्वेऽपि। मानसिंहः अन्ये च केचित्परिगणिताः समतिष्ठन्त सविधे सम्राजः। जनान्तिकमालोक्य मानसिंहः समवोचत्– 'आसीन्ममेच्छा यदस्मिन्प्रमोदसमये न समागच्छेत्कश्चिद्विघ्नो विनोदे भवतः, किन्तु सहसा समुपस्थितया विकटपरिस्थित्या भवता सह मन्त्रणार्थमहमापादितोऽस्मि विवशः। चेदप्रियं न प्रतीयेत तर्हि निवेदयेयम्।'

''मानसिंह! यदि कार्यमावश्यकं तर्हि ब्रूया निःसंशयम्। संसारः शक्नुयात्कामं वक्तुमकबरः कामुको विलासी चेति,वक्तु नाम सः। किन्तु कामुकता विलासिता वा मे साम्राज्यहितसाधने नोपनेतुं शक्नुयाद्विघ्नम्। साम्राज्यनिर्माणे तस्य हितसम्पादने च पारयाम्यहमश्रान्तं परिश्रमितुम्। ब्रूहि तूर्णं ब्रूहि किं वृत्तमिति।''

**मान०** (आत्मगतम्)सम्राजः स एवाऽयं गुणो विवशीकृतवान्मां मित्रतामवलम्भितुम्। गीतविलासादिकं प्रियमेतस्येति सत्यम्। किन्तु नानेन सोऽयं साम्राज्यमपवर्जयति। यदापि

विपदमुपगतां भावयति, निवारयति तामेतां सर्वप्रयत्नैः। (प्रकटम्) संवादो मह्यमावेदितो यद् भवतः सापत्नेयो भ्राता मिर्जा मोहम्मदहकीमः पञ्चनदसीमाप्रान्ते भयङ्करमाक्रान्तवान्। प्रसृत्य चाग्रे सोऽयं साम्राज्यमपि दोग्धुं कामयते। साम्प्रतमेवाऽप्रतिकृतः प्रवृद्धो विह्नरिव निरूपायो भवेदिति जाने।

**अक०** – (आश्चर्यमुपगच्छन्) हन्त नासीदियमाशङ्का मे मिरजातः। तत्साहाय्येन पश्चिमप्रदेशानधिकर्तुमहमैषिषम्। अस्तु, निर्दिश कञ्चिदुपायम्।

**मान०** – अभियोक्तर्णिां समीपे सेनासम्प्रेषणामन्तरा कोऽन्य उपायः? अवश्यं काचित्सुशिक्षिता योग्येनाधिकृता सेना तत्र नियोज्या। नान्यथा सीमाप्रान्तस्य निर्भयता।

**अकबरः**– मन्त्रोऽयमवश्यं हितकृत्, किन्तु एतावद्दूरं को वा सोत्साहः प्रेष्यतामित्येव विचारणीयम्।

हिन्दुविद्वेषिणो यवनान्न विस्मरति स्म कदाचित् मानसिंहः। तेषां सर्वदार्थं मुखमर्द्दनं वाछन्नवोचत्–'अस्मिन्वारे त एव प्रेषणीया ये मुहुः कथयन्ति यद्विजयकर्तव्यानि सर्वाणि मानसिंहायैव दीयन्ते, वयं प्रतीक्षयैव निराशास्तिष्ठामः,' इति ।

**अकबरः**– (सस्मितम्) वीराग्रणीर्मान! मानयाम्यहं यद्भवन्तमन्तरा नान्यः कार्येऽस्मिन् सफलः स्यात्। किन्तु भवदिच्छानुसारं श्व एव साम्राज्यसभायां प्रस्तावमिममुपस्थापयिष्ये। न मे कस्माच्चिदाशा। त्वं सन्धेक्षि जातुचिद् यदहं भवद्गुणान्न परिचिनोमि, अत एव न प्रकाशयामि मुहुः। किन्तु भवद्गुणैः प्रकामं वशीकृतस्तेषां कीर्तनमपि प्रभावमन्दीकरणं जाने। अस्तु, श्वस्तदिदं निर्णीयेत। सम्प्रति विश्राम्यतु भवान्।

अभूत्परदिने साम्राज्यसभा। उत्सवनिसर्गा यवनास्तद्दिनेऽपि प्रमोदमहोत्सवं भावयन्तः समुदग्रश्रृङ्गाराः समाजग्मुः सभायाम्। किन्तु समये स्वयं सम्राडेव सीमाप्रान्तस्य परिस्थितिं प्रकाश्य–तत्र प्रेषणीयायाः सेनायाः कृते समुपस्थितेषु सदस्येषु सेनापतेः कस्यचिद्वरणं सूचयामास। किन्तु प्रस्तावं श्रुत्वैव व्यलोक्यत सर्वतो निस्तब्धता। वीरताप्रकाशनाय चिरायोत्कण्ठितानां न कश्चिन्निश्वासमपि जग्राह। श्रीमता मानसिंहेन यदा दृष्टं न कश्चिद्वीरः प्रगल्भते साम्राज्यकार्याय, तदा निर्वीरमुर्वीतलमिति श्रवणात्पूर्वमेव सविनयमुत्तस्थौ स्वस्थाने।

अकबरः सर्वां स्थितिं प्रत्यक्षीकृत्य प्रकाशमब्रवीत्– 'अद्य मन्ये सर्वैरवगतं स्याद्यन्मानसिंहः किमिति सर्वतोऽधिकं सम्मानमासादयति। अहमाशासे ये स्पर्द्धाशीलास्ते समाद्रियेरँस्तस्योदारतासहचरीं वीरताम्। ये तु साम्प्रतमपि विप्रतिपद्येरंस्ते युद्धयात्रायामस्यां सम्मुखमागत्य निवर्तयेरन्।' अदृश्यत तदनन्तरमपि नीरवता।

तस्मिन्नेव समये मानसिंहं पञ्चाम्बुराजधान्याः (लाहोरस्य) प्रधानशासकं चकार, राजकुमारस्य मुरादस्याधीनतायां नियमयामास चैकां वाहिनीं तस्याऽधिकारे। प्रसन्नतया

स्वीकृतेऽस्मिन् सम्माने मानेन, व्यसर्ज्यत सा राजसभा।

एकस्य वर्षस्य पूर्तेरभ्यन्तरमेव मानसिंहेन सेना सा स्वाभीष्टानि सर्वाण्येव कार्याण्यशिक्ष्यत। प्रान्तीयमार्गाणां भयानकता पूर्वमेव बोधिता तेन सैनिकेभ्यो येन समये ते तदर्थं सन्नद्धाः स्युः। शुभे मुहूर्ते प्रातिष्ठत मानसिंहः। स्वयमकबरस्तस्मै विजयमाल्यमर्पयामास। कठिनमार्गानुल्लङ्घयन्ती प्राप लवपुरं मानसेना। तस्याः पुरस्तादेव मिर्जाकर्णयोः प्रययौ मानसिंहस्य वीरता च यशश्च। मिर्जा राज्यादिप्रदानद्वारा मानप्रलोभनाय स्वयमुपययौ तस्य स्कन्धावारे। किन्तु मानसिंहो नैकामपि तत्कथां कर्णे चक्रे। स्पष्टमनेनोक्तं यदि कुशलं वाञ्छसि तर्हि सह मया प्रतिष्ठस्व सम्राजः समीपे।

एष्वेव दिनेषु सिन्धुप्रान्तीयाच्छासकादप्यसन्तुष्टः सम्राट सिन्धुप्रदेशस्यापि नायकं मानमेव निर्ममौ। स्वयं चाकबरो महतीं चमुं कर्षन्समाययौ सिन्धम् । द्विगुणितोत्साहो मानः सम्प्रति 'काबुल' प्रदेशोपरि चक्रेऽभियानम्। सैनिकाः 'काबुल'नदीलङ्घने इतस्ततश्चक्रुः, किन्तु तुरगारूढः श्रीमानःस्वयं पुप्लुवे नद्यां सर्वतः पूर्वम्। सर्वापि सेना निःशब्दं तमन्वगात्। परपारे गत्वा निबबन्ध महासमरम्। समग्रोऽपि काबुलप्रदेशो मानसिंहस्याधीनतां स्वीचक्रे। शत्रवः साहसमिदं दृष्ट्वा कान्दिशीकाः पलायिषत।

सुप्रसन्नः सम्राट् पुरुषपुर (पेशावर) प्रान्तस्य सीमाप्रान्तस्य चापि शासकं मानसिंहं नियम्य परावर्तिष्ट निजराजधानीम्। न नाम केवलं विजयमात्रेण कस्यचिद्देशस्य शासनं सम्भवति। असभ्याः पर्वतवासिनो यवनाः(अफगान) नित्यनवीनैरुपद्रवैः शासकान्पीडयामासुः पूर्वम्। किन्तु 'शठे शाठ्यं' समाचरेत् इति नीतिं प्रयुञ्जानो मानो देशमात्रे तादृशीं क्रूरशस्त्राहतिं प्राचारयद्यां दृष्ट्वा 'त्रायस्व त्रायस्वे'' त्याक्रोशन्तः शरणमुपययुस्तेऽपि। ततः समयोचितं बुद्ध्वा कांश्चिच्चक्षमे, कांश्चिच्च प्राणदण्डेनादण्डयद् येन सर्वेऽपि क्रूराः समभूवन्नतमस्तकाः।

तदेवं तेषां दुष्टां वृत्तिं दमयित्वा शनैः सुशासनेन सर्वांस्तान् वशे चक्रे। यत् सुखं या च शान्तिर्यद्विधा च सम्पत्तिस्तैरस्मिन् समयेऽनुभूता न सा तैर्यवनशासकानां शासने दृष्टा पूर्वम्। अतएव सुखशासने वसन्तः सर्वे मानवगुणगीतिमगायन्मानसेन।

## ( 9 )

## सिद्धान्ते निर्भयता

अकबरो न मेने केवलं राजवृद्ध्यैव स्थिरताम्। स हि निश्चितशासनपद्धतिं कर-व्यवस्थां मुद्राप्रचलनं नानाविधपरिमाणादिनियमनं चापि प्राचारयद्धारते राज्ञष्टोडरमल्लस्याभिमतेन।

किन्तु विना एकामादर्शं विना चैकं धर्मं यत्नशतैरपि न साध्यं सुदृढमेकं राष्ट्रमिति चिराद्विचारेणाऽसौ निरधारयत्। अत एव आर्य–जैन–बौद्ध–ईसाई–इसलामप्रभृतिसर्वधर्माणां विदुषामाह्वयदसौ समये समये सभाम्। सममानयच्च सर्वान्। अन्ते फैज़ी–अब्बुलफ़जलयोर्मन्त्रणया सर्वधर्माणां मूलसिद्धान्तान् सङ्गृह्य नवीनमेकं धर्मं निर्ममौ यस्यासीन्नाम 'दीने इलाही'। इदानीं जनेष्वेतस्य प्रचारमचिन्तयत्। अब्बुलफज़ल फैजी चेति द्वावपि सर्वतः प्रथमस्य दीक्षामग्रहीषाताम्।

सर्वं भारतमभिव्याप्य स्थिते हिन्दुधर्मेऽस्य सम्प्रदायस्य प्रवेशं वाञ्छन्नसौ मनसि निश्चिकाय यदि भगवन्तदासमानसिंहौ मतमिदं स्वीकुर्यातां तर्हि सर्वस्यामपि हिन्दुजनतायामेतत्प्रवेशस्य द्वारमनायासमुन्मुक्तं भवेत्। अतएव समागते मानसिंहे मर्मस्पर्शिभिर्वाक्यैर्भारतीयानामसंघटितावस्थयाऽनैक्यजनितां दुर्व्यवस्थामवर्णयत्यसम्राट्। मानसिंहेन सरलतया प्रत्युक्तम्–''एतस्योपायः केवलमेकमात्रं सोऽयमेव यत्सुराज्ये(सुशासने)न भवेत्कदाचिदप्यन्तरम्। शासितानां मनसि कल्पनापि नोदयेद्यत् शासनव्यवहारो द्वैविध्यदूषितोऽस्तीति।''

**अकबरः** – कथमिदं तावत्कालं सुशकं यावत्कालं भारतीया एकधर्माणो न भवेयुः। ''अपि श्रीमानखिलान् मौहम्मदान् सम्पादयितुं वाञ्छति ?''

''इदं तु मादृशैः सहस्रसम्राड्भिरपि न साध्यम्। यथैव 'सर्वे मुसलमानाः स्यु' रिति चिन्तनं तथैव पतनमिति निश्चितम्।''

''तदा पुनः ?''

''अहं वाञ्छमि सर्वेऽपि सर्वेषामेव धर्माणां तादृशान्मूलसिद्धान्तान् मानयेयुर्यैर्धर्माणां मतानां च मिथो भेद एव न प्रतीयेत। 'दीने इलाही' सम्प्रदाये सर्वलोकानां रूचेरनुसारं पर्याप्तो नूनमवकाशः। अहमिच्छामि भवानपि तन्मतदीक्षितो भवेत्।''

''इदं निश्चितं यद्भारते 'दीने इलाही' न कदाचिदपि प्रचलेत्। स्वार्थसाधनाय भवतश्चाटुकारितया कतिपये जनाः स्वल्पसमयाय चेत्स्वीकुर्युस्तदाऽपि किमनेनाऽस्य प्रचारः सम्भवी ?''

''अहं त्वसम्भवं न मन्ये''

'' सत्यां वार्तां चेदाकर्णयितुमिच्छन्ति भवन्तस्तर्हि असम्भवम्''

''किमिति ?''

''अस्य मूलं स्वार्थोपर्यवलम्बितम्। स्वार्थसाधनं च सावधिकम्।''

''किमिति ?''

''कथमेतत्? अहं तु भारतस्याऽसंघटितामवस्थां भावयन् निःस्वार्थं

स्थापयितुमिच्छाम्यमुम्।''

''ईश्वरभावनापूर्वकं सूक्ष्मविचारेण श्रीमन्त एव गवेषयन्तु यद् निभृतनिलीने हृदयस्यान्तःकोणे भावनाया अस्या अस्फुटरूपेण जन्मजातं न वा यदहं सुशासनेन सह एकधर्मप्रचारणस्यापि श्रेयश्चिरकालायोपार्जयेयम्।''

प्रायः सत्यशीलोऽकबरो नैतस्य समुचितमुत्तरं लेभे ।

## ( 10 )

## काबुलमारभ्य बिहारपर्यन्तं प्रभुत्वम्

अन्योऽदूरदर्शी सम्राट् चेदभविष्यत् काममकोपिष्यत्, किन्त्वप्रियेणाऽप्यनेनोत्तरेणाकबरः प्रसीददन्तःकरणे मानसिंहस्य नैतिकबलमवगच्छन्। अस्तु, आसीत्कुमारो विहारवङ्गयोः शासकः, अत एवोत्तरपश्चिमे सुदृढं प्रबध्य, स्वयमकबरं तन्निरीक्षकं परित्यज्य समागमदसौ वङ्गान्। इतोऽकबरस्य पुरातनशत्रवः उजवेगवंशीयाः सीमाप्रदेशे उत्तरोत्तरमभजन्प्राबल्यम्। तेषां नायकस्याब्दुल्लाखानस्यातङ्कः प्रासरत्समन्तात्। काबुलस्य प्रबन्धकर्ता यो हि मोगलसाम्राज्यसेनाऽऽसीत्स्थापितः स तु न प्राभवत्तस्य निरोधे। किन्तु स्वस्यैव सम्मुखे सीमाप्रान्तस्य तादृशी प्रभुत्वहानिर्नाऽभ्यरोचताऽकबराय। प्रत्येककठिनकर्मणि मानसिंहस्यैवाऽऽकारणं तु सङ्कोचादिव नैच्छदकबरः। किञ्च मानसिंहस्य परोक्षे वङ्गेष्वपि नित्यनवीनानामुपद्रवाणामासीदाशङ्का। अत एव मानसिंहं तत्रैव निधायाऽन्यस्य कस्यचन शासकस्य प्रबन्धं यावद्विचारयति तावदेव काबुलप्रबन्धकर्तुर्वृद्धस्य मिर्जामुहम्मदहकीमस्य निधनवृत्तमुपागात्कर्णयोरकबरस्य।

इदानीं काबुलस्य सीमाप्रदेशस्य चोभयोरेव सुदृढः शासको नाभूत्तस्य दृष्टौ मानसिंहं विहायाऽन्यः कश्चित्सेनापतिषु तस्य। अतएव विवशोऽसौ मानसिंहमाहूय शासकमकरोत् काबुलप्रदेशस्य। किन्त्वत्रागत्य शासनव्यवस्थां दृष्ट्वा च मानसिंहस्य दुःखमभूत् घृणा च। दुःखमिदमासीद् यद् गमनसमये मानसिंहोऽस्य देशस्य तादृशीं व्यवस्थां स्थिरामकरोद् यत्तदनुसारं यदि मिर्जामुहम्मदोऽत्र शासनमकरिष्यत्तर्हि न कश्चिदसन्तोषः प्राभविष्यत्। किन्तु मिर्जा शासनप्रबन्धं किं जानीयात्? कुत्रचिद् बलात्कारं कुत्रचिच्च नम्रतां क्वचिच्च लोभं प्रयुञ्जानो येन केनचित्प्रकारेणाऽसौ दिनान्यत्यवाहयत्। शासनस्य या प्रतिमा सा क्वासीत्तस्मिन्?

अतएव सर्वतः पूर्वं मानसिंहः शासनप्रबन्धमधात्सुव्यवस्थितम्। नास्मिकन्मणि तस्याभूत्काठिन्यम्। विभिन्नविभिन्नप्रदेशेषु शासनव्यवस्थां नानाधा प्रयुञ्जानस्य बाल्यादेव

शासकात्मजस्य तस्य, एतद्विषयकोऽनुभवो भूयान्प्रवृद्ध आसीत्। किन्तु मानसिंहस्याऽऽगमने येषां स्वार्थसिद्धौ क्षतिरूपातिष्ठत ते मानसिंहस्य विरोधे षड्यन्त्राण्यरचयन्। प्रजासु बहुलमत्याचरन्,अक्बरपरिपन्थिभिरुजबेगवंशजैः सह सम्भूय राजविद्रोहमुदतिष्ठिपन्। उजबेगसामन्ताश्चाऽऽततायिनामेषां साहाय्येन काबुलविजयस्य लालसामधारयन्। किन्तु न ते मानसिंहस्य नीतिमंशतोऽप्यविदन् वराकाः। मानसिंहेन गुप्तचरैः सर्वत्र ख्यापितं यत्स्वयं सम्राट् विशालवाहिनीमादाय काबुलदमनाय समायातीति। संवादमिमं श्रुत्वैव ये गुप्तशत्रवोऽभूवंस्ते भयाकुला अभूवन्। आत्मरक्षणस्याऽन्यमुपायमवीक्षमाणा मानसिंहात्क्षमायाचनामकुर्वन्। मानस्यैकेनैव कूटप्रयोगेणोपजापपराः सर्वे मानसिंहोसेवायामुपातिष्ठन्त।

गुप्तगवेषणया विदितं मानसिंहेन य'त्फरीदूँ' नाम्न उजवेगवंशीयस्य दुर्मन्त्रणया सर्वोऽयं काण्डः समुदतिष्ठत् अतएवाऽकबरविरोधिनो मिर्जाहकीमस्य तनयैः सार्द्धं फरीदूमपि रावलपिण्डीं प्रैषयत्सम्राजः समीपे, यत्र विरोधिनां दण्डेन सह सम्राट् फरीदवेऽपि प्रादाद्घोरामाज्ञां यदितः परमसौ न दध्यात्पदं भारते। देशनिर्वासितोऽसौ शेषं जीवनं धर्माचरणे सफलयितुं प्रातिष्ठत 'मक्कां' प्रति। एवं चतुःपञ्चवर्षैः काबुलप्रान्ते पुनः सुखशान्तेर्निवासोऽभूत्।

समापतन् सीमाप्रान्तमाक्रमितुं भूयस्यो जातयो युद्धाय सन्नद्धाः, किन्तु हिमाचलनिरुद्धा वात्या इव निराशास्ताः प्रत्यावर्तन्त तस्मिन्काले। तासु प्रबलं सन्नह्यमानानां पठानानामाक्रमणमभूद्दुःसहम्। आसीन्मानसिंहसंवर्द्धितस्य मोगलसाम्राज्यस्य ईरानराज्येन राजनैतिकःसम्बन्धः। चक्रुर्गतागतं द्वयोरपि राजदूताः परस्परराज्यसीमायाम्। प्रायासीदीरानराजदूतानां गमनमार्गः सीमाप्रान्तस्योपद्रवाकुले प्राञ्चले भूत्वा। अत एवासीत्तेषां रक्षाभारः काबुलशासकोपर्येव तस्मिन् समये। प्रत्येकवारे मानसिंहात्पराजयं लभमानांः पठानाः ईरानराज्येन सह मोगलानां विरोधमुद्भावयितुमेकदा तन्मार्गेण गच्छन्तमीरानराजदूतं बलाद् रुरुधुः। आसीत्तेषां नायकः करालाकृतिर्जलालाभिधानः। किन्तु संवादमिममधिगत्यैव पठानशठान् दण्डयितुं समनह्यन्मानसिंहः पूर्णतया। स हि सैनिकान् सहाऽदाय स्वयमुपययौ संयुगस्थले। ततः पठानान् पराजित्य प्रेषयामास यथास्थानं बन्धनमुक्तं राजदूतमिमम्।

सम्राडपि पठानपराभवाय प्राहिणोत्पृतनया सह बीरबलं काबुलम्। किन्त्वपरिचिते विकटमार्गे विवशीकृतमिमं न्यबर्हयन्त हन्त पठानशठाः। घटनयाऽनया नितान्तमुद्वेलितो मानसिंहः किञ्चिदेव सैन्यं सह नीत्वा प्रययौ पठानशठानुन्मूलयितुम्। तत्र बभूव कियन्ति दिनानि घोरजन्यं पठानानां भिन्नभिन्नैर्दलैः। अन्ते जीवग्राहमगृह्यत नितरामरालाऽऽचरणोऽसौ जलालाह्वयः। विजयास्यास्य तावान्प्रभावः प्रासरत्परितो यदेतदुत्तरं चिरं यावन्नोत्थापयामासुर्मौलिममी न केवलं पठानपिशुना एव, अपि तु प्रकामं प्राकम्पन्त दारुणा दस्युजातयोऽप्यखिलाः। प्रामोदत प्रकाममनेन विजयेन सम्राडकबरः। व्यपादिशच्चामुं विजयम् 'फतह अजीम' (सुमहान् विजयः)इति नाम्ना । प्रासिध्यत्प्रशंसाऽस्य परितः, प्रकाण्डविजयस्य। अन्तरीर्ष्याकषायिता अपि ये तावदशृण्वंस्तेऽप्यन्तर्भयम्, बहिश्च श्रद्धामधारयन् मानसिंहाय।

महाराजो भगवन्तदासः समभूत्साम्प्रतं जाबुलिस्थानस्य शासकः। शीतप्रधानमिदं स्थानमुष्णदेशवासिनां नासीदनुकूलम्। अत एव महाराजस्यास्वास्थ्यमालोकयता सम्राजा जीवनशेषं शान्तिपूर्वकमनुभवितुं व्यसर्ज्यत सादरं महाराजो निजराज्याय। अशान्तिबहुलेभ्यो राजनीतिकार्येभ्यः साम्प्रतमुपरामादेव पितुः सौख्यमुपतर्कयतः कुमारस्यऽप्यासीत्सोऽयमेवाभिलाषः। अत एव महाराजं निजराजधानीं प्रापय्य न्ययुज्यत नियमानुसारं तत्स्थाने कुमारो मानसिंहः। किन्तु नासीदस्यापि प्रकृतयेऽनुकूलं स्थानमिदम्। अत एव सम्राजं प्रबोध्य पुनर्मानसिंहो विहारवङ्गयोरभूत्प्रधानशासकः । आसीदकबरः शीघ्रातिशीघ्रमधिकारपरिवृत्तेर्विप्रतीपः,किन्तु साम्प्रतमपि पूर्णतयाऽनविकृतेषु वङ्गेषु पठानादीनामुपप्लवेभ्यो मानसिंहमेव रक्षणसमर्थं सम्प्रधार्य समनुमेने तथा सम्राट्।

अस्तु, हाजीपुरे पाटलीपुत्रे च कञ्चित्कालं न्युष्य मानसिंहः समग्रामपि देशस्य परिस्थितिं पुनरेकवारं पर्यज्ञासीत्। राजनीतिमर्मसु तस्मिन्काले नितरामद्वितीयोऽसौ अद्यावधिजातेनाऽनुभवेन सुदृढं निश्चिकाय यद्यावत्कालमिह सर्वदाप्येका सुदृढा सेना न निवसेत्तावन्नात्र भवेच्छासनं सुदृढम्। सेना चेयं न भवेदत्रत्यानामधीना। अनेन हि नित्यनवीनानामुपद्रवाणामुद्भवः। अत एव सर्वं सम्प्रधार्य चिरात्सम्परीक्षितान् निजसैनिकानस्मिन्प्रान्ते सेनाधिकृतान्नियमयामास। आसन्नेते प्रायेण कच्छवाहराजपुत्राः। सेनायामुच्चाधिकारिणोऽप्यमी यदि शीघ्रशीघ्रं निजदेशगमनानुमतिं याचेरंस्तदापि शासनव्यवस्था न भवेद्यथामनीषितं सुस्थिरा। अत एव सुबहु संविचार्य तेभ्यस्तस्मिन्प्रान्त एव भूस्वामित्वम् (जागीरें)सम्प्रददौ, येन तत्प्रबन्धाय ते तत्रैव सुस्थिरं निवसन्तः सेनापरिचालनं शासनव्यवस्थां च चक्रुर्यथावस्थितम्। सोऽयमनुभवो मानसिंहस्य सफलः पर्यणमत्। सर्वदा वीरसैनिकैर्दमितमूला विरोधिनो न प्रतिकूला भवितुमासादयन्नवसरम्।

सुदृढसेनायाः सार्वदिकनिवासाय साम्प्रतमभूत्सुरक्षितसंस्थानस्याप्यावश्यकता। अकबरं सम्प्रबोध्य उपनिवेशस्यैवंविधस्य नियमनाय समसूचयत्सर्वानपि साम्राज्यव्यवस्थापकान्। सर्वमपीदं सम्मन्त्र्य रोहिताश्वदुर्गं यद्धि तस्मिन्प्रान्ते चिरप्रसिद्धमैतिहासिकं सुदृढं चासीदरो चयदेतस्यैव कृते सम्राट्। सैनिकानां तदधिपतीनां च निवासाय निरमापयन्नवीनानि भवनानि , समशोधयच्च जीर्णानि निवेशनानि। स्कन्धावारस्यास्यातङ्कान्नाश्रूयन्त बिहारवङ्गेषु साम्प्रतमुपद्रवाः। स्थिरसैन्यस्य योजनामिमामभ्यनन्दन्मानसिंहस्य सर्वेऽपि राजनैतिकाः।

## ( 11 )

## प्रबलो हृदयाऽऽघातः

निजराजधानीमवाप्य समभूत्स्वस्थो महाराजो भगवन्तदासः। कुमारस्य काबुलविजयोत्तरं वङ्गविहारयोरपि विजयसंवादं श्रुत्वा न ममौ निजाङ्गेषु हर्षान्महाराजः।

सम्राडकबरोऽपि यदा यदा महाराजेन समगच्छत् समवर्णयत्तदा तदा वीरगाथाः ससन्तोषं कुमारस्य। यदा च सम्राडयमकथयद् यन्मासिंहो यदि न मे सहायकोऽभविष्यत्तर्हि नाहमियन्ति प्रसिद्धयुद्धान्यजेष्यं न चाप्येतावद्विशालसाम्राज्यं समपादयिष्यं तदा महाराजोऽयं कियत्प्रामोदिष्टेति स्वयमनुमातव्यं मनोमार्मिकैः।

अभूतां टोडरमलबीरबलौ महाराजस्य घनिष्ठसुहृदौ। समविचारतया सर्वदा सहनिवासतया च सर्वेऽप्यमी मिथो विरहे विषादमहवन्। गतयुद्धे राज्ञो वीरबलस्य मृत्युसंवादमवाप्य परममखिद्यत महाराजः। तस्य प्रत्युपन्नमतिता सर्वदा प्रसन्नवदनता च बलाद् विस्मारिताऽपि नापयाति हृदयान्महाराजस्य। स हि सर्वदा सम्राजं यथा चिन्तासन्तापान्नैराश्याच्च दूरमवास्थापयत्तथा महाराजमपि प्रामोदयत्समये समये। महाराजो मित्रस्यैवंविधस्य विरहविषादं यावन्न विस्मरति तावदेव द्वितीयोऽप्याघातो बलादपीडयन्महाराजम्। अलभ्यत संवादो यद्राजा टोडरमलोऽपि नाधुनाऽस्मिन् संसारे। टोडरमल्लः सम्राट्सभायामासीदत्यर्थं दूरदर्शी। मोगलसाम्राज्यस्य विजयलक्ष्म्याः परिवृढो यथा मानसिंहस्तथा तस्य श्रीवृद्धेः कारणं राजा टोडरमल्लः। महाराजभगवन्तदासेन विचारितस्य साम्राज्यस्थापनस्य टोडरमल्ल एवासीत् प्रधानसहायकः। विजितेषु प्रदेशेषु यद्यसौ शासनसुव्यवस्थां नाकरिष्यत्तर्हि किं मोगलसाम्राज्यमिदमियत् प्रावर्द्धिष्यत्?

सह सुहृद्भ्यामाभ्यां स्वास्थ्यमप्यहारयन्महाराजाः। प्रत्यैयत तस्य हृदये यन्नाहमधिकदिनानि जीवेयमिति। अतएव मानसिंहमयमाकारयन्निजनिकटे। नानाकार्यव्यग्रोऽपि मानसिंहो यथैवाश्रौषीत्पितुरस्वास्थ्यवृत्तं तथैव प्रापत्पितुरन्तिकम्। निपुणवैद्यानां परामर्शेनाऽकारयत्पितुश्चिकित्साम्। क्षणमपि पितुः सन्निधानमपरित्यजन्नात्मैवोपाचरत्कुमारो जनकम्। किञ्चिच्छान्तिमवाप्यैव महाराजः कुमारमवादीद् गद्गदकण्ठेन– 'समयेऽस्मिन्नन्तिमे भवन्तमवलोकयन्नहं शान्तिमनुभवामि। देशव्यापिनी भवतो वीरगाथां श्रुत्वा हृदयं मे भृशमानन्दितम्। आम्बेरराज्यस्य श्रीवृद्ध्यै यादृशस्य नायकस्यापेक्षा, प्रेषितस्तादृशः परमेश्वरेणेति भृशमभिनन्दामि।'

**कुमारः** –सोऽयं सर्वोऽपि भवदभ्यूहितशिक्षायाः प्रेरणायाश्च परिणामो नूनम्। मीमांसितमहं कार्यं स्वैरमाभूरयेयमित्थमनुगृह्यतामाशीः।

**महाराजः** – कुमार! आस्तां मे कर्तव्यस्य लक्ष्ये द्वे नूनम्। आम्बेरराज्यस्य सर्वविधसम्पत्पूर्णतां विधाय राजसंस्थानेषु महितमहत्त्वापादनम्। भारतस्य विकीर्णां शक्तिं संघटय्य एकराष्ट्रनिर्माणं च। तत एव तादृशीमेव शिक्षां वः समपादयम्। साम्प्रतं भवतोऽध्यवसायेन राज्यमिदं चतुर्गुणं विस्तीर्णं सम्भावितराज्येषु समर्हणीयं च। अग्रेऽहमनुरुन्धे, न जातुचिदुद्देश्येषु प्रमाद्येरिति।

**कुमारः** – गृहीत आदेशः। इतः प्रभृति जीवनस्य लक्ष्यमेवेदं मे भवेत्। विलाससामग्रयो

यथाऽद्ययावन्नासन्मे विमोहनाय, भवेयुरग्रेऽपि तथा।

**महाराजः**– अवश्यमिदमेकवधातव्यम्, अकबरोऽयमद्ययावद् धार्मिकसंयमेन हिन्दुमुसलमानैः समं व्यवहृतवानुदारतया। किन्त्वग्रे यदि प्रमादमापादयेत्तर्हि न मनागपि मर्षणीयमिदम्। हिन्दुत्वगौरवं ध्रुवतारा नो जीवनयात्रायामिति न विस्मार्यं जातु। अस्तु, दिग्दर्शनमलं ते नीतिमते। साम्प्रतं चिराय प्रवसाम्यहम्। कुशली भूयाः।'

इति वदत एव महाराजस्य कण्ठो गद्गदतामापेदे। न्यलीयत चेतसा स भगवद्भावनायाम्। किन्तु क्रमशः श्वासो वृद्धिमापत्। उच्छवयते स्मोदरमपि। अभूद्विषण्णः कुमारः। किन्तु कोऽभ्युपायः। सर्वानेव विलपतः परित्यज्य प्रायासीत्परलोकं भगवन्तदासः।

शोकावेगं निरुध्य विवेकेन समपादयत्सर्वमौर्ध्वदैहिककृत्यं कुमारः। हन्त व्यपगतेष्वप्याशौचदिवसेषु शून्यमिवालक्षयल्लोकालयं कुमारः। अकबरोऽपि दुःसंवादमिममधिगत्य क्षणमस्थात्स्तब्ध इव। आस्तामस्य साम्राज्यस्य स्तम्भौ द्वौ, भगवन्तदासष्टोडरमल्लश्च। द्वयोरप्यनयोर्वियोगेन विकलमिवाऽभावयदात्मानं सम्राट्। कर्तव्यबुद्ध्या प्रणोदितो मानसिंहायाम्बेरराज्यसिंहासनसम्मानं महता समारोहेण प्राहैषीत्। यः समादरः स्वर्गतमहाराजाय समार्प्यत ततोऽप्यधिकं सम्मानं तस्य विधाय किञ्चिदुच्छ्वसितमिवात्मानमभावयत्सम्राट्। अकबरो मानसिंहं समधिगत्य दुःखमिदं विस्मर्तुमपारयत्, मानसिंहश्च पितुरन्तिमैः शब्दैर्व्यापृत्य यथापूर्वं साम्राज्यकार्येषु प्राभवद्विषादमिममपगमयितुम्।

## ( १२ )

## पुनः समराङ्गणे

पितुः परलोकप्रस्थानाद्विहारे शासनसुव्यवस्थानमपूर्णमेव परिहाय प्रययौ कुमारमानसिंहो निजदेशम्। सम्प्रति प्रतिनिवृत्तेन महाराजमानसिंहेन दृष्टं यदितः पृष्ठपरिवर्तन एव विहारे पुनरारब्धमफगानै राज्यावलुण्ठनकार्यम्। प्रान्तेऽस्मिन्वर्तमाना सम्राट्सेना तु पराक्रान्तस्य नायकस्याभावान्न प्राभवदफगानीयानिमान्पराभवितुम्। अतएवाऽत्रागत्य सेनायास्तस्याः भिन्नभिन्नभागेषु संस्थापनं समुचितशिक्षणं च निश्चिकाय, या हि कच्छवाहानां सेना समुचितं विचार्य प्रदेशेऽस्मिन्पूर्वमवास्थाप्यत। किन्तु सम्प्रति सर्वतः पूर्वममीषां विद्रोहिणां दमनमावश्यकं मेने। युद्धतत्त्वज्ञोऽसौ प्रान्तेऽस्मिन्नितस्ततो विकीर्णास्ते यावन्नैकीभवेयुस्ततः पूर्वमेवैकैकशो वशे चक्रे। कार्येऽस्मिंस्तादृशी समीक्ष्यकारिता क्षिप्रकारिता च प्रायोजि यया ह्यञ्जसैव समवापे साफल्यम्। अपरा चेयं युक्तिरवालम्बि यन्महाराजः सैनिकान्सर्वान्प्रकटमाज्ञापयत्– 'यः कोऽपि विद्रोही प्राप्येत विना नियोगं निःशङ्कं निगृह्यतामसौ, गृह्यतां च तत्समीपलब्धं सर्वमपीति।'

अभवत्तत्तथैव। विद्रोहिविलुण्ठने समासाद्यत विपुलं धनम्। किन्तु सर्वमपीदं निजस्य निजसैनिकानां चोपयोगे न गृहीत्वा प्रैष्यत राजधानीमेव।

तदेवं विहारस्योपद्रवान् प्रशमय्य गजनीपुरं वाराणसीं च स्वाधिकारे चकार। निर्ममौ वाराणस्यामेकं वृहन्मन्दिरं दशाश्वमेधघट्टोपरि यस्य नामाभूत्‘मानमन्दिरम्’। विहारविजयस्मृतिं सुस्थिरयितुं वासयामास पाटलिपुत्रसविधे‘वैकुण्ठपुरम्। गुणवशीकृता विहारजनता विजयोत्सवे स्वयमकरोदनेकानुत्सवान् येषां परम्परा प्राचलन्मासपर्यन्तम्। विजयिनो मानसिंहमहाराजस्याक्रियत स्थाने स्थाने सम्मानः, प्रादीयन्त नानोपायनानि। प्राचरत्सर्वत्र विहारे मोगलशासनम्। तत्रापि मानसिंहः सुव्यवस्थया तादृशमेव शासनं प्राचारयद्यादृशन्यान्येषु विजितप्रदेशेषु प्रायोजि। नवीनेन विधानेन प्रमुदिताः प्रजा प्राकीर्तयन्परितो मानसिंहयशः प्रशस्तिम्।

पुनः साम्राज्यविस्तारोपरि दृशमक्षिपन्महाराजः। नासन्मुगलशासनभङ्गाः कलिङ्गाः, किन्तु तत्रोपनिविष्टा अफगानाः प्रायः समाचरन्समये समये विद्रोहम्। कतलूखाँ लोहानी व्यजृम्भत तदानीमफगानेष्वेषु। तत एव तस्यैव प्रतिक्रियां प्राणैषीन्महाराज। स हि किञ्चितसेनां समानाययद्वङ्गेभ्यः, किञ्चिच्च सैन्यं निजसुरक्षितवाहिनीतः संघटय्य समभिससार तदभिमुखम्। वर्दवानस्य मार्ग एव जहानाबादसन्निधौ समघटत तेन सङ्घर्षः। किमासीत्पुनस्तदा? नानाकूटघटनाः समघटयत्कतलूः किन्तु समभूवन्सकलास्ता विफलाः। अकृत्यत कल्मषी कतलूः। मध्येसंयुगं समाप्यत शक्तिरखिलाप्यफगानानाम्।

समयदर्शी कतलूखानस्य मन्त्री कतलूतनयं नज़ीरखानं पितृपदं प्रदाय समबध्यान्मोगल-साम्राज्येन सन्धिम्। किन्तु निर्भयमघोषयन्मानसिंहः- यावत्कलिङ्गानामधिपतिरकबरो न स्वीक्रियते, यावच्च नाणकं शासनमुद्रा चाकबरस्य सर्वस्मिन्नपि प्रान्ते न प्रचरति तावन्नज़ीरखानो नासनाधिकारो भवेत्। ईसाखानः (मन्त्री) स्वीचकार सर्वानपि समयान्। स ह्येतावत्पर्यन्तम-प्यूरीचक्रे यद् ये किल साम्राज्यप्रदत्तभूम्यधिकारिणः सन्ति न तेषां संघटेत काचिद्धानिः, न गृह्येत तेभ्यः करोऽपि। ततः सम्राजे महाराजमानसिंहाय च प्रजिघायोपायनानि येषां मूल्यं द्विलक्षमुद्रातोऽप्यधिकम्। एवं पराक्रमाभिषङ्गात्कलिङ्गान्विजित्य परावर्तिष्ट विहारगतं स्कन्धावारमयम्।

ईसाखानो नोदलङ्घयत्सन्धिं निजजीवनकाले। यथासमयं कलिङ्गदेशस्य करः प्रापद्राजधानीम्। किन्तु ईसाखानस्य मृत्योरनन्तरमेव पर्यवर्तत परिस्थितिः। कतलूतनयो ख्वाजासुलेमान-उसमानौ अन्यायैर्विरोधिभिः सङ्गत्य महान्तं विप्लवमाबध्नीताम्। मानसिंहः संवादमिममाकर्ण्य घोरतरमक्रुध्यत्। स हि कलिङ्गेषु साम्राज्यशासनं विहाय मध्यवर्तितनः कस्यापि शासनस्य समूलमुच्छेदं क्रोधात्प्रत्यजानीत। असूचयदखिलपरिस्थितमकबराय। ततः प्रासुमुत्तरम्- ‘भवान् साम्राज्यस्य सर्वात्मना प्रभुः। परिस्थितिं बुद्ध्वा यद्भवानुचितं भावयेत्करोतु, यदीतः सेनासम्प्रेषणमावश्यकं तर्हि सूच्यम्।’

मानसिंहो वङ्गेभ्यो मगधेभ्याश्चाखिलां सेनां समाहरत्। निजविश्रब्धान् सेनापतीन् सम्बोध्य समादिशच्चासौ- 'रणवीराः! मुहुः खड्गोत्तोलनस्यापेक्षया एकवारमेवैषामफगानजातानां निर्विषीकरणमहं मन्ये भवन्तोऽप्यावश्यकं भावयिष्यन्ति? अप्यनुमतमिदम्? सर्वेऽपि सोत्साहं सममन्यन्त। पुनः किमासीत्, विपुलां वाहनीं वहन् समभ्यसरत्प्रतिपन्थिनः। इतः कतलूतनयाः सर्वेऽपि समङ्गसत। नसीबखानजबालखानावपि त्रिसहस्रसेनामादाय सममिलताम्। एवमासीदपारा पृतना परिपन्थिनाम्। मानसिंहोऽपि वीरवाहिन्या वाहिनीमुत्तीर्य सहसा समाक्रामच्छात्रवान्। समभूवन्सपत्नाः सम्भ्रान्ताः, आसीत्तेषामाशा यत्स्थलमार्गेण प्राप्स्यति सैन्यमिति। अत एव सहसा पर्याक्रान्तास्तदिमे हतबुद्धय इवाभूवन्। परिणामः स एवाऽभूद्यो ह्यन्यान्येषु समरेष्वद्यावध्यासीत्। कतलूपुत्राः पलायिषत। तेषां सहायका अपि केचिन्मृताः केचिच्च जीवग्राहमगृह्यन्त।

ततः पूर्यां जगन्नाथमन्दिरमयासीत्। अफगानैर्मन्दिरमक्रियताऽपवित्रम्। मानसिंहः पुनरस्य शोधनं प्रतिमायाः पावनीकरणं चाकारयत्। ततः प्रत्यर्थिलुण्ठनलब्धामपारां सम्पदं वहन्परावर्तिष्ट निजावासं मानसिंहः। साम्प्रतं कलिङ्गाः साम्राज्यस्यैव समृद्धिमानेकः प्रान्तः।

साम्प्रतं कूंचविहारेणाकृष्टा दृष्टिः। राज्ञो लक्ष्मीनारायणस्यायत्तमिदं राज्यं सैन्यबले सुतरां समृद्धम्। ७०० हस्तिनः, ४०००० सादिनः, लक्षद्वयाधिकाः पदातयः सहस्रसहस्रं समरनौकाश्च प्रत्यहमतिष्ठन् सज्जाः। एतावत्सैन्यबलिष्ठोऽप्यसौ सर्वदा कम्पते स्म भयात्। कारणमस्य-प्रतापादित्योऽस्य पितृव्यपुत्रो यशोहरराज्यमशिषत्, तेनासीदस्य शत्रुता। प्रबलादस्माद्रात्रिन्दिवा राज्यापगमस्यासीद्भयं लक्ष्मीनारायणस्य। अवाञ्छदयं मानसिंहेन सङ्गन्तुम्। दृढं व्यश्वसीदसौ-यदि मानसिंहः सकृदपि मे साहाय्यवचनं दद्यात्तर्हि प्रतापादित्यो न किञ्चित्पारयेदनिष्टं मे कर्तुम्। मानसिंहो यदा प्रान्तेऽस्मिन्प्राविशत्तदादूरादेवाऽस्य स्वागतं व्यधित। सर्वस्यापि सैन्यस्य तथातिथ्यं व्यदधाद्यथा प्रत्येकपुरुषोऽस्मार्षीच्छ्वशुरालयस्य। भोजनाद्युत्तरं निजराज्यस्य प्रादर्शयच्छोभना रचनाः। मानसिंहो नगरस्य सुन्दरताम्, प्राकृतिकं वैभवम्, कलाकौशलम्, प्रजानां समृद्धिं चालोकयन्प्रासीदत्परमम्।

रात्रौ भोजनस्य समये लक्ष्मीनारायणस्यालौकिकसुन्दरी कुमारी पर्यवेषयद्भोज्यानि। महाराजो मानसिंहो यस्य हि वीरताकार्येष्वेव जीवनं व्यत्यगच्छत्, न चान्तः पुरे विश्रमस्य यस्यावसरोऽभूत्स हि त्रिलोकजैत्रात् सौन्दर्यस्य प्रभावान्नात्मानं शशाक गोपयितुम्। असामान्यबलशालिनं तेजस्विनं महाराजमालोकयन्ती कुमार्यपि हृदयात्तं चकमे। द्वयोरयं भावो नासीदपह्नुतो लक्ष्मीनारायणात्। अत एव वा सेयं समायोगघटना तेन कृता स्यात्। अस्तु चतुरराजनैतिकोऽसौ समुचितमवसरं नेमं व्यस्मरत्। लक्ष्मीनारायणः स्वीयं भयकारणमवर्णयन्महाराजाय, प्रतापादित्यस्य यशो बलं प्रभुत्वं चापि। महाराजः सहजमेव प्रत्यभाषत-'राजन्नाधुना किञ्चिच्चिन्तनीयम्। अहं सर्वतः पूर्वं भवदापत्तिमेव निवारयेयम्।'

परदिन एव प्रैष्यत प्रतापादित्याय युद्धनिमन्त्रणम्। प्रातिष्ठत कश्चिदंशः सम्राट्सेनायाः तेन सह समराय। सहसा समुपगतमिदमाक्रमणं नापारयत्प्रतापः प्रसोढुम् प्रत्यक्षम्। किन्तु स्वभाववीरस्तदायत्त ईसानामको भूस्वामी स्वामिनः पराजयेनाऽनेन परममखिद्यत। स हि जन्मभूमेः स्वातन्त्र्याय, निजप्रभोः कार्याय च स्वल्पामपि निजसेनामादाय रणाङ्गणे समवातरत्। स्वल्पतमं सैन्यमिदं न किञ्चदगणयत् मुगलवाहिनी। किन्तु देशप्रेम्णा स्वामिभक्त्या च प्रणोदित ईसा स्वल्पतमेनापि सैन्येन विपुलामिमां वाहिनीं स्तम्भयामास। स हि दुर्धरेण स्वरेण सर्वान्वीरान्प्रोत्साहयन्नूचेरणधीराः किं निरीक्षध्वे। समराङ्गणोऽयं वीराणां निकषभूमिः। जयसमारोहे स्वर्गारोहे चोभयथापि वीरपुरुषाणामक्षया कीर्तिः।' उत्साहे शौर्यावेशे च भयङ्कररूपेणापतन्मुगलवाहिन्यां ते वीराः। सहसा व्यचलत्साम्राज्यसैन्यमपि। किन्त्वपादसागरस्य सम्मुखे सरित् कियती? अन्ते पराजीयत प्रतापादित्यः। किन्तुवीरपरीक्षको मानसिंहो हृदयेन प्राशंसत्स्वामिभक्तिं च युद्धकलां चास्य भूस्वामिनः।

ईसाऽपि भारतैकवीरस्य मानसिंहस्य सन्निकर्षे समुपगत्य तस्य महिमानमसाधारणं शौर्यं चावगच्छन् बभूव नितरां प्रभावितः। नासाविदानीं युद्धाय पदमग्रे धातुं निजस्वामिन-मप्यामन्त्रयत्। समुचितं विभाव्य प्रतापादित्योऽप्यानुगत्यं भेजे। महामूल्याननेकशः कुञ्जरानुपायनीचकार मानसिंहाय। लक्ष्मीनारायणस्याऽप्यविकृतं तं प्रदेशं परावर्तयामास। महाराजमानसिंहस्यानुरोधेन स हि लक्ष्मीनारायणेन सह शत्रुतायाः स्थाने मित्रतामेव किम्, सुस्थिरामात्मीयतामाललम्बे।

संहृतसङ्कटो लक्ष्मीनारायणः साम्प्रतं मानसिंहस्य चरणयोर्निपत्य निजां कृतज्ञतां प्रकाशयत्। प्रावदच्च – 'किमहं श्रीमतः प्रत्युपकर्तुं पारयेयम्। किन्त्वेकां मेऽभ्यर्थनां यद्यनुमन्यध्वे तर्हि भवेयमहं सफलजीवनः।

**मानसिंहः** – निःशङ्कमावेद्यताम्, किमिदानीमपेक्षितं तत्रभवतः?

**लक्ष्मीनारायणः** – कन्या मे श्रीमतो दासी भवेदित्युत्कटो मेऽभिलाषः।

महाराजो मनोरथानुकूलयाऽभ्यर्थनया मनस्येव माद्यन्प्रकटमूचे– 'श्रीमतोऽनुरोधो मे मान्यः। आश्वसितु भवान्, सम्मानस्तस्या न राजमहिषीभ्यो न्यूनो भवेत्।'

निरवर्तत सानन्दमयं विवाहोत्सवः। अत्र हि वङ्ग-कलिङ्ग-विहार-कूंचविहारादि-प्रदेशानां सामन्तः प्रतिष्ठिताश्च समामिलन्। एतद्देशीयाः सर्वेऽपि, विशेषतश्च लक्ष्मीनारायणः सम्बन्धेनानेन परमं प्रासीदत्। एवं किल विहारे उत्कले कूचविहारे चात्मनः शासनमुद्रां दृढीकृत्य नवीनां महाराज्ञीं सह नयन्महाराजमानसिंहः परावर्वृते निजनिवासम्। युद्धेष्वेषु शोकघटना सेयमवश्यमघटत यन्महाराजस्यैकस्तनयो दुर्जनसिंहः स्वर्गमगच्छत्।

## ( १३ )

## बङ्गेष्वन्तिमः समरः

विहारमुत्कलं च साम्राज्यभुक्तं कृत्वा मानसिंहः स्वां शक्तिमतुलां वर्द्धयामास, साम्राज्यस्याऽभिवृद्धिस्तु ततः स्वाभाविक्येव। प्राज्येऽपि साम्राज्ये मानसिंहसमानः कश्चिदपि नासीत्प्रतापशाली। महापराकान्ता अपि साम्राज्याधिकारिणो मानसिंहसविधे समभूवन् विच्छायाः। मुसलमानेतिहासलेखका अपि तत्सामयिके इतिवृत्ते महाराजमानसिंहस्य प्रभावमनुमपं मेनिरे। स्वयमकबरोऽपि मानसिंहप्रभावेणाऽऽसीत् सर्वतः प्रभावितः। राजपुत्रप्राप्ते मानसिंहस्य राजसत्ता तादृशी प्रभावशालिनी समभूद् यत्तत्रत्या लोकास्तं स्वतन्त्रपालं विविदुः। विस्तृते साम्राज्यमात्रेऽपि नैवंविधः कश्चित्प्रभावशाली समभूद्यो मानसिंहस्य शासनं तिरस्कुर्वीत। एतावद्बलोपलब्धावपि न हृदये मानसिंहस्य सेयमिच्छ जजागार यत्स्वतन्त्रमहमेकं राज्यं स्थापयेयम्, अकबरं च वञ्चयेयमिति। न च मुसलमाननीतेरनुसारमियं वञ्चना। यतो हि तस्मिन् समये ये वै अफगाना निजराज्यं पर्यचालयंस्तेऽप्येकस्मिन्दिने समभूवन्पठानसाम्राज्यस्यैव प्रान्तीयाः शासकाः। यदि मानसिंहोऽवाञ्छिष्यतर्हि विजितेषु प्रदेशेषु सुखेन स स्वराज्यमस्थापयिष्यत्। नासीदकबरस्य शक्तिर्यत्तस्य दमनं कर्तुं पारयेत्। मानसिंहमन्तरा वा स स्वयं साम्राज्यस्य राज्यवृद्धिं कुर्यात्। किन्तु मानसिंहो यथा प्राचीनक्षत्रियादर्शेन एकमात्रो वीरो बभूव तथैव निजवचनानुपालनेऽपि प्राच्यमर्यादाया आदर्शायितोऽभूत्। भारते एकसाम्राज्यस्थापनस्य प्रतिज्ञां कृत्वा न कदाचिदकबरस्य परोक्षेऽपि स स्वातन्त्र्यमास्थापयितुमैषीत्। प्रत्युत निजप्रभावसूर्यस्य प्रबलमध्याह्नेऽपि – 'आकमहाल' स्य भूमौ अकबरस्य स्मृतिं सुस्थिरां कर्तुं 'अकबरनगरम्' एव वासयामास, यद्धि साम्प्रतं 'राजमहल' नाम्ना परिचितम्। यदि मानसिंहोऽभ्यलषिष्यत्तर्हि स्वविजयोपलक्ष्ये स्वनाम्ना नगरमिदमवासयिष्यत्। किं बहुना, विजिताः प्रजा एव राजभक्तिं प्रदर्शयितुं माननाम्ना नगराण्यनेकान्यवासयिष्यन्, किन्तु सत्यवीरो मानो नेदं कदाचिदप्यवाञ्छत्।

'राजमहल' मिदमासीत्स्वसमये निरुपमं सुन्दरम्। विशालभवनैः सुरम्योद्यानैः सजलसरोवरैः सुप्रशस्तराजरथ्याभिश्च पूर्णमिदमासीद् बहुसमयं यावत्तत्प्रान्तस्य राजधानी। इत एव वङ्गानां विहाराणामुत्कलानाम्, किमन्यत् 'आसाम' पर्यन्तस्यापि शासनमभवत्। सर्वथा विभिन्नानप्यमून् प्रान्तानेकशासनसूत्रे सम्बध्य मानसिंहेनाद्भुतकौशलस्यासीत् परिचयः प्रदत्तः। सत्यप्रतिज्ञो मानो नगरेऽस्मिन् यत्किञ्चिदकरोत्तत्सर्वमकबरनाम्नैव।

एवमसाधारणीं सफलतां समधिगम्य मानसिंहोऽजयमेरुनगरमुपागमत्। इतोऽग्रेसमभूत्तस्य नियम एवायं यद्बङ्गेषु मगधेषु च यदि काचिदावश्यकताऽभविष्यत्तर्हि स

तत्रोपास्थित, अन्यथा अजयमेरुमेवाध्यतिष्ठदसौ। इतः सेयमपि सुविधासीद्यन्महाराजोऽत्रावस्थित एवाम्बरराजधान्या अपि समुचितं प्रबन्धमकरोत्। वङ्गादिषु तादृशं सुशासनं तादृक् च दस्युदमनमभूद्येन चिरं यावदफगाना न शिरः समुत्थापयेयुः।

अकबरो दक्षिणापथे समगंस्त महाराजमानसिंहेन। अस्मिन्वारे महाराजस्य तादृशं सम्मानमकरोद्येन स्वयं महाराजस्यापि विस्मयोऽभूत। अद्यावधि मित्रस्य पुत्ररूपे सममानयत्साम्प्रतं तु सम्भावितमित्ररूपे समलपन्निर्मायभावेन। प्रथममभून्मानसिंहस्य शङ्का काचित्किन्त्वकबरस्य कृतज्ञतापूर्णेन हार्दिकभावेन त्वरितमपागमत्सा। महाराजः प्रसन्नतया प्रावादीत्– 'सम्राट्! साम्प्रतं श्रीमतो विजयध्वजः काश्मीरानारभ्य ब्रह्मपुत्रपर्यन्तं स्वैरं प्रस्फुरति। वङ्गानां सर्वेऽपि विद्रोहिणश्चिराय निर्मूलिताः। सर्वेऽपि साम्प्रतं भवतो गुणान् गायन्ति। अद्यावधि न तैर्यवनानामेवं सुसंघटितशासनव्यवस्थाऽवलोकिता। वाञ्छन्ति चिरादेवमेव भवेद्राज्यं सुस्थायीति।'

**अकबरः** – 'प्रिय मित्र! सर्वमिदं भवतो वैभवम्। मम तु केवलं यशः, यस्य सर्वस्य मूलं भवतस्त्यागवृत्तिरेव। भवतु, किमहमस्य कुर्यां प्रतिशोधम्? किन्तु शीघ्रमेव राजसभायां प्रकटयेयमिच्छामात्मनः।'

**मानसिंहः** – श्रीमन् ममापि नात्र काचित्कृतिः, सोऽयं पितृचरणानां दृढसङ्कल्पस्य महिमा।'

तस्मिन्नेवं जल्पत्येव परिचारकः पत्रमेकं प्रादान्मानसिंहस्य हस्ते। पत्रं पठत एवास्य मुखाकृतिरभूत्कराला। अकबरः प्राबुध्यत यत्पुनः काचिदभूद्दुर्घटनेति। प्रकाशमवोचत्– 'अनुमिनोमि यद्वङ्गेषु पुनर्विद्रोहः प्रारभ्यत। अपीदं सत्यम्?' मानसिंहो मुखभावं परिवर्त्यावोचत्– 'सुतरां सत्यमिदम्। यावदयमीसा भूस्वामी जिजीव तावदभूत्सन्धेः परिपालनम्। मृत एव तस्मिन्नारब्धः पुनरुपद्रवो द्रस्युभिरफगानैः। तैर्विदितं यदहं भवतः समीपमगाम्, ईसापि नाधुना सहायकः। अत एव बहून्यप्रदेशानकुर्वन्हस्तगतान्। जाने कञ्चित्कालं तत्र परिष्ठाय घटनाचक्रस्य मूलमेव निर्मूलनीयं भवेत्।'

**अकबरः** – भवान्मुहुस्तान्दमयति ततोऽपि कथं ते मुहुर्विप्लवमारचयन्तीति नाहं निश्चिनोमि।

**मानसिंहः** – इदं तावद्भौगोलिकं कारणम्– तत्रत्या जलवायव एव तादृशा ये तन्निवासिनां मस्तिष्कमेवोर्ज्जस्वलं सृजन्ति, यद्धि परेषामभिभवसहने निसर्गतो विरुद्धम्। समग्रेऽपि मोगलसाम्राज्ये द्रक्ष्यति भवान् यद्वङ्गा एव तादृशा यत्र क्रान्तिकारिणां षडयन्त्रनिपुणानां च नास्ति न्यूनता। पुरापि तत्रैवमेवाऽभूदिति दद्यादितिहासः साक्ष्यम्। तत्प्रान्तस्य दक्षिणस्थः काननभागो महान्तो नदीनदाश्च क्रान्तिकारिणाममीषां सहायकाः। तेषां शक्तितोऽप्यधिकं दमनकारको यावत्कालं तान्न प्रशास्ति न तावत्कालमधीनतां ते स्वीकर्तुं विवशा भवन्ति किन्तु यथैव ते स्वानुकुलमवसरं विभावयन्ति, त्वरितं विरुध्यन्ते। किञ्च भारतस्यान्यप्रान्तेभ्यः पराजिता

अफगाना अप्यस्मिन्प्रदेशे समपगत्य लोकान्विरोधयन्ति।

**अकबरः** – अवश्यमस्य समुचितः प्रतीकारः कार्यः, अन्यथा साम्राज्यरक्षा सङ्कटे। न च मुहुर्भवानेव तत्र परिश्राम्म्येत्। अन्येष्वपि प्रदेशेषु निरीक्षणं भवदायत्तम्।

**मानसिंहः** – एकवारं मे तत्र गमनमनिवार्यमेव। अस्मिन्वारे दुर्घटनानां सर्वदार्थं मूलोच्छेदाय प्रयतिष्ये।

अकबरेणानुमतो मानसिंहः प्रातिष्ठत वङ्गान्। सम्राट् स्वतनयं सलीममपि प्राहैषीन्मानसिंहेन साकम्। किन्तु विलासप्रियतया मानसिंहात्प्रतिकूलतया च युवराजो प्रयाग एव तस्थौ। महाराजः प्रययौ रोहिताश्वदुर्गम्। तत्र सेनायाः परिष्करणं समुचितशिक्षणं च पूरयामास परिश्रमतः। ततः शेरपुरसमीपे निबबन्धघोरं समरम्। विद्रोहिणः पराजित्य पलायाञ्चक्रिरे। ततो मानसिंहो ढाकानगरं प्राप्य 'जलाल' नामकस्य लुण्टाकस्य परिभवाय कुमारं महासिंह प्रजिघाय। झरनदीमुल्लङ्घ्य कुमारो जलालमिममाक्रमीत्। कुमारस्याक्रमणमसहमानः पलायिष्ट जलालः। सम्प्रति महासिंहः प्रधानविद्रोहिणं काजीमोमिनं समभ्यसरत्। महाराजेन पूर्वमेवोपदिष्टं यत् यावत्कालं शत्रुर्नदीं नोल्लङ्घयेन्न तावत्कालमाक्रमणीयम्। किञ्च सैन्यं बहुषु खण्डखण्डेषु विभज्य सह नेयं, येन शत्रुः सैन्यमकिञ्चित्कारं बुद्ध्वा पलायनस्य स्थाने सन्नह्येत आक्रमणाय। तदेतत्तथैव सम्पन्नम्। प्रबलं पराजीयत काजी, न्यहन्यत च सङ्ग्रामे।

कतलूसूनुरुसमानोऽपि विरुध्यमानोऽभूत्। तेन यदा दृष्टं यत्परितोऽन्येऽपि विरोधमाबध्नन्ति तदा मेवालगुल्मो चकाराक्रमणमसौ। किन्तु सूचनामिमां समवाप्यैव ससैन्यः सम्प्राप मानसिंहस्तत्र। निबबन्ध घोरं सङ्गरम्, पराजिग्ये उसमानः। भूयान्धनराशिर्बहुतराः शतघ्न्यश्च समभूवन्मानसिंहस्य हस्तगताः। सुदृढीकृत्य गुल्ममिदं परावव‍ृते मानः। तत ईसाभूस्वामिनस्तनयं दाऊदं दमयामास। अनन्तरं च वङ्गसीमाप्रान्ताधिपतिं केदारभूपतिमाचक्राम। क्षतविक्षतोऽसौ समानीय मानसिंहनिकटे, किन्तु व्रणैर्विकलोऽमम्रियत हन्त मार्ग एव।

केदारं पराजित्य तद्देशमयमधिचक्रे। प्राप्यत तत्रैका सिद्धशिला मानसिंहम्। कश्चिद्योगी पुरश्चरणान्यनेकानि गायत्र्याः संविधाय शिलामिमां साधयामास। समाचष्ट भगवती स्वप्ने मानसिंहम्– 'शिलायामस्यां निर्माहि मे प्रतिमाम्, यावच्च बलिप्रदानादिना से सपर्यां पर्यावहसि न तावत्ते राज्ये काचिद्बाधा।' देव्या नियोगानुसारं शिलायामस्यां मूर्तिमुत्कीर्य प्रजिघाय वङ्गदेशीयैरर्चकैः सह तामिमामाम्बेरराजधानीम्। सावधानमकरोत्प्रत्यहं च बल्यादेस्तत्र प्रबन्धम्। एतदनन्तरं वङ्गेषु ये केचन विरोधिनः समुपलब्धाः सर्वांस्तान्वशीकृत्य मानसिंहः शान्तिमास्थापयामास। सर्वांश्च सैनिकानसौ समाज्ञापिपद् यः कोऽपि विरुद्धो विलोक्येत समानयत निर्विचारमिमं मत्समीपे। विजयस्यास्य समभूत्सोऽयं परिणामो यत्सम्राजोऽकबरस्य शासने नाश्रूयत कदापि विद्रोहस्य नामाऽपि वङ्गेषु। सोऽयं विद्रोहः समभूद्वङ्गेष्वन्तिमो नूनम्।

असमानैर्विजयबहुमानैरामपण्डितः सोऽयं मानसिंहमहाराजः समवाप पुनः

समीपमबकरस्य। महामहत्यां राजसभायावस्थितोऽप्यकबरः ससम्भ्रममुत्थाय प्रददौ महाराजाय सम्मानम्। इतः प्रभृति 'सप्तसहस्र समीकाधिपतिः' समभून्मानभूपतिः। षड्सहस्रसादिसेना चाभूत्तस्याज्ञानुगा। विजित्य समानीतान् गज-रथ-तुरगादीन्प्रभूतांश्च धनराशीनुपायनीचकार सम्राजे। यः समादरः समार्प्यत मानसिंहाय नायमद्यावधि कस्मैचिदपि प्रादीयत सम्राजा निजराजसभायाम्।

सप्रमोदमवाप महाराजो निजराजधानीम् (आम्बेरम्)। सर्वतः प्रथमं प्रतिष्ठापयामास भगवतीं शिलामयीम्। एतस्मिन्विजयसम्माने सर्वस्यामि राज्यस्य प्रजाः प्रचक्रुः प्रमोदवर्धापनं महाराजस्य। राज्यस्य स्थाने स्थाने समायोज्यन्त नृत्यगीतवादित्रादीनि मङ्गलानन्दसंवर्द्धनानि। आम्बेरराज्यायैव किम्, भारतीयराज्यसंस्थानमात्राय साम्राज्यादेतावत्समादरोपलम्भः सम्भावितोऽभून्नूनं सर्वतः प्रथमम्।

## (१४)

## अकबरस्याऽन्तिमानि दिनानि

आसीदकबरोऽद्य किञ्चिदूनस्य समग्रस्यापि भारतस्याधिपतिः। महाराजमानसिंहसदृशास्तस्य सैन्यसंरक्षकाः, अबुलफजलफैजीसदृशा अद्वितीयविद्वांसस्तस्य सभारत्नानि, प्रजा न केवलं शस्त्रबलेन, अपि तु हृदयेन तमेनमस्पृहयत्, किन्तु किमासीदकबरः सुखी? दक्षिणभारतस्य महान्तमेकं प्रदेशं विजित्य साम्प्रतमेव परावर्तिष्ट। तस्य स्वास्थ्यमुत्तरोत्तरमासीत्पतनोन्मुखम्। भिषग्भिर्यवनानीवैद्यैश्च भूयसा विचारेण प्रायुज्यन्तौषधानि किन्तु न तेषां किञ्चित्फलम्। एकदा परमं विषण्णः सम्राडाजुहाव मानसिंहम्।

समाययौ मानसिंहः। अकबरस्य विचारणीयावस्थया व्यषीदत्स परमम्। मानसिंहं विलोक्यैव समाययुरकबरस्य नेत्रयोरश्रूणि। अवादीदसौ- 'प्रिय मानसिंह क्वासीरेतावत्कालम्?'

'श्रीमन्! प्रबन्धार्थमाम्बेरे व्यलम्बिषि कञ्चित्कालम्। किन्तु यथैव दक्षिणतः परावर्तनस्य संवादमश्रौषं, स्वयमहमुपस्थितये समभूवमुत्कण्ठितः। नासीन्मे एतदवस्थायाः परिज्ञानं श्रीमतः। अद्य तत्र भवतः कथमियमवस्थाऽभूत?

'प्रिय मान! जगज्जानाति यदहं सुखी किन्तु क इदं जानीते यन्ममान्तरिकी व्यथा कथमिव मां जर्जरीकरोतीति। जाने, नाधिकमहं शक्नुयां जीवितुम्।'

'कथमिदम्, अपि काचिद्विशिष्टा घटना समवर्तिष्ट?'

'घटना? न सा घटना। तद्धि मे मृत्योश्चिह्नम्। नास्ति सम्प्रति हृदये बलम्, न च तावत्साहसम्, येन हि दारुणा वेदना शक्येत सोढुम्।'

'श्रीमन् ! सूच्यतां किञ्चिद्येनाहमवगतः स्याम्।'

'किं कुर्याः श्रुत्वा। एको भवानस्ति यं विलोक्य मे बाल्यसहचरो महाराजभगवन्तदासः सुखेन निजजीवनं विससर्ज। एकोऽहमस्मि यो म्रियमाणोऽपि भविष्यामि भाजनं दौर्भाग्यस्य।

'किं कुमारसलीमात्पुनरसन्तोषः समुदभवत्?'

'कुमारः? नासौ कुमारः। स हि मे जीवनस्य कण्टकः। हन्त यस्य जननाय पद्भयां यात्रां विधाय चिश्तीचरणसेवा कृता,यस्य जन्ममहोत्सवे फतहपुरसीकरी सदृशस्य सुविख्यातस्य सुन्दरनगरस्य निर्माणमकारि, स एव पुत्रः, आम्'पुत्रः' मत्समक्षमेवाद्य कालरूपे परिभ्रमति।'

'पूज्यवर! दिनेष्वेषु कुमारो मत्तोऽप्यसन्तुष्ट इवाभाति। स हि तद्दिनादेव न मे हृदयं प्रकाशयति यद्दिने मया सह वङ्कविजयायासौ विसृष्टः।'

'आम्, स भवता किमिति सन्तुष्येत्? विजानात्यसौ यद्भवान् मे मित्रम्, मम मानस्य प्रतिष्ठाया गौरवस्य चैकमात्रं कारणम्। आः विलासमयस्य पितृद्रुहोऽस्य सलीमस्य हन्त किमग्रे भावि?'

'पूज्यवर! नोत्ताम्यतु भवान्। यथाशक्ति मार्गे समानेतुमिमं प्रयतेय।'

'मा मैवम्। अहं हि कठोरात्कठोरमिमं दण्डयितुं वाञ्छामि। एष हि अब्बुलफजलं निहत्य, मुरादं दानियालं च निर्मूल्य, भवता सह विद्रुह्य, इस्लामधार्मिकानां विरोधे समुत्थाप्य, मोगलसाम्राज्यमपहर्तुमाबद्धवान् षड्यन्त्रम्। तमेनमहं सूचयिष्यामि यदेवंविधानामनुकूलीकरणेऽपि न दुष्टस्य हस्ते निपतेन्मोगलराज्यम्। मोगलसाम्राजस्य रचना नैतदर्थं कृता यत्तद्द्वारा स्वार्थविजयः साध्येत, राज्ञां राजकुमाराणां च विलाससाधनं तद्भवेत्। प्रत्युत महान्ति बलिदानानि,भवादृशां महावीराणां च शुभाः प्रयत्नाः केवलमेतदर्थमेवासन् यद्भारतमिदं सम्पद्येतैकराष्ट्रम्। एकेन शासनसूत्रेण सङ्ग्रथिता हिन्दवो मुसलमानाश्च मिथो भेदभावं विस्मृत्य निवसेयुः शान्तिपूर्वकम्।'

'महामान्य! शान्तिमवलम्बेथाः, आवेशेन तीव्रा भवेद्हृदयगतिः। न बालानामपराधे क्षुभ्यन्ति महापुरूषाः?

'सखे मानसिंह! यद्ययं स्पृहयति राज्यमेव, तर्हि काऽऽवश्यकताऽऽसीदियतो विप्लवस्य। स्वयमहं जीवन् प्रादास्यं तस्मै राज्यम्। किन्तु ये उपायास्तेनावलम्बितास्ते किलोल्लङ्घयन्ति सीमानं मानवतायाः।'

राजाधिराज! प्रार्थयेऽहं कियन्तञ्चिदवसरम्।'

'अस्तु ,गच्छतु भवान् स्वैरम्, किन्तु परावर्तेथाः शीघ्रमेव। भवदुपगमेन ह्रसते मे दुःखावेगः।

प्रायासीन्मानसिंहः सलीमसमीपम्। व्यचारयन्महाराजो मनसि–कामं सलीमो मत्तः शत्रुतामाचरति परमस्ति साम्राज्याधिकारी सोऽयमेव। उपजापपरैरिस्लामधार्मिकैः सोऽयं विक्षोभितः, विलासपरश्च, किन्त्वस्त्ययं बुद्धिमान्। मार्गे समारोपितः सोऽयमकबरानन्तरं समधितिष्ठेत्साम्राज्यशासनम्।

सलीमो मानसिंहायेर्ष्यति स्म यत्तस्यैव सम्मुखे सम्राट् सलीमापेक्षयापि मानसिंहमाद्रियते स्माविकम्। अभावयदिदमात्मनो घोरं लाघवं सलीमः। किन्त्वद्य स्वयं मानसिंहस्तस्य समीपमुपगत इत्युपलेभे स्वागतं महाभागस्य। कथमद्य कष्टमिदमङ्गीकृतम्?'

'निजापराधानां क्षमाभिक्षायै' अवदन्मानसिंहः।

'कीदृशोऽपराधः?'

'यानपि भवान् भावयेन्मनसि।

सलीमः समभूदवाक्। अवादीन्मानसिंहः–'प्रियभ्रातः! किमिदमारब्धं श्रीमता,वृद्धः पूज्यश्च पिता किमिति विषादमारोपितः? प्रत्यहं स रोगाभिमुखमभिवर्द्धते। तद्रोगस्योपचारो भवदायत्तः। अद्यावधि यत्कृतं भवेदत्तत् सम्यगेव। किन्त्वन्तसमये तस्योपतापनं न शोभते मन्ये भवादृशस्य विवेकिनः। क्षणं विचारयतु भवानेव संसारः किं कथयिष्यति– भारतविजयिनः सम्राजो मृत्युकारणमासीत्तत्सुत एव। साम्प्रतं पितुर्विचारणीयां दशामवदधीथाः। य इमे मौलविनो भवन्तमक्षोभयन् आसीत्तस्य कारणमिदमेव यद्भवत्पितुरग्रे न तेषामधिकारः प्रभवति।'

सलीमो भवेत्कामं कीदृशोऽपि, परं नासौ शशाक विस्मर्तुं पितुः प्रणयम्। प्रावहत्तस्य नेत्राभ्यां नीरम्। प्रत्यवादीदसौ–'मम पितुर्हितकारिन्मानसिंह! हन्त प्राबोधयदद्य भवान्मामिमज्ञानम्। सत्यमहममस्मि मन्दभग्यः। जानेहमनुतापानलो मे प्रारब्धवान् हृदयदाहम्।'

प्रोक्तं मानसिंहेन–'अनलस्यास्योपशमायैकमात्रमुपायोऽस्ति पूज्यपितुः पादयोरनुकम्पापीयूषम्। उपेहि साम्प्रतमेव, अर्थयस्व च निजापराधानाम् सत्यहृदयेन क्षमाम्। प्रापयेश्च पितुः स्वस्थ हृदयाय च शान्तिम्।'

उदस्थान्महाराजः। सलीमोऽप्युत्तरं विना तमनुससार। अदान्महाराजः स्वागमनस्य सूचनां सम्राजे। उपजग्मतुर्द्वावपि सम्राजम्। मानसिंहेन सह सलीमं विलोक्य प्राज्वलत्सम्राट, अभूतां क्रोधेन दृशौ रक्तवर्णे।' अपेहि मत्समीपात्, न दर्शय मे मुखम्' इत्यावादीत्क्रोधगद्गदं सम्राट्।

अरोदीत्सलीमः। मानसिंहोऽवादीत्– कुमारः सलीमोऽनुतप्यते निजकर्तव्योपरि। क्षाम्यतु भवान् साम्प्रतम्। सर्वोऽप्यपराध्यति जीवने। तत्राप्यधुना कुमारस्योत्तिष्ठमानं वयः, साम्राज्यगन्धी निसर्गः। '

न्यपतच्चरणयो: सलीम:। अशाम्यदकबर:। पितृहृदयमलब्ध विजयं शासकहृदयोपरि। प्रत्यवादीत्सम्राट् यथेच्छति भवान्।'

अवादीन्मानसिंह:–'लभेत भवतो हृदयं शान्तिमिति स्वहस्ताभ्यामेव क्रियतां राज्यभिषेक: कुमारस्य। '

कृतज्ञतापूर्णया दृशा व्यलोकयदकबरो मानम्। शत्रवे क्षमाप्रदानस्य नवीनेयं पद्धतिर्नाद्यवध्यालोकितासीत्तेन। स हि राजमुकुटमधात्सलीमस्य मस्तके। प्रावर्द्धताऽऽवेगेन हृदयस्य गति:। न किञ्चिद्भाषितुं प्राभवत्सम्राट्। स हि कृतज्ञतया समालिङ्गन्मानसिंहम् न्यषिञ्चच्च नेत्रजलेन वस्त्राणि मानसिंहस्य।

पश्यतामेव सर्वेषाम्, प्रावर्द्धत 'आम' रोगस्य रुजा। स्वल्प एव समये संसारस्य महामूल्यमेकं रत्नमारोहत्स्वर्गम्। व्याप्नुते स्म साम्राज्यमखिलं महान् शोक: ।

## ( १५ )

## परिवर्तनम्

महाराज: साम्प्रतं नवीनयुगमन्वभूत्। अकबरो यां स्थितिं सम्मानं च तस्मै प्रादाद् वाह्यं स्वरूपं तस्य तथैवासीत्किन्तु मनोवृत्तेरवर्तिष्ट परिवर्तनम्। सम्राट् सलीम:, यो हि 'जहाँगीर' नामधेयं नयन् साम्राज्यं प्रारब्ध, प्रारम्भादेवासीन्मानसिंहादसन्तुष्ट:। न किञ्चिदगणयत्तमिममद्यावधि मानसिंह:, किन्तु साम्प्रतं स एव सेवनीय: समभूत्। परिवर्तनमिदमभावयन्मानसिंह:। आसीत्तस्य निश्चयो यत्सलीमो न मे किञ्चिदप्यपकर्तुं समर्थ:, तथाप्यसावासीत्सत्समयोचितकर्तव्ये निरत:।

सलीमोऽप्यन्तरन्त: प्रायतिष्ट मानसिंहं प्रत्यपकर्तुम्, परं स सम्यगजानाद्यन्मानसिंहमन्तरा नैकं क्षणमपि निरुह्येत साम्राज्यम्। अत एव मानसिंहक्लेशनाय स युक्तिमेकामवालम्बिष्ट साम्राज्ये यावन्ति कठिनकठिनानि कार्याणि समापतेयुस्तानि समर्प्येरन्मानसिंह्ययैवेति। नासौ व्यस्मार्षीद् यन्मानसिंहकृत्यैव लब्धं तेन साम्राज्यम्। अत एव प्रकटे कृतघ्नतां प्रकाश्य नायमभ्यलषत्सङ्कटे विनिपातयितुमात्मानम् । स हि मानसिंहमकरोद्वङ्गानामेव शासकम्। यदा यदा च मानसिंहेन समगंस्त, प्रादर्शयत्तावन्तमेव समादरम्। न कश्चिद्बोद्धुमपारयद्यन् मानसिंहजहाँगीरयोरन्तर्भावान्तरमस्तीति।

स्वल्प एव समये समुदतिष्ठदुपद्रवो रोहिताश्वदुर्गनिकटे। एनमुपशमयितुं स व्यलेखीन्मानसिंहमेव, अकरोच्च द्वितीयं शासकं वङ्गानाम्। इत: सर्वासां परिस्थितीनामन्तरभिज्ञो मानसिंह: स्वल्पेनैव कालेन पर्यशमयत्तमेनमुपद्रवम्। न्यवात्सीच्च स तत्रैव। अश्रौषीज्जहाँगीरो यन्मानसिंहो रोहिताश्वदुर्गोपद्रवमशम्यत्सर्वत:। किन्तु स मानसिंह पूर्ववद् वङ्गेष्वप्रहित्य निजनिकटमेवाजुहाव ।

आसीदकबरकृतो दक्षिणविजयः साम्प्रतमप्यपूर्ण एव। अवाञ्छज्जहांगीरस्तं पूरयितुम्। विलासप्रियोऽपि जहाँगीरः पितृसम्पादितं राज्यं प्रवर्द्धयितुमेवैषीन्न हापयितुम्। एतस्मै कठिनकार्याय स मानसिंहमेव निरचैषीत्। महाराजः साम्प्रतमुपारोहद्वार्धक्यम्। अवाञ्छीदसौ यत्सम्प्रति साम्राज्यकार्येभ्यो विश्रम्य निजराजधान्यामेव शेषदिनानि व्यतिगमयेयम्। एतदेव विभाव्य व्याजहार जहाँगीरम्–'दृष्टमेव श्रीमता यन्मे जीवनमशेषं युद्धकार्येष्वेव व्यत्यगात्। इदानीं वाञ्छामि यावन्तं स्वल्पकालमहं जीवेयं निजराज्य एव भजेयं भगवन्तम्।

अशङ्किष्ट प्रस्तावेनाऽनेन जहाँगीरः। प्रत्यवादीदसौ–' पूज्यवर! किमिदं सम्भवति यद्भवान् दक्षिणयुद्धेषु न गृह्णीयाद्धारम्। समस्तजीवनस्य सञ्चितोऽनुभवो यदि नोपयुज्येत दक्षिणयुद्धे तर्हि का स्यादस्माकं गतिः ? आम् यदि भवान् कामयेत तर्हि कञ्चित्कालमावसतु भवानाम्बेरम्। समुपस्थिते च कार्ये ततः समायातु भवान्दक्षिणापथम्। '

कञ्चित्कालमवकाशं गृहित्वा समायासीन्महाराजो निजराजधानीम्। अत्युत्कण्ठिताऽभूज्जनता दर्शनाय श्रीमताम्। प्रसन्नो महाराजो महता समारोहेण शोभायात्रामकरोत्। वयोवृद्धं महाराजमवलोक्य समभूवन्सफलमनोरथाः प्रजाः। अभ्यवर्षन्परितः पुष्पाणि। प्रजासु प्रतिवर्गमेव सममान्यन्त मङ्गलानि। स्थाने स्थाने कविवाग्भिरवर्ण्यन्त महाराजस्य विजयसमारोहाः। कुत्रचिच्छत्रूणां भयानकता अवर्ण्यन्त, तर्हि क्वचित्समरयात्रामार्गाणां दुर्गमता अचित्र्यन्त। ततःसर्वाण्यप्यमूनि सङ्कटानि समुत्तीर्य विजयं प्राप्तवतो महाराजस्य वीरता सर्वान् श्रोतृन्वक्तृंश्च हर्षगद्गदानकार्षीत्। अवसरेष्वेवं विधेषु नृत्यगीतवादित्राणि यानि यानि सम्भवन्ति, समभूवन् तानि सर्वाणि।

महाराजो महामहतीं राजसभामकरोत्। सर्वानपि निजसामन्तान्सम्बोध्य वक्तृतामदान्महाराजः–''प्रियप्रजायाः प्रमुखपुरुषाः! सम्भाविताः सामन्तगणाश्च! भवतां सहयोगमवाप्य आम्बेरराज्यस्य सर्वतः समुन्नतये मयाऽद्यावधि पूर्णतया प्रयतितम्। साम्राज्यकार्येषु समधिकसंलग्नतया नाहमिह स्थिरः सन्नशकं भवतां रक्षणावेक्षणं कर्तुम्। आशासे विवशतां मेऽनुमाय क्षाम्येयुर्भवन्तस्तदिदम्। एषु दिनेषु तु भवतां दर्शनाय भूयस्तरामेवाऽभूवं व्याकुलः। अद्य तदिदं समवाप्य परमं प्रसीदामि। साम्प्रतमपि न मह्यमवकाशः प्रदत्तः सम्राजा। दक्षिणदिग्विजयाय अनुपदमेव गन्तव्यम्, किन्तु यदि भवतामेवमेव सहानुभूतिः स्यात्तर्हि सेयं विजययात्राऽपि भवेत् नूनं सफला। शरीरमिदं मे वृद्धम्, पूर्वमेव न बलमुत्साहो वा। को वा जानीते, तदिदं वो दर्शनमन्तिममेव भवेत्। ज्ञाताज्ञाता ये मेऽपराधाः समभवन् क्षम्यासुस्तान्भवन्तः।

महाराजस्यान्तिमशब्दाः श्रोतृणामकम्पयन् हृदयानि। सर्वेषां प्रावहन्नविरलमश्रूणि नेत्राभ्याम्। तेषामेकः सामन्तः समुत्थाय सविनयमभाषत–'सूर्यवंशभूषण वीरशिरोमणे महाराजाधिराज! यादृशी कृपा तत्रभवतामस्माभिरुपलब्धा न सा कस्यचित्पितुर्निजसुतोपर्यपि स्यात्। अस्माकं मानरक्षायै गौरवाभिवृद्ध्यै च यदनुष्ठितं श्रीमता न तत्तिरोहितमस्मत्तः। तदिदं भवत एवानुग्रहस्य फलं यदाम्बेरराज्यमिदं भारतीयेषु प्रमुखराज्येष्वद्य गणनीयम्।

भारतसाम्राज्यस्य शासनसूत्रं भवत एव हस्तगतमासीत्। अथवा तत्त्वतो वक्तव्यं स्याद्यत् साम्राज्यस्य निमार्णमासीद् भवदायत्तमेव। अनेन हि मस्तकमस्माकं गौरवोन्नतम्। अद्ययावत्सर्वेष्वपि समरेषु यथा समवाप्ता श्रीमता विजयलक्ष्मीस्तथा दक्षिणदिग्विजयोऽपि निश्चितं भवेदिति दृढो नो विश्वासः। अस्माकं महाराजः सर्वदा समरविजयी दीर्घायुश्च भूयादिति सर्वदा समाशास्महे।' सर्वेऽपि सामन्ताः समुत्थाय समकार्षुर्विजयध्वनिं महाराजस्य। समाप्यत ततो राजसभा।

प्रातिष्ठत महाराजो दक्षिणविजयाय। सर्वतः पूर्वं खानखानातः साहाय्याऽवाप्तये प्राप तत्समीपं महाराजः। मुगलसेनायां महाराजः खानखाना चेति द्वावेवास्तां तात्कालिकराजनीतेस्तत्त्वाभिज्ञौ। किन्तु सलीमो द्वाभ्यामेवासन्तुष्टोऽवर्तिष्ट। अतएव नैतयोरनुभवेनाऽसौ लाभमग्रहीत्। यद्यसौ द्वयोर्विश्वासमकरिष्यत्तर्हि सागरान्तधरायाः समभविष्यदधिराजोऽसौ ।

अभवद्बुरहानपुरसमीपे शत्रुणा सह मोगलसेनायाः सङ्घर्षः। द्वाभ्यामेव मिथः सम्मन्त्र्य सेनासंघटनं तथा विहितं यथा सम्पूर्णोऽपि विदर्भ (बरार) प्रान्तः समभवत्साम्राज्यभुक्तः। ततस्ते इलिचपुराभिमुखं प्रावर्द्धिषत। आसीदत्र शत्रुः प्रबलतमः। खानखानामन्त्रणया सर्वतः प्रथमं शत्रोरान्तरिकरहस्यान्यसौ समबुध्यत। शक्तिशालिनो गुप्तचराः सहजमिदं निरवर्तयन्। पुनः किमासीत्? सर्वां परिस्थितिं बुद्ध्वा तत्कालमेवाऽक्रियत इलिचपुरोपर्याक्रमणम्। अभून्महाराजो विजयी। इलिचपुरप्रान्तो विदर्भेण सह संयुक्तोऽभूत्।

## ( 16 )

## महाप्रस्थानम्

मानसिंहमहाराजस्यैतावतीनां सफलतानां मूलकारणमासीत्तस्मिन् विश्वासः स्वामिदत्तः समुत्साहश्च। अकबरो मानसिंहं पुत्रादप्यधिकं प्रणयते स्म। स हि तं विपत्तेः सखायं गौरवस्य च रक्षकं भावयति स्म। बहुषु वार्तासु मतभेदेऽपि न कदाचिद्व्यवहारे प्रतीयते स्म वैषम्यम्। दीनेइलाही सम्बन्धे स्पष्टमभाषिष्ट विरुद्धवाक्यानि मानसिंहः किन्तु न किञ्चिदपि वैमुख्यमवाललम्बे। मानसिंहोऽप्यत एव समयेऽप्यसमयेऽपि च सम्राजोऽनुमतिमन्तरैव स्वयं चक्रे बहूनि कार्याणि। नासीदस्मिन्गन्धोऽपि प्रभावप्रदर्शनस्य, किन्तु प्रत्येककार्यस्य सम्राजमापृच्छ्यैव करणे कार्यक्षतेः सम्भावना, विशेषतश्च तस्मिन्समये यदा हि यातायातस्य सुविधा नासीदद्येव।

किन्तु सर्वमिदं सम्प्रति रूपान्तरितमभूत्। अकबरस्य विश्वासस्तेन सहैवागच्छत् साम्प्रतं त एव शासनाधिकारिणो मानसिंहस्य विरोधं कर्तुं, तं तिरस्कर्तुं च मन्त्रणामबध्नन् ये पुरा

मानसिंहस्य सम्मुखे मस्तकमुत्तोलयितुमपि न प्राभवन्। विजने स्थितस्य महाराजस्य मनसि स्वर्गतसम्राजः साधुस्वभावः,महदुद्देश्यम्, निजं प्रति सत्यं सौहार्दं च वारंवारमावर्तन्ते स्म। युद्ध विजयात्परावर्तमाने मयि कथमिव कण्ठालिङ्गनमकरोत्, कीदृशैरुत्साहसंवर्द्धकैश्च वाक्यैर्मे वीरतां प्राशंसदिति सर्वं स्वप्नायितमभावयत्। कीदृशेन बुद्धिप्रयोगेण परमपरिश्रमेण च दक्षिणदिग्विजयो महाराजेनः कृतः, किन्तु कृतघ्नो जहाँगीरो न प्राकटयल्लेशतोऽपि कार्तज्ञ्यम्।

पुरा स यत्र निजेच्छानुसारं शासनमकरोत्तत्र प्रत्येकवार्तामापृच्छ्यैव सम्राजमनुतिष्ठति सर्वम्। यत्रापि युद्धयात्रायां मानसिंहो न्ययुज्यत नियमेन तदुपर्येको मुसलमाननायकोऽपि प्राहीयत। विषगण्डुषमिव सर्वमिदममर्षयन्महाराजः। स्वां परिस्थितिं विचारयन्नासीदवस्थितो महाराज एकदा, एतावत्येव सहसा समागच्छदेकमात्रसहायकः खानखानामहोदयस्यतेन सह सङ्गन्तुम्। द्वावप्यास्तामवमानयन्त्रणया दुःखितौ। एकवारं येन सह स्वामिभावः स्वीकृतस्तस्य विरोधाचरणं नासीद् द्वाभ्यामप्यनुशीलितं नूनम्। अश्रुकण्ठो महाराजो बाहूपश्लेषममिलत्खानखानामहाभागेन। अभूवन् द्वयोरपि साम्राज्यसङ्कथाः। महाराजोऽकथयत्–'वृद्धमिदं शरीरमाधीन्ययन्त्रणानां नाधुना सोढुं शक्तम् । मोगलसाम्राज्यस्य श्रीवृद्धये मया दशपुत्राणां बलयो दत्ताः सर्वदा प्रियप्रजाभ्यो वियोगमसहीषि, नित्यनवीना विपदः सोढाः। हन्त! तस्यायं परिणामः। एतावती कृतघ्नता। अहो मे घूर्णते शिरः । अवलम्बस्व माम्' इति जल्पन्नेव महाराजः खानखानोत्सङ्गे मूर्छितो न्यपतत्।

हतबुद्धिरभूत्खानखाना। अनेकैरुपचारैर्यथाकथञ्चित्प्रायाञ्चकार चेतनाम्। किन्तु प्राप्तचेतनः पुनस्ता एव दुःखकथाः प्रारेभे महराजः। खानखाना प्रत्यवदत्–'सेयं समयस्य गतिर्महाराज! अस्माभिस्तु निजप्रतिज्ञा तावन्निरूढा, किन्तु सलीमस्य दुर्व्यवहारो भवेत्तस्यैव घातको नूनम्। 'प्रत्युक्तं महाराजेन–'सर्वमिदं सत्यम्। किन्तु राजपुत्रहृदयं न सहते विश्वासहीनताम्। नाहमधिकं जीवेयमिति मे निश्चयः। अतएव केनाप्युपायेन कुमारभावसिंहो मत्समीपमतित्वरितमाह्वातव्यः। '

शीघ्रमेव प्रैष्यन्ताऽऽमेरनगरं दूताः। आम्बेराद्दक्षिणपर्यन्तोपगमे समयव्ययस्त्वनिवार्य एव। एतावत्येव समये महाराजस्य चित्तवृत्तिरुरोतरंन्वतप्यत्। खानखाना अकाण्डदुर्घटनायामस्यां सलीममेव दोषिणमभावयन्निजमानसे। एकैकं क्षणं सोत्कण्ठमसावगणयद् यन्महाराजस्तावत्कालमवश्यं जीवेद् यावत्कालं कुमारभावसिंहोऽत्र समुपेयात्।

महाराजस्य घूर्णते स्म प्रायः शिरः। अभवच्चासौ विसंज्ञः। बहुकालं यावदस्थात्सेयमवस्था। यावच्च नोपायात्कुमारस्तावदेवंप्रायैव समभूदवस्था। मध्ये मध्ये यदा चाभून्महाराजस्य चेतना तदा तदा सहसाऽसौ समपृच्छत्– 'कुमार!' अकस्मादेकः सेवकः समसूचयत्खानखानसमक्षे–'कुमारो भावसिंहः समुपागमत्। म्रियमाणो मीनः समुपालभत् पानीयम्। एकमासादासीत्कुमारदर्शनाभिलाषो महाराजस्य, अद्यासावभूत्पूर्णः।

महाराजस्य यथैवाभूच्चेतना तथैवापश्यदसौ सम्मुखे कुमारम्। प्रासारयदसौ द्वावपिभुजौ। कुमारस्तस्याशयमवबुध्य वक्षसाऽश्लिक्षन्महाराजम्। प्रावहदुभयतोऽपि प्रणयाश्रुप्रवाहः। अहह समयेऽस्मिन् तत्स्थानस्य प्रत्येकपरमाणुतः समुदस्थात्समवेदनाध्वनिः।

'कुमार! नाहमात्मनः प्रजानामशकं निरीक्षणं कर्तुम्, अवसानसमये पत्नीभिरपि नाहं समगंसि। सावधानमिमान् पायलेद् भवान्।'

'तातचरणाः!' किमिदमुदीर्यते? अहो कथमेवं विवर्णमभून्मुखम्? अरे किमिदम्? श्रीमन्तः! दीनाय प्रतिपद्यतामुत्तरम्।

परमुत्तरं किमासीत्? शान्तिः, महाशान्तिः। महाराजस्य प्रशान्तोऽन्तरात्मा प्रावसद्दिव्यलोकनिवासाय।

इलिचपुरे एव समभून्महाराजस्यान्तिमः संस्कारः। परावर्तत ततो निजराजधानीं कुमारः। महाराजस्य देहावसानसंवादमाकर्ण्य राजभक्तानां प्रजानां का भवेदवस्थेति स्वयमनुमेयं पाठकैः।

सलीमः साम्प्रतमात्मनः प्रमादमवेदीत्। महाराजस्याऽभावे साम्राज्यस्य याऽभूदपारा क्षतिस्तां विलोकयतः समभूदनुतापः सलीमस्य। किन्तु किमिदानीं सम्भवेत्? मोगलसाम्राज्यस्य प्रधानस्तम्भे व्यपगते तत्कार्यपूरणाय क्रियमाणोऽन्यः प्रबन्धः कृताकृत एवाभूत्। अभूच्छिथिलं समग्रं शासनम्। किन्तु महाराजस्य देहावसाने सञ्जातोऽनुतापो जहाँगीरस्य जीवने प्राकरोत्परिवर्तनम्। तस्य पितुरादर्शः साम्प्रतं तस्य नेत्रयोः सम्मुखे समनृत्यत्। हिन्दु-मुसलमानयोर्भेदभावं व्यपनीय हिन्दुषु निजपितेव सोऽपि व्यश्वसीत्साम्प्रतम्। महाराजस्यात्मा निजविजये मन्ये प्रचुरं प्रसीदेत्स्वर्गधामनि साम्प्रतम्। महाराजभगवन्तदासस्य सेयमिच्छा-'हिन्दुसंस्कारैः प्रभावितः सलीमो न विरोधी भवेद् हिन्दूनाम्' अद्य पूर्त्युन्मुखा समवालोक्यत।

महाराजमानसिंहस्य जीवनं द्वादशवर्षवयः समारभ्य मरणपर्यन्तं साम्राज्यकार्येष्वेव व्यत्यैत्, अत एवासीत्तद्राजनैतिकम्। किन्तु गृहस्थाश्रमोऽपि महाराजस्य निरौह्यत सम्यक्तया। आसीत्तत्समये क्षत्रियेषु बहुविवाहप्रथा। तदनुसारमभूवन्महाराजस्य २६ विवाहाः। तेषु एकादशपुत्राः पञ्च पुत्र्यश्चाऽजनिषत। एकादशतनयेषु दशपुत्रा महाराजस्य सम्मुख एव समरेषु वैरिणो निघ्नन्तः स्वर्गमारोहन्। एकादशस्तनयः श्रीभावसिंहो राज्यमाशिषत्।

मानमहाराजोऽतीव वदान्यस्वाभावोऽभूत। तस्य दानवीरताया बह्व्यः कथाः प्रसिद्धाः। तथा सोऽयमासीत् कलानां प्रणयी। एतस्य स्मृतयः आम्बेरराज्ये, येषु प्रदेशष्वयं शासको भूत्वा न्यवसत्तेषु, युद्धाय वा प्रातिष्ठत तेषु साम्प्रतमप्युपलभ्यन्ते। मानसिंहो न केवलमाम्बेरस्य, अपि तु भारतमात्रस्य वीराणां मौलिमाणिक्यमासीदिति निष्पक्षपाता ब्रूयुः। अनेन निजजीवने समरा महान्तोऽनुष्ठिताः। सर्वेष्वेव तेषु विजयोऽनेन लब्धः न जातु पराजयो दृष्टः।

३

## भक्तिभावनो भगवान्

**अपि चेत्सुदुराचारो भजते मामनन्यभाक्।**

**साधुरेव स मन्तव्यः सम्यग् व्यवसितो हि सः ।।**

( १ )

पुण्यपुर्या मथुरायास्तासु रथ्यासु, स्वल्पस्वल्पासु विशिखासु च, महानद्य जनसम्मर्दोऽस्ति। परश्शता नरनार्यः कक्ष्ये धौतं धातुकलशं च वहन्त्यो यमुनातटमभिसरन्ति। उत्साहिनः शिशवो यमुनायां जलक्रीडनलालसया प्रयान्ति पुरतो धावन्तः। कालिन्दीघट्टगता आपणाः सन्ति साम्प्रतं वस्तुभिः पूर्णाः। क्रेतारः संघशः समवयन्ति प्रत्येकमापणम्। तुलसीमाल्यादि विक्रेतर्णिामद्योच्चगता ग्रहाः। निःशङ्कमद्य निबध्यते यात्रिणां गले 'कण्ठी'। समारोहस्याऽस्य तदिदमेव मूलकारणं यदद्य कार्तिकशुक्ला द्वितीया (यमद्वितीया)। पुण्यतमेऽस्मिन्पर्वणि पावनसलिलायाः सूर्यतनयायाः स्नानं विशिष्य पुण्यप्रदं परिगण्यते। दूरदूरदेशस्था यात्रिणोऽद्य भगवत्याः कलिन्दनन्दिन्याः पावनपयसि निकाममामज्ज-यितुमात्मानमुपगता इतस्ततः। भूयानद्य घट्टेषु जनसङ्घट्टः। सकृदवमज्ज्य जलान्निःसरणमपि परिगण्यते परमपुरुषार्थ इव।

स्त्रैणतीर्थेषु महिलानामपारोऽद्य सञ्चारः। कियत्यः किल हिन्दुयुवत्यः पुण्यप्राप्तिनिमित्ताय सोत्साहमवगाहहन्ते कालिन्दीम्। काश्चित्तीर्थसोपानमारुढा भगवन्तं भास्वन्तं प्रणमन्ति, तर्हि काश्चित् – 'तिहारो दरस मोहि भावै श्रीयमुने' इत्यादि प्रोच्चारयन्त्यः प्रभातगीतिमेव गौरवाद् गुनगुनायन्ति। यास्तु पूजां पाठं वा किमपि न जानन्ति ताः केवलं 'जय जमुने जय जमुने' इति हार्दिकस्तवनेनैव देवभजने निजां भक्तिं प्रकटयन्ति। नवीना मीननयनास्तत्रापि ग्रहगते एव प्रपञ्चे संलीनाः। काचित्कथमिव निर्विष्टा दीपावलीति कथां प्रथयामास तर्हि काचिदलक्तकस्य केशगुम्फनस्य वा गाथामुद्गिरति स्म। यास्त्वितोऽपि लज्जाशीलास्तासां कर्णे कर्णे एवं प्रेमवर्णनाः प्रारेभिरे। एवंविधे मीमांसनीये मार्मिकमनोज्ञसमये समारभ्यत तावदकस्मादेव घट्टेऽस्मिन्नकाण्डकोलाहलः।

घट्टस्यैकस्मिन्पार्श्वे युवतिरेकाऽऽसीत् स्नाती, या हि समाजे कलङ्किनी बालविधवा। नामासीत्कमलेति। घट्टस्य बहुतराः स्त्रियस्तामेतां परिचिन्वन्ति स्म। आसीदेतस्य कारणमपि। यस्मिन्प्रतिवेशे कमलाया आसीन्निवासस्तत्रत्या भूयस्यो महिलाः समायासिषुरत्र स्नातुम्। पुण्येऽस्मिन्पर्वदिवसे कुलाङ्गनाभिः सह कुलकलङ्किनीमेतां स्नातीमवलोक्य सतीत्वतेजसा तिग्मद्युतिः सावित्र्याः प्रतिमूर्तिः सेयं श्रीमती महिलामण्डली क्रोधेन घृणया च गाढतरमगर्जत्।

किन्तु कथालेखकेन तथ्यमिदमावेदनीयमेव यद् यामिमां वेश्यां परिजानन्ति न सा काचिद्वारवनिता। यौवनस्य प्रलोभने पतिता बालविधवा कमला प्रतिवेशिनैकेन युवकेन सह गृहाद्बहिरभूत्। न्यवात्सीत्कानिचन दिनानि निजाऽऽनेत्रा युवकेन सह पृथग् भाटकभवने रथ्यायाः प्रतिमुखे एव। साम्प्रतं साधारणे प्रतिवेशे निवसति गृहस्थ इव साधारणतया। प्रशान्तायां यौवनवात्यायामवष्टम्भनात्कमला न्यरुणत् निजात्मानम्। किन्तु किमिदानीं सम्भवेत्? गार्हस्थ्यं परित्यज्य बहिर्निर्गतानां वनितानां साहचर्यं कथं वा पावनः प्राचीनसमाजः समनुमोदेत्? यौवनस्यैकमात्रमिदं स्खलितं कण्टकमिव क्लिश्नात्यन्तःकरणे कमलाम्। प्रणयिनं प्रति नासावतिष्ठद्भावः। भूयांसं सा विजन एवं व्यत्यगमयत्। यमुनास्नानदेवदर्शनादिषु व्यतिगच्छति बहुतरः समयः। किन्तु यस्मिन्समये निजाऽऽनेत्रा सह निवसति स्म कमला रथ्यामुखभवने, तस्मिन्नेव समये लोकानां भावः कमलाया विषये विकृतिं भेजे। लोकास्तां वेश्यामिवाऽस्पृश्यां मेनिरे, कलङ्किनीमिमां परिकलय्य कुलाङ्गनासु कुटिलाऽऽलोचना प्राचलत्।

इदमेवासीत्कारणं यद् या पुरन्ध्री स्तोत्रपाठे संलग्नासीत्सा स्तुतिमिमां विमुच्य अक्षिभ्रुवं निकुच्य सामर्षमवोचत्– ''अपेहि रे पापिनि, इहैव किं मर्तुमवकाशमलब्धाः' या सूर्यदेवाय प्रणामे पर्यस्तासीत्सा प्रणामं परिमुच्य ज्येष्ठमासस्य चण्डांशुरिव जाज्वल्यमाना सोत्तेजनमगर्जत्– 'दूरमपसर! न किं विलोकसे यदस्मिन् स्थाने वयं स्नामः।'

कमला कलङ्किनी किल समाजे। यत्पापं प्रक्षालितमपि नापैति, परिवृता तेन सा। पुनः सा किमिति यमुनाऽवगाहनाय व्रजति? यमुनायाः पावनपयसा किं वेश्यायाः पातकमपोहितुं पार्यते? अवश्यम्, द्वयोरपि नयनयोः सुरतटिनीसरस्वतीभ्यां यमुनासलिलस्य सङ्गमे वेश्या पातकमपि प्रक्षालयितुं पार्यत इति पुराणेभ्यः प्रतीमः।

अस्तु यत्किञ्चित्, कमला प्रत्यहं यमुनायां स्नातुमागच्छति, अद्यापि तथैवाऽऽगच्छत्। किन्त्वितः पूर्वं नैवंविधस्तीव्रस्तिरस्कारोऽनया सोढव्योऽभूत्। किन्त्वथापि नेयमभूद्धैर्यतो विचिलिता। अश्रुपूर्णमाननमवनमयन्त्येव सा शनैः शनैः समापयामास स्नानम्। पित्तलकलशं कालिन्दीपयसा समवपूर्य घट्टस्योपरि समायासीदसौ। घट्टस्यैकस्मिन्कोणे स्थिता भूरि बिभ्यती सा सलिलं वर्षद्भ्यां नयनाभ्यां विलोकयामास सकृत्पावनसलिलां भगवतीं कालिन्दीम्। कलशं कक्ष्ये कुर्वन्त्येव प्राणंसीद्विनम्रीभूय। तत श्यानमेघमालामिव मेचककेशकलापं पृष्ठे विलुलयन्ती सलिलार्द्रवसना अर्द्धावृतशिरोभागैव सा गृहमार्गमुदलङ्घयत्।

## ( २ )

यमुनातटात्कमलाया निवासगृहमासीदतिदूरे। अर्द्धक्रोशान्न भवेन्निकटवर्ति। मार्गमुल्लङ्घयन्त्याः समुद्भूच्चेतसि विचारोऽस्याः– 'सर्वे जना देवाय जलमर्पयितुं व्रजन्ति। बहुलाः स्त्रियो देवमन्दिरे ताम्बूलगृहस्य पुष्पगुम्फनभवनस्य वा सेवामारचयन्ति। कतिचिद् देवभाण्डागारे तण्डुलगोधूमादिधान्यानां निस्तुषीकरणस्य शोधनस्य वा सेवामङ्गीकुर्वन्ति, पुनः किमहं न

कुर्याम्? मयाऽऽहृतं तोयं किं नाङ्गीकुर्यात्केशवः? नाङ्गीकुर्याच्चेदथाप्यहं तन्मन्दिरस्य सोपानमेव पयसा प्रक्षालयेयम्। किन्त्वस्ति किं तस्याप्यधिकारो मह्यम्? मम जलं नीचजातयोऽपि नाङ्गीकुर्वन्ति। मम जल स्पर्शेन तेऽप्यपवित्राः सम्पद्यन्ते, पुनरहं प्राङ्गणं वा सोपानं वा कथङ्कारं वा शक्नुयां प्रक्षालयितुं पयसा? अस्तु पश्याम्यद्य मदनमोहनो सेवां स्वीकरोति न वेति।

वार्तामिमां मनस्यावर्तयन्ती कमला मार्गमासीदुल्लङ्घयन्ती। यमुनातीर्थेभ्यः स्वल्पान्तर एवासीद् भगवतो मदनमोहनस्य सुप्रसिद्धं मन्दिरम्। विशालकायस्य मन्दिरस्य चतुर्दिक्ष्वेवासन् जनतायातायातस्य साधारणरथ्या याः किल 'परिक्रमा' नाम्ना लोकेषु परिचिताः। एतस्याः परिक्रमाया दक्षिणप्रान्ते आसीत्कमलाया निवासः। तस्यां रथ्यायामन्यमार्गाऽपेक्षया स्वल्पं यातायातं जनानाम्, गृहसंख्याऽपि परिमिता।

कमला तस्मिन्दिने निवाससदनमत्वा जलकलशमुद्वहन्ती मदनमोहनस्य मन्दिरमवाप्नोत्। मन्दिरस्य प्राङ्गणे समागत्य न्यरुध्यत सा। अग्रे गमनस्य 'जगन्मोहन' सोपानारोहणस्य वा नाभूत्तस्याः साहसम्। परिचितान्मनुष्यानालोक्यैव प्रोदभवद्व्याकुलता तस्याः। लज्जैव किम्, निजोपरि समभूत्तस्या पूर्णरूपेण घृणा। सोपानस्य समीपे भित्तिलग्ना सा व्यत्यगमयद्भूयांसं कालम्। आसीत्तस्या मनसि कामना यन्मन्दिरस्य प्राङ्गणं निजकलशजलेन प्रक्षाल्य देवसेवायाः सुकृते सञ्चिनुयां कञ्चिदंशम्, किन्तु नाऽभवत्साहसम्। समाजे सा कलङ्किनी, तत्संस्पृष्टं जलं सुतरामपवित्रम्। कमला कमपि न किञ्चिदुक्त्वा पाषाणप्रतिमेव समवास्थित तूष्णीमेकपार्श्वे।

मन्दिरस्य सेविका आभीरी एका सम्मार्जिनीमादाय सममार्जयन्मन्दिरस्य प्राङ्गणम्। परिचिनोति स्म सा कमलाम्। अत्रावस्थितां कमलामवलोक्य समभाषत सा– 'किमित्यत्रा-स्थितासि, दूरमपसर। यावत्सम्मार्जयामि देवाङ्गणम्।'

कमला दूरमपासरत्। आभीरी क्रुद्धा भूत्वा किञ्चिदुच्चैरवादीत्– त्वं किं वाञ्छसि? कमला बिभ्यती रुद्धस्वरे प्रत्यवदत् – 'ममैतेन कलशजलेन... ।' नाशक्नोदग्रे वक्तुम्। नाभवत्साहसमेवाऽग्रे वक्तुम्।

'तव कलशजलस्य किं भवेद्धोः? किं देवं स्नायपितुमिच्छसि?.

'नैव'

'तर्हि'

'सोपानं बहिः प्राङ्गणं च वाञ्छामि प्रक्षालयतिुम्।'

मन्दिरस्य 'समाधानी' जगन्मोहनेऽवस्थितः कारणविशेषेण दर्शनाभिलाषिणां दर्शनं करोति स्म। पूर्वजातो द्वयोः संलपापस्तस्यापि कर्णकुहरे प्राविशदंशतः। अग्रे समुपसृत्य सोऽपि प्राङ्गणाभिमुखमवालोकयत्। गहनगभीरतया चाऽपृच्छत्– 'कं कोलाहलमारचयसि रे!'

सोत्तेजनमजलाद्भृत्या- 'कोलाहल: क: स्यात्? लोकानामभिमान एव न माति मानसकन्दरायाम्। वेश्या सलिलमादाय समागताऽस्ति, कामयते च यद्देवमन्दिरं पयसा प्रक्षालयेयम्।'

देवस्य प्रकट: परिषद: 'समाधानिमहाभाग:' सगौरवभरेण स्वरेण कमलामुपदिदेश- ''पश्य, भवत्या स्पृष्टं जलं न कस्मिन्नप्युपयोगे समायायात्। प्राङ्गणप्रक्षालनेऽपि नेदं परिगृह्येत। यावत्प्राङ्गणं न शुष्येत्तावत्तदुपरि लोकानां पादपतनस्य शङ्का।''

कमला सुभृशमवाङ्मुख्येव समाधानिमहोदयस्याज्ञावाक्यमिदमश्रृणोत्। ततो नितान्तं विषण्णमना शनै: शनै: प्राङ्गणादपसृत्य सा मन्दिरस्य पृष्ठगते पुष्पोद्याने समवाप्नोत्। तत्र किञ्चित्कालं विलम्ब्य व्यचिन्तयत्सा किञ्चिच्चेतसि। ततश्चतुर्दिक्षु चक्षुर्निक्षिप्य व्यलोकयत् सा सभयकम्पं यदत्रापि तु कश्चिन्नावालोकयति मे निवारक:। ततो विजनं विलोक्य न्यषीददसौ भूमौ। भगवन्तं मदनमोहनमेकान्तहृदयेन ध्यात्वा तदिदमखिलमपि कलशजलमर्घ्यमिव भूमौ न्यपातयत्। सलिलसिक्तां तां मृत्तिकामादाय ललाटे जिह्वायां च सश्रद्धं न्यदधात्। एतदनन्तरं भगवत उद्देश्येन निजमस्तकं भूमावाघृष्य प्राणमद्भगवन्तं सभक्ति। ततो रिक्तं जलकलशं कक्ष्ये वहन्ती सा गृहाभिमुखमचलत्।

## ( ३ )

वर्षस्य त्रिशतमूनषष्टि च दिनान्यतिलङ्घ्य पुनरुपायासीदद्य 'यमद्वितीया'। वर्षेऽस्मिन्कमला प्रत्यहं यमुनास्नानायाऽगच्छत्। यमुनाजलेन कलशमापूर्य, मदनमोहनमन्दिरस्य पृष्ठदेशे देवकुसुमोद्याने निषद्य, भगवत उद्देश्येन प्रत्यहं सा कलशजलेनाऽर्घ्यमदात्।

अद्य पुण्यतमं पर्वं, पुन: प्रत्युपस्थिता यमद्वितीया। अद्य कमला महति प्रत्यूषे समुत्थाय प्रायासीद्यमुनास्नानाय। प्रत्यहमिवाऽद्यापि सा पावनपयसा कलशमापूर्य भक्ति-गद्गदकण्ठेन भगवतीं कालिन्दीमभिनन्द्य गृहाभिमुखमचलत्। कमला नाऽस्मिन्दिने गृहं प्रत्यावर्तिष्ट, न वा प्रतिदिनमिव मन्दिरस्य पुष्पोद्याने एव समुपातिष्ठत्। अद्य सा यमुनासलिलभृतं कुम्भमादाय सलिलार्द्रवसना मन्दिरस्य पुर: प्राङ्गणे समवस्थिता। भगवतो दर्शनाय हृदयमस्या व्याकुलम्, प्रवहति नेत्राभ्यां निरर्गलं नीरम्। सा वाञ्छति पुनरेकवारं भगवतो दर्शनं दूरादपि समवाप्नुयाम्। मन्दिरस्य 'जगन्मोहनं' प्रक्षाल्य न सा सम्प्रति देवसेवापुष्पमान्मनोभागे संविभक्तुमिच्छति। सा तु साम्प्रतं भक्तसङ्कुलसमवायादेव केवलमेकवारं मदनमोहनस्य मनोहरां मूर्तिमालोकयितुमभिवाञ्छति। वत्सरात्पूर्वमस्मिन्नेव प्राङ्गणे दूरत: समवस्थाय भगवतो मनोहरां मूर्तिमवालोकयत्सा। तस्मिन् पर्वदिने एकवारस्य भगवतो दर्शन एव मदनमोहनस्य मनोज्ञां मूर्तिमात्मनो मानसे सुदृढमङ्कयामास कमला। तद्दिनादारभ्याऽद्यपर्यन्तं पूर्णमपि संवत्सरं सा

तन्मूर्तेर्ध्यानेनैव निरन्तरमत्यवाहयत्। मन्दिरस्य पृष्ठभागे, आम्रवृक्षस्याधस्तादवस्थाय, तामेव मञ्जुमूर्तिमेकमनसा ध्यायन्ती कलशसलिलेन सा प्रत्यहमेवार्घ्यमदादेकवर्षपर्यन्तम्। ध्यानद्वारा हृदयपटले चित्रितां तामेतां मनोहरमूर्तिं प्रत्यक्षदर्शनेन पुनरहा समुज्ज्वलां कर्तुमुत्कटा वासना तामद्य पुनर्मन्दिरे समवाकर्षत्। किं न दद्याद्दर्शनं भक्तवत्सलो भगवान्?

निजमन्दिरस्याऽऽवरणपटो नेदानीं पर्यन्तमुदघाट्यत। समाधानिमहाशयोऽपि केनचित्कार्येण मन्दिराद्बहिरगच्छत्। कमला जलकलशं वहन्ती प्राङ्गणस्यैकपार्श्वे समवास्थित। एवमवस्थितायास्तस्या व्यत्यैद्भूयान् समयः। जलपूर्णं कलशं श्रोणिदेशे विलम्बाद् वहन्ती सा सम्प्रति नितान्तमभूच्छ्रान्ता। किन्तु भगवते मदनमोहनाय समानीतं कलशं सा कथं स्थापयेद्भूमौ? रिक्तमपि तमेनं कर्तु नाऽवाञ्छच्चेतसा। सा निश्चितमकरोन्मनसि यदद्य प्राङ्गणकोणाद्भगवतो दर्शनं कुर्वन्त्येव भगवतश्चरणयोरुपरि कलशसलिलेनार्घ्यप्रदानस्य भावनां कुर्याम्। किन्तु दुर्लभमभूदद्य देवस्य दर्शनम्। भारेण कमला नितान्तमेव विह्वला समवर्तिष्ट। श्रोणेरुपरि भारं धृत्वा समवस्थानस्य नासीत्किञ्चिदपि शक्तिः। भगवतो ध्यानं कृत्वा सा हि नितान्तं हीनतया प्रार्थयत- 'स्वामिन! नेदानीमहं स्थातुं शकुयाम्। क्षणार्थमेकवारं ते मधुरदर्शनं मे देहि।'

मन्दिरस्य मुख्यार्चकस्तस्मिन्नेव समये कमलायाः सम्मुखतो भूत्वा मन्दिराभिमुखमगमत्। नासौ प्रत्यहं सेवायां स्नाति। वार्धक्यवशादस्मात्पुण्य कर्मणस्तेनाऽवकाशोऽवश्यं गृहीतस्तथापि भगवत्सेवायां दृढानुरागवशात् स्वेच्छया कदाचित्कदाचिदसौ सेवायै स्नाति। अद्यापि सेवायै मन्दिराभिमुखं प्रयाति स्म। भगवदर्चनाय मन्दिरमभिसरन्व्यलोकयदसौ प्राङ्गणस्यैकस्मिन्कोणे काचिदबला बहोः कालाज्जलकलशं वहन्ती स्थितास्ति। अपृच्छदसौ -'पुत्रि किं वाञ्छसि?'

अत्रैतदभिसूचनं समुचितं भवेद्यन्मुख्यार्चको न परिचिनोति स्म कमलाम्, किन्तु कमला मुख्यार्चकमहाभागं सम्यक् पर्यचिनोत्, श्रद्धां चाऽप्यकरोत्। स वास्तव एव भगवद्भक्तोऽभूत् उपासनायास्तत्त्वं च सम्यगवेदीत्। स हि सर्वेषामेव सम्प्रदायानां भक्तिग्रन्थानतिप्रेम्णा मीमांसितवान्। बाल्यस्य यौवनकालस्य वा नास्माकं विशिष्य परिचयः किन्तु वर्तमानकाले सोऽयमतीव श्रद्धेयः सर्वेषाम्। भगवति स्वल्पमपि कस्यचित्सत्यानुरागं विलोक्य भवत्यसौ साधुनयनः पुलकितवदनश्च। सोऽयं विद्वान् भगवद्भक्तश्च, वयोवृद्धो मार्मिकश्च, सरलश्चोदारश्च। यः किलैकवारमप्यस्य परिचयं प्राप्नोति अवश्यमसौ मुख्यार्चकमहानुभावे हार्दिकीं श्रद्धामावहति।

इतः पूर्वं न कदाचित्कमला मुख्यार्चकमहाभागमेतावन्निकटाद्विलोकयतुम-लब्धाऽवसरम्। शुभ्रकेशस्य देवकान्तिमण्डितस्य महापुरुषस्याऽस्य सात्त्विकीं मूर्तिमालोक्य भक्त्याऽप्लुतचित्ता सा मौनमस्थात्, न किञ्चिदुत्तरं मुखादुदगच्छत्।

प्रश्नस्योत्तरमप्राप्य वृद्धो मुख्यार्चकः पुनः ससान्त्वनमपृच्छत्- 'कथय वत्से!

किमर्थयसे ? कमला नाधुनाऽपि संलीपतुमपारयत् मुख्यार्चकोऽवोचत्–' किं भगवते सेवा – जलमानीतवत्यसि ?' नैव।

'तर्हि कि वाञ्छसि ?'

'मदनमोहनस्यैकवारं.....'

'दर्शनं कर्तुमिच्छसि ?'

'एहि, तर्हि मामनुसर, साम्प्रतमेव पटमुद्घाटयामि। समीपाऽवस्थिता भूत्वा सम्यग् विधेहि भगवतो दर्शनम्।' इत्युक्त्वा सरभसमसौ मन्दिरं प्राविशत्। मन्दिरद्वारस्य जवनिकामपसार्य दृष्टं तेन यत्सा स्त्री न सम्मुखेऽस्ति। दूरे दृष्टिं प्रसार्य दृष्टं तेन, यत्सा नीचैः प्राङ्गण एव सन्तिष्ठते। मुख्यार्चकः सङ्केतमकरोत्– 'उपर्यागत्य कुरुदर्शनं भगवतः'।

कमला एकचित्ता भूत्वाऽधस्तादेव देवदर्शनं व्यदधात्। ध्यानभङ्गे सति व्यालोकयदसौ यन्मुख्यार्चको मामाह्वयति। दर्शनं कुर्वती सा व्यग्रभावेनाग्रतोऽवश्यमसरत्। किन्तु 'जगन्मोहनस्य' सोपानमुपगम्य सा सन्निरुद्धाऽभूत्तत्रैव। नाग्रे शशाक समभिसर्तुम्। साम्प्रतं मुख्यार्चकस्तारस्वरेणाह्वयत्– 'उपरि समागत्य विलोकस्व भगवन्तं धैर्येण।'

कमलायाश्चेतसि नितान्तमासीद् व्याकुलता यत्समीपमुपगत्य सम्यग् विदध्यां दर्शनं भगवतः, किन्तु प्रबलामिमां वासनां यथाकथञ्चिदभिभूय नतमस्तकैव सा धीरभावेनावादीत् – 'अग्रे समुपगमस्य न मेऽधिकारः।'

**मुख्यार्चकः** – अधिकारः किमिति नाऽस्ति वत्से ? यस्य हि भगवद्दर्शनस्य प्रबलोत्कण्ठा तस्य सर्वोऽप्यधिकारः।

**कमला** – अहम् .... अहम् .....

**मुख्यार्चकः** – त्वं काऽसि ?

**कमला** – अहं कलङ्किनी, समाजाद्बहिष्कृता।

**मुख्यार्चकः** – नैवम्, नाऽसि त्वं कलङ्किनी, त्वं हि भगवद्भक्तः। सोपानमारुह्य निःशङ्कमग्रमुपेहि 'कमला भगवतो भक्तः।' हन्त न सा साम्प्रतं पर्यन्तमिदमजानात्। तस्या शरीरे विद्युच्छक्तिरिव प्रबलं प्रावहद्भक्तिप्रवाहः। न साम्प्रतं तस्याः कश्चिदवरोधः। सा सरभसमारुह्य सोपानं, जगन्मोहनस्य प्रारम्भप्राञ्चल एव निभृतमवातिष्ठत।

## ( ४ )

एतस्मिन्नेव समये पृष्ठभागात् समाधानिमहाभागस्य कण्ठरवः समवाकर्ण्यत। स हि केनचिद्वैष्णवेन सह संलापं कुर्वन्समायासीज्जगन्मोहनाऽभिमुखम्। कमलां निजमन्दिरस्याग्रप्राङ्गणे

समवस्थितामवलोक्य स हि सहसैवाऽग्निशर्मा समभूत्। अवोचच्च कर्कशकण्ठेन 'अभाग्ये! जगन्मोहनमारूढासि? हन्त एतावत्ते धार्ष्ट्यम्! अपेहि मन्दे! त्वरितमितो नीचैः'।

कमलायाः स आनन्दश्चोत्साहश्च व्यलुप्यत तत्क्षणमेवाऽत्यन्तम्। पर्यभूयत दीनायास्तस्या हृदयं सङ्कोचेनानुतापेन च। आत्मग्लान्या तस्याः पादौ पाषाणायितावभूताम्, तथापि सा ततः परावर्तनस्य प्रयत्नं व्यदधात्। एतस्मिन्नेव समये निजमन्दिराद्बहिरुपगत्य मुख्यार्चकमहाभागः समाधानिनमब्रवीत्– 'एतस्याः स्त्रियाः किमिति करोषि तिरस्कारम्?

**समाधानिमहाभागः** – श्रीमन् ! दृश्यतां मन्दिरस्य समीपमेवेयमुपगता।

**मुख्यार्चकः** –तर्हि कोऽस्मिन्नपराधः संवृत्तः ?

**समाधानिमहाभागः** – इयं समाजस्य कलङ्किनी, वेश्या।

**मुख्यार्चकः**– वेश्यायाः कृते किं भगवद्दर्शनस्य निषेधः ?

**समाधानिमहाभागः**– दर्शनं कामं न निषिद्धं किन्तु लोकानां समीपे समुपगत्य स्पर्शनमवश्यं निषिद्धम्।

**मुख्यार्चकः**– केनेदं भवते बोधितम्? महामहत्सु पीठस्थानेषु किं भवति?

**समाधानिमहाभागः** – महतां देवधाम्नां कृते न कोऽपि नियमः।

**मुख्यार्चकः** – तर्हि कस्याऽपि देवमन्दिरस्य कृते न कश्चिन्नियमः। मम सुदृढो विश्वासो यद् घोरपातकिनः स्पर्शादपि भगवान्न कदाचिदपवित्रो भवति।

**समाधानिमहाभागः** – तर्हि पञ्चामृतस्नानादिना अङ्गशोधनस्य व्यवस्था किमिति प्रचलिता?

**मुख्यार्चकः** – सा ह्यस्मदादीनां कृते। न भगवतः शोधनाय। भक्तजना भगवतः शोधनव्यवस्थां कृत्वा निजमनसः शोधनं कुर्वन्ति। यः किल 'भगवान्' जडजङ्गमानां सर्वेषां स्वामी, स कदाचिदप्यपवित्रो न जायते। भवतु, भगवतस्तु नैषा स्पर्शं कृतवती, इयं तु केवलमङ्गनादग्रे समागत्य 'जगन्मोहने' समवस्थिता। किमेतावन्मात्रेणैव मन्दिरमपवित्रं संवृत्तम्?

**समाधानिमहाभागः** – किमिति न संवृत्तम्?

समाधानिमहोदयमत्यारूढं दृष्ट्वा प्रशान्तमहासागरेऽपि तरङ्ग एकः समुदतिष्ठत्। मुख्यार्चकः किञ्चिदुत्तेजनास्वरे साम्प्रतमवोचत्– सम्यगिदम्, प्रत्यक्षदैवतस्य श्रीमदनमोहनस्य सम्मुखे समवस्थाय किं भवान् दृढतया वक्तुं शक्नुयाद् यद् भवान् वा अहं वा मन्दिरेऽस्मिन्सम्प्रविश्य मन्दिरस्याऽस्यापवित्रतां नोत्पादयावः? समाज सेयं प्रत्यक्षरूपेण कामं कलङ्किनी, किन्तु भवान् वा अहं वा अभ्यन्तरेऽपि किं 'दुग्धधौताः' इव निर्लिप्ताः सिद्धा

भविष्याव: ? यौवनस्य घटना: संस्मृत्य शुद्धान्त:करणेन किञ्चिद् ब्रूहि।

समाधानिमहाशयोऽस्मिन्प्रश्ने शिथिलक्रमोऽभूत्। किञ्चित्कालमवचनो भूत्वा पर्यन्ते कमलाभिमुखमालोकयन्स समुवाच– ''किमये! पुनरद्य भगवत्प्राङ्गणं प्रक्षालयितुं समुपागता ? गच्छ, अद्ययावद्यस्मिन् स्थाने जलं निषिक्तवती तत्रैव नीरं निषिञ्चे: ।''

मुख्यार्चकेन पृष्टम्– 'नित्यं कस्मिन्स्थले जलं निषिञ्चिति ?'

**समाधानिमहाभाग**:– मन्दिरस्य पुष्पोद्याने।

**मुख्यार्चक**: – आगच्छ, पश्याव:।

द्वावपि तत: समवतीर्य मन्दिरस्य पृष्ठदेशे उद्यानमव्रजताम्। तत्र आम्रवृक्षस्यैकस्याधस्तात् प्रत्यहं जलधारानिषेकेण निपतितं गर्तमेकमलोकयताम्। तं निर्दिश्य प्रोक्तं समाधानिना– 'इयमभाग्या प्रत्यहमत्रैव जलं निषिञ्चति।

**मुख्यार्चक**: – जलं कुत: समाहरति ?

**समाधानिमहाभाग**:– क इदं वेद, किन्तु लोका कथयन्ति यत्प्रत्यहं यमुनास्नानाय गच्छति, तत एव समागत्य नित्यमस्मिन्स्थाने सलिललेनार्घ्यं प्रयच्छति।

**मुख्यार्चक**:– तदिदं जलं भगवत: सलिलगृहे किमिति न प्रयच्छति ?

**समाधानिमहाभाग**:– कलङ्किन्या: सलिलेन किं देवसेवा भवितुमर्हति ? एकवत्सरात्पूर्वमद्यैव दिवसे जगन्मोहनस्थलं प्रक्षालयितुं सा सलिलं समाहरत्, तदेव प्रक्षालयितुं नास्यै यद्याज्ञा प्रादीयत्, तर्हि तस्या जलं सेवायां तु कथङ्कारमुपयुज्येत ?

**मुख्यार्चक**: – तत्रभवतो विचारेण नोपयुज्येत, अहमुपयोगे नेष्यामि। इत्युक्त्वा मन्दिरमसौ परावर्तिष्ट। तत्रागतेन दृष्टं तेन यज्जगन्मोहनारोहणस्य सोपानस्य समीपे नीचै: कृतमस्तका कमला निश्चलभावेनाऽवस्थितास्ति। मुख्यार्चकेन प्रोक्तम्– 'त्वं जलकलशमिमं भगवतो जलगृहे समाहर। कमलाया नाभूदस्यां वार्तायां विश्वास:। सा हि परावृत्य पश्चात्प्रैक्षत्, कदाचित्सेयं वार्ता अन्यं प्रति प्रोक्ता मुख्यार्चकमहाभागेन। किन्तु निजस्य पृष्ठभागे नान्य: कश्चिदवलोकित: कमलया। सम्प्रति साश्चर्यया दृशा मुख्यार्चक महानुभावं प्रति विलुलोके कमला। स महाभाग पुनराज्ञापयामास कमलाम्– 'जलमिदं जलगृहे समानय।'

किंकर्तव्यताविमूढा कमला महता सङ्कोचेन छिन्नाणि पदान्यग्रे गत्वा 'जगन्मोहने निश्चलमवस्थिता। एतत्स्थानं तस्या: कृते परमपावनं तीर्थक्षेत्रम्। तस्मिन् स्थानेऽद्यावधि नैषा प्रवेष्टुमधिकारं प्राप। ये जना अस्मिन् स्थाने स्थित्वा भगवतो दर्शनं विदधति कमला भावयामास तान् भाग्यवत:। एतत्सौभाग्यलब्धये सा प्रवाहयामास बहून्वारान् वाष्पसलिलम्। अद्य कमला भगवतो भक्त्वत्सलतया तस्मिन्नेव स्थानेऽवस्थिता।

कमला न जगाम जलगृहे। जगन्मोहन एव एकस्मिन्पार्श्वे किञ्चित्स्थानं जलेन द्विः 'परिमार्ज्य स्थापितवती जलकलशम्। मुख्यार्चकमहाभागः स्वयं समुपगम्य तं जलकुम्भं भगवतो भवने निन्ये, क्षण एव च रिक्तीकृतं कलशं स्थापयामास यथास्थानम्। समागत्य दृष्टं तेन – यत्प्राङ्गणस्य धूलौ लोठन्ती कमला साष्टाङ्गप्रणामं प्रकरोति भगवते मदनमोहनाय। यस्मिन्समये भूमितः सा समुत्थितवती तस्मिन्समये कपोलयोर्वक्षसि च तस्याः प्रावहत्प्रबलः प्रेमाश्रुप्रवाहः। देवोपमो मुख्यार्चकमहाभागस्तामिमां लक्ष्यीकुर्वन्नवोचत्– 'वत्से! त्वमद्यावधि यया भक्त्या भगवतो दर्शनं विहितवती, सा भक्तिस्ते भूयान्नितान्तमक्षयेति प्रददे तुभ्यमाशीर्वादम्। भक्तिप्लुतं चेतसा भगवन्तं लक्ष्यीकृत्य कामं कस्मन्नपि स्थाने प्रदीयतामर्घ्यम्, भक्तवत्सलो भगवान्प्रेम्णा तत्स्वीकरोति। सर्वान्तर्यामी अग्रतो वा पृष्ठतो वापि न किञ्चित्प्रतीक्षते। ब्राह्मणो वा शूद्रो वा, गङ्गाजलं वा सामान्यसलिलं वा नैतयोर्भेददृष्टिं बिभर्ति भगवान्। स त्वभिलषति भक्तस्य हृदयम्। समर्पय तस्मै त्वमात्मनो हृदयम्। निजपापानां कृते रुदिहि निरन्तरम्। अपमृज्येरंस्तव सर्वाण्यपि पातकानि।'

मुख्यार्चकमहाभागस्य चरणौ नयननीरेण निषिच्य कमला परावर्तिष्ट निजनिवासम्।

## ( ५ )

गृहाङ्गणे आम्रवृक्षस्याधोनिषण्ण एको युवको विधत्ते स्म धूम्रपानम्। स ह्यपृच्छत्कमलाम्– 'अद्य कथमेतावान्विलम्बः?'

कमला किञ्चिदप्युत्तरमप्रदाय प्राविशन्निजप्रकोष्ठम्, निबबन्ध चाभ्यन्तरतः कपाटयोरर्गलाम्। मृत्तिकाभृतायां भूमौ दीनभावेन लोठन्ती सा मुक्तहृदयमरोदीत्। नासीत्तस्या रोदनस्य विरामो वा विश्रामो वा। नैतद्भवेद्विदितं कस्यापीति वस्त्रेण मुखमापूर्य निःशब्दमियमरुदत्। आवर्तते स्म तस्या हृदये मुहुर्मुहुरिदमेव– 'पापानां कृते रुदिहि निरन्तरम्। अपमृज्येरंस्तव सर्वाण्यपि पातकानि।' निर्भरं रुदती कमला मनस्येव भगवन्तं लक्ष्यीकृत्य सदैन्यमब्रूत– ''भगवन्नहं जीवनपर्यन्तं निरन्तरं रोदिष्यामि। रोदित्वा रोदित्वाऽहमात्मनो हृदयरक्तमक्ष्णोर्द्वारा प्रवाहयिष्यामि बहिः। हे दयामय! मार्जय मे पातकानि।'

तस्मिन्नेव समये समाजघान कश्चिद् द्वारार्गलाम्। कमला चकिता भूत्वा विद्युदिव त्वरिततरमुदतिष्ठत्। अतियत्नेन सा समवृणोदात्मानम्, ममार्ज नयनयोर्जलम्। किन्तु नोद्घाटयामास तथापि द्वारार्गलाम्। शय्योपरि निश्चला स्थित्वा समचिन्तयन्निजाऽदृष्टस्य घटनाः। सम्प्रति द्वारकपाटोपरि समभूवन् प्रबलतमाः समाघाताः। किन्तु कमला नास्योपरि दृष्टिमात्रमप्यक्षिपत्। किञ्चित्कालान्तरं निजमनसि कञ्चिद्विचारं स्थिरीकृत्य सा समुद्घाटयामास भवनद्वारम्।

द्वारे धूमपात्रहस्तः स एव युवा निभृतमासीदवस्थितः। प्रावोचत्सः– ''लक्षणैः प्रतीयते पुनस्त्वं निभृतमरोदीः कमले!'' कमला नाऽस्योत्तरमदात्। युवा पुनरवादीत्– 'मुधा रोदित्वा रोदित्वा किमिति देहं क्षपयसि कमले!'

**कमला**– किं सुखं देहेनाऽनेन?

**युवा** – सुखम्? यावत्कालं लोकेऽस्मिन् स्थितिः स्यात्तावन्ति दिनानि सुखमेव।

**कमला**– तावन्ति दिनानि दुःखमेव। पापस्मृतेर्निरन्तरं यन्त्रणैव।

**युवा** – गृहं विमुच्य मया सह त्वामिहागता, एतस्यैव किमेतावद्दुःखम्? अनेनैव किं निरन्तरमारोदिषि? पूर्वं तु नासीत्सेयं भवत्याः परिस्थितः। वर्षादारभ्य तदिदं परिवर्तनमवलोके भवत्याम्। अद्य मे सूचय सत्यम्, केनोपायेन भवती पुनस्तादृशी स्यात्?

**कमला** – पुनरहं तादृशी स्यामिति न केवलं कठिनमेव, अपि तु नितरामसम्भवम्। अहं यत्किञ्चिद्विसृज्य गृहादागता, न कश्चित्तन्मे प्रतिदातुं शक्नोति।

**युवा**– अस्तु, अपैतु सर्वमिदम्। मम तावदिद्येव निर्दिश किमित्येतावदारोदिषि?

**कमला**– अहं किमिति रोदिमि? हृदयं विपाट्य दर्शनेन विना नेदं शब्दैर्बोधयितुं शक्यम्।

**युवा** – कमले! अहमेव भवत्याः सर्वदुःखानां मूलम्। भवती वत्सलौ मातापितरौ राज्ञामिव विपुलं वैभवं चाऽऽदाय सुखेन संसारमासीन्निर्विशन्ती। न जानेऽहं कस्मिन्कुमुहूर्ते भवत्या रूपे गुणेषु च मुग्धो भूत्वा भवतीमचीकमे। यद्यहं प्रणयमेव केवलं कृत्वा निभृतमवतिष्ठेयं तर्हि न ते हृदये सोऽयमग्निरद्य प्रज्वलेत् मया मे प्रणयः प्रकटितो भवतीं प्रति। त्वया तत्प्रतिदानमपि मह्यमनुष्ठितम्। इदानीं कथय तथ्यं मे कमले! केनोपायेन ते सुखं स्यात्?

**कमला**– किं त्वं तत्कर्तुं शक्नुयाः?

**युवा** – अवश्यं शक्नुयाम। प्राणप्रतिदानेऽपि यदि ते मुहुर्तं सुखं स्यात्तर्हि तदर्थमहं सन्नद्धः।

**कमला** – तर्हि मां विमुच्य प्रतिनिवर्तस्व निजगेहम्।

**युवा** – गृहे मम कोऽस्ति कमले?

**कमला**– गृहे तव स्त्री–पुत्र–धन–जनं सर्वं त्वेवास्ति।

**युवा**– किन्तु कमला नास्ति।

**कमला**– कमला पातकम्, स्त्री पुण्यम्। एतावन्ति दिनानि पापमसेविष्ठाः, सम्प्रति परिशीलय पुण्यस्य परिचयम्।

**कमला**– पत्न्याः पादतले कोटिशः कमलाः परिलोठन्ति। एकबारं परावृत्त्य परीक्षस्व तत्पटुतरम्।

**युवा**– कमले! यस्मिन्मार्गे त्वं जिगमिषसि, मामपि तत्सहगामिनं विधेहि, त्वां विहाय नाहं पारयेयं स्थातुम्।

**कमला**– यस्य सुखस्याशया मे संसर्गं वाञ्छसि, न तत्सुखं सम्प्रति शङ्कयाः प्राप्तुम्। तव सुखं पत्न्याः संसर्गे, मम सुखं स्वर्गतस्य स्वामिनश्चरणतले। मार्गौ नितान्तं भिन्नौ मां विहाय परावर्तस्व गृहान्। नो चेत्........।

**युवा** – नो चेत्किं करिष्यसि कमले!

**कमला**– नो चेदहमेव गृहमिदं विमुच्य गच्छेयम्।

**युवा**– तावतः प्रणयस्येदं प्रतिदानम्?

**कमला** – मत्सम्मुखे नेदानीं भवत्प्रणयस्य प्रतिमूल्यम्।

**युवा** – कमले! कमले! एतावत्कालानन्तरं तव मम च वियोगः सोऽयं किं समञ्जस एव?

कमला सम्प्रति नास्मिन् स्थातुमपारयत्। अव्रजत्सा द्वितीयस्यां दिशि।

## ( ६ )

व्यत्यगादेको वत्सरः। कमला साम्प्रतमेकाकिनी। स्वैरं सा गृहकार्यं करोति, सन्ताम्यति च सन्ततं चिन्तया। अन्तोऽस्ति गृहकार्याणाम्, परं न कदाचिदन्तोऽभ्यन्तर चिन्तानाम्। अनन्तचिन्तासन्तानमात्मनो हृदये गोपयन्ती कमला जलभृतगभीरमेघखण्ड इव चक्षुर्दिक्षु चरति, कार्यमाचरति च।

कमला न पूजामाचरति, जपो वा तपो वा नाऽनया किञ्चिदनुष्ठीयते। केवलमेकं कलशं यमुनाजलस्य प्रत्यहमुपनयति मदनमोहनस्य मन्दिरे। अत्रैव तस्याः कर्तव्यं परिसमाप्यते नूनम्।

निःस्तब्धायां निशि समस्ता पृथिवी यदा निःसंज्ञा निभृतं शेते, तदा कमला निभृतपदमुत्थाय प्राप्नोति मदनमोहनमन्दिरस्य सम्मुखे। निरुद्धद्वारस्याग्रतो धूलौ लोठन्ती सा चिरकालपर्यन्तमरुदत्। प्रतिदिनमिदमकरोत्सा। शीतं वा वर्षा न किञ्चित्सा परिगणयति। न गच्छति कमला कस्यचिद् गृहे, नान्योऽपि कश्चित्तस्या गृहं गच्छति। न संलपति कमला केनापि सह, न चान्योऽपि लालायितः कमलया संलपितुम्। एकाकिनी सा निभृतमरुदत्। सप्ताहे समगच्छत् सा एकदिनमापणे। सूपं वा तण्डुलं गोधूमं वा यत्किञ्चिदानेतुमशक तत एव

सा समाहरत्, तेनैव च दिनान्ययापयत्। सूपमोदनं लवणं, नाममात्राय घृतमेतावद्विहाय न साऽन्यद्भुङ्क्ते, भोक्तुमिच्छापि च नोदेति।

कमलायाः समीपे रूपं यौवनं चेत्युभयमप्यासीत्। यत्र चेदं द्वयं तत्र विपत्तिर्निःसंशयम्। कश्चित्कश्चित्पृष्ठलग्नोऽभूत्तस्याः। एकदा कमला स्वहस्तेनैव निबिडं तं कृष्णकेशराशिमच्छिनद् गेहे। कपोलौ वक्षःस्थलं च तप्तलोहेन सन्दह्य विरूपतामसृजत्। तद्दिनादारभ्य न कोऽपि पुरुषस्तां प्रति परावर्त्याऽप्यपश्यत्।

कमलायाः समीपे कानिचिद्रूप्यकाण्याभरणानि चासन्पूर्वसङ्गृहीतानि। यमुनास्नानात्परावर्तनस्य समये तन्मध्यात्सा दीनदुःखिभ्यो व्यभजत्। नैतद्धनं पापेन सञ्चितम्, पितुर्गृहादागमनसमये सा तदिदं तथापि भगवतो मदनमोहनस्य सेवायां नैतद् द्रव्यमुपयोक्तुं सा साहसमवहत्। यमुनायास्तटे यदि कुत्रचित्सा सुन्दरपुष्पाण्यपश्यत्तर्हि मदनमोहनस्य कृते सा तानवश्यमाहरत्।

जगन्मोहने दूरतः स्थिता कमला एकस्मिन्दिवसे भगवतो मदनमोहनदर्शनं कुर्वन्त्यासीत् यथैव दृष्टं यन्मयाऽऽहृतैः गुणैर्भगवतश्चरणद्वयमाच्छन्नं तथैव सा भक्त्या प्रमोदेन च नितान्तमधीरा समवर्तिष्ट। सा भगवन्तं प्राणमत्, 'भगवन् मदनमोहन' इत्युक्त्वा न चाह्वयदेकवार-मन्यान्यदिवसवत्। केवलमरोदरीत्सा निरन्तरम्। तद्दिनादारभ्य प्रमोदविह्वलायाः कमलाया व्यत्यगुः कानिचिद्दिनानि तस्यामेव दशायाम्।

मदनमोहनस्य सैवायै कमला प्रत्यहमाहरद्यमुनाजलम्, प्रापच्च तन्मदनमोहनमन्दिरे। लाभे सति पुष्पाण्यपि समुपाहरन्मदनमोहनाय। कदाचित्कदाचिन्मालां निगुम्फ्य समर्पयामास सा भगवते। समाधानिमहाभागो नाऽधुना काञ्चिदापत्तिमुपदर्शयति, भगवतः कृते कमला यत्किञ्चिदुपानयत्तदेव स हि सादरमङ्गीचकार।

प्रकारेणाऽनेन पुनरयासीदेको वत्सरः। एकस्मिन्दिने कमला वाक्कीलस्य गृहे गत्वा दानपत्रमेकमलेखयत् स्थावरा अस्थावरा च या काचित्तस्याः सम्पत्तिरासीत्तामिमां दानपत्रद्वारा भगवते मदनमोहनाय सा समार्पिपत्। दानपत्रमिदं भगवतो मदनमोहनस्य मन्दिरे समर्प्य न कमला तदनन्तरमदृश्यत मथुरायाम्। क्व सा पर्यव्रजदिति न कस्याऽप्यभूद्विदितम्।

( ७ )

गृहपरिग्रहं परित्यज्य, कपर्दिकामात्रमपि न परिगृह्य, शाटिकामात्रपरिधाना कमला भगवतो जगदीशस्य दर्शनाय पुरीं प्रास्थित। न सा परिजानाति पन्थानम्। गतागतं कुर्वद्भ्यः

पथिकेभ्यः पृष्ट्वा समभवदग्रेसरी सरणौ। न समीपं ताम्रखण्डमेकमपि। भिक्षया निर्वहति जीवनयात्रा। व्यत्यगाद्दिनादनन्तरं दिनम्। कमला महतोत्साहेन समुदलङ्घयन्मार्गम्। व्यत्यगुरेवं भूयांसो मासाः किन्तु साम्प्रतमपि जगन्नाथपुरी दूरे। शनैर्निरुत्साहाभूत्कमला। सा पूर्ववदिव मार्गमुल्लङ्घयितुं शक्ता। कदाचिदुपवासः, कदाचिदर्द्धभोजनमेवं सा समभूदेकान्ततो निर्बला। अक्षीयतोत्साहः, क्रमक्रमादलुप्यत गमनशक्तिः। कमला समभूत्साम्प्रतं ध्याननिरता– 'भगवन् ! का मे साम्प्रतं गतिः ?' एकदा मार्गमुल्लङ्घयन्ती कमला सर्वथैवाभूदसमर्था। सन्ध्या समये एव मार्गस्य तटे वृक्षस्यैकस्य निकटे दीनमशेत सा नितान्तनिर्बलतया। भूमौ शयाना सा समशोचत्– 'जानेऽहं भगवतो जगदीशस्य दर्शनं न मे भाग्ये। यः सकृदपि तत्रोपगच्छति क्षीयन्ते तस्याशेषपातकानि। नाहं रोदितुमपारयम्, अत एव न पातकान्यप्यपमृष्टानि। भगवतो जगन्नाथस्य दर्शनायाहं प्रस्थिता, किन्तु न मे भागधेये तदपि। हे भगवन्! किं मे भावितव्यम्? पापभारमिमं वोढुं न मे साम्प्रतं शक्तिः।'

शोचन्ती शोचन्ती कमला नूनमभ्यभूयत निद्रया। स्वप्ने व्यलोकयत सा यन्मध्याकाशे विराजति मनोहरा मूर्तिरेका। पुनरपश्यत्सा–यत्र तारकाः प्रकाशन्ते, शोभते भगवान् शशाङ्कः, तस्मिन्नेव स्थाने नवजलधरश्यामलः कमलदललोचनः श्रीमदनमोहनस्त्रिभङ्गललितः स्थितो ध्वनयति मुरलीम्। तस्याधरतटे हासः, नयननिकटे करुणा, कपोलेषु च प्रसादः परिखेलति। शतशतशशाङ्कनां प्रतिबिम्बाः प्रतिफलन्ति तस्य चरणनखेषु। लक्षलक्षनक्षत्राणि लोठन्ति तस्य पादतले। आकाशं पृथिवीत्यादि लुप्तमखिलम्। निखिलमपि जगतस्तेजः संघीभूय व्याप्नोति मूर्तिमिमाम्। कमला निद्रायामेव रोमाञ्चितसकलशरीरा सोत्साहमपृच्छत्– 'किं भवानेव श्रीहरिः ?'

उत्तरमलभ्यत– 'आम्'

'किं भवान्मह्यं दर्शनं दातुमुपगतः ?'

'नैव'

'अहं भवतो दर्शनाय जगदीशपुरीं प्रयामि।'

'अहं न निवसामि जगदीशपुर्याम्।'

'तर्हि कुत्र निवससि ?'

'अहं मानुषाणां हृदये निवसामि। यो मामाह्वयति, यश्च मां द्रष्टुं जानाति स एव मे दर्शनं लभते।'

अहमाह्वानं न जानामि। दयां विधाय शिक्षय मामह्वातुम्।

कमला ह्यावेगेनोच्चैरवदत्– 'भगवन्! शिक्षय मामाह्वानं भगवन्।'

अस्मिन्वारेऽपि न प्राप्यत किञ्चिदुत्तरम्। पश्यन्त्यामेव कमलायामाकाशस्था सा

मूर्तिः क्रमेण मन्द-मन्दतरा भूत्वा व्यलीयत गगन पटले। विह्वला कमला- 'हे भगवन्! बोधय मां दयया, केनोपायोन लभ्येत भवान्?

दिग्दिगन्तान्प्रतिध्वनयन् पुनरश्रूयत घोरः स चीत्कार- 'हे दयामय। बोधय मामेकवारं केनोपायेन भवान् लभ्येत?'

तेन कातरीचीत्कारेण स्थावरजङ्गमम्, द्योतलभूतलं चापि रोमाञ्चितं भूत्वा प्रतिध्वनिमकरोत्- 'करुणामय किञ्चिदाज्ञापाय मां केन विधिना त्वामासादयेयम्।'

चीत्कारशब्देनानेन भग्नाभूत्कमलाया निद्रा। उत्थाय सा व्यलोकत चतुर्दिशम्। तया पृथिवी दृष्टा, गगनमवलोकितम्, ताराः प्रत्यक्षीकृताः किन्तु कुत्रापि सा मूर्तिर्न निभालिता। निराशाकुलहृदया सा गगनमवलोकयन्ती निस्तब्धमतिष्ठत्।

स्वप्ने सा यत्किञ्चिदशृणोत्सर्वं तत्तस्याः स्मृतिपटले वज्राक्षरैरुत्कीर्णम्। कमला एकैकं ता वार्ताः समारभत विचारयितुम्। अभूत्प्रत्यूषम्। कमला वृक्षतलादुदतिष्ठत्। येन मार्गेण सा मथुरातः समागमत् तेनैव मार्गेण सा पुनर्मथुरां परावर्तिष्ट।

## ( ८ )

व्यपससार कमलाया भ्रमः। न सा साम्प्रतं जगन्नाथपुरीं प्रस्थातुमुत्कण्ठिता। कमलायाः प्रतिभासमभूद् यद् हृदयस्यावस्थाविशेषस्यैव नाम 'जगदीशपुरी।' यदा ह्यन्तः करणे राधाकृष्णयोर्युगलमूर्तिर्निरन्तरमवतिष्ठते तदैव जनो जगदीशस्य दर्शनं लभते। अन्यथा पापाकुलहृदयेन जगदीशपुर्यां चिरं जीवनयापनेऽपि न मानुषो लभते जगन्नाथस्य दर्शनम्।

मथुरामार्गमुल्लङ्घयन्ती कमला व्यचिन्तयच्चेतसि- 'हा हन्त को मयाऽनर्थो विहितः। अबोधस्य मनसो वशीभूताहं मुधैव जगन्नाथपुरीमभ्यधावम्। भो मम मदनमोहन! क्षमस्व विकलामिमां ते पुत्रीम्। भवतश्चरणावेव मत्कृते जगदीशपुरी। भवतश्चरणावेव मम सर्वाणि पुण्यतीर्थानि। भवतश्चरणयोरवनेजनजलं विसृजन्त्यैव मया निजपातकानां कृते रोदनमभिशिक्षितम्। पाषाणं विहाय सुवर्णं प्रत्यभिज्ञातम्। त्वमेव मे जगदीशपुर्या जगदीशः। त्वमेव मे वैकुण्ठपतिः श्रीहरिः। हे मम दयामय देव! क्षमस्व मामकीनमपराधम्।'

कातरकण्ठेन मदनमोहनमाह्वयन्ती कमला पन्थानमलङ्घयत्। दिनादनन्तरं दिनम्- मासादनन्तरं मासो व्यत्यगात्प्रकृतिनियमानुसारम्। न सम्प्रति कमला पूर्वमिव मार्गचलने समर्था। एकदिनस्य मार्गे व्यतिगच्छन्ति दश दिनानि। उपवासैः क्षीणं तान्तपरिश्रान्तं देहं यथाकथञ्चित्कर्षन्ती चलने समर्था कमला महता कष्टेन समवाप्नोन्मथुराम्।

आसीत्तस्मिन्नेव दिने यमद्वितीयायाः पुण्यं पर्व। किन्तु नाभूदिदं विदितं कमलायाः। ह्रदेषु यमुना घट्टेषु च समभून्नितान्तं सङ्कुलता। सर्वेषामपि च जनानां मुखं समवालोक्यत यमुनाभिमुखम्। धृतकौतूहला कमला पर्यष्टपृच्छेदेकां युवतिम्– 'ननु सूचय मामपि; सर्वा यूयं गच्छथ कुत्र?' कोपमभिनयन्तया युवत्या प्रत्युक्तम्– 'अपेहि रे मन्दभाग्ये! किं तव नेदमप्यविदितं यदद्यास्ति 'यमद्वितीया'।

अनाकुला कमलाऽपि यमुनास्नानाय पर्यचलत्।

भगवत्याः कालिन्द्याः कण्ठदघ्ने पयसि सन्निमग्ना कमला व्यचारयच्चित्ते– 'अद्य पुनस्तदेव यमद्वितीयाया दिनम्। अस्मिन्नेव दिने मया व्रतमङ्गीकृतमासीत्, अद्यास्मिन्नेव दिने व्रतस्योद्यापनमपि करिष्यामि। रे मातर्यमुने! मम पापान्यपाकुरु। अस्माद्देहभारान्मां विमोचय। दीनोद्धारिणि..... एतदग्रे न प्राभवत्सा वक्तुम्। द्वावपि कपोलौ मार्जयन्ती वाष्पधारा निरन्तरमवहत् द्वयोरपि' नयनयोर्द्वौ प्रवाहौ यमुनाप्रवाहेण प्रेमतः समगंसाताम्।

कृतस्नाना कमला मदनमोहनस्य मन्दिराभिमुखमचलत्। न जानेऽस्मिन्समये तस्या देहे नवीना शक्तिः कुतः समुपगता, मनसि नवीन उत्साहः कुतः समभरत्। सा सुदीर्घमितं पन्थानमतिस्वल्प एव समये समतिक्रम्य नितान्तमेव शीघ्रतया मन्दिरस्य प्राङ्गणमुपातिष्ठत।

समयेऽस्मिन्मन्दिरपटः समुद्घाटित आसीत्। कुर्वन्ति स्म जना मदनमोहनस्य दर्शनम्। सङ्कोचरहिता कमला सरभसाभ्यां पदाभ्यामभ्याजगाम जगन्मोहनम्, निभृतमतिष्ठच्चैकचित्ता दर्शनं विदधती। वृद्धोमुख्यार्चकमहाभागः स्वयमस्मिन्दिने सेवायामासीत्समुपस्थितः। नीराजनस्यानन्तरं पृष्ठतः परावृत्य वदनं, विलोकितमनेन– यत्सम्मुखे समवस्थितास्ति कमला। दृष्ट्वैव तां पर्यचिनोत्। अपृच्छदसौ कमलाम्– 'अद्य बहुकालानन्तरं समागतासि। प्रणम पुत्रि भगवन्तं मदनमोहनम्।'

भगवतश्चरणाम्बुजदर्शनान्नेत्रमनपासरयन्त्येव कमला समभाषीत्– 'कं प्रणमामि? अपि भगवन्तम्? तस्य चरणयोरहं प्रत्यहं कोटि कोटि प्रणामानकरवम्, तस्य चरणयोरहं प्रत्यहं लोठामि। एषाहं तस्यैव चरणयोर्मस्तकं निधाय निपतिताऽस्मि। इदानीं कुत्र मस्तकं निधाय, कस्मै प्रणामं करवाणि?'

मुख्यार्चकमहाभागस्य विस्मयोऽभूत्। किञ्चित्कालं नीरवनिस्तब्धो भूत्वा स समपृच्छत्– 'चरणामृतं ग्रहीष्यति?'

**कमला**– ''अपि चरणामृतम्? चरणामृतं कुत्र दास्यसि? मुखे स्थानं नास्ति। समस्तदेहस्योपरि भगवतो मदनमोहनस्याधिकारः संवृत्तः। मस्तके मदनमोहनः, जिह्वायां मदनमोहनः, हस्ते मदनमोहनः। क्व दास्यसि चरणामृतम्?''

नितान्तमाश्चर्येण साकं मुख्यार्चकमहाभागस्य समभूदसीमा श्रद्धा कमलाया उपरि।

किं भगवतः प्रसादीभूतं पुष्पं ग्रहीष्यसि?''

**कमला**– पुष्पम्? देहि! तस्य चरणयोः पुष्पं समर्पय, तच्चरणयोरेव! इत्युक्त्वा सा निजचरणमग्रे प्रासारयत्। महानुभावो मुख्यार्चकमहाभागो निकाममासीत्तत्त्वज्ञानी। तथापि भगवतः प्रसादीभूतं पुष्पं कमलायाः पादयोः स्थापयितुं नाभवदेतस्य साहसम्।

कमला न कस्यामपि दिशि परावृत्त्यापि दृष्टिमक्षिपत्। तस्या द्वे अपि नेत्रे समभूतां निमीलिते। सा हि ध्यानमग्ना भूत्वा धमिति धरणौ न्यषीदत्। तद् ध्यानं न कदाचिदभूद् भग्नम्, ते नेत्रे न कदाचिदभूतामुन्मीलिते! मदनमोहने मिलिता कमला मदनमोहन एव संवृत्ता!

परमदयालुर्मुख्यार्चकमहाभागः सन्ध्यासमये कमलायाः शरीरं स्वयं स्वस्कन्धेनोढ्वा यमुनापुलिने सश्रद्धमग्निसाच्चकार।

# कथाखण्डः


- ऐतिहासिककथाः ८३-१९०
- सामाजिककथाः १९१-२६०
- प्रणयकथाः २६१-२८३
- हास्यकथाः २८४-३१०
- मनोवैज्ञानिककथा ३११-३१५
- विविधविषयिण्यः कथाः ३१६-३६०

१

# अलक्ष्येन्द्रश्च[1] दस्युश्च[2]

(संक्षिप्तपरिचयः– ग्रीसदेशान्तर्गतस्य मैसेदन नगरस्य राजाऽयमलक्ष्येन्द्रो महावीरः साहसी बुद्धिमानुदाराके दृढचित्तश्चासीत्। एतस्य जन्म ईशोः ३५६ वर्षेभ्यः पूर्वमभवत्। विंशतिवर्षात्मके नववयसि राज्यसिंहासनमधिगत्यैव सोऽयं बाख्तरपारस्यदेशावाचक्राम। देशयोरनयोर्विजयेन वर्द्धितोत्साहः सोऽयं विश्वविजयाय प्रचक्रमे। बाह्लीकदेशं[3] विजित्य तेनैव पथा सोऽयं भारताभिमुखोऽभवत्। तक्षशिलाया अधिपतिर्विजयिनोऽस्य शासनं स्वीचक्रे किन्तु 'जेहलम्'[4] नद्यास्तटे 'पोरस' नामा तत्प्रदेशाधिपतिः परमपराक्रमेणैतस्य मार्गमवाऽरुधत्। अलक्ष्येन्द्रो पराक्रमेण तुष्टः स विजितमप्यस्य राज्य प्रतिददौ।

एष हि व्यासनदीं यावद्भारतमाययौ, परमितोऽग्रेऽभिगन्तुं तस्य सेना न सम्मेने। अतएव स निजसैन्यं द्विधा विभज्य, एकं भागं जलमार्गेण पारस्यदेशं प्रेषयामास। अपरेण च भागेन सह स्वयमीरानादिदेशेषु सञ्चरन् स्थलमार्गेण स्वदेशं परावव‍ृते। किन्तु यथैव 'बावल'मुपगतस्तथैव मार्गक्लेशेन रुग्णः स आयुषस्त्रयस्त्रिंशत्तमे एव वर्षे शरीरं विजहौ। उदारप्रकृतेर्वीरस्यास्य निगडितेन दस्युना सह यः सन्लापोऽभवत्सोऽधस्ताद्दीयते)

अलक्ष्येन्द्रः– किं त्वमेव स दस्युर्येन मां तृणवदवमन्य[5] प्रदेशेऽस्मिन्नुत्पातः प्रारब्धः?

दस्युः – महाराज! अहमस्येकः सैनिकः[6]।

अलक्ष्येन्द्रः – किमुत्तम्? त्वं सैनिकोऽस्यथवा लोकानां लुण्टाको[7] हिंसकश्च। अहं तव वीरतामवश्यमाद्रिये किन्तु तवाऽत्याचाराणां कृते त्वामवश्यं दण्डयिष्यामि।

दस्युः – प्रभो! मया किमीदृशमपराद्धं येन मां निर्दयं दण्डयसि?

अलक्ष्येन्द्रः. – किं त्वं ममाऽपमानं नाऽकार्षीः? किं त्वया देशे अशान्तिर्न प्रवर्तिता? किं तव जीवनं मनुष्यजातेर्विनाशायैव न व्यतीतम्?

दस्युः – पृथ्वीनाथ! सम्प्रत्यहं भवदायत्तः। यत्किञ्चिद्वदिष्यति, श्रोष्यामि। यं दण्डं दास्यति, सहिष्ये। किन्तु भवान्ममाऽन्तरात्मनः स्वतन्त्रतां नापहर्तुं शक्नोति। श्रीमता ये ये दोषा मयि स्थापितास्तेषां परिशोधनाय[8] यद्याज्ञा चेद्वदामि।

अलक्ष्येन्द्रः – अहं त्वां निर्विशङ्कमुत्तरयितु[9]माज्ञापयामि।

दस्युः –तर्हि सविनयमहं पृच्छामि यद् भवता स्वजीवनं कथं यापितम्?

अलक्ष्येन्द्रः – मम जीवनं तथैव व्यतीतं यथैकस्य वीरस्य प्रशस्तं जीवनं व्यत्येति। किं तव न विदितं यदहं वीराणां सुमहान् वीरः, बलवतां सुमहान् बलवान्?

---

१. अलग्जैण्डर 'सिकन्दर'। २. डाकू। ३. काबुल। ४. कैदी।

५. अपमान करके। अव+मन्+त्वा(ल्यप्)। मन्यते, आज्ञा मन्यताम्। मेने (परो.) मन्ता। मंस्यते इत्यादि।

६. सिपाही। ७. लूटने वाला। लुण्ट (लुटना), लुण्टति इत्यादि। ८. सफाई के लिए।

९. उत्तर देने के लिए। उत्तरं करोतीत्युत्तरयति।

दस्युः – महाराजमहं सम्यक् परिचिनोमि। महाराजो मामवश्यं जानाति। मत्तोऽधिकः साहसी भवत सेनापतिषु नैकाऽप्यस्ति। विकत्थनं[१] न मेऽभ्यस्तम्। किन्तु महाराजोऽपि सम्यगिदं जानाति यन्ममाऽऽनयनाय प्रेषितानां वीरप्रमुखानामपि भवत्सेनापतीनां हृदयकम्पो नाधुनापि प्रशाम्यति।

अलक्ष्येन्द्रः. – किमनेन? त्वमसि तावत् लोकानां धनजीवनयोरपहर्ता, अपघाती एको दस्युरेव।

दस्युः – श्रीमन्! देशानां विजेतारो राजानः किमन्यद् भवन्ति? राज्याधिगमलालसेन श्रीमतैव किं महामहान्ति राज्यानि न नाशितानि? सुखशान्तिपूर्णानि बहूनि नगराणि दुःखितान्यशान्तिमयानि च किं नापादितानि[२]? हरितहरिता धनजनभरिताश्च वसतयो[३] लोकान् हिंसता निर्दयं दहता च किं श्मशानतां न नीता भवता? अधर्मेण अन्यायेन च भवान् परःसहस्त्रान्[४] लुण्टितवान् हिंसितवांश्च। यदि शतं सहचरानादाय मया ग्राम एको धर्षित[५]स्तर्हि लक्षं सैनिकानादाय भवता अनेके जनपदा राष्ट्राणि च विनाशितानि। यदि मयैकः पथिको लुण्टितः स्यात्तर्हि भवता अनेके राजानो राजकुमाराश्च धूलिसात्कृताः[६]। यदि मयैको ग्रामो दग्धः स्यात्तर्हि भवता पुष्पिताः फलिताश्चानेके जनपदा नगराणि राष्ट्राणि च भग्नावशेषतां नीतानि। भवति मयि च यद्यन्तरं तर्ह्येतावदेव यदहं दीनगृहे जातो भवांश्च राजवंशे। यदि सत्यकथनाय मे स्वातन्त्र्यं तर्हिं स्पष्टमहं कथयिष्यामि यदहं लघुतरो दस्युस्तर्हि भवान् महत्तमो दस्युः। भवतोऽपराधा मदपेक्षया निःसंशयं गुरुतराः।

अलक्ष्येन्द्रः. – यदि मया राजानो लुण्टितास्तर्ह्यन्ये राजानोऽपि तु सम्पादिताः! यदि मया राज्यानि नाशितानि तर्हि तदपेक्षया समृद्धतराण्यन्यानि राजान्यपि प्रतिष्ठापितानि। मया हि देशस्य वाणिज्यं प्रवर्द्धितम्, विद्याश्चोन्नतिं नीताः।

दस्युः – मयापि धनिकेभ्यो यद्धनं गृहीतं दद्दीनेभ्यो दत्तम्। किन्त्वेतदहं सुदृढं जानामि यद्भवतां मया च लोकानां यावती हानिरापादिता तच्चतुर्थांशोऽपि न परिशोधितः, न शक्यश्चाग्रे परिशोधयितुम्।

एतच्छ्रुत्वैव अलक्ष्येन्द्रस्य रोमाण्युत्थितानि। सरभसं भृत्यानाज्ञापयत्– 'अस्य बन्धनानि त्वरितमपनयत। हा हन्त! किमयमहं च समानौ? सूक्ष्मतया विचारयिष्याम्यहमेतत्।'

---

१. अपने मुँह झूँठी बड़ाई 'डींग मारना'।
२. किं न कृतानि, क्या नहीं बना दिये?
३. बस्तियां।
४. सहस्त्रेभ्योऽधिकान् 'हजारों से भी ज्यादा'।
५. दबाना, बिगाड़ना।
६. धून्यधीना इति धूलिसात्, 'धूल में मिला दिये'।

२

# वीरबालकः

मेवारराज्ये उदयपुरराजधानी नाधुनापि सम्पूर्णं निर्मिता। चलत्यधुनापि निर्माणकार्यम्। कुटिलनीतिनिष्णातस्य दिल्लीपतेरकबरस्य नीतिकौशलेन पुरातनी चित्तौरराजधानी हन्त हन्त! विच्युता खलु मेवारराजवंशीयानामधिकारात्। अधिकाधिकं च विजृम्भते दिल्लीपतेर्मेवारराज्योपरि सन्दंशः। राज्यस्येतस्ततश्चलन्ति खण्डयुद्धानि। परं मेवाराधिपतिश्चित्तौरस्य, मेवारमुकुटमणेश्चित्तौरस्य, पुनर्ग्रहणार्थं कियत् किं वा प्रयतते? राजधानी शत्रोर्हस्ते गता, परितः प्रवर्तते शत्रोराक्रमणम्, अथापि मेवाराधिपतेर्नास्योपरि भ्रूक्षेपः!! आः शृणुत! प्रासादे समुत्तिष्ठति सङ्गीतध्वनिः!

मेवाराधिपतिः-उदयसिंहः सिंहासनमध्यास्ते। तदुभयपार्श्वयोर्विलाससहचराः सन्ति तन्मन्त्रिणः। अग्रतस्तु, विजृम्भते झणत्कारो नर्तकीनाम्! गीतेरुपरि गीतिः, नृत्योपरि नृत्यम्, न मनागपि विरामः, प्रेमपीयूषसारभूता चलति सङ्गीतलहरी। परं नाद्य मेवाराधिपतेश्चित्तं प्रसन्नमालोक्यते। कियत्कालानन्तरं प्रोक्तं राज्ञा- ''विश्राम्यतु साम्प्रतं सङ्गीतम्''।

**मन्त्री**- अनुमीयते नाद्य महाराजस्य प्रसन्नं चेतः। अपि शक्यते ज्ञातुं कारणम्?

**उदयसिंहः**- प्रधानकारणं शक्तसिंहः।

मन्त्री-एषा तु परिहासकथा, पञ्चवर्षदेशीयः शिशुःशक्तसिंहः श्रीमतां चिन्ताकारणम्?

**उदयसिंहः**- आसीद् राजा हुमायू ज्यौतिषशास्त्रे विशारदः। तेनैव, प्रभावशालिनात्मज्यौतिषेण दिल्लीपतेरकबरस्य निर्मिता जन्मपत्री। शक्तसिंहस्यापि स एव निर्मितवान् जन्मपत्रिकाम्।

**मन्त्री**- तत्र किं तेनोक्तम्?

**उदयसिंहः**- यद्धि मेवारस्य शक्तद्वारा भविष्यति सर्वनाशः। शक्तो हि राजपुत्रकुलकलङ्कः।

**मन्त्री**- अपि सत्यमेवैतत्?

**उदयसिंहः**- अव्यर्था तस्य गणना।

एतावतैव साभिवादनमावेदितं दौवारिकेण-''महाराजस्यादेशानुसारं स कर्मकरः तीक्ष्णधारं क्षुरमेकं निर्माय आनीतवान्। अपि भवेत् तस्मै आगन्तुमादेशः?''

**उदयसिंहः**- इदानीमेव द्रक्ष्यामि। प्रवेशय शिल्पिनम्।

**दौवारिकः**- शिल्पिना सहाचिरादेवोपस्थितः। सहैव चानेन क्रीडाव्यस्तः शिशुः शक्तसिंहोऽपि नृत्यन् नृत्यन् प्राविक्षत् सभाभवनम्।

अतिसतर्कभावेन तूलराशिमास्तीर्य जायते स्म क्षुरधारायाः परीक्षा। एतादृशे समये प्रावदद् बालः शक्तसिंहः- ''किन्नु नानेन छिद्यते अस्थिमांसम्?'' इत्युक्त्वैव च तीक्ष्णधारं

तत्क्षुरमात्मनो हस्ते निचखान! हस्तात् क्षरन्ती शोणितधारा महामूल्यमास्तरणवस्त्रं सिक्तवती। सकला अपि साम्प्रतं जडीकृताः, न केषामपि मुखे वाक्! किन्तु पञ्चपञ्चवर्षीयस्य शिशोर्नास्योपरि भ्रूक्षेपः।

उदयसिंहस्य सर्वशरीरं कम्पमानमासीत्। गम्भीरस्वरेण प्रोक्तवान् सः–''बालकस्यास्य भविष्यज्जीवनस्यापरोऽयं परिचयः। नान्यत्, क्रियतामस्य वधः। मेवारसर्वनाशकारिणः खल्वरक्षणीयं जीवनम्''।

अभवन् सकला अपि स्तम्भिताः। नासीत् कस्यापि मुखे वाक्। तदा चक्षुररुणीकृत्य प्रोक्तमुदयसिंहेन–''दौवारिक! अपि न श्रुतो राजादेशः?''

दौवारिकः किञ्चिदनुक्त्वा महाराजमभिवाद्य जग्राह बालकस्य हस्तम्। उदयसिंहः प्रोक्तवान्–''नीयतामयं वध्यभूमौ, इदानीमेव येन प्रतिपाल्येत आदेशः।''

शक्तसिंहः क्षणमवाग् भूत्वा ददर्श पितुर्वदनम्। किन्तु न प्रोक्तवान् किञ्चिदपि। दौवारिको नीतवान् राजकुमारं वध्यभूमौ।

दौवारिको बहिरागत्य स्नेहपरवशश्चुचुम्ब बालकस्य मुखम्, किन्तु निर्भीको बालः प्रोक्तवान्–''क्व हनिष्यसि?''

दौवारिकः सविस्मयं पञ्चवर्षदेशीयस्य शिशोर्वदनं विलोकयन् क्षणमस्थात्। बालकेन पुनः प्रोक्तम्–''देहि प्रतिवचनम्।''

**दौवारिकः**– किंवा वदामि, भवतो हस्तात् पतत्यधुनापि रुधिरम्।

**शक्तसिंहः**– उष्णीषेण बन्धयिष्यसि क्षतस्थानम्?

अहो वाक्चातुर्यम्! अहो श्लेषोक्तिः? दौवारिको विच्छायवदनः सन् प्रोवाच– ''किमुक्तम्।''

**शक्तसिंहः**– यस्य हि कण्ठान्निमिष्यति रुधिरस्रोतः, तस्य हस्ते रक्तमालोक्य किमित्येतादृशी मनोवेदना? क्वाधुना हनिष्ससि ब्रूहि!

**दौवारिकः**– वध्यभूमौ।

**शक्तसिंहः**– इतोऽपि दूरे गमिष्यामि?

**दौवारिकः**– राजाज्ञया।

**शक्तसिंहः**– प्रस्तुतोऽस्म्यहम्।

पश्यतोरेव तयोः, तत्स्थानं जनाकीर्णमभवत्। बहवः प्राज्वलन् प्रदीपाः। वीरबालक आत्मनो जीवनलीलां समापयितुं प्रचलति स्म वध्यभूमिम्! मार्गे शलूम्बराराजो निशीथसमये पथिमध्ये पदचारिणं प्रहरिवेष्टितं शक्तं दृष्ट्वा विस्मयमापन्नः प्रोवाच–''राजकुमार! कुत्रास्मिन् निशीथे?

शक्तः सहास्यमवदत्–''आत्मबलिं दातुम्।''

शलूम्बराधिपतिः–कुतः?

**शक्तसिंहः**– अनावश्यकमेतत्कथनम्। राजाज्ञां पालयितुं प्रयाम्यहम्।

**शलूम्बराधिपतिः**– राजकुमार! शक्त! किमेतद् ब्रवीषि?

**शक्तसिंहः**– सत्यमेव वच्मि।

**शलूम्बराधिपतिः**– एवं सहास्यवदनो दास्यसि जीवनम्?

**शक्तसिंहः**– निश्चितम्। न चेद्विश्वासः सह गन्तव्यम्।

शलूम्बराधिपती रोदितवान् मुक्तकण्ठम्। श्रुतवाञ्श्च समस्तां घटनाम्। अन्ततस्तु यावदहं न परावर्ते तिष्ठतु तावद्वधकार्यमित्युक्त्वा जगाम उदयसिंहस्य समीपे। तत्र च चक्षुषोर्जलेन, अनुनयेन, विनयेन च, पुत्रवधपातकान्निवर्तयामास तम्। स्वयं च पोष्यपुत्ररूपेण जग्राह शक्तसिंहम्। मेवाराधिपतिरपि मेवारराजवंशेन न कोऽपि शक्तसिंहस्य सम्बन्ध इति कारयामास प्रतिज्ञाम्।

हन्त हन्त! वीरबालक! यदि न ते शक्तेर्दुरुपयोगोऽभविष्यत् तर्हि नेयं मेवारभूमिर्यवनपदकलङ्किताऽभविष्यत्। मेवारभूमे!! सत्यं शोचनीयस्ते तादृशः समय आसीत्!!

३

# वीरपरीक्षा

सिन्धुनद्यास्तटे यूनानदेशीयानां रणपोतानां महानेकः संघो विश्राम्यति। नद्यास्तटे शिविरस्य सम्मुख एव विश्वविजयी सिकन्दरः सन्ध्यासमयस्य शोभां निरीक्षते। भगवान् सहस्रकिरणः साम्प्रतमस्तोन्मुखः। एतस्य हि सुवर्णरुचयः किरणाः सिकन्दरस्य मुखे परितः प्रतिफलन्ति। अमुष्य सेनापतिः सेल्यूकसः समीपगमाी सन् संलपति सम्राजा।

**सिकन्दरः**– सेल्यूकस! सत्यमयं देशो विश्वस्मिन् वैचित्र्यस्य भूमिः। दिवा प्रचण्डः सूर्यः सुनीलमेतस्य गगनं सुभृशं सन्ताप्य यथैव पृष्ठं परावर्तयति तथैव निशि सुप्रसन्नश्चन्द्रमाः समागत्य स्निग्धया निजज्योत्स्नया तदेतत् सर्वतः स्नपयति। निविडान्धकारायां निशि देशस्यास्य सुनीलमाकाशमगणितैस्तारागणैर्यदा किल सर्वतो देदीप्यते तदा ह्यहं विस्मितश्च प्रभावाक्रान्तश्च तदेतत्पश्यामि। जलधरसमये कज्जलमलिनाः प्रकाण्डघना गुरुगभीरं गर्जन्तो यदा ह्यस्याकाशं दुर्दान्तदानवा इव सर्वतः समाच्छादयन्ति तदाहं नीरव-निस्तब्धः केवलं विलोकयामि। एतद्देशस्य शिरोभूषणं गगनचुम्बी बभ्रुवर्णो हिमालयः शिरसि शुभ्रं तुषारमुकुटं वहन् धीरभावेनावतिष्ठते। एतद्देशस्य सुविशाला नद-नद्यो मत्ततयेव फेनायमानाः सागरामिभमुखं प्रवहन्ति। मेदुरा च मरुभूमिः स्वेच्छाचारिणीव तप्तबालुकया निस्तब्धं खेलतीव।

**सेल्युकसः**– सत्यमिदं सम्राट्!

**सिकन्दरः**– कुत्रचित्तालवनं मदेन शिरः कम्पयद् भूरितरं गर्वायते। अपरत्र विराड् वटवृक्षः स्वच्छां स्वच्छायां परितो विस्तारयति। क्वचिन्मदमत्तो मातङ्गो जङ्गमः पर्वत इव शनैः शनैर्विहरति, क्वचिद्विशालकायोऽजगरः आलस्यसहचरी हिंसेव वक्ररेखायां निपतितोऽस्ति। कुहचिद्-दीर्घशृङ्गः सारङ्गः साक्षान्मुग्धो विस्मय इव मुग्धमधुरया दृष्ट्या शून्यं वनं विलोकते। सर्वतोऽधिका च सेयं वार्ता यत् सौम्या, गौरवर्णा, सुन्दरा चैका जातिर्देशमिमं शास्ति। अमुष्या मुखे शिशुवत् सारल्यम्, देहे वज्रस्येव शक्तिः, चक्षुषोः सूर्यस्येव दीप्तिः, वक्षसि च वात्येव प्रबलतमं साहसम्। अहह एतादृशस्यैव शौर्यस्य पराजये नूनमानन्दः। जानासि, राजा पुरुर्यदाऽस्माभिर्निगडितस्तदा किमयमभाषत्?

**सैल्यूकसः**– किं सम्राट्?

**सिकन्दरः**– पृष्टं मया-त्वं मत्तः कीदृशस्याचरणस्य प्रत्याशां धारयसि? तेन हि निर्भीकनिष्कम्पेन स्वरेण प्रोक्तम्- 'एकं राजानं प्रति अपरस्य राज्ञो यादृशमाचरणमुचितं तादृशस्यैव'। अहमाश्चर्यचकितोऽभूवम्, मनस्यकरवं च यत्सत्यमियमेव वीरा जातिः। मया तदात्व एव तस्य राज्यं तस्मै प्रत्यर्पितम्।

**सेल्यूकसः**– कुतो नेदं सम्भाव्येत महानुभावे सम्राजि।

**सिकन्दरः**– त्वमेव वद सेनानीः! तस्य हि तादृशमुत्तरं निशम्य कोऽन्यो व्यवहारः कर्तुमुचितः स्यात्? महापुरुषमालोक्य मनसि मे महानुल्लासो भवति। नाहमेतावद्दूरं साम्राज्यमधिरोपयितुं समागतः, अपि तु निजमानसोल्लासेन स्वैरमिह दिग्विजयं कर्तुम्। वाञ्छामि यन्मे परस्तादपि मे कीर्तिर्जगति जागृयात्।

**सैल्यूकसः**– तर्हि असम्पूर्णमिमं दिग्विजयं त्यक्त्वा कथं सम्राट् परावर्तितुमिच्छति?

**सिकन्दरः**– दिग्विजयस्यास्य पूरणाय नूतनस्य यूनानसैन्यस्यावश्यकता संवृत्ता। अहो कीदृशमाश्चर्यं सेनापते! अहं सुदूरान्मसीधननगरादनेकानि राज्यानि जनपदांश्च तृणानीव पद्भ्यां दलयन्निहयावन्निर्विशङ्कमुपयातः। मया हि प्रबलवात्ययेव सहसा समागत्य महामहत्योऽपि शत्रूणामनीकिन्यो धूमराशय इव परितो विक्षिप्ताः। अर्द्धो ह्येशियाप्रदेशो मसीधनस्य विजयवाहिनीनां वीरचरणभारेण साम्प्रतं कम्पमान इव। भवितव्यवद् दुर्निवारः, कलहकाण्डवत्करालः, दुर्भिक्षवन्निष्करुणोऽहमर्द्धस्यैशियाप्रदेशस्य वक्षसि रुधिराक्तं निजं विजयस्यन्दनमेतदवधि निर्निरोधमानीतवान्। कुत्रचिद् यदि बाधाऽनुभूता तर्ह्यस्मिन् शतद्रोस्तटे एव सर्वतः प्रथमम्।

[चन्द्रगुप्तं गृह्णन् अन्तगोनसः प्रविशति]

**सिकन्दरः**–अये अन्तगोनसः? किमिदम्? कोऽयं गृहीतः? अन्तगोनसः– गुप्तचरोऽयं श्रीमान् गुप्तचरः!

**सैल्यूकसः**– ओः! कथमेतत्?

**अन्तगोनसः**– श्रीमन्! दृष्टं मया यदेष शिविरस्य सन्निधावेव निर्जने स्थाने शुष्कस्य तालपत्रस्योपरि किञ्चिदङ्कयतीति। अहं हि प्रसह्य द्रष्टुमभ्यलषमिदम्। ततो हि दर्शितवानयं तत्पत्रम्। किन्तु नेदमहं प्रभवामि वाचयितुम्। अतएव सम्राजः सम्मुखमानीतवानस्मि।

**सिकन्दरः**– किमलेखीः प्रिययुवक, वद सत्यम्?

**चन्द्रगुप्तः**– सत्यं वक्ष्यामि राजाधिराज सत्यम्। मिथ्याप्रलापो भारतवासिभिर्नाद्याऽप्यभ्यस्तः।

[सिकन्दरः साकूतां दृशमेकवारं निचिक्षेप सैल्यूकसे, ततोऽवोचच्चन्द्रगुप्तम्।]

**सिकन्दरः**– सम्यगिदम्। वद तर्हि तथ्यम्, किमलेखीद्भवान्?

**चन्द्रगुप्तः**– अहं हि सम्राजः सैन्य-सञ्चालनम्, व्यूहरचनाप्रणालीम्, सामरिकनियमांश्च अनुमानतो ह्येकमासादस्मि शिक्षमाणः।

**सिकन्दरः**– कस्य भोः सविधे?

**चन्द्रगुप्तः**– एतस्यैवोदारस्य सेनापतेः समीपे।

**सिकन्दरः**– किमिदं सत्यं सैल्यूकस ?

**सैल्यूकसः**– आम् सत्यम्।

**सिकन्दरः**– (चन्द्रगुप्तं प्रति) ततस्ततः।

**चन्द्रगुप्तः**– किन्तु यदाहमश्रौषं यद् यूनानदेशीयं सैन्यमिदं श्व एवेतः प्रस्थास्यति, तदा यन्मयाऽद्यावधि शिक्षितं तदेतत्पत्रारूढं कुर्वन्नासम्।

**सिकन्दरः**– केनाभिप्रायेण ?

**चन्द्रगुप्तः** – न किल सिकन्दरशाहेन सह युद्धस्याभिप्रायेण।

**सिकन्दरः**– तर्हि ?

**चन्द्रगुप्तः**– (विचार्य किञ्चित्) अस्ति. तर्हि शृणोतु सम्राट्। अहं हि मगधदेशस्य राजपुत्रश्चन्द्रगुप्तः। मम पिताऽभूद्विश्वविदितकीर्तिर्महापद्मः। मम वैमात्रेयो भ्राता नन्दः सिंहासनमिदमधिकृतवान्, निर्वासितवांश्च निर्दयं मामितो देशात्। तदेव प्रतिशोधयितुकामोऽहमितस्ततः पर्यटामि।

**सिकन्दरः**– ततः ?

**चन्द्रगुप्तः**– ततोऽहं मसीधनाधिपतेः सिकन्दरमहीपतेरद्भुतानि वीरचरित्राण्यशृणवम्। आकर्णयं चाहं यत् अर्द्धमेशियाप्रदेशं पद्भ्यां परिदलय्य, नद-नदीरतिक्रम्य, पर्वतांश्चोल्लङ्घ्य, दुर्वारविक्रमोऽसौ भारतमाक्रान्तवान्। आर्यकुलमार्तण्डं महाराजं पुरुं च पौरुषेण पराजितवान्। निशम्यैवेदं श्रीमन्! ममाभिलाषः समभवद् यत्पश्यामि कीदृशोऽसौ महावीरः। किंविधश्चायं पराक्रमो यस्य हि भ्रुकुटिविलासमालोक्यैव समस्तोऽप्येशियाप्रदेशस्तस्य चरणयोरलुठत्। किंविधा च सा शक्तिरन्तर्हिता यस्याः समाघातेन महावीराणामार्याणामपि वीर्यमिदमुच्चलितमभूत्। अत एवात्रागत्य सेनापतेरस्य सकाशात्सैन्यपरिचालनशिक्षामध्यगच्छम्। मम हि स्वीयं राज्यं प्रत्याहर्तुमेवेच्छा, नान्यत्किञ्चित्।

[सिकन्दरः सैल्यूकसाभिमुखमपश्यत्]

**सैल्यूकसः**–नाहमिममभिप्रायमजानाम्। युवकस्यास्य मुखाकृतिः सरलसंलापश्च मह्यमरोचत। अत एवाहं सरलभावेन यूनानदेशीयसामरिकपद्धतेः सम्बन्धे युवकेनानेन सह प्रायः चर्चामकरवम्। नाहमिदमविदं यदयं विश्वासघातकः।

**अन्तगोनसः**– कोऽस्ति विश्वासघातकः ?

**सैल्यूकसः**– अयमेव युवकः ?

**अन्तगोनसः**– अयं युवको न, अपि तु भवान्।

**सैल्यूकसः**– अन्तगोनस! मम वयस्तदिदं नाद्रियसे तर्हि मास्तु। परं ममाधिकारपदं तु क्षणं सम्मानयेथाः।

**अन्तगोनसः**– जानेऽहं भवान् सेनापतिः, किन्तु भवानेको विश्वासघातकः।

**सैल्यूकसः**– अन्तगोनस!

[कोषात् खड्गमाकृष्टवान्]

अन्तगोनसोऽपि सरभसमसिमाकृष्टवान्, क्षिप्तवांश्च सैल्यूकसस्य शिरो लक्ष्यीकृत्य किन्तु ततोऽप्यधिकेन वेगेन चन्द्रगुप्तः सोऽयं स्वकरवालेन तमाघातं निवारितवान्। एतद्दृष्ट्वा ह्यन्तगोनसस्तं विहाय चन्द्रगुप्तमाक्रान्तवान्।

**सिकन्दरः**– (सरभसमुपसृत्य) तिष्ठ।

[एतस्मिन्नेवान्तराले अन्तगोनस्य खड्गश्चन्द्रगुप्तस्य कृपाणेन प्रत्याहतः सन् भूमावपतत्]

**सिकन्दरः**– अन्तगोनस!

[अन्तगोनसो लज्जयावनतवदनोऽभूत्]

**सिकन्दरः**– अहं तवौद्धत्यमिदं प्रत्यक्षमवलोकयन्नद्य त्वां राज्यान्निर्वासयामि। एकस्य साधारणसेनाधिकृतस्य हन्त सेयं स्पर्द्धा! अहमेतदवधि ते वैयात्यकाण्डमिदमवचनः सन्व्यलोकयम्। तवैतदपि साहसं स्यादिति नाहं स्वप्नेऽप्यभावयम्। गच्छास्मिन्नेव क्षणे, निर्वासितोऽसि त्वं मया।

[अवाङ्मुखोऽन्तगोनसस्ततः प्रातिष्ठत्]

**सिकन्दरः**– तव चाऽपराधः सैल्यूकस! न तथा गुरुस्तथापि भविष्यति सावधानो भवेर्यत् यूनानदेशीयसम्राजः सम्मुखे तत्सेनाध्यक्षस्य क्रोधाविष्करणं न शोभायै। किञ्च–युवक!

**चन्द्रगुप्तः**– सम्राट्!

नालोकितं सुषमया पुरसुन्दरीणां,
　　　　नेत्राभिभावि सुभगं नयनं मदीयम्।।७।।
नाहं स्पृशामि शकटीं न च लाङ्गलं वा,
　　　　जायां त्यजामि हय! नो क्षणमात्रमेव।
नो वा खलीनमुखतामुपयामि तत्त्वां
　　　　निन्दाम्यमन्दमिह वीक्ष्य रथं वहन्तम्।।८।।

(४)

# धन्योऽसि धर्मवीर

सार्द्धं शताब्दीद्वयमतिक्रान्तम्। सर्वस्मिन्नपि भारते मोगलसम्राज ओरङ्गजेबस्य विजयवैजयन्ती प्रस्फुरन्त्यासीत्। उत्तरदिशि अफगानस्थानपर्यन्तम्, पूर्वस्यां वङ्गोपसागरं यावत्, पश्चिमायां सिन्धुतटाद्बिलोचिस्थानावधि, दक्षिणायां च काबेरीतटान्तं मौगलसाम्राज्यं व्यस्तीर्यत। छत्रपतिशिवाजिना बीजापुर–गोलकुण्डाप्रभृतीनि पठानराज्यानि विजित्य या भारतधर्मपताका भृशमारोपिताऽभूत्तामप्यपरोपयितुं मोगलसम्राजा सुदृढमभूद् बद्धः परिकरः। निःसीमां यवनसेनामादाय चकार विजययात्रामवरङ्गजेबः। स्थाने–स्थाने हिन्दूनां तद्धर्मस्थानानां च विनिपातदृश्यानि चित्रितान्यभूवन्। धर्मप्रचारस्य मिषमादाय सर्वत्रापि दक्षिणभारते बर्बरतायाः साम्राज्यं विस्तारमलभत। शान्तिमयी दक्षिणादिक् अत्याचारजैर्हाहाकारैराकुला समभवत्। एवं विधायां घोरपरिस्थित्यां भीमा–इन्द्रायणीनद्योः सङ्गमे तूणपुरप्रदेशे या रोमहर्षिणी सहृदयहृदयकम्पिनी लोकोत्तरा घटना समभवत्तया हि भारतेतिहासस्य पृष्ठानि सर्वदार्थमङ्कितान्यभूवन्। कल्पान्तं च सेयमनपगामिनी स्मृतिमुद्रा इतिहासप्रेमिणां हृदयान्नोपमृष्या भवेत्।

१६८९ तमख्रिष्टीयवत्सरस्यासीत्कृष्णः फाल्गुनः। धर्मवीरतासाक्षिणी समुदगादमावस्या। पवित्रतमेऽस्मिन्नेव दिने धर्मवेदेरुपरि यत्किल लोमहर्षणं काण्डमभ्यनीयत तेन हि सर्वापि दक्षिणा दिक् सहसैवाऽकम्पत। धर्मोन्मादमत्तो यवनसम्राडवरङ्गजेबो हिन्दुपतेः शिवाजीमहाभागस्यारोपितां हिन्दुपताकां दर्शं दर्शमासीन्मनस्येव धूमायितः। स हि कुलद्वेषितां सत्यां करिष्यन्कूटोपायैः शिवाजितनयं सम्भाजिमहोदयं बलाज्जग्राह। पूर्ववैरमनुस्मरंश्चायं यवनधर्ममङ्गीकर्तुमेनं बहुधा विवशमकरोत्। अधिकारपदस्य प्रलोभनानि, राज्यसमर्पणस्य च प्ररोचनाः सम्मुखीकृत्य सम्भाजिनमात्मसात्कर्तुमयमजस्रं प्रायतत्। परं हिन्दुपतिपुत्रः सोऽयं तान्येतानि प्रलोभनानि पदाघातेनावाहेलयत्।

इत उत्तरं धर्मपरीक्षाया द्वितीयं काण्डं प्रारभ्यत। बलात्कारः प्रावर्तत। सम्भाजिनमुन्मूलयितुं नानाविभीषिकाः प्रादर्श्यन्त। निष्कोषैः खड्गैः परिवृतायाऽस्मै प्राणभयमदर्श्यत किन्तु धर्माभिमानी सोऽयं न कथञ्चिदपि व्यचलत्। खड्गकोटिभिर्वक्षसि निर्दयमाहतायास्मै यवनधर्मस्वीकाराय पुनरप्याग्रहः प्राकाश्यत परं धीरधुरन्धरः, सोऽयं नाकार्षीद् भ्रूक्षेपमपि। धन्याऽस्य धीरता। यद्ययमवाञ्छिष्यत्तर्हि भारतव्यापियशसो यवनसम्राजोऽनुग्रहात्प्रभूतं राज्यमलप्स्यत। सन्तीतिहासे बहून्युदाहरणान्येवंविधान्यपि। परं छत्रपतितनयः सोऽयमात्मोचितमसामान्यं धैर्यमेव सर्वथा प्रकटीचकार। शिवाजी यथा प्राणापगमपर्यन्तं राष्ट्ररक्षार्थं मोगलैः सह निर्भीकं युयुधे, तथैवाऽयं विवशदशायामपि प्राणान्तं यावन्निर्भीकतया धर्मरक्षार्थं समनह्यत। यदि पिता राष्ट्रवीरः समभूत्तर्हि

पुत्रोऽयं धर्मवीरपदमर्हतीति को वा न सम्मन्यते। कैश्चिदितिहासकारैः सम्भाजिनो दूषणानि प्रकटीकृतानि परं भारतसाम्राज्यसूर्ये प्रचण्डं तपति सम्भाजिनोऽस्य यादृशी विवशदशाऽसीत्तां सर्वथा हृदये कृत्वैव किञ्चिदालोचनं समुचितं स्यात्।

सम्मुखे 'दिल्लीश्वरो वा जगदीश्वरो वा' इत्यादि स्तूयमानो निःसीमप्रतापशाली भारतसम्राट् अवरङ्गजीव आसीत्। अग्रे च निःसहायतया विवशीकृतः सोऽयं सम्भाजी एककः समभवत्। किमेतस्यां परिस्थित्यां सम्भवेत्? किन्तु सम्भाजिना अवरङ्गजेबाय यादृशमुत्तरं दत्तं न तत्साम्यं समग्रेऽपीतिहासे समुपलभ्येत। भारतसाम्राज्यदर्पितो धर्ममदान्धश्चावरङ्गजेबो भर्त्सनामिमामाकर्ण्य प्राज्वलत्क्रोधाग्निना। स हि तस्मिन्नेव समये प्रत्यक्षहननस्य ददावाज्ञाम्। हिंसाऽपि कीदृशी! यस्याः प्रत्यक्षदर्शनस्य का कथा श्रवणेनाऽपि हृदयवतो हृदयमुद्वेलते। प्रत्यक्षं पश्यतामेव लोकानां तस्य जिह्वा मुखान्निर्दयमाकृष्यत, खण्डशश्चाक्रियत। पुनर्नेत्रे लोहशलाकाभिर्बलादाकृष्य बहिरक्रियेताम्। परितः खड्गकोटिभिरस्य शरीरं सहस्रधा निर्दयमविध्यत। रक्तढझरी सर्वतः प्रास्रवत्। मांस-वसाभिस्तत्स्थानमपूर्यत। परमेवं बीभत्सकाण्डं प्रत्यक्षमीक्षमाणोऽपि सोऽयं नरनैकषेयोऽस्य शरीरं तिलशः खण्डयितुमाज्ञामदात्। तिलशोऽभूदस्य नश्वरमिदं शरीरम्, परं धर्मवीरः सोऽयं सीत्कारमात्रमपि कर्तुं नाऽभ्यरोचयद् बर्बरस्याऽग्रे। अपि धर्मवेदेरुपरि एवं धैर्येणात्मनो बलिदानं यत्र कुत्रचिदुपलभ्येत?

अहह प्रदीप्तैरक्षरैर्जागर्ति हृदि साऽपि घोरघटना यस्यां हि गुरुगोविन्दसिंहस्य द्वावपि बालकौ धर्मवेदेरुपरि जीवन्तावेव भित्तौ प्रोथितावभूताम्। राज्यप्रलोभनानि तिरस्कृत्य, भयानकविभीषिकाश्च पादघातमाहत्य पश्यत किमुक्तं धर्मधीराभ्यां बालकाभ्याम्-

घनाक्षरी- '[1]**आस्तामुदयाद्रेस्तावदस्तावधि राज्यमिदं**
**तिष्ठतु परस्ताद्राजलक्ष्मीरविचलिता**
**किं बहुना, त्रैलोक्यस्य राज्यमपि प्राज्यमहो**
**धर्मपालनार्थं परित्याज्यमेव [2]भविता।**
**बालावबलौ स्वः किं तु धर्मरतिरावयोः सा**
**कालानलतुल्यभवत्कोपान्न [3]विगलिता**
**यवननरेश! कामं मर्माण्यवपाटय नौ**
**किन्तु निजधर्मादिदं चित्ते न विचलिता।।'**

---

१. उदयाचलादारभ्य अस्ताचलपर्यन्त राज्यम् अस्तां दूरे तिष्ठत्वित्यर्थः।

२. भविष्यति लुट्।

३. सा आवयोर्धर्मप्रीतिर्न विगलिता न विगलिष्यति (चलिष्य)।- विचलिष्यति, अनद्यतनप्रयोगेण-'अद्य तु मरणस्य भयमेवास्ति, परम्। अनद्यतने (अग्रेऽपि) काले चित्तं न चलेदिति' दाड्यातिशयो ध्वन्यते।

अवश्यमवरङ्गजेबेन आत्मनो धर्मोदारतेयं प्रदर्शिता, भारते यवनसाम्राज्यस्थापनस्य चाऽलौकिकः प्रयासः प्रकटीकृतः, परं यमुत्साहमुरसि कृत्वा सोऽयं दिल्लीतः प्रास्थित स उत्साहः सर्वकालार्थं तिरोऽभूत्। धर्मवीरस्याऽस्य प्राणबलिसमर्पणेन तादृशः प्रभावः परितः प्रासरद्येन हि यवनसाम्राज्यस्य मूलं दक्षिणभारत एव किं सर्वत्रापि शिथिलतमं चाकम्पितं चाऽभवत्। सम्भाजिनो निर्दयवधस्य संवादस्तडिदिव महाराष्ट्रेषु प्रासरत्। सेयमुद्धता बर्बरता शान्तशीतलमपि हृदयमुत्तेजयामास। घटनयाऽनया देशेऽकस्मादेव तादृशी शौर्यलहरिः प्राचलद्यस्यां हि यवनसाम्राज्यमिदं विवशमिव वेगेन प्रावहत्। अवरङ्गजेबस्तस्य सैन्यं च प्राणपणेन प्रचुरं प्रायतत् परं तमिमं प्रवाहं रोद्धुं न प्राभवत्।

इतिस्तदुपरि दैवविपदोऽपि धारापातमपतन्। तस्य प्राणप्रिया महिषी लोकान्तरमगच्छत्। सम्राड्दारिका जेबुन्निसाऽप्यम्रियत। अन्यान्ये च यवनसामन्ता मर्त्यगतिमलभन्त। अतीव क्लेशमापन्नः सम्राट्पदलाञ्छनः अवरङ्गजेबोऽपि किञ्चित्कालमवश्यमजीवत् परं तदेतस्य जीवनं कष्टोपभोगायैवासीत्। यत्किञ्चिदस्तु, स्वधर्मसभाजिनः सम्भाजिनः पाञ्चभौतिकं शरीरमवश्यं विलीनम्, परमितिहासपाठकानां हृदयेऽद्यापि समुज्ज्वलैरक्षरैर्जागर्ति यत्– 'धन्योऽसि धर्मवीरे'ति।

५

# अत्याचारिणः परिणामः

## ( १ )

गोरदेशीयो मुहम्मदः सर्वतः प्रथमं ११७८ तमे ख्रिस्टसंवत्सरे सिन्धुनदीमुत्तीर्य प्राविशद्भारतेऽस्मिन्। अनहिलवाडा, पट्नादीन् धनजनपूर्णान् जनपदान् लुण्ठितुं मरुभूमिमुल्लङ्घ्यासौ गुर्जरदेशस्य सीमानमधिजगाम्। किन्तु नासीत्तदापि भारतं वीरशून्यम्। विदेशीयदस्योरागमनसंवादमवाप्यैव धर्मस्य तीर्थस्थानानां चोच्छेदभयेन जजागार सर्वोऽपि देशः। धर्मरक्षणायोत्तेजिता गुर्जर-मालवयोर्वीरक्षत्रियाः संघशः समगच्छन्त राजधान्याम्। तुङ्गतमे एकस्मिन् गजराजे बालकमपि निजाधिपतिं समारोह्य प्रधानसेनापतिः सीमन्येव समभिरुरोध प्रतिपन्थिनम्। तुर्कदेशीयैः सादिभिरतिवेगेन समाक्रम्यन्त वीरक्षत्रियाः, किन्तु भारतीयवीराणां खड्गधारायां दूरतः प्रावहत्सर्वमपि शत्रुबलम्। इतिहासकारः 'फरिश्ता' लिखति- 'मुहम्मदः केवलं पञ्चशतयोधानादाय यथाकथञ्चिन्निजं गजनीस्थानमवापत्।'

बहुकालं यावदसौ पुनः समचिनोत्सैन्यम्। भूयोऽपि निजबलं सञ्चित्यासौ ११८१ तमे वर्षे पुनराक्राम्यद्भारतम्। सिन्धुदेशमास्कन्द्य, प्रसिद्धं देवलदुर्गं पराजित्य, स्थाने-स्थाने धनजनान्विनाश्य, परस्सहस्रैरुष्ट्रैर्लुण्ठितं वसु सङ्गृह्य पुनः परावर्तिष्टाऽयं गजनीम्। ततस्त्रिवर्षानन्तरं ११८४ तमे ख्रिष्टसंवत्सरे पुनर्भारतमाविश्य लाहोरस्य प्रसिद्धं दुर्गमाचक्राम, किन्तु षणमासान् प्रचुरं प्रयस्यापि नाऽसौ प्राप साफल्यम्। ततः स्यालकोटस्थदुर्गमाक्रम्य, देशे पुनरशान्तिं सञ्चार्य, समीपस्थान्देशान्परिलुण्ठ्य, पुनरपि भूयस्तमं द्रविणमनयन्निजदेशम्।

ऐषमः सोऽयं मुहम्मदो यवनधर्मस्य प्रबलं ध्वजमुच्छ्रित्य, सर्वेभ्योऽपि यवनराज्येभ्यो योद्धर्णिां प्रबलानि सैन्यानि सञ्चित्य, भारतस्याऽतुलं धनराशिमपहर्तुं भूयसा समारोहेणाऽक्राम्यद्भारतम्। किन्तु स्थाण्वीश्वरस्य सविधमवाप्त एवास्मिन् परमवीरो महाराजः पृथ्वीराजः (चौहान) सरस्वत्यास्तटे तरावडीनामके ग्रामे वीरक्षत्रियाणामद्भुतायाः करवालधारायाः कारयामास परिचयम्। यवनैतिहासिका लिखन्ति यद् वीराग्रगण्येन पृथ्वीराजेन तादृशमसामान्यं शौर्यं प्रकटितं येन हि साहसिकानां शिरोमणिरपि मुहम्मदो यथाकथञ्चिन्निजजीवनं ररक्ष। स्वामिनो जीवनरक्षायै तुर्कवीरैर्निजशरीराणां राशयः कृताः, ततोऽप्यतिकाठिन्येन जीविताविशिष्टैः कतिपयैरेव शरीररक्षकैः सोऽयं मुहम्मदो मृतप्रायः पलाय्य निजदेशं नीतः।

रुग्णशय्यायां षणमासान्व्यतिगमय्य पुनरपि सुस्थीभूतो मुहम्मदो निजपराजयस्य दुःखमनुस्मरन्नतिक्रोधेन, उत्साहेन शौर्येणं, कौटिल्येन च तुर्क- मुगल- ताजिक- (अरब) अफगान- गाजिनां च महामहद् दलमेकत्र चकार। एतन्मध्यतः सपादलक्षमश्वारोहानादाय सोऽयं सिन्धुनदीमुत्तीर्य प्रतिजिघांसया इन्द्रप्रस्थमभिससार।

किन्तु हन्त महाराजपृथ्वीराजस्य नासीत्पुरातनी स्थितिः। पारस्परिककलहैः विशेषतश्च कान्यकुब्जराजेन सह भयानकसङ्ग्रामेण, कह्नचौहानादिसुप्रसिद्धवीराणां परिक्षयेण, रात्रिन्दिवा विलासरसासक्तिवशादप्रबन्धेन चमूहानसैन्यमासीदिदानीं दुर्बलम्। यथैव स पुनः शत्रोराक्रमणस्य संवादमश्रौषीत्तथैव यथाकथञ्चिद्विलाससौधाद्बहिर्निष्क्रम्य निजसामन्तानामाजुहाव सभाम्, सज्जायमास च सैन्यम्। तरावडीक्षेत्रे पुनरपि द्वयोः पक्षयोः समनह्यन्त सेनाः। किन्तु कुटिलो मुहम्मदो यस्य हि समरचिन्तया नासीन्निद्रा, भीषणायां रात्रावेव प्रचण्डं निजसैन्यं युद्धायाऽऽदिदेश। आसीद् घोरं गर्जन्ती भयङ्करी वात्या। सहैव मुशलधारावर्षं ववर्ष मघवा। निबिडान्धकारान्न ददर्श हस्तो हस्तम्। ईदृशे घोरतमे समये स ह्यतिसतर्कतया निजसैन्यं सज्जीकृत्य सरस्वतीमुत्तीर्य च भारतीयसैन्यमाचक्रामेदम्। हन्त बहवः क्षत्रियवीराः शयाना एव न्यहन्यत। बहवस्तु जागरित्वापि न यावत् शस्त्रं गृह्णन्ति तावदेवाततायिभिर्व्यपोथ्यन्त सहसा। किन्तु यैर्वीरैः खड्गो लब्धस्तैरतिशौर्येण पराक्रन्त सम्मुखे। तत्कालं जागृतैरपि वीरैस्तथा शोर्येण युद्धं यथा सर्वापि क्षत्रियसेना विनाशमुखादासीद्रक्षिता।

भगवति भानौ प्रकाशमान एव भारतीयभानुमुदयमानं पृथ्वीराजमसौ ददर्श सम्मुखे। अष्टादशसहस्रमश्वधारान् येभ्यो ह्ययमेतदर्थमेव चिरात्समरशिक्षां ददौ, पृष्टतोऽनुकर्षन्मुहम्मदोऽभिससार पृथ्वीराजम्। अभूत्तुमलं नियुद्धम्। शत्रुसैन्यास्कन्नस्य स्वामिनो रक्षार्थं वीरवरश्चामुण्डरायः, सिंहविक्रमः सामन्तसिंहः, धीरश्चन्द्रपुण्डीरस्तत्सहचराश्चान्ये च दशसहस्रयोधाः समरमहामखेऽस्मिन् निजशरीराहुतिमदुः। हन्त सहस्र शस्त्रक्षतानि तनौ वहन्नपि वीरशिरोमणिश्चमूहानराजो मूलकच्छेदं चिच्छेद शत्रुसैन्यानि। किन्त्वग्रे क्षीणापुण्यो ग्रह इव सरस्वत्याः पवित्रे तटे निपपात महाराजस्य वीरशरीरम्। हन्त हन्त चिरं स्वतेजः संसारेऽस्मिन् परितः प्रसार्य सोऽयं स्वातन्त्र्यसूर्यो भारतीयगगनात्सहसैवाऽस्तमगात्। तद्दिनादारभ्यैव च दुर्दान्तदैवेन निर्दयया निजलेखन्या भारतस्याऽस्य नामधेयं स्वतन्त्रदेशानां सूचीतो हन्त निष्करुणं व्यच्छिद्यत्।

( २ )

इतः पर क्रूरा निर्दयाश्च वैदेशिकाः संघशः समागत्य भारतीयप्रजानामुपरि भयानकमत्याचरन्। वर्द्धमानाऽहमदो मुहम्मदो रक्तपिपासुना निजसैन्येन सह प्रत्येकशीतकाले समागत्य दिल्लीप्रान्तीयैर्हिन्दुराजभिः सह घोरं युयुधे। एतस्मिन्नेवाऽवसरे मातृभूमिं पारतन्त्र्यनिगडितां दृष्ट्वा गक्करजातीयाः शूरवीराः समाक्रम्यन्त कोपेन। स्वातन्त्र्यप्रियास्ते दासताऽपेक्षया मरणमेव साधीयो मत्वा समवायन्त सिन्धोः प्राचीने तटे। गृहानग्निसात्कृत्य, स्त्रीबालानपि निहत्य, प्राणेभ्योऽपि प्रियाणि निजशस्त्राण्यादाय समभ्यसरंस्ते लाहोरपरिसरम्। यो वा यवनः सम्मुखमुपारमत्तमेव खण्डशोऽकुर्वन्। लाहोरमवाप्यैव गक्कारवीराः सिंहविक्रमेण दुर्गमभ्यारोहन्,

तृणनाशमनाशयंश्च शत्रुसैन्यम्। सिन्धोः शतद्रोश्च मध्यतो न तैरेकोऽपि परिशेषितो यवनवीरः।

दुःसंवादमिममाकर्ण्य समग्रामपि निजवाहिनीमाकर्षन्मुहम्मदः। कुतुबुद्दीन ऐबकेन सह शतद्रुमुत्तीर्य समाजगाम लाहोरपरिसरे। पदे पदे समभूवन वीरैर्गक्करैः सह यवनानामायोधनानि। एकैकेनाऽपि रक्तबिन्दुना मातृभूमेः पूजां कृत्वा वीराग्रण्यास्ते गक्कराः समवापुः स्वर्गमादित्यमण्डलं भित्त्वा। एवमिव भारतं विधूय गोरदेशीयोऽसौ मुहम्मदो निदाघर्तोर्यापनाय विश्राम्यति साम्प्रतं सकन्धावारमास्थाप्य सिन्धुसरित्तटे।

( ३ )

अर्द्धरात्रस्य समयः। वहति मन्दं मन्दं सुखदो वायुः। विराजति च परितो नीरवनिस्तब्धता। गगने घनानां घनीभावेनाऽन्धकारोऽपि सम्प्रति घनीभवति। सन्तमसेऽस्मिन् घोरतरं गर्जन्ती वहति सिन्धुरुद्धतम्। नद्याः परपारे क्वचित्क्वचित्तीव्रो हेषास्वनो भिनत्ति निस्तब्धताम्, सूचयति च निभृतं यदेतस्मिन्स्थाने महत्येका वाहिनी सम्प्रति कृतसन्निवेशेति। एतावत्येव समभवन्नद्यामेकः शब्दः, तत्समकालमेव च तटवर्तिनो लतागुल्माद्दीर्घदेह एको मनुष्यो निःसृत्य सरित्तटमभ्यसरत्। तस्य पृष्ठतश्च लघुरेकः संघो यस्मिन्नुपविंशाः पुरुषाःलताघनान्निर्गत्य नदीतटे पुरुषस्याऽस्य निकटे समवास्थित। कृतावस्थानानामेषां न व्यतीयुः कतिचित्पला अपि, एतावत्येवान्तराले तालप्रमाण एकः पुरुषो विनिर्गत्य तस्थौ तेषां सम्मुखे।

दृढैर्निबिडैश्चावयवैरमी पुरुषा गक्करा इति प्रतीयन्ते स्म। आसन्निमे खड्गैश्चर्मभिश्च सन्नद्धाः। नासीदेषां शरीरे किमपि वसनम्, केवलं सिंहपुच्छस्य कच्छबन्धमात्रमासीत्। सूचीभेद्येऽस्मिंस्तिमिरे नैतेषामाकृतिरशक्यत विलोकयितुम्, किन्तु दीप्ताङ्गारोपमेनेत्रे असूचयताममीषां भयङ्करताम्। नदीतो निःसृत्य सम्मुखमुपगत एव तस्मिन्पुरुषे, दलस्याऽस्य नायकेन यस्य हि सुदृढं शरीरमपरिमितं बलमसूचयदनायासम्, पादद्वयमग्रे समुपसृत्य प्रोक्तं गम्भीरया गिरा–कनक! कः संवादः?'

प्रणम्य नायकम्, धीरेऽपि च गम्भीरे स्वरे प्रत्युक्तं कनकेन– 'कण्ठदघ्ने जले स्थितः सर्वमहमवालोकयम्। यवनराजपटमण्डपस्य प्रान्तावस्थिता वृतयो दूरीकृताः। यवनाधिनायकस्य शरीररक्षाभारः साम्प्रतं मन्त्रिणोऽधीनः, यस्य हि निवासमण्डपस्तस्यैवान्तिके परिकल्पितः। शतं सैनिकाः प्राहरिकाः, येषु पञ्चाशन्नदीतटं रक्षन्ति, पञ्चाशच्च पटमण्डपं परितो भ्रान्त्वा कुर्वन्ति द्वाररक्षाम्'। एतावदाकर्ण्यैवाऽधिनायकेन दीर्घं निजबाहुमुच्छ्रित्य प्रोक्तं वीरोचितेन साहसेन– 'अयि नो वीराः! शूरान्नरेशान्पराजित्य, भारतधरामुपरज्य रक्तेन, सर्वानस्मांश्च परतन्त्रीकृत्याऽपि किं मुहम्मदः शयीत सुखनिद्रया? मैवम्, मैवम्। तच्छोणितपिपासिनी सेयमस्माकमसिलता पिबेदद्य निचितं तस्य शोणितम्।'

पृष्ठेन कूर्मपृष्ठं दन्तैश्च करवालं वहन्तो गक्करवीराः प्रबलं वहन्त्यामपि नदीधारायां सरभसमुदप्लवन्त, कतिपयक्षणैरेव च प्रापुः परं पारम्। दृष्ट्वैव च यवनोपकार्यां ते

श्येनपातमपतंस्तस्या उपरि। प्राविशंश्च भित्तिं विच्छिद्य तदभ्यन्तरे। एतेषामुपरोधाय यवनराजस्य शरीररक्षका यथैवाभ्यसरंस्तथैव योद्धृणां भयजनकः कनकः पर्वत इव सम्मुखमुपगत्य सर्वांस्तान् रुरोध। स हि महता च चर्मणा, यस्मिन् तीक्ष्णाग्रा लौहकीलकाः संलग्ना आसन्, सवेगमाहत्य बहून् यवनसैनिकान् भूमौ न्यपातयत्।

शरीररक्षका न्यरुध्यन्त द्वार एव कनकेन। इतः समरभयङ्करा गक्करास्तु सवेगोत्फालं प्राविशंस्तस्मिन् पटमण्डपे, यस्मिन्हि यवनराजो मुहम्मदो रत्नपल्यङ्कमध्यशयिष्ट। पार्श्वद्वयावस्थितौ तातारदेशीयौ द्वौ सेवकौ मुक्तामण्डिताभ्यां व्यजनाभ्यामवीजयतां यवनराजमिमम्। क्रोधान्धैर्गक्करैः खड्गेन खण्डशः कृतं मुहम्मदशरीरम्। हन्त हन्त, रक्तरञ्जितान्यङ्गानि पटमण्डपस्य भूतले व्यलुठन्नितस्ततः। मुहम्मदं परिसमाप्य हर्षेणाऽधीरास्ते गक्करवीराः खड्गं परिचालयन्तो नद्यामुत्प्लुत्य निरगच्छन्। भारतजनन्या हर्ष-शोक-जनकः कनकस्तु सम्मुखसमरे तत्रैव वीरगतिमगात्, यस्य हि शौर्यगाथामप्रलयं गास्यन्ति सन्तः स्मृतिमन्तः।

## ६

# सिंहदुर्गे सिंहवियोगः

[छत्रपतिः शिवाजीवीरो हिन्दूनां स्वातन्त्र्यरक्षायै क्षपयामास समग्रमप्यात्मनो जीवनम्। स्वैरं भोगविलासस्य का कथा, युद्धसंघटनाभ्य एव निर्मुक्तोऽस्य जीवनकालो ननु नाम भवेत्स्वल्प एव। किन्तु १६६८ तमे ख्रिष्टसंवत्सरे समभून्मोगलैः सह शिवाजीवीरस्य सन्धिः। प्रादीयत शिवराजवीराय राजेत्युपाधिः। पूनाप्रान्तस्य सर्वोऽपि परिसरः समभूदस्य शासनभुक्तः। चाकण-सूपाप्रान्तयोरप्यासीदस्याधिकारः। विदर्भ- (बरार) प्रान्तेऽपि नवीनतया प्रादीयत कचिदंशः। एतस्य प्रत्युपकारे-प्रत्यजानीत शिवाजीवीरो विजयाय मोगलानां साहाय्यम्। अनुमानतस्त्रीन् वत्सरानयमतिष्ठत्सन्धिकालः। अनेन ह्यधिगतराज्यस्य, नियमनाय निजशासनस्य दृढीकरणाय च प्राप्तः पर्याप्तः समयः शिवाजिना। परं चिरादविश्वस्तहृदयस्यौरङ्गजेबस्य भाग्ये क्वासीच्छान्तिः। सह्यनुबभूव त्वरितमेव दक्षिणभारतस्याऽविश्वासगन्धम्। इतः शिवाजीवीरोऽपिनाभूदनेन सन्धिना सन्तुष्टः। अत एव शीघ्रमेवोभयपक्षयोः सन्धेरुत्तरं विग्रहस्य समभूत्प्रारम्भः।]

### ( १ )

आसीज्जलधरकालस्य प्रारभ एव। श्यामविशङ्कटा मेघघटा मत्तमातङ्गघटा इव गगनाङ्गणे परस्परमसज्ज्यन्त व्ययुज्यन्त च पुनर्वात्याभिः। प्रशान्तशिशिरः सर्वोऽपि वनोद्देशः सम्बभार कामप्यपूर्वामेव श्रियम्। भुवनभास्करो भगवान्प्रभाकरो वियदङ्गणमारुह्य नाधुनापि ददौ दर्शनं लोकेभ्यः। आसीद्भावुकैरनुध्यातं रमणीयमिदं प्रभातम्। रणैकधीरस्य शिवाजीवीरस्यासीत् स्कन्धावारः साम्प्रतं रायदुर्गे (रायगढ)। किन्तु माता जीजाबाई न्यवात्सीत्सम्प्रति प्रतापदुर्गे। सा यथैव भगवतो भास्वतो दर्शनार्थमुदघाटयद्वातायनं तथैव पर्वतशृङ्गाधिष्ठितं सिंहदुर्गमुपागमत्तस्याश्चक्षुषोर्गोचरम्, यस्य हि चूडायां प्रास्फुरच्चन्द्रचिह्नाङ्किता यवनराजवैजयन्ती। मनस्विन्या राजमातुरन्तःकरणे प्राविध्यत शल्यमिव। हा हन्त महाराष्ट्राधिष्ठितं सिंहदुर्गमिदं यवनानां हस्ते! वयं च जीवन्तः पश्यामः। नेदमसह्यत मनस्विन्या राजजनन्या।

सा तत्कालमेवावारुक्षद्राजहर्म्यात्। नीचैरुपगत्य प्रातिष्ठिपत्सन्देशहरमेकं रायदुर्गं प्रति। रायदुर्गमुपयातेन दूतेन प्रापितः सन्देशः शिवराजवीराय यत्-मातुराज्ञया तत्कालमेव प्रतापदुर्गमसौ सम्प्रतिष्ठेतेति। आज्ञापालकः पुत्रो भोजनं कुर्वाण आसीत्। मातुराज्ञामधिगत्य तादृशावस्थायामेव ससमादरमौलिमनमयत्सः। तत्कालमेव भोजनं विमुच्य, क्षालिताक्षालितहस्त एव शस्त्रास्त्रैः सुसन्नह्य समारोहत्प्रियतममश्वम्। वायुवेगं पराकुर्वंश्चाऽसौ प्राप क्षणादेव प्रतापदुर्गम्। वीरमाता जीजाबाई सोत्कण्ठं प्रतीक्षमाणैवातिष्ठत्। अन्तर्भवनाधिविष्टेन दृष्टं शिवाजिना यत्पाशकक्रीडासामग्री सर्वापि सर्वतः सज्जा। मातुराज्ञाऽभवत्- 'क्रीडतु भवान्मया सह पाशकैः क्रीडायां च कश्चन प्रशंसनीयः पणः क्रियताम्।' सहसोपगतस्य शिवाजिनः समभूत्परो विस्मयः

किन्तु मातुरनुशासनस्याग्रे कञ्चिदपि प्रश्नमकृत्वा विनम्रवदनः स पाशकानक्षिपत्।

इतो माताऽपि निजेष्टदेवतां भवानीं ध्यात्वा प्रारेभे क्रडीनम्, शीघ्रमेव च सा शिवाजिनं पराजेष्ट। सस्मितवदनोऽसौ निवेदयामास जननीम्– 'दुर्गाधिपजनन्याः क्रीडायां को वा भवेदन्यः समुचितः पणः ? अत एव यत्किञ्चिदपि दुर्गं मे सवैरमभ्यर्थयितुं शक्नोति भवती'। जीजाबाई त्वरितमभ्यधत्त– 'सिंहदुर्गमहं वाञ्छामि'।

सहसैवाऽऽह्वानस्य पाशकक्रीडायाश्च साम्प्रतमवागमत्कारणं शिवाजी। किन्तु सिंहदुर्गस्य विजयो न साधारणं कार्यम्। सिंहदुर्गाधिपतिरुदयभानुर्दानवः साक्षात्। एकस्य महिषस्य द्वयोर्मेषयोर्विंशतिप्रस्थतण्डुलानां च प्रत्यहमशनमासीत्तस्य साधारणम्। आसन्नुदयभानोरष्टादश स्त्रियो द्वादश पुत्राश्च, ये पितुरप्यधिकाधिकबलाशालिनः प्रासिध्यन्। दुर्गमिदं महाभयङ्करः 'चन्द्रावलि' नामको हिंस्रहस्ती, दानवबलश्चैको योद्धाऽप्यरक्षद्यस्य नाम 'सीदी हिलाल'। एतयोर्द्वयोर्विजेता दूरदूरतोऽपि दुर्लभो दुःसम्भवश्च। एवंविधरावणरक्षितमिदं दुर्गं को वा शक्नुयादधिकर्तुमस्मिन् काले। किन्तु क्षत्रियाणी यथा निजामाज्ञां नेच्छति पराकर्तुं तथा वीरक्षत्रियोऽपि नाऽऽत्मवचनं शक्नोति परावर्तयितुम्। शिवराजः सिंहदुर्गमिदं विजित्य मातुश्चरणयोः समर्पणस्य चकार प्रतिज्ञाम्।

उत्तेजनावशः प्रतिज्ञामवश्यं चकार, किन्तु पञ्चमुखस्य कुपितभुजङ्गस्य फणां को गृह्णीयात ? दानवाधिष्ठितमिदं दुर्गं कोऽवाभिसरेदाऽऽक्रमितुम् ? अत्यर्थं विचारयतः शिवाजिनो बहोः कालादनन्तरमभूत्स्मृतिगोचरो बाल्यसखस्तानाजी मालुसरे। तानाजी मालुसरे सम्पत्तौ विपत्तौ चोभयत्रापि शिवाजिनः सहचरः। सर्वतः प्रसिद्धः पराक्रमी स्वामिभक्तश्च। शिवाजी सन्देशमिममादाय त्वरितगामिनं दूतमेकं प्राहैषीद्यत्– 'तानाजी द्वादशसहस्रसैनिकानादाय दिनत्रयाभ्यन्तर एव प्राप्नुयाद् रायदुर्गम्'। यदा हि दूतः प्राप तानाजीसमीपे तदा स 'रायबा'भिधानस्य निजपुत्रस्य विवाहसम्भारमासीत्सञ्चिन्वानः। प्रभोराज्ञामधिगत्यैव विवाहवादित्राणि स प्रत्यषेधत्। दिनत्रयस्यान्तराल एव च द्वादशसहस्रयोधानाऽवहन्नसौ प्रापद् रायदुर्गस्य द्वारदेशम्। इतः शिवराजोऽपि तमेनमासीदेव प्रतीक्षमाणः। यथैव स हि महाराष्ट्रसेनाया ध्वजानालोकयत्तथैव त्वरितमभिक्रमन्बहिरागत्योपापीडयद्वक्षसा वक्षसि तानाजिनम्। सप्रणयमुपालभत तानाजी शिवाजिनम्'तनयस्य विवाहोत्सवात्किमित्यहमाकारितः'। प्रत्यभाषत शिवाजी– 'न त्वं मयाऽऽहूतः, अपि तु माता त्वामाह्वयत्'।

माता जीजाबाई करे प्रदीपं वहन्ती पूर्वत एवासीदवस्थिता द्वारे। सा हि तानाजिनो मुखं परितः प्रदीपेन नीराजयन्ती शिरस्यजिघ्रत्। जयमालां परिधाप्य चकारालिके तिलकम्। विघ्नानामपाकरणाय कराङ्गुलीरास्फोटयन्ती **( चटकाती हुई )** सा व्यापदां **( टोटका )** तिरस्करणतन्त्रमकरोत्। इष्टदेवतामभिध्याय च तमेनमभ्यवर्धयदाशीर्भिः। आशिषोऽभिगृह्णता तानाजिनापि जीजाबाईमभिनस्य सिंहदुर्गविजयस्याऽकारि सङ्गरः। रात्रेरन्धकारेण च सहैव परितः पर्यभ्राम्यन्महाराष्ट्रवरूथिनी सिंहदुर्गोपत्यकासु।

## ( २ )

ग्रामीणकवेषे निह्नुत्यात्मानं स्वयं तानाजी सिंहदुर्गस्य परिक्रमामकरोत्, आक्रमणाय ज्ञातव्यविषयान्पर्यज्ञासीद्यथायथम्। परितोऽभूत्सूचीभेद्योऽन्धकारः। एकतो निसर्गात्तामसी भाद्ररजनी, तदुपरि द्विगुणं त्रिगुणं वा संघटितेन नीलघटासंस्तरेण निबिडमाच्छाद्यत वियदङ्गणम्। अलुप्यतेव दिग्दिगन्तेभ्यः प्रद्योतकथा। कज्जलमवर्षदिव नभस्तलम्। न व्यलोकत हस्तो हस्तम्। नास्मिन्नन्धकारे सायमपि बहिर्निस्सरणस्याभूदुत्साहः कस्यचित्तदुपरि सोऽयं महानिशीथः। सर्वतो नीरवनिस्तब्धताया आसीदेकच्छत्रं राज्यम्। संसारः सुखमशयिष्ट निजनिजनिवासेषु। आसीत्सिंहदुर्गं प्रसुप्तमिव सर्वतः। रक्षका घोरनिद्राया अङ्के विश्राम्यन्तः प्रासारयन्सर्वतो नासाध्वनिम्। अवसरज्ञो महावीरस्तानाजी निचितैः शूरसैनिकैः सह कल्याणद्वारस्याधोदेशमवाप। दुर्गमिदमासीदधिविष्टं तुङ्गतरे गिरेः शिखरे। अत एव नाभूदुपर्यारोहणं यस्य कस्यचित्कार्यम्।

शिवाजिनः सङ्कटसहायिकां 'यशवन्त' नाम्नीं प्रसिद्धां गोधां[१] निरसारयन्मञ्जूषिकातस्तानाजी। स हि तन्मस्तके चन्दनमाचर्च्य, वक्षसि मालामासज्ज्य, कटिभागे चास्याः सम्यगावध्याऽऽरोहणरज्जुं,[२] प्राक्षिपदेनां दुर्गोपरि। अत्युच्चतायाः कारणान्नेयं यथास्थानमवस्थातुमशकत्, प्रत्युत प्रापत्तदधस्तात्। अस्मिन्वारे प्रत्तवानस्यै विभीषिकां तानाजी 'यद्यस्मिन्वारेऽपि सेयं परावर्तेत तर्हि तामेनां निहत्य भक्षयेयम्'। उक्त्वा चैवं द्विगुणेन बलेन प्राक्षिपदेनां दुर्गाभिमुखम्। अस्मिन्वारे शिखरोपरि सेयं निचखान निजे प्रपदे। लम्बमानामारोहणरज्जुमवलम्ब्य त्वरितत्वरितमारोहन्महाराष्ट्रसैनिकाः। आरोहतां सर्वप्रथमा संख्यासीन् महावीरस्य तानाजिनः। स हि दन्तैः खड्गमवष्टभ्य, करतलगतमिव जीवनं वहन्नसौ कराभ्यां रज्जुमवलम्बमानः समधिरुरोह दुर्गम्, आक्रम्यदिव वीरशत्रोरधिवक्षःस्थलम्। एवं किल पञ्चाशत्पराक्रमिणो यावत् प्राप्नुवन्ति शिखरदेशं तावन्मध्यतो विचिच्छिदे सा रज्जुः। उपरितना उपरि नीचैस्तनाश्च नीचैर्विवशमतिष्ठन्।

स एव सत्यो नेता यस्य मस्तिष्कं विषमसमयेऽपि शान्तमवतिष्ठेत। बुद्धिश्च समीहितसिद्धये सफलमवलम्बेत पन्थानम्। तानाजिनः साम्प्रतमासीदेकतो भयानकशत्रुभिः सङ्कुलं दुर्गम्, अपरतश्चासीत्पातालगामिनीव भयङ्करी परिखा। किन्तु विचारशक्तिं सुदृढमवस्थापयता महाराष्ट्रसेनापतिना निरचीयत दुर्गोपर्याक्रमणमेव। निःशब्दपदमेतैर्गत्वा न्यहन्यन्त ते सैनिका ये किल कल्याणद्वारे, तथा अपरयोर्द्वयोर्द्वारयोश्च प्राहरिकतानियोगं निरवाहयन्। उदयभानुरस्मिन्समये मदिरायामहिफेने च मत्तः प्रयाति स्मान्तःपुरे। यथैव स शत्रोरागमनस्यो-

---

१ 'पाटा गोह' इति प्रसिद्धो जन्तुः।

२ 'कमन्द'

दन्तमधिजगाम तथैव स प्राहिणोत्प्रथमं चन्द्रावलिदन्तावलं ततः सीदीहिलालं तस्याभिमुखे। तानाजी तस्य समयस्य जगत्प्रसिद्धः खड्गयोद्धासीत्। हस्तिनः शुण्डा, हिलालस्य च शिरो यदा खङ्गस्यास्योपहारोऽभूत्तदा स्वस्य द्वादशपुत्रान्प्राहिणोद्रणाङ्गणमुदयभानुः। तेऽपि यदा समराग्नावहूयन्त तदा व्यरंसीदुदयभानोर्मदश्च निद्रा च। क्रोधाग्निना परीतः स्वैरमष्टादशाऽपि निजपत्नीः स्वकरेणैव निहत्य निष्कोषं खड्गमाददानः पठानसेनया पृष्ठतोऽनुगम्यमानः स हि समायासीद्दुर्गाद्बहिः।

सरभसमभ्याक्रमत्स हि पञ्चाशतं तान्महाराष्ट्रवीरान्। समरशिरसि नैकसंख्याकानां प्रतिपक्षवीराणां सोत्साहमाहुतिग्रहणेन प्रदीप्तपराक्रमपावकास्ते मूलकच्छेदमच्छिदन् म्लेच्छसैनिकानेतान्। मुष्टिमितानामपि महाराष्ट्रवीराणामेषामाहवप्रचण्डतामालोक्य समग्रापि भयात्प्रचकम्पे चमूर्यवनानाम्। केचिदितस्ततः पर्यसरंस्तर्ह्यन्ये जीवनरक्षामनालोकयन्तः कान्दिशीकतामगुः। साक्षात्कृतान्त इव यवनैरालक्ष्यमाणो महापराक्रमस्तानाजी यस्यामेव दिशि यवनसैन्ये प्राविशत्तत्रैव कन्धराकबन्धैर्नीरन्ध्राऽभवत्समरवसुन्धरा। तस्मिन्दिने यथा पराक्रान्तं महाराष्ट्रसैनिकैरेतैर्न तथा समग्रेऽपि निजस्यायुषि। न जाने, जीजाबाईकृतेन रक्षाकार्मणेन, तस्या हार्दिकेन वाऽऽशीर्वादेन, पुण्यप्रेरणेन वा शिवाजिवीरस्य ते तथाऽप्युद्ध्यन्त यथाऽपारापि सा यवनवाहिनी सम्प्रति निस्तब्धेवास्थात्। न चैतेषामुपरि कस्यापि शस्त्रं प्रबभूव, न च कश्चित्पराबभूव यवनवीरस्तान्।

एवंविधामव्यवस्थामालोकयमानः सर्वदैव समरे विजयश्रियालिङ्गितः सोऽयमुदयभानुर्मनस्येव क्रोधाग्निनाप्लुष्यमाणः सर्वानात्मनः सैनिकान्पृष्ठे कृत्वा स्वयं समभिससार रणधीरं तानाजिवीरम्। इतः सोऽयमपि साधारणसैनिकानां समरेऽपरितुष्यन्निव प्रतीक्षते स्म सर्वतः प्रसिद्धं वीरमिमम्। द्वावपि सेनापती निजां सेनां पृष्ठतो विधाय सोत्साहं मिथः खड्गमचालयताम्। तानाजिनो हस्तलाघवेन खिन्नोऽभूद्भीमशरीर उदयभानुः। किन्तु बहुकालं यावदेकाकी समरशिरसि युध्यमानः परःशतान् योद्धॄन्मिर्दयमानश्च तानाजी सम्प्रति किञ्चिद्विश्रमयामास निजखड्गम्। दैत्यबलः सोऽयमुदयभानुस्तमेनमवसरमासाद्य सकलबलेनाचस्कन्द तानाजिनम्। त्वरितमेवाऽयमपि तदुत्तरं तथा प्रायच्छद्यथा रुद्धश्च निष्प्रभश्चाभूदुदयभानुः। सम्प्रति सर्प इव फूत्कुर्वन् सोऽयं प्राणानविगणय्य श्येनपातमपतत्तानाजिनः शरीरे। इदमाक्रमणमासीन्महाभयानकम्। किन्तूदयभानोरसिस्तानाजिनस्तनौ यथैवाऽपतत्तथैव तानाजिनोऽपि खड्गो न्यपप्तदुदयभानोर्मस्तके। हन्त द्वावेव महावीरावेकवारमेवाऽभूतां धराशायिनौ।

पूर्वमेवासन्यवनसैनिका विच्छिन्नप्रायाः। सम्प्रत्युदयभानोरस्तमनेनाऽनेन सर्वेषामेवैतेषां विलुप्तमभूत्साहसम्। किन्तु महाराष्ट्रवीरा न निजं वीरव्रतं व्यास्मार्षुः। तानाजिनो भ्रातुः सूर्याजिनः सेनापतित्वे 'हर हर महादेवे'ति वीरध्वनिभिर्गगनं प्रतिध्वनयन्तस्ते दुर्गाभ्यन्तरमाक्रमन्। द्वारोपर्यभून्महाराष्ट्रवीराणामधिकारः। शीघ्रमेव च सम्मुखगतान् यवनानाऽऽमर्दयद्भिर्महाराष्ट्रसैनिकैः सिंहदुर्गस्य चूडायामारोपिता काषायरागिणी महाराष्ट्रपताका।

पुनः किमासीत्? बहिरवस्थितैर्महाराष्ट्रसैनिकैर्दुर्गोपरि महाराष्ट्रवैजयन्तीं प्रस्फुरन्तीमवलोक्य कृतः सोत्साहमास्कन्दो दुर्गाभिमुखम्। नासीदेषां प्रतिरोद्धा कश्चिदपि योद्धा यवनसेनायाम्। अत एव निष्प्रतिरोधं प्रसरन्तस्त इमे समागमन्दुर्गाभ्यन्तरे, सममिलंश्च पूर्वागतैर्निजसैनिकैः साकम्। समवेतैः सैनिकैः सर्वतो निरस्ता म्लेच्छसैनिकाः। इतस्ततः समाक्रम्यन्त दुर्गस्थानानि। दुर्गाद् बहिः स्थितायां मन्दुरायां तृणच्छदिःषु वह्निं दत्वा प्रज्वालितो महानग्निर्येन त्वरितमेवाज्ञासीद्वीरः शिवाजी सिंहदुर्गस्य विजयम्।

इङ्गितमधिगत्यैव शिवाजीवीरस्तुरगमास्थाय सोत्साहमभ्यसरत्सिंहदुर्गाभिमुखम्। 'कल्याणद्वार'मार्गेण चाऽयं प्राविक्षत्सिंहदुर्गम्। महाराष्ट्रसेनायां सर्वतः समुदतिष्ठन् विजयध्वनयः। विजयध्वनिगुञ्जने यवनसैनिकानां मृतशरीरैः[१] पादपटवस्त्रैरिवाभ्यर्हितः शिवाजीवीरो ययौ सिंहदुर्गस्य मध्याङ्गणे। तानाजिना सह वक्षःस्थलोपपीडं मिलितुमुत्सहमानः सोऽयं हन्त सम्मुखे समालोकयत्तस्य शवम्। बालसखस्य महावीरस्य तानाजिनो मृत्युना शिवाजिनो हृदयकमले हिम इवापतत्। लोकाः सिंहदुर्गविजयस्य सुसंवादेन तमिममवर्धयन्, किन्तु तदुत्तरे विषण्णोऽसाववदत् भाषायाम्- 'गढ* आला पण सिंह गेला'।

१ 'पगपाँवडे'। * दुर्गमागतं परं सिंहो गतः।

(७)

# पुरुराजस्य पौरुषम्

( १ )

भयावहा प्रावृड्रजनी। वर्षाबिन्दुभि: सह घोरं शब्दं परित: प्रसारयन्प्रवहति चण्डतम: पवन:। तरुगह्वरेषु गिरिकन्दरेषु च प्रतिध्वनित: स शब्दस्तथा प्रतीयते यथा सहस्रं दानवा: संहत्युगपद् गर्जेयु:। जलपूराप्लाविनीनां ह्लादीनीनां कल्लोलकलो भूयसा मां मेदुरयति तमेनं मारुतनिस्वनं सम्प्रति। सर्वत: समुपगतैर्जलपूरैरशुद्धतेव सेयं वितस्ता तटयोरिदानीं परित: पर्यस्ता। उल्लोलदोलितायामस्यां न कस्यापि समुदेति साहसं सहसा समवतरीतुम्। एवं विध एव दुर्धरे समये कठोरकर्मा सिकन्दर: स्कन्धावाराद् द्वे योजने समुपगत्य नद्यास्तस्मिन् स्थले प्राप्नोद्यत्र वितस्ताया मध्यदेशे वृक्षघनै: परिपूर्ण आसीदेको महान् द्वीप:। ग्रीकराजप्रेषिता आसँस्तत्र पूर्वत एवोपस्थिता नौका:, ता: समारुह्य नदीमुत्तरीतुं स हि सेनापतीनादिशत्।

महाघोरोऽन्धकार:, सहुङ्कारगर्जनं प्रबलं प्रवहन्ती च सेयं वितस्ता। नानयोरग्रे साहसिनामपि सैनिकानामभूद्धैर्यं प्रबलं दोलायन्तीषु नौकास्वारोढुम्। शिक्षिता अपि सैनिकाश्चाश्चपलं चमत्कृतवन्त:। एवंविधां परिस्थितिमवलोक्य ग्रीकराज: (सिकन्दर:) स्वयमात्मन: सुप्रसिद्धस्याश्वस्य वल्गां सन्नियम्य समारुक्षन्नौकाम्। एतत्सन्निरूप्यान्येऽपि सैनिका: साहसेन समारुरुहुर्नौका:। एवमिव वितस्तां व्यत्यस्तां कुर्वन्तो ग्रीकराजस्य शरीररक्षकसेनाया: पञ्चशतमश्वरोहा यदा प्रापु: परपारं तदा भारतीयसन्देशहरैरवाप्त: संवादो यत् कतिपयसादिभि: सह सिकन्दर: परं पारं वितस्ताया इति।

चरेभ्य: संवादमधिगत्यैव पौरवराज: प्राहिणोद्युवराजं शत्रुसेनाया: समवरोद्धुं गतिम्। आज्ञापयच्च सेनाध्यक्ष व्यूहं विरच्य समराय सेनां समभिसारयितुम्।

पदातिसेनां पृष्ठत: समागन्तुमादिश्य सादिभि: सह सिकन्दर: समभिससार सम्मुखे सपत्नसेनासन्निवेशस्य। प्राप्य च पौरवराजस्य स्कन्धावारं समवस्थित: सिकन्दर: सैनिकै: सार्द्धम्। यदा च प्रापु: सर्वा अपि पदातिसेनास्तं देशम्, समवापुश्च विश्रमकालं सेनास्तदा प्राचीनप्रथानुसारं व्यूहरचनां विधाय सेनां समराय सस्वीकृतवान् वामभागे-शरीररक्षकसैन्यस्य महामहता विभागेन सह सहस्रसंख्याकान् शकजातीयान् धनुर्धारि-तुरगारोहान् प्रातिस्विकरूपेण नियमितवान्निजाधीनतायाम्। मध्यभागे च पदातिवाहिनी सैल्यूकसस्याध्यक्षतायां समरायाऽतिष्ठत्। अष्टसहस्रं ग्रीकजातीया: पदातिधनुर्धरा:, द्वे सहस्रे साधारणपदातीनां च टालोमीसंरक्षकतायां पृथगतिष्ठन्। एवं किल निजवाहिनीं स हि संस्थापयामास यथास्थानम्।

इत: किञ्चिदुच्चायां बालुकाप्रायवसुधायां सुव्यवस्थिता नगरीव कृतसन्निवेशाऽऽसीत्पौरवराजस्य वरूथिनी। मध्यभागे एकैकशतहस्तव्यवधाने द्विद्विशतं दन्तिन: स्थिता आसन्, ये तावदिक्षुमदिरामापीय निर्भरं प्रमाद्यन्त: साम्प्रतं प्रत्यर्थिसेनाया रक्तपिणसव: समलक्ष्यन्त, येषां भयानकं बृंहितमाकर्ण्य साहसिनामप्यकम्पन्त सुदृढानि हृदयानि। अमी गजेन्द्रा: सुदृढमवस्थितानि दुर्गशिखराणीवालक्ष्यन्त। गजेन्द्राणामेषां मध्यावकाशे च सन्निविष्टाऽभूत्पदातिचमू:, या हि सुदृढा भित्तिरिवासीन्नीरन्ध्रा। दक्षिणभागे-अष्टसहस्रमश्वारोहा:, सहस्रं

सामरिकरथाश्चैकस्य वृद्धस्य सेनापतेरध्यक्षतायामासन्सुदृढरूपेणावस्थिताः। वामभागेऽपि च-द्विसहस्रमश्वारोहाः, सहस्रं रथाश्चासन् लघो राजकुमारस्य संरक्षकतायां सन्निविष्टाः। सङ्ग्रामसम्मुखीनायामस्यां पृतनायां मध्यदेशे पर्वत इव सर्वतस्तुङ्गतमे, बले साहसे च सर्वेभ्यः श्रेष्ठतमे, शत्रुञ्जयनामधेये निजे प्रियतमे गजराजे सोत्साहमवस्थितः पुरुकुलकेतुः स्वयं व्यराजत्।

सर्वतः प्रथमं ग्रीकराजस्यादेशमवाप्य शकमादिभिः पौरवसेनाया दक्षिणपार्श्वेऽभि-क्रमणमारभ्यत। भीषणबाणवर्षामाचरत्सु धनुर्विमुक्तबाणेष्विव च सवेगमभिधावत्सु तेषु म्लेच्छेषु साभिक्रोशमभिप्रयोक्तुं पादचरैर्भारतीयधनुर्धरैरपि निजेभ्यो निषङ्गेभ्यो निरसार्यन्त निशिततमा विशिखाः, किन्तु लक्ष्यसन्धानसमये सुदृढमवस्थानोचितस्य पादन्यासस्य बालुकामयभूमौ स्वेच्छानुसारं दुष्करत्वान्न तेषां धनूंषि यथावदचलन्। अन्यथा अव्यर्थशरसन्धायिनां भारतीयधनुर्धारिणां सम्मुखे नैकोऽपि शकयोद्धा प्राभविष्यत्प्रकटमवस्थातुम्। ततोऽपि निरूढशतशतयुद्धस्य वृद्धस्य सेनापतेरनुचारिभिः सादिभिरग्रे प्रसृत्य न्यरुध्यत वैदेशिकानां सर्वतो गतिः, रथिभिस्तु निर्भ्रमं लक्ष्यसाबध्य समारब्धस्तेषामप्रतीकारः संहारः।

निजसेनामेवंविपत्तिमुपगतां भारतीयैः पराभूतां चालक्ष्य समरदुर्धरः सिकन्दरः सुप्रसिद्धां निजाधिकृतसेनामादाय पौरवसैन्यस्य रथारूढशूराणामुपरि पार्श्वतः सरभमसकार्षीद् भयङ्करमाक्रमणम्। निमिषमात्र एव च कतिपयान् रथिनः परितो निरुध्य, तेषां सारथिषु रथिषु चैतेषु भुशुण्डीप्रहारमारभत। एतद् दृश्यमभिदृश्य पौरवराजो वामभागावस्थितानश्वारोहान् रथारूढांश्च तेषां साहाय्याय प्रजिघाय दक्षिणभागे। समभूदिदानीं भयङ्करमायोधनम्। उभयतोऽपि परस्परस्याभिभवाय प्राणपणेन प्रयतमाना युद्ध्यमाना (वीराः) न किञ्चिदवाशेषयन्नूनम्। हन्त! सपत्नैरपि मनस्यभिनन्दितामनुपमवीरतामाजौ प्रकटयन्, विघटयंश्च प्रभूततमान्प्रत्यर्थिनः समवाप वीरगतिं वृद्धः सेनापतिः त्रिसहस्रसैनिकैः सह, यो हि पौरवमहीपतेरासीत्परमभक्तः। एतदवलोक्य समवशिष्टानां रथिनं सादिनां चापि धैर्यमभूद्विचालितं ये ह्यासन् सर्वतापि क्षतविक्षताः। अत्त एवैते सुभृशमवदानेन किञ्चित्पृष्ठतोऽभिसृत्य हस्तिसेनायाः पश्चाद्भागे समवागोपयन्निजात्मानम्।

निजाश्वारोहसेनायाः परिक्षयं पराजयं चावधारयन् पौरवकुलकेसरी सुभृशमवकुप्य शतं गजपतीनग्रे समुपसृत्य सिकन्दरोपर्यास्कन्दनाय समादिक्षत्, स्वयं चापि शत्रुञ्जयं सरभसमग्रे कृत्वा त्वरितगामिभिरजिह्मगैर्विशिष्टविशिखैः शत्रुं तथाच्छादयामास यथा सोऽपि तस्मिन्स्थलेऽवस्थातुं नाशकदधिककालम्। रणकर्मधुरन्धरः सिकन्दरः साम्प्रतमात्मनः परिस्थितिं सङ्कटाकीर्णामवधार्य तत्कालमेव निजतुरगस्य वल्गां प्रत्यावर्तयत्। महता च धैर्येण चातुर्येण च स हि शनैः शनैः स्वस्थाने परावर्तिष्ट, शरीररक्षिका चमूश्चाप्यस्य शनैः शनैरन्ववर्तिष्ट तमेनम्। स्वसन्निवेशमुपगत्य पुनर्दृढतयाऽवास्थित ग्रीकराजः प्रारेभे च भुवनभयङ्करमायोधनम्।

(२)

अवधानेनाभिमृश्यमिदं दृश्यम्। एकतो रक्तपिपासिनी समस्ता ग्रीकराजवाहिनी। अपरतो वित्रस्तीकृतवीरसमाजः सोऽयमेककः पौरवराजः। आसीन्महाराजस्य समस्तमपि कुञ्जरपृष्ठासनं ग्रीकप्रहरणैः परिपूर्णम्। एवमेतस्य वीरशरीरमप्यासीत्परिपूर्णं परितो गभीरैः शस्त्रक्षतैः, येन हि विकसत्कुसुमः पारिजात इव पर्यलक्ष्यत पद्मिप्रष्ठगः पौरवकुलकेतुरसौ। पृथ्वीभरधारणधुरीणेन

महाराजस्यानावृतेन बाहुना भुशुण्ड्या बाणानां च त्रीन् महाघातान्विषह्य सम्प्रति शस्त्रोत्तोलनाद्विरतिरिव गृहीतासीत्। त्रयोऽपि रणदुर्मदा राजकुमाराः, समस्तैः सामन्तैः सेनापतिभिश्च सार्द्धं समरसीमनि वीरगतिमगुः। विंशतिसहस्त्रतोऽप्यधिकाः पौरवक्षत्रिया देशस्य धर्मस्य च ऋणं परिशोध्य क्षात्रं धर्मं परिपालयन्तः सूर्यमण्डलं भित्त्वा स्वर्गगामिनोऽभूवन्। सर्वमिदं सम्मुखमवलोकयतापि पौरवकुलभास्वता न जात्वपि पश्चात्पदनिधानस्य विचारोऽपि मनस्यकारि।

इममदृष्टपूर्वं शौर्यातिशयमालोक्य समस्तापि ग्रीकराजवरूथिनी निर्भरतममभूच्चकिता। वीरगुणग्राहिणः समरधुरन्धरस्य सिकन्दरस्य वीरतापूर्णं हृदयं नरशार्दूलमेनं प्रति ससाधुवादमभूदादरोद्वेलितम्। हन्त कुत्र स पारस्यदेशीयः सम्राड् 'दारा', यो हि चतुर्लक्षसैनिकैः सुरक्षितोऽपि सर्वतः प्रथमं समरसीमतः स्वकीयं रथं विमुखयामास। कुत्र चायं नरव्याघ्रः पौरवकुलकलाधरो यो हि समस्तसैन्यस्य परिक्षयेऽपि निजवामहस्ते साम्प्रतमपि भयानक चक्रमेक बिभर्ति यस्मिन्नसीन्निबद्धा सुदृढा रज्जुर्यया हि शत्रून्विनाश्य पुनरिदं परावर्तते स्म निजस्थाने, यश्च भूमिधरोत्तुङ्गे मत्तमातङ्गे शस्त्रविक्षुभितः केसरीव धीरविक्रान्तं विचेष्टते।

संलक्षितावसरः सिकन्दरस्तक्षशिलानरेशस्य भ्रातरं प्राहिणोत्पौरवराजस्य सन्निधौ सन्धिविषयं प्रस्तावमादाय, यो ह्यासीद् भारतीयभाषायामिव ग्रीसभाषायामपि समर्थः समयोचितं संलपितुम्। चपलं तुरगमधिरूढस्तक्षशिलाभर्तुः कनीयान् राजकुमारः पुरुराजस्य निकटमधिगम्य ग्रीकराजस्य सन्देशं श्रावयामास तारेण स्वरेण। तमेनमाकर्ण्य गभीरैः क्षतैस्तृषा च पर्याकुलः पुरुवंशमुक्तामणिरुत्थापयामास रक्ताक्ते निजनेत्रे, किन्तु यथैव स सम्मुखे शत्रुमवालोकयत्तथैव निजहस्तस्थितं भयानकं चक्रं प्राक्षिपत्परिपन्थिनामभिमुखम्। निमिषमात्रे तच्चक्रमरिचक्रं विच्छिद्य पुनरुपागान्महाराजस्य वामं करम्। किन्तु सम्प्रति पुरुराजमचेतनमवालोक्य वीरपुरन्दरः सिकन्दरः सेनापतिभिः समेतः परितः परिवारयामास पौरवराजस्य शत्रुञ्जयं कुञ्जरम्। समादिक्षच्च पुरातनमेकं पौरवराजमन्त्रिणं सान्त्वेन यदयं प्रार्थयेत पुरुराजं निजकुञ्जरमुपवेशयितुम्। मित्रपक्षीयस्य मन्त्रिणः स्वरं परिचित्य, महाराजस्य चेङ्गितमधिगत्य विवशमना वीरकुञ्जरः शत्रुञ्जयः सविषादमालिन्यमवस्थापयामास निजजानुनी समरधराङ्गणे साम्प्रतम्।

प्रतिष्ठितयोर्द्वयोर्ग्रीकसैनिकयोः सहायतया समानीयत ससमादरमेष पौरवपुरन्दरः सिकन्दरस्य निकटम्। समस्तायामपि ग्रेसीडोनियनसेनायामस्यामासीत्पुरुराजचूडामणिरयं सर्वेभ्योऽपि प्रांशुत्तरः। अनावृतस्तस्य दक्षिणो भुजदण्डः प्रादादनक्षरमसीमस्य पराक्रमस्य परिचयम्। गभीरधीरा च तस्योदारदृष्टिश्चकार निःशब्दमिव महापुरुषघोषणाम्। यदा च द्वैभाषिकस्तारस्वरेण श्रावयामास सिकन्दरस्य प्रश्नमिमं यत्-'साम्प्रतमहं भवता सह कथं व्यवहरेयम्?, तदा गौरवनिर्भरेण दृढस्वरेण पुरुकुलकलानिधिस्तन्नाम ददौ गभीरतरमुत्तरं यद्धि साम्प्रतमपि सुप्रसिद्धमितिहासेषु-''यथा राजा राज्ञा सह''।

विक्रमगुणैकपक्षपाती सौमनस्यसुन्दरः सिकन्दरस्तदनेनोत्तरेण गद्गदो भूत्वा मानयामास महाराजं माननीयतमं मित्रम्। पौरवराजोऽपि निर्वाहयामास तमिमं मैत्रीभावमखिलेऽपि निजे जीवनकाले।

८

# अङ्गुलिमालः

## ( १ )

प्रसेनजितो राज्ये सर्वतः प्रासरन्महाहाहाकारः। नगराणि समन्तादुच्छिन्नानि। ग्रामाः सर्वतः क्षामाः। स्वयमपराधिन इव निभृतनीरवं निवसन्तो न केऽपि सन्तोषस्य शीतलनिःश्वासं जगृहुः। यः किल समालोक्यते स एव सङ्कटे सङ्कुलः, प्राणाभयाद्व्याकुलः। बालास्तरुणाः स्थविराः सर्वेषामेव मानसमङ्गुलिमालस्य नामैव निशम्य किसलयमिव कम्पते स्म। न केवलं बालानामेव, अपि तु जागरूकजनपालानामप्यकस्माद्विस्मापनाय भृशं भीषणाय च पर्याप्तमभूत्कर्कशकरालस्याङ्गुलिमालस्य दस्योर्नामधेयमात्रम्। देशमात्रस्य कृते करालः कालः कुतो वा न स्याज्जीवनमभिलषतो जीवस्य कामं कम्पनाय?

एषु हि दिनेषु श्रावस्त्याः पुर्याः प्रतिवेशे जैत्रवनमध्यमध्यवात्सीद् भगवान् गौतमः। भगवतः कर्णयोरभ्यर्णमप्युपजगाम कर्णाकर्णिकयाऽङ्गुलिमालस्याऽत्याचाराणां कथा। भृशतममद्रवद्भूतानुकम्पिनस्तथागतस्य हृदयम्। किमासीत्पुनः? दुर्दान्तं सिंहमपि पञ्जराऽऽबद्ध-कीरवन्मधुरालापिनमापादयितुं सुप्रभुर्योगी गौतमः पात्रं चीवरं चादाय बहिरभून्निजाश्रमस्य। मार्गे गोचारकाः कृषकाः पथिकाश्च साश्चर्यमपश्यन्-श्रमणो गौतम एकाकी तामेव दिशमालम्ब्य सधैर्यमभिक्रमते यस्यां हि लोककरालस्याङ्गुलिमालस्याऽऽवासः।

अवेपत सर्वेषामेव हृदयम्-हन्त कृश एकः पुरुषः सालविशालस्याऽङ्गुलिमालस्य मार्गे? इतो हि न भवति वीरशबलस्य शतपुरुषाणामपि दलस्याग्रे गन्तुं साहसम्। कदाचिन्नाभिजानाति विविक्तैकरमो गौतमो दस्योर्दुर्दान्तस्योत्कटं प्रतापमिमम्। अतएव दुर्विपाकदुर्घटनातो दयमानैरक्रियताऽनुरोधो जनैरैकैकशः- 'भ्रातर्नाभियातव्यमनेन मार्गेण, अस्त्यस्मिन्नेव निवासस्तस्याङ्गुलिमालस्य यो हि सकलभयकारिणां शस्त्रधारिणामप्यञ्जसैव वशीकर्ता। एनमभ्याक्रमन्तो विक्रान्ता अपि वेपन्ते सायुधा योधाः।' किन्तु स्वनिश्चये निश्चलतमस्य महात्मनो गौतमस्य को वा प्रतिरोद्धा? स हि तस्यामेव दिशि निःशङ्कमग्रेऽभिसरन् प्रतस्थे।

काननस्य घने वृक्षगहने न्यवात्सील्लोककरालः सोऽङ्गुलिमालः। दारुणदुरन्तेऽस्य पर्यन्तेऽपि नोपगन्तुं प्रगल्भते विक्रमैकरसिकः साहसिकः कश्चित्। किन्त्वद्य करधृतपात्रं दुर्बलगात्रं संन्यासिनमेकं निजनिवासाभिमुखमागच्छन्तमालोक्य नासीद्विस्मयस्य सीमाऽङ्गुलिमालस्य। सहैव क्रोधानलोऽप्यस्य प्रबलोऽभवत्-मत्पराक्रमपरिहासिनः संन्यासिनः प्ररोहेदिदमपि साहसं यत् सोऽङ्गुलिमालस्याऽन्तिके निःसम्भ्रममुपगच्छेत्। तदपि निर्दीनभावं क्रीडामिव कुर्वन्, मां तृणायेव मत्वा! हन्त न नामेदं सम्भवति। अहं क्षणमात्र एव निष्प्राणमिमं भूतलशायिनं कुर्याम्।

कोपवशादत्यन्तं करालः सोऽङ्गुलिमालश्चापे शरमारोप्य प्रातिष्ठत गौतमस्य पृष्ठे। नेदमज्ञासीदनभिज्ञो यत् शीलितशाणादपि मम धनुर्बाणाद् गौतमस्य प्रशमशस्त्रमिदं तीक्ष्णतरं

नाम। अपाङ्गस्पृशा समलक्षयद् दृशा गौतमो यच्चक्रीकृतचापोऽङ्गुलिमालो जिघांसया मामनुसरतीति। वशीकृतप्रशमो गौतमो गतिनिरोधनेच्छया यथैव तदुपर्यपातयद् योगसंस्पृशं दृशम्, तथैव जैत्रजङ्घालस्याप्यऽङ्गुलिमालस्य न्यरुध्यत सहसैव गतिः। नासौ समपारयत् पदमपि गन्तुम्।

मन्त्रवशीकृतो व्याल इव कोपकरालः खिद्यते स्माऽङ्गुलिमालः त्वमनस्येव। अभूच्चास्य परमं विस्मयो मानसे- अहह किमेतदाश्चर्यम्! एतावद्वेगेन धावमानोऽपि कथमेनं नाऽऽप्नोमि सन्न्यासिनम्? हन्त किमद्य मे समभूत्? अन्यदिवसे हि धावन्तस्तुरङ्गमा अपि जङ्घालस्य मे नाग्रतः प्रभवन्ति पलायितुम्। अस्तु, यथासाध्यं नानाविधैरुपायैर्निजशक्तेः प्रयोगं कर्तुमचेष्टताऽङ्गुलिमालः, किन्तु न प्राभवत्कथमपि। विवशोऽसौ भूयस्तरामखिद्यत। हन्त नेदानीं मुद्रितमुखं सोढुमशक्यताऽनेन। एष हि सोच्चैःस्वरमाजुहाव निश्चलतमं गौतमम्- 'गर्विष्ठ सन्न्यासिन्! प्रतीक्षस्व मां यावदुपैमि'।

'एषोऽहं स्थितोऽस्म्यङ्गुलिमाल!' सधैर्यं प्रत्यवदद् गौतमः। अभ्यस्तमृषाजालश्चकितोऽभूदनेनाऽङ्गुलिमालः-न नाम संन्यासिनो मृषा जल्पन्ति। किन्तु सोऽयमवश्यं मृषा भाषते। स्पष्टमयमग्रे धावति व्याहरति च मुखान्नाहं व्रजामीति। अङ्गुलिमालो विस्मयविमन्थरे प्रोवाच स्वरे- 'मानवोपहासिन् संन्यासिन् स्फुटमिदं मिथ्या जल्पसि। इतोऽग्रे पलायसे भाषसे च मुखादयमहं स्थितोऽस्मीति?'।

'अवश्यमहमवस्थितोऽस्मि, पश्य सखेऽङ्गुलिमाल' प्रत्यवादीद् वशीकृतोपशमो गौतमः। किन्तु प्रकामपरिद्रवणस्य चेष्टायामपि स्वस्य तत्राऽप्राप्तिमालक्ष्य न कथञ्चिदपि प्रत्यैत्तदिदमङ्गुलिमालः। व्याजहार सोत्तम्भमसौ-'स्पष्टमहो मिथ्या व्याहरसि वञ्चयसि च मादृशानपि लोकान्।'

प्राणिमात्रहृदयङ्गमो गौतमः सप्रणयमन्दस्मितमुवाच- 'सखेऽङ्गुलिमाल! तव नयने रात्रिन्दिवं हिंसाक्रौर्यमिथ्याभिरापूरिते, मनस्ते लालसापापप्रवञ्चनाभिरायत्तीकृतम्। अतएव सत्यमपि ते नूनं मिथ्यैव प्रतिभातं भवति।'

निर्भयतमस्य गौतमस्य तानीमान्यक्षराणि दस्योरन्तःकरणं सवेगं प्रत्याघ्नन्। किङ्कर्तव्यविमूढमभूदस्य मानसम्। न किञ्चित्कर्तुमप्रभवन् विवशमसावस्थात्। - 'सखेऽङ्गुलिमाल! परीक्ष्यतां तावत्संसारोदासिनः संन्यासिनस्तदिदमनृतवचनम्!' इत्यान्तरिकभावसम्भृतया दृशा निरूपयन् गौतमः सप्रेमस्मितमवोचत्।

हृदयमद्रवद् विविक्तप्रतिपालस्याऽङ्गुलिमालस्य। भूतदयाप्रक्रमस्य गौतमस्य वज्रघटितमिव तदिदं वचो वेल्लति स्म तस्य हृदये वारं वारम्-'सखेऽङ्गुलिमाल! मनस्ते लालसापापप्रवञ्चनाभिरायत्तीकृतम्!' स हि धनुर्विशिखान् विससर्ज जलनालके। विद्रुतहृदयः स गौतमस्य चरणयोर्निपत्य दीनं न्यवेदयत्-'स्वामिन् एषोऽहं ते शरणमुपेतः, उद्धरस्व साम्प्रतमिमम्।'

प्राणिदयासङ्क्रमो गौतमो निजस्याऽभयहस्तं तन्मूर्द्धनि प्रणिधाय निर्धौतहृदयविकारं

प्रचकार, वितितार च भिक्षुदीक्षामस्मै।

( २ )

इतो भिक्षुव्रतपालं तमङ्गुलिमालं सहाऽऽदाय भगवान् गौतमः श्रावस्तीं परावर्तिष्ट, ततः प्रसेनजितः प्रकृतिभी राजधान्यां सम्भूय राजद्वारे कोलाहलः प्रारेभे– 'मानवकुलकालस्याङ्गुलिमालस्याऽऽतङ्केन सन्तापिताऽसौ समन्तात्प्रजा। उत्सन्नान्यनेकानि पुराणि, लुण्ठिताः शतशो ग्रामाः, खलीकृतानि खड्गधारया निरपराधानां शतशो मानुषानां जीवनानि। कमुपयान्तु साम्प्रतं शरणं प्रजाः। कतमो वाऽभ्युपायः, कः सहायः। दुर्दान्ततमस्य दस्योरमानुषकाण्डैः खण्डित इव भूखण्डोऽयं सर्वतः'।

प्रजानां दीनाक्रन्दनमिदमाकर्ण्य नाऽवाशिष्यत कोपस्य परिसीमा धरणिभृतः प्रसेनजितः। कोपकरालोऽसौ पञ्चशतमश्ववारानादाय दस्योर्दमनाय निर्जगाम बहिर्नगरात्। अध्यवात्सीदस्मिन् समये भूचुम्बितभालेनाऽङ्गुलिमालेनोपास्यमानो गौतमः श्रावस्त्या जैत्रवनं नूनम्। दैवसंयोगात् समावीविशदस्मिन्नेवोपवने निजं स्कन्धावारं प्रसेनजिदपि।

आत्मरमो गौतमो महीभृतं प्रसेनजितं सेनया प्रवसन्तमालक्ष्य सावष्टम्भमप्राक्षीत्– 'अपि किं प्रचण्डतमः परिपन्थी कश्चिदाचक्राम राज्यसीमानम् येन भवान् वीरवेषः प्रतिष्ठते चञ्चलां चमूमाकर्षन्।'

'नेदं भगवन्'– प्रसेनजित्प्रत्याह–'नाचक्राम कश्चित्सपत्नो वसुधामेताम्। अपि तु प्रकृतिकरालेनाऽङ्गुलिमालेन दस्युना परितः प्रपीडिताः प्रजाः प्रक्रमन्ते पलायनमितस्ततः। अत एव तासां परिशमनाय दस्योश्च दमनाय तदिदमायोजनम्।'

मन्दमहसीद् गौतमः, अस्थाच्च कञ्चित्कालमवचनम्। ततः शनैरवोचत्– 'राजन्! यद्यङ्गुलिमालोऽसौ बौद्धभिक्षुरूपे भवत्समक्षमुपस्थितो भवेत्कथं व्यवहरेद्भवांस्तेन?'।

'पूजयेयं श्रद्धया तमेनमहम्।' प्रसेनजित्प्रत्यवादीत्– 'भगवन्नहमेनमालये निमन्त्र्य भोजनपर्युपासनां निर्वहेयं चेतसा। किन्तु नेदं कथमपि शक्यं विश्वसितुं यदेवं दुर्दान्तोऽपि दस्युर्भिक्षुदीक्षां कदाचिदप्यनुवर्तेत।'

'संसारे न किञ्चिदप्यसम्भवं भूपाल!'– संहितसंयमोऽवादीद् गौतमः–'पश्य पुरस्तादवधानेन, भिक्षुवेषे पर्यवस्थितो नवीनः सोऽयमङ्गुलिमाल एव।'

नाभूदिदानीं भूभृतो विस्मयस्य परिसीमा। स हि भिक्षुमिममुपसर्प्य सगौरवमवादीत्– 'अपि महाभाग! भवानेव लोककरालः सोऽङ्गुलिमालः?'

'आम् राजन्' भिक्षुरभ्यधात्– 'अहमेव सोऽङ्गुलिमालो दस्युः'। प्रणिहितः प्रसेनजित् व्यानतभालमङ्गुलिमालं श्रद्धया परिक्रम्य सपरितोषं परावर्तिष्ट राजधानीम्।'

व्यतिययौ स्वल्प एव कालः। एकदा सोऽयमङ्गुलिमालः पात्रं चीवरं चादाय पर्युपासरद्भिक्षायै श्रावस्तीम्। पर्यचरत्पादचारेणाऽसौ नगरीम्, सहसैव प्रचण्डवेगेन लोष्टमेकं तस्य शिरस्यपतत्। व्यदीर्यत मस्तकम्, प्रासरत्प्रचण्डवेगेन रक्तप्रवाहः। प्राघातविह्वलोऽङ्गुलिमालो नैतदवधि निःश्वासमप्यग्रहीत्तावदेव द्वितीयप्रान्तादपरः प्रस्तरः सवेगमस्य

मस्तकं विदार्य भूमौ न्यपतत्। अस्नासीत् क्षतजेनाङ्गुलिमालः। न्यषिच्यत सर्वमपि काषायं रुधिरेण। निरगमत्सर्वेषामपि दर्शकानां मुखात्सानुक्रोशवचनम्- 'हन्त मर्मघाती सोऽयमाघातः।' किन्तु संयमपालस्याऽङ्गुलिमालस्य मुखान्न नाम निरगमन्नूनमेकमप्यातुरवचनम्।

निष्पतद्रुधिरबिन्दुजालोऽङ्गुलिमालो हस्ते विदीर्णं पात्रमुपबिभ्रत् प्राप समीपं गौतमस्य। निश्चलतमो गौतमस्तमेनमालोक्य व्याहरत्- भिक्षो अद्य ते प्रायश्चित्तमपूर्यत!'

'प्रायश्चित्तमपूर्यत' इति गौतममुखादाकर्ण्यैवाऽङ्गुलिमालस्तथा प्रामोदत मानसे यथा मुक्तेर्मालैवाऽस्य हस्तगता भवेत्।

(९)

# पृथ्वीराजपौरुषम्

**पृथ्वीराजः**- श्रूयते, मुहम्मदगौरी पुनरिन्द्रप्रस्थमिममाक्रमितुमिच्छति!

**एकः सामन्तः** - महाराज! त्रीन् वारानयं वीरपरीक्षां दातुमिन्द्रप्रस्थमास्कन्नवान्, किन्तु त्रीनपि वारान् देवेन दूरीकृतदर्पो द्रावितो निजदेशं दीनभावेन। साम्प्रतमपि महाभावेन तेनैवोत्साहेन वयं मातृभूमिमिमामभिषेवितुं सर्वतः सन्नद्धा स्मः। तत्किमिव विचारणीयं वीरराजन्यैः सम्भावितसेवेन देवेन नूनम्?

**पृथ्वीराजः** - समुचितमेवेदमुदीरितम्। भवादृशानामेव बाहुदण्डोपरि सोऽयं भूमिखण्डो वहते वीरतागर्वम्। भवादृशैरेव च द्विगुणीकृतोत्साहोऽहमुच्छ्रितवान् बाहोरुपरि भारतवियजवैजयन्तीमिमाम्। तत्समरदुरन्तेषु जाग्रत्सु मे सामन्तेषु को वा विचारविषयः? किन्तु सुभृशं खेदोऽथ निर्वेदो मे मानसे यद्- भारतीयैरन्यान्यभूपतिभिः सम्भूय बाह्यस्याऽस्य दस्योर्दमनाय नाऽदीयत किञ्चिदपि साहाय्यम्।

**द्वितीयः सामन्तः** - हन्त सन्तापयन्त्येतान्येव तु नाशचिह्नानि मानसं मनीषिणाम्।

द्वारपालः (प्रविश्य) - देव! कान्यकुब्जस्य प्रधानामात्यो देवस्य दर्शनाय द्वारदेशमधितिष्ठति तत्किमुपस्थापयामि सम्मुखं देवस्य?

**पृथ्वीराजः** - अथ किम्। ससमादरमभ्यागमय तमेतम्।

महामात्यः सुमन्तः (प्रविश्य सोच्चैः स्वरम्) विजयतां दिल्लीपतिः।

**पृथ्वीराजः** - (मस्तकमवनमय्य) स्वागतं सचिवधुरन्धरस्य। अपि सर्वतः कुशलं राजकुले भवताम्?

**सुमन्तः**- देव! सर्वतोऽनामयं भगवतोऽनुग्रहेण।

**पृथ्वीराजः** - साम्प्रतमिदमिन्द्रप्रस्थमलङ्कृतवतो भवतः समागमकारणं ज्ञातुमिच्छामि।

**सुमन्तः** - धर्मावतार! महाराजोऽस्माकं जयचन्द्रः पार्यन्तिकान् भूपालान्विजित्य कृतवान् भूयसीमृद्धिं राज्यकोषयोः। अतएव यज्ञाय सम्भृतसम्भारोऽसौ राजसूयेनेष्टुमिच्छति। सहैव च राजकुमार्याः संयोगितायाः स्वयंवरमप्येष चिकीर्षति। तदनयोर्द्वयोरप्युत्सवयोः सादरनिमन्त्रणाय सोऽयमहं देवस्य सविधमुपस्थितः, प्रार्थये च यज्ञसमये कान्यकुब्जानुपगमेनाऽलङ्कर्तुम्।

**पृथ्वीराजः** - मन्त्रिवर! भारतमिदमाक्रमितुमिच्छतां यवनानामुपद्रवान्न मे मुहूर्तमप्यवकाशः। श्रूयते यद् वर्धितामदो मुहम्मदो भूयोऽपि भारतमाक्रमितुमिच्छति। अतएव सुकठिनमातर्कयेऽहं कान्यकुब्जोपमयं मे।

**एकः सामन्त** – मन्त्रिमहोदय! यवनैरेभिर्यदा किल देशोऽयमास्कन्नो, न तस्मिन्समये प्रदर्शिता वीरता कान्यकुब्जेश्वरेण, किन्तु सम्प्रति चिकीर्षति राजसूयमसौ। अप्यसौ समयो देशरक्षायाः, उत राजसूयदीक्षायाः ?

**सुमन्तः** – उचितमुपदिष्टं श्रीमता। किन्तु कान्यकुब्जेश्वरः सम्प्रति कृतवान् सर्वानेव सम्भारान् राजसूयस्य। (पृथ्वीराजं प्रति) कमहं देवस्य प्रतिसन्देशमुपहरामि महाराजाय?

**पृथ्वीराजः** – एतदेवाऽऽवेदयिष्यसि यत्पृथ्वीराजो राजसूयापेक्षया देशरक्षां साम्प्रतमीक्षते बहुमानेन।

**मन्त्री.** – यथाज्ञापयति महाराजः (प्रणम्य प्रतिष्ठते)।

**पृथ्वीराजः** – नियतमहमातर्कयामि यन्ममोत्तरमाकर्ण्य जयचन्द्रो निश्चितं कुप्येत्, न चैतदप्यसम्भावितं यद्बलदर्पितोऽसौ संवध्नीयान्मयैव सह समरसंरम्भम्। शङ्कयां चाहमपि यज्ञविध्वंसे नूनम्। किन्तु बाह्यः प्रतिपन्थी मे साम्प्रतं प्रतियोधनीयः। अतएव नाहमभिलाषामि गृहकलहमुद्भावयितुम्।

**सामन्तः** – तथाप्यस्माभिः सन्नहनीयमेवास्मै समराय। अहं त्वेतदप्याशङ्के यज्जयचन्द्रः कदाचित्सङ्गच्छेत मुहम्मदेनापि साकम्।

**पृथ्वी.** – यत्किञ्चिदस्तु। सर्वथा। समरसम्भारः कर्तव्य एवास्माकम्। भवन्तः सेनापतिना सह सङ्गत्य सम्मन्त्रयत समरसन्नाहाय। प्रेषयत च मत्समीपे सेनाध्यक्षम्।

## ( २ )

(राजहर्म्ये कान्यकुब्जस्य महाराजो जयचन्द्रः सचिवेन सुमन्तेन, सामन्ताभ्यां च संलपंस्तिष्ठति)

**जयचन्द्रः** – महामात्य! अपि किं न ज्ञातं भवता यद्वयं पृथ्वीराजमन्वा[१]स्कन्दमाना इन्द्रप्रस्थं यावदभ्यसराम्। यदि वयमवाञ्छिष्याम तर्हि पृथ्वीराजमग्रहीष्याम, किन्तु यदेदमालोकितं यत्पृथ्वीराजस्य पृष्ठे वत्सा संयोगितापि तमश्वमारूढा तदा वात्सल्येन कारुण्येन च नो हृदयमभूद् युगपदाक्रान्तम्। सम्प्रति पुत्र्याः संयोगितायाः कारणान्न वयं पृथ्वीराजेन सह समरमप्यभिरोचयामः।

**सुमन्तः** – विदितमेव महाराजाधिराजस्य यत्पृथ्वीराजो यथार्थवीरभूपालः। द्वारपालस्य स्थाने तन्मूर्तिमवस्थाप्य तदवमानं यदि महाराजो नाकरिष्यत्तर्हि नायं व्यधास्यद् युद्धसन्नाहम्, न चाहरिष्यद् भर्तृदारिकां संयोगिताम्।

**जयचन्द्रः** – अमानं तस्याभिमानमालोक्यैवाहं तस्येममपमानमकार्षम्। प्रथमं तु सोऽस्माकं यज्ञनिमन्त्रणं तिरश्चकार, द्वितीयम्– यतः प्रभृति मातामहेनाऽनङ्गपालेन मामपहाय तस्मै इन्द्रप्रस्थराज्यमपवर्जितं तदारभ्यैव तस्याऽअहङ्कारः सङ्काशते। अस्तु. यत्किञ्चित्, सम्प्रति चारणमनुप्रेष्य संयोगितया सह तस्य परिणयोऽस्माभिरवश्यं सम्पादयितुं युज्यते।

**एकः सामन्तः** – स्थाने एष महाराजस्य विचारः। यतः किल कुमारी संयोगिता स्वेच्छयैव तमनुससार, न बलाद्धरणेनाऽयमपमानमस्माकमपारयत्कर्तुम्। समरसंरम्भे हि प्रत्यक्षमिदमालोकितं मया। यदा ह्यहं तत्कन्धरायां धनुरभिपात्य तमाक्रष्टुमभ्यलषं तदा कुमार्या संयोगितयैव निजदन्तैर्धनुः प्रत्यञ्चामुत्कृत्य संरक्षितोभूत्पृथ्वीराजः।

**जयचन्द्रः** – (खेदमभिगोप्य) सम्यगिदम्। ममापीदमेवाऽऽतर्कितम्। स्वयंवरेऽपि हि तया ज्ञात्वैव पृथ्वीराजप्रतिमायाः कण्ठे विजयमाल्यमावर्जितम्। (चारणं प्रति) श्रीकण्ठ! साम्प्रतमेव देहलीं प्रस्थाय सम्पादय संयोगितायाः परिणयविधिम्। (चारणस्तत्कालमेव प्रतिष्ठते।)

**जयचन्द्रः** – अस्तु, साम्प्रतं तदिदमस्माकमभिमन्त्रणीयं यन् मुहम्मदगोरी पृथ्वीराजम[१]भिषेणयितुं याचितवानस्मत्तः साहाय्यम्। तत्किमस्योत्तरमस्माभिः प्रेषणीयम्?

**सुमन्तः** – यदा पृथ्वीराजेन सह समपद्यत घनिष्ठः सम्बन्धो महाराजस्य, तदा न तत्सपत्नेन सह सन्धातुमुचितम्। साम्प्रतं हि यवना इन्द्रप्रस्थमाक्रमितुं कृतोत्साहाः, यदि ते तत्र विजयिनो भविष्यन्ति तर्हि कान्यकुब्जमास्कन्दितुमपि तेषां सम्भवेत्साहसम्। तस्मिन्समये किं महाराजो निःसहाय एव प्रभवेत्स्वदेशं रक्षितुम्? अत एव साम्प्रतं पृथ्वीराजस्य साहाय्यसम्पादनमेव महाराजस्य स्वरूपोचितं येन बाह्या रिपवो न पारयेयुः प्रवेष्टुमस्मत्प्रदेशम्।

**जयचन्द्रः** – मन्त्रिवर! पृथ्वीराजेन यो मेऽवमानो विहितस्तमेनमनुस्मरन्नाहं तत्साहाय्याय कथमपि कृतोत्साहः। किन्तु यदि पृथ्वीराजेन सह मत्सम्बन्धमेवाऽनुरुणद्धि भवाँस्तहर्येतन्मात्रमहं शक्नुयां कर्तुं यद्भारतक्षौरिणो गौरिणोऽपि नाहं कुर्यां साहाय्यम्।

**प्रथमः सामन्तः** – महाराज! न केवलमेतन्मात्रेण निरुह्येत साम्प्रतिकं कर्तव्यम्। श्रुतं मया यद्यवनानां सेना कति लक्षमिता। इतो महाराजः पृथ्वीराजस्तु केवलं पञ्चदशसहस्रयोधैरेव सन्नद्धो युद्धाय। तस्य सहायकस्तद्भगिनीपतिश्चित्तोराधिपः केवलं समरसिंह एव।

**सुमन्तः** – महाराजेन पुनरयं विषयः सूक्ष्मतया समीक्षणीयः। अवसरोऽयमेकतायाः, न मिथो भिन्नतायाः। साम्प्रतं हि न केवलं पृथ्वीराजपरिपन्थिनैव, अपि तु देशमात्रस्य शत्रुणा सह योद्धव्यमुपस्थितम्। यदि भवान् पृथ्वीराजस्य साहाय्याय समरभुवमवतरेत्तर्हि भवदनुगामिनोऽन्येऽपि राजन्यास्तत्र भवन्तमनुसरेयुः।

**जयचन्द्रः** – अमात्यवर! एषामेव महीभुजां समक्षे मामपमानितवान् पृथ्वीराजः। अस्तु यत्किञ्चित्, निर्भरं निर्धारितवानहं यन्नाहं दद्यां मुहम्मदगोरिणे साहाय्यम्, किन्तु पृथ्वीराजस्य साहाय्यसम्पादनमपि न मेऽभिरुचितम्।

**सुमन्तः** – (स्वगतम्) यदा ह्यभिमुखानि भवन्ति विपद्दिनानि मानवस्य न तदा हितावहोप्युपदेशः कल्पते तोषाय। (प्रकाशम्) महाराजाधिराजः स्वयं दूरदर्शी, अतएव यत्किल शुभोदर्कं तत्स्वयं विदध्यान्महाराजः।

**जयचन्द्रः** – यदुचितं स्यात्तदेव सम्प्रति सम्पाद्येत। अस्तु, साम्प्रतमियं सभा विसर्जिता।

( ३ )

(गजनीदेशस्य भीषणाऽऽकारायां कारायां द्विषद्भिरन्धीकृतः पृथ्वीराजो निगडितस्तिष्ठति)

**चन्द्रकविः** – (प्रविश्य) महाराजाधिराजस्य सम्मुखे सन्नमत्ययमनुगतः।

**पृथ्वीराजः** – (स्वरं परिचित्य) अये चन्द्रः? कथं भवानिहोपगतः?

**चन्द्रकविः** – महाराजस्य दर्शनाय।

**पृथ्वीराजः** – मत्समीपमुपगच्छन्न किं भवान् कैश्चिन्निरुद्धः?

**चन्द्रकविः** – न केनापि। दत्ता मह्यमनुमतिः शूलत्राणेन।

**पृथ्वीराजः** – तर्हि सम्यगेवेदम्। कथय का परिस्थितिः साम्प्रतं भारतवर्षस्य?

**चन्द्रकविः** – निवेदयेय भारतीयां दशां साम्प्रतमेव महाराजाय, किन्तु महाराजस्य नेत्रयोरियं दशा कथं संवृत्तेति ज्ञातुं व्यथते मे विषण्णं हृदयम्।

**पृथ्वीराजः** – किं प्रोक्तेन? तस्यैव यवनहतकस्य दुर्विचेष्टितमिदम्। किन्तु न साम्प्रतं मेऽस्य विषादः। कथयतु भवान् भारतीयां परिस्थितिम्।

**चन्द्रकविः** – युद्धे महाराजाधिराजस्य ग्रहणवृत्तान्तमुपगम्यैव 'जौहर' व्रतमनुष्ठितं महिलाभिः। क्षत्रियाश्चाऽऽप्राणपातमयुध्यन्त यवनैः साकम्।

**पृथ्वीराजः** – सुखावहमिदमाकर्णितं भवतः। किञ्चेदमपि यामिकेभ्योऽवागच्छं यन्महाराजो जयचन्द्रो मुहम्मदात्पराभूय भयात्पलायमानो भगवत्यां गङ्गायामात्मानमुत्सृष्टवान्। अपि तथ्यमिदम्?

**चन्द्रकविः** – अथ किम्। आत्मनः कृतेः प्रतिफलमसावलभत। इन्द्रप्रस्थाक्रमणस्य स्वल्पकालानन्तरमेवासौ कान्यकुब्जमप्यधिचकार।

**पृथ्वीराजः** – (दुःखेन दीर्घं निश्वस्य) हन्त साम्प्रतमुत्तरभारताद् हिन्दुराज्यमेकान्ततो विलुप्तम्। सम्प्रति भवान् शीघ्रमेव परावर्ततां निजदेशम्। प्रतिक्षणं संशयोऽत्र प्राणानाम्।

**चन्द्रकविः** – (निश्वस्य) यदा स्वयं दिल्लीश्वरस्यैव सेयं दशा तदा को मे विषादो निजप्राणानाम्? अहमेकं सङ्कल्पविशेषं हृदि कृत्वैवाऽत्र समागतः। तमेतमभिपूर्यैव मातृभूमेर्ऋणान्मुक्तः स्यां नूनम्।

**पृथ्वीराजः** – सखे कोऽसौ विचारः?

**चन्द्रकविः** – (समीपमुपगत्याऽतिनिभृतम्) अहं हि गोरिणः सविधे भवतः शब्दवेधपाटवमभिष्टुत्य तद्राजसभायां नेतास्मि तत्रभवन्तम्। तत्र हि गोरिमुखनिर्गतं शब्दमाकर्ण्य शब्दानुवेधिना विशिखेन निबर्हय तं दुष्टम्। तत आवां मिथो [१]व्यतिहत्य यवनहतकहस्ताद्विमुक्तिं

लप्स्यावहे।

**पृथ्वीराजः** – अहो धन्योऽसि प्रियवयस्य! प्रियं प्रियं मे प्रस्तुतं भवता। अनुपदमेवानुतिष्ठतु भवाँस्तत्प्रबन्धम्। अहो त्वमेव मे प्राणेभ्योऽपि प्रियो हितानुवर्ती।

**चन्द्रकविः** – आज्ञानुसारमयमहं प्रतिष्ठे साम्प्रतमग्रिमकर्तव्याय सन्नह्यतां महाराजोऽपि।

(४)

चन्द्रकवेरावर्जकेन पृथ्वीराजस्य शौर्यवर्णनेन सन्धुक्षितकौतुकवह्निः समीपस्थसभासद–महाऽऽग्रहात्किम् भवितव्यस्य प्रभावादेव व्यामोहवशंवदो मुहम्मदो राजसभायामाकारितवान् दर्शनमात्रेणैव व्यामुग्धीकृतसमाजं पृथ्वीराजम्। मन्त्रिसामन्तपरिवृतः समधितस्थौ राजसिंहासनं गोरी। समुखे चन्द्रकविः पृथ्वीराजश्चाप्यतिष्ठताम्। समारोप्यन्त भित्तौ लोहस्य [१]सप्ततापिकाः।

**गोरी.** – अपि शक्नोति विशिखमेवंविधमामोक्तुं पृथ्वीराजः ?

**चन्दकविः** – अथ किम्। शब्दवेधमिमं दर्शयितुं सज्जोऽस्त्यस्माकं महाराजः। धनुर्वाणं चानाययतु शूलत्राणः, आदिशतु च कञ्चन पुरुषं तापिकोपरि शब्दं विधातुम्।

मुहम्मदस्याज्ञया न्यधीयन्त पृथ्वीराजस्य हस्ते शराः शरासनं च, व्यधीयत च तापिकोपरि दण्डसमाघातेन सन्नादः। पृथ्वीराजष्टङ्कारसन्धानेन तथा शरं प्राक्षिपद्यथा तापिकाया वेधः [२]प्रहर्षोत्सेधश्च दर्शकेषु युगपदभूताम्।

**मुहम्मदः.** – (प्रहर्षकौतुकाभ्याम्) सम्यक् सम्यक्।

**चन्द्रकविः** – नेदमधिकं किञ्चित्। अस्मन्महाराजस्यान्यदपि नैपुण्यमनुभूयतां शुलत्राणेन। श्रूयताम्–

**[३]'वंशचतुष्कं 'गज'चतुर्विंशतिरङ्गुलयोऽष्ट।**
**शूलत्राणस्तत्रगश्चमूहान [४]सञ्चेष्ट।।**

पद्यस्यार्थमबुद्ध्वा चमत्कारान्तरव्यालोकयन् कौतुकी समादिक्षन्मुहम्मदः – 'विधीयतां द्वितीयतापिकोपर्यपि सन्नादः'।

इदानीं किमासीत्। पद्यतः स्थितिस्थानस्य परिमाणं शब्दस्यानुसन्धानं चावाप्य समरसभाजः पृथ्वीराजस्तथा प्रमुमोच शब्दवेधिनं विशिखं यथा सम्मुखललाटमाविद्धो मुहम्मदो न्यपतत्तत्कालमेव निष्प्राणो भूत्वा भूमौ। सैनिकसामन्तसभासदाः 'धावत धावत, गृह्णीत सत्वरम्, नेतः पलायेत' इत्यादि चक्रुर्भूयांसमारावम्। किन्तु यावत्सैनिकाः समभिधावन्ति ततः पूर्वमेव तौ मिथः खड्गधरायां धारयामासतुः [५]साहसैकरताममरतां यया ह्यद्यापि तौ जागृतस्तावदैतिहासिकजगति। भावयताद्भारतीयानां भव्यं भगवान्।

१. 'तवा'।

२. प्रहर्षस्य उत्सेधः परिपूर्णता।

३. 'चार बाँस चौबीस गज अङ्गुल अष्ट प्रमान।
ता ऊपर सुलतान है मत चुक्कै चौहान।।'

४. निपातयितुं चेष्टस्व। अनुदात्तेत्वलक्षणस्यात्मनेपदस्यानित्यत्वं यद्यस्ति तह्येवं विधसङ्कट एवेत्य त्वम्।

५. साहसे एकतत्पराम् अमरताम्, स्वर्गामिनावभूतामित्यर्थः।

# आल्हा च ऊदलश्च

('आल्हा'शब्देन नाऽपरिचिताः प्रायो बहुश्रुतमहोदयाः। प्रसिद्धम् 'आल्हा' भारतस्य पूर्वप्रान्ते। न केवलं तत्रैव, अन्यप्रदेशीयेष्वपि साहित्यरसिकेषु तदिदं गाने महता प्रवाहेण प्रासरत्पूर्वम्। एतावानस्य प्रचारोऽभवद् यत्कवीनां कवितामनाकर्ण्य साह्लादमाल्हागानमभ्यरोचयञ्जनाः। किमधिकम्, 'आल्हा' चरितसम्बन्धात् 'वीर' नाम्नश्छन्दस एव 'आल्हा' नाम समभवत्प्रसिद्धं साहित्ये। निजसाम्यप्राप्तेरीर्ष्यया असूयन्तिस्म कवयोऽप्याल्हागायकेभ्यः। अत एव हि 'व्यङ्ग्यकवित्तानि' प्रसिध्यति– 'आल्हो के गवैयाकों रुपैया रोज खावे कों' इत्यादीनि। किन्तु काविमौ आल्हाऊदलौ, का च तयोर्वीरतेति बहव एव शिक्षिता अपि मन्ये न जानन्ति। अंशतस्तत्परिचयोऽधस्तादवतार्यते।)

## (१)

'महोबा' (बुन्देलखण्डे) महीपते राज्ञः परमारस्य राजसभायाम् आल्हा-ऊदलनामानावास्तां द्वौ क्षत्रियभ्रातरौ। आल्हाज्येष्ठः ऊदलश्च लघीयानासीत्। भारतस्येतिहासे ऊदलसमानः साहसी महावीरो निर्भयश्च योद्धा विरल एव प्रासिध्यत्तस्मिन्समये। यावदेव विकटं सङ्कटमभवत्तावदेव महावीरस्यास्य शौर्यगुणो विजृम्भते स्म। समरसीमनि यत्रैवोदलः प्राविशत्तत्रैव तस्य, तत्तुरगस्य विन्दुलस्य च महान्प्रभावो व्याप्नोत्। खड्गमात्रसहायोऽसौ महामहतीं दुर्दमां चमूमपि रणक्षेत्राद्वित्रासयति स्म। आल्हावीरो वीरतायामूदलादासीत्किञ्चिदूनः परं गभीरतायामासीत्स सर्वाधिकः। आल्हाऊदलयोः पिता यशोराजाख्यः, माता च देवलदेराज्ञी बभूव। स्वामिसभाजोऽयं यशोराजो निजप्राणानपि दत्त्वा परमारदेवस्य सेवामकार्षीत्, अत एव महोबाधिपतिस्तस्मै परितुष्य कालिञ्जरस्य प्रान्तं पारितोषिके व्यतरत्।

आल्हा महोबामहीपतेरासीत्सेनापतिः। ऊदलश्च महोबामहीपस्य परमारस्य प्रधानामात्यपदमध्यतिष्ठत्। आल्हामहावीरो महोबामहीमारक्षन् दशवारान्पराजेष्ट परापतितान् मोगलवीरान्। एष हि निजबाहुबलेन परमारमहीपते राज्यसीमानं गयां यावन्नर्मदातीरपर्यन्तं च व्यस्तारयत्।

एकदा दिल्लीधरापतेः पृथ्वीराजस्य कस्माच्चित् समरात्परवृत्ताः क्षतविक्षताङ्गाः

केचित्सामन्ता:, पदातयश्च कतिपये मार्गं विस्मृत्य महोबामहीमासादयन्। आसीज्जलधरकाल:। प्रथमं क्षतविक्षताङ्गा:, ततोऽप्युद्दण्डप्रकृतय: सैनिका:, तदुपरि ते मार्गं विस्मृतवन्त:, ततोऽप्यासीत्प्रावृट्काल:, अत एव ते निजरक्षार्यैपरमारमहीपतेरुद्याने निजस्कन्धावारमास्थापयन्। किन्तु राजसेवका उद्यानपालास्तान्प्रत्यषेधन्। परं न ते तेषामाज्ञां प्रत्यपालयन्। अत एव परस्परविवादवृद्धौ पृथ्वीराजसामन्तै: सम्यगदण्डयन्त महोबापतेरुद्यानरक्षका:। नृपवनसेवकास्ते निजपराभववृत्तं राजसभायां न्यवीविदन्। शौर्यसार: परमार: सामन्तानामेषां निग्रहाय प्रैषयल्लघीयसीमेकां सेनां किन्तु दिल्लीवल्लभस्योदग्रा: सामन्तास्तामेतामनीकिनीमञ्जसैव पराजयन्त। तत: क्रुद्धो महोबाधिपतिरूदलमादिशद् यत्स त्वरितमेव गत्वा दुरन्तानेतत्सामन्तान् सुभृशं दण्डयेत्।

विचारशीलो ह्यूदल: सुभृशमबोधयत्परमारं यदेवं लघोर्घटनाया उपरि महता ताण्डवेन नूनं महीयसी क्षतिरकाण्डमेवापद्येत। दुर्दमप्रतापेन दिल्लीभूपालेन सह निरर्थकमेव वैरनिर्बन्धोऽयं न श्रेयसे भवेत्कथञ्चिदपि। द्वितीयत: साहाय्यैकपात्राणां शस्त्रक्षतगात्राणां सामन्तानामाक्रमणं धर्मतो निषिद्धमपि। किन्तु कोपदुर्निवार: परमार: श्रवसि नाऽकरोत्किञ्चिदपि। अन्ते विर्वशोऽयमूदल: स्वदलमादाय जगाम। सामन्तान् समया समबध्यत महत्तुमुलम्। दिल्लीमहाराज: पृथ्वीराजो यथैव पराभवमिममाकर्णयत्तथैव पवनप्रेरित: पावक इव परमं प्रजज्वाल। प्रेषयामास च स तत्कालमेव दुर्दमामात्मनो वरूथिनीं महोबामण्डलमिदमखण्डमाक्रमितुम्।

## ( २ )

इतो दिल्लीमण्डले महोबामेदिनीमाक्रामितुं समरसज्जा: सन्नह्यन्ते, किन्तु ततो महोबामहीखण्डे घटनैवान्यादृशी समघटत। सामान्यमात्रं सूत्रमादाय महत्काण्डं समबध्यत। आल्हाऊदलयो: सविधे समभूवन् प्रशस्यतरा: पञ्चगोवत्सतरा:। रत्नपरीक्षक: न्परमारमहीपतिस्तानेतानयाचत्साभिलाषम्। प्रादर्शयच्चानेकविधानि विलोभनान्यपि, परम् आल्हाऊदलौ न कथञ्चिदपि सममन्येतौ तेषां समर्पणम्। अन्ते यदा न केनाप्युपायेन तौ दम्यसमर्पणमन्वमन्येतां तदा प्राप्तनिकार: परमार: सामर्षमाज्ञापयत्– 'सरलतया स्वीकुरुतं मे वत्सतराणामेषां समर्पणम्, अन्यथा मे राज्यं विहाय साम्प्रतमेव बहिर्निष्क्रमणीयं स्यात्।'

अभिभवेन वस्तुसमर्पणमात्मनस्तिरस्कारमाकलयन्ताविव न कथञ्चिदपि तदिदमङ्गीचक्रतुस्तौ अभिमानधनाऽनयोर्जनन्यपि नेवं तिरस्कारमसोढ। अतएव वीरजनन्या: प्रोत्साहनेन प्रोद्दीप्तस्वाभिमानाविमौ वीरौ महोबामण्डलमतिक्रम्य कान्यकुब्जकाश्यपीं सुखमशिश्रियताम्। तत्र हि वीरपरोक्षायामतन्द्रो महीपतिर्जयचन्द्रोऽनयो: सारदरमकरोदभ्यर्थनाम्। अतएव हि मानधनावेतौ तत्रैव सपरिवारमवात्ताम्।

महाराज: पृथ्वीराजो दलबलसहितमभ्यास्कन्दत महोबामण्डलम्। समजायत वीरक्षयकर: सुमहान् सङ्गर:। साहसैकसारस्य राज्ञ: परमारस्य क्व तावती शक्तिरासीद्

यद्वशीकृतवीरसमाजं पृथ्वीराजं पराजयेत। अतएव दिल्लीपतेः पृतनाभिः समचूर्ण्यत चमूचक्रमेतस्य सर्वभावेन। अभ्यभूयत भयकातरभावेन समग्रापि महोबामण्डलस्य राजसभा, समभूवन् समन्तात्सामन्तानां नानाविधा मन्त्रणाः किन्तु पर्यन्ते महोबाराजमहिष्या मल्हनायाः प्रस्तावः सर्वसम्मतया स्वीकृतोऽभवत्। तदनुसारं परमारः पृथ्वीराजस्य सविधे प्राहिणोद्दूतम्, साकूतं प्रार्थयामास च यद् 'द्वौ मासौ यावत्स संग्रामं निष्प्रतिबन्धं रुन्ध्यात्'। आसीत्पृथ्वीराजो वीरः क्षत्रियः, क्षात्रधर्माणां प्रतिपालयिता च। अतएव हि समरनियमानुसारमसौ स्वीचकार परमारस्य प्रार्थनामेनाम्। समासाद्यत् द्वयोर्मासयोरवकाशो महोबामण्डलस्य सेनासन्निविष्टैः।

( ३ )

महोबामहीखण्डं यदा विपद्वारिदाः पर्यवारयंस्तदा तन्निवासिनामाल्हा ऊदलश्च स्मृतिपटलमध्यारोहताम्। राजमहिष्या मल्हनादेव्या मन्त्रणया परमारस्तयोराह्वानाय जगनकं प्राहिणोत्कान्यकुब्जम् (कन्नौज) प्रति। तत्र गतो जगनकः परमारस्योपरि समापतितां सर्वामपि विपदं निवेदयामास वीरक्षत्रिययोरनयोः। किन्तु नेमौ किञ्चिदप्ययासिष्टां मृदुभावम्। स्पष्टमाभ्यां प्रतिषिद्धम्– 'असारः परमारः खलस्य माहिलस्य दुर्मन्त्रणया निरवासयदावां देशात्पूर्वम्, सम्प्रति सङ्कटत्रस्तः प्रयाजनार्थं प्रयोजयत्यावाम्। किन्तु नावां वाञ्छावो गन्तुम्'। भूयस्तरानुनयविनयावक्रियेतां तयोः किन्तु न कथञ्चिदपि गन्तुमन्वमन्यत आल्हा वा ऊदलो वा।

अनयोर्मातादेवलदेवी यथाकथञ्चिदशृणोत्सर्वमिदं दूनभावेन। किन्तु मूकवाणी क्षत्रियाणी नेतोऽधिकं सोढुमशकत्। सा हि घोरं गर्जित्वा भृशमतर्जयदिमौ– 'हन्त जन्मभूमिं परितो विपत्सरितो व्यापृताः भवन्तौ च गृहकलहं वर्धयन्तौ दूरतः कौतुकमीक्षेथेः ? देशस्य स्वतन्त्रतामाक्रमितुं परितः परिपन्थिनः परापतिताः, युवां च पारस्परिकवैमनस्यमालम्ब्य गृहकोणमातिष्ठथ ? महोबामही लुण्ठ्येत, महोबावासिनां शिरसि सर्वदार्थं कलङ्कः सङ्काशतां किन्तु युवयोर्व्यक्तिगतः सम्मानः स्यादविक्षतः ! नूनं मानयेऽहमपमानमिषमादाय युवामात्मनो जीवरक्षां कुरुथः। हन्त एवंविधसन्तानापेक्षया वन्ध्यतैव मे वरमासीत्।'

वीरजनन्या व्यङ्ग्यवाणीयमविध्यद्धृदयं द्वयोः। सा हि महोबामहेरन्नोपजीवनमपि पुनः पुनरस्मारयद् यस्य ऋणमनपनेयं सम्प्रति समभासत। अतएव हि देशं नरेशं च सङ्कटादुद्धर्तुं द्वावपि वीरौ शस्त्रं गृह्णीताम्। अन्नोपजीवनस्यर्णेन सर्वोऽप्यात्मावमानस्तिरोहितः। देशस्यार्तनादोपरि लवणलज्जां रक्षन्तौ द्वावपि वीरौ व्यक्तिगतमपमानं सर्वथा व्यस्मार्ष्टाम्। कान्यकुब्जपतेर्जयचन्द्रस्य सविधे गमनानुमतिं वाचितुमगमतामेतौ। तत्र हि नान्वमन्यत गन्तुं जयचन्द्रः पूर्वम्, परं यद मातृभूमिभक्तयो रनयोर्भ्रुकुटिभङ्गभीषणमलक्षयद्वदनं तदा गमनाज्ञामदिशत्तयोः। ने तावन्मात्रमेव, अपि तु तयोः साहाय्याय महतीं चमूमपि प्राहिणोत्। आत्मनो भ्रातव्यं लक्ष्मणसिंहं च सेनायाः संरक्षकं विधाय तेन सह व्यसर्जत्।

आल्हाऊदलौ यथैव महोबामेदिनीमवापतां तथैव तत्र सोन्नाहं युद्धसम्भाराः समभ्रियन्त।

आल्हा प्रधानसेनापतिर्न्ययम्यत। इतः समपूर्यत द्वयोर्मासयोरवधिरपि। पृथ्वीराजः संसम्भारमकरोन्महोबामेदिनीमुपर्याक्रमणम्। समघटत महानामर्दः। युद्धस्य यथैव भयङ्करता ववृधे तथैव परमारः पलाय्य न्यलीयत कालञ्जरदुर्गे। किन्तु रणरङ्गोन्मादिनो महोबामण्डलस्य महावीराः सङ्ग्रामाङ्गणे द्विगुणोत्साहेन समवर्द्धन्त। अभूतपूर्वमभवद्भयानकमायोधनम्। आल्हावीरस्य साल्हादमाहवमभ्यापतन्तः प्रत्यर्थिवीरा अपि प्रशशंसुः पराक्रमम्। खड्गमात्रसहायोऽसौ यत एव सपत्नसेनां प्राविशत्तत एवावरणभङ्गमिवाऽकरोत्। मूलकच्छेदमच्छिदच्छत्रुमुण्डानि। कतिपयसंख्यान् पार्ष्णिग्राहानादाय समीकसीमानमवतीर्णेनानेन परःशता एव परिपन्थिसैनिकाः समशाय्यन्त वीरशय्यायाम्। अभितः समभूत् सपत्नसेनायां भयस्येवाऽवतारः। अधुना पृथ्वीराजस्य सैनिकाः समग्रबलेन समारभन्त तत एवाऽस्कन्दं यत्नः किल सोऽयमाल्हा महावीरः सङ्ग्रामसंहारमकरोत्। बहुकालं यावत्प्रचण्डबाहुदण्डेन मण्डलाग्रः भ्रामयतोऽस्य समभूत्परिश्रमस्य सूत्रपातः किन्तु समरोन्मादिनाऽनेन नायं किञ्चिदपि पर्यगण्यत। सरम्भोत्साहमत्तेनानेन तस्मिन्नपि समये निजाश्वादुत्प्लुत्य मातङ्गमारूढस्यापि प्रत्यर्थिसेनापतेरच्छिद्यत सखड्गे बाहुः। सन्धाने किञ्चिदेवान्तरमभूत्, अन्यथा सेनापतेर्मुण्डखण्डने समाप्येत सर्वोऽपि वैरिवीराणामुत्साहः। अस्तु, भाविनः समतिक्रमणे न कश्चित्प्रभुः।

एकस्य हि द्वावौषधिरिति लोके प्रसिद्धिः किन्त्वत्र एकमात्रमुपलक्ष्य पर्य्यापतन्ननेके योद्धाः द्वितीयतो दिल्लीपतेः सैन्यमप्यपरिमितमासीदत एव स्वल्पसंख्यैः महोबामहाभटैः किं किं वा परिसाध्येत ? अपरतः सङ्ग्रामाङ्गण एव लघुभ्रातुरूदलस्य यथैव निधनं तेन विदितं तथैवास्योत्साहः पर्यशाम्यत्। इतो जयचन्द्रभ्रातव्यो लक्ष्मणसिंहोऽपि वीरगतिमगात्। परमारस्य पुत्रो ब्रह्मजिदपि प्रत्यर्थिखड्गधारया प्रवाहितः सर्वदार्थमशयिष्ट समरशय्यायाम्। एवं किल आल्हासदृशमहावीराणामुत्साहे मन्दीभूते विजयलक्ष्मीः पृथ्वीराजसैनिकानां हस्तगता समभूदेव।

(११)

प्राणप्रियस्य ऊदलस्य वीरगतिलाभेन आल्हा एतावद्विषण्णोऽभूद् यत्स न पुनरात्मनः सदनं प्राविशत्। संन्यासमालम्ब्य काननमेवाऽव्रजत्। पृथ्वीराजः कालञ्जरात्परमारं प्रत्यानयत्, तस्य जीवितरक्षामकरोत्। किं बहुना, तस्य राज्यमपि तस्मै प्रत्यार्पयत्। किन्तु तद्दिनादारभ्येव महोबामण्डलमिदं देहलीराज्यस्याधीनमभूत्।

## मातृसेवायां चिरममरे द्वे बलिदाने

(१)

भारतस्य भागधेये प्रगता षोडशतमशताब्दी समुन्नतेश्चरमसीमायै इति ह्यैतिहासिकानां कथनम्। यतो ह्यस्मिन्नेवान्तराले मोगलसम्राजां, सर्वतोऽधिको भाग्यशाली गूढनीतिपरिपाली चाकबरशाहः शासकोऽभूत्! नीतिनिपुणेनानेन वीरक्षत्रियाणां साहाय्यात्सकलमपि भारतं मुष्टिगतमक्रियत। किन्तु समग्रसाम्राज्यस्य सकलं सैनिकबलम् अतुलं धनराशिम् विपुलं नैतिकबलं चापि संप्रयुज्य सोऽयं प्राणपणेनापि मेदपाट (मेवाड़) मण्डलस्य स्वतन्त्रतामपाकर्तुं न प्रबभूव। प्रातः स्मरणीयो महाराणाप्रतापः स्वायुषः समाप्तौ कुमारममरसिंहं निजपरिचालित-स्यादर्शस्य निर्वाहे सर्वथा बद्धपरिकरमालक्ष्य, सर्वात्मनः सामन्तान्मेवाड़मानरक्षायाः प्रतिज्ञां च कारयित्वा सोऽयं सुखेन स्वर्गलोकमध्यारोहत्। क्षत्रियाणां सिंहः सोऽयममरसिंहोऽपि पितुश्चरमामिमामाज्ञां शिरसि निधाय, मेदपाटमण्डले स्थापितानां मोगलसैन्यगुल्मानामुपर्याक्रमणं प्रारेभे।

परिमितबलं मेवाड़मण्डलं प्रचण्डबलशालिना मोगलसाम्राज्येन सह बहूनि वर्षाणि सम्मुखसमरं विधाय क्षीणबलं समपद्यत। प्रगतसमरेषु परश्शताः प्रमुखवीराः सर्वदार्थं वीरशय्यामध्यशेरत। अवशिष्टाऽपि सेना रात्रिंदिवं घोरपरिश्रमेण नानाविधकष्टसहनेन चोत्साहमात्रशेषाऽऽसीत्। अवश्यमेषां वीराणां धमनीषु तेजोऽनुप्राणितं तदेव क्षत्रियशोणितमवहत्, हृदयेषु स एवातुलः शौर्योत्साहः समुद्वेलितोऽभूत्, पूर्वमिव साम्प्रतमपि ते सम्मुखसमराय साहसिनो बाहुविलासिनश्चासन्नेव, किन्तु केवलं साहसं कियद्वा प्रभवेत्? अपरिमितानां संख्यानां सम्मुखे स्वल्पा संख्या कियद्वा वराकी प्रदर्शयेत्प्रागल्भ्यम्? वस्तुतो हि सम्प्रति मेवाड़मण्डलस्य गभीरा परिस्थितिरासीद् यां किल भारतेतिहासज्ञा न नाम कथमपि शक्नुवन्ति विस्मर्तुम्। अत एव हि बहूनि वर्षाणि मोगलसम्राजा सह समरसमारम्भणं नासीत्तस्य कृते सहजम्।

एतस्मिन्नेव समये सम्राडकबरो युवराजं सलीमम् (जहाँगीर) महामहतीं चमूमादाय मेवाड़मण्डलमाक्रमितुं प्राहिणोत्। अक्रियताऽनेन बहुषु मेदपाटीयदुर्गेष्वधिकारः। एतेष्वेव दुर्गेषु 'ऊण्टाला, नामकं दुर्गमतीव सुदृढं राजनीतिदृष्ट्या चात्यर्थं प्रयोजनीयं पर्यगण्यत।

अस्यैव दुर्गस्य द्वारदेशे द्वयोर्बलिनोर्द्वे बलिदाने तादृशे अभूतां ये हि स्वामिभक्तवीराणामितिहासे वज्राक्षरोत्कीर्णे इव चिरायाऽमरे समभवताम्। स्मृतिश्च ययोरद्यापि वीरक्षत्रियाणां रोमाणि प्रहर्षयति, मृतकल्पानां चाप्यन्तःकरणे साहसं चोत्साहं च निरञ्चलं सञ्चारयति।'

( २ )

मेवाड़राज्ये 'चूँडावत, 'शक्तावत, इति क्षत्रियाणामतितमामुच्चौ वंशौ परिगण्येते। द्वावेवाऽन्वयौ वीरतापूर्णकार्यार्थं सर्वत्र विश्रुतौ। द्वाभ्यामेव मेदपाटराज्यस्येतिहासे सर्वदा स्मरणीयास्तास्ताः सेवा निर्वाहिताः। द्वावप्येतौ वंशौ पूर्वजानां वीरताविरुदोपरि गर्वमखर्वं बिभृतः। समरमहोत्सवेषु सर्वतोऽग्रे समवस्थाय सङ्ग्रामवीरता धन्या किल राजन्यानां परिगण्यते। महती सेयं प्रतिष्ठा क्षत्रियवर्गनिष्ठानाम्। नासीरे समवस्थाय समरमहोत्सवश्चिरकालान्महामहत्त्वाय परिगण्यते राजपुत्रवीरैः। किमतोऽधिकं यत्स्वयं कालिदासोऽपि भगवतो रामचन्द्रस्य मुखादग्रयोधित्वं विशेषेण प्रशंसयति –

**'पौलस्त्य एष समरेषु पुरः प्रहर्ता'।**

एतदधिकारलब्धये महती प्रतिस्पर्द्धा प्रचलति स्म राजन्यवंशेषु। महाराणाअमरसिंहस्य समये सोऽयमधिकारश्चूँडावतवंशीयानां पारम्परिकोऽभूत्। समये समये प्राणसमर्पणपूर्वकं याः सेवास्तद्वंशीयैरक्रियन्त तासामनुरोधेन सोऽयमधिकारस्तेषां न्यायप्राप्त एव। परन्तु शक्तावतवंशीयैरपि महाराणाप्रतापसिंहस्य समये पर्याप्तास्तादृशीः सेवाः संविधाय महान् प्रभाव उदभाव्यत राजप्रजयोरुभयोरेव मनसि। सम्प्रति शक्तावता अपि नासीराधिकारप्राप्तये स्वाभियोगमुपस्थापयामासुः। आसीत्तेषामाग्रहो यत् 'वयं चूँडावतेभ्योऽप्यधिकं समरवीराः, अत एव सोऽयमस्माकमधिकारः'। इतश्चूँडावता अपि वंशपरम्पराप्राप्तमिमधिकारं मोक्तुं नासन् कथमपि सम्मताः। अत एव विवादमिममादाय समुदपद्यत द्वयोर्वंशयोर्मध्ये ईर्ष्याङ्कुरः, यो हि साम्प्रतं प्रवर्द्धमानः सन् कलहस्य रूपमधारयत्।

राजनैतिकगगने मेवाड़मण्डलस्य या सूक्ष्मा परिस्थितिरासीत्तस्मिन् समये तस्यां किल चूँडावतशक्तावतवंशधराणां मिथः कलहोऽयं महान् घातकः सिध्येदिति को वा नावधारयेद्विचारशीलः। आसन् द्वयोरपि वंशयोः शक्तिमन्तः सामन्ता अमी निजवंशप्रतिष्ठारक्षार्थं परस्परयुद्धाय सन्नद्धाः। भूयानासीत्सम्भवो यद् द्वावपि वंशौ मिथः संयुध्य मेवाड़मण्डल-मिदमितोऽपि शोचनीयामवस्थां प्रापयिष्यताम्। किन्तु दूरदर्शिना महाराणाऽमरसिंहेन सम्प्रति परं कौशलमालम्ब्यत। द्वयोरयं मिथः कलह एव तेन निजविजयलब्धेः साधनं व्यधायि। बहवो राजनैतिकास्तामेतां कूटनीतिं शक्नुयुर्वक्तुं किन्तु भारतवर्षस्य या किल राजनैतिकी परिस्थितिरासीत्तस्मिन्समये तामालोच्य मातृभूमेः कृते नेदमनुचितं परिगण्येत, प्रत्युत प्राप्तकालमेवाऽऽमन्येत। स ह्युभयवंशयोः सामन्तान्समाहूय ससमादरमाज्ञापयत्– 'ऊण्टालादुर्गोपरिमोगलसैनिकानां साम्प्रतमधिकारः। अवश्यमिदं दुर्गं तमेभ्यः समाहरणीयमेव। अस्मिन् विजयसमरे यस्य वंशस्य वीरः प्रथमं दुर्गे प्रविशेत्तस्यैव वंशस्य नासीराधिकारः

सर्वदार्थं स्यात्।'

समरजयिनः शक्तावता निर्णयादस्मात्परं प्रासीदन्। आसीद्धि तेषां निजवीरताया उपरि पूर्णो विश्वासः। इतश्चूँडावता अपि चातुर्यपूर्णे निर्णयेकऽस्मिन्नाऽपारयन्नुपस्थापयितुं विप्रतिपत्तिं काञ्चित्। द्वावपि पक्षौ महता समुत्साहेन समरसम्भारान्विरचय्य परमौत्सुक्यादेकैकमहः सङ्गणयन्तौ तमेनमुत्सवाऽवसरं प्रतीक्षाञ्चक्राते।

( ३ )

परमोत्कण्ठया प्रतीक्ष्यमाणं तदपि दिनं समायासीदेव। किं चूँडावताः किं वा शक्तावताः, द्वयोरेव वंशयोः सामन्ताः स्वस्वसैनिकैः सह शस्त्रास्त्रसज्जां प्रसाधयामासुः। वीरजनन्यः क्षत्रियसीमन्तिन्यः स्नेहभरमन्थरया दृशा निरीक्ष्य सङ्ग्रामविजयिनां वीरपुत्राणां शिरसि सवात्सल्यमचुम्बन्। मातुः स्तन्यपानस्य सम्मानरक्षां स्मारयन्त्यस्ताः सोत्साहमशिक्षयन्– 'विजयलक्ष्मीमादायैव समरात्परावर्तनं वीराणां मानमर्यादा, अन्यथा तु सम्मुखसमरे वीरगतिरेव सर्वतः शोभावहा।'

वीराः क्षत्रियाङ्गनाः स्वकरेणैव पराक्रान्तान्निजकान्तान् शस्त्रास्त्रैरसज्जयन्। परमेणोत्साहेन विजययात्राशकुनान्यायोजयन्त्यस्ताः स्वदयितानसूचयन्–क्षत्रियाङ्गनाः स्वस्य स्वमानमर्यादायाश्च रक्षां जन्मत एव स्वयं शिक्षन्ते। अतएवास्माकं चिन्तया न कथञ्चिदपि विमनायितव्यम् च न वा युद्धे पृष्ठं दर्शनीयम्। चतुरचारणाः स्वस्वाश्रयाणां सामन्तानां सम्मुखतः समगायन् पूर्वजानामूर्जस्वलास्तास्ता, वीरगाथाः, यासु हि सम्मुखसमरे तादृशानि तैः शस्त्रास्त्रशौर्याण्याविष्कृतानि। यानि किल शृण्वतामपि वीराणां प्रस्फुरन्ति नूनं बाहुदण्डाः। ओजोगर्भां वीरभाषां हृदयपटलेषूत्कीर्णयन्तरस्त इमे व्यङ्ग्यमर्यादया निभृतमसूचयन्यत् पूर्वजानां मानमर्यादा प्राणपणेनापि न तैः कथमपि हातव्येति। एवं किल वीरजननीनामाशीर्वादैः, वीरपत्नीनां प्रणयपूर्वमनुरोधैः, वीरचारणानामूर्जस्वलैर्गीतैश्च द्विगुणीकृतोत्साहा द्वयोरपि शाखयोरमी क्षत्रियसिंहाः स्वस्ववंशप्रतिष्ठारक्षार्थे सुदृढबद्धपरिकराश्चक्रुः 'ऊण्टाला, दुर्गं प्रति साभिमानं विजयप्रस्थानम्।'

( ४ )

ऊण्टालादुर्गमुदयपुरराजधानीतः पूर्वस्यां दिशि नवक्रोशान्दूरे समवस्थितमासी-दुन्नततमायां पर्वतवसुन्धरायाम्। अस्य दुर्गस्य समन्तात्प्रवहति परिखारूपेणैको महान्नालकः। यस्य मध्यमार्गतो गत्वा लभ्यते स्मैकमात्रं दुर्गस्य प्रवेशद्वारम्। एतद्विहाय नाभूदन्यः कश्चित्प्रवेशनस्योपायः। शक्तावतानामासीद्दुर्गप्रवेशद्वारस्य परिचयः पूर्वत एव। अत एव ते शीघ्रमेव निजसैन्येन सह तत्र प्राप्नुवन्, प्रारेभिरे च ससंरम्भमायोधनम्। आसीत्सपन्नदलमपि सर्वतः सज्जम्। अत एव समबध्यत तुमुलमायोधनम्। सुदृढदुर्गाश्रयैर्मोगलसैनिकैरुपरितस्तादृशी शस्त्रवर्षा प्रारभ्यत यत्तामुल्लङ्घ्य तोरणपर्यन्तगमनं नासीत्सरलम्। किन्तु

शक्तावतसामन्तानामग्रणीर्बल्लूवीरो वीरतया तामेतां तृणायाऽप्यसम्मन्य दुर्गस्य तोरणपर्यन्तमवाप। परं दुर्गद्वारस्य कपाटे अतीव सुदृढे तीक्ष्णाग्रलोहकीलकसङ्कुले चास्ताम्। अत एव रणमातङ्गमस्तकावघट्टनेनापि न ते प्राभवँश्चूर्णयितुम्। हस्ती किल कपाटपर्यन्तमवश्यमधावत्। परं सुतीक्ष्णाग्रान् लोहशंकूनालोक्यैव स वराको मस्तकस्य प्रचण्डतममाघातं दातुं नाकरोत्साहसम्। उपरितो जायमानां हेतिवर्षामपरिगणय्य वारं वारं वारणेन्द्रः प्रावर्तत, किन्तु कीलककुन्तेभ्यो बिभ्यन्नासौ वराको मस्तकावघट्टने प्रबभूव।

शक्तावतनायकस्याऽस्यैकैकोऽपि क्षणो युगवद् व्यत्येति स्म। यः पूर्वं प्रविशेत्तस्यैव भवेन्नासीराधिकारः इति मेवाड़ाधिपतेरक्षराणि तस्य कर्णकुहरे प्रबलतममगुञ्जन्। नासीराधिकारस्य प्रश्नो नूनं जीवनमरणयोरासीत्प्रश्नः। प्रतिष्ठैव किल वीरजातेर्जीवनम्। सम्मान एव हि राजन्यताया अपरं नामधेयम्। लोकानां मूर्द्धावनमनमेव मूर्द्धाभिषिक्तानां जगति जीवनसूचकम्। अतः प्रत्येकपलस्य बिलम्बो मन्वन्तरमिव प्रतीतमभूत। इतस्तस्य प्रतिस्पर्धिनः चूँडावता अपि दृग्गोचरा अभूवन् ये दुर्गेऽस्मिन् प्रथमप्रवेशार्थं घोरं युध्यमाना आसन्। तस्य प्रतिक्षणं प्रतीयते स्म यच्चुण्डावतैरयं दुर्गे प्रथमं प्रवेशो लब्ध इति।

आसीद्वस्तुस्थितिरपि तादृगेव। शक्तवतानामिव नासीच्चूँडावतानां दुर्गमार्गस्य परिचयः पूर्वम्। अतएव ते मार्गे इतस्तताः परिभ्रम्य विभ्रम्य अपरतो निर्जग्मुः, किन्तु तेषां सौभाग्येनैको मेषपालकस्तैः समगच्छत यो हि सत्वरमेवैतान् लघुनाऽज्ञातमार्गेण दुर्गसमीपं प्रापयत्। चूँडावतानां भाग्ये सोऽयमेकः सुयोगो दैवविहितोऽभूद्यत्ते युद्धयात्रायाः समये सोपानान्यपि निजसैन्येन सहाऽऽनैषुः, यथैव ते दुर्गप्रवेशस्याऽज्ञातमार्गमुखं प्राप्नुवन् तथैव तैर्भयङ्करमायोधनं प्रारभ्यत। प्रतिक्षणमासीत्तेषामपि हृदये भयानकमिदं भयं यत् शक्तावताः प्रथमं दुर्गे प्रवेक्ष्यन्तीति। प्रत्येकक्षणस्य विलम्बस्तेषामपि युगायते स्म। न हि ते दुर्गस्य प्रधानं मार्गं प्राप्तुमशक्नुवन् तत्र हि शक्तावताः पूर्वमेव भयङ्करमायोधनं प्रारब्धवन्तः। अतएव हि चूँडावतैर्यथैव मेषपालकनिर्दिष्टं प्रवेशस्थानमदृश्यत तथैव तैः प्राणपणेन भयङ्करमायोधनमारभ्यत। इतश्चूँडावतचूडामणेः रावतजैत्रसिंहस्य क्वासीदियद्धैर्यम्। स हि सोपानसाहाय्येन त्वरितमेव दुर्गभित्तिमारोहत्, प्रारेभे च कियताञ्चन वीराणां साहाय्येन मोगलैः सह सम्मुखं समरं भित्तावेव। अयुध्यन्त मोगलामेवाड़वीरैः सह स्थानद्वये। प्रधानद्वारे शक्तावतैः साकम्, भित्तेरुपरितश्च समागतैश्चुण्डावतैः सार्द्धम्।

## ( ५ )

शक्तावतनायकस्य बल्लूवीरस्य सम्मुखे समुपस्थितासीद्विषमतमा समस्या यथा सेयमेका यद् द्वारं प्राप्यापि मातङ्गपुङ्गवो न ददाति कपाटयोर्मस्तकाऽऽघातम्, तथैव द्वितीया सन्तापकारी चिन्ताऽऽसीद् यत् चूँडावता न कदाचित्प्रथमं दुर्गे प्रविशेयुरिति। शक्तावतनायकस्य सविधे क्वासीदियानवकाशो यत् स समस्यामेतां धैर्यपूर्वकं सरलीकुर्यात् अत्र तु जीवनमरणयोरपेक्षयापि जातिप्रतिष्ठाया वंशप्रतिष्ठायाश्च प्रश्नः प्रबलतमोऽभूत्। स्वयं स्वामिनः

सेयमाज्ञासीत्– 'दुर्गं यः प्रथमं प्रविशेत्स एव नासीराधिकरी स्यात्।' अत एव परपुरञ्जयः साक्षात्मृत्युञ्जयोऽयं वीरपुङ्गवो बल्लूरधिकं समयं विचारकरणे असंनाश्य त्वरिततरं कुञ्जरादुत्प्लुत्य तीक्ष्णकीलकयोर्द्वारकपाटयोर्मध्येदेशे विशालं निजशरीरमस्थापयत्। आज्ञापयच्च निजमाधोरणं त्वरितैरक्षरैर्यत्स मातङ्गपुङ्गवं मद्वक्षःस्थलोपरि मस्तकमाहन्तुं प्रेरयेत्।

निजस्याऽन्नदातुरुपरि मत्तमातङ्गं प्रहिण्वन्प्रचकम्पे हृदये हस्तिपकः। किन्तु मूर्द्धाभिषिक्तमूर्द्धन्यो बल्लूवीरस्तामेवाज्ञां पुनः सक्रोधमाम्रेडयामास। आसीद्धस्तिपकः पुरुषानुक्रमेण क्षत्रियवीराणामेवाऽन्नोपजीवी। बहूनि वर्षाणि राजन्यवीराणां सहवासे तेन व्यतिगमितानि। क्षत्रियस्वभावं स प्रकामं पर्यचिनोत्। अत एव ह्यसौ निजस्वामिनः सभ्रूभङ्गमिङ्गितं दृष्ट्वा नेदानीमितस्ततः कर्तुमपारयत्।

यूथनाथः सवेगमग्रेऽधावीत्। धीरशिरोमणेर्बल्लूवीरस्य सुदृढे शरीरे प्रददौ वज्रप्रचण्डमाघातम्। किन्तु शैल इवाचलोऽसौ राजन्यपुङ्गवो न किञ्चिदपि व्यचलत्। गिरिसारस्य यूथपतेश्चैत्यचूर्णकेनाऽऽघातेन कुन्ततीक्ष्णाः कपाटस्य कीलका अन्तर्विद्धा निरसरन्बहिर्बल्लूमहाभागस्य राजचर्याञ्चिते चारुशरीरे। गिरिशिखराद् गैरिकरञ्जिता निर्झरधारा इव प्रावहन् स्थानस्थानतो रक्तधाराः। अभूत्तस्य तनुस्तितउरिव छिन्नभिन्नाः सर्वतः। किन्त्वनेन स किं धैर्यात्किञ्चिदप्यस्पन्दत्? अपि वा महद्दुःखं सोऽन्वभवद्? न नामैवम्। स हि वंशप्रतिष्ठाया आत्मप्रतिष्ठायाश्चाक्षुण्णतारक्षार्थं परमप्रमोदेनाऽकार्षीदात्मोत्सर्गम्। प्रसन्ने तस्य मुखमण्डले आशायाः प्रमोदस्य च प्रचुरः प्रकाशः प्रत्यक्षं प्रतिभासते स्म। प्रत्येकक्षणस्य मूल्यं प्राणेभ्यो भूयस्तरामासीदधिकं तस्मिन्समये। अत एव स प्राणानां परिवर्ते महालाभजनकमकरोदिमं वाणिज्यव्यवसायम्।

शल्लकीशरीरमिवासीदस्य देहः कीलकुन्तैः प्रोतः सर्वतः, अन्ते च चिरकालार्थमसौ शान्तो भूत्वा लेभे वीरगतिम्। सूर्यमण्डलं भित्त्वा नभसि गच्छन् स जनैर्ददृशे न वा, वीरवरणोत्सुकाः सुरसुन्दर्यः पारिजातमालाभिस्तमवृणन्नवा, तस्य कृते स्वर्गद्वारमपावृतकपाटमासीन्न वा, इति नेदं सर्वमस्मिन् कलौ काले अविश्वासनिष्प्रभीकृताभ्यां चर्मचक्षुर्भ्यामालोक्यत किन्तु कुञ्जरशिरःसमाहता तत्कालमेवाऽभिद्यत द्वारशृङ्खला। अभेद्यमपि दुर्गद्वारमिदं शक्तावतवीराणां कृते तत्कालमेव नूनमपावृतकपाटमभूदिति न केवलं समरगतैरेव सर्वैरलोक्यत, अपि तु विस्मयविस्फारितैर्विचारचक्षुर्भिर्वयमपि साम्प्रतमालोकयामहे। यस्य किल साक्षी राजपुत्रवीराणामयमितिहास एव साक्षात्।

## ( ६ )

किन्तु सहृदयहृदयवेधेनाप्यात्ममेधेनानेन किं शक्तावतैर्मेवाड़ीयमूर्धाभिषिक्तेषु नासीरनियुद्धाधिकारो लब्धः? महदिदं दुःखं यद् हन्त महता बलिप्रदानेनाप्यनेन न किल भगवत्याः सिद्धेर्मुखमवाऽऽलोक्यत तैः। वीराणां पुण्यपरिसंख्यापकस्य भगवतो भूतभावनस्य

दृष्टौ शक्तावतवीराणां राष्ट्रसेवा न तावती समजायत यावती चूँडावतचमूपतीनां बाहुदण्डैः समसाध्यत। मन्ये शक्तावतवीराणां बलिप्रदानसंख्यायामासीत्काचिदधुनापि न्यूनता। शक्तावतसामन्तानां दुर्गप्रवेशस्य नाधिककालपूर्वम्, अपि तु केवलं द्वित्रिक्षणपूर्वमेव, चूँडावतचमूपालस्य जैत्रसिंहस्य छिन्नं वीरशिरो हन्त दुर्गमिदं प्राविशत्।

चूँडावतचूडामणी रावतजैत्रसिंहो द्वितीयस्यां दिशि दुर्गप्राकारमारुह्य मोगलैः सह घोरघोरतरमासीद् युध्यमानः। एतस्मिन्नेव समये मोगलसैनिकस्यैकस्य प्रचण्डप्रहारेण क्षतविक्षतोऽसौ नावस्थातुमशकत्प्राकारभित्तौ। न्यपतदसौ दुर्गाद् बहिः भित्तेरधस्तात्। शक्तावतशूरशासकस्य बल्लूवीरस्येवासीदस्यापि हृदये दुर्गाभ्यन्तरे प्रथमप्रवेशस्य चिन्ता सन्ततं जागरूका। एष हि दुर्गप्राकारन्निपतन् मध्य एव निजनिकटसम्बन्धिनं देवगडराज्यस्य सामन्तं चीत्कृत्य सोच्चैः स्वरमवोचत्- ''मम शिरः खड्गेनाऽऽच्छिद्य त्वरिततरं दुर्गस्याभ्यन्तरे निक्षिप्यताम्।'' धन्योऽसि राजन्यजगज्जीवातो जैत्रसिंह धन्योऽसि। मेवाड़मल्लबल्लूवीरान्न भवान् किञ्चिदपि न्यूनः। जगत्यसमानं भवतोऽपि बलिप्रदानम्, स्वल्पीकृतस्वर्गो ह्यात्मोत्सर्गो वाऽयं भवत्प्रतिस्पर्धिनः शूरशिरः शेखरात् शक्तावतशूरशिरामणेर्न नामाऽशतोऽपि लघीयान्।

देवगढ़शासको वंशमर्यादापालिनः स्वस्वामिनस्तामेतामाज्ञामविचलितभावेन पर्यपालयत्। स हि सङ्कोचं विनैव निजशिविरनायकस्य शिरश्छित्वा वस्त्र एकस्मिन् प्रावेष्टयत्। त्वरिततरं च दुर्गप्राकारभित्तिमारुह्य मस्तकमिदं सवेगं दुर्गाभ्यन्तरे निक्षिपन् सौच्चैःखरमद्घोषयत्- ''नासीराधिकारश्चूँडावतराजन्यानामेव। चूडावतानां चूडैव (मस्तकम्)

सर्वप्रथमं दुर्गेप्राविशत्!!'' इदं वाक्यं चूँडावतचमूचारिभिः सर्वैरेव सैनिकैराम्रेड्यत। सहर्षं चैते एकोत्फालेन प्राकारमौलिमारोहन्। एतस्मिन्नेव समये शिरः प्रक्षेपस्यद्वित्रिक्षणानन्तरमेव, ऊण्टालादुर्गस्य दृढं द्वारं सघोरघोषमभिद्यत। विद्युद्वेगेनाऽन्तः प्रविष्टाः शक्तावतशूराः सम्मुखागतान्मोगलसैनिकान् मूलकच्छेदमच्छिदन्। प्राविक्षत्समस्तापि क्षत्रियवाहिनी दुर्गस्याभ्यन्तरे। मोगलसैनिकाः प्राणभयात्प्रतिदिशं पलायन्त। ऊण्टालादुर्गस्य मौलिदेशे मेवाडमण्डलस्य विजयवैजयन्ती साभिमानप्रमोदं प्रास्फुरत्।

## सामन्तसङ्ग्रामः

**( १ )**

''भाव जैत्रसिंह! व्यतीता भूयांसो वासराः, न कुत्रापि खडात्कृतं खड्गेन।''

**जैत्रसिंहः** - अन्नदातुः खड्गेन खिलीकृतान्यखिलखड्गानां मुखानि। सम्प्रति निःशेषद्वेषिणां करवालाः कोषमेव सेवेरन्।

सोऽयं संलापो योधपुरदुर्गस्य प्रशस्तपवने राजभवने समवर्तिष्ट, यत्र हि द्वौ वीरक्षत्रियौ सप्रमोदं निषीदतः। प्रथमोऽयं योधपुरमण्डलस्य प्रवीरो महाराजो विजयसिंहो यो हि हंसधवलवसनाच्छन्नायां महोच्चमखमल्लमयाऽऽसन्द्यां महत उपधानस्याश्रयेण वीरमुद्रया विराजते। प्रभुग्ने अस्य श्मश्रुणी उपरिगामिनी। विशाले नयने मदादाघूर्णितप्राये विक्रमावलेपाद्विस्फारिते च। बलबन्धुरा कन्धरा, कपाटपीवरं वक्षः, सुदृढौ च बाहू। कट्यां कौक्षेयको विलम्बते। वयस्त्रिंशद्वत्सरमितम्।

द्वितीयो वृद्धवीरः प्रकामं सुदृढशरीरः प्रकृत्या गभीरश्च। बाढमुन्मीलित-योर्लोचनयोर्लोहिता रेखा हृदयस्योदारतां धीरतां चाभिव्यञ्जन्ति। वार्द्धक्येऽपि क्षणक्षणं प्रफुल्लौ नासापुटौ निःशब्दमभिभाषेते यदस्य प्रकोपणं न कल्याणाय। वयः प्रशमेऽपि प्ररूढे वक्षसि विराजते चर्ममयः [१]प्रतलपट्टो यस्मिँल्लम्बते मखमल्लकोषान्तरितो विशालः करवालः। वयोऽस्य षष्ट्यासन्नम्। एष एव 'आहुआ' संस्थानाधिपतिर्योधपुरधराधीशस्य वंशजो जैत्र[२]सिंहसामन्तः।

वीरमदोन्मत्तेन पुरभ्यधायि महाराजविजयसिंहेन- 'भाव भूयान्व्यतिगतः कालः परिचालितस्यास्य करवालस्य। अपि न कुतश्चिदुपशाम्येदियं खड्गकण्डूतिः?'

**जैत्रसिंहः** - पृथ्वीनाथ! कृतान्तकरालः स एष करवालः, कः सम्प्रति समर्थोऽस्य साम्मुख्यं कर्तुम्?

**विजयसिंहः** - (सनेत्रोन्मीलम्) सत्यमाह भवान्। राष्ट्रौढानां प्रतिमुखेऽवस्थानं न किल साधारणं कार्यम्। किन्तु किं सर्वेऽपि सामन्ताः श्रीमत्सदृशा एव?

वीरविक्रान्तस्यास्य व्यराजद्वदने वेगतो व्रीडा। विनतमस्तकेन प्रोक्तमनेन- 'तत्र भवतः स्पर्शमणेर्गुणाः। ततोऽपि पृथ्वीनाथ न दृष्टं राष्ट्रौढवीराणां पृष्ठे कदापि खड्गक्षतं केनचिद्?

विजयसिंहो मनसीव मन्दमन्दमलपत्– सत्यमिदमेवमेव। सर्वेऽपि रणधीरा राष्ट्रौढवीराः, न केऽपि रणात्पृष्ठं प्रदर्शयन्ति। विजयसिंहस्य नेत्रे प्रकामविस्फारिते अभूताम्, तदन्तर्गता रक्तरेखाः प्रकटमलक्ष्यन्त। स हि समलपत्पुनर्जैत्रसिंहम्– 'एहि, भाव भवेत्पुनरप्यस्माकं रम्यरणयात्रा। बहोः कालादेवमेव निभृतं स्थिताः स्मः। कोषमासेवमानमेवेदं कौक्षेयकं गृह्येत मलकालिम्ना।'

**जैत्रसिंहः** – भूयसी क्षमाऽन्नदातः! आज्ञा सेयं शिरोधार्या। आदेशश्चेदधुनैव रणतुरङ्गः सज्जीक्रियेत। उक्त्वैवेदं स हि समचेष्टत स्मयितुम्। अगमच्च तस्य चिन्तिता दृष्टिर्विजयसिंहस्य रणोन्मत्ते लोचने अभिलक्ष्य।

**विजयसिंहः** – आम् अवश्यम्, रणतुरगा निश्चितमेव सज्जीक्रियन्ताम्, किन्तु निर्दिश्यतां तत्संस्थानं यस्योपरि क्रियेताऽभिस्कन्दनम्।

जैत्रसिंहः स्मित्वा पुनरचेष्टिष्ट परिहासे तामिमां वार्तां परिहर्तुम्, अवदद्विवनीतभावेन– बहुलं क्षम्यतां श्रीमन्, सहसा न साम्प्रतं भवदभियानोचितं संस्थानमुपलभ्येत राजस्थाने।

अग्नि[१]चूर्णचये पूर्वमेव प्रापतद्विस्फुल्लिङ्गः सङ्घर्षाग्रेः। विजयसिंहः साग्रहमवादीत्– 'भाव जैत्रसिंह सत्वरं सूचय तादृशं मे संस्थानम्।'

जैत्रसिंहः करौसम्पुटीकृत्यगभीरभावेनावोचत्– 'धर्मावतार! न राजपुत्रमण्डले तादृशं संस्थानम् यदभियुञ्जीत भवान्'। विजयसिंहस्य समभूतां नेत्रे विस्फारिते, प्रास्फुरच्च किञ्चिदधरः। तृतीयेऽस्मिन्वारे सोत्तेजनमजल्पत्–जैत्रसिंह निश्चितं मे निर्दिश्यतां तादृक् संस्थानं यत्र सुपरीक्ष्यते राष्ट्रौढानां खड्गधाराधोरणी[२]।

जैत्रसिंहस्याभवतां किञ्चिदुत्फुल्लौ नासापुटौ। अदृश्यत नयनयोरधिकमरुणता। वक्रमवेल्लच्च किञ्चिद्भ्रूयुगम् तथाप्यसौ संयतमगादीत् 'धरणीधुरन्धर न दृश्यते किञ्चिदपि तेऽभिषे[३]णनोचितमास्थानं नूनम्।'

विजयसिंहस्याऽलक्ष्यत ललाटे लेखा। [४]अदश्वयच्च वक्षः। स हि मुष्ट्या भुवमास्फाल्य सावलेपमालपत्– ''अवश्यं निर्दिश्यतां तत्संस्थानं यत्र श्व एवाभियुज्येत, अन्यथा ज्ञास्यामि निर्बलं राजन्यमण्डलम्, भवन्तं च वीरपरिचयशून्यम्।''

नेदानीं संवरीतुमशकत्क्रोधं वृद्धवीरः। अभूल्ललाटे भीषणो भ्रुकुटिभङ्गः। सामर्षं मुष्टिमाबध्नन् सोत्तेजनमवादीत् – ''तर्हि तादृक् संस्थानम् ''आहुआ।''

व्यस्मयत विजयसिंहः। मुखान्निरगमत्तस्य– ''किमुक्तम्? किं भवतस्तदाहुआस्थानमीदृशम्?'' निर्भयमवोचज्जैत्रसिंहः– ''श्रीमन्''! यदि जगति किञ्चिदीदृशं राजसंस्थानमस्ति तर्हि तद् आहुआख्यमेव।''

**विजयसिंहः** – यद्येवं तर्हि तदिदं ते विसर्जनम्। भवतु भवान्सावधानः।

**जैत्रसिंहः** – यदादिशति श्रीमान्। अयमहं मे प्रस्थानप्रणाममावेदये।

( २ )

उच्चोपकार्याया[1] अदृश्यत सर्वैरेवोच्चकलशः। जैत्रसिंहोऽप्यलक्षयत्तम्। शतघ्नीचालकानाहूय निरदिशदसौ–अस्ति कोऽपीदृशः सन्धानकारी यः किलोपकार्यामिमामेकेन गोलकेनोत्पाटयेत्? किन्तु महाराजस्य न भवेत्किञ्चिदपि क्षतम्। शतघ्नीचालकाः समभूवन्विचारमग्नाः। अन्ते सर्वाग्रे भूत्वा निवेदितमेकतमेन सेवकोऽयमिदं कार्यमभिलषति कर्तुम्। जैत्रसिंहेन सावधानमभ्यधायि– 'यदि महाराजस्य रोमण्यपि भवेत्किञ्चित्क्षतिस्तर्हि न ते कन्धरा शरीरान्विता स्यात्।

**शातघ्निकः** – यदाज्ञापयति श्रीमान्। महाराजस्य सविधे न गच्छेद्धूलिरपि, पश्यताऽस्य सेवकस्य हस्तलाघवम्।'

**जैत्रसिंहः** – तर्हि स्पर्शय शतघ्न्यामनलम्।

अदीयत तत्र वह्निः। धाँय इति भीषणेन निनादेन व्याप्यत निखिलमपि रणाङ्गणम्। प्राचलद्गोलकः परं स्वल्पसमयं नादृश्यत किञ्चिदपि धूमघोरण्या। किन्तु यथैव व्यपागमद्धूमावरणं तथैव स्पष्टमदृश्यत यत्सेयमुपकार्या समूलमुत्खाता निपतितास्ति दूरे, न च महाराजस्य शरीरे काचिदपि क्षतिः। अभूत्साम्प्रतं चेतना योधपुरधरणीपतेः।
सकन्धावारस्तत उत्खाय न्यवेश्यत बहुदूरे। प्रारभ्यत पुनर्युद्धम्। प्राचलत्कतिचिद्वासरान् भयङ्करः समरः, परम् 'आहुआ' दुर्गं न कथञ्चिप्यशक्यत पराजेतुम्।

कुपित विलक्षो महाराजः प्राहिणोत्सन्देशहरम्– ''अपैतु साम्प्रतं परिहासः। युद्धं निरुध्याऽपावृणु दुर्गद्वारम्, वाञ्छामि सम्प्रति भवन्तमवलोकयितुम्।''

उदघाटयद् दुर्गद्वारं जैत्रसिंहः। महाराजेन सह सोऽयं समयः पूर्वत एवाक्रियत यद् द्वित्रानेव सामन्तान्सहादाय समुपागच्छेन्महाराजः। दुर्गं प्रविशत्येव महाराजे विजयसिंहे सहचरसमेतो जैत्रसिंहः सोल्लासमघोषयत्– विजयतां महाराजाधिराजो विजयसिंहः।

जैत्रसिंहः स्वयमुपगत्य पूर्वतः प्रसाधिते महोच्चे सिंहासने न्यवीविशन्महाराजं विजयसिंहम्। स्वयं च शिरो नमयित्वाऽतिष्ठत्सिंहासनमधः।

व्यलज्जत विजयसिंहः। मेने स सम्प्रति महान्तं पराजयम्। अतिसाहसेन कथञ्चित्स्मित्वा प्रोचे विजयसिंहः–'यथार्थनामन् तात जैत्रसिंह आहुआ सत्यमेवैकं दुर्गमं दुर्गम्।'

विनतः प्रत्यभाषत जैत्रसिंहः– भूयसी क्षमा मेऽन्नदातः! आहुआदुर्गमिदं श्रीमतश्चरणरजः। सहासमवादीद्विजयसिंहः– 'चरणरजसा समुड्डीय साधु समर्चितं शिरः।'

अपात्रपत[1] जैत्रसिंहः, किन्तु स्मित्वा समवोचत् पादाहतं रजः समारोहति शीर्षमपीति स्वभाव एवायं तस्य।

वीरोचितैर्मधुरपरिहासैः समाप्यत सा विजयसभा।

१३

१. अलधत ''राजा साऽपत्रणन्यतः'' 'अमरः'।

## भारतध्वजः बालवीरः

### ( १ )

''भाव अहमपि सेनायां समावेश्यः''

सेनाध्यक्षः स्कन्धवारे संस्थितः समनोयोगं शत्रोः संवादमाकर्णयति स्म गुप्तचरेभ्यः। वीरधुरन्धरस्य सिकन्दरस्य रणोन्मत्ता वाहिनी त्वरितमेव भारतमनुप्रविश्य पौरवराजसैन्यं समाक्रामेदिति सूचितं तैः। अतएव सम्मुखयुद्धाय संयुगीनानां वीराणां क्रियते स्म निचित्य२ समावेशः। लेखयति स्म स हि नासीरयायिनां नामानि गुल्माध्यक्षाय। अन्येऽपि च तदधीना व्यूहाव्यक्षाः सम्मुखसमरस्यायोजने सोत्साहमासन् मिथो विचारपरायणाः। एतस्मिन्नेव समये चतुर्दशपञ्चदशवार्षिको बालकः समागत्य सहसा सेनाधिपतिमावेदयत्–

'सेनाध्यक्षमहाभाग! अहमपि सम्मुखसेनायां समावेश्यः'।

सर्वेषामेव सैनिकानां नयनानि युगपत्समभूवँस्तदभिमुखानि। सेनापतिरपि स्वकार्यं शिथिलीकृत्य तं प्रति प्रेरयामास वीरदृष्टिम्। दृष्टं यत्स मलिनं राजन्यवेषं परिदधत् सम्मुखे उत्साहमवस्थितोऽस्ति। हस्ते किल पुस्तकानि तस्य, अत एव स्पष्टमसूच्यत यत्स गुरुगृहान्निःसृत्य त्वरिततरमत्रैव समायात् इति।

पृष्टं सेनापतिना–'को भवान्?'

**बालकः** – अहं क्षत्रियकुलधरः। सम्प्रति गुरुगृहेधिगच्छामि विद्यां वीरविद्यां च। ममान्ये तरुणाः सतोर्थ्याः सर्वेऽपि सेनायां समभूवन् सम्प्रति समाविष्टः। भाव! अहमपि तत्र यातुमिच्छामि।

**सेनापतिः** – तत्र गत्वा किं करिष्यसि?

**बालकः** – समरं करिष्यामि।

बालकस्योत्तरं श्रुत्वा समभूवन् सर्वेऽपि सेनाप्रमुखाः स्मेरमुखाः। रणोत्कटानां भटानामट्टहासेन प्रागुञ्जदखिलं शिबिरम्। परं बालकतथैव वक्षो विस्फार्य सोत्साहमवास्थित। सेनापक्षः सवात्सल्यमब्रूत– 'वत्स' गच्छ गेहम्। प्रवीष्व सम्प्रति युद्धविद्यां ततो गन्तासि

समराय। न ते तादृग्वयः साम्प्रतम्।

सेनापतेः प्रतिवचनमवाकर्ण्य प्रोक्तं बालकेन– 'अवश्यमहं बालकः, किन्तु क्षत्रियबालकोऽस्मि। वीरसन्तानश्च। अहं समरक्षेत्रे यास्यामि। सम्मुखसमरं च करिष्यामि। विश्रब्धं मां सङ्गृह्णातु भावः।'

आवश्यककार्यव्यग्रः सेनापतिः संकुप्य सोत्प्रासमलपत्– 'माधिकं प्रलापीः। रणशिबिरं न सहते बालानामप्यतिक्रान्तिम्।'

मानी बालकः शिबिरात्परावर्तत। तस्य महद्दुःखमभूच्चेतसि। सर्वेऽपि क्षत्रियवीराः समराय सन्नह्यन्ते। तस्य परिचिता बहवोऽपि क्षत्रियपोताः शस्त्रास्त्रैः सुसज्ज्य रणाजिरमुपयाता अपि। अहह! अहं क्षत्रियसन्तानो, वीरवंशजन्माऽपि सम्प्रति निराश्रय इति सेनाध्यक्षेण न समादृतः। हन्त किमहं सम्प्रति कुर्याम्? अभूत्तस्य हृदि महान् समाघातः।

स हि गुरुकुलं निजावासं वा न गत्वा नगरोद्यानमाविशत्। तत्र वृक्षतले निषद्य विषादेन प्रावाहयदश्रूणि। न्यपतन्कपोलौ निषिञ्चन्तो बाष्पबिन्दवो वसुन्धरायाम्।

पर्यभ्रमत्तस्मिन्समये वत्सलैका वीरमहिला नगरोद्यानमिदम्। सा हि रुदन्तमिममवालोक्य सकारुण्यमुपागात्समीपेऽस्य। समलपच्च– 'वत्स! कथमश्रूणि विसृजसि?'

**बालकः** – सेनापतिना नाहं सैन्ये समावेशितः। मम सहचराः सर्वेऽपि समनह्यन्त समराय। अहमपि च तत्र प्रयातुमुदकण्ठिषि, किन्तु नाहं सेनाध्यक्षेण सङ्गृहीतः। यतोऽस्म्यहं बालः।

सा महिला साम्प्रतमेतस्यात्यन्तमेव समीपे समागत्। आनखशिखं च सावधानमिममालोकयत्। बालकस्य सुदीर्घायते नयने साम्प्रतमप्यश्रूणि वर्षतः। तस्य हस्तगतानि पुस्तकान्यभूवन्नश्रुभिरार्द्राणि। वत्सला महिला सदयमप्राक्षीत्– 'बालक त्वं– कस्यासि तनयः, का ते जननी?'

आसीद्बालको निरुत्तरः। किमुत्तरं दद्यात्? बाल्यादेव अदृष्टमातापितृकः सोऽयं गुरुगृहे प्रवृद्धः। कोमला महिला पुनरपृच्छत्–'कथय कस्य पुत्रस्त्वम्? का च तव माता, क्व च ते निवासः?'

बालकः सम्प्रति समुत्थाय पुरन्ध्र्यास्तस्याः पटाञ्चलमग्रहीत् सकरुणश्रद्धं च तदाननं विलोकयन् झटिति प्रत्यवदत्– 'तवैवाहं तनयः, त्वमेव मे माता, पौरवराजधान्यां चास्यां निवसामि'।

निर्निमेषमालोकमानया महिलया स्नेहाद् बालकोऽसावङ्के गृहीतः। शिरसि हस्तं परामृशन्ती च सा सकरुणस्नेहमवदत् 'त्वं मे वीरबालकः, एहि त्वामहं सेनायां समावेशये।'

बालकस्य मुखमानन्देनोत्फुल्लमभूत्।

तस्य नयनयोः प्रान्ते प्रादृश्यन्त तस्मिन्नपि समये द्वित्रा बाष्पबिन्दवः किन्त्वासीद्धृदये प्रमोदलहरी मुखे च हासझरी। स हि सगद्गदं तच्चरणयोरपतत्तत्सप्रमदं प्रावदच्च– अपि तत्र

भवती मां समावेशयेत्सैन्ये।' यतस्त्वं मे माता। त्वमेव मे भारतजननी, अहं च ते तनयः।

उद्यानस्य द्वारदेशे सज्जोऽभूज्जात्यतुरगद्वयशोभनः स्यन्दनः। आनन्दविह्वला महिला बालकेन सह समारोहत्स्यन्दनमिमम्। आज्ञापयच्च सारथिं रथं प्रेरयितुम्।

रथः प्रावहद्वायुवेगेन। प्राविशच्च पौरवराजसेनापतेः सुप्रशस्तं राजहर्म्यम्। पूर्वोक्ता महिला पौरवराजसेनाध्यक्षस्यास्य गुणिनी सहधर्मिणी। सा ह्यनुरोधपूर्वकमिमं बालकं प्रावेशयत्पुरोयायिन्यामनीकिन्याम्।

( २ )

सैनिकवस्त्रं परिधाय नलिकास्त्रं चादाय वीरदर्पेण स बालकः पदातिसेनया सह सम्मुखसमरमसरत्। येन येन मार्गेण सा पदातिसेना समचलत्तत्र तत्रैव समभूत्समारोहो दर्शकानाम्। सर्वतः पूर्वं सर्वेषां दृष्टिस्तस्मिन् बालक एव न्यपतद् यो हि हस्ते शस्त्रमादाय विक्रान्तवीरैः सह समानपादन्यासेन सवेगं सोत्साहं चाचलत्। तस्य मुखलावण्यं बाल्यसुलभं सारल्यं च सर्वेषां हृदयमहरत्। दर्शकेष्वेको द्वितीयमवदत्– 'विलोकय, वीरबालकोऽयं सैनिकवेषे कीदृशः शोभते।' द्वितीयो गम्भीरमभाषत– 'एष हि वीरोऽभिमन्युर्लव इव वा राजते रणाजिरे'।

सेनायाः सर्वतोऽग्रे सेनाध्यक्षोऽभूद्यस्य हस्ते निष्कोषः करवालः।

किञ्चिदग्रमुपयात्येव समापतच्छत्रुवरूथिनी। प्रारभ्यत महान्समरः। शत्रवः प्रबलेन वेगेन भारतसीमानमाक्रमितुं पर्यधावन्। वीरपुरन्दरः सिकन्दरो यतो यत एव पर्यक्रामत्ततस्तत एव सेनायां शून्यतेवाऽभवत्। सेनाध्यक्षः प्राणपणेन चेष्टामकरोद् यत्सिकन्दरसैन्यं स तत्रैवावरुन्ध्यात् किन्तु दूराभिघातिनीनां शतघ्नीनां सम्मुखे स्थिरीभावः सुकठिनोऽभवत्। भारतस्य भुग्नं भवितव्यमेव भीषणमासीद् येन सेनाध्यक्षो यथैव निजतुरगं सम्मुखात्परावर्तयति स्म तथैवाऽकस्मात्पतता शतघ्नीगोलकेन चकितो भीषितश्च तुरगः सेनापतेरवशो भूत्वा रणाङ्गणात्प्राद्रवत्। सेनाधिकृतो भूयांसमकरोत्प्रयत्नं परं नैनं स परावर्तयितुमशकत्। प्रत्युत सेनापतिं तुरगः समराङ्गणादेवाऽपाऽनयत्। पुनः किमासीत्? सेनापतौ प्रद्रुत एव सकलापि सेना किङ्कर्तव्यविमूढाभूत्। सैनिका इतस्ततः पलायन्तः। भारतस्य राष्ट्रीयो ध्वजस्तस्मिन् संरम्भे तत्रैव निपतितोऽभवत्, नास्योपरि कस्यचिन्निपात दृष्टिः।

न पलायिष्ट पूर्वोक्तो वीरबालकः। स हि वीरतया साम्प्रतमपि युध्यते स्म। भारतीयं ध्वजं यथैव स पतन्तं व्यलोकयत्तथैव वीरतया खड्गं भ्रामयन् त्वरिततरमसौ तमुद्दधार। ग्रीससैनिकास्तं पर्यवारयन्। अनीकस्य गुल्माध्यक्षः समीपमागत्य बालकमभाषत–'ध्वजं नः समर्पय'।

**बालकः** – नाहं दास्यामि ध्वजम्।

**गुल्मा.** – (भर्त्सयन्) ध्वजोऽयं सम्प्रत्येव समर्पणीयः स्यात्। अन्यथा न ते हितं भवेत्।

**बालकः** – प्राणेषु तिष्ठत्सु नाहं दद्यां केतनमिदम्।

गुल्माध्यक्षो बालस्यास्य मुखमाधुर्यं वात्सल्योचितं वयश्च विलोक्य पूर्वमेव मुग्धोऽभूत्, सम्प्रति वीरोचितमुत्तरं निशम्य चकितोऽभवत्। स ह्यात्मनः सैन्यमादिशत्- 'नयतेमं प्रधानसेनापतेरन्तिकम्। किन्त्वबधत्त, नास्य ध्वजं हस्तेनापि स्पृशत'।

विश्वजयिनः सिकन्दरस्य प्रधानसेनापतिः समरे विजितानां वस्तूनां यथास्थानं निवेशनस्य करोति स्म समयोचितं प्रबन्धम्। तस्य सम्मुखम् स भारतीयो बालकः समानीयत सैनिकैः। दृष्टं तेन यदेकः सुप्रसन्नमुखाकृतिः सुन्दरो बालकः सूर्यसिंहचिह्नाङ्कितं ध्वजं वहन् सम्मुखमुपस्थितोऽस्ति। अप्राक्षीत्सेनाध्यक्षः-बालक कस्त्वम्?

**बालकः** - अहमस्म्येकः सैनिकः।

**सेनापतिः** - अस्त्यपरः कश्चित्परिचयः?

**बालकः** - सैनिकस्य परिचयः सैनिक इत्येवास्ति।

**सेनापतिः** - ध्वजमिमं किमिति न समर्पयसि?

**बालकः** - अयं ध्वजो भारतवर्षस्यास्ति।

**सेनापतिः** - कथमयं भवत्समीपे?

**बालकः**- अहं भारतमातुस्तनयोऽस्मि, भारतीयस्यास्य ध्वजस्य सोऽहं संरक्षकः सम्मानयिता च।

**सेनापतिः** - त्वमसि साम्प्रतमसहायः। यदि त्वमिदं ध्वजं न दास्यसि तर्हि साम्प्रतमेव हन्तव्योऽसि।

समीपस्थायामेवोपकार्यायामासीद्वीरपुरन्दरः। सिकन्दरः समवस्थितः। स हि सर्वमिमं संलापं समनोयोगमवाकर्णयत्। 'असहायः कश्चिन्निहन्यते' इति सम्प्रति समवगत्य स हि पटकुटीरात्त्वरितमुपागमत्। दृष्टं-यदेकोबालकः सैनिकैः सर्वतः समावृतोऽस्ति।

विश्वविजयिनो वीरशिरामणेर्निसर्गादेव दुर्धर्षां मूर्तिमवालोक्य सर्वेऽपि सम्भ्रमादुदतिष्ठन् सझणत्कारं च [1]मण्डलाग्रानवनमय्य वीरमर्यादया प्राणमन्। वीरबालकोऽपि वीरोचितं विनयं प्रादर्शयत्। किञ्चित्स्मयमान इव सुप्रसन्नमप्राक्षीत्सिकन्दरः- 'अस्मदधिकृतं ध्वजं किमिति नास्मभ्यं समर्पयसि?'

**बालकः** - श्रीमन् नायं ध्वजो भवदधिकृतः, एषोऽस्ति साम्प्रतं ममाधिकारे। अवश्यमहमस्मि भवदधिकृतः।

**सिकन्दरः** - गुलिकास्त्रेण साम्प्रतमेव निहते त्वयि किं नास्माकमधिकारोऽस्मिन् ध्वजे?

**बालकः** - शूरशिरोमणे! एतावतां देशानां विजयेन वीरताममर्मज्ञस्यापि न किं विदित श्रीमतो यद्भारतीया न समर्पयन्ति प्राणभयेन राष्ट्रीयं ध्वजं कुहचित्। स्पष्टनिवेदनस्य चेदनुमतिस्तर्ह्यहमेव पृच्छामि अपि प्राणानां भयाद्भीतः समर्पयेत्कस्मैचिद् ग्रीसदेशस्य विजयध्वजं श्रीमान्?

सौमनस्यसुन्दरः सिकन्दरश्चकितमवागभूत्। सन्तुष्टमनाः स्पष्टमवोचत्- 'प्रयाहि

वीरबालक! ध्वजमिमं समादाय सुखं साधय समीहितं देशम्। विजयध्वजश्चेन्मे प्रत्याहरणीयस्तर्हि सिकन्दरोऽयं ते देशमनुप्रविश्य सम्मुखयुद्धे बलादिमं समाहरेत्।' आज्ञापयच्च निजगुल्माध्यक्षौ 'बालमिमं सम्मानपूर्वकं प्रापयत नः सीमापर्यन्तम्'।

पिताकापटं समाहृत्य बालको वक्षसि न्यगूहत्, उपरितः प्रावारकं च पर्यधात्। गुल्माध्यक्षौ निर्विघ्नप्रयाणाय तमेनं सीमापर्यन्तमन्वगच्छताम्।

( ३ )

या सेना समराङ्गणात्प्रभ्रष्टा तस्याः सैनिकैः सर्वतो जनश्रुतिः प्रवाहिता यद् बालकसैनिकोऽसौ भारतीयं ध्वजं सिकन्दरस्योपायनाय समनयत्। प्रावर्तिष्ट सर्वतः सेयमेव चर्चा। पूर्वं यथा सर्वतस्तस्य प्रशंसा प्रासरत्तथा सम्प्रति समन्तादस्य गर्हा व्यहरत। लोकास्तस्य नामनि धिक्कारमुदचारयन्।

सेना या परावर्तिष्ट सा पुनः प्रयाणाय समनह्यत। किन्तु घोटकस्य प्रद्रवणोत्तरं न कुत्रचित्सेनापतिरलक्ष्यत। न च कुत्रचित्संवाद एवाऽलभ्यत। अत एवान्यस्तत्स्थाने सेनाध्यक्षेऽभूत्। यस्मिन् समये सेनाप्रयाणस्य दुन्दुभिरनदत्तस्मिन्नेव समये संवादः प्राप्यत– "एको बालकसैनिको ग्रीसवेशीयसैनिकाभ्यां सह सीमाप्रान्तादित एवागच्छति। न चास्य हस्ते ध्वजो विलोक्यते।"

सेनाध्यक्षः सैनिकनियमानुसारं घोरामाज्ञां प्राचारयत्– "देशसीमनि समागच्छन्नेवासौ गुलिकास्त्रेण संहरणीयः।" प्राचरत्सर्वतः सोऽयमपि संवादः स्कन्धावारमुल्लङ्घ्य देशमात्रे। देशद्रोहिणो बालकस्यास्य दमनं द्रष्टुं दुद्रुवुर्दूरदूरतो दर्शकाः।

ग्रीसीयगुल्माध्यक्षौ बालकमिमं सीमपर्यन्तमनुप्राप्य परावर्तिषातां निजस्कन्धावारम्। ततो विजयोन्नद्धकन्धरो बालकोऽयं सुप्रसन्नमनसा भारतसंवर्द्धनागीतिं सुस्वरं गायन् प्रविवेश निजदेशस्य सीमानम्। व्यहरँस्तस्य हृदये नानाविधाः प्रमोदविचाराः। अहं स्वराष्ट्रीयं ध्वजमिमं समर्प्य सूचयिष्यामि सेनापतये यन्न केवलं प्रलम्बकूर्चा एव वीरतामधिकुर्वन्ति। मातुश्च चरणौ प्रणम्य प्रचुरमस्या हृदयं प्रवर्धयिष्यामि यदहमपि बालवीरस्यास्य मातेति। किन्तु यथैवायं निजसीम्नो मृत्तिकायां न्यदाधात्पदं तथैव दन्निति समागच्छन्त्या गुलिकया निरभिद्यताऽस्य हृदयम्। हृदयविचारान् हृदय एवाऽऽदाय न्यपतन्मातृभूमेर्वक्षसि।

अभूत्परितो वलयिता जनता। कश्चिदेतस्य चरित्रभ्रंशमगर्हयत्तर्ह्यन्यो बालस्याप्यस्य कपटचर्यामनिन्दत्। सर्व एव तिरस्कारैरधरयन्निमम्। एतस्मिन्नेव समये समागाज्जनसम्मर्दं दूरतः कुर्वती विक्षिप्तेव च सनिश्वासं धावन्ती युवतिरेका या हि बालस्यास्य शिरः स्वोत्सङ्गे निधाय निःसहं न्यषीदत्। स्पर्शमनुभूयं बालकः शनैर्नयने उदमीलयत्। मुखाच्च तस्य छिन्नभिन्नाः शब्दा निरगच्छन्– "मातः.... ध्वज.... महं.... प्रत्यानयम्। त्वमेव.... मे.... भारत.... माता, .... त्वदीयं.... ध्वजं.... बला.... दहं .... प्रत्याहरम्।.... आः! .. " उक्त्वैवेदं गात्रवस्त्रं सोऽपानयत्। दृष्टं सर्वैर्यद्भारतीयपताका तस्य वक्षसाऽऽश्लिष्टा।

बालकः सकरुणमवादीत् – "मातः.... अहं.... गच्छामि। देहि.... मे ....आशी"

निर्वाणोऽभूत्प्रदीपः। सर्वे पाषाणायितास्तस्थुः। प्रासरत्सर्वतोऽपि हाहाकारः। अनीयत सादरैः सेनाधिकृतैः स्वयं बालकस्य शवः। अन्वगच्छदश्रुभिः सह कुसुमानि वर्षन्ती अपारा जनता। शवः पुष्पमालाभिराच्छन्नोऽभूत्। शवस्याग्रे विकीर्णकुन्तला वत्सला सा महिला प्रायात्।

अग्रे गच्छद्भिर्विलाकितं सर्वैर्यदेकः शवो वृक्षस्याधस्तादधोमुखं निपतितोऽस्ति। समीपोपगतया महिलया प्रत्यभिज्ञातं यत्तत्स्वामिनः सेनापतेरेवेदं मृतशरीरम्। असूच्यत तच्छरीरेण यत्पृष्ठे लग्नया गोलिकयाऽस्य समभून्मृत्युः। हन्त प्रबलं प्रद्रुतेन घोटकेन समरात्परावर्तमानस्य पृष्ठे पतितेन शत्रोर्गोलकेनापहृताः प्रवीरस्यास्य प्राणाः! अहो दृश्यतां दारुणदैवस्य दुर्घटना, यो वीराभिमानी बालकमिमं समराऽयोग्यममन्यत स एव समरे पृष्ठं दर्शयन्नशुभतया मृतः, कानने निर्ज्ञातं पतितश्च। यस्तु बालः, स कालस्यापि सम्मुखे शौर्यं प्रदर्शयन्नेवं किल वीरवरैः स्कन्धेनोह्यते। अदह्यत सेनापतेरपि शवः सैनिकैरेव। किन्त्वेकस्य मरणेन विह्वला महिला सा लोकलज्जया शिरोऽवानमयत् अपरस्य तु मरणान्न केवलमात्मन एव अपितु देशमात्रस्यापि

शिर: समुन्नतं मेने।

अस्थाप्यत बालवीरस्यास्य तनुश्चन्दनकाष्ठाचितायां चितायाम्। पुरुराजसेनायां वीरसम्मानाय यथैव शतघ्नीध्वनयोऽदन्ध्वनन् तथैवाभ्युस्थानायेव प्राज्वलच्चितायां वह्नि:। भगवान् भानुमानपि वीरस्यास्य विरहेण शोकशबलमात्मानं पश्चिमपयोनिधावपातयत्!!

## अनुताप:

### ( १ )

'अहो रजन्या: शून्येऽस्मिन्नधकारे सर्वेऽपि निर्विचिन्तं शेरते, निद्रापगाया: मादकतरङ्गेषु सप्रमोदं प्रवहन्ति सर्वेऽपि, परं मम नेत्रयोर्नांशतोऽपि निद्रा। मनसि न सन्तोष:। वक्षसि न विश्रान्ति:। अन्तर्मानसमनुभवामि यत्कापि भयङ्करी वेदना विनिर्दयं विध्यति मे वक्ष:। अतृप्ता काचिद्भावना चक्षुषोरुपगम्य दु:खाकरोति दूनं हृदयम्। हृदयं ज्वालया मस्तिष्कं चिन्तया, शरीरमज्ञातया पीडया दह्यत इव निर्दयम्। अस्मिन् विजने अन्धकारे घनेऽपि च निरन्तरं प्रतीयते यत्काश्चिदपरिज्ञाता मूर्तयो मत्सम्मुखमुपस्थाय मे घोरपतनस्य चित्रमङ्कयन्ति। आ: सत्यमिमा मे वृद्धस्य पितु:, भातृणां भ्रातृव्याणां च मन्ये मूर्तय: सन्ति। हन्त! निरपराधानाममीषां रुधिरेण निजकरौ संरज्य कथमहं सुखनिद्रामवाप्तुं शक्नुयाम्? भयङ्करस्यास्य पातकस्य प्रायश्चित्तमवश्यं मया कर्त्तव्यं स्यादिति जाने। पापस्य मन्ये तदेतदेव प्रायश्चित्तं यदधुना जातिसेवां कुर्याम्, विधर्मिणो निर्दयं दण्डयेयम्, मौगलसाम्राज्यमिदं भूमण्डले प्रकामप्रबलं सम्पाद्य स्वर्गतानां पूर्वपुरुषाणामात्मानं सन्तोषयामि। कदाचिदनेन मे हृदयभारो लघुर्भवेत्, मानसी चिन्ता विमुञ्चेन्माम्।'

इन्द्रप्रस्थस्य मान्यो मोगलसम्राडवरङ्गजीव: स्थित्वा स्थित्वा तदेतदेव भूयसा भावयति स्म। स कदाचिच्छयनीयादुत्थाय सम्मुखगता भित्ती: परामृशति स्म हस्तेन, कदाचिदुन्मादे बहिर्निर्गम्य तिष्ठति स्म निरुद्देश्यम्, कदाचिच्च सोऽयमीश्वरप्रार्थनायां तन्मयतामिव दर्शयति स्म किन्तु नायमधिजगाम शान्तिम्। स हि नि:शब्दमब्रवीत्। 'मम दृष्टौ सर्वोऽपि संसार: समालोक्यते अन्यथाभूत इव। अस्मिन् संसारपटले कियत्यो भयानका मूर्तयश्चित्रिता: सन्ति। काचिद्रोदिति काचिद्धसति, काचिच्छयामला काचिदुज्ज्वला, काचित्क्रोधपूर्णा काचिदुदासीना।

अहो सर्वा एव संहत्य विचित्रामाकृतिं विधाय, मदुपरि निर्दयमाक्रमणं विदधति। हन्त अहो अहो।....'

अवरङ्गजीव एतादृश एव चिन्ताऽऽवेशे निरुद्देश्यमासीत्प्रलपन्। अस्मिन्नेव समये सहसा कश्चित्तमेनमाजुहाव–'श्रीमन्! सम्राट्!'। अवरङ्गजीवश्चकितोऽभवत्। तस्य सर्वाऽपि व्याकुलता स्वल्पकालाय व्यलीयत पुनर्हृदये। विचारा व्यपागमन् शून्ये वियति। स हि प्रकाशमुज्ज्वलीकृत्य व्यलोकयत्–सम्मुखे उदयपुरी[१] महिषी स्थितास्ति। अवरङ्गजीवस्य विशुष्कयोरप्योष्ठयोः सूक्ष्मा काचित्स्मितरेखा समखेलत् स्वल्पकालाय। स हि हृदयस्य वेदनां हृदय एव निगूह्य सप्रमोदमिवावदत्– 'सत्यं त्वं मे हृदयस्य जीवितं चित्रम्। अत एव हि मे विषादमवगम्य घोरायामप्यस्यां रजन्यां शून्येऽपि मे शयनकक्ष्ये समुपगतासि। एहि, निर्वापय मे प्रतप्तमान्तरम्, प्रशमय मे समुज्जृम्भमाणमुत्तापम्।'

'अहं तु वशंवदास्मि सम्राजः' प्रादादुत्तरं महिषी–'सम्राड् मामाह्वयेन्न वा, परं तत्रभवतः प्रणयतन्तौ निबद्धा मे प्राणाः प्रतिक्षणमेव भवतो गतिं विधिं च निभृतं परिजानन्ति। परमद्य भवान् किमित्येतावद्विषण्णः? रूपनगरस्य राजदुहिता काचिदत्यन्तं सुन्दरी, नाम तस्याः प्रभावती। श्रीमन्! इदमप्यवगतं मया यत्सा निजरूपराशेरभिमानमालम्ब्यापमानमपि सम्राजश्चकार। मन्ये भवेत्तदेव विषादकारणम्। किन्तु कोऽस्मिन् विषादहेतुः? अहं साग्रहं प्रार्थये यत्सा सुनिश्चितं सम्राडन्तःपुरमुपनेतव्या'।

अवरङ्गजीवः प्रत्यवदत्– 'नेयं काचिन्महती वार्ता। जीवन्निशापि[२] पर्यचालयच्चर्चामिमां ह्यः। अहं तदेतन्मीमांसमान एवासम्, किन्त्वद्य भवत्यापि प्रबलीकृतोऽयं प्रस्तावः। श्वः प्रातरेव रूपनगरे नरेशस्य समीपे निश्चितं प्रहीयेत सोऽयं सन्देशः। ब्रूहि साम्प्रतं तु ते परितोषः?'

## ( २ )

रूपनगरस्य सीमान्ते सम्राड्वाहिनी निजस्कन्धावारमस्थापयत्। मोगलसन्देशहरो नरपतेः सभामुपगत्य श्रावयामास सम्राजः सन्देशम्। धीरोऽपि राजा निस्तब्धशरीरोऽभवत्। क्षत्रियसामन्ताः समन्तादकम्पन्त। व्याप्नुते स्म रूपनगरं निर्भरं विषण्णता। सर्वेप्यचिन्तयंश्चेतसि किमधुना कर्तव्यमिति।

राजकुमारी प्रभावती निरतिशयं व्यषीदत्। तिमिरमुपागमत्तस्याश्चक्षुषोः सम्मुखे। सर्वतो भयत्रस्ता सा पितरमुपगत्य दीनं न्यवेदयत्– 'क्रूरस्यावरङ्गजीवस्य कूटचक्रान्मां रक्षितुं विचिन्तय सत्वरं कञ्चिदुपायम्'। किंकर्तव्यविमूढो नरपतिरतिष्ठत्तूष्णीम्। विषादवती प्रभावती व्यचारयश्चेतसि– 'किमद्य क्षत्रियवंशस्य मर्यादा कलङ्ककालिम्ना सम्भवेत्सर्वथैव विलुप्ता? मा मैवम्। कोऽपि मे साहाय्यं विदध्यान्मा वा, अहं स्वयं स्वस्य संरक्षिका भवेयम्। क्षत्रियशोणिते मे धमनीषु प्रवाहितेऽपि नेदं कथञ्चिदपि सम्भवेद् यन्मम शरीरमास्पृशेद्यवननरपतिः। एतस्यैव गौरवस्य रक्षायै महाराज्ञी पद्मिनी निजात्मानमग्रये

उपायनमददात्, किरणावती लावण्यलोलुपस्याऽकबरस्य वक्षसि निषद्य तद्धस्तेन 'नवरोज' नामकं मेलकं निरोधयामास। तदिह भगवतः पावकस्य कौक्षेयस्य च सत्तायामवरङ्गजीवः कथं मे गात्रमङ्गुल्याऽपि संस्पृशेत्? यदि राजपुत्रवीरेषु क्षत्रियरक्तं विलुप्तं तर्हि क्षत्रियवीराङ्गनासु तु तन्न लुप्तम्! किन्तु किमिदं मया प्रलपितम्, हन्त वीरेषु मिथ्यापवादं प्ररोप्य पातकमुपार्जितं मयका। न हि सर्वेऽपि क्षत्रियाः पौरुषहीना नूनम्। केचिद्राजपुत्राः शृगाला जातास्तेन किं सर्वापि क्षत्रियजातिः सिंहविरहिता समपद्यत? मेदपाटस्य महाराणा राजसिंहः साम्प्रतमप्यलङ्करोति राजपुत्रसमाजम्। तर्हि तस्यैव सम्मुखे साहाय्यं किमिति नाभ्यर्थयेय?

राजकुमारी प्रभावती विश्वेस्तेनानुचरेण प्रापयामास निजप्रार्थनां राजसिंहस्य सविधे। अवरङ्गजीवस्यानुचितैरत्याचारैः पूर्वमेव परिक्रुद्धः सोऽयं राजसिंहस्तामिमां क्षत्रियबालायाः प्रार्थनां श्रुत्वा कथंकारं वा शान्तस्तिष्ठेत्? स हि वीरान्सैनिकान् समाहूय साग्रहमब्रवीत्– 'प्रियतमा मे क्षत्रियसत्तमाः! अवरङ्गजीवः सर्वमपि भारतं पादाभ्याममर्दयितुं प्रकरोति प्रतिक्षणं प्रयत्नमिति प्रलोकितमेव भवद्भिः। यत एव वयं पश्यामस्तत एवार्यसन्तानेभ्यः श्रूयते हाहाकारः। अद्य सम्मुखक्लीबेनावरङ्गजीवेन पीडिताया रूपनगरराजकुमार्याः प्रभावत्याः प्राप्तं मे सविधे प्रार्थनापत्रम्। वेदनावती प्रभावती निजसतीत्वमभिरक्षितुं राजपुत्रमर्यादां चाभिगोप्तुं प्रार्थयते मे साहाय्यं भिक्षारूपेण। रणधीराः क्षत्रियवीरा! कोऽत्र भवतामाशयः?'

उत्तेजिताः क्षत्रियवीरास्तदेतस्योत्तरं निजखड्गानुत्तोल्य युगपत्प्रददुः। पुलकितमभूत् मेदपाटपुरन्दरस्य हृदयमानन्देन। सर्वान् सामन्तानादाय स हि रूपनगराभिमुखमकरोदभिप्रयाणम्। इतो यवनसम्राजः सैनिकाः राजकुमार्याः प्रभावत्याः सुखपालमादाय दिल्लीसम्मुखं प्रयान्ति स्म! मध्येमार्गमरावलीपर्वतमालाया उपत्यकायां राजपुत्रवीराणां दलमिदं यवनसेनाया उपरि श्येनपातमपतत्। अवर्षन्परितः शस्त्रास्त्राणि। अश्रूयन्त सर्वतः खड्गानां खडखडात्काराः। निरभिद्यन्त यवनराक्षसानां वक्षांसि कौक्षेयकैः। स्वल्प एव काले वीरकेसरी स हि समस्तानेव यवनसैनिकान्मूलकच्छेदमच्छिदत्। ये केचिदवशिष्टास्ते पलाय्य प्ररक्षितवन्तो निजप्राणान्। समराङ्गणमगुञ्जद् राजसिंहस्य जयकारैः। क्षत्रियसमाजसिंहस्य राजसिंहस्य हृदयमानन्दसागरे समभूत्प्रवाहितं न तावत्केवलमनेन विजयेन नूनम्, अपि तु साहाय्यमर्थयमानायाः प्रार्थनाया उपरि स हि समये निजात्मानं सफलमसाधयदिति कृत्वा।

## ( ३ )

इन्द्रप्रस्थस्य साम्राज्यसिंहासने समासीनोऽवरङ्गजीवः समाकम्पत कोपेन। प्रचण्डचक्षुर्भ्यां स्फुलिङ्गान्विकिरन्नाज्ञापयामास सोत्तेजनम्– 'अमात्य! पत्रमिदं खण्डशः कृत्वा बन्दीकुरु मन्दीभूतमतिं दूतमिमम्। साम्प्रतमेव च मच्छत्रच्छायायां निवासिनीं साम्राज्यवाहिनीं तत्सेनापतींश्च सूचय राजपत्रेण यत् ते यस्यामवस्थायां यत्रापि भवेयुस्त्वरितमेव ततो दिल्लीमिमां समुपतिष्ठेयुः।' किन्त्वितः पूर्वं मार्गकण्टकास्ते परिशोधनीयाः स्युर्ये प्रत्यह प्रतिक्षणं मे सम्मतेर्विरोधमाचरन्ति। अपि परिजानास्यमात्य, के ते मार्गकण्टकाः? ते एव

यशवन्तसिंहजयसिंहादयः। यशवन्तसिंहः साम्प्रतं बाह्लीके, जयसिंहश्च दक्षिणापथे वर्तमानः। भूयस्तरां सम्भवो यद्राजसिंहेन समरकाण्डे समुपस्थिते, द्वावपीमौ सङ्गच्छेतां राजसिंहहतकेन साकम्। अत एव पूर्वं द्वयोरेवानयोः परिसमापनमाचेष्टनीयम्। भवान्निपुणौ द्वौ सन्देशहरौ मत्सविधे सम्प्रेष्य सेनापतीनां नाम्ना त्वरितमेव प्रहिणोत्वाज्ञापत्रम्।

दूतौ द्वौ सम्प्रेष्य सम्राजः समीपे, त्वरितमेव प्रजिघाय सचिवः सेनापतिभ्यो निदेशपत्राणि। स्वल्प एव काले मोगलसाम्राज्यस्य सर्वापि रणवाहिनी दिल्लीराजधान्यां समवैत्। राजकुमारोऽकबरो वङ्गेभ्यः, कुमारआजिमश्च बाल्हीकेभ्यः समुपागच्छत्। दक्षिणप्रान्ते शिवाजिना सह घोरं नियुध्यमानो सुल्तानो मोजमोऽपि युद्धं निरुध्य राजधानीं परावर्तिष्ट! तदेवं विशालां यवनवरूथिनीमाज्ञापयन् प्रावोचदवरङ्गजीवः– 'मोगलसाम्राज्यस्य शौर्यसम्पत्तयः सेनापतयः! त्वरितमेव विधीयतां सोत्साहं रणयात्रा। शार्दूलो यथा मृगानाक्रम्य क्षणमात्रमेव मृतप्रायान्वशीभूतांश्च विदधाति तथैव भवन्तोऽपि राजपुत्रहतकानिमानास्कन्द्य भूविलुण्ठितान्विधद्ध्वम्। तेषां सर्वामपि मान मर्यादां पद्भ्यामवमर्द्य तान्निशङ्कं नरकगामिनो विधत्त। अकाण्डसमुच्छित तन्मुण्डं मण्डलाग्रैर्विखण्ड्य सावहेलं विकिरत क्षीरसागरतरङ्गेषु पुनः समाकर्णयत, स्वर्गात्समुपायाति सन्तोषसंरावः–'विधर्मिणामवचूर्णनेन पुण्यं वो भवेत्, श्रेयो वो भवेत्।'

अवरङ्गजीवस्यादेशमिमं हृत्कन्दरे सन्धारयन्ती यवनवाहिनी प्रलयकादम्बिनीव घोरमगर्जत्। किन्त्वनया गर्जनया कि मेदपाटवसुन्धरा किञ्चिदपि कम्पमुपययौ? नैव, सा तु सुप्रसन्ना भूत्वा निजसुतानां विशालललाटे रणतिलकमङ्कयितुं प्रमोदपूर्णा समवातिष्ठत।

## (४)

'न कापि चिन्ता' मेदपाटनरपतिः सेनापतिमवोचत्– 'माननीयसेनापते! किं भवतो न' विदित यत् सम्राडकवरः समेग्रराजपुत्राणां यवनानां च सम्मिलितशक्त्यापि यदा मेदपाटवसुधाया गौरवं गमयितुं न प्राभवत्तदा अवरङ्गजीवस्य केवला यवनवाहिनी गौरवमिदं कथं वा पारयेदुपशमयितुम्। अत्याचारिणोऽस्य दुर्विचेष्टितैः समस्तस्यापि राजस्थानस्य सर्वेऽपि क्षत्रियपुङ्गवाः सम्प्रति भवतां पक्षे। यदि तेऽस्मत्पक्षे नाभविष्यंस्तदापि किं क्षत्रियवीराणां करालः करवालः कोषगृहेष्वेव शयानः शोभेत? नैवम्, नैवम्। नृशंसस्तेषां निस्त्रिंशस्तदापि चपलेव चमत्कृतोऽभविष्यद्भारतगगने, साम्प्रतमपि भविष्यति भारतभूमौ। परं समरात्पूर्वं या नीतिः पूज्यपितामहेन प्रतापेनाङ्गीकृता सैव साम्प्रतमस्माभिरपि संव्यवहर्तव्या अवरङ्गजीवेन साकम्। त्वरितमेव नगरनिवासिनां नाम्ना प्रहीयतामादेशपत्रम्, आज्ञाप्यतां च तत्र यत्ते मेदपाटस्य कृते मेदपाटमिमं श्मशानरूपे चित्रयन्तु। गगनचुम्बिनीर्निजाट्टालिकाः परित्यज्य अरावली–पर्वतोपत्यकासु निजनिवासमारभेरन्। सखे मेदपाट! निजस्वाधीनतायाः कृते त्वं कियद्वारान् विजनीकृतोऽसि व्याकुलीकृतोऽसि! किं तु भवत्सम्मानोऽस्मिन्नेवास्ति यद् भूमिशायी भूत्वापि भवान् भूमौ भवेद् भूयसाप्यपरतन्त्रः?।

प्रतिक्षणं प्रतीक्षणमासीदाज्ञायाः। यथैव स्वामिनः सङ्केतः समुपालभ्यत तथैव

स्वातन्त्र्योपासिभिर्नगरनिवासिभिः समग्रोऽपि मेदपाटो निर्जनो निर्दीपश्च समपाद्यत। अरावलीगिरिमालायाश्चोपत्यका जनादिसम्पद्भ्री राजधानी समपद्यत। मुगलवरूथिन्या सरभसं सम्प्राप्य दृष्टम् दुर्गद्वारस्य कपाटौ सुस्फुटमुद्घाटितौ। श्मशानमिव भयस्थानमवलोक्यत नगरम्। शून्यानि निकेतनानि साँय-साँयशब्दैः परितः समुदपादयन् साध्वसमिव। विजयोत्साहिनी मोकगलवाहिनो विजनीकृतामपि तां चित्तौरराजधानीं वैलक्ष्यलज्जया पुनरधिकं विध्वंसयामास स्थापयामास च तस्या वक्षसि निजं स्कन्धावारम्। सैनिकाः परितः प्रारभन्त लुण्ठनम्। धनजनपूर्णानि समीपवर्तीनि नगराणि विध्वंसयामासुस्ते। नगरवासिनो मनुजाः पलायन्तेतस्ततः। भयचीत्कारैरपूर्यत गगनम्। सर्वतोप्यकाण्डः प्रलयकाण्ड इव समलक्ष्यत।

मेदपाटपते राजसिंहस्य परिभवासहिष्णुरात्मा पर्यकम्पत निःशङ्कम्। अवर्षन्नेत्राभ्यां विस्फुलिङ्गाः। पर्यन्ते देशमर्यादाभिभावकोऽसौ राजसंस्थानवीरान् प्रति पत्रमेकं संवादसूचनाय परितः प्राहिणोत्। नासीदद्येवात्माभिमानशून्योदेशः। नासीत्सर्वथैव वीरताशून्यं हृदयम्। आसीदयं स्वाधीनताया गौरवस्य च महान् सङ्ग्रामः। अभूदयं देशमात्रस्य मानस्य मर्यादायाश्च गहनः प्रश्नः। यवनानां दुराचारैरन्तरन्तरूष्मायमाणाः सर्व एव राजन्याः स्वागतमकुर्वन् राजसिंहपत्रस्य। मिथ्यागर्वं खर्वं कृत्वा सर्वेऽपि राजसिंहस्य सहयोगिनोऽभूवन्। इतः पर्वतनिवासिन्यः 'पलिप' 'पुलिन्दा' दिलातयोऽपि देशविध्वंसमालक्ष्य शरशरासनाभ्यामात्मानं सज्जीकुर्वन्त्यः समभ्यसरन् रणाङ्गणम्। रणमल्लानां भिल्लानां दलमपि मेदपाटवैजयन्त्याश्छायायामकरोत्समरहुङ्कारम्। एकतः समुदतिष्ठत् 'हर हर महादेव' 'जयएकलिङ्गे'त्यादिध्वनिस्तर्हि परतोऽश्रूयत 'अल्लाहो अकबर' इति महानिनादः। व्यकम्पत घोरारवैर्दिग्दिगन्तः, व्यगुञ्जन् वीरसिंहनादैरुपत्यकाः पर्वतमालायाः।

## ( ५ )

क्षुत्तृषार्तोऽयमवरङ्गजीवो दोनारि'ग्रामस्याक्रमणस्थलात्पलाय्य तुरगारूढः प्रतिष्ठते शून्येऽस्मिन्नारण्यपथे। उपरितः प्रवर्षति प्रचण्डकरः पावकधारां सहस्त्रकरैः परितः। अधस्ताच्च मरुवसुन्धरायाः सन्तप्ता बालुका मर्जयतीव पादाँस्तुरङ्गमस्य। प्रस्वेदप्रवाहैर्गात्रमाकुलव्याकुलम्। विशुष्कौ गाढमोष्ठौ। रक्तमिव संवमतोर्नेत्रयोः प्रत्यक्षामलक्ष्यत विह्वलता। घोटकस्यापि विकला दशा, सोऽपि तृषार्तो विषण्णो व्याकुलश्च। परं स्वामिनं निजपृष्ठे संस्थाप्य कार्यपरतया प्रतिष्ठते मेदपाटाभिमुखम्। मार्गे वृक्षस्यैकस्य शीतलां छायामुपलक्ष्य व्यश्राम्यत्तस्याधस्तात्।

अपारस्य मोगलसाम्राज्यस्याधीश्वरः सोऽयं व्यचारयच्चेतसि- 'हन्त न परिसीमानर्थस्य। ममैतावानपमानः, इयान्पराभवः ? मोगलानां समस्तापि सेना मूलकच्छेदमच्छिद्यत राजपुत्रखड्गैः। राजन्यैरेतैराशया चित्रितं समस्तमपि मे सुखमयं जगत् खड्गधाराजले निरर्गलमभूत्प्रवाहितम्। अहं निश्चितमकरवं यन्निःसीमया मोगलसेनया समग्रमपि मेदपाटं सर्वदार्थं शाययिष्यामि भूमौ, चिराय विध्वस्तं च करिष्यामि। राजपुत्राणामभिमानं मानं च धूलिसात्कृत्वा चिरकालाय सुखनिद्रामासेविष्ये। अत एवाहमखिलस्यापि साम्राज्यस्य सम्पूर्णामपि वाहिनीमाकर्षन्नकार्षं मेदपाटस्योपर्यास्कन्दनम्, किन्तु क्रन्दनं विहाय किमुपलब्धं फलं मयका ? अकबरः पराभूतः,

आजिमः पराजितः, स्वयमहमेतामवस्थामुपगतः। (किञ्चिद्विचार्य) किन्त्वेतादृशी निराशा कुतः? दिल्लीसाम्राजः स्वयमवरङ्गजीवस्य कृते शोभते नाम सेयं निराशा? मैवम्, मैवम्। पुनरहं रणाङ्गणमामण्डयेयम्। पुनरहं वीरप्रयत्नमातिष्ठेयम्। भूयोऽहं शौर्योत्साहिनीं मोगलवाहिनीं संयोज्य राजसिंहमिमवधीरयिष्यामि। '

उच्छ्रितग्रीवः सोऽयमवरङ्गजीवः समुच्छलन्वीरोत्फालेन सरभसमव्यारोहद् घोटकपृष्ठम्। यथैव स तुरगोदरे पार्ष्णिप्रहारमकरोत्तथैव तद्वृक्षस्थाः शकुनयः शकुनमिव सूचयन्तः सर्वेऽपि समस्वरमजल्पन्निव–अवरङ्गजीव! जीवने समाचरितानि संस्मर ते चरितानि। इदं ते पातकानां प्रायश्चित्तम्। पश्य, ते वृद्धः पिता साम्प्रतमपि दत्ते तेऽभिशापम्। साम्राज्याधिरोहेण नितरामुन्नतं ते हृदयं नाद्यापि किं भजते नूनमनुतापम्।

## चन्द्रहासः

### ( १ )

'पुत्रि! किमस्य नगरस्य नामधेयम्?'

'कुन्तलपुरम्। पान्थे! अध्वखेदखिन्नां विषण्णामिव लक्षये तत्रभवतीम्। कुतः पुनर्भवती? लोकोत्तरमनोहराकृतिः कोयं च शिशुः?

**वृद्धा पन्था**– करुणावति! केरलादागच्छामि। केरलाधिपतेः सुधार्मिकस्यायं तनयश्चन्द्रहासः। नगरास्कन्दिभिः परिपन्थिभिः समरे निहतं राजानमनुजगाम पतिव्रता राज्ञीति श्रुतं स्यात्कदाचित्। केरलराजोपजीविनी अहमेव तमेनं बालं ततः प्रभृत्यपुषम्। किन्तु सम्प्रति बालेऽपि वैरिणां दुरभिसन्धिमालक्ष्य निभृतं ततः पलायितास्मि। अपि लभ्येत नगरेऽस्मिन् स्थानम्?

दयावतीभिर्युवतीभिर्नगरे निवासिताया व्यतीयाय वत्सरो दास्याः, न व्यतीयाय किन्तु दुर्दैवं तस्याः। हन्त चन्द्रहासं चतुर्हायनमेव विमुच्य प्रययौ परलोकं धात्री। परं वात्सल्यवशादखिलानामपि प्रेमपात्रीभूतस्य धात्रीं विनापि सुखमभूत्पोषणं चन्द्रहासस्य।

कुन्तलपुरे स्वैरं क्रीडन् प्रययौ राजमन्त्रिणो धृष्टबुद्धेर्भवनं पञ्चहायनश्चन्द्रहासः। ब्रह्मभोजे समागतैर्महात्मभिर्मुनीश्वरैरद्य नीरन्ध्रितं राजमन्त्रिणो भवनम्। किन्तु नरसहस्रसङ्कुलेऽपि मन्त्रिसदने न विनिह्नुतोऽभूच्चन्द्रहासः। चारुताविकासस्य चन्द्रहासस्यानुपमं सौन्दर्यमालोक्य सौलक्षण्यमुग्धा व्यस्मयन्त मनसि मुनयोऽपि। राजसचिवमजिज्ञासन्त ते 'अलिकविलुलन्नवालकः कस्यायं बालकः?'

**धृष्टबुद्धिः**– (पदाभिमानमभिनयन्) नाहं जाने कस्यायं बालकः। सहस्रमेवंविधा अनाथाः शिशवः परिभ्रमन्ति कुन्तलपुररथ्यासु। कस्य कस्याहं परिचिनुयां राजचर्याव्यग्रचित्तः।

**मुनयः**– नैवमवहेलया ब्रूयाः। न किं निभालयसि? नासौ साधारणः शिशुः। भविष्यद्दृष्टयः पश्यामः सोऽयमेव भवेद्भवतः सम्पदामधिकारीति।

यथागतमगमन्मुनीश्वराः, किन्तु घोराभिमानिनो धृष्टबुद्धेरिदमसह्यमभूत्– अज्ञातमातापितृको रङ्को बालको ममोत्तराधिकारी स्यात्! मैवं मैवम्। एषोऽहं मुनीनां मनीषितमिदं विफलयामि। वेणोविटपमपि नावशेषयेयं विपिने कुतो वा वेणुवाद्यकथा? (प्रकाशम्) कः कोऽत्र भोः?

(प्रविश्य) **परिचारकः**– को नियोगः?

**धृष्टबुद्धिः**– गुप्तगृहाद् घातकानाकार्य प्रापय मे सम्मुखे।

आज्ञापयद् धृष्टबुद्धिर्घातकान्– बालकमिमं विपिनमुपनीय घातयत गुप्तम्। उपनयत च मे छिन्नं किमप्यस्याऽङ्गं प्रत्यभिज्ञानाय।

(२)

एको घातकः– वज्रमुष्टे! प्रहर मनाक् त्वमेव करवालम, न मेऽत्र हस्तः स्फुरति।

**वज्रमुष्टिः**– नृशंसक! त्वमेव किं न प्रहरसि। नाहं दुग्धमुखमिमं शिशुं विशसितुमुत्सहे।

हन्त निर्जने विपिने निर्भरं नृत्यन्त्याः प्रकृतिदेव्याः परितो विकस्वरेण सौन्दर्येण द्विगुणितविभासस्य चन्द्रहासस्य स्वाभाविकमिदं सौन्दर्यं शतगुणितमिवाभवत्सम्प्रति। वध्यवेद्यामपि निर्भरं प्रमोदमानो मुग्धोऽयं शिशुः कुलिशकठिनं घातकानामपि हृदयं द्रावयामास। प्रावहत्पाषाणादपि वात्सल्यस्य धारा। घातकैर्भावितं यदयं क्षीरमुखो मुग्धः शिशुः किं वा प्रभवेत्कर्तुमनिष्टं राजमन्त्रिणः। अत एव प्रत्यभिज्ञानाय किञ्चिदेकमङ्गं छित्त्वा बालकस्य वने विसर्जनं व्यभाव्यत तैः। आसंश्चन्द्रहासस्य चरणे षडङ्गुलयः। अपतद् घातकानामकस्माद् दृष्टिः षष्ठ्यामङ्गुल्याम्। इमामेवाङ्गुलिं प्रत्यभिज्ञानाय छित्वा रुदन्तमिमं बालकं विपिने निर्जने विमुच्य प्रययुर्निकटं धृष्टबुद्धेर्घातकाः।

अहह भगवत्याः प्रकृत्याः अपि चन्द्रहासोपरि करुणाविभासोऽभवत्। निःसङ्गा विहङ्गाः कणसङ्ग्रहं विमुच्य तमनु रुरुदुः। विटपिनो वायुसञ्चारेण चक्रुः करुणाक्रन्दनमिव। हरिणाः सान्त्वनायेव चन्द्रहासं परितः परिवारयामासुः। दयया घूका अपि मूका अभवन्। कपोताः शोकेन चञ्चवा पाषाणमगिलन्।

एतस्मिन्नेव समये समागाच्चन्दनावत्याः पालकः कुलिन्दकमहीपतिर्मृगयायै तस्मिन् वने। रुदन्तमिमं चन्द्रहासमालोक्य प्राद्रवत्तस्य कोमलं हृदयम्। सौन्दर्यसौलक्षण्यविस्मितोऽसौ बालमिमं तुरगे समारोप्य समानयन्निजहर्म्यम्। निरपत्यश्चासौ शनैः शनैस्तमिमं दत्तकं पुत्रमकरोत्। अनाथश्चन्द्रहासश्चन्दनावत्याश्चन्द्रशालासु राजकुमारवत् सुखं ववृधे।

कृतोपवीततया लब्धगुरुकुलवासश्चन्द्रहासः समशिक्षत वेदवेदाङ्गानि। अभूच्च

कुशाग्रीयबुद्धितया त्वरितमेवात्र पारङ्गमः। प्राप नैपुण्यं धनुर्वेदे, येन हि षोडशवार्षिक एवासौ प्रकाण्डवीरेषु प्राप्तवान्प्रख्यातिम्। सौभाग्याभिनन्दकः कुलिन्दकः कृतवानेनं युवराजम्। दिग्विजययात्रया महतीं चमूं कर्षयन्नसौ निर्जिगाय निजपितुः सपत्नान्निःशेषेण अपारं धन-धान्यराशिं निजभुजोपाजितमुपानयन् प्रवर्द्धयामास मुदं पित्रोश्चन्द्रहासः।

चन्दनावत्या राज्यमासीत्कुन्तलपुरराज्यस्य करप्रदम्। अत एव कृतज्ञोऽसौ कुलिन्दकः कुन्तलपुराधीशस्योपायनाय प्रैषयद् बहून् धनधान्यसंभारान्। प्रधानामात्यस्य धृष्टबुद्धेरपि सविधे प्रजिघाय कतिचिद्धनशकटानि। धनमधिगत्य लुब्धोसौ परममप्रीयत। दान-बहुमानादिभि-स्तोषितेभ्यः शकटरक्षकेभ्यस्तस्य सर्वोऽपि वृत्तान्तोऽवगतोऽभवद्यत्- युवराजश्चन्द्रहासः शत्रून्वि-जित्य निःसीमं धनमिदमानीतवान्निजराज्यम्।

द्वितीयस्मिन्नेव दिने धृष्टबुद्धिः कुन्तलपुराधीशितुरनुज्ञामवाप्य चचाल चन्दनावतीम्। तत्र नरेन्द्रः कुलिन्दकः सयुवराजः ससम्मानमभ्यागमयन्मन्त्रिणं धृष्टबुद्धिम्। वैभवाभ्यूर्जितेन स्वागतेन विस्मितः पप्रच्छ कुलिन्दकं धृष्टबुद्धिः- 'भवतः सोऽयं कुमारः कदा समुत्पन्नः? षोडशवार्षिकोऽपि नायमद्यावधि मे सूचित इति चित्रम्।'

**कुलिन्दकः**- चन्द्रहासो न ममौरसः। एकदा मृगयाप्रसङ्गेन प्राविक्षमहं तस्मिन्वने यद्धि कुन्तलपुराच्चतुःक्रोशान्तरितम्। तत्र निकृत्तषष्ठाङ्गुलितया क्षरत्क्षतजमिमं रुदन्तमहमवाप्य दयया हर्म्यमानीय सौलक्षण्यसन्तुष्टोऽहमकार्षमात्मनः कुमारम्।

धृष्टबुद्धिः- (मनसि) अहह! मन्ये मया जिघांस्यमानः स एवायं बालो यः षष्ठाङ्गुलिदर्शनेन संरक्षितो घातकैः। हन्त! मुनीनां भविष्यद्वादनिरोधाय कर्तव्यः स्यात्साम्प्रतमप्यस्य घातनोपायः कश्चित्। अस्तु (प्रकाशम्) भवत्स्वागतेन संतुष्टो वाञ्छामि कञ्चित्कालमिहाऽवस्थातुम्। किन्तु कुन्तलपुरे मे हीयतेऽत्यावश्यकं कार्यम्। यदि चतुरं चन्द्रहासं भवान्कुन्तलपुरं प्रेषयितुमनुमन्यते चेदह मे पुत्राय मदनाय प्रेषयेयं पत्रमेकं येन मे तत्कार्यं पूर्येत।

सरलमनाः कुलिन्दको नाविन्दद्दुरभिसन्धिमत्र। स हि सहर्षमेवं कर्तुमभूदनुमतः। कुमारश्चन्द्रहासोऽपि कुन्तलपुरप्रस्थानायाभूत्सन्नद्धः। पितुरनुमतोऽसौ धृष्टबुद्धेः पत्रमादाय वाजिनमारूढः प्रतस्थे कुन्तलपुरम्। नगरोपकण्ठे समागतः पथिश्रमखिन्नोऽसौ समीपगतमाविश्य पौरोपवनं निबध्य च वृक्षमूले तुरगं प्रच्छाये सुखमये व्याश्राम्यन्निद्रादेव्याः क्रोडे।

(३)

(पौरोद्यानस्य प्रासादसमीपे)

''सखि वासन्ति! कुन्तलपुरराजमन्त्रिणो भवनेऽपि न ते सदननिवासतृष्णा व्यपगता यदद्यक्रीडार्थं नगरोद्यानमुपगतापि पुनः पुनर्भवनमेव निरीक्षसे। उपेहि, गच्छावस्तत्रैव यत्र किल

विजनविहाररसिका सचिवकुमारिका विषया विहरते''।

**वासन्ती**– कुन्तले! किं ते निर्जनभ्रमणशीलायाः कुमार्या अनुसरणेन। एहि, पुष्पवीथिकामेव प्रविशावो यत्र पुष्पैर्मालामारचय्य विस्माययिष्याव: कुमारीम्।

वृक्षगहनेष्वितस्ततो विचरन्ती धृष्टबुद्धेः सचिवस्य परमसुकुमारी कुमारी विषया दैवात्तत्रैवागाद्यत्र किल सौन्दर्यैकनिवासश्चन्द्रहासः समभूत्प्रसुप्तः।

**विषया**– (चन्द्रहासस्य हयमालोक्य) अये कस्यायं तुरगः? (समीपे नयनं निक्षिप्य) अथ समीपे विश्रब्धं कश्चित्प्रसुप्तोऽपि? याव दुपसर्पामि विलोकयामि च कोऽयमद्य पुरोपवने स्वैरमनुप्रविष्ट इति। (चन्द्रहासस्य निकटमुपगम्य) अहह कथान्तरेषु भगवान्मकरकेतनः सौन्दर्यैकायनं श्रूयते, अपि स एवायं स्यात्? न मे वितृप्यतो नयने सौन्दर्यैकनिधेर्दर्शनादमुष्य।

अयं मकरकेतुरासीन्न वेति नूनं स्यात्तस्याः सशय एव कामम्, किन्तु समयेऽस्मिन् निभृतनिगूढो मकरकेतनो न विरराम निजकर्तव्यात्। अभूद्विषया प्रेमवशा चन्द्रहासस्य। सा हि निभृतान्तकरणेन समार्पिपन्निजात्मानं चन्द्रहासाय। चन्द्रहासस्य मुखचन्द्रमालोकमानायाः पपात परिधानीयान्निपतितस्य पत्रस्योपरि दृष्टिविषयायाः। पूर्वापरमननुसन्धायैवासौ पत्रमिदं जग्राह हस्ते। पत्रपुटकोपर्यङ्कितमियं विलोकयामास निजभ्रातुर्नामधेयम्। पर्यचिनोच्च निजपितुर्हस्तलिपिम्। मनसि सुभृशमियं प्रासदद् यद् भाग्यानुकूलस्य विधेर्विलासेन सोऽयमस्मद्गृहजनैः सम्बन्धमप्यावहतीति। सावधानं पत्रपुटकमुद्घाट्य पपाठ सा तत्पत्रम्–

'प्रियवत्स!'

पत्रवाहकश्चन्द्रहासः समुपागच्छति सविधे भवतः। नास्य सुकुमारतां विभावयेः, न चास्य पर्यालोचयेः किशोरावस्थामेव। पत्रमुपलभ्यैव त्वरितमस्मै विषं देहि।

कार्यगौरवादादेशकः पिता ते

धृष्टबुद्धिः''

पत्रमिदमनुवाच्यैव विषया निकाममभूच्चकिता। हन्त नितान्तं विचारशीलस्यापि कोऽयमभूदद्य मतिविपर्ययः पितुर्येनाऽयमस्मिन् लोकदुर्लभेऽप्यकाण्डं क्रूरायते। अस्तु अहमिमं लेखमुचितं परिशोधयिष्ये। परिपातयिष्ये च धूमाकुलदृष्टेरपि यजमानस्याहुतिं स्थान एव। सा हि निभृतं विचार्य विषस्याग्रे 'यां' इति शनैर्लिलेख। प्रेमकारुण्यनिर्गतं नयनयोः कज्जलं साधया मास समीकार्यम्। 'त्वरितमस्मै विषं देहि' एतस्य स्थाने 'त्वरितमस्मै विषयां देहि' इति निरपद्यत। पत्रपुटकं च पूर्ववत्समीकृत्य न्यदधात्सा चन्द्रहासस्य परिधानीयपुटके। निभृतं च ततः प्रदेशान्निर्गत्य सखीभिः सङ्गता प्रयासीन्निजसदनम्।

निद्रातः प्रबुद्धश्चन्द्रहासः– 'कथं मे व्यतीतो भूयान्कालो निद्रायामेव? अस्तु सम्प्रति त्वरितमुपयामि कुन्तलपुरमन्त्रिसदनम् (पार्श्वपुटकं विलोक्य) पत्रं तु मे यथावदस्ति!'

कुन्तलपुरं प्रविश्य प्रायासीच्चन्द्रहासो मन्त्रिणः सदनम्, मदनं चोपगम्य प्रददौ पितुर्धृष्टबुद्धेस्तत्पत्रम्। पत्रं चेदमनुवाच्य भूयस्तरां प्रासीदन्मदनः। ईदृशः सुन्दरः सुलक्षणश्च वरो दैवयोगात्पित्राधिगत इति कार्यगौरवात् तत्सामयिकसमाजाभिरुचितं शरीरकार्कश्यादिकमस्याऽविभावयन् पितुरादेशात्सुमुहूर्ते सम्पादयामास विषयया सह चन्द्रहासस्य विवाहम्।

( ४ )

चन्द्रहासस्य चन्दनावतीतः प्रस्थानोत्तर धृष्टबुद्धिः प्रजासु घोरमत्याचरत्। नानाकष्टैस्ताभ्योऽसौ प्रभूतं धनमपाहरत्। सौजन्यनिर्बन्धः कुलिन्दको नात्र किञ्चित्प्रतिकर्तुमशकत्, प्रत्युत स्वयमेवासौ धृष्टबुद्धेः क्रूरतया तेपे। एवं विपुलं धनमपाकृष्य परावर्तताऽसौ कुन्तलपुरम्। मनसि मन्यते स्माऽयम्- 'चन्द्रहासः समापितो मया। मुनीनां भविष्यद्वादश्च विवेकेन विफलीकृतः।' किन्तु कुन्तलपुरमुपयातेन दृष्टमन्यथैवानेन। योऽनेन यमपुरं याता विचारितः स एवात्र तस्य जामाता जातः।

**धृष्टबुद्धिः**- (मनसि) अहो चापलं दुष्टस्यास्य। किन्तु न धृष्टबुद्धिरिदं क्षमेत। कामं विषया स्याद्विधवा परमहमेनं समाप्य विप्राणां वाचमवश्यं विफलयेयम्। क्व गच्छसि पशो! अद्य रात्रावेव चामुण्डाया बलि विदधामि त्वाम्। (चन्द्रहासं प्रति प्रकाशम्) वत्स चन्द्रहास! सोल्लासमभिनन्दामि ते सम्बन्धं मत्परिवारेण। किन्त्वस्मत्कुले सेयं चिरन्तनी प्रथा यज्जामाता नगरदेवतां चामुण्डामर्चतीति। तद्भवानप्यद्य तदिदं निर्वर्तयतु।

**चन्द्र.**- तात भवदादेशात्तदिदमस्यामेव निशि निश्चितं निर्वहेयम्।

**धृष्ट.**- (घातकान्निभृतमाकार्य-कर्णे एवमिव) ज्ञातम्, यः कोऽपि चामुण्डामर्चितुमुपेयात्स एव निर्विचारं तस्या बलिर्विधेयः।

आसीत्कुन्तलपुरभूपालोऽत्यन्तं वृद्धः। यस्मिन् दिने चामुण्डामर्चितुं चन्द्रहासेनादेशो लब्धस्तस्मिन्नेव दिने कुन्तलपुराधीशो निजं छायापुरुषमङ्गहीनं ददर्श व्योम्नि। अचिरभाविन निजमृत्युमसौ विश्वस्य राज्यसमर्पणं कस्मैचिद्विचारयामास। नासीत्कन्यामेकां विहायान्या सन्ततिरेतस्य। स हि प्रधानमन्त्रिणो जामातुः सौन्दर्यसौलक्षण्यादेरस्याकर्णयद् भूरि भूरि प्रशसाम्। स ह्यचिन्तयच्चेतसि यच्चन्द्रहासे राज्यचिन्तां कुमारीं च तां समर्प्यं वनमहमाश्रयेयमिति। अत एव मन्त्रिणस्तनयं मदनमाकार्य निशि निभृतमकरोदेतस्य परामर्शम्। मदनश्चन्द्रहासगुणैः पूर्वमेव वशीक्रियते स्म, स हि राज्ञः प्रस्तावं सोत्साहमन्वमोदत।

व्यत्यैयत भूयसी रजनी। जनाः सुखमासन्निद्रादेव्याः क्रोडे विश्रान्ताः। किन्तु शुभस्य शीघ्रमिति विभाव्य राजा चन्द्रहासानयनाय तत्कालमेव प्राहिणोन्मदनं तत्समीपे। यथैवायं चन्द्रहासं प्रति चचाल मध्येरथ्यं तथैव दृष्टमनेन यद्देवपूजोपकरणं प्रज्वालितचतुर्मुखं दीपं च रजतपात्रे सन्नयन् समायाति सम्मुखमेव चन्द्रहासः। प्रसन्नवदनः समुवाच मदनः- 'सखे चन्द्रहास!

घोरनिशीथेऽस्मिन् किमिदमेकाकी त्वमनुतिष्ठासि? कुतश्च प्रतिष्ठसे?

**चन्द्र.**– भ्रातर्मदन! भवज्जनकेन समादिष्टः प्रयामि ग्रामदेवतां चामुण्डामर्चितुम्।

**मदनः**– तर्हि नेदं सम्प्रति सम्भवेत्। त्वं सम्प्रत्येव कुन्तलपुरनरेशेन समाहूतः। स हि निभृतमवस्थितः प्रतीक्षते भवन्तम्। तत्र गत्वेव त्वं ज्ञास्यसि यत्कियदाभ्युदयिकं ते कृत्यं समर्पयिष्यति कुन्तलपुरनरेन्द्रः समर्पय मे तदिदमुपकरणं यावदहं साधयामि देवपूजाकार्यमिदम्।

मदनश्चन्द्रहासहस्तात्पूजोपकरणमादाय चचाल चामुण्डाचैत्य प्रति, चन्द्रहासश्च राजमन्दिरम्।

मार्गमुल्लङ्घयतो मदनस्य समभूवन्ननेकान्यपशकुनानि किन्तु चेतसि चन्द्रहासाभ्युदयं चिन्तयतो नाभूदेतेषामुपर्येतस्य भ्रूनिक्षेपोऽपि। स हि त्वरितमेव मन्दिरमुपेत्य प्रारेभे भगवत्याः पूजनम्। सम्प्रत्यर्घ्यमेवासीत्तेन समर्पितं तावतैव तस्योपरि मुशलस्य करवालस्य च प्रहाराः प्रारभ्यन्त। 'हा हन्त केयं दैवी व्यापदुपस्थिता! नूनं प्रचण्डा देवी चामुण्डा मत्कृतादर्चनात्प्रकुपिता साम्प्रतम्। तद्भगवत्याश्चरणयोः प्राणर्पणमन्तरा किं वा मयाऽनभिज्ञेन कर्तव्यम्?' मनसि विभाव्येदं स हि सभक्ति भगवतीमभ्यर्थयाञ्चक्रे– 'आत्मापराधस्य मार्जनं तु किमहमर्थये। तत्कृते प्राणानेव ते चरणयोरर्पये। किन्तु तदिदमवश्यं प्रार्थयिष्ये यन्न चन्द्रहासोपरि कदापि कोपितव्यं जनन्या। नास्य स्वल्पोऽप्यपराधः। अहमेव तमेनमन्यकार्ये विसृज्य बलात्ते पूजनाय समुपयातः' इत्येवं प्रार्थयमानस्यैव मदनस्य प्रययुः प्रहारैः प्राणाः।

(५)

शय्यातः समुत्थितः प्रातरेवाऽशृणोद् धृष्टबुद्धिर्यच्चन्द्रहासाय समार्पिपन्नरेन्द्रः कुन्तलपुरराज्यम्। राजकुमारीं चापि तस्मै प्रतिपाद्य प्रायासीदसौ तपोवनम्। श्रुत्वैवेदं नाऽवाधारयदात्मानं धृष्टबुद्धिः। किमिदमहं शृणोमि? हन्त! किमासीद्विचारितं किं चेदमभिमुखमुपस्थितम्? कञ्चिदप्यपरिलप्य पदातिरसौ धावन्प्रायासीच्चामुण्डामन्दिरम्। तत्रत्यं वृत्तमखिलामालोक्य नावस्थातुमप्यसौ शशाक। हन्त प्राणप्रियो मदनः पतितोऽस्ति निष्प्राणः पृथिव्याम्! सोऽपि पृथिव्यामात्मनो मस्तकमाहन्। समचूर्ण्यत कपालः। धृष्टबुद्धेर्जीवनलीला परिसमाप्यत तत्रैव।

राजलक्ष्मीनिवासस्य चन्द्रहासस्याज्ञाकरैश्चरैः सूचितं यद् धृष्टबुद्धिर्मदनश्चोभावपि चामुण्डाया मन्दिरेनिष्प्राणौ पतितौ स्तः। श्रुत्वैव कारुणयोद्भासश्चन्द्रहासः पदातिः प्रायाच्चामुण्डासदनम्। प्रत्यक्षमसावैक्षिः द्वयोर्मृतशरीरे। सरलताया दासश्चन्द्रहासो नेदमज्ञासीद्यद् धृष्टबुद्धेः कुचक्रेणैव सञ्चक्रे सेयं दुर्घटना। स ह्यात्मनोऽपराधेनैव मदनस्य मृत्युमभावयत् 'यद्यहं स्वयं समुपस्थाय समये भगवतीमपूजयिष्यं तर्हि प्रचण्डकोपा चामुण्डा नेमां संहारलीलामदर्शयिष्यत्। हन्त उपकारिणोऽपि प्रलोपकारिणं धिङ् मामधन्यम्। कि मे सम्प्रति जघन्येन जीवनेन।' विचार्यैवेदं मान्त्रिकानाहूय चण्डिकार्चनपुरस्सरं सविधि समेधिते दहने

निजाङ्गानामेवाऽऽहुति प्रददौ। शनैर्हुतेषु सर्वेष्वङ्गेषु यथैवाऽयं शिरोबलिं कर्तुमियेष तथैवासाधारणधैर्यप्रतुष्टा चामुण्डा वह्निकुण्डादाविर्भूय निरुरोध साहसकरं करं चन्द्रहासस्य, प्रोचे च सा 'वत्स प्रीणयसे मां साहसेन, तद् वृणीष्व वरं तेऽभीप्सितकरम्।'

सोल्लासश्चन्द्रहासः– 'यदि प्रसीदतीह भवगती तर्हि जीवितं लभेतामेतावुभावपि।'

'एवमस्तु' हत्यभिदधती भगवती तत्रैवान्तर्दधे। धृष्टबुद्धि–मदनौ प्रसन्नवदनौ सपदि समुदतिष्ठताम्। लब्धसाफल्योल्लासश्चन्द्रहासश्चामुण्डानुकम्पया पूर्वतोऽप्यधिकामुपलेभे शरीरकान्तिं सर्वविधां च शान्तिम्। व्यावृत्तबुद्धिर्धृष्टबुद्धिर्मात्सर्यं विस्मृत्य राजभक्त्या पूर्वमिव चक्रे मन्त्रित्वकार्यम्। दृढसौहार्दविलासौ मदनचन्द्रहासावप्युत्तरोत्तरां प्रीतिमुपजग्मतुः।

## कृत्रिमबुन्दी

### ( १ )

व्यत्यगुः पञ्चशतं वत्सराः। राजपुत्रप्रान्तस्य बुन्दीराजधान्यामासीद् हामानामा वीरक्षत्रियो राजा। एष 'हाडा' वंशभूषणम्। एतत्समयात्पूर्वं खिलजीवंश्यस्य अलाउद्दीनस्याक्रमणैश्चित्रकूट (चित्तौर) राज्यमभूच्छिथिलम्। बुन्दीराज्यमासीत्पूर्वं चित्रकूटराज्यस्यायत्तम्, किन्तु चित्रकूटराजन्यानां शक्तिह्रासे बुन्दीभूपालाः समभूवन् स्वतन्त्राः।

चित्रकूटशासको यथैव बलमलभत तथैव स बुन्दीनरेन्द्रं समसूचत् सार्वदिकनियमानुसारं भवान् ममाधीनः। अतएव ममादेशेन सम्प्रति चित्रकूटे स्थेयम्। हामानरेन्द्रः प्रत्यसूचयत्–बुन्दीराज्यं मत्पूर्वजैः खड्गबलेनार्जितम्। नाहं कस्यचित्परतन्त्रः। किन्तु भवान्माननीयः अत एव सम्मानसूचनाय विशेषमहोत्सवेषु विनयप्रदर्शकः सोऽहमुपैमि भवदन्तिकम्। नेतोऽधिकमाशासनीयं मत्सकाशीत्।

चित्रकूटाधिपतिः प्रत्युत्तरेणानेन भृशमकुप्यत्। सह्याक्राम्यद्बुन्दीवसुन्धराम्। बुन्दीराजधान्या समीपे समभून्निमोडियास्थानम्। सैन्यसमेतो राणा तत्रैव स्कन्धावारमास्थापत्यत्। हामानरपालः प्रथममेव प्राप्नोत्संवादं सैन्योपगमस्य। स हि प्रचितप्रचितान् पञ्चशतं वीरक्षत्रियानादाय निःशब्दं समभिजगाम सैन्यमिदम्। नास्य संवादं प्राप्नोच्चित्रकूटशासको राना। अत एव निशीथे प्रभूतेन बलविक्रमेण चित्रकूटचमूमास्कन्दत्। स्कन्धावार सैनिकाः सर्वथैवाऽऽसन्नसंनद्धाः। हामाकृतमास्कन्दनं नैते सोढुमशकन्। बुन्दीनरेन्द्रस्तत्सैनिकाश्च परस्सहस्रश्चित्रकूटभटान् मूलकच्छेदमच्छिदन्, अवशिष्टाश्च कान्दिशीकतामभजन्। चितौरचमूपती राणा निजप्राणानादाय कथमपि परावर्तिष्ट। अभूद्विजयी हामानरेन्द्रः। विजयढक्कामभिनादयन्स निजराजधानीमुपागच्छत्। गृहे गृहे प्रारेभिरे विजयोत्सवा बुन्दिवसुन्धरायाम्।

पराजितश्चित्रकूटमहीपालो लज्जया विनतवदनोऽभूत्। विशालां मे वरूथिनीं पञ्चशतसंख्यास्ते हाडाक्षत्रियाः समचूर्णयन्निति धिङ् मे जीवनम्। यावदहं बुन्दीदुर्गं नाधिकुर्याम तावन्न कुर्यामन्नजलग्रहणम्' इति भीषणं प्रतिज्ञायं सैन्यसङ्ग्रहे समचेष्टिष्ट।

चित्रकूटाद्बुन्दी द्वात्रिंशत्क्रोशान् दूरे। सैन्यसङ्ग्रहाय च समयोऽप्यपेक्षितः। एतावत्कालं बिनाऽन्नजलग्रहणं जीवनयात्रा नूनम सम्भविनी। तत एव चित्रकूटाधिपतेर्बन्धुबान्धवाः समभूवन्सङ्कटग्रस्ताः। न्यवेदयंस्ते महाराणाम्–'' अतिभीषणा सेयं भवतः प्रतिज्ञा। तस्याः पालनपर्यन्तं तत्र भवतः प्राणारक्षा नूनं सन्दिग्धैव। तत एव सेयं सन्त्याज्यैव''। परं नेदमकरोत्कर्णे चित्रकूटमण्डलेश्वरः। आसीत्तस्योत्तरम्–'अपि क्षत्रियाणां प्रतिज्ञा कदाचिद्वितथापि भवेत्?'।

का गतिरिदानीम्? गभीरं विचारयतां मन्त्रिणामयमेकः प्रत्युपायः प्रत्यभासत। ते प्रार्थयन्त महाराणामहोदयम्–' अस्तु वयमस्मिन् चित्रकूट एव बुन्द्याः कल्पितमेकं दुर्गं निर्मापयामः सैन्यसमेवतस्तत्रभवान् दुर्गमिदं पराजित्य पूरयतु प्रतिज्ञाम्, निर्वर्तयतु च भोजनादिकम्। सैन्यसौविध्यानुसारमचिरादेव च साक्षाद्बुन्दीदुर्गेऽपि क्रियेताऽभिक्रमणम्।' अन्वमोदत प्रस्तावमिमं चित्रकूटेन्द्रः। किमासीत्ततः? चित्रकूटस्य समीप एव प्रशस्ते प्राङ्गणे मृत्तिकया निरमीयत कृत्रिमं बुन्दीदुर्गं स्थापतिभिः। तावन्त एव गुल्माः, तावन्त्येव द्वाराणि, तादृशावेव चाऽऽकारप्रकारौ। बालानामिव क्रीडनकमिदं सज्जीभूय प्रतीक्षाञ्चक्रे महाराणाकर्तृकमाक्रमणम्।

(२)

बुन्दीवसुन्धरायामासीद्येषां हाडाक्षत्रियाणां शासनम्, तद्वंशीयानां वीराणामासीदेकं दलं चित्रकूटेऽप्युपनिविष्टम्। अभूदिदं चित्रकूटाधिपतेरधीनम् तस्यैव वाहिन्या एकोंऽशः। अस्याधिपतिर्हाडावंशीयः कुम्भा वैरिसिंहः। भवितव्यतावशात्तदैव मृगयायै निरगमत्सोऽयम्। कृताऽऽखटोऽसौ यथैव नगरं परावर्तिष्ट तथैव मार्गे निर्मीयमाणमिदं कृत्रिमदुर्गं व्यलोकिष्ट। महदभूत्कौतुहलं तस्य, प्रधानास्थपतिमप्राक्षीदसी–'किमिदं निर्मीयते?'

**प्रधानम्**– ''बुन्द्याः कल्पितं दुर्गम्।'

**कुम्भः**–किमिति? किं प्रयोजनमेतस्याः क्रीडायाः?

**प्रधानम्**– महीपालेन प्रतिज्ञातमस्ति यद् बुन्दीदर्गं पराजित्यैवान्नजले ग्रहीष्यामीति।

**कुम्भः** – बालानां मनोरञ्जनसामग्री मृत्तिकागृहमेदं किं सभवेद् बुन्दीदुर्गम्?

**प्रधानम्** – सत्यमेतत्। किन्तु प्रतिज्ञापालनं कृत्वा प्राणरक्षायाः प्रत्युपायमात्रमिदम्। सत्यमपि दुर्गं पराजीयेत, किन्तु सुविधानुसारं परस्तात्।

**कुम्भः** – सर्वमहमज्ञासिषं सम्प्रति। अहह साधीयसी युक्तिः।

कोपेन कर्कशीभवन्कुम्भः स्वीयसैन्यावासं समागत्य हाडाक्षत्रियेभ्यः समग्रमिमं

वृत्तान्तमावेदयात्। तेऽपि समाकर्ण्य कोपेन प्राज्वलन् ज्वलना इव–'अस्माकं मातृभूमेरेषोऽवमानः। प्राणसत्तायां वयं कल्पितमपि दुर्गमिदं न शक्ष्यामो ध्वस्तं द्रष्टुम्। अवश्यमस्माभी राज्ञः सेवाङ्गीकृता, किन्तु तावता किं मातृभूमेस्तिरस्कारमक्षतशरीराः प्रेक्षिष्यामहे ? मैवम् मैवम् वयं निजमातुः प्रतिमूर्तेरपि प्राणपणेन रक्षां विधास्यामः। प्राणान्ते सत्येवास्माकं स्वामी दुर्गेऽस्मिन् प्रविशेत्, नास्मासु जीवत्सु।' संविदमिमां विधाय शास्त्रास्त्रैः सुसज्जितास्ते कृत्रिमदुर्गमिदमधिष्ठाय प्रतीक्षां चक्रिरे चमूचक्राक्रमणम्।

नियते समये परिमितां पृतनां नयन् समभिससार कृत्रिमं दुर्ग चित्रकूटेशः। आज्ञाप्यन्त तेन निजसैनिका यद् दुर्गाभ्यन्तरतो रिक्तानां नालिकास्त्राणां ध्वनिर्विधेयो भवद्भिर्यावदाक्रम्य वयंमिदं दुर्गं ध्वंसयामः। किन्त्वेतद्विपरीतं, यथैव राणा दुर्गमिदमुपेयिवान् तथैव दुर्गमुखात्प्रारेभे प्रबलतमा गुडकास्त्रवर्षा। चित्रीयते स्म राणा। किमिदमिति गवेषयितुमाज्ञापयत्स निजकिङ्करान्। दृष्टं राजदूतैर्यत् कुम्भः कृत्रिमदुर्गस्य प्रधानद्वारे शास्त्रास्त्रैः सुसज्जितो रणाय सनद्धोऽस्तीति। दूतानालोक्यैव स निजोष्णीषमुत्तार्य भूमावास्तीर्णवान् प्रोद्गीर्णवांश्च–''निवेदयत चित्रकूटपरिवृढम् एषोऽहं स्वागताय सन्नद्धः। मम मस्तकोष्णीषमिदं पदनिधानायाऽऽस्तीर्णम्, एतस्योपरि पदं निधायैव समागन्तव्यं श्रीमता। ध्वस्यतां कामं कृत्रिमदुर्गमिदम्। बुन्दीवसुन्धराया हाडाजातीयस्तुच्छोऽयं सेवकः प्रतीक्षते प्रभोः प्रत्यास्कन्दनमिदम्।' परिणामः समघटत यत्कुम्भस्तत्सहायकाश्च सर्वे युद्ध्वा तत्रैव धराशायिनोऽभवन्। तेषां शवानुल्लङ्घ्यैव चित्रकूटेश्वरः प्राविशत्कृत्रिमदुर्गम्।

चित्रकूटेश्वरः प्रतिज्ञां संरक्ष्य पानीयमवश्यमपिबत् भोजनं चाप्यसङ्कोचमगृह्णात्, किन्तु रणस्तम्भस्य कुम्भस्य तत्सहचाराणां चासाधरणीं वीरतां, मातृभूमेरतुलितां भक्ति, राजन्यमानमार्यादारक्षणाय प्राणानामप्युत्सर्गं च दृष्ट्वा स्वान्ते स हि सुभृशं समकुचत्। साक्षाद् बुन्दीदुर्गविजयाय नाकरोदसौ दुःसाहसम्, अत एवाद्यापि बुन्दी सेयं न बुन्दीकृतजा राणावंशजैः।

वीरवर कुम्भ! सम्भावनीयोऽसि सर्वथा सर्वजगताम्। धन्या च ते मातृभूमेर्भक्तिः। यदि त्वादृशाः स्वार्थत्यागिनः स्वाभिमानिनश्च राजन्यवीरा नाऽभविष्यंस्तर्हि राजपुत्रप्रदेशे नैतावतीनां राजधानीनां दर्शनमभविष्यत्। क्रीडाकौतुकेऽपि यः स्वदेशस्य स्वजातेः स्वमातृभूमेश्चपमानं

गौरवक्षतिं वा न सहते, प्राणान् प्रदायाऽपि यो मातृभूमेर्मर्यादामभिपालयति, स एव तस्याः स्वाम्यमुपलब्धुं सत्यो ह्यधिकारी नूनम्।

## वीरवाणी

### ( १ )

'गृह्णीत, खण्डशः कुरुत, हिन्दूनां कूपे निपातयत' इत्यादिघोरकलकलैर्गगनतलमाकुलयन्तः कियन्तः सशस्त्राः पुरुषा येषु केषाञ्चन करे वंशयष्टयः केषाञ्चन करे लगुडाः केषाञ्चन छुरिकाः केषाञ्चिच्च खड्गा आसन्नेकस्य साधोरुपरि पर्यापतन। सर्वेऽप्यासन्मोगलाः। दीनस्यैकस्य विरागिणो निग्रहणं बलान्निबर्हणं च तैर्निजपुरुषार्थ एव किम् स्वधर्मनेतर्णिामादेशानुसारं पुण्यकार्यं बत पर्यगण्यत। विवशो विरागी महता कौशलेन निजहस्तदण्डं परिभ्रमयन्नात्मरक्षायै पर्यचेष्टिष्ट।

सुरतनगरे राजरथ्यायां विपणीनां सम्मुख एव तदिदम ब्रह्मण्यमारभ्यत। तया रथ्यया गच्छन्नेको गौराङ्गः कलकलमिममाकर्ण्य कौतुकवशः सहचराभ्यां सह जनसम्मर्दमिमं कठिनतया विच्छिद्याभ्यन्तरं प्राविशत्। दृष्टं तेन– दृढशरीरसन्धेर्भस्मावृतवपुषः साधोरेकस्योपरि सर्वेऽपि यवना युगपदाक्रमणमकार्षुः। स च केवलमेकेन लघुलगुडेन निजप्राणरक्षायाः प्रयत्नं यथाकथञ्चिदाचरतीति। चत्वारिंशत्पञ्चाशन्मुगला निःशस्त्रमेकं पुरुषमाक्रमन्, निजयष्टीनां प्रहारैः प्रापीडयन्, कियद्वा कोऽपि वराको रक्षायै विचेष्टेत? कोऽपि पाषाणमक्षिपत् तर्हि कश्चिद् गोमयं वा मार्गस्थमवकरनिकरं वा प्रक्षिपन् प्रादर्शयन्निजतवीरताम्। अन्यो ह्यसभ्यैर्दुरुक्तैरेव निजमानसमतर्पयत्। विषमायामस्यां दशायां वराको विरागी कियन्तं कालं वा निजात्मानं गोपायेत्? अकस्मादेकस्य पाषाणप्रहारस्तस्य ललाटाल्लोहितं प्रावाहयत्। यथैव तन्निरोद्धं स हि द्वाभ्यां कराभ्यां मस्तकमगृह्णात्तथैवान्यमहावीरस्य यष्टिस्तस्य शिरस्यपतत्। प्राघूर्णतः साम्प्रतं साधोः शिरः। स हि विसंज्ञो भूत्वा भूमौ न्यपप्तत्।

निजपराक्रमेण प्रफुल्लाः सर्वे मृतमपि पुनर्मारयितुमधावन् वीरविक्रमेण। किन्तु साक्षात्तस्मिन्नेव समये गौराङ्ग एकः पर्यापतत्तस्मिन् स्थले। तस्य हृदयमनौचित्येन मानवोचितदयाभावेन चाद्रवत्। सरभसमेष निजसहचरयोः साहाय्येन विरागिणमिममनयत्

स्थानान्तरम्। सक्रोधातिशयमाक्रमन्मोगलास्तमेनमपि, किन्तु गौराङ्गस्य तत्सहचरयोश्च हस्ते सज्जान्यासन् नलिकास्त्राणि। द्वित्राणां गुलिकानामुपायनेनैव सर्वेषां वीरता विजहार व्योममण्डले।

संज्ञामुपलभ्यैव साधुरयमुदतिष्ठत्। दृष्टं तेन– एकोऽपरिचितो गौराङ्गो निजसहचरयोः साहाय्येन क्षतस्थाने पटमाबध्य मे सेवां करोतीति। विरागी पूर्णया कृतज्ञतया तस्योपकारभारममन्यत समभाषत च सस्नेहम्– 'वीर किं तत्र भवतो नाम? अद्य यस्त्वं मे प्राणानरक्षीर्नैममुपकारमहं कदाचिदपि विस्मर्तास्मि। भारतीया मनस्विनो निजोपकारमपकारं वा चिराय हृत्पटलेऽङ्कयन्ति न विस्मरन्ति चादेहपातं तत्प्रतिशोधं नूनम्। सप्ताहाभ्यन्तर एवास्य प्रमाणं प्राप्ता भवान्'। एतावदुक्त्वा पुनरपृच्छत्तस्य फिरङ्गस्य नामधेयं साधुः। महता स्नेहेन च तद्धस्तं संस्पृश्य यथागतं गच्छन् नेत्रयोरन्तरितो बभूव।

जॉन रो महोदयो (गौराङ्गः) विस्मयस्तिमितः स्थूणेव तस्थौ तथावस्थ एव। व्यचारयच्चेतसि– 'अहो कोऽयं पुरुषः? यस्याधिकारसूचिका वाणी सहसैवाऽऽनमयतीवा–ऽपरिचितस्यापि गौरवान्मस्तकम्। स्वरेऽस्य स्वामिता, नेत्रयोरसाधारणं तेजः, शरीरे च शार्दूलस्येव शक्तिवहं शौर्यम्। हस्तस्पर्श एव वज्र कठोरो घोषयतीवास्य महावीरताम्।' एवमादि चेतस्यावर्तयन्नेवासौ परावर्तिष्ट निजनिवासस्थानम्।

## ( २ )

द्विशतसार्द्धद्विशतवर्षेभ्यः प्राक्तनी सेयं कथा। अद्येव नासीद्भारते सर्वतन्त्रस्वतन्त्र–मेकच्छत्रं गौराङ्गणामाधिपत्यम्। अभून्मोगलानामन्तिमं शासनं यद्धि अस्तमुपयास्यतो भास्वतो लोहितायमानः प्रकाश इव स्वस्यासूचयत्पतनोन्मुखताम्। सुरतनगरे चतुःपञ्चाः फिरङ्गा व्यापाराय निजनिवासमकल्पयन्। अलक्ष्यत तदा तत्परिस्थितिर्नितरां निराशाजनिका। फिरङ्गीत्यङ्गीकृत–ख्यातयस्ते व्यवसायमालम्ब्य देशे शनैः प्रवृत्तिमलभन्त। व्यापारमन्तरा नासीत्तेषां कश्चिदन्यो नियोगो देशे। यदि कश्चिन्मोगलस्तान्पर्यपीडयत् हानिमापादयत्तदापि नासीत्कोऽपि तेषां विशिष्य संरक्षकः। अभियोगे समुपस्थापितेऽपि मोगलराजशासनान्नासीन् न्यायप्राप्तेः प्रत्याशा तेषाम्। अत एव निभृतं निजकार्ये निलीनास्ते शनैः शनैरितस्ततः प्रसृतेर्निजसमुन्नतेश्च मार्गमध्यारो–हन्नात्मनैव।

पूर्वसंघटिता घटना घोरमुदघाटयत्सङ्घर्षं यतस्ततः संघटमानेषु मुसलमानेषु। अङ्कोपगतस्यापि धर्मविद्रोहिणस्तदेवंप्रकारेण विमुक्तिं ते दैवदुर्भुक्तिमभावयन्। एवंविधेनापयशःपावकेन समधिकमदह्यत मोसलमानानामखिलानां हृदयम्। दोषभागिनो विरागिणो ह्यनुचितसाहाय्यप्रदानापराधे 'जॉनरो' महोदयः समभूत्तेषां कोपभाजनं नूनम्।

व्यत्यगुश्चतुःपञ्चान्यहानि घटनायाः पूर्वोक्तायाः। आसीत्सन्ध्यासमयः। जॉनरोमहोदयः समस्तमपि दिवसं निजव्यवसाकार्यमापूर्य साम्प्रतं प्रयाति स्म विश्रमाय निजनिवासम्। एतस्मिन्नेव समये पत्रखण्डमेकं करे वहन् शिशुरेकः समाययौ सम्मुखे, पत्रञ्च तन्निभृतं निधाय निलीनोऽभूदितस्ततः। जॉनरो पत्रमिदमुदघाटयत्। आसील्लिखितम्– 'अद्य निशीथे भवेद्भवदुपर्याक्रमणम्। सर्वोऽपि च व्यवसायवस्तुसंघातः सन्दाह्येतं पावकेन। भाव्यमवहितेन

भवता। कश्चिद् हितचिन्तकः'। रो महोदयः पर्यकम्पत भयेन। स ह्यापणानां द्वाराणि दृढार्गलैर्दृढीचकार। प्रचुरपुरस्कारेण निजभृत्यानन्यानपि सहायकानद्य रात्रावानेतुं न्ययुङ्क्त्व नैपुण्येन। सशस्त्रान् परिचारकान् परितः प्राहरिककार्यं कर्तुमादिशन्महताऽवधानेन। यावच्छक्यमेवमनुष्ठाय निजरक्षोपायान् स हि साशङ्कं प्रत्यैक्षिष्ठ परिपन्थिनां पन्थानमागमनस्य।

उपातिष्ठतार्द्धरात्रः। सहसैव परितः कोलाहलः प्रसृतः-समाययुर्वैरिण इति। 'दीन-दीन' इति दारुणदुर्वारः समश्रूयत सर्वतः संरावः। अङ्ग्रेजाः शस्त्राण्युत्तोल्य समनह्यन्त सर्वथा। सत्यं सत्यमकुर्वन्नाक्रमणं पशुबलेन मोहम्मदाः। 'रो साहबः' तत्सहचराश्च महता साहसेन समयुण्यन्ताततायिभिः। किन्तु पर्यन्ते पर्यलभन्त ते पराभवम्, आसन्नपरिमिताः परिपन्थिनः। विजयगर्वितैररातिभिः सानन्दं बन्दीकृता गौराङ्गाः परतन्त्रतया पर्यालोकन्त परिलुण्ठनं निजनेत्राभ्याम्। विजयकोलाहलमाचरन्तो द्विषन्तो विपणीनामग्रत एव शुष्ककाष्ठान्याहरन्नितस्ततः पर्यदीप्यत पावकस्तस्मिन् काष्ठकूटे। रोमहाशयो निगडितहस्तपदतया विवशीकृतो निजनयनाभ्यामभ्यालोकिष्ट निजसर्वस्वस्य लुण्ठनं पावके परिदहनं च। शोकामर्षाभ्यामभ्यामर्दितः स नैतद्विलोकयितुमपारयत्, पर्यमीलयल्लोचने विवशम्।

इतो वह्निं प्रदीप्य द्विगुणीभूतमदा मोहम्मदाः प्रकामं पर्यतुष्यन् यदिदानीं न केवलं फिरङ्गिणां धन भवनाद्येव, अपि तु गौराङ्गाणाममीषामङ्गान्यपि प्रज्वलज्ज्वलने समर्प्य सर्वदार्थमेतेषां नाम निःशेषीकरिष्यामः। गृहपरिसरे पावकप्रदानस्य पर्यशिष्यन्त पलाः कतिचिदेव। एतस्मिन्नेव समये समुदतिष्ठद् दूर एव गगनमण्डलमागुञ्जयन् भयङ्करकोलाहलो यत्र 'हर हर महादेव' इति दुर्मदो ध्वनिः परितः प्रासरत्परिसरे तस्मिन्। समभूवन् सर्वेऽपि चकिताः। व्यलोक्यत तैर्यत् नगरप्रान्तान्महाभयानकाः पावकज्वालाः संस्पृशन्तीवान्तरिक्षं सर्वतः। आसीत्सा तामसी रात्रिः, अत एव प्रकाशेनानेन प्रादीप्यत निखिलं नगरं सर्वतः।

हरहरमहादेवेति दुर्मदध्वनिना विद्रुतहृदया यवनाः पलायन्त पलाभ्यन्तर एव सर्वतः। हस्तपतितस्य फिरङ्गिणोऽपि पर्यनुसन्धानं नैतैरक्रियत परावर्त्य मुखम्। किन्तु ततः सर्वमपि सूरतनगरं परितः पर्यवेष्ट्यत पर्यलुण्ठ्यत पर्यज्वाल्यत ज्वालाभिः प्रज्वलज्ज्वलनस्य। दह्यमानान् गृहापणानालोकयन्तः प्रशान्तीभूतमदाः प्रचक्रुर्माहम्मदा दीनार्तरवं यतस्ततः सर्वतोऽपि।

पलायितेषु परिपन्थिषु प्राप्तविमोक्षो रो महोदयः शीघ्रमेव प्रायतिष्ट पावकशमनाय निजसहचराणां साहाय्येन। आसीदधुनापि तस्य भयं यदिदानीमपि नावलुण्ठेयुर्धनभवनादिकं दस्यवोऽमी। अस्मिन् भयङ्करे व्यतिकरे धीरो गम्भीरश्चाश्रयत वीररवः- 'जॉनरो महोदयः क्वास्ति?' इति। स्वरोऽयं पूर्वपरिचित इव प्रतीतोऽभूद् रोममहोदयस्य। वदनं परावर्त्य विलोकितं तेन यन्महान्तं मेचकमश्वमारूढः श्वेतोज्ज्वलदिव्यवसनो महाराष्ट्रवीर एकः स्थितोऽस्ति। मुखेऽस्य मधुरमन्दस्मितेन सह संविराजते राजतेजोऽप्यनुपमम्। अन्तःकरणाद्धीरता गम्भीरता च, प्रत्येकमङ्गतश्च वज्रशरीरता वीरता चाऽनक्षरं समलक्ष्यत। विस्मयाविष्टः साहवः- 'आम्, एष एवास्ति जनो जॉनरोनामा। किन्तु श्रीमन्तं केन परिचयेन समर्हयामि?'

मधुरमहसीदश्वारोहः प्रावदच्च- ''एकवारमभूदावयोः समागमो नगरेऽस्मिन्, किन्तु

तदा सोऽहमासं संसारत्यागी विरागी, साम्प्रतं चास्मि कोङ्कणमण्डलस्यैको राजाऽध्यारूढवाजी शिवाजी। मन्येऽहं न विस्मरेन्मत्समीरितां वाणीं तत्र भवान् यद्भारतीया न विस्मरन्त्युपकारमपकारं वा स्वस्य कृतं केनचिद्, विशेषतश्च महाराष्ट्रीया इति। अत एव प्रत्यक्षमालोकतां भवानालोके यत्सर्वस्य नगरस्य सर्वतः प्रलुण्ठने प्रज्वलने चाऽपि भवान् सर्वथा सुरक्षितस्तिष्ठतीति। यैराततायिभिः पूर्वापरमनवेक्ष्य, योगयायोग्यमसमीक्ष्य साधुसज्जनैः साकमत्याचारः प्रारभ्यत तस्य प्रतिशोधो मध्येरथ्यमद्य मयाऽनुष्ठितः संघोषितश्च भारतीयवीराणामनादिप्रचलितोऽनुभावः। एवमपकारस्य प्रतीकारमारचय्य उपकारस्य कृते यत्किञ्चिदुपहारः सोऽयं साम्प्रतं मे प्रदेयोऽस्ति। स्वीक्रियताम् कृपया।'' इत्याभाष्य महामूल्यहीरकजटितमङ्गुलीयमेकं जानरोमहोदयाय सस्मितौदार्यं समार्पिपन्महासमरधीरः शिवराजवीरः।

(१८)

विस्मयेन प्रमोदेन कार्तज्ञ्येन परितोषेण च प्रचुरं पुलकितः फिरङ्गपुङ्गवः सादरविनयमगृह्णादुपायनमिदम्, प्राणंसीच्च निजदेशपद्धत्या तमेनमत्यादरेण। सप्रमोदपुलकमयमभावयन्मनसि- अद्यावधि कर्णाभ्यामाकर्णितः सोऽयं महाराष्ट्रवीरः प्रत्यक्षमालक्षितोऽद्य नेत्राभ्यामिति सत्यमातृप्तोऽस्मि। शौर्ये यथायं वज्रपाणिस्तथा सुदृढाऽस्य नूनं 'वीरवाणी'ति सत्यं सत्यम्।

## प्राणानां भाषा

'पद्मदल' राजधानी सत्यं पद्मदलमिव। एषा हि प्राकृतिकसौन्दर्ये सर्वतोऽप्यतुल्यायाः (महानद) कुल्यायास्तटे समवस्थिता। कुल्या च सेयं वङ्ग-कलिङ्गयोरङ्गसन्धात्री धात्रीव दूरदूरग्रामाणाम्। न च केवलमियं कुल्या कृषेरुपकारायैव, व्यवसाय-वाणिज्ययोरपि प्रभूतमुपयोगिनी सेयम्। महान्तोऽग्निपोता विशालास्तरणयोऽनेका नौकाश्च प्रवहन्त्यस्याम्। 'पद्मदल'- भूम्यधिकारिणो नरेन्द्रचन्द्रस्य विलासतरणयो भ्रमणनौकाः प्रवाहिकपोताश्चानेके राजधान्यास्तटे कुल्यायामाबद्धाः सन्ति।

ज्येष्ठो मासः। अस्तमुपगच्छता भास्वता प्रकामशीतलीकृतस्तटप्रदेशः। ततोऽपि प्रवहता मलयमरुता सर्वोऽप्युत्तापः प्रशममुपनीतः। नरेन्द्रचन्द्रस्य प्रासादशिखरेषु विश्राम्यन्त्यो मार्तण्डमरीचयश्चामीकरकलशकान्तिभिरखिलमिमं प्रदेशं स्वर्णमयमापादयामासुः। राज्ञो विलासवापिकासु म्लानमुखाः कमलिन्यो मन्दमन्दमवनमयाञ्चक्रुर्नयननलिनानि। कालिदासभाषया परिणामरमणीयेऽस्मिन्दिवसे पद्मदलाधीशो नरेन्द्रचन्द्रो निर्जगाम बहिहर्म्यमालातः।

स्वच्छविशदं सूक्ष्मसुभगं गुल्फावलम्बि परिकुञ्चितं धौतम्। उपरि महामूल्यमतिमञ्जुलं कौशेय कमीजम्। कमलजैत्रयोर्नेत्रयोः सौवर्णमुपनेत्रम्, पादयोः कारुकार्यखचिते कोमलोपानहौ परिदधत् परिवार्यते स्म सवयोभिर्विहारसचिवैः।

विभवविशालाया हर्म्यमालायास्तिस्रः कक्ष्याः। मार्गमुभयतो हरितहरितानि दूर्वास्थलानि, अन्तरान्तरा जलयन्त्रसुभगानि कमलसरांसि। रथ्यायाः पार्श्वद्वये कटिदघ्नभित्तिकल्पा निबिडघना वृक्षराजिः। दूराल्लक्ष्यवृक्षच्छटानां निष्कुटानां मध्यतः समुपागच्छन् मल्लिकामालतीपाटलादीनां बहलः परिमलः। यथैव

प्रथमकक्ष्यायामुपागमन्नरेन्द्रस्तथैव स्वस्वास्थानमण्डपान्नि:सृत्य सविनयप्रणामपर्यस्ताञ्जलय: सचिवास्तमनुजग्मु: सम्भ्रमेण। करपरिगृहीतसेवोपकरणा राजपरिचारका: पङ्क्तिबन्धेनानुसस्रु: स्वामिनम्। यस्यां यस्यां कक्ष्यायामुपागमन्नरेश्वरस्त-स्यास्तस्या: सेवकसैनिका: खड्गमुत्तोल्य दक्षिणकरेण प्रणोमुर्भूमिपतिम्। सस्मितवदनेन सेवकानभिनन्दयन् तृतीयकक्ष्याद्वारोपगतां विशालपरिखां सुभगसेतुना समुल्लङ्घ्यसमुपाग-च्छत्कुल्यातटं सपरिकर: पद्मदलेश्वर:।

तटमुपगतवत्येव राज्ञि धूमपोत- विलासतरणि-नौका-द्रोणिकोडुपादीनां सर्वेऽपि परिचालका: पङ्क्तिमाबध्य करशिर:स्पर्शेन सविभ्रममानेमुर्भूपालम्। राजा तु सुप्रसन्नदृष्ट्यैव सर्वान् परितोषयन् वैदेशिकप्रकारेण प्रसाधितां विहारतरिमारुह्य स्वकरे क्षेपणीं गृह्णन्निषसाद परिचालकासने। राज्ञो मनोरञ्जनायैव पालिता: प्रपुष्टभुजदण्डा नौकादण्डान्परिगृह्य पृष्ठवर्तिषु परिचालकासनेषु विहारसचिवा अपि निषेदु:। नाविका: पृथगवतस्थिरे। जले यथैव नृप-नौरनुधावेत्तया सह स्थले स्थले राज्ञ: सेवायामनुधावितुं सेवकसैनिका: शरीररक्षकाश्च बबन्धुर्निजपरिकरम्। नीरे नौश्चचाल तीरे तया सह सैनिका: पर्यधावन्।

इत: क्रोशार्द्धे शक्तिपुरग्राम:। तत्र विश्वम्भरभट्टाचार्यस्य निवास:। दृष्टं तेन यत्कतिपयदिनेभ्यो नावमाधिरुह्य वायुसेवनार्थमित एव समागच्छति नृप:। अद्य किञ्चिद्विचार्य निजग्रामस्य सम्मुखे वेलातटोपरि स्थितोऽसौ नृपतिं प्रतीक्षते। तटे धावन्तोऽपि सैनिका: कियद्दूरमेव नौकया सह शक्नुवन्ति धावितुम्। दशदशमल्लै: प्रचण्डै: क्षेपणीदण्डैरभिहता तरणिर्विशिखवेगमभिधावति। तामेनामनुधावन्त: स्वल्प एवान्तरे पृष्ठगा भवन्ति नृपसैनिका:। तरणिस्त्वग्रेऽभिधावति।

यदा शक्तिपुरसम्मुखं प्राप तरणिस्तदा नृपनौकात: पृष्ठवर्तिनोऽभूवन्सैनिका:। विश्वम्भरो भूपतिप्रतीक्षायामासीदेव। नौकां कियद्दूरे दृष्ट्वैव स विचित्रप्रकारकमेकं मुखध्वनिं तारतरं चक्रे येन राज्ञोऽवधानं तत: समाकृष्टमभूत्। यथैव राजा तं विलोकयाञ्चक्रे तथैव स राजानमुद्दिश्य गगनेऽङ्गुल्या विलिलेख। जठरं प्रपीड्य हस्तेन मुखे भोजनचेष्टामिव चक्रे। ततो द्वावपि हस्तौ प्रकम्प्य निषेधमुद्रामिव प्रदर्शयामास।

राजा कुतुकेन निनिमेषमिदं ददर्श। शनै: क्षेपणीं दातुमादिशत्। परिवृत्त्य च दृष्टं यत्परिचारकसैनिकादूरे सन्ति। सम्प्रति नौ: शनै: प्रावहत्। विश्वम्भरो नौकाया: पृष्ठतो जठरं दर्शयन् सह पलायाञ्चक्रे। राजा यदा हि पृष्ठत: सैनिकानवलुलोके तदा पूर्वं विश्वम्भरो मुद्रामिमां दर्शयन् दृग्गोचरोऽभूत्। कुल्यातटेऽन्येऽपि यातायातं चक्रु:। विश्वम्भरस्य चेष्टामिमामालोकयन्तस्ते परिजहसु:। सम्प्रति तरणेर्गतिमन्दतमामालोक्य सैनिकास्त्वरितं दुद्रुवु:। समीपमागत्य स्पष्टं दृष्टं तैर्यदेकोऽपरिचितो राज्ञा साकमविनयमाचरति। राज्ञो भावजिज्ञासया विलोकयामासुस्तं प्रति सैनिका:। ददौ शिर:सङ्केतं नरपति:। सैनिका विश्वम्भरं परिवार्य परित: प्रजह्रु:। नौका च तत एव पद्मदलं पराववृते।

परिचारकैर्या मुद्रा विश्वम्भरस्यावलोकितास्तासामर्थावबोधने नासीत्तेषां विलम्बः। तं दण्डैर्मुष्टिभिश्च प्रहरन्तस्ते भर्त्सयाञ्चक्रुः– 'कथं रे! अस्माकं महाराजः प्रजानां मुखं बलान्मुद्रयति? उदरं रिक्तीकृत्य ताः प्रपीडयति? अङ्गुल्या परलोकभयं दर्शयसि?' पादौ दण्डैराहत्य हस्तौ च यष्टिमुखैश्चूर्णीकृत्य सैनिकाः परावर्तन्त। वेदनया विह्वलो विश्वम्भरस्तत्रैव निपपात। सोऽयममङ्गलसंवादो विश्वम्भरगृहे प्राप। दीनस्याऽस्य पत्नी बालविधवां किशोरीं दुहितरं, बालौ द्वौ पुत्रौ चादाय रुदती त्वरितमुपागात्कुल्यातटे। अन्येऽपि ग्रामजनाः समाययुः। आहतं विश्वम्भरमादाय ग्राममानिन्युः। खट्वामधिशाय्य आहतस्थानेषु हरिद्रया चूर्णेन च प्रालिपन्। राज्ञो गुप्तचराश्छद्मवेषेणेतस्ततः संवादं जगृहुः।

ग्रामवासिनो नृशंसव्यवहारेणाऽनेन भृशं राज्ञे चुक्रुषुः, परं राज्ञः प्रबलप्रतापेनाक्रान्ता न किमप्यशकन्कर्तुम्। राज्ञो विरोधापेक्षया ब्राह्मणस्य सेवा–साहाय्यमेव सममन्यन्त समुचितम्।

विश्वम्भरः सरलः सत्यो ब्राह्मणः। नाधिकमसौ विद्वान्। देवपूजां केवलं जानाति। शक्तिपुरग्रामात्क्रोशत्रयान्तराले रङ्गनगरम्। तत्र राज्यस्य विशालाक्षी देवी। एतस्या एव पूजको विश्वम्भरः। मुद्रात्रयं मासिकवेतनं, प्रत्यहं पादोनप्रस्थमितान् तण्डुलान् चत्वारि कदलीफलानि च प्राप्नोति पूजार्थं राज्यात्। गृहे भोक्तारः पञ्च मनुष्याः। कथञ्चिदतिकष्टेन निरवहत्। इतो विंशतिमासा व्यत्ययुः, न लब्धमनेन वेतनम्। पादोनप्रस्थमिताः शालयः केवलमाश्रयः। अवसरे लब्धे स्वयं, पत्नी चापि शारीरिकं परिश्रमं कुरुते, तथापि यथावन्नाभून्निर्वाहः। विश्वम्भरो वेतनप्राप्त्यर्थं वत्सरद्वयेऽस्मिन् प्रददौ विंशतिप्रार्थनापत्राणि परं न कश्चिदशृणोत्। इदानीमवसरं लब्ध्वा प्राणानां भाषया हृदयभावं प्रकटयदसौ राज्ञः सम्मुखे। गगने अङ्गुल्या प्रक्षुद्य असूचयत्– 'लिखित्वा भवते सूचितवानस्मी'ति। उदरं प्रमर्द्य दर्शितवान् 'क्षुधया व्याकुलोऽस्मि'। कपोलयोर्हस्तचेष्टा 'मुखे भोजनं वाञ्छामीति', हस्तौ प्रकम्प्य निषेधचेष्टया 'भवन्तं विहाय नान्यो ममाधरः' इति सुस्पष्टमसूचयत्। हृदयस्पर्शिन्या हृदयभाषया सुस्फुटं प्रार्थनेऽपि राजा निजापमानं बुबुधे। सैनिका अर्थान्तरं विविदुः।

(१९)

गुप्तचरैः सूचितं राज्ञे-शक्तिपुरे सन्ति राजविद्रोहिणः। तैर्विश्वम्भरं मुग्धं विदित्वा तद्द्वारा श्रीमतः सोऽयमवमानो विहितः। विश्वम्भरो विद्रोहिभिर्धनप्रलोभनाद्वशीकृतः। तत एव पारम्परिकं राजाश्रयं विगणितवान्।

दिनेषु गच्छत्सु विश्वम्भरस्याघातव्रणः पुरे, परं हृदयव्रणो दुष्पूरः समजायत। राज्यादाज्ञापत्रं प्राप्तम्- 'देवपूजायां नास्ति साम्प्रतं भवदपेक्षा राज्यस्य'।

## विजयिघण्टा

### (१)

कलिङ्गदेशवासिभिर्धैर्येण सोऽयं समाकर्णितः सन्देशो यन्महतीं चमूं समाकर्षन् युवकः सम्राडशोकस्तानाचस्कन्द। किमिति कल्पितवानाक्रमणम्? शान्तदेशोपरि, निरपराध-मानवसङ्घोपरि, सम्राडशोकः प्रज्वलद्वह्विवर्षणाय तप्तलोहलम्बनाय च किमिति कठोरमाचचार विचारम्?

उत्तरम्-साम्राज्यवादस्य निर्निरोधप्रसाराय। मानवोऽयमीदृशो लोलुपः प्रमत्तो वा प्राणी यत्सन्तोषो वा प्रशान्तिर्वा न तस्य समीपमप्युपसर्पति। प्रत्येकनरे नरेश्वरताकामना निसर्गतः प्रबला। प्रत्येकनरेश्वरेप्यात्मनः परमेश्वरंमन्यता नितान्तमुत्सर्पिणी। स हि बलादितरान्मनुष्यानात्मानं परमेश्वरं मानयितुं विवशीकरोति। मन्ये मानवचर्यायामेव मदो जृम्भते। मदे एव च सत्यमनृतं वाऽस्ति। सत्ये अनृते एव च संसारस्य माया मोहो वा प्रबलायते। मायायां मोहे एव च विविधाकारा जगतो व्यतिकराः क्रीडन्ति। एभ्यश्च मानवतामदसत्यानृतमायामोहव्यतिकरेभ्यो नास्त्येकोऽपि सुरक्षितः।

संसारस्यास्य मिथ्याभूतमेकमंशं कलिङ्गं सत्यं भावयित्वा महान् सम्राडयमशोकश्चकार तस्योपर्याक्रमणम्। मिथ्याभूतमिमं देशं सङ्कटे संप्रेक्ष्य सत्यमिति भावनया कलिङ्गदेशवासिभिः सोऽयं वक्षसि समालिङ्गितः। कथमिव? यथा वानरी मृतमपि शिशुं वक्षसा संवहति। ते हि परमं प्रबलस्य सम्राजः कालवाहिन्या लोहमासञ्जयितुम् मातृभूमेर्मर्यादामारक्षितुं च निबद्धवन्तः सुदृढं परिकरम्।

कलिङ्गदेशस्य कोणात्कोणात् युद्धं युद्धमिति प्रारेभे प्रबलः कोलाहलः। देशस्य बुद्धा युवका बालका महिलाश्चापि रणनिमन्त्रणे भागं ग्रहीतुमभूवन् सर्वतः सज्जाः। ये यत्किञ्चिदपि सङ्कल्पविकल्पमकल्पयन्नितस्ततः, प्राणानां ममता वा यान् समाकर्षत्पश्चात्पदं

तान् कलिङ्गदेशस्य दार्शनिकाः कवयश्च वीरोपदेशैरोजस्विभिश्छन्दोभिश्च निर्मितवन्तो नितान्तं मदोन्मत्तान् रणरसिकान्।

वैज्ञानिका ह्यनभिज्ञान् समबोधयन्– 'देहोऽयं क्षणभङ्गुरः। भये भूताः निर्भयतायां च निखिलेश्वरो भगवान्निवसति। प्रेतास्तिमिरमयाः भगवाँश्च निर्भरः प्रकाशः। विना प्रकाशं यथा छायाः समाच्छन्ना भवन्ति तथा भगवतः प्रसङ्गमात्रेण भूतपिशाचाः पलायन्ते। कवयः समघोषयन्– 'उत्तिष्ठ, निष्ठुरमागृहाण शस्त्रम्। कलितकलिङ्गदेशवासिन् युवक! देशोपरि ते विदेशात्थिता दस्यवो राज्यमास्थापयितुमागच्छन्ति। अयमशोकोऽस्माकं कृते तथैव विदेशी यथा हूणाः। यो हि निःसङ्गमानवस्य समाच्छिनत्ति स्वातन्त्र्यम्, अपि भवेत्सोऽयं स्वदेशवासी, समर्हणीयोऽयमार्यो वा?'

कलिङ्गवासिवीराः! धत्त धनुषि सायकम्। निर्भयं निबोधयत मागधमूर्खान् यत्र कालिङ्गाः शाका मूलका वा यान् पशवो निःशङ्कमश्नीयुर्निर्भरं च जरयेयुः। ये हि वः परतन्त्रान् दासांश्च चिकीर्षन्ति तेषां जनकान् पालकांश्चापि निर्भरं निर्दलयत। परतन्त्रता निरयः, स्वतन्त्रता स्वर्गः। दासता मृत्युः, स्वच्छन्दता चिरममरता। अयि वीराः वीरगर्जनया परितो ध्वनयत जनन्या जन्मभूमेर्विजयम्। दस्यूनिमान् लोहितेन स्नपयन्तः सर्वथा सम्बोधयत यद् भवद्भिस्तादृश्या मातुः स्तन्यमापीतं यस्य परिणामाद् भवदस्थीनि स्नायवश्च वज्राणीव!

किमासीदधुना! सर्वोऽपि कलिङ्गः समालिङ्गदेकताम्। परितोऽपि मागधसेनामसौ समावेष्टितवान्। प्रारेभे नितान्तं तुमुलयुद्धम्।

## ( २ )

समयेऽस्मिन् भारतवर्षम्, तस्यैकैकोऽपि प्रदेशः, स्वतन्त्रताया मूल्यं सम्यगवैति स्म। युद्धे तनं विसृजन्तः साम्प्रतमपि साम्प्रतमपि सम्मन्यन्ते वीराः, किन्तु वीरगतेः समादरस्तादृशो नास्ति साम्प्रतमस्मिन् देशे, यादृशः समभूत्तस्मिन् काले यस्य प्रभावादितिहासपत्त्रेष्वद्यावध्यपि गुणगानमक्षुण्णं समेधते। भवतु यत्किमपि। अशोकस्य मागधवीराः कालिङ्गवीरेषु शलभपातमपतन्, किन्तु कीलितलोहलेखेव कालिङ्गवीरराजिरचला समवास्थित। अशोको विकटवह्निवर्षामकरोत्, मागधभटाः कालिङ्गानां शिरसि निशितनाराचवर्षणमकुर्वन् परं कलिङ्गवासिनो दृढतया निर्भयमतिष्ठन्, मन्ये हिमालयः। कति लक्षाणि कालिङ्गा देशभक्ताः स्वेष्टदेवस्य कृते मातृभूमेः पूजायै च चिराय समरशय्यामध्यशेरत। सहस्रसहस्राण्याततायिनो मागधभटा वीरगतिमवाप्नुवन् परमद्यापि सम्राडशोको नेदं स्थिरीकर्तुमशकद् यद्भीषणसमरेऽस्मिन् जयलक्ष्मीः कस्मिन्पक्षे विश्राम्येत्।

बहून्मासान् लोमहर्षणं लोहवर्षणं चेदं महायुद्धमचलत् किन्तु कलिङ्गदेशोपरि मानवती मागधसेना नात्मनो विजयपताकां प्रस्फोरयितुमपारयत्। 'समरेऽस्मिन् विजयाऽवाप्तेरत्यन्त-मावश्यकता' सम्राणमन्त्रिमण्डलस्य सविधे मन्त्रणामकरोत्। 'कठिनमतिकठिनं धर्मावतार'! प्रावददेको मन्त्री–पञ्चाशत्सहस्त्रकालिङ्गेषु समरशायिष्वपि न ते पश्चात्पदा भवितुमीहन्ते।'

'सत्येमतद्देशस्य लोका वीरहृदया: सन्ति, मन्त्रिमहोदया: !' अशोक: सत्यस्य रक्षामकरोत्– 'एवंवीरैरायोधने एव समरवसन्तोत्सवसुषमा विजृम्भते। अहह! मण्डलाग्राणां वर्णगोलका:, लोहितस्य यन्त्रजनानि, मुण्डानां भैरवगानं रुण्डानां ताण्डवतोलदानं चात्रैव गोचरीभवति। कालिङ्गानां सङ्ग्रामे मे प्रसीदतो बाहू।' किन्तु सेयमभूद्वैरिणो गुणप्रशंसा, सम्प्रति निजदुर्गुणानां निन्दनमप्यावश्यकम्। 'एतावत्कालात् मौर्यमहासाम्राज्यस्य समवेता महाचमूरेकतमं क्षुद्रदेशं न पराजेतुमशक्नोदिति लज्जाजलनिमज्जनस्य कथा।' प्रावादीदिमशोक:।

'सम्प्रति वयमधिकं स्थिरीभूय संघीभूय च योत्स्यामहे'

'स्थिरीभूय चञ्चलीभूय वा, संघीभूय वियुक्तीभूय वा येन केनापि रूपेण कालिङ्गास्त इमे पराजेतव्या: स्यु:। अन्यथा समग्रोऽपि संसार: सम्मानेऽस्माकं निष्ठीवेत्। अहह सम्राडशोकस्य मागधी महासेना क्षुद्रस्यैकस्य देशस्य मुष्टिमेयेभ्यो मन्दमनुष्येभ्यो निर्भरं पराजीयत। पराजयादेवंविधान्मृत्युरेव वरम्।'

## ( ३ )

'जयोऽस्तु महासम्राज:, वैशाल्या महापुरोहितेन विजयिनी सेयं मन्त्रघण्टा सानुकूलशकुनमभिप्रहिता। एतस्या: स्वनेऽभिगुञ्जति निश्चितस्त्रैलोक्येऽपि सम्राजो महाविजय:' सादरमभिवाद्य जाङ्गिको वीरपुरुषाणां साहाय्येन स्थापयामास महामहतीमेकां विजयघण्टाम्। मन्त्रिभिर्मन्त्रयमाणस्य महासम्राजो नासीदस्योपरि दृष्टिरपि। स हि मानचित्रेण युद्धस्थले सैन्याक्रमणस्य मार्गसुविधां सर्वत: सम्बोध्य द्वितीयदिवसीयं सङ्ग्रामं निश्चिकाय सचिवै:।

द्वितीयेऽह्नि प्रातरेव मागधी सेना विद्युत्तेजसा प्रास्फुरत्कालिङ्गवीराणां मूर्द्धनि। समबध्यत महातुमुलम्। लोहेन लोहो मनुष्येण मनुष्य: समयुज्यत हिंसाभावेन। शोणितसरित: प्रावहन्। गगने मण्डलायन्ते स्म गृध्रश्येनकङ्ककुलानि।

कालिङ्गा महावीरा: समयुध्यन्त प्राणपणेन समयुध्यन्त। न तै: किञ्चिदवशेषितं युद्धवीरतायाम्। पितामहश्चेत्समरे समपतत्तर्हि पिता समयुध्यत, पितरि चोपरते सुकुमारा: कुमारा: कलिङ्गानां साहसिकतां समसूचयन्। सोत्साहं खड्गपरिचालका बालका अपि मागधान्वीरानचर्वयन् लोहचणकान्नूनम्। किमधिकम्, कलिङ्गाभिजना वीराङ्गना अपि रणाङ्गने रोषारुणनयनाभ्यां विदहन्त्य: साम्राज्यवादिनोऽशोकस्य शासनाय सहस्रसहस्रपङ्क्तिभिरयुध्यन्त व्यमुञ्चन्त चोत्साहेन रणाङ्गने प्राणान्।

किन्तु हन्त! विधेर्विडम्बना, कलिङ्गोऽयमलभत वीरतापुरस्कारं पराजयस्वरूपे एव। तमपि तदा, यदा समग्रोऽपि देशो युद्धमहायुद्धै र्निर्धनो निर्जनोऽपि चैकथा समभवत्। अत एव तु वेतालनृत्यरङ्गे कलिङ्गेऽस्मिन् पिशाच इव पाशवप्रमोदेन प्रविशन् पाटलिपुत्रपति: सम्राडशोको मनसि शोकोच्छ्रयेण न जाने कीदृशेन पीड्यते स्म यदहर्दिवं दूयते स्म देहं संवहन्नपि। हन्त अशोकस्यापि शोकप्रसार:!

सर्वत: प्रथमं प्राङ्गणेषु कृषिक्षेत्रेषु च शवानां व्यलोकयत्सर्वत: प्रसृतं महान्तं राशिम्। कृषीवल: खलाभ्यन्तरे बुसानां धान्यानां च यथा महान्तं राशिमवपुञ्जयति तथा काल–कृषीवलो

रणक्षेत्रेऽस्मिन् पुरुषार्थकृषिं विलूय शवशस्यमिदं राशिराशिरूपे सनाससञ्ज।

पानव्यसनी पुरुषो मदिरोपलम्भे विलम्बमवलोक्य यथा निर्भरं रुष्यति लोकं चाभिक्रुश्यति, परं मदोन्मत्तः, सन् तस्यैव पुरुषस्य चरणाववचुम्बति कामं भवेत्स हि गृहदास एव। एवमेव कलिङ्गपराजयपर्यन्तं तु तावत् प्रचण्डप्रलयं कररुद्रतां दधौ महासम्राडशोकः। परं प्रलयोपरामोत्तरं भुवनभयङ्करः सोऽयं रुद्रतानुभावो विचारे सति कियन्महर्घः संसिध्यतीति समक्षमक्षिभ्यां निरीक्ष्य कारुणिकोदारचरितस्याशोकस्यार्यहृदयमेकान्ततोऽकम्पत, नितान्तमद्रवत्।

नायं न्यबध्यत नवीनो महासमरः सम्राजा। मागधमहासाम्राज्यस्य गरुडध्वजं प्राणमिव करे संवहन्नयमशोको बहून्वारान् निर्विचिकित्सं विजहार हाहाकारपूर्णे रणाङ्गणे नूनम्। नैकान् वारानयमप्रतीकारैर्निजशस्त्रप्रहारैः पृथगभावयद्वैरिमस्तकानि कायेभ्यः। परं कलिङ्गवासिनामविरता वीरतालिपिर्वज्रोत्कीर्णेव समवर्तिष्ट सम्राजो हृदयपटले। समरविजयिना विलोकितं सम्राजा, यद् योऽयं कलिङ्गदेशः स्वर्गप्रदेश इव हरितभरितः सर्वतः श्रीसम्पन्नश्चासीत् स एव साम्प्रतं कान्तारस्य श्मशानस्य वा पूर्णः प्रतिद्वन्द्वी समघटत्।

हन्त सर्वतः समरविजयिना समालोकितं सम्राजा कलिङ्गदेशस्य पङ्गून् प्राणिनो विहाय समवाप्नुवन् सर्वेऽपि वीरगतिम्! वृद्धा नियुद्धाङ्गणे वीरशय्यामध्यशयिषत। यूनामुपरि यूनां शवशरीराणि राशीकृतानीव निर्भरमसेवन्त तावत्समरशय्याम्। किमेतदन्यत्, प्रथमोद्भिन्नश्मश्रुरेरवः सुकुमाराः कुमारा अपि हस्तयोर्लोहमावहन्तः सन्ततमास्वपन्ति स्म लोहितशयनीये।

समरजयी सम्राडशोकः पराजिते कलिङ्गे किमलभत्? धनानि धान्यानि? नैव नैव। अपि सुन्दरीणां समूहो वीरहृदयस्याशोकस्य हस्तगतो भवेत्? नैव नैव। तर्हि कलिङ्गवासिनः समभूवन् बन्दिनो लक्षलक्षसंख्यायाम्? हन्त नेदमपि, वीरपुरुषा बन्दिभावात्पूर्वमेव सर्वतो विगतबन्धना भवन्ति बन्दिकारकैः पुरुषैरेव साकम्। ननु साम्राज्यशासनसामग्री संलब्धा भवेत् सम्मुखसमरे सम्राजा? हा हन्त नेदमपि नूनम्। न नाम जीवन्तः सन्दिशन्ति वीरभटाः परिभवसामग्रीमिव शासनसामग्रीमात्मनः। तर्हि किं लब्धं समरजये महासम्राजाऽशोकेन? अकाण्डहत्यामपयशश्च विहाय न किञ्चिदप्युपलब्धवान् समरेऽस्मिन् सम्राट्।

एतदतिरिक्तमपि यदि किञ्चिदुपलब्धं कलिङ्गेषु सम्राजा, तर्हि आम विधवाः शवानां राशिः। देशे सर्वतोऽप्यव्यवस्था। प्राणिषु वृद्धा मातरः, विकला विधवाः, विह्वला अबलाः, सहस्रसहस्राणि, पङ्गवः खञ्जाः अन्धाः कुष्ठिनश्च।

विजयगर्वितस्याऽशोकस्य हृदयमकम्पत-हन्त तुच्छस्यैकस्य मे केवलमभिनिवेशस्य कृते लक्षलक्षप्राणिनामेवमभूदकाण्डहत्या। विफलस्य मे मनस्तरङ्गस्य कृते भगवतः सृष्टेरेकोऽयं भागो निरमूल्यत नूनमेवम्! विजयकीर्तिमता लब्धः संवादोऽशोकेन यन्महासमरस्य समाप्तावपि कालस्योदरं नाद्यापि पूर्णतया पूर्णम्। अनेके रोगाः परितः प्रसृत्य युद्धावशिष्टान्मानवान् चौरानिव चतुर्दिक्षु विवशीकृत्यैकैकं व्यापादयन्ति! विवशान्प्राणिनः पशुमारं मारयन्ति!!

विजयकीर्तिमानशोकः, मानवोऽशोकः, सम्राडपि हृदयवानशोको विचारयितुमारेभे– हन्त अयं विजयो वा अकाण्डहत्याकाण्डो वा!.... विजयः सत्यः सः, येनाऽपरस्याऽपि मुखं प्रसादोत्फुल्लमालोक्येत। विजयिनः सन्ति ते, ये समरक्षेत्रेऽस्मिन् सस्मितवदनाः शेरते निरपेक्षम्। विजयिनः सन्ति ते, यैः प्राणाः प्रदत्ताः परं पूर्वजानां प्रण–प्रणाशस्य न प्रेक्षितः प्रसङ्गोऽपि। अशोक! प्राणिप्रणाशपातकिन्नशोक! न त्वं विजयी! परं वातुलः। ईश्वरद्रोही, हृदयहीनः।... हृदयमासीत्तेषां ये क्षणभङ्गुरमङ्गमिदं समराङ्गणे विमुच्य वीरगत्या आदित्यान्तरालं भिन्दन्तोऽधिसन्तोषमगुर्नाकालयपर्यन्तम्। देशस्य कृते देहत्यागिनरते सर्वन्यासिनां संन्यासिनामप्यग्रपूज्याः। न तेषामासीद् धनस्य जनस्य निजसंहननस्यापि वा काचिन्ममता। आसंस्ते मुक्ताः। संसारे त एव धन्या धन्यैरुक्ताः, ये सन्ति नूनं मुक्ताः।'

ते त्वाततायिनः पापिनः शीघ्रनाशिनश्च सन्ति ये परेषां परिचारकतया पापोदरं पूरयन्ति। 'अशोक! अशोक!!' सम्राजो मस्तिष्कं विविधविचारैर्विभ्रान्तं व्यहरत्। 'त्वमस्मिन् युद्धे पराजितोऽभूः। यत्र हि विजयोत्सवदर्शनाय वीराभिमानी शत्रुर्न जीवितो भवेत्, सोऽयमपि विजयो नाम? पराजयो ह्यस्मिन् परितः परिक्रीडति'।

'महाप्रभो!' न्यायमन्त्रिणा निवेदितं–भवान् न भवेदधिकमुत्तेजितो विजयेनानेन।

'अशोक! निःसन्देहम्'। अशोकः समजल्पत्–'अयं नु नाम विजयः? अद्यं हि बुद्धमशोकेन यन् मृत्युना सह मानवानां महाप्रणयः।'

'महादेव! श्रीमान् निःसन्देहं महान्।' निवेदितं दैवज्ञेन!

'महदत्र किञ्चिदपि नास्ति।' गद्‌गदकण्ठेन प्रोक्तमशोकेन सम्राजा–'महानत्र विमोहः, महानत्रान्धकारः, महानत्र मायाऽऽडम्बरः'।

'इयमेव वार्ता दीनबन्धो!'– प्रोक्तं। मन्त्रिणा–'तथागतेनाऽपि समुपदिष्टा'।

'महानत्र स एव यो महत्त्वात्सुरक्षितो भवेत्। महत्त्वमपि महान् रोगः–पादशोथः कण्ठमालाप्रभृतिः। विजयेनानेन विज्ञातं शान्ते रहस्यं मया। मन्त्रिमहोदय!'

'आज्ञप्यतां देव!'

'अद्यप्रभृति अशोकोऽयं परोपकारव्रती 'भिक्षुः' सन् विश्वप्रेम्णा विश्वविजयस्य साधनां कुर्यात्।'

'अनया अष्टधातुनिर्मितया विजयिघण्टया धर्मावतार!' निवेदितं दैवज्ञेन–'भवान् देवलोकस्यापि विजयं शक्नुयात्कर्तुम्।'

'दूरमपसारय घण्टामिमाम्। एतस्या उपरि प्राकृतभाषया युद्धाद्दूरीभावस्य विशेषादेशमुत्कीर्य, कुत्रचिद्दूरदेशे समुद्रस्य तटे, पर्वतस्य सन्निकटे वा सुरक्षितभावेन भूमौ निखान्यतामियम्'।

'परं धर्मावतार!' ज्योतिषिणा प्रोक्तम्– 'विजयघण्टातः साम्प्रतं मन्त्रबलं न पृथक्कर्तुंशक्यम्। यदा कदापि यः कोऽपि युद्धे घण्टाया एतस्याः साहाय्यं गृह्णीयादवश्यमसौ विजयी सम्पद्येत, यदि सेयं पातकेन केनचिदपवित्रीभावं न गच्छेत्।'

अत एव तामिमां दूरदेशे, अगम्ये घोरारण्ये विनिधापयेर्यत्र न गन्तुं शक्नुयादेतदभिज्ञः

सहसा।

'एवमेव भवेद्धर्मावतार!' प्रोक्तवान् विनतो ज्यौतिषिकः।

'किञ्च' अशोकः सोत्तेजनमवादीत्– अमात्यवर! अद्यप्रभृति साम्राज्यस्य सर्वा अप्यनीकिन्यो निर्विशङ्कं भज्येरन्। युद्धकर्म, मृगयाधर्मश्च सर्वथा सर्वतो निरुध्यताम्। अद्यतः प्रभृति असेवितज्ञानाऽऽलोकोऽयमशोको ज्ञानोज्ज्वलेन प्रेम्णा समुज्ज्वलयेत् संसारमिमम्।'

'नियुद्धमिदं राक्षसो धर्मः, प्रेमा च सोऽयं क्षेमाऽऽधायको देवधर्मः'

'हे तथागत! हे मायेय! हे गौतम! दयां विधाय मामपि शुद्धं प्रबुद्धं निर्माहि देव!'

भव्यभावैरभिभरितो मगधाधिपतिर्महासम्राडशोकः स्वात्मनि स्वात्मीयान् नानाविधानभावान्प्रत्यक्षमीक्षाञ्चक्रे। भयाभिभूतः सोऽयं निकाममकम्पत्, अभूदखिला रोमाञ्चिता तनुः।

## कर्णश्चार्जुनश्च

[गाण्डीविनः काण्डैः प्रसभं निपोथितो महावीरः कर्णो यदा रणाङ्गणे निःसहं न्यपप्तत्तदा महाभारतनाटकस्यास्य सूत्रधारो भगवान् श्रीकृष्णः पार्थाय निभृतमसूचयद्यदयं कर्णस्ते ज्येष्ठो भ्राता। शोकविह्वलो धनञ्जयः कर्णस्य मस्तकमुत्सङ्गे निधाय सानुतापमिमं पर्यचरत्। अर्जुनाङ्कनिहितमौलिः कर्णो व्यालापीद्विपुलम्]

**कर्णः**– (हस्तेन परामृश्य) कोऽयमस्ति? कस्याऽहं स्पर्शमनुभवामि? अपि दुर्योधनः? अवश्यमयं स्याद्दुर्योधनः। उपेहि बन्धो! हितकृत्ते कर्णस्त्वदर्थे नियुद्धवानयं जीवितान्तपर्यन्तम्। साम्प्रतमुपेत्य चिरकालाय तमिमं विसर्जय राजन्!

**अर्जुनः**– भ्रातर्नास्म्यहं दुर्योधनः। अहमस्मि पार्थः, भवतो भ्राता, लघीयांस्तेऽनुजः।

**कर्णः**– कः कः? पार्थः? (निर्वर्ण्य) सत्यं सत्यमयं धनञ्जय एव त्वस्ति! किमिदं सखे! त्वदीयचिरशत्रुः सोऽयं मुमूर्षुरस्ति। आहतः शास्त्रहीनः प्रचुरं पराभूतश्चापतितोऽस्ति। किमितोऽधिकं सम्प्रति वाञ्छसि।

**अर्जुनः**– प्रिय भ्रातः! क्षमस्व सम्प्रति माम्। विहितवानहमपरिसीममपराधम्। भवान् मे सहोदरः, मम ज्येष्ठो भ्राता। ज्ञातवानहमिदानीमेवेदम्।

**कर्णः**– सहोदरः, ज्येष्ठो भ्राता? शत्रून्प्रति कोऽयमभिनवः संव्यवहारः। अहमस्मि ते शत्रुस्त्वं च मे। अयमेवाऽवयोः सम्बन्धः। किमहं भवतो ज्येष्ठो भ्राता? अपि सत्यमहं ते ज्येष्ठः सहोदरः? अहह अद्यैवेदमाकर्णयामि। नेतः पूर्वं केनचिदप्यासूचितं यन्मम जननी भवतोऽपि माताऽस्ति। चिरद्वेषिणौ, चिरप्रतिद्वन्द्विनौ, चिरसपत्नौ च नकुलसर्पाविकस्मादेव गर्भात्समुत्पन्नौ? भ्रातः सोऽयं महान् भ्रमः, सोऽयं महान्प्रमादो विधातुरेव नूनम्। भवदीयश्चिरद्वेषी

कर्णस्त्वदीयो ज्येष्ठो भ्राता भवेदिदं किं विधातुर्नास्ति महान्प्रमादः ? कर्णोऽयमधिरथस्य पुत्रः, इदमेवोचितम्, इदमेव सम्यक्। शत्रोर्हस्तेन निहतोऽस्मीत्येव विचार्य प्रचुरं मे पीडा। महती व्यथा, भूयान्क्लेशः पद्मावति। वृषकेतो! किं कोऽपि नास्ति ?

**अर्जुनः**– भ्रातरलमलं शोकावेगेन! अवलम्बस्व धैर्यम्, उपाश्रय शान्तिम्।

**कर्णः**– शान्तिमहमाश्रयिष्यामि, नैतदर्थमनुचिन्तेः। पश्य पुरतः, सोऽयं मम चिराराध्यः, पिता मे भगवान् भानुरस्तोन्मुखमभिगच्छति। तात! तात! साधयामि साम्प्रतमहम्। भविष्यामि चिराय शान्तः। भ्रातः, प्रियभ्रातः एषोऽहं गच्छामि सर्वदार्थम्। नेदानीमवस्थास्यते ते प्रतिद्वन्द्वः। भवतो दर्पः, तव शौर्यम्, त्वदीयं यशः सर्वदाऽक्षुण्णं भविष्यति। त्वमिदानीमद्वितीयवीरो व्यपदेक्ष्यसे, परम् नैव नैव। नेतः परमहममर्षमवलम्बिष्ये वाश्रयिष्यामि विद्वेषम्। न च सम्प्रति हिंसाया अपि भावो मयि। अहमस्मि ते ज्येष्ठो भ्राता, प्रददामि तुभ्यमहमाशिषः विदधामि ते कल्याणकामनाम्। एष समीपस्थो मे मृत्युः, निकटगता चिराय शान्तिः। निश्चितं प्रत्येमि, नेतः परमहमधिकमवस्थास्ये। सम्प्रति द्वे वार्ते कथयितुमभिलष्यामि, केवलं द्वे वार्ते। अपि श्रोष्यसि मे हृदयवेदनाया द्वे वार्ते ?

**अर्जुनः**– श्रोष्यामि, तव सर्वामेव सङ्कथामवधानेन श्रोष्यामि। हन्त ! केन तदिदमवगतं पुरा यदन्तकाले सेयं व्यथा, प्रसह्य सहनीया भवेत्।

**कर्णः**– अहो भ्रातः! सत्यमियमसह्या वेदना अमर्षणीयं दुःखम्। अद्यपर्यन्तमिदमहमात्मनो हृदये निभृतमगोपयम्। पार्थ, मम भ्रातः! अद्य तुभ्यमेवाहमात्मनो हृदय वेदनामावेदयामि। अद्यावधि नेमामहमभ्यधां कस्मैचिदपि। पार्थ विचारय चिरम् बाल्यमारभ्यैव कियन्तमपमानं कियतीमवज्ञां कियत्परिमाणामवहेलनां कियन्तं च तिरस्कारमहमभिमर्षितवानस्मि। समग्रादपि संसारादपमानं विहाय नान्यन्मया किञ्चिदुपलब्धम्। पदे पदे लज्जामवहम्, क्षणे क्षणे विफलतामहमात्मनोऽन्वभवम्। मम जन्मना मे जनन्येव लज्जामविन्दत्, प्राक्षिपत्सा मामवज्ञया। जन्मतः प्रभृत्येव मातुस्तिरस्कारमहमसहिषि। किशोरावस्थायां यदा मे हृदि वीरत्वमजागस्तदाप्तये यदा मे वाञ्छा समुदगात्तदाऽहमस्त्रशिक्षार्थमभ्यसरं गुरुं द्रोणम् प्रार्थये च धनुर्वेदशिक्षाम्। किन्तु राधासुताय नेदमन्वजानात गुरुः। सावमानः सोऽहं विफलं परावर्तिषि। ततः शरणमहमगां जामदग्न्यम्। असेविषि तं सर्वात्मना, अलप्सि ततः साङ्गामस्त्रशिक्षाम्। किन्तु यथैव स मां क्षत्रियं पर्यजानात्परिशशाप घोरं कोपेन। शापोऽपि कीदृक् ? 'प्रतिद्वन्द्विनः सम्मुखोपगमन एव सर्वमिदं बाणबालं भवेत् विफलम्'। स्मरति तद्दिनं भवान् यदा हि प्रदास्यत्यस्त्रपरीक्षां वीरसभासमक्षे, अहं च ते प्रतिद्वन्द्वो भूत्वा समागमिष्यामि। प्रदर्शयिष्यामि चात्मनः कुशलतामहमपि सर्वसमक्षे। किन्त्वहमधिरथसुत इति लोकाः सोपहासमपामन्यन्त माम्। सुयोधनस्तस्मिन् समये ह्यवश्यमकार्षीन्निजगुणैर्गौरवान्वितं माम्, किन्तु यथैवाऽहमात्मनोऽस्त्रकौशलमसाधारणरूपेण

प्रकटयितुमुदयच्छं तथैव सभायामायात्संवादो यन्महादेव्याः कुन्त्याः समभूदकस्मादेव पीडेति। अभज्यत सभया सह समग्राऽपि ममाशा। अभून्महान् क्षोभः, समभूद् घोरा व्यथा। अद्यापि समाजस्येममविचारमन्यायमदूरदर्शितामगुणज्ञतां च स्मारं स्मारं प्रज्वलत्यन्तरात्मा मे।

**अर्जुनः**- भ्रातः मैवं स्मार्षीरतीतं दुःखम्। स्वयमहमपत्रये तेन कर्मणा।

**कर्णः**- अतीतं दुःखं त्ववश्यं व्यतीतम् किन्तु हृदयस्य व्यथा सेयं चिराय कीलिता हृदये। मया सदैव निजभाग्येन सह युद्धमाचीर्णम्, किन्त्वन्ते सफलाऽभूदसफलता पराजितश्चाहम्। हन्त मे दुःखगाथा साम्प्रतमपि न समाप्यते, सम्प्रत्यपि बहुतरं श्रोतव्यम्। अनुभूतं मया भूयस्तरां निजजीवने। समभूद्यदा द्रौपद्याः स्वयंवरसमारोहो न प्राभूत्तदा कोऽपि क्षत्रियाऽङ्कुरो लक्ष्यभेदं कर्तुम्। सदर्पमहमुदस्थां लक्ष्यभेदाय। किन्तु समगादीत्तदा द्रौपदी- 'नाहमधिरथसुतं वृणीयाम्'। अवमानेन लाञ्छनया च मृतप्रायः सोऽहं परावर्तिषि नतमस्तकम्। आशा मे विफला, शक्तिर्मे निरर्था कामना मे व्यर्थासीत्। पञ्जरबद्धः शार्दूल इव मनोऽमर्षेण पुटपाकमसहिषि। दुर्दान्तो युवाऽपि सिंहो बन्धनपारवश्येन प्रत्यक्षमपकारिणं पश्यन्नपि किञ्चित्कर्तुं यथा प्रभवेत्तथाऽहम-खिलमवमानमगोपयं मनस्येव।

**अर्जुनः**- भ्रातरलं परितापेन। मनुष्योऽयं विवशो भागधेयस्य, क्रीडनकं नियतेः।

**कर्णः**- अद्याहं प्रातरेव मानसे दृढतरं प्रत्यज्ञासिषि- चिरशत्रोर्धनञ्जयस्याऽद्य दर्पमवश्यमहं चूर्णयेयम्, निहन्यामद्य तमहं निश्चितम्। अद्य कर्णस्य जयघोषेण भवेन्मुखरिता समग्रापि सेयं वसुन्धरा। तदैव दृष्टं मया यत्कुन्ती सम्मुखेऽवस्थिता। सा ह्यवाङ्मुखी व्यथितहृदयेन मामसूचयद्यदहं तस्याः सुतः। क्षणमात्रे तिमिरमखिलमनश्यत्। उदपद्यत हर्षश्च विषादश्च मामके हृदये। शिथिलाऽभून्मे दृढा प्रतिज्ञा। पन्नग इव मन्त्र निबद्धः स्तम्भित इव सोऽहमभूवं सम्मुखो रणभूमेः। अयाचत तदैव भिक्षां भूसुर एकः। यदा चाहं तदर्थनामूर्यकार्षं तदा ब्राह्मणोसौ मम जीवनरक्षाकवचं कवचकुण्डले चैवाभ्यार्थयत्। समार्पिपमहं कुण्डले कवचं च निःशब्दम्, व्यसर्जयं च तेन सहैव जीवनस्य चाऽप्यन्तिमामाशाम्। तथापि मे शक्तिरासीत्प्रचण्डा। त्वया स्वयमेव मे प्रतापः समालक्षितः। कीदृशी दुर्धर्षा मे शक्तिरमोघं च मे वीर्यं कियदिति स्वयमनुभूतवान् भवान्। परं स्यन्दनस्य मे चक्रमवास्त्रसद् भूमौ। न्यपतत्पञ्जरे पञ्चास्यः।

हन्त जन्मारभ्य विलोकितवानहमेतादृशीमेव विफलताम्। स्वयमहं विरञ्चेरभिशापः। जीवनं मे कीर्तिहीनं निष्फलमेव व्यत्यगात्। पुत्रः सन् मात्रा परित्यक्तः, शिष्यः सन् गुरुणा तिरस्कृतः, वीरः सन् ख्यात्या विरहितः, शक्तिशाली सन् विजयाद्वञ्चितोऽभूवम्। नभसि समुदितो धूमकेतुरिव प्रकाशं प्राप्यापि निष्फल एवाहम्। अयि भ्रातस्तवास्ति निजवंशोपर्यहङ्कारः, जनन्याः स्नेहोपर्यधिकारः। प्राप्तवान् भवान् सर्वत्र यशः, अर्जितवान् भवान् सर्वतो विजयम्। अवश्यमहं ज्येष्ठः किन्तु न कुत्रापि श्रेष्ठः। लुप्येत मे नामापि किन्तु नास्य कृते मे लेशतोऽपि खेदः।

अन्तिमस्त्वत्तोऽयमेव मेऽनुरोधो यन्मदीयामिमां लाञ्छनां मामकं चेममवमानं मामकीनां चेमां व्यथां न जातुचिद्धृदयपटादपमार्क्ष्यसि मदीयो भ्रातेति विभाव्य दास्यसि मे मानसे स्थानम्। हन्त मानववर्गे यन्न निष्पन्नं सम्पद्येत तत्स्वर्गे। आवां भ्रातरौ भूत्वा निवसेव देवलोके। नान्यदहं वाञ्छामि गच्छामि साम्प्रतं गन्तव्ये लोके। तुभ्यमहमाशिषः प्रददामि निरामयः सर्वदा सुखी निवसेः।

## सत्यो बालचरः

**(१)**

श्रेष्ठी कुवेरगुप्तो न केवलं लोकप्रसिद्ध्यैव 'महाजनः', अपि तु सत्यं सत्यमेव महाजनः। नगरस्याबालवृद्धं तन्नाम विख्यातमासीत्। अनाथानां विधवानां च कृते स हि जीवनस्याऽऽधार एवाभूत्। आसीदमुष्य सुस्थिरा पारम्परिकी सम्पत्तिः। कृषिकार्यादपि प्रतिवर्षं प्रभूतमलभ्यत धनम्। पञ्चसु वर्षेषु त्रयो ग्रामाः स्वयमेतेनाऽक्रीयन्त। प्राचलच्चतुर्थस्यापि ग्रामस्य चर्चा सङ्क्रयणाय। श्रेष्ठिनः पूर्वजेषु प्रावर्तत परम्परागतः कुसीदमेव[१], किन्तु नासीदस्य मनोरुचिस्तत्र। एष हि व्यापारमेवाऽभिरोचयामास।

श्रेष्ठिनः कुबेरगुप्तस्य षोडशसहस्ररूप्यकाणि प्रेषयितव्यान्यासन्मोहमयीम्। अत एव स प्रधानकर्मचारिणमाह्वयत्।

श्रेष्ठी.- वसुगुप्त! श्वस्तनः कियान् रूप्यकराशिर्भवत्समीपे साम्प्रतम्? अशीतिसहस्रमुद्राणां प्रबन्धः साम्प्रतमेव मे आवश्यकः। किन्तु षोडशसहस्रमुद्रास्तु सम्प्रत्येवाऽपेक्ष्यन्ते, येन हि कोषद्वारा[२] ताः प्रेष्येरन्मोहमयीम्।

कर्मचारी सहस्रसहस्रमुद्राणां षोडश शुल्कपत्राणि[३] श्रेष्ठिने समार्पिपत्।

वाजिरथमारुह्य प्रातिष्ठत कोषगृहं श्रेष्ठी। मार्गे प्रचलन्त्यासीदतिवेगेनाऽश्वराकटी। किन्त्वश्रूयत मध्येमार्गं महान् कोलाहलः। श्रेष्ठी समपृच्छत्सूतम्-'कोऽयमकाण्डे कलकलः? किमेतत्सङ्घटितम्?' स्वयमपि चोत्थाय वातायनादपश्यत्। शकटिचालकः प्रत्यवदत्-'न किञ्चित् स्वामिन्! विद्यालयस्य बालकेभ्यः पानीयादिपानाय सोऽयमवकाशावसरः'।

स्वल्पेनैव कालेन प्राप धनागारं शकटिः। श्रेष्ठी समुत्तीर्य प्राविशत्प्रकोष्ठकं प्रबन्धकर्तुः। वेत्रासनादुत्थाय प्रबन्धकः श्रेष्ठिनश्चकार स्वागतम् सहर्षं चाऽमर्दयत्करम्। ततः सादरमप्राक्षीत्-

'कथयत का भवतामाज्ञा ?'

''नाधिकं कार्यम्, किञ्चिद्धनं मोहमयीं प्रेषयेयम्।''

''सम्यक्, समर्प्यतां मह्यं येन प्रेषयामि सङ्ग्राहकस्य निकटे, सूचनपत्रमिदमधुनैव[४] निर्मीयते'' श्रेष्ठिमहोदयः शुल्कपत्रग्रहणाय प्रावेशयत्परिधानीयपार्श्वपुटे[५] हस्तम्, किन्तु दृष्टं नैकमपि तत्र पत्रम्। नासौ किञ्चिदप्यनुमातुमपारयद्यत् राशीकृतानां शुल्कपत्राणां पुञ्जः कुत्रायं

१. वृद्धिर्जीविका (व्याज पर रुपया देना)

२. बैंक

३. नोट

४. ड्राफ्ट।

५. जेब, पाकेट

विगत इति। अधीरः सन्नयं वारंवारमपश्यत्परिधानीयपुटम्। किन्तु सर्वं मुधा, नासीत्तत्र पत्राणां सम्पुटोऽसौ। अतिरभसेन समयासीच्छकटेरपि निकटे। व्यलोकयदितस्तो मार्गे। किन्तु नालभ्यत शुल्कपत्राणां पुटकः। अपृच्छदयं शकटिचालकमपि भूयसा।

निराशः सन्कुबेरगुप्तः स्वाऽऽसनमग्रहीत्। अतितमामसमञ्जसव्यतिकरे निपतितो यावदयं भावयति तावदेव कोषगृहस्य प्रबन्धकर्ता समागत्याऽप्राक्षीत्–'कथयत, कियतां रूप्यकाणां सूचनापत्रमालिखेयम्? अपि निवासभवनान् मुद्राणामानयनं व्यस्मार्षीद्भवान्?'

श्रेष्ठी.– नैवम्! मुद्राणामानयनं न व्यस्मार्षम्। अवश्यमहमानैषम्। शुल्कपत्राणां पुटको मन्ये मार्गे क्वापि न्यपप्तत्।

श्रुत्वैवेदं प्रबन्धकमहाशयो नीरव–निस्तब्धमतिष्ठत्। नासीदस्य सविधे वक्तुं किञ्चिद्वाक्यम्। पुररक्षाविभागे[१]पथि पत्राणां निपतनस्य प्राहीयत सूचना। संवादपत्रेषु अन्वेषण–कर्त्रे पारितोषिकप्रदानस्याऽक्रियत घोषणा। द्वौ भृत्यौ मार्गे गवेषयितुं प्राहीयेताम्। यौ हि गृहं यावत् गतौ प्रत्यागतौ च। मार्गे बहुधा इतस्ततो गवेषितम्, पृष्टाः सर्वेऽपि मार्गगामिनः, अन्विष्टाः सर्वेऽप्यापणस्थायिनः; किन्तु सर्वोऽप्ययं परिश्रमो वृथाऽभूत्। नाऽवाप्यत धनपत्राणामेषां कश्चिदपि संवादः।

## ( २ )

श्रेष्ठी कुबेरगुप्तो गच्छति स्म प्रत्यहं वायुसेवनाय। अद्य प्रधानप्रबन्धकोऽपि सहाऽऽसीत्। आसीन्निदाघस्य कालः। प्रवहति स्म शीतलो वायुः। विहगानां कलरवा आकर्षन्ति स्म मानसं शृण्वताम्। कोकिलानां कुहूध्वनिर्मयूराणां केकाश्च श्रवणीया एवासन्। आम्रमञ्जरीणां दूरविसारी गन्धो मदयति स्म मानसं मानुषाणाम्। अभूदतिमनोहरं दृश्यम्। किन्तु नैतद्रोचते स्म किमपि कुबेरदत्ताय। विमनस्कः स शीघ्रमेव परावर्तिष्ट भवनम्। निपतितानां मुद्राणामद्य किल तृतीयो

दिवसः।

विमनस्कावस्थायां परावर्तमान आसीत् सदनं श्रेष्ठिमहोदयः। बालविद्यालयस्याग्रतः प्रावर्तत गन्तुं शकटिः। स्मृतिपथमारोहत्कुबेरदत्तस्य पूर्वदिनवृत्तं यत्–बालकानां कलकलध्वनिमाकर्ण्य स हि निजस्थानादुत्तिष्ठति[२]पुरा। शकटेर्वातायनाच्चालोकयद्बहिर्वृत्तम्। एकैकशस्तदिदं सर्वं स्मृतिगोचरमभूत्तस्य। स हि वातायनाद्बहिर्विलोकनायाऽकुप्यद्[३] भूरि! धनापगमे स ह्यात्मन एव दोषमभावयत्–यद्यहं वृथैव बहिर्न व्यलोकयिष्यं तर्हि न प्रापतिष्यंस्तानि शुल्कपत्राणि। शनैः शनैः सर्वापि तद्दिनघटना श्रेष्ठिनश्चक्षुषोरभिमुखमनृत्यत्। आसीदेवंविधेष्वेव

१. पुलिस।

२. उदतिष्ठत् पुरा इत्यर्थे पुरा'योगे यावत्पुरानिपातयोर्लट्

३. क्रुधद्रुहेति चतुर्थी।

विचारेषु निमग्नोऽसौ। सवेगं प्रवहन्त्यासीत् शकटिः। अश्रूयत कस्याऽप्याह्वानशब्दः। शकटिवातायनान्मुखमपसार्य विलोकितं श्रेष्ठिना, नवदशवार्षिकः कश्चिद् बालकः सवेगं धावमानो मामनुसरतीति।

रथमवस्थापयितुमादिक्षत्कुबेरदत्तः। अचिरादेव दीर्घं निःश्वसन् समुपातिष्ठत्तत्र बालकः अप्राक्षीच्च स हि सूतम्–'किमयं श्रेष्ठिनः कुबेरदत्तमहोदयस्य रथः?'

सूतः–आम्। बालकः–उद्घाटय शकटिद्वारम्, एषोऽहं श्रेष्ठिना सङ्गच्छेय।

श्रेष्ठिमहोदयो निजं नामधेयमाकर्ण्यैव समुदघाटयन् द्वारम्। प्राविक्षदभ्यन्तरम् बालकः। आसीत्तस्य सुप्रसन्ना मुखश्रीः तथाप्यलक्ष्यत वदन्ते गाम्भीर्यम्। मुग्धमधुराकृतिः स हि शोभते स्म बालचरवेषे।

पत्रेण परिवेष्टितमेकतमं पुटकं स हि नमस्कृत्य समर्पितवान् श्रेष्ठिनो हस्ते। आश्चर्यचकितः श्रेष्ठी प्रोदघाटयत्तदिदम्। प्रधानकर्मचारिणोऽप्यवधानमासीत्पुटकेऽस्मिन्नेव संलग्नम्। अभूदुद्घाटितं तदेतत्पुटकम्। दृष्टं यदेतस्मिन् सन्ति शुल्कपत्राणि। परिगणितान्यभूवंस्तानि। आसन्नमूनि संख्यायां पूर्णानि षोडश। भ्रमनिराकरणार्थं पुनः पर्यगणयत्तानि श्रेष्ठिमहोदयः। तन्मध्यगतं श्रेष्ठिकरलिखितमेकं सूचनापत्रमप्यासीद्यत्र तस्य नामाप्यभूल्लिखितम्। तदेतदवलोक्यैव चकितमभूच्चेतः श्रेष्ठिमहाभागस्य। स हि बहून् वारानुद्वर्त्य तान्येतानि पत्राणि ससम्भ्रमाश्चर्यमालोकयत्। नासीत्परिसीमा श्रेष्ठिमहोदयस्यान्तःकरणे कौतूहलस्य च हर्षस्य च। सम्प्रति विस्मयपूर्णे तस्य नयने बालकमालोकयितुमुत्कण्ठिते अभूताम्, परं नासीत्सम्मुखे कोऽपि। कर्मचारिणमप्राक्षीत् श्रेष्ठी, किन्तु तस्याऽप्यवधानं पुटकनिलीनमभूत्। अत एव नासावशक्नोत्किमपि वराको बोधयितुम्। शकटेः पर्यन्ततो दूरदूरं यावदन्वैष्यत परं नासौ बालकः पुनरालोक्यत। शकटिवाहकोऽप्यन्वेष्टुमितस्ततः प्राहीयत परं न प्राप्यत बालकस्यास्य सन्धानम्।

( ३ )

अभूद्दिवसस्य तृतीयः प्रहरः। अत्याचारिणः शासनमिव क्रमशो मन्दतामयासीत्तिग्मरश्मेस्तेजः तथापि तप्तो वायुर्न व्यरंसीदधुनापि। उष्णोष्णास्तस्याऽऽवर्ताः प्लुष्यन्ति मुखमिदानीमपि। अस्मिन्नेव समये नवदशवार्षिक एको बालको विद्यालयद्वाराद्बहिरभवत्। प्राचालीच्चासौ प्रशस्तेन घण्टापथेन। यथैवायमुपशतान्युल्लङ्घयति पदानि तावदेवाऽस्य चरणं निपपात पत्रप्रावृते पुञ्जीकृतपत्रसम्पुटक एकस्मिन्। मार्गगमनं परित्यज्य स ह्यतिष्ठत्किञ्चित्। परामृष्टवांश्च पदादेव पत्रपुटकं तत् प्रतीयते स्म गुरुकमिदम्। अवनतो भूत्वा सावधानमिदमालोकयामास। अभूदस्य किञ्चित्सन्देहः। अत एव पत्रपुटकमिदमाददौ।

अतित्वरितपदैः प्राप बालको गेहम्। यत्किञ्चिद् भुक्तवानयम्। सहाध्यायिनः क्रीडार्थमिमं बहिर्नेतुमैच्छन्, परं न जगाम सोऽयम्। न मे प्रकृतिः सुस्थेति विसर्जितवान्सर्वानेतान्! अभूत् सन्ध्या। भगवान् दिवाकरो विश्रमाय प्रायासील्लोकान्तरम्। प्रासरत्परितस्तमिस्रम्। दीपं प्रज्वाल्य सोऽयमध्ययनाय स्थितः, परं नाऽभून्मनोयोगः। उत्थाय सोऽयं परिधानीयपार्श्वसम्पुट-कात्तत्पत्रपुटकं बहिश्चकार। उद्घाटयत्तस्य बन्धनम्। एतावतैव प्रकोष्ठकस्य द्वारबहिर्भागे अश्रूयत पदध्वनिरिव कस्यचित्। अत एव साध्वसमापन्नः सोऽयं पुस्तकेषु गोपयामास पुटकमिदम्। परमयमेतस्याऽऽसीद्भ्रम एव केवलम्, नागच्छत्कोऽपि। पुनर्जग्राह सोऽयं पत्रपुटकमिदम्। तन्मध्यतः सोऽयमेकमेकं कृत्वा गणयामास षोडशपत्राणि। तेषामेकतमद् शुल्कपत्रं दीपकस्याभिमुखमानीय व्यलोकयत्सावधानम्। अहह न दशानाम्, न पञ्चाशतः, नापि वा शतस्य ,अपि तु तदेतत् सहस्रमुद्राणां शुल्कपत्रम्!!

किं सर्वाण्येवंविधान्येव पत्राणि? स ह्येकैकं सर्वाण्येव विलोकयामास पत्राणि। ज्ञातमनेन यदयं षोडशसहस्रमुद्राणां महान् निधिः। जजागाराऽस्य हृदये लालसा। प्रमदेन चानृत्यन्मनोमयूरः। व्यचारयन्मनसि- किमेषामहं करिष्यामि, कुत्र च निधास्यामि। मत्समीपे यदि च कश्चित्पश्येत्तर्हि चौर्येणानीतानीत्यवश्यं ब्रूयात्। अतीव सङ्कटमिदमापतेत्, सर्वथा च दुर्यशः प्रसरेत्। तर्हि कस्यचिदन्यस्य समीपे निदध्याम्? किन्तु लोभाक्रान्तः स यदि न प्रत्यर्पयेत् त्तर्हि किमहं कुर्याम्? मन्ये, एतदेवोत्तमं यदिमानि रूप्यकाणि मातुः सविधे स्थापयेयम्, भृशमनुरुन्ध्यां च तदिदं रहस्यं गोपयितुम्। किन्तु नेदं सा सम्मन्येत्, अवश्यमिदं विदितं स्यात्तातचरणानाम्। ततः किं तातचरणेभ्य एव समर्पयेयम्? का वा हानिः?

सर्वं सत्यमहं निवेदयेयम्। ततस्ते कथं वा प्रतिषिध्येयुः, अवश्यमिमे निभृतं गोपयेयुः, अहं मुक्तः स्यां सर्वेभ्यः सङ्कटेभ्यः। प्रावेशिकपरीक्षा- (एन्ट्रेन्स) पर्यन्तं मां ते पाठयेयुरिति स्वाभिप्रायं प्राकाशयन्मातुरन्तिके। इदानीमहमनुरोधं विदध्यां यद् बी.ए. परीक्षां यावदध्यापयेयुर्मामिति।

व्यत्यगाद्रात्रेरर्धम्। अवाद्यन्त घटिकाया द्वादशटङ्काराः, किन्तु नैतदासीद्विदितं विचारमग्नस्यास्य। अन्ते तु स्वयं निद्रादेव्येव तमेनं संवेष्टुं विवशमकार्षीत्, किन्तु नाभूद्रात्रौ

निर्भरं निद्रा। बहून् वारानयं मध्ये प्रबुद्धः शयितश्च। अभूत्प्रभातम्। रात्रेर्निश्चयानुसारं पित्रेधनसमर्पणमसौ निश्चिकाय। उदतिष्ठत्स्वासनात्। जग्राह करे शुल्कपत्राणि। परमस्मिन्नेव क्षणे विचार एकः समुपस्थाय निरुरोध तमेतम्। अपतदस्य दृष्टिः सम्मुखभित्तौ। अत्र हि पत्रारूढा बालचराणां नियमावलिर्लम्बते स्म सम्मुख एव। एतत्पत्रगतानामक्षरपङ्क्ती-नामभ्यन्तरादेका पङ्क्तिः पूर्वतो द्विगुणस्थूलैरक्षरैर्लिखितेव तच्चक्षुषोरग्रे साम्प्रतं समदृश्यत। अभूदियं तस्य हृदये वज्रोत्कीर्णेव। अकम्पत हन्त हस्तद्वयम्। अपतच्च भूमौ शुल्कपत्रपुटकमिदम्।

साम्प्रतमसमञ्जससङ्कटेऽसावपप्तत् आसीदेकतो लोभस्तर्ह्यपरतस्त्यागः। स हि सावधानतया शुल्कपत्रसम्पुटकमादाय पुनरधितष्ठौ निजस्थानम्। पूर्वकल्पितः सर्वोऽपि विचारसौधो भूमिसादभवत्। हन्त न जाने, कस्य वा वराकस्य तानीमानि शुल्कपत्राणि? मम यावानानन्दस्तदपेक्षया शतगुणितं तस्य दुःखं चिन्ता च भवेत्। अन्वेषणप्रयत्नेऽपि च न तेन काचिन्न्यूनता कृता स्यात्। एतावद्धनं हारयित्वा किं कश्चिदवस्थातुं शक्नुयान्निश्चेष्टः? परं कोऽत्र ममापराधः? न मया स्तेयमाचरितं न च बलादपहृतं कस्माच्चित्। एतानि हि मया मार्गे पतितान्यवाप्तानि। एवं तर्हि निभृतमेतेषां गृहे स्थापनं किन्नु न्यासङ्गतम्? परं तस्य हृदयकष्टम्, अन्तःकरणस्योष्णोष्णा निःश्वासा वा न मे सुखनिद्रां सहेरन्। एकदिनमात्रमेवाद्य व्यतीतम्, ततोऽपि न मे रात्रौ निद्राभूत्। न जानेऽग्रे किं भावि? अवेपत तस्य कोमला गात्रयष्टिः। प्रास्रवल्ललाटे प्रस्वेदः।

ततः किमहं कुर्याम्? एतस्य धनस्य को वा स्वामी? कथमहं तं मृगयेय?

बालकः पुनरेकवारं तानि शुल्कपत्राण्याददौ करे। तानि हि उद्वर्त्य परिवर्त्य पुनरेकवारमपश्यत्सावधानतया। एकैकं निरैक्षत। शुल्कपत्राणां पृष्ठभागे धनागारकस्य मुद्रां तिथिं वा विहाय नान्यत्किञ्चिदासीदङ्कितम्। पत्राण्येतानि राशीकृत्य यथैवायं स्वस्थाने स्थापयितुमुदयुङ्क्त, तथैवाऽकस्माद्वेष्टनपत्रोपर्यस्याऽपतद् दृष्टिः। आसीत्तद् भुग्नीकृतम्। भूतलादुत्थाप्य विवारयामासैतत्। स्थूलस्थूलैरक्षरैरेकं नाम तत्राङ्कितमासीत् अवाचयदयं तन्नाम।

इदानीं प्राक्रीडत्प्रमोदलहरिर्बालकस्यास्य वदनोपरि। व्यत्यगाद्दिवसः। ततोऽक्षीयत क्षणदाऽपि। आसीत्पूर्वरात्रेर्जागरणम्, अत एव समघटत नीरन्ध्रः सुषुप्तिः। अभूत्प्रत्यूषम्। आवश्यककार्येभ्यो निवृत्य, अधारयदसौ परिधानीयानि। पुस्तकान्यादाय प्रतिष्ठतासौ विद्यालयाय। अन्यदिवसापेक्षया बहुबालात्पूर्वमेव प्राप सोऽयं पाठशालाम्। विद्यालयस्य द्वारोपरि स्थितो यमसौ प्रतीक्षते स्म समागादसौ, किन्तु त्वरितगामिना तुरगेण वाहिता शकटिः क्षिप्रमेवाग्रे जगाम्। एकवारमस्य हृदये समुदैच्छङ्का, किन्तु सारथेः शिरोवेष्टनेन समभूद् दृढो निश्चयः। प्रत्यहमेवासौ तमेतं सारथिं व्यलोकत। अत एव बालचरो चितेन साहसेन पर्यधावदसौ शकटेः पृष्ठतः।

( ४ )

शकटिमध्यासीन एव श्रेष्ठी व्यचारयन्मनसि– अहो इयान् लघुर्बालकः, एतावांश्च तस्य त्यागः। निसर्गस्मेरमस्यासीदाऽऽननम्। हन्त कथमसंसूच्यैव मां सोऽयं प्रत्यावर्तिष्ट। मन्ये, नास्य सङ्कोषितस्य विपुलस्य पारितोषिकस्य भवेत्तस्य परिज्ञानम्। किन्त्वाश्चर्यम्, एतावतामपि शुल्कपत्राणां किमु नास्याऽभवत्स्वल्पोऽपि लोभः ? अपि मन्ये न जानीयादसौ बालकः पत्राणामेषां मूल्यम्। किन्तु नैतदपि सम्भवति। अवश्यं तेन विलोकितानि स्युः शुल्कपत्राणि पूर्वम्। विद्यालयेऽसौ पठति। अवश्यं च भूयान्सम्भवो यदस्मिन्नेव विद्यालयेऽसौ पठेत्।

असामान्योदारः सोऽयं बालकस्य व्यवहारः श्रेष्ठिनो हृदयपटले दृढतरमङ्कितोऽभूत्। अत एव बालकस्यास्यान्वेषणे विवशीचकार तमेनम्। स हि विद्यालयाभिमुखं शकटिमुपनेतुमादिक्षत्सारथिम्। विद्यालयस्यास्य द्वारदेशे न्यषीदच्छकटिः। रथावदरुह्य कुबेरदत्तो विद्यालयस्य प्रधानाध्यापकस्यान्तिकमाससाद। निजशुल्कपत्राणामपगमस्य वृत्तान्तमामूलचूडं सर्वमपि वर्णयामास तन्निकटे। शुल्कपत्राणामेतेषां यथाऽवस्थितः सम्पुटकः केन प्रकारेण बालकस्यैकस्य करात्तेनाधिगत इत्यपि सूचयामास सर्वम्।

मुख्याध्यापकः सर्वामपीमां कथामत्युत्साहेन चावधानेन चाश्रौषीत्। स हि सूचनामेकां त्वरितं विलिख्य सर्वास्वपि श्रेणिषु भ्रामयितुमादिदेश कर्मकरम्–

''श्रेष्ठी कुबेरदत्तमहोदयः पञ्चशतमुद्राः प्रदास्यति पारितोषिकम्। येन किल बालकेन शुल्कपत्राणां पुटकोऽसौ श्रेष्ठिनः करे समर्पितः स्यात्सद्यचिरमस्मिन् कार्यालये समुपतिष्ठेत्।'' पारितोषिकस्य चर्चा प्रासरत्सर्वास्वपि श्रेणिषु कर्णाकर्णिकया। किन्तु व्यत्यगुः पञ्च 'मिनटाः', दशापि ते व्यतीयुः। शनैः शनैरर्धघण्टापि व्यतिययौ। न कोऽपि बालकः समाययौ। अन्ते विवशो विद्यालयाव्यक्षः समाहूतवानखिलानपि बालचरान्। श्रेष्ठी बद्धलक्ष्यमालोकितवानेकैकम्, किन्तु न तं बालकमपारयत्परिचेतुम्। अत एवान्ते निराशः सन्प्रत्यावर्तिष्ट निजनिकेतनम्।

अपरस्मिन्दिने बालविद्यालयस्य प्रबन्धकर्ता बालचरस्यास्यालौकिकमिदं हृदयमहत्त्वमसाधारणं चेदं त्यागचेष्टितममुद्रयत्तत्तेषु प्रकटपत्रेषु, प्राकाशयच्चानेनैव सह श्रेष्ठिनः कुबेरगुप्तस्यापि गुणग्राहितां दानशीलतां च। बालकस्याऽस्य निःस्वार्थभावेन प्रणोदितः श्रेष्ठी समुपलब्धमिदं सर्वमपि षोडशसहस्रात्मकं वसु प्रत्यददात्तस्मायेव बालविद्यालयाय। तदतिरिक्ता द्वादशच्छात्रवृत्तीश्च विशेषरूपेण समकल्पयद्यासच्चरित्रेभ्योऽध्ययनशीलेभ्यश्च बालेभ्यः समर्प्येरन प्रतिमासमेतस्मिन्। विद्यालयप्रबन्धसमितिरपि प्रधानाध्यापकमहोदयस्य प्रोत्साहनेन बालकस्याऽस्य हृदयमहत्त्वस्मरणमिदं सर्वदा स्थिरीकर्तुं वार्षिकोत्सवमेकमकल्पयद्विद्यालये, यस्मिन् सदाचारिभ्यः सत्कार्यकारिभ्यश्च प्रदीयते साम्प्रतमपि समुचितं पारितोषिकम्। किन्त्वद्यावध्यपि तस्यास्त्यागमूर्तेर्न जानाति कोऽपि पुण्यं नामधेयम्। केवलं मानसपूजयैव तामेतामर्चयन्ति चिन्तयन्ति च प्रतिवर्षम्।

## धन्यो भारतीयवीरः

### ( १ )

आसीदक्टूबरमासस्य निर्मेघाडम्बरः स्वच्छो द्वादशदिवसः (ता.१२ सं. १९४८)। शरत्काले काश्मीरप्रान्तस्य प्रातःकालो येन जनेन दृष्टो भवेत्स हि निर्भ्रसं जानीयाद्यत् तस्मिन् समये कीदृशः सुखदः शीतोऽनुभूतो भवति। मानसोन्मादकरं कमप्युत्साहं सञ्चारयन् प्रवहति स्म शीतः पवनः। भारतीयशिबिरे विराजते स्म तस्मिन् समये शान्तिमयी निस्तब्धता। रात्रौ रात्रोः शिबिरोपरि कृताऽभिधावना सेयं पृतना सम्प्रति निष्कण्टकं विश्रामसुखमनुभवति। समरे सम्मुखयोधिनो वीराः साम्प्रतं शयनीये विश्राम्यन्ति। एतस्मिन्नेव समये तडित्संवादयन्त्रे (टेलीफोन) टनट्टनदिति समाकर्ण्यत सरभसो ध्वनिः। प्रधानसेनापतिः सर्वान् विश्राम्यतो विलोक्य स्वयमेव सत्वरमगाद् यन्त्रसम्मुखे। यन्त्रस्यैकं भाग कर्णे, अपरं च मुखसम्मुखे कृत्वा ध्वनिमकरोत्–'अला'। कर्णे ध्वनिरुपागच्छत् –भारतीयशिबिरपतिना संलपितुमिच्छामि। सेनापतिः–'अहं शिबिरपतिः सम्मुखगोऽस्मि। सूच्यतां नियोगः'। ध्वनिरभूत्–'त्वरिततरमेव तादृशीं वायुयानसेनां प्रेषयेर्यस्याः साहाय्येन भारतीयस्थलसेनायाः प्रधानतमस्य सेनापतेः सुजानसिंहस्य प्राणरक्षा शक्येत कर्तुम्।'

**सेनापतिः**–'अपि स ह्युत्तरगुल्मे शत्रुभिरास्कन्दितः ? प्रेष्येत तत्रैव सेना ?' ध्वनिरागच्छत् 'न हि। स हि 'पूंछ' स्थाने तादृक्स्थले शत्रुभिः परिवेष्टितोऽस्ति यद्धि परितो

महामहद्भिः शत्रुसैन्यैः संवृतमस्ति। अतीव निकटगताश्च सम्मुखयोधिनः शत्रुवीराः।

**सेनापतिः**–पृष्ठतः स्थलसेनापि काचित्प्रेषणीया स्यात्?

**ध्वनिः**–मैवं तावत्! स्थानमिदं शत्रुभिस्तथा स्वायत्तीकृतं यथा नात्र काचिदपि वाहिनी प्रभवेत्प्रवेशं लब्धुम्। सम्प्रति वायुयानमेवैकं साधनं येन सेनापतेः प्राणरक्षा सम्भवति। स्थलगतस्य नान्यस्योपायस्य तत्र प्रसरः। किन्तुं तदिदं पूर्वत एव निश्चेतव्यं स्याद्यत् वायुयानस्याऽऽरोहणेऽवरोहणे च शत्रोः शतघ्नीनां गोलकाः प्रत्येकक्षणे एव शिरोगताः सन्ति।

'अपि पूंछ' स्थानस्य पृष्ठगुल्माद्वैदेशिकी सेना न दद्यात्साहाय्यम्?

**ध्वनिः**–नैवं नैवम्। सर्वतोऽप्युत्तरं लब्धम्। सम्प्रति भारतीयवीरेभ्य एवैकमात्रमाशा। नाधिकमालापस्य समयः। त्वरितं प्रबध्यतां वायुसेनायास्ततः प्रस्थानम्।' टन् टन् इति ध्वनिना समसूच्यत संलापस्य समाप्तिः।

## ( २ )

'त्वरितमाकारय वायुसेनासञ्चालकम्' इति शिबिरनिरीक्षकमालप्य प्रधानसेनापतिः प्राविक्षत्स्वकक्षम्। वायुयानाध्यक्षः कक्षं प्रविशन्नेव सस्मितमवोचत्–'किमद्य प्रातः कालादेव शत्रूणां रक्तरञ्जनक्रीडा प्रारभ्येत, प्रातरेव कस्य मुखं दर्शनीयं भवेत्?'। सेनापतिः–'महाशया! मुखदर्शनस्य नात्र प्रसङ्गः। अत्र हि शत्रोः पूंछ' स्थानं दर्शनीयं भविष्यति।' वायुसेनाध्यक्षः परिहासे एव प्रोदतरत्–'वायुयानचालका शिरोदेशं परामृशन्ति, न पूंछस्थानम्'। प्रधानसेनापतिः– 'वायु घोटकमारूढानामेष एव परिणामः। अस्तु, भवेत्परस्तात्परिहासः। युद्धस्थलात्सम्प्रति सूचना समवाप्ता–'स्थलसेनायाः प्रधानसेनापतिः सुजानसिंहः 'पूंछ'स्थाने तादृक्स्थले वैरिभिरास्कन्दितो यत्र सेनाया अन्या कापि सहायता न प्राप्तुं शक्ता। केवलं वायुसेनाया एवात्र कर्तव्यं यत्सा सेनापतेः प्राणान् संरक्षेत्। किन्तु वर्तमानकाले तुमुलस्थलेऽस्मिन् प्रतिक्षणं शत्रूणां भीषणगोलका अविज्ञातं वर्षन्ति। अत एव विक्रमैकरसस्य साहसिन एवात्राऽवकाशः।

वायुसेनाध्यक्षस्त्वरितमेव निजनिवासे समागमत्। स हि सर्वानपि वायुयानपरिचालकान् स्वसमक्षे समाह्वयत्। समसूचयच्च परिस्थितेर्भीषणताम्। किन्तु वीरा न किल बिभ्यति युद्धक्षेत्रात्। प्रत्युत ते हि वीरताप्रदर्शनस्योपयुक्तमवसरं प्रयत्नेनाप्यन्विष्यन्ति। अत एव अहमहमिकया बभूवुरनेके सज्जाः। वायुसेनाध्यक्षस्तेभ्य एकतमं विचित्य निःसम्भ्रममाज्ञापयत्– 'वीरसिंह! 'गरुड'मादाय त्वमेव गच्छ। तव साहाय्याय करोम्यन्यमपि प्रबन्धम्। यदा हि गरुडमादाय त्वं रक्षाक्षेत्रमवतरिष्यसि तस्मिन्नेव काले द्वितीयमेकं वायुयानं 'विमानविश्रमस्थान'स्योपरिप्रदेशे साटोपं परिभ्रमदवतिष्ठेत। मन्ये युक्त्याऽनया भवद्भूयसी संरक्षा।

## ( ३ )

कथनसमकालमेवोड्डाययामास गगने गरुडं वीरसिंहः वीरसिंहस्य गरुड शत्रूणां

चक्रव्यूहे पूर्णतयाऽवतीर्णमपि नाऽभूदेतावतैव प्रारभ्यत शत्रुपेक्षाद्भीषणा गोलकवर्षा। किन्तु गरुडस्य सञ्चालकेन समयेऽस्मिन् या वीरता बुद्धिमत्ता च प्रकटिता तां साम्प्रतमेव किम्, अनन्तकालपर्यन्तमपि साहसिकाः प्रशंसिष्यन्ति। स हि निर्भीकभावेन तावता प्रचण्डवेगेन वायुयानं समचालयद् यथा शत्रोर्लोहगोलका अपि वायुयानमिदं प्राप्तुं न प्राभवन्। इतः सेनाध्यक्षेण या चातुरी पूर्वमभ्युहिताभूत्समभूत् साऽपि पूर्णतया सफला। शीघ्रगामिनो गरुडस्य गतिर्यावता परिलक्ष्यते ततः पूर्वमेव भारतीयं वायुयानमेकं सशब्दं परिभ्रमददृश्यत युद्धस्थलस्य वियत्तले। स्थूलरूपेण शत्रुशतघ्नीनामभूदेतदेव लक्ष्यं सर्वभावेन। अत एव प्रारभ्यत भारतीयं वायुयानमिदं परितो लोहगोलकवर्षा शत्रूणाम्। किन्तु चञ्चलमिदं वायुयानं गोलकेभ्यः स्वस्य रक्षां कुर्वदेव शत्रोर्गुप्तगुल्मानामुपरि न्यपातयत्सहसा गृध्रदृष्टिमिव विद्युत्प्रकाशसृष्टिम्। लक्ष्य

स्थिरीकृत्य यथैव वायुयानमिदमपातयद् विध्वंसकगोलकाँस्तथैव ते पूर्णतया लक्ष्यमस्पृशन्। शत्रोस्त्रीणि गुल्मानि ('चौकी') समूलमुदमूल्यन्त। भयानकेनानेन विध्वंसककाण्डेन शत्रोर्व्यूहे परितः प्रासरदसाधारणी व्याकुलता। शत्रोः सैन्यानि निजरक्षायै व्यस्तान्यभवन्। व्यतिकरणानेन शत्रूणां शिबिरात् शतघ्नीनां गोलकवर्षा यथैव किञ्चिच्छिथिलाऽभवत्तथैव भारतीयेन वायुयानेन समवाप्तः समुचितोऽवसरः। शत्रूणां सैन्यानि निजप्रबन्धे दृष्टिमपातयन्, इतः स्थलसेनानायकं निजवक्षसि सङ्गोप्य गरुडयानं गुरुगर्वेण गगनमुदपतत्। विना च कञ्चित्प्रतिबन्धं प्रापयामास स्थलसेनानायकमिमं यथास्थानम्।

असाधारणेनानेन वीरसिंहस्य साहसकाण्डेन 'पूंछ'प्रदेशस्य भारतीयशिबिरमिदं वायुयानविश्रमस्थलं च नानाविपत्तिभ्यः समभूत्सुरक्षितम्। अन्यथा गुल्मस्यास्य सर्वापि प्रबन्धव्यवस्था भग्नाऽभविष्यत, शत्रूणां च मनोऽभीष्टमभविष्यत्। किन्तु भारतीयानसञ्चालकस्यास्य समयोपयोगिनी वीरता घोरसङ्कटात्समग्रमपि व्यूहं सर्वथा समरक्षत्। भारतीयानां वायुसेनासञ्चालकानामन्यान्यवीरताभिः साकं वीरसिंहस्य सेयमपि वीरता युद्धकालिकसाहसस्येतिहासे चिराय संस्मरणीया भवेत्। प्रशंसन्ति तामिमां प्रत्युत्पन्नमतितां युद्धकलावैज्ञानिकाः।

## शस्त्रपाणिः क्षत्रियाणी

### ( १ )

घोरतरग्रीष्मस्य प्रचण्डो मध्याह्नः। सिकतायाः महीमहानाः स्तूपाः (टीला, टीबा इत्याख्याः) साम्प्रतं वह्निमिव उद्गिरन्ति। ज्वालामिव परितः प्रवाहयन्ती सन्तप्ता वात्या प्रचण्डरुपे संज्वलति। कर्णयोरन्तिके प्रवहन् प्रचण्डपवनः कर्णयो रोमाणि दंदहीति। नीचैरियं धरणी तातप्यते उपरि अनन्तमिदमाकाशम्। शमीवृक्षस्य छायायामुपविष्टो राष्ट्रौढनवयुवको बहिरन्तश्च सर्वतः सन्तापेन दह्यते। माध्याह्निकसूर्यस्य प्रचण्डा रश्मयश्चक्षुषो प्रलायं सृजन्तः परितोऽन्धकारमिव समुपस्थापयन्ति। किन्तु क्षत्रिययुवकस्य नास्योपरि दृष्टिपातः। स हि गहनविचारेषु तादृक् सुनिमग्नो यत्तस्य कृते सर्वा अपि दिशः सर्वतः सङ्कीभूता इव। अद्य तस्य भाविनः श्वशुरस्य सन्देशहरः संवादमिमं समुपाहरत् यत् यदि विवाहः काम्यते तर्हि द्विसहस्रमुद्रा दिनत्रयान्तराले इतः समुपाहर। अन्यथा अक्षयतृतीयायामस्यां, भवदर्थे कल्पिता सेयं कुमारिका अन्येन सह परिणाय्येत।

संवादस्याक्षराणि समाकर्णयत एव राष्ट्रौढयुवकस्य चक्षुषोः लोहितमिव सर्वतः प्रावहत्।

तस्य हस्तः करगृहीतखड्गस्योपरि अप्रेरित एव सतः सुदृढा बभूव। दन्तेन स हि कर्कशतया अधरमदशत्। तस्य पत्नी द्वितीयस्य भविष्यति। यस्याः सौभाग्यपूर्णोऽङ्कः तस्य जनन्या रूप्यकनारिकेलाभ्यामपूर्यत, यस्याः सुखदविवाहस्य सुखस्वप्नान् समीक्षमाणौ तस्य मातापितरौ मृत्योः क्रोडे व्यश्राम्यतां, गृहं सर्वतः शून्यमिव समभवत्। को वा कृषिक्षेत्राणि उपवनानि वा सम्भालयेत्। गृहं सर्वतो दारिद्र्यं समाक्राम्यत्। क्रमक्रमेण घोरं धनसङ्कटमुपातिष्ठत।

क्षेत्राणि गो-महिष्यः, उष्ट्र-बलदाश्च, क्रमक्रमेण उत्तमर्णवणिजां गृहे समपूर्यन्त। गृहोपकरणान्यपि एकैकशः ऋणदातुरन्तिके प्रापन्। सम्प्रति रूप्यकाणां सहस्रद्वयं कथमिदं समाह्रियेत? किं वस्तु बन्धकीकृत्य उत्तमर्णो दद्यात्? एतं धनराशिं विना च एतस्य परिणेया पत्नी परस्य सम्भवेत। यस्याः सुखस्वप्नान् स हि दशवर्षेभ्यः सोत्कण्ठं विलोकते स्म, सा परिणेया प्राणप्रिया पत्नी अक्षयतृतीयायामेतस्यामन्यस्य परिगण्येत्। परस्याऽङ्कशायिनी सम्भवेत्।

राष्ट्रौढयुवकस्य मुखं क्रोधावेशेन रक्ताक्तमिव व्यलोक्यत। अद्यावधि किमीदृशोऽनर्थः केनचन वीरक्षत्रियेण स्वयमनुभूतः? परिणेयायाः कृते तु पुरा परःशतानि मस्तकानि व्यच्छिद्यन्त क्षत्रियो जीवितस्तिष्ठेत्, तस्य परिणेयया भाविपत्न्या च सह द्वितीयस्य विवाहो भवेत्? किमेवं सम्भवः? न कदाचित्, न कदाचित्।

## ( २ )
## अर्थस्य पुरुषो दासः

'श्रेष्ठपितृव्य! मम प्रतिष्ठा, वंशस्याऽस्य लज्जा च सम्प्रति भवद्हस्तगता।'

''लज्जा, प्रतिष्ठा च मया बहुशो रक्षिता। किन्तु कुमार! त्वमेव मां निर्दिश, कतमस्य कृषिक्षेत्रस्योपरि तुभ्यं द्विसहस्रमुद्राः परिगणयेयम्? इदानीं किं मे बन्धकीकरिष्यसि?''

''मम समीपे साम्प्रतं किं वा अवशिष्टं वीक्षसे। राजपुत्रस्य प्राणः, प्रतिष्ठा, सर्वस्वं वा, सेयं तरवारिरेव केवलमवशिष्टा।''

''तर्हि कस्यचिद् द्वितीयस्योऽत्तमर्णस्य द्वारं वीक्षस्व'' राष्ट्रौढयुवकः साम्प्रतमतीव व्याकुलः संवृत्तः। विवशोऽसौ व्याहरत् – ''पितृव्य, भवता मद्भवनस्य एकैकं तृणमपि सत्यं वा अनृतं वा, आयव्ययं दर्शयित्वा, आत्मसत्कृतम्। मम गृहे सम्प्रति छिन्न-भिन्नमपि पात्रं नेक्ष्येत। न च किमप्यवशेषितं साम्प्रतम्। मया हि सः सर्वस्वमपि समर्पितं भवते। साम्प्रतमपि यत्किञ्चिद् वदसि दातुमयमहमुद्यतः। किन्तु साम्प्रतं मम, मद्वंशस्य च लज्जां मा विगमय। यस्य क्षत्रियस्य परिणेया परकीया भवेत् स तु जीवितोऽपि मृतकतुल्यः। एतां तरवारि-जगदम्बां शिरसि निधाय घोरतरशपथं करोमि यद् भवतः एकैकमपि पणं दुग्धेनेव प्रक्षाल्य भवते समुज्ज्वलं समर्पयिष्यामि। काममस्य वृद्धिं (व्याज) यथेच्छं योजय, किन्तु साम्प्रतमेव तमिमं धनराशिं मह्यं समर्पयेः।''

यदि सत्यं राजपुत्रवीर्यमसि, तर्हि यथाहं पत्रे लिखामि, तदुपरि सत्येन मनसा हस्ताक्षराणि विदध्याः।

यदि मम मस्तकमपि याचिष्यसि, तर्हि निःशब्दं दास्यामि, किन्तु समयेऽस्मिन् प्रतिष्ठां च लज्जां च मे सहसा संरक्ष।

वणिजा पत्रमेकमालिख्य युवकस्य सम्मुखे निहितम्। कर्णोपरि निहिता लेखनी क्षत्रिययुवकस्य हस्ते समर्पिता, प्रोक्तं च– ''यदि सत्यं क्षत्रिमात्मानं मन्यसे, तर्हि हस्ताक्षराणि कुरु।''

राष्ट्रौढयुवकेन पठितमिदं पत्रम्। आसीदत्र लिखितम्– ''एतद् ऋणम् वृद्धिसहितं यावन्न परिशोधयामि, तावद् विवाहितामिमां पत्नीं सहोदरभगिनीमिव भावयिष्यामि।''

ओष्ठौ दन्तैर्निर्दयं दशन्, ज्वलद्भ्यामिव नेत्राभ्यां पत्रमिदमालोकयन्, युवको विदधे हस्ताक्षराणि।

## ( ३ )
## असिधारं व्रतं मम

बहुवर्षाणामनन्तरं राष्ट्रौढवीरस्य शून्यं गृहमावासितमभवत्। पुनरिव तत् सजीवमिवालोक्यत। द्वारोपरि प्रज्वलन् प्रदीपः आलोक्यत। कीटैरामूलचूलमात्मसात्कृतम्, पङ्कधूल्यादिभिरभिव्याप्तं तस्य भवनं साम्प्रतं सुमृष्टपरिमार्जितं सुधया लेपितं च दिव्यां कान्तिमाधत्ते स्म। प्रसन्नमिव सस्मितमालोक्यत तद्भवनम्। बहुसमयानन्तरमद्यैव तेन भूषणणत्कारः कर्णाभ्यामाकर्णितः। विवाहितपत्न्या सह समागतेन पूर्णशकटिपरिमाणेन गृहोपकरणेन तद्गृहमद्य पुनः स्थाने–स्थाने सज्जीकृतमभूत्। युवको यदा भोजनायोपविष्टोऽभवत् तदा तत्पत्नी सरसानिर्मितेन सुन्दरव्यञ्जनेन सुखं वीजयति स्म तम्। हस्तिदन्तनिर्मिता वलया वीजनसमये सुमधुरझङ्कारमकुर्वन्। अरुणरागमिश्रिताभ्यां कराभ्यां सस्नेहं व्यञ्जनानि परिवेषयन्ती सानुरागमभोजयत्पत्नी युवकम्। हृदि नानाभावाननुभवन्नपि क्षत्रिययुवको न किञ्चिद् वक्तुमशकार। नवागता पत्नी तु स्वतः कथमिव वाचमुद्घाटयेत्। किन्तु तस्या नेत्रयोः प्रणयप्रवाहः प्रत्यक्षं प्रेक्ष्यते स्म। किन्तु इतः क्षत्रियवीरस्य नेत्रे सुतरामास्तां गम्भीरे।

भोजनं समाप्य यथा सं हस्तप्रक्षालनाय प्राचलत्तदा क्षत्रियाणी सेयं जलपात्रमादाय तस्य हस्तयोरुपरि जलधारामदात्। क्षत्रियस्य गम्भीरा दृष्टिः सुदीर्घावगुण्ठनस्य अन्तरालगते प्रस्वेदभृते मधुरमुखे सहसा अपतत्। किन्तु तस्य नेत्रयोरन्ते उत्तमर्णविलेखितं तत्पत्रं पाषाणशिलेव सुस्थिरमभूत्। वीरस्य हस्तयोरभूद् भृशं कम्पः। पात्रात् प्रपतन्ती जलधारा हस्तयोरुपरि न पतित्वा, केवलं नालिकायामवहत्।

शनैरभवत् सन्ध्या। समागता निशीथिनी। 'सौभाग्यरात्रेः' सर्वाण्युपकरणानि संव्यधीयन्त। श्वशुरगृहात् समुपलब्धे पर्यङ्के द्वावप्यशयाताम्। किन्तु राष्ट्रौढवीरः कोषात् खड्गं निःसार्यं दम्पत्योर्मध्यतः स्थापयामास। मुखं परावर्त्य शेते स्म।

क्षत्रियाणी नितरामभूच्चकिता। हन्त केयं चर्या? मया को वा ईदृशोऽपराधः कृतो यस्यऽयमसाधारणो दण्डः।

एका द्वे तिस्रः इति कृत्वा दश पञ्चदश वा रात्रयो व्यतीताः। स एव निष्कोषः खड्गः भुजङ्ग इव तयोर्मध्ये शयानोऽभवत्। दिवा स्वच्छन्दं द्वयोर्द्धूत् संलापः। क्षत्रिययुवा व्यवहारे न किञ्चिदप्यदर्शयद् वैगुण्यं वा मलिनतां वा। संलापसमये अमृतमिवाऽस्रवन्नूनम्। चक्षुषोः प्रत्यक्षं प्रणयप्रवाहः प्रावहत्। किन्तु यथैव रात्रिरागच्छत्, तस्य मुखादेकाऽपि वार्ता नाऽश्रूयत। तस्य नयने सम्मुखमपि नाऽपश्यताम्। नीचैर्नयन एव सर्वं दिनकृत्यमपयूयत्। हन्त रात्रौ सहशयनमधिशयानौ अपि परस्परं शतक्रोशान्तरितमिव आस्ताम्।

विचारशीला क्षत्रियाणी अतिगभीरतया पत्युश्चर्यां व्यचारयत्। व्यवहारं च मार्मिकदृष्ट्या समीक्षाञ्चक्रे। सा चिरमभूच्चकिता। अन्ते सा विवशतया समभूत्। एकदा यथैव राष्ट्रौढक्षत्रियः तरवारिमाकृष्य शय्यायां पादं न्यधात्, क्षत्रियाणी सेयमानम्रीभूय तस्य चरणौ अगृह्णात्, गद्गदमगादीत्– ''को वा मत्तः प्रमादोऽभवत्? केन वा भवान् मयि एतावद् रुष्टः? अवश्यं मम जनकेनाऽपराधः कृतो यत् अतिसूक्ष्मसमये धनस्य कृते भवतः उपरि सोऽयं भारो निपातितः। किन्तु मम कोऽत्रापराधः?'' तस्या नयनाभ्यामश्रुवृष्टिः कृता, पत्युश्चरणौ प्राक्षालयत्।

''को वा इदमकथयत् यदहं त्वयि रुष्टोऽस्मि। त्वं ममैव। भवती मम गृहस्य सर्वात्मना स्वामिनी।'' निजकराभ्यां तस्याः करौ निजचरणयोः सकाशाद् दूरमपसारयता राष्ट्रैढेन सभावगद्गदमुक्तम्।

''तर्हि एतावत्समीपे निवसन्नपि भवान् मत्तः एतावद्दूरे किमिति तिष्ठसि?''

क्षत्रियस्य ललाटे द्वे रेखे अदृश्यताम्। विचारमग्न एव समलपत् असौ– ''अपि त्वं ज्ञातुमभिलषसि?''

''आम्।''

''तर्हि पत्रमिदं पठ।''

दीपस्य मन्दीभवन्तं प्रकाशं प्रोज्ज्वलीकृत्य समपठत् सा वणिजा लिखितं तत्पत्रम्। यथा यथा सा पत्रमिदमपठत् तथा तथा तस्या मुखे नितान्तं गम्भीरता व्याप्नुते स्म। अन्ते किङ्कर्तव्यविमूढतायामपि हृदयदार्ढ्येन तस्या मुखं नितान्तमुज्ज्वल प्रत्यभासत। पत्रमिदं पत्युर्हस्ते परावर्तयन्ती, सन्तोषस्य सुखनिःश्वासं च गृह्णती सा समभाषत– ''सम्प्रति न मे काचिच्चिन्ता। मम चिन्ता केवलमासीद्भवतः क्रोधस्य, अप्रसन्नतायाः। व्रतस्याऽस्य पालनं नेदं कठिनम्।''

यथैव प्रभातमभूत्, क्षत्रिया निजगात्रात्तानीमानि लघु लघुभूषणानि, मूल्यवन्ति वस्त्राणि च एकग्रन्थौ निबध्य पत्युः सम्मुखे स्थापयन्त्या वस्त्राणि च एकग्रन्थौ निबध्य क्रीणीह। सर्वप्रथमम् ऋणविमोक्ष आवश्यकः। अयं हि धर्मः। गृहे स्थिताः केवलं कृषका एव शोभन्ते। राजपुत्रास्तु सेवया, पराक्रमकार्यैरेव कीर्तिं लभन्ते। अतएव इतः प्रस्थाय कस्यचिन्नरेशस्य सेवायामेव योगं दास्यावः।

''पितुर्गृहं कीदृक्? यत्र भवान् तत्रेयं ते अर्द्धाङ्गिनी, द्वौ तुरगौ साम्प्रतमानेयौ।''

क्षत्रतेजसा देदीप्यमानं पत्न्या मुखमालोकयन् राष्ट्रौढो नितान्तमभूत् स्तम्भितः।

## ( ४ )
## विक्रमः क्व न पूज्यते

सूर्यः साम्प्रतं सपादहस्तमितमाकाशमधिरुढः। समयेऽस्मिन् दिव्यभव्याकृती द्वौ युवकौ अश्वद्वयारुढौ अम्बर (आँबेर) नगरस्य परिसरे सरभसं प्रतियातः। द्वावपि समवयस्कौ, समानां च वेषभूषामधिवहन्तौ। द्वयोरपि हस्तयोस्तीक्ष्णभल्लौ भानोः प्रभया सम्प्रति सुतरां देदीप्येते। कटिनितम्बितः खड्गस्तुरगस्य पृष्ठं मुहुर्मुहुराघट्टयन् तस्य त्वरितगतिमिव संवर्द्धयति। द्वयोरपि वीरसज्जामालोक्य को वा परिचेतुं शक्नुयाद् यद् द्वयोरनयोरेकतरा महिला।

घोटकौ धावयन्तौ आम्बेरदुर्गस्य द्वारसीमानमुपगतौ। महाराजो मानसिंहो दुर्गद्वारमुल्लङ्घ्य बहिरागच्छन्नासीत्। तस्य दृष्टिः सम्मुखगतयोरनयोरुपर्यपतत्। मुखाकृत्या सद्यः परीक्ष्य, निजतुरगं स्थापयन् महाराजः सहसा समपृच्छत्– ''कतमौ भवन्तौ राजन्यौ ?''

''राष्ट्रौढौ''

''इतः किमित्यायातौ ?''

''प्रस्थमितस्य अन्नस्यं कृते अन्नदातः।''

''तर्हि मृगयायां मम सहचरौ भवेताम्।''

नम्रीभूय प्रणमन्तौ द्वावपि निजनिजं तुरगं परावर्तयामासतुः। आम्बेरनरपतेः पृष्ठगामिनावभूताम्। शूकरनिकरस्य पृष्ठे त्वरितमधावत्सेयं मृगयुमण्डली। अग्रे सेयं वाराहपङ्क्तिः, पृष्ठे च कुन्तान् करे वहन्तः क्षत्रियवीराः समधावन्। घोटकाः प्राणपणेन धावन्ति स्म। एकः शूकरः समण्डलमतिक्रम्य दूरमभूदतिक्रान्तः। सर्वेऽप्यधुना कोलाहलमकार्षुः– ''एको निःसृतः, त्वरितं धावत। विपोथ्यतामयम्।''

सर्वेषामपि तुरगाणां वल्गा एकस्यामेव दिशि परावव‍ृते। एतावतैव एकतमस्तुरगो विद्युद्वेगेन सर्वाग्रतो बभूव। अश्वारोहो निजभल्लेन वाराहमिमं लक्ष्यीचकार। सवेगं प्रक्षिप्तो सूकरस्योदरं विदार्य परपारमादृश्यत। अम्बरनरपालो दूरतः पश्यन्नेव ससन्तोषमगदत्– ''साधु साधु''।

प्रस्वेदान् परिमार्जयन्नश्वारोहो घोटकान्नीचैरवारोहत्? सविनयं शिरसा प्रणम्य पुनरश्वमारोहत्। अहहः को विश्वसितु, कश्चेदं कल्पयतु, यदेषां मध्ये एकतमया नार्या एकस्मिन्नेव सम्प्रहारे सोऽयं वराहः समापितः।

नरपरीक्षकोऽम्बरनरपालः सप्रणयमवदत् ''भवन्तौ वीरौ। अद्यतः प्रभृति भवन्तौ द्वावपि राजहर्म्यस्य प्रधाननिरीक्षकौ नियतौ। निशि मम शयनकक्षस्य भवन्तौ एव सन्निरीक्षणं करिष्यतः।''

द्वावपि– ''वर्द्धतामन्नदाता अस्माकम्'' इति वदन्तौ घोटकादवरुह्य विनयं प्रणेयतुः, पुनश्च तुरगमुपारुरुहतुः।

**'सुवर्णपुष्पां पृथिवीं चिन्वन्ति पुरुषास्त्रयः।**
**शूरश्च कृतविद्यश्च यश्च जानाति सेवितुम्।।'**

भाद्रपदस्य घोरकृष्णा रजनी। दूरदूरतो हर्म्यस्य प्रणालिका कलकलं कुर्वन्त्यः अतुलजलं प्रवाहयन्ति। उपरि कज्जलमलिना मेघघटाः सर्वतः संछन्नाः। मुहुर्मुहुर्भीषणरवेण तास्तथा गर्जन्ति यथा क्षणेनैव प्रलयदृश्यं दर्शयिष्यन्ति। अहह। विद्युदप्येषा चतुर्दिक्षु तथा चमत्कुरुते यथा दृढाविहितस्याऽपि चक्षुषी निमील्येते। परितस्तथा सूचीभेद्योऽन्धकारो यथा हस्तेनापि हस्तो नाऽऽलोक्यते। मन्दमन्दाः पयोविन्दवः प्रारब्धाः पतितुं परितः। समयेऽस्मिन् सङ्कटाऽऽपन्नोऽपि गृहं विमोक्तुं नोद्यतो भवेत् स्वेच्छया। समयेऽस्मिन्नाम्बेरधराधीशो निजशयनागारे निस्तब्धमासेवते निद्राम्। ''शीघ्रमेव साम्राज्यस्य विपुलवाहिनी नरपतिः काम्बोजविजयाय प्रतिष्ठेत'', इति हि राजधान्यां सर्वतोऽपि प्रवादः प्रचलितः। महाराजाधिराजो युद्धेऽस्मिन् स्वेच्छया शिक्षितानां वीरराजन्यानामप्येकं महत्सैन्यं स्वेन सह सन्नयेत यस्योपरि सर्वात्मना स्वस्य विश्वासः, दृढनिश्चयश्च भवति अत एव दूर दूरतो वीरराजन्यानां यशस्विनो वंशधराः प्रयत्नेन सङ्गृह्यन्ते। श्रुत्वा चान्ये महाराजस्याश्रये स्वतः समुपागच्छन्ति। युद्धसज्जाकार्यं दिवा सर्वतोऽपि निरीक्षमाणो ढुण्ढारधरापतिः साम्प्रतं निद्रया विश्राम्यति। शयनागारस्य द्वारदेशे द्वाविमौ वीरराजपुत्रौ प्राहरिककार्यं कुरुतः। द्वयोरपि हस्तयोर्निष्कोशः करवालः यो हि विद्युच्चमत्कृत्या सह द्विगुणतरं चमत्कुरुते।

घोरा निशीथिनी, मध्यरात्रस्य द्वादशतमा घण्टा साम्प्रतमेव सूचिता तत्कारेण। महाराजस्य विस्रब्धा निद्रा श्वासप्रश्वासैः सर्वथा सूच्यते। किन्तु राजमहिष्या नयनयोर्नाधुनापि निद्रा। सा हि महाराजस्य विजयप्रस्थानं विचारयन्ती नानाचिन्ताभिराक्रान्ता। साम्प्रतं च प्रावृट्–प्रकृत्या भीषणं चाऽद्भुतं च दृश्यमालोचयन्ती सा विस्रब्धं स्वर्णपर्यङ्कमधिशयाना। द्वावपि नवागतौ राजपुत्रौ निष्कोषं खड्गं वहन्तौ, शयनागारस्य द्वारोपान्ते संरक्षणे जागरुकौ। पश्चिमदिशि भीषणा च प्रखण्डा च चपला चकितचकितं चमत्कृतवती। क्षत्रियाणी वीरपुरुषवेषं वहन्त्यपि साम्प्रतं निसर्गतः सस्मार–यदियं चपला अस्मज्जन्मभूमौ चमत्कुरुते। अनया स्मृत्या सह अन्यान्यवार्तानामप्यभूत्स्मरणं तस्याः। अद्याऽहं धनार्जनस्य कृते पुरुषवेषमधिवहन्ती विदेशेऽस्मिन् अर्द्धरात्रे प्राहरिकसेवाकार्यमनुतिष्ठामि। अन्याः सम्भावितमहिलाः समयेऽस्मिन् शयनागारं निरुध्य निर्भरं निद्रामासेवन्ते। अहं च दीना निष्कोषखड्गं वहन्ती दण्डायमानैव रजनीमतिवाहयामि।

एतावत्येव, समीपस्थतरोर्हृदयग्राही 'पी०पी०' इत्यश्रूयत शब्दः।

अबला हृदयस्य दुर्बलतां प्रयत्नात्प्रकामं निगृहीताऽपि साम्प्रतमजागः। हन्त प्रियः कुत्र? अत्यन्तसमीपे अस्ति। तथापि नितान्तं दूरे। अहो मम गणना न साम्प्रतं

प्रियतमसंयोगिनीषु, न च वियोगिनीष्वपि। हन्त ममाऽपेक्षया चक्रवाकयोर्युगलमेव सम्यक्, यौ हि दूरे दूरे स्थितौ वियोगवेदनामिमां विवशतया विषहेते। अहं तु दिवारात्रिं सहसंस्थितापि विवशवियोगिनीत्यतोऽति दुर्भाग्या।

अस्खलत्तस्या धैर्यबन्धः। समीपमुपगत्य वीरपत्युः क्षत्रियस्य स्कन्धे करमस्पर्शयन्निभृतं सा। हस्तस्य स्पर्शमात्रे एव तथा प्रतीयते स्म, यथा विद्युच्छक्तिः शरीरे सञ्चरिता भवेत्। द्वावपि निर्भरमकम्पेताम्। राष्ट्रौढक्षत्रियस्त्वरिततरं प्राबुध्यत। मुखादस्य निरसरत्– ''क्षत्रियाणि! प्रबुद्धा भव।''

सत्या क्षत्रियाण्यपि सा त्वरिततरं प्रबुद्धाऽभूत्। दीर्घनिश्वासं त्यजन्ती सा राजस्थानीयभावनया समुदगिरत्–

**'देशो दूरे सह पतिः, तदपि बन्धुमवयामि।**
**देशं यदि यायां पुनः, तदा प्रियं कलयामि।।'**
**'देस विमाघर परिका प्रिय बान्धव रे भेस।**
**जिण दिन जास्यां देसमें बांधव पीय करेस।।'**

शयनीयमधिशयानयैव राजमहिष्या सर्वेयं लीला श्रुता च, किञ्चिद् दृष्टा च। प्रातर्जागरित्वैव सा अम्बरनरेन्द्रमवादीत् अनयोर्वीरक्षत्रिययोरन्तरे तु गुप्ततमः कश्चिद् भेदोऽस्ति।

''किं, कोऽस्ति भेदः ? किं कुर्यामनयोः शिरोभेदम् ?''

''नहि नहि भेदस्य नावश्यकता, द्वयोः भेदस्याऽपेक्षा। एनयोरन्यतरा महिला।''

''मान्यमहिषि! मुग्धमहिलेव नूनं प्राभ्यसि। इदं दार्ढ्यम्, एष नेत्रयोर्भङ्गिमा, इयं वीरता, किं कदाचिन्नारीषु दृष्टपूर्वा ?''

''श्रीमन् प्रभुः। काममिदं मे कथनं मन्यतां, न वा स्वीक्रियताम्। किंत्वनयोरेकतरा नारी, विपद्गता च सा सम्प्रति।''

''प्रिये! कथमिदं परीक्ष्यताम्?''

''अहमेतत्परीक्षां सर्वतः कुर्याम्। भवान् प्रासादन्तः स्थितः प्रेक्षताम् तावद्।''

द्वावपि राजपुत्रौ अन्तराहूय, राजमहिषी चुल्हिकोपरि दुग्धस्य कटाहिकामधात्। स्वयं च बहिराह्वयत्। स्वल्प एव समये दुग्धं सन्तप्य उत्फाणोन्मुखमभवत्। एतावतैव क्षत्रियाणी सहसैव अशब्दायत- ''दुग्धम् उत्फणति।'' राष्ट्रौढो यावत् क्षत्रियाणीमिङ्गितेन किञ्चित्प्रबोधयति, तावत् राजमहिषी सरभसमभिधाव्य साग्रहमपृच्छत्-

''पुत्रि! सत्यं निर्दिश काऽसि त्वम्। मत्तो गोपनस्य नास्त्यावश्यकता।''

क्षत्रियाणी विवशा, नेत्रे निमील्य, राजमहिष्या वक्षसि निजमुखमगोपयत्।

राष्ट्रौढक्षत्रियः सर्वामथात्मकथामम्बरधरणिपालस्य सम्मुखे अवर्णयत्। कथामिमा सावधानमभिनिशम्य ढुण्ढारनरपालः परममप्रीयत। सहसैव ससन्तोषमगादीत्- ''भवतः ऋणस्य सर्वमपि धनं, वृद्ध्या सह राजकीयाश्वारोहस्य हस्तेन साम्प्रतमेवाहं प्रेषयामि भवद्ग्रामम्। त्वं मम सविधे सानन्दं निवसेः गृहस्थाश्रमं च संस्थापयेः।''

हस्तासम्पुटं संयोज्य सविनयं न्यवेद्यत राष्ट्रौढवीरेण........... ''अन्नदातुराज्ञा शिरोधार्या। किन्तु यावदहं स्वयं निजजन्मभूमिं गत्वा, ऋणं न परिशोधयामि, ऋणपत्रं च स्वहस्तेन न परिसमापयामि, तावत्कालस्य कृते भूरिभूरिक्षमां याचेऽहमन्नदातुः सविधे। आवां द्वावपि विसर्जनीयौ तावत् दयालुना स्वामिना।'' आम्बेरधरणीपालं सर्वमपि ऋणद्रव्यं गृहस्थापनोचितानि सर्वाण्युपकरणानि च तस्मै तत्कालमेव प्रदाप्य द्वावपि व्यसर्जयन्निजगृहगमनाय। त्वरिततरं परावर्तनाय च न्ययोजयन्निर्देशम्, यतो हि शीघ्रमेव भवेद् भवदपेक्षा।

## भाग्यरेखा

### ( १ )

उन्नततरे गिरिशिखरेऽवस्थितं चित्रकूटदुर्गमात्मनो ह्यजेयतागर्वेण मौलिमुन्नमय्य गगनमिव चुम्बदासीत्। शैलानां विशङ्कटतया मार्गाणामगम्यतया प्राकृतिकसङ्कटनस्य निसर्गनिबिडतया च दुर्गमिदं सैनिकदृष्टौ सत्यं सत्यमजेयमवभासते। वर्तमानेऽस्मिन्समये वीरभारतस्य सर्वतः सुदृढीमदं प्रख्यायते स्म दुर्गम्। राजपुत्रप्रान्त एव किम्, भाग्यभूमेर्भारतस्य प्रान्ते प्रान्त एवास्योपगीयन्ते स्म विक्रमगाथाः। प्राकृतिकं विषमनिवेशमद्भुतां निर्माणपद्धतिं चावलोक्य विश्वकर्मणः सेयं निर्मितिरिति बहुधा प्रास्तुवन् जनाः। नूनं प्रत्यक्षमस्याऽजेयतामवलोकयमानः को वा नेदं श्रद्दधीत?

निसर्गरमणीयायामस्यां प्रभातवेलायामेतस्य दृश्यमालोक्यते स्मातीव गौरवपूर्णमाकर्षकं च। वैरिणस्तर्जयन्तीव शिखरे प्रस्फुरन्ती ह्यमुष्य वैजयन्ती गगनतलमलङ्कुर्वतो भगवतो भास्वतस्तिरश्चीनैः किरणैर्दधात्यद्भुतां शोभाम्, तथापि नित्यनवं संविधातुर्विधातुर्दृष्टौ

नेयमभून्मर्षणीया नाम। अजस्रं स्तब्धीकृतकन्धरस्य हि शिरः कदाचिदानमत्येव नूनम्। अत एव हि भुवनमण्डलमाकम्पयतां शतघ्नी निनादानां प्रतिध्वनिभिः सह स्तब्धमिदं ध्वजोऽकस्मादेवनतमक्रियत।

हन्त! भुवनभर्तुर्मङ्गलमयेऽस्मिन्समये हृदयमवदारयतां शतघ्नीनिनादानां कोऽर्थः? मेवाडमण्डलस्य गौरवघोषिणी सेयं राजपताका च हन्त कथमवनामिताऽद्य दुर्दैवेन? स्फुटमियं राजवंशस्याऽमङ्गलसूचना। चकितदुःखितानां नागरिकाणां दृष्टिर्दुर्गाभिमुखं विलग्नाऽऽसीत्। किन्तु न किञ्चित्तत्र समदृश्यत जिज्ञासा व्यपगमाय। तोपध्वनीनामवसानोत्तरं सर्वत्र शान्तिः प्रसृताऽभवत्। शान्तिरपि कीदृशी? अमङ्गलमयी, शोकशबला, श्मशानिकी! विषण्णवदनानां जनानां दृष्टिर्व्यलीयत दुर्गस्य प्रधाने द्वारे। दृष्टम् श्वेतवस्त्रधारिणाम्, कालचिह्नाङ्किताः श्वेतपताकाः संवहतामश्वारोहिणां पङ्क्यः प्रावृण् नदी पूरा इव त्वरितं विनिर्गत्य परितः प्रसृता अभूवन्। सर्वतः प्रचरतामासीत्तेषां घोषणा– ''महाराणा स्वर्गवासी जातः। त्रयोदशदिनानि राज्यमात्रेऽभिमन्येत शोकः कनीयान् राजकुमारश्च महाराणासिंहासनमलङ्कुर्यात्। स्वर्गगतस्य भूमिभर्तुः श्मशानयात्रा च भेवत्सम्प्रति दिवसस्यैकादशवादने।''

राजमार्गतटे वीथिनिकटे रथ्यामुखे चतुष्पथसम्मुखे च सर्वत्र समभूज्जनानां सङ्घट्टः। प्रासरत्सर्वत्रेयमेव चर्चा– ''कथं नाम जातो लघीयान् राजकुमारो महाराणा? युवराज–सङ्ग्रामसिंहस्याऽधिकारः कथमयमकाण्डेऽवहेलितः? मेदपाटस्य चिरन्तनी मर्यादा कथमद्य मूलघातं विहता? युवराजः किमन्यायस्यास्य न कुर्यात्प्रतिशोधम्?' नगरनिवासिनः सर्वेऽप्येकमतेनाऽऽसन् युवराजस्य पक्षपातिनः। आसन्सर्वेऽपि प्रतीक्षमाणा राजकुमारस्याऽऽदेशम्। केवलमासीद्राजकुमारस्य रसनापरिचालने विलम्बः, न त्वासीद्विलम्बः पुरवासिसन्नाहे। सर्वतोऽपि प्रसृतोऽभूदन्यायस्य भीषणो विरोधः।

आसीद्युवराजः सङ्ग्रामसिंहो निश्चलमवस्थितः। हृदयगतः पितृशोको मौलिकबिन्दुरूपेण नयनसलिलाभ्यां प्रवहन्नासीत्। मन्ये तेनैव सह प्रतिशोधस्य भावनापि। त्यागस्य दिव्यं ज्योतिः जागर्ति स्म तन्मुखे। धीरः स हि सर्वं निश्चितवान् हृदये। निजं प्रियतममश्वमारुह्य दुर्गाद्बहिरभवत्। करुणया हृदयविदारणं दारुणमासीदिदं दृश्यम्। पौराः पूर्वत एव युवराजस्य कृते समुत्कण्ठिता आसन्, सम्प्रति विषण्णमनसा बहिर्गच्छन्तमिमवलोक्य सर्वेऽपि परितः परिवार्य तुरगस्य पश्चादन्वचलन्। सर्वेऽपि नीरवाः प्रावर्षन्नश्रुबिन्दून्वि–लोचनाभ्याम्। गच्छताममीषां परिसमाप्यत नगरसीमा। विचारनिमग्नो युवराजः प्राबुध्यत साम्प्रतम्। स हि सङ्घशोऽनुसरतो नागरिकानालोक्य निर्विचलस्वान्तः सान्त्वेन समबोधयत्– 'मम प्रणयप्रकाशिनो नगरनिवासिनः! यदि सत्यमेव मय्यनुग्रहः प्रणयश्च भवतां तर्हि मानयत मेऽन्तिमं सन्देशम्। निजनिजगृहान्परावृत्त्य स्वीकुरुत नवीनस्य वोभूमिभर्तुराधिपत्यम्।'

नगरनिवासिनो निजयुवराजस्याधिकाराणां कृते समभूवन्सन्नद्धाः समराय, किन्तु युवराजस्तान्प्राबोधयद्बहुधा– ''मेदपाटीयवीराणाममूल्यमिदं रक्तं राजवंशस्य गृहकलहे माभूत्प्रवाहितम्।'' प्रत्यक्षमिदं दृश्यं श्रीरामस्य वनवासयात्रामस्मारयन्नूनम्। विनयानता जनता

प्रिययुवराजस्य करुणार्द्रमिमनुरोधं दु:खिना हृदयेनाऽभिमन्य परावर्तत यथाकथञ्चिन्नगराभिमुखम्। सर्वेषां मुखे सेयमेकैव चर्चाऽऽसीत्– 'कथमयमन्यायोऽभवत्?' किन्तु पर्वतैः पराहतः प्रतिध्वनिः प्रत्युत्तरमदात्– 'राजनीतौ एवमेव भवति।' विषादजनितं मूकभावं भञ्जन्तो वृद्धा अनुभविनोऽपि प्रोचुः– 'रामसदृशाय ज्येष्ठपुत्राय किमिति पुरा वनवासोऽभवत्? शिशोर्ध्रुवस्य तिरस्कारः किमित्यभूत्?'

## ( २ )

युवराजस्य प्रियामाता मेवाडमहीभर्तुः प्रधानमहिषी शिशुं षड्वार्षिकमिमं सङ्ग्रामं जनतायाः स्नेहाश्रये परित्यज्य, अद्यतोऽष्टादशवर्षेभ्यः पूर्वं प्रातिष्ठत् परलोकम्। अद्य मृतस्य मेवाडमहीभर्तुर्द्वितीयविवाहोत्तरं द्विगुणं प्ररूढः प्रजाप्रणय एव बालयुवराजस्याकरोदसामान्यं पालनं पोषणं च। एवं परिस्थितौ मेदापाटीयजनता निजयुवराजस्य कृते किमिति न भवेत्प्रमत्ता? किन्तु मान-ममतामय्यां मेवाडमृत्तिकायां क्रीडया प्रवृद्धो युवराजोऽपि केवलं निजविमातुर्दोषेण तामेव मृत्तिकां निजप्रणयिनां रुधिरेण कथमिव शक्नुयाद्रञ्जयितुम्? केवलं निजस्य हिताय परस्सहस्राणां मेवाडवीराणां कथमिव सङ्घटयेत्समरम्? युवराजो वीरो हृदि धीरश्चासीत्, सहि सर्वस्वं परित्यज्य सिद्धार्थ इव महतेऽर्थसाधनाय गृहाद्बहिर्भवितुमासीत्प्रभुः। अत एव निजभाग्ये भरवशमाधाय पर्यचलदज्ञातां दिशम्।

मेदपाटस्य सीमानमधिगम्य स हि प्रियाया निजमातृभूमेरधारयद्रजः शिरसि। सभक्ति चान्तिमं प्रणामं विधाय वाष्पपूर्णाभ्यां नेत्राभ्यामयाचदनुमतिं बहिर्गन्तुम्। ततो धीरोऽपि भासक्रान्तमना विदेशाभिमुखमकरोन्मुखम्। त्वरितगामी तस्य तुरगो वायुना बद्धस्पर्द्ध इवालङ्घयदध्वानम्। आसीत्तस्याग्रतो महत्त्वपूर्णमेकमात्रं लक्ष्यम्, पृष्ठतस्त्वभूद्वाजिखुरविधुता मार्गधूलिः।

युवराजोऽनवरतमासीन्मार्गमवलङ्घयन्। रात्रौ विश्रम्य समस्तं दिनमकरोद्यात्राम्। विश्रमस्थाने-युवराजस्य राजवेषमवलोकयन्तः प्रायः पप्रच्छुरपरे पथिकाः ''को भवान्, कुत आगम्यते कुत्र च गन्तुमध्यवसायः, किं च भवतः शुभनामधेयम्। उत्तरप्रदानं विना मार्गान्तरमलक्षयमाणः स हि सङ्क्षेपेण प्रावदत्– 'योधपुरस्य राजसेवकोऽस्मि। मेदपाटे सन्देशं प्रापय्य साम्प्रतमहमुपयाम्याम्बेरराजधानीं तदर्थमेव। नाम च मे विजयसिंहः।' एवं कतिपयदिनानि मार्गमुल्लङ्घयतोऽस्य। समभूदेकस्मिन्दिने दूरतो दृष्टिगोचरं तारागढदुर्गम्।

मनस्यभूत्किमिति मार्गपतितं तीर्थमहमुल्लङ्घयामि, कुतो वा न स्नामि पावनीकृतजनसमाजे पुष्करतीर्थराजे? स्वेच्छावशोऽसौ प्रायात्पुष्करम्। अरावलीपर्वतमालया परिवृतः पुष्करपरिसरः समभूत्सर्वतो मनोहरः। पर्वतोपत्यकायामासंस्तपस्विनामाश्रमाः, पवनोपनीतो येषां होमधूमगन्धः पुनाति स्म प्राणिनां बहिरिवाऽन्तः करणमपि। चतुर्दिक्षु विराजते स्म काचिन्नैसर्गिकशान्तिः। पाषाणरचितैस्तीर्थावतारैर्मनोहरः पुष्करसागरः

सततोत्थिताभिर्वीचिभिरुद्वेलितोऽभूद्यस्य तटपरिसरो नानाजातीयैर्मत्स्यैर्जलकुक्कुटैश्चाभिव्याप्तः। तीर्थराजस्य मध्यगता श्वेतपाषाणरचिता गुल्मटिका प्रकाशते स्म विकचं पुण्डरीकमिव।

युवराजो विमलजले स्नानादिना विगतपरिश्रमं तुरङ्गमं विधाय स्वयमपि सश्रद्धमस्नासीत्तीर्थराजे। स्वर्गमुपयाताय जनकाय जलाञ्जलिं वितीर्य विदधौ श्रद्धया श्राद्धम्। वत्सलस्य पितुः स्मरणेन द्विगुणीभूतशोकावेगस्यास्य प्रावहन्कपोलयोरश्रुनिर्झरिण्यः। किन्तु न कोऽपि मां परिचिनुयादिति भयेन शोकमिमं महता धैर्यावष्टम्भेन विष्टभ्य संस्थापयामास यथा कथञ्चिदात्मानम्। अधिककालं चावस्थानमनुचितं मन्वानः पुष्करराजं प्रणम्य पावनं तत्पयस्त्रिः प्राश्य पवनवेगं वाजिनमारुह्य पुनर्यथागतमाम्बेरराजधानीं प्रास्थित। चतुर्थेऽहनि चाम्बेरराजधान्याः समीपगतमात्मानमालक्ष्य विचारसागरे पुनरन्वभवन्मज्जनोन्मज्जनानि।

आम्बेरराजधानीं परितो लघुलघुषु पर्वतशिखरेषु सैनिकगुल्मानामद्भुतं दृश्यमजस्रम-धीरीचकार युवराजस्य वीरहृदयम्। उच्चावचेषु पर्वतशिखरेष्वावासितमिदमाम्बेरनगरम्। जलनिर्झरस्रावणः श्रावणश्चायं मासः। तदुपर्यनवरतं वर्षतो मघवतः सेयमुन्मादकरी सलिलझरी। दुर्गस्याधस्तात्प्रावृषेण्यवारिभिरुद्वेलितस्य 'मावट्ट' सरोवरस्य तरङ्गचञ्चले सलिले शिखरगतानां राजहर्म्याणां प्रतिफलन्प्रतिबिम्बः। सर्वमिदं सम्भूय निसर्गनिस्तरङ्गेऽपि युवराजस्यान्तरङ्गे नानाविधभावकल्लोलमुल्लोलयामास साम्प्रतम्। अस्तु नगरस्य प्रधानं गोपुरमतिल-ङ्घ्यप्राविशद्युवराजो राजधानीम्।

अकस्मात्स्मृतिपथमुपारूढं प्राक्तनं तद्दृश्यमनृत्यद्युवराजस्य चक्षुषोः पुरतः- यदा हि चित्रकूटराजकुमारीमात्मनो भगिनीम्, अम्बेरराजमहिषीं विवाहस्य पश्चात् प्रथमवारमयं चित्रकूटराजधानीमुपनेतुं समायासीदाम्बेरनगरीम्। अत्यनुपममभूदेतस्य तत्स्वागतम्। शतमश्ववाराः पुरतः, शतं च पृष्ठतोऽस्य सैनिकसज्जया सन्नद्धाः पर्यचलन्। आम्बेरमहीमहेन्द्रेण ससमारोहं प्रहितैः सर्वैरेव राज्यस्य प्रमुखसामन्तैः पुरस्य प्रधानद्वार एवास्य निरवर्त्यत स्वागतोपचारः। मङ्गलमुखीभिरन्तःपुरस्य परिजनसुमुखीभिर्वारवधूभिश्च मङ्गलकलशमुपनीय माङ्गलिकगीतैः कृतोऽभून्मङ्गलाचारः। कीदृशेनानिर्वचनीयेन समारोहेण राजहर्म्येषु तत्स्वागतमुपलक्ष्य बहुदिनानि यावद् गायकगुणिनां गीतिगोष्ठ्यः समभवन्। राजमहिषी, तस्य सहोदरभगिनी प्रहर्षपरवशा न माति निजाङ्गेषु। किन्तु अद्य? युवराजः स्वयमात्मानमवगोपयन् चौर इव निभृतं प्रविशति। नूनमपरिपठनीयलेखा सेयमेव भाग्यरेखा नाम!

## ( ३ )

साक्षादिन्द्रपुरीमपि निजवैभवाद्विडम्बयन्ती सेयमम्बेरनगरी सम्प्रति पूर्णविकसितं निजस्य यौवनमुपगम्य मदमत्तेव प्रादर्शयद्विभ्रमविलासान्। विकचदाडिमफल इवोच्चावचभावेन यत्र निबिडा जनवसतिरासीत्। अभ्रंलिहेषु प्रासादशिखरेषु स्वर्णमणिमयाः कलशाः किरणमालिनोराशिभिः शतगुणितं देदीप्यमानाः प्रददतीव देवनगर्यै युद्धघोषणाम्। महाराजस्य

पृथ्वीराजस्य बाहुदण्डाच्छायायां निर्भयमभिरक्षिता, न्यायपूर्णेन सुवृष्ट्यनुरञ्जिता च सेयं ढुण्ढारधरणिरनभिलक्षितकालातिक्रमं प्रमोदते स्म। इतरराज्येषु दुखायात्तस्य प्रतापाच्छार्दूलच्छागो निरातङ्कमापिबतः स्म पानीयमेकस्मिन् घट्टे।

अम्बेरनगरस्य गृहलक्ष्म्यो विनयविभ्रमशीलाः 'शीलावापिका'तो जलमाहर्तुं निरातङ्कमुपयान्त्यो लक्ष्यन्ते साम्प्रतम्। निसर्गादेव निर्भरहर्षाभिरद्य वर्षाभिरालक्ष्यन्ते गृहे गृहेऽपि प्रमोदप्रकर्णाः। अन्यसमये निरन्तरं भासमानोऽपि भगवान् भास्वानद्य निबिडनिबिडासु श्यामघटास्वात्मानं निह्नुते, कामयते च पृथ्वीराजप्रतापात्परिभूतस्यात्मनो लज्जामिव गोपयितुम्। राजधान्याश्चतुर्दिक्षु हरितहरिता भूमिरासीत्। क्रोशान्यावदासीदास्तृतमिव हरितास्तरणम्। मन्ये प्रकृतिपुरन्ध्र्या परावरपतेः प्रियतमस्य प्रसादनाय प्रसाधनमिव नवीनमिदमारचितम्। राजहर्म्यशिखरेषु सूर्यचिह्नाङ्किताः स्वर्णमयपताका आकाशमिव चुम्बन्त्यः प्रास्फुरन्। एवं किल नानाविधानि निसर्गमनोहराणि दृश्यान्वलोकयमानो युवराजः प्रायासीन्नगरस्य मध्यतः ।

यावत्किल रथ्यायामग्रतः प्रचलति तावन्निपपाताऽस्य दृष्टिः प्रमाणवेणुयष्टिमाददानस्य सैनिकवेषस्यैकस्य नवयुवकस्योपरि। किञ्चिन्मनसि निश्चित्य तत्रैवातिष्ठद्युवराजः। तुरगादवरुह्य तत्समीपमुपगतः प्रोवाच सोत्साहम्– ''अपि सम्भवति ममापि सन्निवेशः सेनायाम्?'' आसीत्तस्य नवयुवकस्य सैनिक सङ्ग्रह एव नियोगः। अत एव विजयसिंहस्य गात्रपरिमाणं स्वास्थ्यं च सेनोचितमालक्षयमाणोऽसौ चकार तमेवं सेनासन्निविष्टम्। विजयसिंहो नासीत्केवलं सैनिक एव प्रत्युत स हि समभूत्परपराभवदायकः सेनानायकः। निजपित्रा सह बहून् वारानयं गुर्जरमण्डले विजयलक्ष्मीमवाप्तवान्। तथापि नवनिविष्टेभ्यो दीयमानां सैनिकशिक्षां तथा गृह्णाति स्म यथा नितान्तमस्यामपरिचितः स्यात्। किन्तु नायमात्मानमधिककालं प्रबभूव प्रच्छादयितुम्। कतिपयसप्ताहेष्वेव सेनापरिचालनपाटवमस्याऽऽलोकयमानः सेनापतिस्तमेनं गुल्माध्यक्षमकरोत्।

राजकीयमश्वं त्रयोदशमुद्रामासिकं चाऽयमलभत। समस्तेऽपि स्कन्धावारे निजायाः सहृदयतायाः कारणाद्विजयसिंहः समभूत्सर्वेषां प्रीतिपात्रम्। व्यतिगतं निजस्य वृत्तं विस्मृत्य सह्यानन्देन सैनिकसेवितो व्यजीगमत्समयम्। शनैः शनैः प्रधानस्य सेनापतेरयं सर्वश्रेष्ठो विश्वासभाजनमासीत्। सैनिकमहत्त्वस्य मुख्यमुख्यानि कार्याण्यभूवन् क्रमशस्तदधीनानि। न केवलं तदीयगुल्मस्यैव, अपितु समग्राया अपि सेनायाः प्रत्येकं सैनिको विजयसिंहस्य कृते प्राणानां बलिं दातुमासीत्सन्नद्धः। दीनाः सैनिकास्तस्य मासिकवृत्तेरवशिष्टमवाप्नुवन्। दुःखितहृदयास्तस्मै निजवेदनां निवेद्य लघूकृतहृदयभारा इवासन्। पीडिताः सैनिकास्तत्कृतेन रोगोपचारेण निजां जननीमपि व्यस्मार्षुः। सर्वतः सेनायां तदिदमेवाऽश्रूयत– 'विजयसिंहो मनुष्यरूपे कश्चिदमरः'। यदि सत्यमुदीरितं न सिध्येदतिशयोक्तिस्तर्हि जानीत– आसीद्वास्तवेऽप्येवमेव।

( ४ )

पूर्वमिव सभायान्मेघध्वनिश्रावणस्तृतीयः श्रावणः। आम्बेरनगरी पुनः प्रमोदकरी समभासत विलासविभ्रमैः। राजहर्म्याणामधः स्थितं महासरोवरं पुनः पयः पूरैः प्रमत्तमिवाभवत्, यत्प्रवाहितं पयः सवेगं प्रवहद्दूरदूरप्रदेशानामुपचिकाय शोभाम्। विलासिषु नागरिकेषु सङ्घशः प्रारभ्यन्त गोष्ठीप्रमोदाः। नगरीसमीपस्थं प्रत्येकमुपवनं 'चूर्णमा'पूर्णमालक्ष्यत। मत्स्यावतारसंहारिभिस्तु निजभोज्यस्य कृते प्रक्षिप्तानि सरसि जालानि। 'भावट्ट' सलिले क्रौञ्चकारण्डवकुक्कुटाः क्रीडाकल्लोलमाकलयन्। मानुषीष्वेव किम्, महिषीष्वपि यौवनप्रमादः प्रारभ्यत यद्वशादितस्ततः केलिपरा अलक्ष्यन्त। गृहे गृहे गृहलक्ष्म्यो' साम्प्रतमुपेहि गेहम्, आशा मे लग्नेति प्रावृषेण्यगीतैराह्वयन्प्रोषितान्प्रियतमान्। गार्हस्थ्यसरस्तरणीयं रमणीयमण्डली वर्षागीतैर्मनो विनोदयन्ती समाहरति सलिलं वापिकाभ्यः। घट्टेषु जलैः पूरितेष्वपि न तासां पूरिता भवन्ति सखीभिः सह विश्रब्धालापाः। शिरसि जलकलशमावहन्त्योऽपि मिथो रात्रिप्रणयवार्ताभिर्मार्गमतिवाहयन्ति। गृहमासाद्य शिरसो घटाऽवतारणविलम्बः कामं क्षणमात्रायाऽप्यसह्यो भवेत्किन्तु सम्प्रति सखीसंलापे जलघटिकावाहिन्या घटिकापि न प्रतीता नूनम्। यासां स्तनन्धयो गृहे स्थितस्तास्तु सखीसमाह्वानेऽपि त्वरितपदैर्गृहाभिमुखमावर्तन्ते।

हन्त! विजयसिंहो यस्य श्मश्रुप्रवृद्धमासीद्, व्यतीतवार्तास्मरणेन मुहुर्वेपथुमिवा-ऽन्वभवद्धृदये, किन्त्वात्मनो गोपनाय नागरिकाणामानन्देषु ददौ सहयोगम्। अद्य तदधीनस्य गुल्मस्य रात्रौ राजहर्म्ये प्राहरिकतानियोगोऽस्ति। यथैव यामिकेन रात्रेर्दशटङ्कारः श्रावितास्तथैवायं शिबिरं परित्यज्य चचाल राजहर्म्याऽभिमुखम्। आसीत्परितः सूचीभेद्योऽन्धकारः। एकहस्तान्तरितमपि वस्तु नादृश्यतेति किम्, एकेन हस्तेनापरो हस्तो नाऽऽलोक्यत। भूमेरिदं कौतुकमालोक्य दिवि घनघटाघोरमकुर्वन्नट्टहासम्। पदमपि मार्गावलङ्घनमासीत्कठिनम्, किन्तु मुहुश्चमत्कुर्वत्याश्चञ्चलायाः प्रकाशे दूरपर्यन्तं मार्गमालक्ष्य विससार विजयसिंहः। गगनात्प्रारभ्यन्त मुक्तास्थूला वर्षाबिन्दवः, किन्तु सम्प्रति राज्यहर्म्यं नासीद्दूरे। अत एव त्वरितपदं वव्राज राजहर्म्ये।

प्रासादमालायाः प्रधानद्वारे प्राभवत्प्रदीपप्रकाशः। अत एव तत्प्रकाशप्रतिफलनेन वर्षाजलधारा रजताकाराः प्रतीयन्ते स्म। यथैव घटिकाया एकादशवादिताष्टङ्कारास्तथैव पूर्वप्रहारिकस्य समाप्यत नियोगः। विजयसिंहो जग्राह नियोगभारम्। सार्धघटिकाद्वयविगमोत्तरं द्वादशटङ्कारैर्यथैव निशीथस्य सूचनादत्ता, न तथैव मुशलधारावर्षमवर्षन्मघवा। परितो धाराप्रपतनरवैर्महान्नदः समुदभवत्। दूरतो झिल्लीझाङ्कारा येऽश्रूयन्त ते कर्णयोः प्रशान्ता अभवन्। सत्यम्, घोरतरे दुन्दुभिध्वनौ को वा शृणुयात्तूतिकारवम्? प्राहरिकगुल्माध्यक्षस्य यत्रासीत्स्थितिस्थानं। तस्य सविधगतमेवासीदम्बरवसुन्धरापुरन्दरस्य शयनमन्दिरम्, यत्र हि राजदम्पती विश्रब्धमन्वभूतां शयनसुखम्। वर्षाजलपूरैः शब्दायमानाः प्रासादनालिका दूरे त्वासन्नेव, किन्तु महानेको नालकः शयनमन्दिरस्य समीप एवापतद्यस्य कुट्टिमपाषाणोपरिप्रतनेन महान्नादोऽभवत्। वर्षाजनितौत्सुक्येन नानाविचारमग्नस्य विजयसिंहस्याऽवधानं नालकशब्दोपर्यकस्मादाकृष्यत। विचारे कृते स विचालितोऽभवत-

'हन्ताऽनेन घोररवेण भूपतेर्निद्राभङ्गो भवेत्।' कर्तव्यपरायणः स बहिर्गत्वा तृणपूलकमेकमानीय जलनितपनस्थानेऽस्थापयत् येन घोरः रवः सहसैवाऽशाम्यत् घोरवर्षया समभूवन्नार्द्राणि तस्य वस्त्राणि, परं नासीत्तस्योपरि भ्रूक्षेपोऽपि। स्वामिनो निद्राभङ्गो न भवेदेतस्यैवोपर्यासीत्तस्य लक्ष्यम्।

नालकस्य नीरनिपतननादे नरेन्द्रस्य निद्रायां वास्तव एव बाधकोऽभूत्। घोरशब्देन जजागार जगतीपतिः, किन्तु तन्निनादशान्तौ पुनर्निद्रामधिजगाम। सलिलपातस्य नियतसमये यदा निद्राभङ्गोऽभवत्तदापि दृष्टं यन्मेघस्तथैवाविरतं प्रवर्षतीति। निजगाद महाराजः – ''देवि! बहोः कालादद्य घोरो वर्षति घनः। नालकजलप्रपातरवेण मम निद्रा मध्ये व्यपगता, किन्तु मयाऽनुभूतं यत्तदैव स नालकशब्दो विरतः। साम्प्रतमपि दृश्यते, घोरवर्षा किन्तु नोपगच्छति कर्णयोः स नालक निपातनादः। चित्रम्, किमस्य कारणम्।''

''नाथ! साम्प्रतमेव कारणं निवेदयामि'' इत्युक्त्वा यथैव महाराज्ञी शयनमन्दिरस्य द्वारमुपतस्थौ तथैव सरभसमुपगताभिः प्राहरिकीभिर्द्वारदासीभिः सर्वमस्य कारणमवागच्छन्महाराज्ञी। प्रत्यागत्य निवेदयामास– ''सैनिकैः नालिकस्याधस्तात्तृणपूलका निहिताः। कारणमेतस्य सविनयास्ते एतदेव न्यवेदयन्'यदनेन वर्षानिनादो न भवेदन्नदातुर्निद्रायां बाधकः।' महाराजस्य का साम्प्रतमाज्ञा।''

**महाराजः** – अहो विचारशीला अमी सैनिकाः!

**महाराज्ञी** – न केवलं विचारप्रवणतैव, स्वामिभक्तिरप्येषामसामान्यैव। यैर्हि घोरवर्षा स्वशरीरे सोढ्वापि स्वामिनो हितचिन्तया तदिदं कार्यमप्रेरितैरेव कृतम्।

**महाराजः** – सामान्यप्राहरिकेषु नैतावान् विवेको बुद्धिश्च भवति। न चैवंविधाः प्राहरिकाः पूर्वं दृष्टा एव। अवश्यमिदं हृदयकौतुकं श्वो व्यपनयेयम्।

राजदम्पती पुनर्गाढनिद्रामवाप्नुताम्। विजयसिंहोऽपि स्वनियोगकालं परिसमाप्य शिविरं परावव‍ृते। आर्द्रवस्त्राणि विमुच्य शयनीयोपरि गाढनिद्रायाः क्रोडे व्यश्राम्यत्। प्रभातप्रायायां रात्रौ स्वप्नेऽयं किं पश्यति यत् श्वेतवसनावृता एकाऽत्यन्तासुन्दरी वदति– 'सङ्ग्राम! तव साधना सम्प्रति समाप्ता।' किन्तु विद्युदिव शीघ्रमेव नेत्रयोर्व्यलीयत। विस्मितो सङ्ग्रामसिंहो यावज्जागर्ति तावद्दृष्टं यज्जातं प्रत्यूषम्। अश्रूयन्त परितः कुक्कुटरवाः।

## (५)

प्राकाश्यन्त पूर्वगगने प्रकाशरेखाः। सौभाग्यसिन्दूरं पुरः प्रकाशयन्ती यथैव परिजहास प्राची तथैव साचीकृतमलिनमुखा नीचीबभूव प्रतीची। अरुणपुरस्सरो भगवान् भास्करो मन्दं स्मयमानो ददौ दर्शनं शैलशृङ्गस्याधस्तात्। अरुणवर्णास्त्वावरणाः श्वेतच्छटाविच्छुरितान् राजप्रासादान् लिलिपुः कुङ्कुमकर्दमैः। अम्बरनरेन्द्रस्य परितः श्रद्धाप्रकाशकरेषु देवमन्दिरेषु श्रूयन्त मधुर इव वल्लरी सहकारिणो। घनघण्टारवाः। अम्बावती पुरन्दर दुन्दुभिभवनेभ्यः

पटुपटहघोषसहकृताः सुमधुरसहनायिकारचनाः सहृदयमनस्सु तिलकमिव लिलिखुरासावरीमूर्तिम्। राजभवनेभ्यः प्रासरन्वनोपनीताः पार्थिवप्रबोधहेतवो मधुरवीणारवमिश्राः सङ्गीतकलावतामालापध्वनयः। शिबिरे सूर्यदनिभिः सह सूर्यचिह्नाङ्कितं सैन्यध्वजमुच्छ्रिमकुर्वन् सैनिकाः।

निद्राजनितमालस्यमवमुच्योत्तस्थौ विजयः। अक्षिणी परिमृज्य, उत्तरच्छं पदाभ्यां वृस्पनीय, त्वरितमवातरच्छयनीयस्याधस्तात्। प्रातःकालिकं शारीरककृत्यं विनिवर्त्य सैनिक वेषभूषाभिः सुसज्जितः समाययौ सैनिकाभ्यासप्राङ्गणे।' यथैवायं स्वनियोगमङ्गीकृत्यसमवैति सेनायां तथैव तुरगमारुह्य शिबिरेऽस्मिन्नतार्कितमायान्तमवालोकयदम्बरधरणी पुरन्दरम्। सेनापतेः सतर्कीकरणसङ्केतः सर्वानेव सैनिकान्समसूचयत्सावधानभवस्थातुम्। सेनामध्यमागत्यैव महाराजस्य तुरगः समभूदवस्थितः। विकोषान् खड्गानुच्छ्र्याय सैनिकैर्वादित्रध्वनिना संविदधे महाराजस्याभिवादनम्। अतर्किता प्रासरत्सर्वतो विनयविमिश्रा शान्तिः।

महाराजः सेनापतिमप्राक्षीत्–ह्यो रात्रौ द्वितीयप्रहरे के केऽभूवन्यामिकाः? सेनापतिर्नामग्राहमाजुहाव गुल्माध्यक्षम्। विजयसिंहः साधिकृतैः सैनिकैः सह सविनयमुपातिष्ठत सम्मुखे। महाराजः पप्रच्छ–''ह्यो रात्रौ नालकस्याधस्तात्केन निक्षिप्तो घासपूलकः, किञ्च तत्कारणम्?''

सेनापतिरनिष्टस्य भावनया बभूव भयभीतः। मा भूदन्यो राजकोपस्य भाजनमितिसर्वदा सैनिकसहायको विजयसिंहः साभिवादनमवादीत्– ''पृथ्वीनाथ! ममैवासीत्तदिदं कार्यम्। मास्तु राजदम्पत्योर्निद्राभङ्ग इति हि सेवकेनाऽनेन विभावितम्।''

स्वामिभक्तस्य सैनिकस्य हितपरायणतां निपुणतां चालक्ष्य गद्गदोऽभून्महाराजः। तुरगादवरुह्य सरभसमाशिश्लेष कण्ठे सैनिकमिमम्। किन्तु नेदानीं हृदयरहस्यं गोपायितुं प्राभवद्विजयसिंहः। अतिबलेनावरुद्धोऽपि वेगात्प्रावहदश्रूणां प्रवाहः कपोलयोः। महाराज साश्चर्यमवालोकयन्मुखं विजयस्य। यावद्विजयसिंहः स्वात्मानमवस्थापयति ततः पूर्वमेवाम्बरधराधिपस्तमेनं बाहुपाशे निबिडं बबन्ध। सगद्गदमवोचत् महाराजः – 'न भवान्विजयः। त्वमसि सङ्ग्रामसिंहः। किन्तु किमिति त्वया स्वमात्मामवच्छाद्य क्लेशोऽयं विसोढः?'

अश्रूणां गङ्गायमुनाप्रवाहेणाभिषिक्तौ द्वावपि समाजग्मतुः प्रासादमालाम्। अजागरुश्चेतसि प्राक्तन्यः स्मृतयः। अक्रीडन् हृदयरङ्गस्थलो सहानुभूताः पूर्ववृत्तान्ताः। महाराज्ञ्याः प्रमोदस्य नासीदस्य परिसीमा। भगिन्याः स्वभावसदयाद् हृदयात्प्रावहत्प्रवाहस्नेहः। साह्यद्य सम्भ्रान्तेव सर्वतो व्यचरत्प्रासादमालायाम्। अदीयन्त नानाविधा आदेशाः परिचारिकाभ्यः। व्यधीयन्त द्विविधाः समारोहाः सौख्यसञ्ज्ञानाम्। निरमीयन्त नानाप्रकाराणिः भोज्यव्यञ्जनानि। पितुः परलोकवासस्य समग्रं वृत्तान्तमाश्राव्यत्सङ्ग्रामसिंहः। चकितौ दुःखितौ च सर्वमिदमत्रौष्टां महाराज्ञी महाराजश्च। बहूनि दिनानि चाऽचलत्सोऽयमेवप्रकारः। व्यत्यगमन् विंशतिदिनानि पल इव प्रमोदविभ्रमेषु।

एतस्मिन् समयान्तराले आम्बेराधिपतेर्महाराजपृथ्वीराजस्य दूतो मेवाडमण्डलात्- प्रत्यागत्य शुभसंवादमश्रावयद्येन हि प्रमोदपारावारे द्विगुणतरास्तरङ्गाः समुदभवन्। महाराजपृथ्वीराजस्य प्रस्तावं स्वीकृत्य मेवाडस्य महाराणा ज्येष्ठभ्रातुः सङ्ग्रामसिंहस्याधिकारं सम्प्रति सम्प्रधारयति सन्नद्धश्चायमस्मै मेवाडराज्यं समर्पयितुम्। ज्येष्ठसहोदरस्य मेवाडराज्याधिगमेन नितान्तमुच्छ्वसितहृदयापि तस्येतः प्रस्थानमालक्ष्य वियोगकातराऽभून्महाराज्ञी। सङ्ग्रामसिंहो महाराज पृथ्वीराजश्चोभावपि तामेतां बहुधा पर्यसान्त्वयतां यत् साम्प्रतिकपरिस्थित्यां तस्य चित्रकूटप्रस्थानमत्यावश्यकम्। शीघ्रं पुनर्दर्शनं भवेत्सङ्ग्रामस्य। हन्त! भगिन्या स्वाभाविकः स्नेह एव तामीदृशमकरोत्कातराम्, अन्यथा तद् हृदयगतं प्रमोदं को वाऽनुमातुं प्रभवेत्? तस्या ज्येष्ठः सहोदरो मेदपाटमण्डलस्य महाराणा भवितुमितः प्रतिष्ठते, किमितः परमेतस्याः प्रियं स्यात्। सङ्ग्रामसिंहः सपारहासमभ्युत्थाय विनीत इव साञ्जलिबन्धमावेदयत्- "पृथ्वीनाथ! गुल्माध्यक्षोऽयमुपस्थापयति" यत् यस्मिन् सेनाविभागे सोऽयं सैनिको वर्षत्रयमयापयत् सोऽयं विभागो गच्छेन्मया सह मेवाडमण्डलम्, अधिवसेच्च तत्रैव। महाराजोऽपि तथैव भङ्ग्या सस्मितमवदत्- 'सामान्यगुल्माध्यक्षस्य यद्यपि नायमनुरोधो माननीयस्तथापि कार्यविशेषगौरवेण तदिदमङ्गी क्रियते।'

अद्याम्बेरनगर्यां प्रावर्षत्प्रमोदस्य मघवा। रमणीयवेषभूषाभिः सुसज्जिता सर्वापि सेना

सम्मुखमुपस्थिता। अवाद्यन्त परितो पङ्गलवाद्यानि। चारणा बन्दिगणाश्चागायन् स्तुतिगाथाः। स्थाने स्थाने समभ्रियन्त मङ्गलसम्भाराः। महाराज्ञी स्वहस्तेन सङ्ग्रामसिंहस्य तिलकमकरोत्। सङ्ग्रामसिंहश्च स्वभगिन्याश्चरणयोर्न्यददद्यान्मस्तकम्, सापि च तमुत्थाप्य, मस्तकमाघ्राय, प्रबलं वर्षस्तु विकचकुसुमेषु लोजेषु च, तमेनं विसर्जयामास। महाराजः पृथ्वीराजः सङ्ग्रामसिंहश्च द्वावपि पुरान्नीचैराजग्मनुः। जयघोषैर्मुखरिता अभूवन्दशदिशः। द्वावपि तुरगावारुह्य वर्षतां पुष्पाणामास्मरणं तुरगखुरैः क्षुन्दन्तौ पुष्पवन्दनमालाभिलङ्कृतां राजरथ्यामति चक्रमतुः। अतर्कितमेव तोपध्वनिभिर्गगनमगुञ्जत्। अयमेव किल चित्तौडाधिपतेर्महाराणासङ्ग्रामसिंहस्य राजोचितःसम्मानः। महाराजपृथ्वीराजस्याऽऽलिङ्गनं विधाय यथैव तच्चरणा प्रणामाभिमुखोऽभवत्सङ्ग्रामसिंहस्तथैव महाराजस्तमेनं मध्य एवावरुद्ध्य साश्रुगद्गदमवादीत- 'सङ्ग्रामम् अस्त्रंमियता! मेवाडमण्डलाधिपतेर्यदुचितं तत्कृतं भवता।'

तोभध्वनिभिः प्रतिध्वन्यमाने गगने, दुन्दुभिध्वनिभिरापूर्यमाणेषु च दिग्मुखेषु सङ्ग्रामसिंहश्चित्रकूटाभिमुखं प्रातिष्ठत। महाराजो महाराज्ञी च निर्निमेषया दृष्ट्या समपश्यतां तावत्, यावत्तुरगखुरधूसरः समदृश्यत मार्गः।

चित्तौडमुपगतस्य समभूत्सङ्ग्रामसिंहस्य राजतिलकम्। 'महाराणा साँगा' नाम्ना अयमेव भारतेतिहासेऽमरतां दधारेति जानन्त्येवेतिहासविदः।

## अमूल्यं वस्तु

कश्चिद्देशमेको राजा प्रशास्ति स्म। नासीत्तस्यैकोऽपि पुत्रः, केवलमासीदेका कन्या। तां स पुत्रवदैषील्लोकं चावदद्यन्ममाऽनन्तरमेषैव सिंहासनस्य शोभां वर्द्धयिष्यति। राजा तच्छिक्षायै विदुषो बुद्धिमतश्च पण्डितान्नियुक्तवान्। राजपुत्री तु स्वल्पकालेनैव स्वपरिश्रमेण सर्वविद्या- म्पन्नाऽजनि। यावत्सा पञ्चदशवर्षायुरभवत्तावत्तत्परिणयार्थमन्यराजवंशेभ्यः सन्देशा आगन्तुमारेभिरे।

राजा सम्बन्धस्य वार्तां वारं वारं पर्यहरत्। एकदा तस्य मन्त्रिणस्तं प्रार्थयन्त- 'महाराज! राजकुमार्या विवाहसम्बन्धोऽधुना तु कुत्रचिन्निश्चितः कर्तव्यः।' राजाऽवदत्- 'सम्यगुक्तम्। श्वो राजकुमार्या सह वार्तालापं करिष्ये।' अपरेद्युः राजा स्वकीयं प्रधानमन्त्रिणमाज्ञापयद्यत् सम्प्रति देशदेशेषु घोष्यतां यद्राजकुमारी तमेव राजपुत्रं वरयिष्यति योऽमूल्यं वस्तु समानीयोपहरिष्यति।

इमां घोषणां श्रुत्वा दूरदूरदेशेभ्यो राजपुत्रा एकैकशो बहुमूल्यानि वस्तून्यादायोपस्थितानि

कर्तुं प्रारप्सत। कश्चिद् बहुमूल्येन बृहद्धीरकेणाऽगच्छदन्योऽद्वितीयं कृपाणमादायोपस्थितोऽभूत्। अपरसतु महार्घ्यं चीनांशुकमानैषीदेवं बहवो राजपुत्रा अनेकानि वस्तून्यानैषुः। किन्तु राजकुमारी सा तानि दृष्ट्वा 'नैतानि ममाभिरुचितानि' इत्युक्त्वा प्रतिददाति स्म।

एवं स्वल्पकाले गच्छति राजस्थानस्यैको राजपुत्र आगच्छत्। तस्य कापि शोभासामग्री नासीत्। स एक एवाश्वमेकमारूढः सन्नागमत्। आगत्यैव स स्वागमनसूचनामकारयत्। राजभृत्याश्च तमवदन्– 'किं मुधा कष्टमनुभवति भवान्। महान्तोऽत्रागच्छन् प्रतिगताश्च। सा तु विक्षिप्तचित्ता जातेति प्रतीयते। न कस्यापि किञ्चिदपि शृणोति'। राजकुमारोऽवदत्– 'न काचित्क्षतिः, यूयं तु केवलं ममाऽऽगमनसूचनां तस्यै दत्त'।

राजकुमारी यथापूर्वं सूचिता। राजकुमारो बहिरश्वं बध्वा राजकुमार्याः सविधमुपस्थातुमन्तःपुरप्रासादस्य द्वारं प्राप्तः। बहिर्भवने त्वयमुपविवेश, अन्तस्तु जवनिकान्तरिता राजपुत्री व्यराजत। राजकुमार एकं हस्तवस्त्रम् (हैण्डकरचीफ, रूमाल) यस्याञ्चले किञ्चिद्बद्धमासीद्दास्यै दत्वा राजपुत्र्यै समर्पयेत्युवाच। दासी खण्डवस्तं गृहीत्वा तिरस्कारसूचकं हास्यं चकार। सोंऽशुको राजकुमार्या हस्तं यावत्प्राप्नोति तावद्राजकुमार एवं कथयितुमारेभे–

वर्षद्वयादारभ्याऽद्यावधि, एषोऽहं जगति पर्यटन्नस्मि। अनेकानि वनानि, बहूनदीन्, कतिचित्सागरान्, बहुतराश्च नदीः साभिलाषं व्यलोकयम्। बहून्यमूल्यानि वस्तून्यन्वैषयं च। किन्तु तान्यादाय यदा प्रत्यागच्छन्नासं तदा किं पश्यामि यदेकं क्षुद्रराज्यमाक्राम्यन्ती पराक्रान्तस्यैकस्य भूपतेः सेना युद्ध्यमाना तिष्ठति। लघुराज्यस्य सैनिका बहु युयुधिरे किन्तु वराकास्ते विशालसेनासम्मुखे किं कुर्युः? तदैव क्षुद्रराज्याधिपतिः कैश्चित्सैनिकैः सह दुर्गद्वारमुद्घाट्य स्थितोऽभवत्। एवं सति दुर्गं प्रवेष्टुमाक्रमणकारिणो राज्ञः सेना सरभसमग्रेऽधावन्, महद् युद्धश्चाभवत्।

राजा स्वल्पसैनिकैः सह शत्रुसेनां नाशयन्नासीत्। आक्रमणकारिणो राज्ञः सेना बह्वीं हानिमनुभूयाऽप्यग्रे गन्तुं न शशाक। अकस्मात् कृपाणं चालयतो राज्ञो दुर्गस्य प्राङ्गणात्पादः प्राऽस्खलत्। यावत्स सावधानो भवति तावच्छत्रुखड्गस्तस्य कण्ठोपरि पतितः, तत्क्षणमेव स वीरगतिं प्राप्तः। मया तु पौरुषस्य, साहसस्य, जन्मभूमिप्रेम्णश्चेदृशं निदर्शनं[१] न कदापि पूर्वं दृष्टम्। परिपन्थिनो[२] निर्ममुः। अहमपि राजार्थं द्वे अश्रुणी तत्रैव प्रावाहयम्। प्रत्यागमनकाले च जनन्याः सुपुत्रस्य भस्मीभूतशरीरस्य तस्यैव रक्तरञ्जितामिमां मृत्तिकां बध्वाऽऽगतोऽस्मि। मम बुद्ध्याऽस्माच्छ्रेष्ठतरं किञ्चिदपि वस्तु जगति न भवितुं शक्नोति।'

राजकुमारी सर्वा वार्ताः श्रुत्वा स्वपितरमाजुहाव अवदच्च– 'यदि भवन्त उचितं मन्यन्ते तर्हि राजपुत्रेणानेन सह मत्सम्बन्धो विधीयताम्। यतो मे मतावयं वीरोऽस्ति। वीरत्वस्य मूल्यं जानाति। प्राणव्ययेनापि चासौ भवतां देशं सिंहासनं चाऽभिरक्षेत्।'

राजापि राजपुत्र्याः कथनेनाऽनुमतोऽभवत्। राजकुमार्या विवाहं तेन राजकुमारेण सह चकार। राजकुमारस्तत्रैव राज्यस्याधिपतिर्भूत्वा न्यवसत्।*

**जन्मभूमेश्च धर्मस्य यशसश्चाभिरक्षणे।**

**ये प्राणानां बलिं प्रादुस्तेभ्यः किं मूल्यवत्तरम्।।**

१. दृष्टान्तः। २. शत्रवः।

* कथाया अस्या उपकरणानां सङ्ग्राहकः पं. हरिनारायणचोयल, बी.ए.।

## असमसाहसम्

**कन्दुको भित्तिनिक्षिप्त इव प्रतिफलन् मुहुः।**
**आपतत्यात्मने नूनं दोषोऽन्यस्य चिकीर्षितः।।**

### प्रथमः परिच्छेदः
### ''कोऽयम्''

**'न नाम सत्यमिह गोपाय्यते'**

सेयमद्य दशतोऽधिकानां वत्सराणां वार्ता। सम्प्रति लक्ष्मीदेव्याः कृपाकटाक्षतः सुखेन कालं क्षिपामि। सुघटितगवाक्षसनाथं त्रितलं मे सदनम्। भोजनाच्छादनमपि यथा सम्पन्नानां तथैव निर्वाह्यते। सेयमेकैव वार्ता, सर्वमप्यावश्यकं न मे परिहीयते इति। परं यस्य समयस्याऽयं वृत्तान्तस्तदा न मे साधीयसी समभूदवस्था।

पाश्चात्यचिकित्सापरीक्षायां लब्धपदकस्य मे पञ्चाधिकाः समत्यगुः संवत्सराः। समधिकमनःप्रणिधानेन चिकित्समानस्यापि मे नायान्ति स्म तदा भैषज्यालये रोगिणः। तदवधि

न यश:सौरभमेव मे प्रासर्पन्नापि वा धनसमृद्धिरेव समभूत्। आत्मानमवकर्षन् महता कष्टेन कालमयापयम्। भैषज्यभूताविष्टो न चान्यत्कार्यमपि किञ्चन् समशिक्षिषि, येन वान्यान्यैरेव व्यापारै: पूरयितुमपारयिष्यं कार्यकलापम्। इतस्तत: पर्यालोचयमान: सर्वदा विषण्णवदन: समभूवम्।

एकदा समस्तमपि दिवसं कांश्चन रोगिण: प्रतीक्षमाण: शून्ये भैषज्यालये इतस्तत: परिवर्तनैरत्रासयं वेत्रासनम्। विशालेऽपि राजनगरे न कोऽपि पथिपरिभ्रष्ट: समायासीच्चिकित्साभिलाषुक:। समधिकं विषण्णानन: सायममुद्रयं चिकित्सालयद्वारम्। प्रविश्य चान्त:सदनमुपाविशं गवाक्षे। अस्मिन् समये बाढमासीत्सन्ध्या, पूर्वनैशान्धकारलहरी परिखेलति स्म परित:। आत्मनोऽवस्थां विचारयमाणस्य कियानेव काल: समत्यगात्तावदेव प्राविशत्परिचारक:, प्रावदच्च– ''बहि: कश्चन पृच्छति भवन्तम्।''

बहिरागत्य दृष्टं यत्कोऽपि सभ्यपुरुषस्तिष्ठति भेषजालयद्वारे। वय: परिमाणे तु पञ्चविंशे वर्षे वर्तमान इव समभासत। स्वच्छे परिधानीये स्फुरति स्म श्मश्रुकलाप:, यो हि मद्दृष्टौ दृश्यते स्मावश्यकतातोऽधिक:। मामालोक्य निजगाद–''भवानेव वैद्यमहाशय:''

''आम्। आगच्छन्तु भवन्त:'' इति प्रत्युत्तरयन्नेव समुदघाटयमौषधालयम्। वेत्रासनमध्यास्यैव प्रोक्तममुना–''भवत: सन्निधानमागतोऽस्मि, कारणं तु कल्पितमेव भवेत्। अस्ति मे शरीरमस्वस्थम्''।

प्रोक्तं मया– ''किमस्ति''

**सभ्य:**–कतिपयैर्दिवसैर्भवति मध्येहृदयं पीडा। समये समये तु श्वासप्रश्वासोऽपि भवति समधिकं कष्टकर:।

अहम्–अङ्गरक्षकमिदमवतार्यताम्, साधु परीक्ष्य निर्णेष्यामि।

नात्रसमुल्लेखावश्यकता, यदेतावति समये चिकित्सालये कृत आसीत्परिचारकेण दीपोद्योत:। अस्तु. रोगिण: कायं न स्पृशेद् बाह्यो वायुरिति चिन्तया मया पिहितं गृहद्वारम्। प्रदीपप्रकाशे निरावरणममुष्य वक्ष:स्थलं सुदृढ़ं सुस्थं चालोक्यत्। कतिपयमुहूर्तैर्यन्त्रेण साधु परीक्ष्यापि न प्रापं रोगलक्षणम्, रोगसूत्रपातचिह्नं वा। अन्ते त्वगादिषम्–''नाहं पश्यामि चिन्ताकारणं भवत:। नास्ति शरीरे रोगलेश: श्रीमत:।''

अङ्गरक्षणं पुन: परिदधता प्रोक्तं तेन–''तर्हि किमिति मे पीडा भवति''

अहम्– प्रायो दृश्यते, साधारणकारणैर्मध्ये मध्ये भवति मांसपेशीषु पीडोद्भव:। एवमवस्थायां हृदयान्तर्भवति वेदनेति सर्वोऽपि परिलक्षयति। मन्ये भवतोऽपि स एव भ्रम:। नाहमत्र भावयाम्याशङ्काकारणं भवत:।

कक्षसम्पुटकाद् दशमुद्रामूल्यं शुल्कपत्रमाकृष्य तेन दत्तं मे विस्मितस्य हस्ते। सत्यभाषणे नाहं जिह्रेमि, एतावत्कालं केनापि रोगिणा न दत्तान्यासन्नेकवारमेव दश रूप्यकाणि। मयेदं शुल्कपत्रं परावर्तयितुमभ्यलष्यत। प्रोक्तम्–''गृहागतान् रोगिण: परीक्षमाणो न गृह्णानि परीक्षणद्रविणम्। केवलमौषधशुल्कमाददामि।

सभ्यः-परं ये सन्ति दीनास्तेभ्यः, ये तु दातुं प्रभवन्ति तेऽत्र समागत्यापि निजसदने वा भवन्तमाहूय दास्यन्त्येव।

कुण्ठितकण्ठेन प्रोक्तं मयका- ''यद्येवमेव भवतो मनीषा, तदापि दशमुद्राग्रहणस्य न मेऽधिकारः। मुद्राद्वयमेव रोगिपरीक्षणस्याहं गृह्णामि।''

स्मेराननः प्रावदद्युवकः- ''महोदय! नात्र सङ्कोचावसरः। स्वतः प्रसन्नोऽहमिदं प्रददामि। श्रीमता चिरप्ररूढा मे दुर्भावना दूरीकृता, एवं चिन्तने तु न किमपि मया प्रदत्तमित्येव पर्यवस्येत्।

अन्ततः शुल्कपत्रं गृहीत्वा मयैव नवीननाटकमिदं परिसमापितम्! युवापि तद्दत्वा द्रुतमेव भैषज्यालयाद् बहिरभवत्। मया पूर्वमाकलितमासीद् यद् गमनसमये प्रक्ष्यामि नामधेयं युवकस्य, परं न तत्कर्तुमपारयम्। दश मुद्राः प्रदत्ता इति रोगिनामजिज्ञासायां सङ्कोच इव समभूत्। विविक्ते तु व्यचारयं पुनः पुनः ''कोऽयम्''।

## द्वितीयः परिच्छेदः
## ''किं वा अङ्गुलिं छिनद्मि''।

व्यत्यगाद् भूयान् समयः। उपरि वर्णितो युवको न पुनर्मे दृष्टिगोचरोऽभवत्। ममावस्थापि पुनः ''यथापूर्वमकल्पयत्'' अभवत्।

एकदा सान्ध्यभोजनतो निवृत्तो वीक्षमाण आसं किञ्चन भैषज्यपुस्तकम्। सहसा समागत्य निवेदितं भृत्येन- ''भोजनं कुर्वाणेष्वेव भवत्सु समायासीत्कश्चन। स चाह्वयति श्रीमतः क्वापि नेतुम्। बहिस्तिष्ठति''

वेषभूषादिभिः सज्जयित्वात्मानं शीघ्रमेव बहिरागमम्। बहिरागतं मां प्रणम्य प्रावादीदेषः-''आह्वयति भवन्तं मत्स्वामी, शकटिरपि सह मयाऽऽनीता। अध्यारोहतु श्रीमान्''

सत्यं मया दृष्टं यद् भाट्यानीता शकटिरेका तिष्ठति। अहमपि विना वाक्यव्ययं धमिति समारोहं शकटिम्। भृत्यात्किमिति न मया पृष्टं कोऽसौ भवत्स्वामी इति भावना मद् हृदये वारवारमखेलत्। कियद्दूरं गत्वा द्वितलस्यैकस्य सदनस्य सम्मुखमतिष्ठच्छकटिः। अग्रे अग्रे गच्छतो भृत्यस्य पृष्ठतः प्रयानहं प्राविशं तत्सदनम्। न चाहमश्रृणवं कलकलं जनस्यापरस्य। अस्तु. इतस्ततः परिभ्रामयन्भृत्यो द्वितीयस्मिन् खण्डे मामनयत्। प्रादर्शयच्च, अपावृतकपाटं प्रकोष्ठकमेकम्।

प्रकोष्ठकेऽस्मिन् तमःप्रतीपः प्रज्वलति स्म प्रदीपः। प्रान्ते च विरलं वस्तुविस्तरं वहन्ती चतुष्पादिकैकाऽसीत्। तत्सम्मुख एव च वेत्रासनोपविष्टस्तिष्ठति स्म पुमानेकः। वेषभूषा चास्य धनिनामनुरूपाऽऽसीत्। स चायं दृष्ट्वैव मामुदतिष्ठद्वेत्रासनात्। मह्यं स्थातुमिङ्गितं कुर्वन्स्वयमुपाविशत्। प्रावोचत् च- ''मन्ये न मां प्रत्यभिज्ञातुमपारयद्भवान्''।

अहह! सर्वथा प्रत्यभ्यजानाम्! स एवासीदयं पूर्वपरिचितो युवकः। साम्प्रतं नासीदस्य

तादृशं श्मश्रु, तथापि दृष्ट्वा वदनसन्निवेशं श्रुत्वा कण्ठस्वरं सम्यक्प्रत्यभ्यजानाम्। प्रश्नस्योत्तरं प्रदामहम्–''किमिति न पारयिष्यामि प्रत्यभिज्ञातुम्? किं नु भवतः पुनः प्रादुरभूत् काचन दुर्भावना?''

**युवकः**– नैव। श्रीमता साकं काश्चन गुप्तवार्ताः कर्तुमभिलषामि।

चिकित्सकैः साकमनेकाः सम्भवन्त्यप्रकाशनीया वार्त्ताः। मया केवलमिदमेवोत्तरितम्– ''कथयतु भवान्''

मदन्तिकमुपसर्पन् मन्दस्वरेण प्रोक्तवान् युवकः– ''आवयोर्यो भविष्यत्यधुना संलापः स गुप्त एव स्यात्''

**अहम्**–चिकित्स्यचिकित्सकयोरालापः सर्वदा गुप्त एव भवति।

**युवकः**–रोगिणश्चिकित्सामन्तरा किमप्यन्यत्कर्तुं न मन्ये स्याद्विचिकित्सा भवतः?

**अहम्.**–अन्यत् किम्?

**युवकः**–किमप्यङ्गं छेत्तुम्!

**अहम्**–कस्यां कस्यांचन पीडायां समये समयेऽङ्गच्छेदनमप्यावश्यकमापतति।

**युवकः**–यदि च पीडा न भवेत्?

**अहम्**–तर्हि सुस्थमङ्गं किमिति च्छेत्स्यामि?

**युवकः**–यदि स स्वयमेव च्छेदयितुं वाञ्छेत्?

**अहम्**– स नूनमुन्मत्तः स्यात्, किं वा कुटिलं तस्य मनीषितं स्यात्। सुस्थाङ्गच्छेदनं किं न भिषजः कर्तव्यम्?

**युवकः**– वार्तामहं प्रकाश्यरूपेण वदामि, तदा मन्ये भवेदिदं हृद्गतं वः। छिनत्तु भवान् मदीयामेकामङ्गुलिम्। प्रदास्याम्युपहाररूपेण श्रीमते सहस्रद्वयं मुद्राणाम्!

द्वे सहस्रे मुद्राः! द्वे सहस्रे!! राशीकृतमेतावद् द्रव्यं नैतावत्पर्यन्तं ममासीद् दृष्टिगोचरमपि! वार्तेयं साधारणतः श्रवणे नर्मनिगदितेव प्रतिभाति, तथापि यद्दत्तवान्पुरा मुद्रादशकं तत्तदवधि स्मरणमधिरूढमासीत्, किन्तु किमिति सुस्थामङ्गुलिं छेदयितुं कामयते, किमिति वा राशीकृतमेतावद् द्रव्यमञ्जसा प्रदातुमुत्सहते इति नांशतोऽपि प्राभूवं सम्यक् संवेदितुम्। किमपि विचार्य प्रोक्तवान्– ''भवतोऽङ्गुलौ काचन वर्तते नु पीडा''?

**युवकः** – न कापि।

**अहम्** – तर्हि किम्, अङ्गुलिरेव कुरूपेव दृश्यते?

''प्रत्यक्षं वीक्षतां भवान्'' इति वदता दर्शिता युवकेन हस्तयोरुभयोर्दशाप्यङ्गुलयः। हस्तयोः, अङ्गुलीष्वेव वा न काप्यासीदंशतोऽपि प्रसौन्दर्यापहारिणी त्रुटिर्नाम। प्रत्युत साम्प्रतं हस्तो दृश्यते स्म विकचपङ्कजोपमः। मया प्रोक्तम्–''तर्हि किमिति वाञ्छन्ति भवन्तश्च्छेदयितुमङ्गुलिम्?''

मन्दं हसन् प्राह स्म युवकः– ''तन्न प्रकाशयिष्यामि भवतोऽन्तिके''

**अहम्**–भवतोऽङ्गुलौ न काचन पीडा, नापि च कश्चन कठिनो रोग एवास्ति। तथापि

भवान् सुस्थं सुन्दरं च करं छेदनलाञ्छनेनाऽमङ्गलं विकलं च कर्तुमादिशति माम्? नेदं भिषजः कर्तव्यम्। नाहं कर्तुमभिलष्यामि कार्यमिदम्।

**युवकः**–एवं चेत् किं मे फलं वाक्यव्ययेन। नेतोऽधिकं वक्ष्यामि, केवलमिदमेव मे पुनर्वक्तव्यं यदियं नौ वार्ता तिष्ठतु गुप्तैव।

''निश्चिन्तेन भाव्यं भवता, नेदं सम्भवति कदाचन'' इति वदन् प्रस्थातुमुदतिष्ठतम्।

किं मया दृष्टं यन्मे हस्ते पञ्चशतमुद्रामूल्यमस्ति शुल्कपत्रम्! स्पष्टमुक्तं मया–''किमिदं दत्तम्! पश्यतु मनाक्, प्रमाद्यति भवान्!''

**युवकः**–कः प्रमादो जातः? स्पष्टमुच्यतां मे।

**अहम्**–भवता भ्रमेण मे दत्तं पञ्चशतमुद्रामूल्यं शुल्कपत्रम्! न चैतत्प्राप्तुं मेऽधिकारः। यतो हि न मया किमपि चिकित्सितं भवतः, नापि वा तस्मिन्विषये सहमतिरेवसाधीयसी दत्ता। व्याधिग्रस्तान्नियतद्रव्यं ग्रहीतुमस्त्यस्माकं नियमः, सर्वाङ्गसुस्थाद् ग्रहणस्य नास्ति।

**युवकः**–नैव। रूप्यकाणीमानि भवत एव स्वत्वमभ्युपयातुमर्हन्ति। मया यत्प्रोक्तं तत्परस्ताद् विचारयतु भवानेकवारमेकान्ते। स्वेच्छयैवाहमात्मनोऽङ्गुलिं कामये च्छेदयितुम्। नात्र पश्यामि कारणमापत्तेर्भवतः। यदि च सुचिरं विचारयन् निश्चिनुयात्कर्तुमेतद् भवान् तर्हि श्वःसमायातु समयेऽस्मिन्नेव। अवशिष्टमपि धनं शक्नोति तस्मिन्नेव समये ग्रहीतुम्।

युवकः कथमपि नाभूत्सम्मतः शुल्कपत्रपरावर्तने। अहमपि घटनामिमां पर्यालोचयन् परावर्तिषि निजनिकेतनम्। पथि च सुभृशं प्रावर्तत मनस्यान्दोलनं मे ''किं वा अङ्गुलिं छिनद्मि''।

## तृतीयः परिच्छेदः

''तत्किं शक्नोमि विस्मर्तुम्''

परस्मिन्नहनि वारंवारमकार्षं तस्मिन्नेव विषये विचारम्। स्वयमुपनतस्य धनस्यैतावतः कः शक्नुयात्परित्यक्तुं लोभम्। पाठकमहाभाग! भवानेव तावद्विमर्शयतु निभृतम्, किमेतादृशमवसरं परित्यजेद्वा भवान्? विशेषतश्च ममासीदावश्यकता द्रविणस्य। शून्ये कोषगृहे मूषकाः कुर्वन्ति स्म व्यायाममिति प्रकाशितमेव पुरस्तात्। यो वा वाञ्छति स्वयमङ्गुलिमात्मनश्छेदयितुं तत्र मम निषेधेनैव किं सिध्यति? यद्यहं न करिष्यामि, मम भ्राताऽन्यः कश्चनायास्यति, इत्यादि नानासाध्यसाधनाः समाधाय निरचिनवं कर्तुमेतत्कार्यम्। सायं च शस्त्रादिकमावश्यकमादाय प्रायासिषमालयं युवकस्य।

मामालोक्य स्मयते स्म पूर्वं युवकः। समभाषत– ''पश्यामि भवान्सम्मनुते कार्यमिदम्''

**अहम्**–दृष्टं मया, स्वत एव भवान् दृढमनोरथश्छेदयितुमात्मनोऽङ्गुलिम्, तदा मदायत्तिर्विडम्बनमात्रम्।

**युवकः**–पूर्वमपि इमामेव वार्तां प्राकाशयं भवन्निकटे।

प्रकोष्ठकेऽस्मिन्, तत्परिसरे वा नासीत्कश्चन। वसनखण्डम्, पानीयमन्यान्यानि चावश्यकानि स्वयमानीय निमीलितं प्रकोष्ठकद्वारं युवकेन। प्रोक्तं च पश्चात्- ''केवलमङ्गुलिच्छेदेनेनैव न परिसमाप्स्यति कार्यम्। चातुर्यमपीह समपेक्षितं किञ्चित्। अत एव च समापतिता भवदावश्यकता।''

कोणस्थितात् काष्ठपेटकाद्बहिर्निस्सारयामास वस्तु किञ्चन, यद्धि वसनाच्छादितमासीत्। यदा चापसारितं तदावरणम्, तदा तु मेऽवस्थैवान्यादृशी समभवत्। मनोवृत्तिरेकवारमेवाऽसीज्जडीभूता। किं वा विलोकितं मया युवकहस्ते? यदेकश्छिन्नो मानुषहस्तोऽस्ति!!

तद्दर्शने विषयविमर्शने च मम कतिपयमुहूर्तानां समभूद्व्ययः। परतः समबुध्यत मया यद्धस्तः केवलं मृद्घटित एवास्ति परमेतद् वामहस्तस्यैतादृशमनुकरणमासीद्यथा सुविचक्षणोऽपि निर्णये व्यामुह्येत्। हस्तेऽस्मिन् अङ्गुलीषु, तर्जनी केवलमङ्गुलिर्नासीत्। तन्मूले तु महता पाटवेन निर्मितमासीद् व्रणचिह्नमेकम्।

चिह्नमेतत्प्रदर्श्य प्रोक्तं युवकेन- ''सविशेषावधानं पश्यतु भवानेतत्। केवलमङ्गुलिच्छेदनस्य सहस्त्रद्वयं प्रोक्तं मुद्राणाम्। यदि च सम्यगेतादृशं चिह्नं कर्तुं पारयेद्भवाँस्तर्हि पञ्चशती मुद्राणामधिकं लभ्येत्''।

अस्तीह किञ्चन निगूढं रहस्यमिति सम्बुद्धं मनसि मया। परं नास्मिन् विषये जिज्ञासितं प्रोक्तं वा किञ्चिद् युवकाय। प्रोक्तं तु प्रकाशम्-''एवमेव भविष्यति।

प्रसारितवान् वामहस्तं युवकः, प्रोक्तवांश्च- ''इदानीमारभतां कार्यमात्मनो भवान्''

**अहम्**-समधिकं पीडा भविष्यति, अपि पारयिष्यसि सोढुम्?

**युवकः**-परीक्ष्यैव प्रेक्षिष्यते भवान्।

मृद्घटितं हस्तमेतमभिमुखमाधाय छेदनाय निस्सारितं मया शस्त्रम्! तर्जन्या मांसं पृथक्कृत्य द्वितीयेनास्त्रेण च्छिन्नं तदस्थि! शोणितं धारायन्त्रनिःसृतं जलमिव समवहत्।

नितान्तभीषणेऽप्यस्मिन् समये न कृतो यन्त्रणासूचकः शब्दोऽपि युवकेन। न चैकवारमपि मुखभङ्गिरेव विकारमापादिता। किं बहुना, हस्तोऽपि न कम्पितः। यथा नास्ति शरीरान्तर्गणनीया तस्य साऽङ्गुलिः। अहन्तु तच्चित्तदार्ढ्यमालोक्य जातः सत्यमेव अवाक्! यस्य चित्तमेवमस्ति सुदृढं न तस्य किञ्चन पृथिव्यामसाध्यं नाम।

अङ्गुलिं छित्त्वा, रक्तस्रावमौषधोपचारैरवरोध्य, कृतं व्रणोपरि पटबन्धनम्। पृष्टवाँश्च युवकम्- ''अपि जाता समधिकं यन्त्रणा''?

**युवकः**-अपि दृष्टं समधिकयन्त्रणायाश्चिह्नं किञ्चन?

प्रोक्तं मया- ''धन्यं भवतश्चित्तबलम्। यदि सर्वदैव लभ्येत भिषग्भिर्भवादृशः सुदृढचित्तो रोगी, तर्हि न स्यात्कश्चन भावनाया विषय एव!''

**युवकः**-भवतो रूप्यकाणि सन्ति चतुष्पादिकोपरि। गृह्णन् शक्नोति प्रयातुं श्रीमान्।

**अहम्**-यावन्न भवेद्भवतो हस्तः प्रकृतायामवस्थायां तावदायास्यामि नित्यमेत-

न्निरीक्षणाय।

**युवकः**– आम्। आयान्तु श्रीमन्तः स्वैरम्।

सार्द्धसहस्रमुद्रामूल्यान्यासन् शुल्कपत्राणि निर्दिष्टे स्थाने। तानि कक्षकोषसात्कृत्य–समायासिषमात्मनः सदनम्।

व्रणपूरणे व्यत्यगात्प्रायो मासतोऽधिकः कालः। मध्ये मध्ये व्रणस्थलं पुनरुत्कीर्य यत्नसहकारेण निरमीयत तादृशं चिह्नम्। उल्लादशायामासीत्तादृशमेव व्रणचिह्नं छिन्नाङ्गुलीमूले। युवकेनात्मनः प्रतिज्ञानुसारं पुनर्मे दत्ता पञ्चशती मुद्राणाम्। आगमनसमये प्रकाशितं च– ''मां कदाचिद् दृष्टवान् भवान् इति सर्वमपि विस्मार्यं भवता। यथा नासीत्कदाचिदपि परिचयः परस्परं नौ तथैवाकलनीयं मनसि। गोपनवार्ता तु पूर्वमावेदितैव भवते, न पुनस्तामाम्रेडयिष्यामि साम्प्रतम्। यदि च प्रसरेत्प्रकटमियं वार्ता तदा भवत एवाधिकं भयस्थानमिति विदितं भवतु भवतः''।

द्वितीयस्मादेव दिवसान्न पुनः, केनचन विलोकितस्तस्मिन् सदने युवकः। मह्यमपि न प्रोक्तवान्किमप्यस्मिन् विषये। आश्चर्यसंघटनामुग्धः कृतवान् भूयांसमहं प्रयासं तदन्वेषणे परं न मे किञ्चन समभूत्फलानुगुणम्। अभिधानं वा निवासस्थानं वा युवकस्य नाजायत मे विदितम्। गुप्तमहावीरोऽपि न पुनर्दृष्टिगोचरमयासीत्। यदि तु तारो मुद्राझणत्कारो न मे गृहेण्यभविष्यत्, तर्हि वृत्तान्तमेव समस्तं स्वप्नकल्पितमाकलयिष्यम्।

**परं किं शक्नोमि सहसा तद्विस्मर्तुम्''।**

## पश्यतोहरः

### ( १ )

वैशाखमासस्य भुवनभयानको नूनमातपः सम्प्रति व्याकुलीकरोति जनान् प्राणिनश्चान्यान्। साम्प्रतं पूर्णो मध्याह्नः। रवेरुत्तापः परां कोटिमारूढः।

अस्मिन् समये मधुपुरग्रामे धूमशकटिविश्रमस्थानसन्निधानएव नन्दरामवणिजः समुद्घाट्यमान आपणोऽस्ति। वणिगस्मिन् समये भोजनसम्पादन एव व्यग्रोऽवलोक्यते।

एतावतैवापणोपरि वृद्ध एकः साधुमहाशयः समुपस्थितः। साधोरस्य पट्टायितललाटे विकटतया घटितं दूरतोऽपि दर्शनीयं तिलकं साम्प्रतं घर्मसलिलैः प्रवाह्य प्रवाह्य ''न ते समुचितम्'' इतीव निःसार्यते। लम्बशिखाभूषितं शिरः स्वेदभरक्लिन्नमस्ति। मुखञ्चातपसन्तापेन समधिकमरुणमालोक्यते। वृद्धसाधोः पादौ जानुपर्यन्तं निबिडया धूल्या धूसरितौ स्तः।

साधोश्च पश्चाद्दण्डकमण्डल्वादिधारकः शिष्य एकोऽस्ति। आपणे आगत्यैव सवैक्लव्यं

साडम्बरञ्च प्रोक्तं साधु महाशयेन– ''अरे वत्स! किमु वृद्धब्राह्मणायापि न्यूनमिहावकाशं दास्यसि ? सम्प्रति मच्छिष्यस्य गेहं दूरवर्ति। शरीरं च मे न सोढुं शक्नोति साम्प्रतं मार्गगमनखेदम्। तद्यदि न ते विमुखानि भाग्यानि तर्हि ब्रूहि अद्य रात्रावत्रैव विश्रम्य श्वः प्रातरेव शिष्यग्रामं प्रयास्यामि। कथय भाग्यवन्! कस्ते आशयः ?''

नन्दरामवणिक् सर्वाङ्गपूर्ण एको भक्तजन आसीत्। स हि प्रायशः समागतानां साधुसतां सत्कारे भृशमेव दत्तमना आसीत्। स चास्मिन् मध्याह्ने आपणकार्यनिवृत्तः पाकादिसमायोजनं कुर्वन्नासीत्। एतावतैव वृद्धेन साधुना दत्तं श्रीमुखवचनम्!

वणिग्वराकः सर्वं परित्यज्य प्रणनाम साधुप्रवरम्। साधुमातपे क्लिश्यन्तमालोक्य सकरुणस्य वणिजो मनसि भक्तिश्रद्धायाः प्रावहत्स्रोतः।

साधोर्मध्यकाये धौतवस्त्रं, नहि नहि सम्पूर्णम[१]क्षतवस्त्रमेव संश्लिष्टमालोक्यते। स्कन्धे रामनामाङ्कितमुत्तरीयं पतितमस्ति। मुण्डिते स्वेदजलमसृणितेऽत एव जाज्वल्यमाने मस्तके शाद्व[२]लशालिनी शिखा आर्द्रकर्पटाच्छादिताऽस्ति। हस्तयोश्छत्रं प्रकाण्डो दण्डश्च बाभाति। पादौ चौपानद्विरहितौ स्तः। गले तुलसीमाला, वक्षसि च पीतवर्णं यज्ञोपवीतं विराजते। साधोः प्रभावशालिनीं मूर्तिं दृष्ट्वैव भक्तवणिक् ''इमे पूर्णाः परब्रह्मसहचराः'' इति मनसि कुर्वन् ससमादरं समभाषत– ''श्रीमन्! कोऽत्र चिन्तावसरः इदमपि श्रीमतां शिष्यस्यैव स्थानमस्तीति बुद्ध्या कृतार्थ्यताम्। प्रायो ये ये साधव आयान्ति ते ते दीनस्यास्य निवासे कुर्वन्ति कृपाम्, श्रीमन्तोऽपीह चरणरजो दत्त्वा पावयन्तु स्थानमिदम्''।

१. थान। २. घेरा।

इदमुक्त्वैव च वणिजा जलपूर्णं पात्रमेकं दत्तं साधवे। साधुनापि सर्वमात्मीयं वस्तु न्यस्तमापणे। शिष्येणापि सर्वं दण्डकमण्डल्वादिकमुत्तार्य स्कन्धकर्पटेन प्रोञ्छितौ पादौ। वृद्धसाधुना जलेन झटिति प्रक्षाल्य पादौ प्रोक्तं वैश्याय–

''तर्हि वत्स! इदानीं साधूनां भोजनस्यापि कुरु सत्वरमायोजनम्। तुभ्यमपि चेद्रोचेत तर्हि ग्रहीष्यसि भगवत्प्रसादं तत एव। किमिति पृथक्पाकादि कृत्वा वृथा परिश्रमः सोढव्यः।''

पुनः किमासीत्? नन्दरामस्तु साधूच्छिष्टाय नितान्तमेव लालायित आसीत्। इदानीमात्मनो मनोरथानुकूलं दृष्ट्वा शीघ्रमेव सर्वं वस्तु स्थापितं साधोरग्रे। पाकसम्पादनस्थलन्तु[१] पूर्वत एवासीत्सम्यक्तया सज्जम्। साधुरपि सर्वं सुभगमालोक्य सरभसमेव पाकनिर्माणस्थलोपरि आक्रमणमकरोत्।

साधुमहाशयस्त्वरितमेव सम्पादयामास मनोनुकूलं भोज्यम्। नन्दरामः साधुमहात्मनो निःसार्यमाणा नानाविधाः सामग्रीः, मृदुमधुराश्च वार्ताः प्रत्यक्षीकृत्य कटककृतनिकेतनं भगवन्तं जगन्नाथं गृहोपस्थितं मेने।

सम्पन्ने पाके सोन्नादं शङ्खवाद्यं कृत्वा ठणठ्ठणदिति घण्टां ध्वनयामास साधुः। नानाविधानि च स्तोत्राणि सगलास्फालनं समारट्य भोज्यसामग्रीं धृतवान् ग्रन्थिनिष्कासितस्य

नृसिंहस्याग्रे। विधिविधानेन च कृतवान् शङ्खोदकादि। तदनन्तरञ्च क्षुत्क्षामकण्ठायात्मनः शिष्याय, नन्दरामवणिजे च दत्तवान् भगवतः पावनं प्रसादम्।

प्रातःकालादनाहारो वराको वणिक्तावता प्रसादनैव कथमपि तुतोष। विशेषतश्च साधोदर्शनेनैव नन्दरामभक्तस्तृप्तः समभूत। तृप्ते मनसि क्वावकाशोऽन्यविषयस्य। इतस्तु किञ्चिन्मात्रेण प्रसादेनैव भक्तं सन्तोष्य सशिष्येण साधुमहात्मना यथेच्छं संहार आरब्धः। सर्वमपि पदार्थजातं जठरकोषागारे सरभसं न्यक्षिप्यत।

अन्ततः प्रसादलोलुपो वणिक् प्रतिदिनभक्ष्यापेक्षया अर्द्धेनैव भक्ष्येण सन्तोष्य जठरं प्रक्षालितहस्तमुखः साधोः कृते धूमपानपात्रं[२] सज्जीचकार। साधुरपि समापितसमस्तवस्तुस्तूपः कृत्वा च तदुत्तरकार्यं पृथगासने स्थितः साडम्बरं गडगडायमानं चकार धूमपानपात्रम्।

इतः साधूच्छिष्टलोलुपो नन्दरामभक्तः पुनरपि साधोर्भुक्तावशिष्टं भक्ष्यमन्विष्यति स्म। परं तत्र श्रीमता साधुमहात्मनैव साधुकृपा कृताऽऽसीत्। अस्तु यत्किञ्चिदासीत्तदेकव शक्तिभक्तिगद्गदो वणिक् अभ्यवहर्तुमारभत। यावदयं भुङ्क्ते तावतैव श्रूयते स्म घूमशकट्या विकटश्चीत्कारः।

शब्दं श्रुत्वा ससम्भ्रमं जगादापणस्थाय साधवे वणिक्– ''यदि बहिः कश्चन ग्राहकः समायायात्तर्हि श्रीमद्भिस्तत्र देया दृष्टिः। न स परावर्तेत। अयमेव मे जीवनोपायः।''

१ चौका। २ हुक्का।

यावदयं संलापो भवति तावतैव पूर्णतया शृङ्गारितसर्वशरीरो बाबूमहाशय एको नन्दरामापणोपरि समापपात।

शृङ्गारिणोऽस्य शरीरं खडखडायमानाग्रबाहुभूषिनेनाङ्गलचोलकेन समाच्छादितम्। कट्यां कृष्णान्त्यरेखमुज्ज्वलं धौतवस्त्रम्। स्कन्धे च सचातुर्यराशीकृतं सद्योधौतमुत्तरीयमेकं विलसति। पादौ चास्य चाकचक्यशालिभ्यां कृष्णवर्णाभ्यां वैदेशिकोपानद्भ्यां[१] गूढौ स्तः। ययोर्हि गमनसमये ''चर् मर्'' इति शब्दो मुखरयति मार्गोद्देशम्। हस्ते च बाबूमहाशयस्य चाकचक्यशाली ''पटसम्पुटकः[२]'' द्वितीये च वेशगौरवभयादिव कम्पमाना सुभगा यष्टिरासीत्।

वैश्यो बाबूमहाशयं दृष्ट्वैव, अन्तः कोष्ठकादेव सादरमभाषत– ''महाशयाः! क्षणं स्थित्वा गृह्यतां धूमपानपात्रम्। तावदहमायामि''।

साधोर्नाभवद्वागवसरः। सर्वं वणिजैव वक्तव्यमुक्तम्। वैश्यस्त्वरितमेव हस्तमुखं प्रक्षाल्य बहिरागतो बाबूमहाशयस्य शृङ्गारसुभगां मूर्तिमालोक्य गौरवमिवोद्वहन् समभाषत– ''कथं बाबुमहाशयाः! भोजनादिकं निर्वृत्तम्?''

**बाबू** – नैव। इदानीं तु विलम्बो जातः। सायंभोजनमेव साधुतया भविष्यति। इदानीं तु किञ्चित् ''जलपानमात्रं'' करिष्ये।

''सम्यक् श्रीमन्!'' इत्युक्त्वा वणिक् कान्दविकाप[3]णाद् भक्ष्यमानीय बाबुमहाशयं भोजनाय सज्जीकृवान्। बाबूमहाशयोऽपि नाममात्रेणैव ''जलपानं'' वस्तुतस्तु सर्वाङ्गपूर्णं भोजनं सानन्दमकार्षीत्।

## ( २ )

सर्वेऽपि रात्रिं भुक्त्वा, पीत्वा, शयित्वा सानन्दमयापयन्। नाभूत्तत्र विशेषः।

प्रातरेव जागरूकेण साधुमहात्मना दृष्टं यद्वणिगापणे नागदन्ति[4]कोपरि पीतं कौशेयाम्बरमेकं लम्बते। जगाद चाथ वणिग्भक्तम्– ''वत्स! यद्यनुमन्यसे तर्हि पीताम्बरमिदं धृत्वा सन्ध्याह्निकादि विदधामि। शिष्यग्रामो दूरेऽस्ति, न जाने कदा वा तत्र प्राप्नुमः। इत एवाह्निकादितो निवृत्तौ सुखं नो भविष्यति''

**वणि.**– महाराज! क्रीतस्यास्य दिनद्वयमेव जातम्। नैकवारमपि परिहितं मया। श्रीमतां ''प्रसादीभूतं'' स्यात्तदा मे मनोऽभीष्टं भविष्यति। धारयतु श्रीमान्।

पुनः किमासीत्? सानन्दं परिहितं साधुमहात्मना। साडम्बरञ्च दण्डकमण्डल्वादि इतस्ततः प्रसार्य, ऊर्णासनोपविष्टोऽक्षिणी निमील्य धृतगोमुखीकः परे ब्रह्मणीव लीनतां गन्तुमारभत।

इतो बाबुमहाशयेन सम्यक्तया विभूष्याऽऽत्मानं स्वीयं च वस्तु गृहीत्वा प्रोक्तं वणिजे– ''अयि वणिग्वर! ह्यस्तनजलपानस्य, सायंभोजनस्य च कियान् व्ययो जातः? कथयतु, इदानीमेवाऽहं सर्वं ददामि। आवश्यकं मे साम्प्रतमेव गमनम्।''

१. बूट। २. मनीवेग। ३. हलवाई। ४. खूंटी।

वणिजा मनसि चिन्तितम्–''अतीव मे श्रमो जातः। व्ययोऽपि इतो भूयानभवत्। विना किमप्युपार्जनं न चलिष्यति।'' पुनर्मनसि गणितं कुर्वतेव प्रस्फुरिताधरेण प्रोक्तन्– ''आम्, एवम्। सर्वं मुद्राद्वयं सार्द्धपणपञ्चकं च जातम्।''

**बाबू.**– अयि भोः! स्फुटपणानां तु कथैव गच्छतु। इदं तु वणिग्जनानां प्राकृतं कल्पनपाटवम्। तर्हि अष्टौ रूप्यकाणि परावर्तयतु भवान्। अहं दशरूप्यकमूल्यं शुल्कपत्रं[1] ददामि।

प्रमुदितचेतसा वणिजा पेटिकातो रूप्यकाष्टकं निःसार्य समर्पितं बाबूमहाशयाय। धृतञ्च तत् पटसम्पुटकमध्ये बाबूमहाशयेन। अनन्तरञ्च यष्टिं गृहीत्वा प्रयातुमारभत्

बाबुमहाशयः। तद् दृष्ट्वा अतीव विनयेन प्रोक्तं वणिजा– ''बाबुमहाशयाः! शुल्कपत्रम्?''

**बाबू.**– आम्, तदेव दशरूप्यकाणां यत्प्रदत्तम्!

**वणि.**– महाशय! क्व प्रदत्तम्? दानायैव तु स्मारयामः श्रीमते!

**बाबू.**– अरे कीदृशमानुषोऽसि? पूर्वं शुल्कपत्रं गृहीत्वा तदनन्तरं तु त्वया मुद्राः प्रदत्ताः।

**वणि.**– नैव महाशया:! विस्मरन्ति भवन्त:। स्वीयं पटसम्पुटकमुद्घाट्य पश्यन्तु! न वयं द्विवारं ग्रहीतार:।

**बाबू.**– अरे न वयं द्विवारं प्रदातार:। भवानेव स्वीयां पेटिकां पश्यतु। भवतो वञ्चनापाटवं नात्र चलिष्यति।

वणिजा मनसि चिन्तितम्– ''अयं तु विचित्रवेषश्चौर: समायात:। हा तात! य: श्रोष्यति स मामेव मिथ्यावादिनं कलयिष्यति। गौरोज्ज्वलवेषमिमं तु सभ्य इति सर्व एव सत्यवादिनं वदिष्यन्ति। यद्भवतु, तद्भवतु यादृशाय तादृश एवोपयुज्यते। अयमिदानीमतीव प्रवृद्ध:। आत्मस्वरूपप्रदर्शनं विना नायं मामकं दास्यति द्रव्यम्।

इत्याकलय्यैव आपणादुत्प्लुत्य पथि समाजगाम, जग्राह च करेण बाबूमहात्मन: पटसम्पुटकम्। उभयोर्बभूव कराकरि समाक्रमणम्।

द्वयोरिमं भीषणसमाक्रमं दृष्ट्वा जना: समाययु:, चक्रुश्च प्रयत्नमस्य कारणावगमाय।

साधुमहाशय: साम्प्रतमासने स्थित: प्रात:सन्ध्यामिव कुर्वन्नासीत। स इमं लोककोलाहलं श्रुत्वा आसनादुत्थाय वहिराजगाम। लोकसङ्घाते प्रविश्य च किं किमिति वारं वारमुच्चरगादीत्।

वणिक् साधुमहाशयं समीपे दृष्ट्वा मनसि सुतरां प्रासीदत्। आसीच्चास्य विश्वासो यदवश्यं साधुमहाशया: सत्यां वार्तां प्रकाशयन्तो भक्तस्य मे साहाय्यं करिष्यन्ति। परमित: सर्वा कथैव परावृत्ता।

१. नोट।

अपृष्ट एव साधुमहाशयस्तीव्रेण स्वरेण सर्वानवदत्– ''हरे! हरे! एवं तु वणिक् धार्मिक इव दृष्यते स्म, परं हन्त! हन्त!! अयन्तु सुतरामेव वञ्चक:!!! पश्यत: सर्वस्वं हरति!! पूर्वं तु सभ्यं पुरुषं रात्रौ बलादस्थापयत्। तत एकवारभोजनस्य मुद्राद्वयं व्ययमयाचत्। तदपि वराकेण धार्मिकेणाङ्गीकृत्य दशमुद्रामूल्यं शुल्कपत्रं प्रदत्तम्। अनेनापि तद् गृहीत्वाऽष्टौ मुद्रा: परावर्तिता:। परमिदानीं कथयति ''न मे शल्कपत्रं प्रदत्तम्'' हरे! राम! कथमस्य भगवान् भव्यं करिष्यति। रे पामर! धर्मतोऽपि मनाग् बिभिहि! कण्ठकर्तनेन न कुबेरो भविष्यसि। सर्वत्र धर्मं दृष्ट्वा कार्यं साधनीयम्। सर्वं खलु भूतभावन: परमात्माऽनिमिशमालोकते।

साधुमहात्मन: कथामिमां श्रुत्वा सर्वेऽपि तदन्तिके समागत्य सर्वं वृत्तान्तं पप्रच्छु:। सभयकम्पमिव प्राब्रवीत्साधु:–

''सर्ववृत्तान्तश्रवणात् पूर्वं भवन्त: पातकिनोऽस्य वणिजो द्वारात् प्रतिष्ठाविरहितं मां स्वभीष्टस्थलं यापयत! न जाने बकभक्तोऽयं बहुमूल्यं ममापि सर्वं वस्तुजातं चेदपहर्तुमुद्यत: स्यात्तर्हि व्यवहारानभिज्ञस्य विपरीतं मे पतेत्। हन्त! हन्त!! अनेन वराकेण तु मदग्र एव

शुल्कपत्रं दत्तमासीत्। मया तु यदाऽमुष्मै रात्रौ मम भोजनमूल्यं दत्तमासीत्तदा तु साक्ष्यपि कोऽपि नासीत्।

इदानीं सर्वे जना वराकं वाणिजमेव सावहेलं धिक्चक्रुः– ''अरे राम! इमे तु साधुजनाः सन्ति, एभिः साकं च तवाऽयं व्यवहारः! हा धिक्!''

एकः प्रतिवेशी जगाद्– ''अरे नन्द! त्वमेव स्वयं निजमनसि विचारय, इमे साधवः कदापि मिथ्या वदिष्यन्ति? प्रदत्तं शुल्कपत्रं तु किमित्यपलपसि?

अन्योऽवदत्– ''अस्तु साधुमहाशयसमक्षं प्रदत्तं शुल्कपत्रं तु त्वमधर्मात् गोपयसि। परं रात्रौ साधुमहाशयेन प्रदत्तं यद् भोजनमूल्यं तत्तु त्वया प्राप्तम्। उत तदपि न गृहीतम्?

अधुना नन्दरामस्य आत्माराम एव उड्डीन इवाऽभवत्। वराकः किं वदेत्! यदा सर्वेपि तदीया एव प्रतिकूला जातास्तदा केन वा प्रकारेण वराक आत्मानं सत्यवादिनं कलयेत्?''

प्राप्तावसरेण चौरबाबुना प्रोक्तम्– ''साधुमहाशयाः! इदानीमपि किमिति लुण्टाकस्यास्यापणे तिष्ठथ? राजमार्गे बहव आपणाः सन्ति। अस्मात्तु आत्मानं मोचयत! न जाने अग्रे किमयं कथयेत्?''

वराको वणिक् स्थूणायितः स्थित आसीत्। इतः साधुमहाशयस्य शिष्योऽपि आत्मनो दण्डकमण्डल्वादिकम्, तेन सहैव च वाणिग्वराकस्यापि स्थालीपात्रादीनि अन्यान्यपि च वणिजो वस्तुजातानि यथासुखमात्मनो ग्रन्थौ ग्रन्थयित्वा सर्वमेतत् स्कन्धे समारोप्य वणिगापणाद्बहिरभवत्।

वराकेन वणिजा यावच्छक्यं सर्वाग्र एव वारं वारमुक्तम्– ''हरे! राम! पश्यतो मम ''धवलमध्याह्ने'' लुण्टाकाः सर्वस्वं लुण्ठन्ति। यूयं च प्रतिवेशिनो भूत्वापि न मे शृण्वन्ति, प्रत्युत वञ्चकानामेव साहाय्यं विधत्थ! त्राहि मधुसूदन!!!

परमिदं वणिजः करुणाक्रन्दनं के शृण्वन्ति? प्रत्युत ''पुरातनः[१] पातकी'' इति बहुशो वणिजमेव सर्वे धिक्चक्रुः। सभयप्रदर्शनञ्च तं तूष्णीं कारयामासुः।

वणिजा बहुधा नानाप्रकारैर्बोधिताः सर्वे, उक्तञ्च वारं वारम्– ''यदेतत्स्थालीपात्रादिकं मदीयमेव वस्तु स्तेना इमेऽपहरन्ति! परं फलमस्य विपरीतमासीत्। सर्वेऽपि सम्भूय तं ''यद्वा तद्वा'' कथयामासुः। आरोपितभ्रूचापाश्च ''पामर! केयं तवोच्छृङ्खला वृत्तिः?'' इति बहुशस्तर्जयाञ्चक्रुः।

कपटसाधुहतकस्य छद्मपाटवं तादृशं लोकेषु कृतकार्यमभूद् यथा वराकेन वणिजा यदा आत्मनः कौशेयाम्बरविषये, 'यद्धि कपटयतिना वणिजः सकाशात् याचित्वा धारितमासीत्' ''ममेदम्'' इति क्रन्दितं तदा सर्वेऽपि राजपथस्थाः, अन्येऽपि च तटस्थाः– ''हा हा नन्द! किं तवाद्य जातम्? किन्नु वाताध्मातोऽसि? हा! हन्त! वराकस्य दीनसाधोः पीताम्बरमपि अपहर्तुमिच्छसि! तात! मनाक् धर्मभगवतोऽपि भयं कार्यम्। स हि सर्वेषां प्राणभूतः सहचरः।

अथ वा लोकादेव बिभेहि! सर्वेषामेवाग्रे साधोर्वस्तुजातमात्मनो ब्रूषे? नैवं गर्हितैः कर्मभिर्जठरपूरणं पूरणं भवति। संसारे कति दिनानि जीविष्यसि! त्वमेव तावद्विचारय एवमधर्म्याणि कार्याणि कृत्वा कति दिनानि भक्षयिष्यसि? अन्ततस्तु तस्मिन्नेव न्यायालये तवोत्तरं देयं भविष्यति यत्र नान्यस्य साक्षिणः साक्ष्यं फलति। येषां कृते पातकमिदमुपार्जयसि ते किमु परिवारजनास्तत्र साहाय्यं विधास्यन्ति? इत्यादि, इत्यादि

समुचितोऽयमवसर इति पर्यालोच्य साधुमहाभागेनापि कपाले समाकर्षिते अक्षिणी! स हि साभिमानमभाषत– ''हा! राम! वयं पूर्वतो वणिजमिमं, ईदृशं लुण्टाकं चेदवेदिष्यामस्तर्हि कस्मादस्य पातकिनो द्वारमायास्यामः! नारायण! नारायण!! अद्याऽनेन, अभागिना मम सर्वं सन्ध्यागायत्र्यादि आह्निकमपि च्यावितम्! हरे विष्णो!?

बाबूदेवोऽवदत्– ''अरे! महाराज! गम्यते न वा लुण्टाकस्यास्य द्वारदेशात्। अथवाऽन्यत्किमपि अपहारयितुं काम्यते? अन्यथा इमे यदि सर्वेऽपि मिलित्वा भवतो दण्डकमण्डलादिकं सर्वमपहरिष्यन्ति तर्हि विना मृत्युमेव मरणं भविष्यति!

बाबूमहाशयस्यारुन्तुदं वचनमिदं श्रुत्वा सर्वेऽपि समवेताः समभाषन्त–

''अयि बाबूमहाशयाः! इमां कीदृशीं कथां मुखे कुरुथ? ग्रामस्य एको मनुष्यो यद्येवंविधः स्यात्तर्हि किं सर्वमपि ग्रामं भवान् तादृशमेव विज्ञास्यति?''

बाबु.–अये प्रियसुहृत्! को जानीयात्! अयं हि युष्माकं प्रतिवेशी। यदि ग्रामपक्षपातमवलम्ब्य भवन्तः पूर्वोक्तं कुर्यास्तदा किमाश्चर्यम्!

साक्षेपं द्वितीयोऽवदत्–''आम्! सत्यं बाबूमहाशयाः! सत्यम्! इदं जगदेव एतादृशम्। कोऽत्र वा मानुषस्यापराधः ?''

साधु.–नैव वत्साः! नैव! इदं तू सर्वैरेव दृश्यते यद्यूयं स्वग्रामजनं विहाय नास्माकं सहाया भविष्यथ! लोकस्यं चरितमेवैतादृशम्। तथापि धर्मोऽपि किञ्चन वस्तु भवति। तस्यैकवारमेव न लोके लोपो जातः ?

तृतीयोप्यस्मिन्नेव स्वरेऽगायत्–''साधुमहाशयाः! धर्मसेतोर्न सर्वथैव भङ्गो जातः। कुटिलेऽस्मिन् कलिकाले यद्यपि छलकपटादिभिर्जगत् परिपूर्णमथापि धर्मस्याङ्गमधुनापि वर्वर्ति। केषाञ्चिन्मानुषाणां प्रवृत्तिः कल्मषकलुषिता, तेनापि किं भवति? अधुनापि संसारे धर्मस्य जागर्ति सर्वतोमुखो जाज्वल्यमानो मणिमयप्रदीपः, भगवान् जगदाधारो नाधुनापि क्वापि विलीनः! यदि सर्वेऽपि उत्सृष्टसाधुपथाः स्युस्तर्हि भूवलयः कथमिवकल्पयेत्स्थितिमात्मीयाम्।

अस्मिन् समये कपटसाधुना, वञ्चकबाबुना च प्राप्तः समुचितोऽवसरः। उभावपि मन्दमन्दं हसन्तौ तत्स्थानाददर्शनमुपाजग्मतुः।

वराको वणिक् आत्मनः कपालमास्फोट्य, हृदयं कथञ्चित् बलात्संस्थाप्य तयोः पन्थानमनिमेषं पश्यन् पाषाण इवाचलस्तस्थौ।

दृष्टो धर्मपथमवलम्बमानानां समयेऽस्मिन् परिणामः? धन्यः पूज्यपादः साधुमूर्द्धन्यः! सन्तजनभक्तिपरायणो वणिगपि च धन्यः!!

धर्मपथस्थितो वराको नन्दरामवणिक् केवलं हाहाकार भागी बभूव। परमानन्दभागिनौ च बभूवतुः ''लुण्टाकयतिः, वञ्चकबाबू च''।

## सरला

### ( १ )

हिमालयवक्षसि, एकस्यामुपत्यकायां सुन्दरमेतन्नगरं केन वा रूपेण स्थापितमभूदिति न कोऽपि शक्नोति वक्तुम्। किन्तु नगरेऽस्मिन् यः समायाति स एव प्रकृतेर्मधुमयं सौन्दर्यं विलोक्य मुग्धो भवति। प्राप्तविश्रमाः कतिपये गौराङ्गाः स्थानेऽस्मिन् हर्म्याणि स्थापितवन्तः, अतएव नगरे बहूनां श्वेताङ्गपुरुषाणां महिलानां च विलोक्यते समागमः। यस्मिन् वत्सरे ग्रीष्मस्य घटा समधिका भवति तस्मिन् संवत्सरे अत्रत्यो जनकोलाहलः संवर्द्धते बहुतरम्।

वायुसेवनार्थं वङ्गदेशीया अपि बहवो धनिनः कुर्वन्त्यत्र पदार्पणम्। नाहं धनिकः, एवं वायुसेवनमपि न मे तथाविधमावश्यकम्। तथाप्यहं स्थानेऽस्मिन् भ्रमणार्थमागतोऽस्मि। नात्र कारणं भ्रमणव्यसनम्, किन्तु कस्मिननपि स्थाने मासद्वयादधिकं न मे स्थातुं प्रवृत्तिर्भवति। अत्र षड्भ्यो मासेभ्यो निवसामि। मनोयोगोऽत्र जातोऽस्ति न वा एतत् न कदाचिदपि चिन्तितवानस्मि।

एकं क्षुद्रं लताभवनं मे वासगृहम्। दूरादरण्याद्वायोर्हिल्लोलः पुरातनसुखस्य स्मृतिं मनसि जागरयति कदाचित् कदाचित्। मध्ये मध्ये वन्यकुसुमसौरभेण मे वासगृहमामोदितं भविति। एवं वातायनपथे गिरिशृङ्गेण सह धूमकान्तेर्मेघस्य समागमं पश्यन् कस्मिन्नपि स्वप्नराज्ये इव प्रवाहितो भवामि। मम अतृप्तकामना बहिःपृथिव्यां परिभ्रमणस्य सुविधामप्राप्येव सङ्कीर्णेऽस्मिन् स्थाने व्याकुलभावेन परितः परिभ्रमतीव। किन्तु मम किमभवत् इति स्वयमहं बोद्धुं न पारयामि।

मम भवने अन्ययोर्द्वयोः प्राणिनोर्निवासः। एकस्तद्देशीयो भृत्यः, नाम सुचेत इति, एष हि अनन्तरूपः। कदाचित् परिचारकः, कदाचित् पाचकः, कदाचित् द्वारपालः। अपूपवेल्लने, पादुकास्वच्छीकरणे च स हि समानभावे तत्परः। द्वितीयस्य च प्राणिनो नाम रामचरणः, स खलु मत्पितामहसमयस्य भृत्यः।

रामचरणस्य बाल्यजीवनस्येतिहासः करुणरससिक्तः। स खलु मत्पितृसमवयस्कः। स हि यदा प्रथममेवास्माकं गृहे प्राविशत्–श्रुतवानस्मि,–तदा तस्य वयः त्रयोदशवर्षात्मकमासीत्। परं साम्प्रतमेतस्य विश्रमप्राप्तेः समयः। उल्लङ्घितं षष्टितमं वर्षम्। किन्तु स शेषदिनपर्यन्तं मत्सविधे स्थास्यति, एवंविधं सङ्कल्पं स्थिरीकृतवानस्ति। पितामहचरणा आश्रितवत्सलाः समभूवन्। तैर्हि रामचरणार्थमेकं गृहं दत्तमासीत्, तस्य विवाहोऽपि स्वहस्तेन कृतोऽभूत्। परं हतभाग्यस्य गार्हस्थ्यसुखं नाभवत्स्थायि। रामचरणस्य हस्ते एकं पुत्रसन्तानमुपहृत्य तत्पत्नी विधातुराह्वाने पृथिवीं परितत्याज। मातृहीनं शिशुमाप वराको जीवयितुं नाशकत्। रामचरणः प्रमार्ज्याश्रूणि पितामहं प्रावदत्– "स्वामिन्! संसारधर्मं समापितवानस्मि। गृह्यतामियं गृहस्य कुञ्चिका। न मे गृहस्यावश्यकता। गृहस्यास्य कोण एव एकस्मिन् सुखं स्थास्यामि।" पितामहचरणाः कथाया मर्म सम्यगबुध्यन्। दासदासीनां वेदनाभरे उपेक्षां प्रदर्श्य आत्मनो धनिकत्वप्रदर्शनवृत्तिर्नासीत्तेषाम्। प्रत्यवदत्–"किं कथयामि तात! तव संसारसुखं सङ्घटयितुं यथाशक्ति प्रयते।" अस्तु कालान्तरेण शोकेऽस्मिन् मन्दीभूते रामचरणस्यानेके शुभाकाङ्क्षिणः पुनर्दारपरिग्रहस्य परामर्शं प्रददुः। परं नासौ कथायामेतस्यां कर्णं दत्तवान्। स हि मद्भगिनीं मोहिनीमेव क्रोडे कृत्वा कथयामास प्रायशः–"एतदादीनवलम्ब्यैव मम संसारः।"

मयि सूतिकागृहाद् बहिर्भूत एव रामचरण एव मां क्रोडे जग्राह। संसारे आगत्य जननीक्रोडात् रामचरणक्रोड एव सर्वप्रथममाश्रयः प्राप्तोऽभूत्। जननी मे स्वर्गवासिनी। इदानीमपि रामचरणस्य निकटे स एव शिशुरहम्।

स्नेहमय्यां मम भगिन्यामपि रामचरणस्य नाभूदल्पः प्रेमा। समये समये मोहिन्याः

कृते रामचरणस्य चित्तं साम्प्रतमपि विकलं भवति। परं न तन्निमित्तं कस्यापि चिन्ता। मम भगिनीपतिः परेशचन्द्र एकः सुयोग्यः प्राड्विवाकः (जज)। एतस्य सदाचरणेन सर्वेऽप्युच्चाधिकारिणः सन्तुष्टाः। प्रजास्वपि सुमहानादरः। फलतो मोहिनी एकस्मिन् सुयोग्यपात्रे न्यस्ता। मोहिन्येव स्वगृहे कर्त्री। नगरप्राड्विवाको मम भगिनीपतिः स्वोच्चाधिकार्यपेक्षया मोहिनीमेवाधिकमाद्रियते स्म।

अहं हि यस्य समयस्य कथां वच्मि, तदा ह्यासीद वैशाखमासः। अपराह्णे अकस्मान्मेघाडम्बरमदृश्यत। वृष्टिरपि किञ्चित्किञ्चित्प्रारभ्यत। निवासकक्षस्य वातायनान्याबध्य पल्यङ्के शयानोहं शून्यदृष्ट्या गृहस्य छदिरवलोकयन्नासम्। मनसि च किञ्चिद्विचारयन्निवातिष्ठम्। यद्ध्यहं पृष्टोऽपि तस्मिन्समये नाशक्ष्यं सम्यग् वर्णयितुम्।

रामचरणो मत्पदप्रान्तेऽवस्थाय सस्नेहमवदत्– ''विनो! भवत्पादौ संवाहयामि?''। मम चक्षुषी जलपूर्णे अभूताम्। रामचरणस्य मनसि मन्ये अकस्मात् पूर्वकथा उदियाय। अत एव स प्रावदत्– ''विनो? स्वल्पस्य कृते भवता सर्वमपि संसारसुखं विनाशितम्! सेयं चिन्ता मरणपर्यन्तमपि न मां विहास्यति।''

रामचरणो मम संसारवैराग्यस्य कारणं जानाति स्म। पृथिव्यां वयं त्रय एव एतदजानीम, रामचरणः, अहम्, अन्यश्चैको जनः। स च कः, इत्यग्रे स्फुटमभिवर्णिते भवेद्विदितम्।

## (२)

सेयं बहुपूर्वतनी कथा। प्रायो दशवत्सरा व्यतीता भवेयुः। मम वयः साम्प्रतं सप्तविंशतिर्वत्सराः। साम्प्रतमहं कालिकात्ताविश्वविद्यालयस्य एम.ए. नामकचक्रचिह्नितः शिक्षितो युवकः। किन्तु सा क्षुद्रघटना एतस्य तुच्छजीवनस्य गतिं परिवर्तयामास, सा हि दशवत्सरेभ्यः पूर्वं घटते स्म। तेन समयेन साकं वर्तमानसमयस्य घनिष्ठसम्बन्धमहं मर्मणि मर्मणि अनुभवामि।

सप्तदशवत्सरात्मकस्य वयसो यः खलु उत्साहः, उद्यमः, या वा प्रफुल्लता, तस्याः खलु तुलना दुर्लभा। वर्षाजलसिक्ताया लतायाः श्यामलताम्, प्रभातपद्मस्य मनोहरमरुणिमानम्, शरत्पूर्णचन्द्रस्य शुभ्रज्योत्स्नायां यूथिकाविकासम्, अनेकवारमवलोकितवानस्मि। कदाचित् कदाचित् सौन्दर्यमुग्धोऽपि जातोऽस्मि। परं नारीमुखस्य कीदृक् सौन्दर्यमिति न तस्मिन् समये सम्यग् बोद्धुमपारयम्। यद्धि सौन्दर्यं चिराय चित्तं मरीचिकायां निक्षिप्य स्वयमन्तर्हितं भवति, तस्य महिमानं तावत्कालमप्यहं नान्वभवम्।

सप्तदशवत्सरात्मके वयसि एफ.ए. परीक्षामुत्तीर्य प्रियभगिन्या मोहिन्याः श्वशुरगृहमगमम्। मोहिन्या वयस्तस्मिन् समये पञ्चदशवर्षात्मकम्। एतस्य वर्षद्वयपूर्वं मोहिन्या विवाहोऽभवत्। मम भगिनीपतिः परेशमहाशयः बी.ए. परीक्षामुत्तीर्य एम.ए. परीक्षार्थं कलिकातायामपठत्। विजयदशम्या अवकाशमुपलभ्य समायासीदसौ गृहान्। अहमपि देवीपूजावकाशे भगिनीं द्रष्टुमायातोऽभवम्।

एकस्मिन् दिने परेशचन्द्रेण सह तस्य शयनकक्षे स्थितो वार्तासक्त आसम्। एतस्मिन्

समये एका युवतिः– युवतिरथवा किशोरी– इति नाहं सम्यग् वक्तुं पारयामि, प्रायो मोहिन्याः समवयस्का एका सुन्दरी ''महदेकं कौतुकम्'' इत्युक्त्वा उन्मुक्तसरलहास्येन हठात् प्रकोष्ठकामेदं झाङ्कारितमकरोत्। परमकस्मात् सम्मुखे मामभिवीक्ष्य चकितचकितमतिष्ठत्। मुखं लज्जारुणमभवत्। तस्या हास्यं सम्भ्रमश्चमुहूर्तमध्ये तिरोऽभूत्। क्षणमात्रे विलम्ब्य नतमुखी अत्यन्तमप्रस्तुतभावेन गृहाद्बहिरभवत्। परेशचन्द्रस्तां प्रत्यावर्तयितुं बहुतरमाह्वयामास, द्वारपर्यन्तमग्रेसरोऽप्यभवत् परं सुन्दरी न पुनः परावृत्ता। परेशः प्रावदत्– ''सरलाया महती लज्जा। भवन्तं दृष्ट्वापि लज्जा!'' परेशस्य हास्यमयमाननं हठाद् गम्भीरमभवत्।

मम विदितमासीत् केय सुन्दरीति। सरला परेशचन्द्रस्य कनिष्ठसहोदरा। सा चेयं विधवा, इत्यपि मे विदितमासीत्। एतत्पूर्वं परेशगृहगमनस्य नाभूदवसरः। सरलां सर्वप्रथममद्यैवापश्यम्!

किन्तु किमहमपश्यम्? एवंविधं कदाचन पूर्वं दृष्टवानस्मीति न मे मनसि समभवत्। मम प्रतीतमभूत्–घनकृष्णस्य मेघस्यान्तराले विद्युल्लता द्रुततरमखेलत्। चञ्चलेऽस्मिन् विद्युत आलोके, आलोकहीनमुज्ज्वलतावर्जितं च मम यौवनकक्षं सहसैव आलोकितमभूत्।

दिनत्रयादुत्तरं परेशचन्द्रादनुमतिं गृहीत्वा यात्रामकरवम्। किन्तु दृष्टं मया– यदेतस्मिन्स्वल्प एव समये मम मनोमध्ये घोर एको विप्लव उपस्थितोऽस्ति। विप्लवस्य कारणमपि सुस्पष्टमभूत्। फलभोगोऽपि तस्य प्रारब्धोऽभूत्। किन्तु मनःसंयमस्य कामपि युक्तिं नाहमध्यगच्छम्। रक्तमांसमयं शरीरं भित्त्वा या खलु तीक्ष्णाऽसिधेनुका मनस्यपि व्रणमुत्पादयामास तस्यास्तीक्ष्णतां मुहूर्तमध्य एव हृदयङ्गमामकरवम्। नाहं सरलां विस्मर्तुं प्राभवम्।

गृहं प्राप्यापि सरलायाः कथा मनसि जागृताऽभवत्। सप्ताहात्परं सप्ताहं व्यतीतमभवत्, नानाकार्येषु मनो योजयितुं चेष्टामकार्षं परं किमपि फलं नाभवत्। मनसा सह युद्धं कृत्वा पराजितश्चावसन्नश्चाभवम्। एकमासोऽपि नाभवद्व्यतीतः, पुनरहं मोहिनीं द्रष्टुं परेशचन्द्रगृहमयासम्। सत्यमेव किमु मोहिनीं द्रष्टुम्? मोहिन्या विवाहोत्तरं वर्षद्वयस्य मध्ये नैकवारमपि तां द्रष्टुं तावद्व्याकुलता समभवत्, एषा कथापि मे मनसि स्वयमेव प्रादुरभूत्। आत्मसुखस्य कृते ममाप्यात्मप्रवञ्चनाया दासत्वं कर्तुमापतितम्।

तस्मिन् दिने प्रथममेम प्राङ्गणे परेशेन सह मम साक्षात्कारोऽभवत्। तदनन्तरं परेशः अन्तःपुरे प्रयातुमुदतिष्ठत्। वार्तास्त्रोतस्तथैव प्राचलत्। अहमपि तदनुसरणमकार्षम्। लज्जा प्रतिपदं बाधामुपस्थापयामास। परेशो मया सह आत्मनः शयनगृहमाजगाम। सरला हि तस्मिन् समये पुस्तकपाठे दत्तचित्तासीत्। द्वारस्य सम्मुखे अहम्, परेशश्च गृहप्रविष्टः, पलायितुमपारयन्ती सरला भयचकिताभवत्। मुखमवनामयामास। अहमेकवारं तन्मुखमवालोकयम्। तस्मिन् मञ्जुनि मुखे एवंविधा सलज्जकोमलता मिश्रितासीत्, यद्वशान्मम मनसि नूतनमिव पुनरुदभवत्– सेयं सर्वाङ्गसुन्दरी, सरला विधवा? विधातुः कोऽयं विचारः!

तस्मिन् दिने सरलया सह मम परिचयमात्रं समभवत्। क्रमेणालापवृद्धौ सरलायाः

सङ्कोचो दूरेऽभवत्। मम पुरता नातिष्ठत्कुण्ठितभावः। अहमपि मध्ये मध्ये मोहिनीं द्रष्टुमयासम्! मामवलोक्य सरला किञ्चिदपि हर्षं न प्राकाशयत्। निजगाम्भीर्येणात्मानमवगुण्ठयितुमकरोच्चेष्टाम्। किन्तु तस्या नयनयोर्व्याकुलतां नैषा गोपायितुमशकत्, चेतसो विकृतिमवरोद्धुं बलात्कारेण सैषा कार्यान्तरे मनोयोगमकार्षीत्।

पञ्चषमासानन्तरं प्रसङ्गतोऽहं मम मनसो भावं सरलायाः पुरः प्राकाशयम्। सरला धीरभावेन सकलामपि कथामशृणोत्, किमप्युत्तरमदत्वा मस्तकमवनमय्य प्रायासीत्। गमनसमये केवलं निःश्वासशब्दोऽश्रूयत।

शरीरमवसन्नम्, मनो भाराक्रान्तम्, कस्मिन्नपि कर्मणि नास्त्युत्साहः। तातचरणा मां कार्यार्थं चन्द्रनगरं प्रेषयामासुः। रामचरणः शुश्रूषार्थं मया साकमगच्छत्। चन्द्रनगरे कतिपयदिनपर्यन्तं न प्राप्तं मया गृहस्य वृत्तम्। पर्यन्ततः प्रियसुहृद एकस्य पत्रं प्राप्नवम्। तत्रासील्लिखितम्- पितृचरणानामार्थिकी दशा शोचनीया। परं शीघ्रमेव तत्प्रतीकारो भावी। पत्रस्यान्ते एतदपि सूचितमासीत्-यत्पितृचरणा मदर्थमेकां सुन्दरीं कन्यामन्विष्यन्ति। प्रियबन्धोरिदं पत्रमभिवाच्य मम हास्यमभवत्। रामचरणो मत्पार्श्व एव स्थितोऽभूत्। स हि मम हास्यमभिवीक्ष्य जिज्ञासते स्म- ''पत्रे किञ्चित् शुभवृत्तमस्ति किमु?''

सहास्यं प्रोक्तं मया-''पितृचरणा मम विवाहस्यायोजनं कुर्वन्ति। रामचरण! मन्ये विसर्जनस्य सोऽयमेव समयः!''

रामचरणः साश्चर्यं ग्रीवामाकुञ्च्य प्रावदत्-''विसर्जनम्? केयं भवतोऽवस्था? महान्मम विचार उपस्थितः''।

## (३)

कतिचिद् दिनान्यातिवाह्य चन्द्रनगरे पत्रमेकमधिगतं मया। अपरिचितान्यक्षराणि, दृष्ट्वैव प्रतीयते-स्त्रीजनस्य कस्यापि लेखः। केयं मां पत्रं लिखितवती? किञ्चित्कौतुकेन, किञ्चिदाग्रहेण, पत्रमिदं निर्मुक्तबन्धनमकार्षम्। दृष्टं मया यत्पत्रस्यावसाने सरलाया नामाक्षराणि सन्ति! सरलया मह्यं पत्रं लिखितमस्ति। नाहमिदं कदाचिदपि मनस्यकरवं यत्सरलायाः पत्रमधिगमिष्यामीति।

पत्रमेकश्वासेन समस्तमपठम्।

''विनोद!,

''भ्रातुरुद्देश्येन यत्प्रेषितवानसि पत्रम्, तत्पठितं मया। भवतः शरीरस्य याऽवस्था, तदर्थं चन्द्रनगरनिवास एव भवतः सुखावहः। निरन्तरेणाध्ययनेनैव शरीरमुत्क्लेशितवानसि। भ्रातृजाया भवदर्थं निरतिशयचिन्ताकुला। भवतः कुशलवृत्तमुपलभ्य सर्वेऽपि सुखिनो भविष्यामः। चन्द्रनगरे भवतः कियान्निवासः सुनिश्चितः?''

''भवन्मनसोऽवस्था शोचनीया, एतत्सम्यगवगच्छामि। चन्द्रनगरप्रयाणात्पूर्वं मह्यं यत्प्रोक्तवानसि, तस्य न किमप्युत्तरं प्राप्तं भवता! अभागिनी किं वा उत्तरं दास्याम्यहम्? अहं बालविधवा। विवाहः कदाऽभवादित्येव न स्मरामि। स्वामिनो मुखमपि न कदाचित्स्मृतिपथे

समुपैति। एतत्कथाविस्मरणेन लेशतोऽपि मम दु:खं नासीत्। पितृगृहं आल्हादेनैव दिनान्ययापयम्। अनेनैव रूपेण दिनयापनं किमु नासीत्सुखावहम्?''

''किन्तु दिनयापनं न मे भाग्ये आसीत्। त्वं मम दृष्टिगोचरोऽभू:। तवादर्शनमेव मन्ये सम्यगासीत्। किन्तु यद्भावि, तज्जातमेव। भवान्मयि बद्धप्रणय:, मामुद्वोढुं निश्चयो भवत:। अनवलोकितपतिमुखानां मादृशविधवानां विवाह: शास्त्रसङ्गत:, असङ्गतो वा, नैतदहं जानामि। किन्त्वस्मिन् जीवनेऽसम्भव एव विवाह:। पृथिव्यां नाहं संसारिणी भविष्यामि। समाजस्य भयेनैतां कथं लिखामि, नैतत्। कलङ्कस्य भयेन मानुषो जीवनस्य सकलकामना: परित्यक्तुं न शक्नोति। समाज एव वा सतीत्वस्य जवनिकायां कानि कानि वा दुराचरणानि नाद्यावधि सहते? तथापि कथयामि संसारे व्यापारमिममुद्दिश्य नेत: परं भवता सह मे साक्षात्कारो भविष्यति। अपरपारार्थं अपेक्षां कर्तुं पारयेद्भवान्? यदि पारयेस्तर्हि पुनर्मम दर्शनं देयम्, अन्यथा न मम दृशो: सम्मुखमुपैष्यामि, इदमेव सविनयमर्थये। एतत्किमेतावत्कठिनम्? अहं तु न तथा भावयामि।

सरला।''

द्विवारे त्रिवारं पत्रमेतदपठम्। रमणीहृदयरहस्यं न मे परिज्ञातमासीत्। पराजितो भूत्वा मूर्द्धानमवनतमकार्षम्। विपुलचेष्टया मन: संयतं कृत्वा प्रावदम्-तदेव भवतु, तदेव भवतु। इह लोके एतत्पर्यन्तमेवास्तु। परलोके मम नि:सीमं शान्तिसुखम्। एतल्लोकस्य सीमोल्लङ्घने कियान् वा समय आवश्यक:? कति दिनानि वा प्रतीक्षाकरणमावश्यकं भविष्यति?

यथासमयं सरलायै मम मनोभावमेनमसूचयम्।

(४)

एतद्घटनानन्तरं पुन: पञ्च वर्षाण्यतीतान्यभवन्। एतस्मिन् समयान्तराले बहव: कन्यापितर:, आत्मन: कन्यारत्नसम्प्रदानस्य प्रस्तावं चक्रु: पितुरग्रे, मित्राणां द्वारेण मामप्यस्मिन् विषये नितरामबाधयन्। परं नाहमात्मन: सत्यमत्यजम्। किमिति विवाहं न करिष्यामि, पितुरग्रे तदेतदप्रकाशितमासीत्। जलप्रवाह इव दिनप्रवाहो यातुमारभत। सर्वदिनान्येकवारमेव चदयास्यन्, प्रसन्नस्तर्ह्यभविष्यम्।

पूर्वमिव मध्ये मध्ये परेशगृहं मे गमनमुपक्रान्तमिति। सरला पूर्वमिव सहास्यमालपति, इतिहासान् कथयति, किन्तु न कदाचिदपि भावान्तरं दृष्टं मया। पत्रेण ममापि शिक्षा जातासीत्-अहमपि कस्मिंश्चिद्दिने न काञ्चिदन्यां चिन्तां मनस्यकरवम्। प्रेम्ण आकर्षणं मां सरलाया निकट समाचकर्ष, किन्तु एतस्या देव्या: सम्मुखे मोह: न मां विह्वलं कर्तुमपारयत्। सरला यदा हि मम सम्मुखे आगत्यातिष्ठत्, तदा तामात्मनश्छायां मनस्यभावयम्, किन्तु बिन्दुमात्रमपि पार्थिवकामना न मे मनस्युदियाय। सरलाया दृष्टान्तेनात्मनो मनसि संयम: स्थापितोऽभून्मया।

प्राय: षण्मासानन्तरमेतस्य, संसारकार्याणि परिसमाप्य पिता मे स्वर्गमयासीत्। माता तु बहुकालपूर्वमेव स्वर्गवासिनीजाताऽभूत्। गृहमध्ये परिवारगणनायामतिष्ठाव, अहं, रामचरणश्च।

पितुर्लोकान्तरगमनानन्तरं रामचरण: पुनरेकवारं मां विवाहार्थपीडयत्, परं मम तदेव

एकमुत्तरम्-नीरवं हास्यं नाम। वराको वृद्धः कथं वा मम कथां बुध्येत्?

परेशचन्द्र एव एकप्रकारेण ममाभिभावकः समभवत्। एतत्पूर्वमेवाहं एम.ए. परीक्षोत्तीर्णः समभवम्। परेशचन्द्रस्येच्छासीत्, यदहं वाक्कीलो भवामि, अथवा न्यायाधिकरणेऽधिकारप्राप्त्यर्थं परीक्षां ददामि। गार्हस्थ्यावलम्बनार्थं परेशचन्द्रो बहुतरं मामबाधत। स्नेहमयी भगिनी मोहिनी मां लोकचर्यायामुदासीनमभिवीक्ष्य चक्षुषोर्जलमपि निःशब्दममुचत्। अहं कदाचिद् देशदेशान्तरेषु परिभ्रमामि, कदाचिच्च निर्जने पुस्तकपाठावहितः सन् काञ्श्चिन्मासान् यापयामि। जीवनं यदा सुतरां वैचित्र्यहीनं प्रतीयते, तदा परेशचन्द्रस्य गृहे गत्वा वत्सरद्वयात्मकं मोहिन्याः शिशुमङ्के कृत्वा विनोदयामि विषण्णं चेतः।

एकदा अपराह्णसमये गृहावस्थितः पुस्तकपाठनिविष्टमना आसम्, एतस्मिन् समये परेशचन्द्रस्य पत्रमेकमवाप्नवम्-दिनत्रयात् सरला ज्वराक्रान्ता, विकारस्य लक्षणानि क्रमक्रमेण प्रकाशन्ते।' नाहं स्थिरतामवलम्बितुमपारयम्। तस्मिन्नेव दिने सरलामवलोकितुं परेशगृहे यात्रामकरवम्।

द्वितीयादिने सन्ध्यातः प्राक् परेशचन्द्रस्य गृहे उपस्थितोऽभूवम्। सरलायाः शयनकक्षे गत्वा विलोकितं मया- परेशचन्द्रः मोहिनी च सरलायाः शय्याप्रान्ते विमर्शभावेनावस्थितौ। चिकित्सकः अर्द्धघटिकातः पूर्वं सरलां विलोक्य गतवानस्ति। जीवनस्याशा अतिस्वल्पा, रात्रिरपि प्रयाति न वा, अस्मिन् विषये सन्देह एवासीद्वैद्यवरस्य।

सर्वमेतदश्रौषम्। सरलायाः शयनीयसन्निधौ विह्वलभावेनावस्थितः शनैः शनैः सकलामेव कथामवागच्छम्। मम वक्षसि रक्तस्रोतः स्तम्भितमभूत्। व्याकुलदृष्ट्याऽहमेकवारं परलोकयात्रिणोऽस्य मुखमद्राक्षम्। तदा ह्यासीत्सरलायाः संज्ञा विलुप्ता, तस्मिन्दिने अपराह्णावेव सरला विचेतना। ललाटधृतहस्तोहं तस्मिन्नेकस्मिन्नेव स्थाने एकेनैव भावेनातिष्ठम्। समस्तदिनस्य पथिश्रमेण देह आसीदवसन्नः, परं मानसिकी दुश्चिन्ता देहस्यावसादमाच्छादयामास।

अर्द्धरात्रादुत्तरमेकघटिका व्यतीता भवेत्, एतस्मिन् समये सरलायाश्चेतनासञ्चारोऽभूत्। प्रतीतमभवन्मे मनसि- यथा चतुर्दिक् नयने प्रक्षिपन्ती सा कञ्चिदन्विष्यतीव।

पार्श्वं परिवर्त्य सरला विलोकयामास माम्। पर्यपश्यत्सा एकवारं मम मुखम्। तस्याश्चक्षुषोरलौकिकं किञ्चित् तीव्रज्योतिः प्रकाशितमासीत्।

## ( १ )
## दयनीया

## ( १ )
## अवरोधः

'किं बाबुमहाशयो गृहेऽस्ति ?' इति वदन् युवको गृहान्तः प्रवेष्टुमैच्छत्तथैव परिचारिका द्रुतं द्वारोपर्येवावरुध्याऽपृच्छत्- 'भवान् कतरं बाबुमहोदयं पृच्छति, किं गृहस्वामिनम् ?

''नहि नहि, अहं व्रजनन्दनसहायं पृच्छामि, किमसौ बहिर्गतः ?'' '' आम् सम्यक् ते गृहान्तरेव तिष्ठन्ति, अहं तेभ्यो भवदागमनं सूचयामि।''

नवयुवको द्वारनिहिते वेत्रासने तिष्ठन्नचिन्तयत् - 'आः, अस्याऽवरोधस्याऽप्यस्ति काचित्सीमा ? अजस्त्रं ममागमनम्। एका जातिस्तथापि गृहवासिनामनारतं भयं भवति यन्नाहं सहसा गृहं प्रविशेयमिति। अत एव परिचारिका सरभसं द्वारे प्रहितास्ति यन्नाहं स्त्रीणां छायामपि पश्येयमिति'।

युवको मनसि विचारयन्नेवासीदेतस्मिन्नेवान्तरे अन्योऽप्येकः सज्जनः समागत्य युवकसमीपस्थमासनधितिष्ठन्नवोचत्- 'हंहो विन्ध्येश्वरीप्रसाद! किं मनस्यावर्तयसि ? मुखमुद्रया प्रतीयते यन्मस्तिष्कप्राङ्गणे विचारघोटकाः सरभसं प्रधावन्तीति।' युवकः शनैरवोचत्- 'कोऽन्यो विचारस्य विषयः ? एतद्देशस्य परिणामं भावयामि-यत्रहि एकस्यां जातौ, निकटसम्बन्धेऽपि च परस्परमयं व्यवहारस्तत्र साधारणसमाजेन सह कीदृग्वा व्यवह्रियेत ? इत्युक्त्वा अवरोधप्रथाविषये आत्मीयान्विचारान्प्रकटयामास।

''अये! समग्रं राष्ट्रमेव किमिति लाञ्छयसि ? अयं तु बिहारप्रदेशस्यैव बुद्धेरुपर्यत्याचारो नाम। अन्यान्प्रान्तान् पश्य, सर्वत्र किल विवेकपूर्वो व्यवहारः। जातयोऽवरोधप्रथामनुसरन्ति तास्वपि काचित्सीमा निर्धारितास्ति। एतत्प्रदेशवत् अवरोधः कण्ठावरोधको नास्ति।''

''हन्त सेयमपि काचित्प्रथा नाम ? यत्र हि दयायै विचाराय च स्थानं नास्ति सापि किं मर्यादा परिगण्येत ? पश्यतु भवान्-एतेषु सप्तखण्डेषु भवनेषु महिलानां का दशास्ति ? न सूर्यरश्मयो नापि वा वायुः सञ्चरति। गृहान्तस्तलेषु स्तिमिततया कृतं सुदृढं पदम्। एवं सत्यपि नेमा वराक्यो गृहाद्बहिः पदं प्रभवन्ति निक्षेप्तुम्। व्रजनन्दनसहायस्यैव गृहमालोच्यताम्- प्रायः सर्वा एव स्त्रियो रुग्णाः सन्ति।'हकीम महोदयस्य प्रायः प्रत्यहमेवोपचारो भवति। परं न तथापि महिलानां भाग्ये उन्मुक्तो वायुः। गृहाद्बहिर्गमनेऽपि-दृढपिहितेऽपि रथे पुनरुपरितः स्थूलं पटपिधानमाच्छाद्यते येन भगवान् वायुरपि विमुखः परावर्तते।

**सज्जनः** - भूम्यधिकारिणामियमेव मर्यादा। बाबूमहाशयो वाक्कीलोऽस्तथापि भूस्वामिना प्राचीनमानमर्यादा न शिथिलीकर्तुं शक्यते।

**विन्ध्येश्व०** - बन्धुवर! अहमपि प्राचीनप्रथापक्षपाती। किन्तु एतस्याः प्रथायाः समर्थनं न कथञ्चिदपि कर्तुं पारयामि य स्त्रीषु कण्ठागतप्राणास्वपि न ताभ्यः स्वच्छवायुर्दीयेतेति।

व्रजनन्दनसहायस्ताम्बूलकरङ्किकामादाय बहिरागमत्, सस्मितमकथयच्च- 'अहो अद्य प्राचीनप्रथानां चर्वणा चिरात्प्रचलिताऽवलोक्यते! अधुना ताम्बूलमादाय तु तत्प्राणान् परित्यज।'

**विन्ध्ये०** – महोदय! प्राचीनप्रथास्तावत्किमिति कलङ्कयसि। दया च धर्मरक्षापि सर्वत्रानुवर्तनीयावेव। तयोरपि कण्ठावमर्दनं तु न केनचिदाज्ञप्तम्। न भवान् स्तनन्धयः, ईश्वरानुग्रहेण भवतोऽपि द्वित्राः शिशवः सन्ति। एवमवस्थायामपि स्त्रीष्वननुकम्पनं तावद् दैवेच्छैव।

**व्रजनन्दनः** – प्रियवर! सत्यं त्विदमस्ति यत् श्रीमती जननी न तावदिच्छति परम्परागतासु प्रथासु स्वल्पमपि परिवर्तनम्। पितृचरणास्त्वेवंविधेषु व्यतिकरेषु न मनोयोगं कुर्वन्ति। अस्तु गच्छत्वियं दन्तकथा। समयः स्वयमेव कञ्चन पन्थानं दर्शयेदग्रे।

**सज्जनः** – 'सस्मितम्' प्राङ्गणस्य पन्थानं त्वहंदर्शयामि यत्र हि वायुसेवनार्थं गम्यतेऽस्माभि। स्मेराननास्त्रयोऽपि वायुसेवनार्थं द्रुतमगच्छन्।

## ( २ )
## अवरोधवासिन्याः आत्मकथा

तामेव पञ्चदशतारिकायाः (१५ जनवरी) प्रणयकथां सूचयामि। दशवादनोत्तरं कृतभोजनास्ते वाक्कीलताकृतये न्यायालयमगच्छन्।अहमपि गृहजान् सर्वान् भोजयित्वा, बालकांश्च यथावदुपचर्य कृतभोजना अहमपि नित्यवत् सूचीकार्ये मनोयोगमकार्षम्। मध्याह्नोत्तरमेका घटिका व्यतीता भवेदेतस्मिन्नेव समये अस्मत्प्रतिवेशस्था सुशीला (नववर्षवयस्का बालिका)आगत्य 'ताश' क्रीडार्थमाग्रहमकरोत्। तन्मनोविनोदार्थम् अनिच्छन्त्यप्यहमेतस्यां क्रीडायां प्रावर्तिषि। मन्ये कियन्त एवक्षणा व्यतीता भवेयुरेतस्मिन्नेवान्तराले प्रलयोपस्थापकोऽसौ भयङ्करः कालः समुपस्थितोऽभवत्। मम पर्यङ्को मन्दमन्दमकम्पत। आश्चर्यचकिताहं भवनभित्तौ समन्ततोवलम्बितेषु वस्तुषु भयवित्रस्ते लोचने अपातयम्। सहसैव नभस्युड्डीयमानस्य वायुयानस्येव घोरतरं घर्घरारवमशृणवम्। तत्क्षणाद्यद्यद्यद्यदेव च पर्यन्ततः कोलाहलः समभवत्। 'बहिर्धावत बहिर्धावत, भूकम्पः समायातः!' इति गगनभेदी हाहाकारः समन्ताद्व्याप्तोऽभवत्। बालिका सुशीला भयव्याकुला सती निजगृहं प्रति पलायिता! परं हन्त! मत्सदृश्यो दीनाः शुद्धान्तवासिन्यः प्राणान्तभयेऽपि कुत्र वा पलायन्ताम्? उन्मुक्ते स्थाने गमनं किं तासां भाग्ये लिखितम्?

एतस्मिन्समये समीपे सरभसं धावमानस्येव कस्यचित् पदशब्दोऽश्रूयत। भीतया मया गृहान्निःसृत्य दृष्टं यत् वृद्धा श्वश्रूर्बालकान्निर्दयमाकर्षन्ती अन्तः पुराद्बहिर्गच्छति। तादृशभयङ्करं गगनभेदिनं चीत्कारम्, दुग्धपोष्याणां बालकानामेवं निर्दयतयाऽऽकर्षणस्य तथाविधं भीषणकाण्डं च दृष्ट्वा मम हृदयमतितमामेकम्पत। असहमानानीव मे रोमाण्युदतिष्ठन्। भयव्याकुलाया मे यद्यपि हस्तपादमवशमासीत्परं प्राणानां ममताविमोको न सुकुरो नाम। अहं हि न किञ्चिद्विचार्य तस्मात्स्थानात्पलायनार्थं सन्नद्धाऽभवम्। श्वश्रूः पृष्ठतो मामागच्छन्तीं विलोक्य नेत्राभ्यां

दहन्तीवाऽवदत्– 'इतः पलाय्य क्व गमिष्यसि ? किं न पश्यसि, इतस्ततः सर्वत्र बहिः पुरुषा एव सन्ति ? किञ्चिल्लज्जापि पालनीया नाम।'

ममं हृदयरक्तं तस्मिन्नैव स्थाने जडीभूतमभवत्। प्राणानामाणां परित्यज्य, नरघातिनीमिमामवरोधकुप्रथां करुणापूर्णेन हृदयेनाक्रोशन्ती भयवित्रस्ता तत्रैवातिष्ठम्। तावत्काले श्वश्रूस्तु बालकान् भुविकर्षन्ती शुद्धान्ताद्बहिरदृश्याऽभवत्। विशालोऽसौ जनशून्यः शुद्धान्तप्राङ्गणः साम्प्रतमत्यन्तं भयानकतामधारयत्। पूर्वोक्ता घटनाः केषुचित्पलेष्वेवाघटन्त। स्मरणे लेखने च मम कामं विलमे भवेत् परं भयङ्करं तद् दृश्यं प्रतिपलमेवाधिकाधिकं भयानकतरमभवत्।

नाहमधुना तत्र स्थातुमपारयम्। कम्पमानाभ्यां चरणाभ्यां सोपानमुल्लङ्घयन्ती कतिभिश्चित् क्षणैरेव नीचैः प्राङ्गणमवातरम्। प्राङ्गणे मया सम्प्रति पादोऽपि न स्थापितो भवेत्तावदेव अस्मत्सम्मुखस्थं विशालतमं भवनं भयङ्करशब्दं कुर्वदपतत्। विशालेऽस्मिन्महाभवने साहमेकाकिन्यासम्। अतएव भयपरवशाया मे सर्वगात्रमकम्पत। सर्वमपि गृहमस्मिन्समये तरङ्गपतिता नौरिव कम्पमानमासीत्। भीताहं पश्चिमां प्रति मुखं कृत्वा मृत्युकालं प्रतीक्षमाणां सम्मुखस्थां गगनचुम्बिनीमट्टालिकां भयातुरनयनाभ्यां पश्यन्ती क्षणमतिष्ठम्। पतितानां गृहाणामुड्डीयमानयाधूल्या गगनमण्डलं धूलिधूसरमवलोक्यते स्म। समन्तात्पततां भवनानां भयङ्करतमं शब्दमाकर्ण्याकर्ण्य मम प्राणा एकैकक्रमेण निःसरन्त इवासन्।

अस्मिन्नेव समये सम्मुखस्थाया अट्टालिकाया अग्रभागोऽस्मद्भवनस्य बहिरञ्चलोपरि अनमत्, तं च चूर्णविचूर्णं कुर्वन् पश्यन्त्या एव मे केवलं हस्तत्रयसन्निहितमेवागत्य धराशाय्यभवत्। तत उच्छलद्भिश्चपूर्ण-पाषाणैर्मत्पदयोरुपस्थाय प्राणान्तभयस्य सूचना मह्यमदीयतेव। ममहृदयं नीरक्तमिवाभवत्। अहं मृत्योर्निश्चयमकरवम्। जीवनसमाप्तेस्तदेतस्मिन्प्रथमक्षणे जीवनस्यातीतघटना मम हृदयेऽजागरुः। प्राणप्रियाणां शिशूनां स्मृतिः सहसा समभवत्। अङ्कलालितं यं किल शिशुं रात्रावपि जाग्रती नितान्तं कठिनतयाऽपोषयं तन्निमितं मम हृदयमक्रन्दत्। किन्तु सहसैव मे मोहनिद्रा भग्नाऽभवत्। मम पार्श्वस्थो गृहभागो भयङ्करशब्दं कुर्वन् मत्समीप एव भूमिसादभवत्। भूमौ पतित्वा प्रसरतो भित्तिभागस्याघातेनाहमपि दूरमपतम्।

हन्त हन्त दुस्त्यजः प्राणानां मोहः। अहं सरभसमुदतिष्ठम्। दवपतिता हरिणीव निजप्राणरक्षार्थमितस्ततः शून्ये नयने प्राहिणवम्। कियत्कालार्थं निजप्राणरक्षाया एकमात्रमुपायमहमलक्षयम्। यः किल भवनभागः पूर्णतया पतितोऽभूत्तस्यैव भग्नावशिष्टाया एकतमभित्तेरुपाश्रयेणाहमतिष्ठम्, यतो हि तस्मिन्भागे कस्या अपि भित्तेः पतनस्यसम्प्रति भयं नासीत्। एतस्मिन्समये कृतान्तभयविस्फारिते मे नयने पश्चिमदिक्स्थितस्य द्विखण्डशिखरस्योपर्यास्ताम्। न मया पूर्णतया दृष्टमपि भवेदेतस्मिन्नेव समये युगपद्धावतां बहूनां 'मोटर' यानानामिव घोरः शब्द समभवत्, सहैव च प्रबलतम एक आघातोऽप्यभवत्। एतस्मिन्नेव समये द्विखण्डभवनस्य सोऽयं शिखरभागो मन्मस्तकोपरि निपतन्नवालोक्यत।

अस्मिन्वारे निजजीवनस्याशां त्यक्त्वा, यस्या भित्तेराश्रयेणाहमतिष्ठं तस्यामेव भित्तौ निजपृष्ठं सम्यगवमर्द्य मृत्योः कण्ठाश्लेषार्थं सन्नद्धाहमभवम्। एकः पलोऽपि न व्यतीतो भवेदतस्मिन्नेव काले उत्तरदिशाया दक्षिणदिशायाश्चापि भित्तिभागौ समकालमेव मदुपरि निपतन्तौ मयाऽदृश्येताम्। अन्तकालेऽहमीश्वरस्य स्मरणमपि कर्तुं नापारयं तावतैव पतन्तीनां भित्तीनामाघातेन गतचेतनाऽभवम्।

## ( ३ )

नाहं वेद्मि, यत्कियत्कालमहं मूर्च्छापन्नाऽभवम् परं यस्मिन्समये मे चेतनाऽभवत्तस्मिन् समये त्रिभुजाकारे एकस्मिन् सावकाशे स्थाने आत्मानं सुरक्षिततया पतितामपश्यम्। अध उपरि सर्वतो मे इष्टका-पाषाणादीनां राशिरावृतोऽभूत्। मध्योऽहं महतीनां काष्ठ-पाषाणापट्टिकानामन्तरावकाशे निराघातं भुवि पतिताऽऽसम्। मदुपरि कियान् भारो भवेदेतस्य कल्पनापि मद्बुद्धेरगोचरीभूता।

यथैव मे संज्ञाऽभवत्तथैव नानादुःखैर्दुश्चिन्ताभिश्चाहमाक्रान्ताऽभवम्। सर्वतः पूर्वं शिशुनां स्मृतिर्मे हृदयममथ्नात्। आत्मनः सर्वाण्यपि दुःखानि विस्मृत्याहं प्राणप्रियाणां शिशूनां कृते व्याकुलचित्ताऽभूवम्। हा हन्त मम शिशूनां न जाने का वा दशा भवेत्। अहो दुग्धमुखं तं किल शिशुमनिरीक्षितवत्या मे कियान् कालोऽभवत्। स वराकः स्तनमपि तु न पायितः। दुग्धमपायितवत्या मे स्तनयोर्भरकृता काचित्पीडेवासीत् परं सम्प्रति तत्स्मरणेन स्वत एव पयोधरयोर्दुग्धमस्रवत्। ममान्तरात्मा भृशं विकलोऽभवद् यदहमात्मधनं तत् स्ववक्षसि गोपायमि। किन्तु हन्त सम्प्रति स्वयमेवाहमस्मिन् लोके नाऽस्मि। यस्मिन्स्थाने पतिताऽस्मि ततो हस्तमात्रान्तरेऽपि स्पन्दितुं नावकाशः। हे भगवन् किमित्यहं जीवितास्मि? अये कोऽयं कण्ठरवः?

न जाने, अहं कियत्पर्यन्तमेवंविधेषु विचारेषु लीनाऽस्यास्यं परं सहसैव मे कर्णयोः कण्ठरवोऽपतत् यथा समीप एव कश्चिद्ब्रवीति- 'अहं जीवामि। उद्धर माम्' स्पष्टं प्रतीयते स्म यत्स्त्रिया अयं कण्ठरवः। नाहं सम्यग्विचारयितुमप्यपारयं तावतैव पृष्ठभागादपि ध्वनिरश्रूयत- 'अहमत्रैव निखातास्मि, हन्त उद्धरत माम्।' इदानीं मम निश्चेयनाभूत्सन्देहो यन् ममेवाऽवरोधरुद्धानामबलानामेव सोऽयं करुणरवः। यथा यथाहमवधानमदां तथा तथैव मे प्रतीतमभूद् यन्मत्समीपवर्त्तिभ्यो बहुभ्य एव स्थानेभ्यः 'अहं जीवामि, उद्धरत माम्' इत्याकारको हृदयविदारकः करुणरवः समायातीति।

हे भगवन्! अहमिव किमन्या अपि वराक्यो दग्धाया अस्या अवरोधप्रथायाः कारणेन भवनतले प्राणान् पहारिदवत्यः! मम हि नयनयोस्तद्दृश्यमनृत्यद् यस्मिन् समये सर्वेऽपि पुरुषा गृहान् परित्यज्य अनावृत-प्राङ्गणाभिमुखमधावन्। हन्त किं तस्मिन् स्त्रीणां प्राणा नासन्? किं कस्यापि पुरुषस्य नाऽभवत्तदा विचारो यत् प्राणरक्षार्थं वराक्यः स्त्रियोऽपि कातरा भवितुं शक्नुवन्ति। परं किं कश्चिद् दृशमपि तदभिमुखमपातयत्? स्वीकरोमि यत्सङ्कटसमये

सर्वेऽप्यात्मरक्षार्थमेव व्यग्रा भवन्ति, किन्तु प्राणरक्षां कुर्वतः कस्यचिद्दीनस्य बलान्निवारणं तु न कश्चित्समर्थयितुं शक्नुयात्। प्राणसङ्कटपतिताहं मृत्युभीषणात्तस्माद्भवनाद्बहिर्भवितुं सज्जाऽभवं तस्मिन्समये वृद्धा श्वश्रूः कया वा निर्दयतया मामतर्जयत्? हन्त गृहाद्बहिर्भूत्वा किमहमपि प्राणरक्षां कर्तुं नाऽपारयिष्यम्?

मम हृदये एवंविधा एव विचारवात्याः सरभसमुदतिष्ठन् परं तस्मात्स्थानाद्बहिर्निर्गन्तुं मे व्याकुलताऽभवत्। अहमपि अन्याबलावत् करुणप्रार्थनामकरवम्– 'निःसारयत माम्, अहमत्रैव भूमिप्रोथिताऽस्मि।' मध्ये मध्ये मम श्वासाऽवरोधोऽभवत्परं पाषाणानामन्तराले यः किल वायोरवकाशोऽभवत्तेनैव यथा कथञ्चिदजीवम्।

अहं यत्राऽऽवृत्ताऽभवं तत्र समयपरिज्ञानस्य नासीदुपायः। नितान्तमन्धकारेण तथास्वल्पप्रकाशेनैव च रात्रेर्दिनस्य वाऽनुमानमासीत्। एतदनुमानाधारेणैवाहं वक्तुं शक्नोमि यन्मूर्च्छापगमनोत्तरं दिनद्वयपर्यन्तमहमात्मन उद्धाराय निरन्तरं शब्दमकरवम्। परं तृतीयाद्दिवसादारभ्य क्षुत्पिपासावसन्नाया मे कण्ठध्वनिर्मन्दोऽभवत्। अतएव कदाचित्तूष्णीमभवं कदाचित्तु प्राणरक्षाव्यग्राहं शब्दमकार्षम्– 'कश्चिन्मामुद्धरतु। अहमिदानीमपि जीवितास्मि।' एवमेव सप्ताहो व्यतीतोऽभवत्। अहमासं निर्जला निराहारा च।' अवसन्नशरीराय मे यद्यपि मध्ये मध्ये मूर्च्छाऽभवत् परं यावच्छक्यमहं प्राणरक्षानिमित्तं पूर्वनिर्दिष्टां प्रार्थनामकार्षमेव।

## ( ४ )

अष्टमे दिवसे मया ज्ञातं दक्षिणदिक्स्थितः पाषाणादिराशिर्जनैरपसार्यते इति। मम शरीरे नवजीवनस्य सञ्चारोऽभवत्। शनैः शनैरङ्गिन्ती अहं तत् एव गत्वा मम समग्रां शक्तिं विनियुज्य यथाशक्यमुच्चैचीत्कारमकरवम् – 'भ्रातरः! अहमधुनापि जीवितास्मि। उद्धरत माम्।' राष्ट्रियसभायाः (कांग्रेस) स्वयंसेवकैरहमुद्धृताऽभवम्।

द्वे दिन अहं 'विपन्नसहायकसमितेः' प्रबन्धे तृणकुटीरेष्ववात्सम्। एतन्मध्ये स्वजनसन्दर्शनार्थमहं रात्रिन्दिवमक्रन्दं परं स्वयंसेवकाः मां भोजनाय पानाय च सदयमबोधयन्, असान्त्वयञ्च स्वजनसमागमार्थम्। कृतभोजनपानाहं यदा भ्रमणयोग्याऽभवंतदा स्वजनगवेषणायै निरगच्छम्।

स्थानेस्थाने राष्ट्रियसभानिर्मापितेषु तृणकुटीरेषु भूकम्पाभिभूता दीना धनिकाश्चवराकाः समानया दुरवस्थया पतिता आसन्। एतेषां दीना दशा पाषाणहृदयमप्यरोदयत्। ये धनकुबेराः सप्ताहात्पूर्वं गगनचुम्बिषु राजहर्म्येषु मखमल्लनिर्मितचन्द्रातपच्छायाया राजतपर्यङ्केष्वशेरत त एव सम्प्रति भयानकेऽस्मिन् शीते शिरः संरक्षणार्थमपि स्थानं न लभन्ते। अनन्तस्य गगनस्याधस्तादनाया असहायाश्चते मृतकल्पावस्थायां पतिताः सन्ति। दीनसहायकसमितेः सेवका भूमौ लुठतस्तान् द्विहस्तमात्रोच्छायेषु तृणाकुटीरेषु सदयमुत्थाप्य स्थापयन्ति।

बहुकालमन्वेषणानन्तरं हस्तद्वयोन्नते खर्जूरशाखानिर्मिते लघुकुटीरे तृणास्तरणोपरि

अवनतमुखः, 'हन्त काहं त्वां गोपयेयम्' इति सूचनायैव शिरसि हस्तद्वयं निदधानः, चिन्तया निश्चेतन इव शोकेन शीर्ण इव, दैन्यवशाद्भूमिमाविशन्निव, स्वल्पसमयान्तरेऽपि जन्मान्तरमिवोपगामी मे स्वामी, मन्नयनयोर्गोचरमगच्छत्। हा हन्त! तद्दृश्यस्य कल्पनामात्रेणापि हृदयं विदीर्यते। स्वामिनमेकाकिनमालोक्य 'हा प्राणधन! क्व मे कुसुमसुकुमाराः शिशवः सन्ति' इति करुणं विलपन्ती तच्चरणयोरपतम्।

स हि शोकावेगेन द्विगुणतरमुद्गच्छन्तं नयनजलपूरं नयनयोरेवाऽवरुध्य कथमप्यवादीत्– 'प्रिये मन्दभाग्योऽहं निरचिनवंयन् मात्रा भगिन्या बालकैश्च सह भवादृशं नारीरत्नमपि हारितवानस्मि। परं परमेश्वरानुग्रहेण पुनरपि भवतीमवलोकयामि। भगिन्याः सुशीलायाः पितृचरणानां च दाहक्रिया तु परश्व एव निरवर्त्यत। बालकानां मातुश्चापि न किञ्चिदनुसन्धानमवाप्तम्। '

इदमाकर्ण्य मम का दशाऽभवदिति तु केवलं कस्याश्चनमातुर्हृदयं मत्सदृशस्य कस्यचन दु:खिजनस्य वान्त:करणमेव बोद्धुमर्हति। मामाश्वासयन्नसौ मद्वृत्तान्तमपृच्छत्। अहं सविनयं न्यवेदयं यन् मन्दभाग्याया मे वृत्तं पश्चाच्छ्रोष्यसि, पूर्वं शिशूनां मातृदेव्याश्चा (श्वश्रू:) नुसन्धानमस्माभि: कर्तव्यम्।

एष सरभसमुदतिष्ठत् वाष्पपूर्णाभ्यां नयनाभ्यां मामवलोकयंश्चावादीत्– 'देवि! त्वं दयाया: स्नेहस्य च मूर्तिरसि। मत्सदृश: स्वार्थी पुरुषो भवत्परिसरमपि समुपगन्तुं नार्हति। या पुरुषजाति: स्त्रीजनमवरोधशृङ्खलया निगडयन्त्यपि तेन सह स्वार्थिताया व्यवहारं करोति, ईश्वरदृष्टौ अस्या अपराधोऽवश्यमक्षम्य:। हा हन्त! सोऽहमपराधी केन वा दण्डेन दमनीयो भवेयम्? '

प्रोक्तं मया– 'इदं किल स्त्रीजातेरेव दुर्भाग्यमहमवैमि यद्दीनानामबलानां प्राणबलौ दीयमानायामपि कुप्रथानां पूर्णाहुतिर्न भवति।

तद्दिनादारभ्य प्रतिदिनमावां बालकानामन्वेषणार्थं समितेर्नानास्थानेष्वगच्छाव परं सन्ध्यासमये अत्यहमेव निराशौ परावर्तिष्टाताम्। एकदा एकेनस्वयंसेवकेन सूचितं यदस्मत्स्थानात्समीप एवैकस्मिन् ग्रामे एकावृद्धा स्त्री त्रयो बालकाश्चापि स्वयंसेवकै: प्रापिता: सन्ति। मम हर्षस्य नासीत्परिसीमा। समभून्मम सुदृढा आशा यदहमद्यावश्यमेव प्राणप्रियान् शिशून् विलोकयिष्यामि। स्वामिना सह तत्कालमेवाहं तत्रागच्छम्, परं तत्र गत्वा विदितमभूद् यदिमे बालका मम न सन्ति। भग्नहृदयावावां पुन: पर्णकुट्यामाप्तौ। द्वितीयदिवसे भग्नस्थानानां शोधने कृते स्वयंसेवकैस्त्रयाणां शिशूनां मातुश्चापिमृतशरीराणि प्राप्तानि। तानि दृष्ट्वैव मे हृदय विशीर्णमभवत्। स्वामिनश्चरणाववधृत्याहं न्यवेदयम्– 'प्रभो! ममापि जीवनं सम्प्रति समाप्तप्रायम्। नाहं साम्प्रतं धैर्यमवलम्बितुं शक्नुयाम'।

तस्य नयनयोर्नासीद्वाष्पलेशोऽपि। कण्ठे नाभवद्गद्गद्भाव:। प्रत्युत तन्मुखमण्डले एकमस्वाभाविकं ज्योतिर्न वेद्मि कुतस्तरामुद्भूत्। भग्नहस्तूपोपरि आरुह्य तेनौच्चैरुक्तम्– 'नहि नहि देवि! सम्प्रत्यपि कार्यं न समाप्तम्। यस्या: कुप्रथाया: कृते निजहस्तेनैव अनेकेषां प्राणानां बलिं समर्पितवत्यसि तस्या: परिणाम: सम्प्रत्यपि जनसमाजाय बोधनीयोऽवशिष्यते। आगच्छ, इत: प्रभृति एतद्व्रतस्य दीक्षां गृह्णीव:'।

## अनादृता

रामबाबुमहाशय: प्रावारकं परिधृत्य छिन्नस्यूतयोरुपानहोरभ्यन्तरे चरणं प्रवेशयन्नेव

घटिकां व्यलोकयत् यत्-सार्द्धनववादनं जातम्!! ऊर्ध्वश्वासं धावनं विना नास्ति दशवादने कार्यालयप्राप्तेः सम्भावना। सरभसमुपानहौ परिधृत्य, छत्रं कक्षे धृत्वा धावमानो यथैव गृहाद्बहिरभवत्तथैव गृहिणी विकटचीत्कारं कृत्वाऽब्रवीत्- ''अये गच्छसि कुत्र? यावत्यो गृहयन्त्रणास्ताः किमहमेकाकिन्येव भोक्ष्ये? न किं भवतः किञ्चिदपि चैतन्यम्? मानुषः किमेवं यातनाः सोढुं पारयेत्? गृहकार्यैरेवमेव मे नास्ति श्वासावरसरस्तदुपरि नित्यनवीनैरेवंविधैरुत्पातैः कियत्कालमहं जीवितुं शक्नुयाम्?''

बाबुकुलचूडामणे रामकृष्णमहोदयस्य साम्प्रतं कण्ठे श्वासः समायात इति कथने नातिशयोक्तिः। यतो हि पञ्चदशवर्षव्यापिना सुदीर्घेणानुभवेन सम्यक्परिज्ञातं तेन यद् घटनापरिज्ञानस्य चेष्टायामद्य कार्यालये गमनमसम्भवमेव भवेत्। अत एव वक्षः सुदृढीकृत्य छत्रं दोलयन् निरुत्तरमेव बहिर्गन्तुं गृहद्वारमपावृणोत्। द्वारस्य सम्मुखे रथ्यायामेकादशवार्षिकी बालिका स्थिताऽऽसीत्। छिन्नात्तस्या ललाटाद्रक्तं प्रस्रवति स्म। बालिका हस्तस्थितेन वस्त्रेण प्रस्रवद्रक्तं प्रोञ्छन्ती निःसहं क्रन्दन्त्यासीत्। बालिका रामबाबुमहोदयस्य मृतभ्रातुर्दुहिता।

रामकृष्णेन सविषादमुक्तम- ''अहो लतिके! एतत्किम्? ललाटमिदं कथं विदीर्णम्? एहि, पश्यामि। अरे! इयदाघातः कथं सञ्जातः? चल, चल, गृहान्तः। पटबन्धं बध्नामि। अहो रक्तेन सम्पूर्णमपि परिधानीयमाक्लिन्नम्। अरे इदं शिरः कथं विदीर्णम्, कथय?''

लतिका केवलमक्रन्दत्। उच्चलच्छ्वासतया न किमपि वक्तुं प्राभवत्। रामबाबुमहोदयस्तामालम्ब्य सरभसं गृहे आनयत्। अङ्गप्रोच्छकमेकमार्द्रीकृत्य शिरसि पटबन्धमबध्नात्। 'किमभवत्' इति वारं वारं जिज्ञासितेलतिका रुदत्यवदत्- 'ज्येष्ठा माता अताडयत्'।

लतिका इममभियोगमद्य कथमुपाऽस्थापयदिति न विद्मः। इतः पूर्वं ज्येष्ठपितुः सम्मुखे ज्येष्ठमातुः प्रातिपक्ष्ये अभियोगमुपस्थापयन्त्या न कदापि किञ्चित्फलमुपलब्धं तया। यस्मिन्दिने ज्येष्ठमातुरसावधानतया मार्जारो दुग्धमपिबत्, ततस्यस्या ज्येष्ठमाता सलिले किञ्चिद्दुग्धं सम्मिश्रय महानसद्वारे प्रवाहयन्ती रामबाबुमश्रयावयत्- ''एवंविधा प्रमत्तबालिका तु नास्मिन् जन्मनि मया दृष्टा। यावत्यः प्रमत्तक्रीडा भविष्यन्ति ताः सर्वा महानसे एव। हन्त यत्किञ्चिद्दुग्धमासीत्सर्वं तत्प्रवाहितम्। दीनाः शिशवः किं पिबेयुः?'' लतिका ज्येष्ठपितुः सम्मुखे सत्यव्यापारसूचनाय बहुतर चेष्टामकरोत्। ज्येष्ठातातमहोदयस्य प्रबोधोऽभून्न वा, इति तु न जानीमः, किन्तु लतिकाया दीनाभियोगस्योत्तरे ''तूष्णीं तिष्ठ, तूष्णीं तिष्ठ'' इत्येव सोऽवादीत्।

यस्मिन्दिने तस्या ज्येष्ठा माता पाषाणकुण्डिकामुपरित उद्धरन्ती अनवधानेन तां प्रक्षिप्य अभनक् तदा रामबाबुसविधे साऽभियोगमकार्षीत्- ''बालिकाया इयत्प्रवृद्धं वयः, किन्तु न किञ्चिदपि शासनं मनुते। नेदानीं मे सोढुं शक्तिः। प्रातरारभ्यैव हठमकरोत् यत् पाषाणकुण्डिकया क्रीडिष्यामीति। बहुवारमहं न्यवारयमिमाम्- 'वत्से! सा भग्ना भवेत्। चिरन्तनी च सेयं पाषाणपात्री'। किन्तु को मे वचः शृणोति? अत्याग्रहे कृते विवशा समार्पयमहम्। परिणामे च

तामेतां स्वल्प एव काले खण्डखण्डमकरोत्। एवं सति गृहे लक्ष्मी: किं स्थिरा भवेत्?'' तस्मिन् दिनेऽपि निर्भरं रुदती लतिका निजनिर्दोषितां ज्येष्ठं पितरं सूचयितुं बहुतरमचेष्टत् किन्तु ज्येष्ठपिता न किञ्चिदवदत्। केवलं ज्येष्ठा माता घोरं गर्जन्ती अवदत्– ''पुनर्मिथ्या कथा? एवावन्मात्रायां बालिकायामेतावती धूर्तता?''

एवं किल बहुवारमभूत्। किन्त्वद्य कया प्रत्याशया लतिका अभियोगमिम-मुपास्थापयदिति नाभवद्विदितम्। मन्ये, विचारितं स्यात्तया– इन्धनकाष्ठस्य घोरप्रहारेण यो मे महान् रक्तप्रवाहोऽभवत्तमालोक्य मे ज्येष्ठ: पिता जन्मत: क्लिष्टायां मयि अवश्यं दयेत। अन्यन्मास्तु नाम, किन्तु मम विदीर्णं ललाटमालोक्य मे निर्दोषिता त्ववश्यं प्रमाणिता स्यादिति। अस्तु, किं विचार्य बालिकया ज्येष्ठपितुग्रेऽभियोग: कृत इति तु नाभवद्विदितं किन्तु यथैव सा कथामेतामकथयत्तथैव प्रबला झञ्झेव तस्या ज्येष्ठमाता सरभसमागत्याऽवादीत्।

''अरे अहमताडयम्?अहो बालिकायाश्चरित्रं पश्यत। एहि, चक्षुर्भ्यां पश्य भवतो घटिकाया: का दशा जातेति।''

'अरे मम घटिकाया: किं कृतम्' इति वदन् रामबाबुमहोदय: सरभसं प्रधाव्य निजशयनकक्षे प्राविशत्। दृष्टं यत्तस्य एकमात्रा भित्तिघटिका (क्लॉक) भूमौ प्रपत्य चूर्णविचूर्णिता जातेति। भित्ते: समीपे एका उच्चतमा आसन्दी स्थापितास्ति। तामेवारुह्यकेनचित्सा घटिका हस्ताभ्यां पातितेति।

रामकृष्ण: क्रोधे प्रदीप्तवह्निरिवाऽभवत्। स हि बालिकाया आघातकथामेकवारमेव व्यस्मार्षीत।''दुष्ट बालिके! तिष्ठ, अद्य त्वां गृहाद्बहिर्नि:सार्य ततोऽन्यत्किञ्चित्कार्यं कुर्याम्'' इति सोच्चकण्ठमुक्त्वा द्रुतपदं गृहाद्बहिरभूत्।

एतदुत्तरपि ज्येष्ठमातुर्घोरगर्जनं गगनमकम्पयत्। प्राय एकघण्टां यावन्निर्भरमाक्रुश्य ज्येष्ठा माता आहारादिकमकरोत्। किन्तु लतिकां न कोऽप्याहारायाऽऽह्वयत्। शिरोवेदनया क्षुधोज्वालया च भूमौ निपत्य सा वराकी केवलमक्रन्दत्। निर्भरं व्यथितानां दीनानां रोदनादृतेकोऽन्य आश्वास:? एतस्मिन्नेव समये ज्येष्ठमातुरुच्चतरं कण्ठस्वरमशृणोत्सा– ''अये शयनेन किं गृहकार्याणि परिचलेयु:? याहि, द्रुतमेव गत्वा आपणात्पणद्वयस्य हरिद्रामानय। शिशुश्चासौ क्रन्दतीति तं क्रोडे कृत्वा आपणं गच्छ।''

भर्त्सनाया भयेन नितरामशक्तापि लतिका पणौ नीत्वा क्रोडे बालकमवहत्। बालकोऽसौ ज्येष्ठमातु: साक्षात्तनय:। अतएव शरीरेण भृशं हृष्टपुष्ट:। हस्तयोश्चास्य सुवर्णवलयावशोभेताम्। वपुषि च मखमल्लनिर्मितं सुदृश्यं परिधानीयमासीत्।

बालकं क्रोडे वहन्ती लतिका गृहाद्बहिरवश्यमभवत्, किन्तु लाञ्छनादु:खं स्मरन्त्यास्तस्या निर्भररोदनेन मध्ये मध्ये सर्वाङ्गमकम्पत। सा किञ्चिदेव दूरं गताऽऽसीत्। एतस्मिन्नेव समये मार्गगामी कश्चिज्जनस्तामवदत्– 'बालिके! किं तेऽभवत्? कथं रोदिषि?'

मुखमुत्थाप्य लतिकया दृष्टं यत् सुदृश्यपरिधानीयो द्विधा विभक्तं सुमसृणकेशपाशं वहन्नेको युवक: सम्मुखेऽस्ति। पादयोस्तस्य चाकचक्योज्जवले आङ्गलोपानहौ स्त:।

कुञ्चितमुज्ज्वलं धौतं चायं धारयति। लतिका न किञ्चिदवदत्।

आगन्तुकोऽवादीत्– 'किमिति क्रन्दसि? किं त्वां क्षुद् बोधते? चल, आपणात्तुभ्यं मिष्टभोज्यं क्रीणामि?'

प्रातरारभ्य एतावत्पर्यन्तं लतिका तस्मिन्दिने न किञ्चिद्भुक्तवती। क्षुधया तस्या मस्तकं घूर्णते स्म। सा निःशब्दमागन्तुकमनुससार।

द्वित्ररथ्याः समतिक्रम्य एकस्या लघुप्रतोल्याः सम्मुखे आगन्तुको लतिकामवोचत्– 'अस्मादापणात् आणकद्वयस्य भोज्यं क्रीत्वा आगच्छ। तावद्बालं मे क्रोडे देहि। भोज्यमानीयास्मिन् शून्यापणे स्थित्वा भुङ्क्ष्व। ततो बालकं गृहीत्वा यास्यसि।'

लतिका बालकमागन्तुकस्य क्रोडे दत्त्वा प्रतोल्यां प्राविशत्। आसीत्स्वल्पदूर एव एको मिष्टान्नापणः। भोज्यं क्रीत्वा प्रतोल्या आमुखभागे परावृत्त्य सा व्यलोकयत्–शून्यापणे स्थित एकाकी बालको रोदिति, आगन्तुकश्च नासीत्तत्र। हन्त हन्त! सर्वनाशः। बालकस्य हस्तयोः स्वर्णवलयौ? लतिकाया रक्तं जडीभूतमभूत्। बालकस्य स्वर्णवलयौ क्व गतौ?

लतिकाया मस्तकमघूर्णत। न सा वराकी स्थातुमपारयत्। शून्यापणे निःसहमपतत्। आपणस्थितायास्तस्या मनसि नानाविधा दुश्चिन्ता यातायातमकुर्वन्। मिष्टान्नपूरितो द्रोणःसमीप एव पतितोऽतिष्ठत्। नासीत्तस्योपरि तस्या भ्रूक्षेपोऽपि। बालको द्रोणादेकां शष्कुलीम् (जलेबी) आकृष्य मुखे अदात्, स्रवन्त्या लालया मिष्टरसेन च परिधानीयमार्द्रमकरोत्।

अवशेषे बालकोऽरोदीत्। लतिका तमुत्पसङ्गेसमारोप्य सान्त्वनस्य बहुतरचेष्टामकरोत्। परं शिशुर्न कथञ्चिदपि तूष्णीमभूत्, क्रमशश्च तस्य रोदनं तारतारतरमभवत्। परिशेषे लतिका शिशुं क्रोडे कृत्वा हस्ते मिष्टान्नद्रोणं वहन्ती गृहमचलत्।

ज्येष्ठमातुर्भीषणमूर्तिं भावयन्त्या लतिकाया गृहप्रवेशार्थं न प्राचलतां पादौ। शेषे किञ्चिन्मनसिकृत्य अतिनिभृतं सा गृहं प्राविशत्। कतिपयक्षणैरेव लतिका प्राणपणेन धावन्ती गृहाद्बहिरभूत्। द्वारपर्यन्तं घोरगर्जनां कुर्वन् कश्चित्तामनुदधाव। तदन्तरं तु सशब्दं द्वारकापाटौ रुद्धावभूताम्। शृङ्खलाचाऽयोज्यत। ऊर्ध्वश्वासं धावन्त्या लतिकाया नैवत्सर्वमज्ञायत। तस्या ज्येष्ठमातुर्बालकबालिका उल्लासध्वनिं कुर्वन्तः सानन्दं भोजनमकुर्वन्।

सन्ध्याकाले ताजमहलस्य सम्मुखे महान् जनसमागमः। चतस्रोऽपि दिशो विद्युदालोकैरुद्भासिता अभवन्। कति वा मरुत्तरशकट्यः, कति वा सुदृश्यतमानि नानाविधयानानि तत्सम्मुखे समागमन्निति न संख्यातुं सुकरम्। गौराङ्गमहोदयास्तत्पत्न्यश्च यानेभ्योऽवतीर्य गणशः

पान्थावासमिमं प्राविशन्। राजपथस्य दिशि काचाच्छादितेभ्य: प्रकाण्डद्वारेभ्य: पान्थावासस्य नानाविधानि सुदृश्यवस्तूनि दृश्यन्ते स्म। अभ्यन्तरे हि भोजनस्य सुमहदायोजनम्। शतशतपरिचारका: सुदृश्येषु काचपात्रेषु उष्णां भोज्यसामग्रीं वहन्तो यथाक्रमं पर्यवेषयन्। अहो कियन्मद्यम्, कियन्ति भोज्यानि, कियांश्च भोजनस्य समारोह:।

बहि: शीतलपवनेन वेपमाना मलिने एकमात्रे सूक्ष्मे परिधानीये अङ्गान्याकुञ्चन्ती क्लायान्तरचरणा लतिका जन्मावधि अदृष्टचरमेतद्दृश्यं निर्निमेषं पश्यन्त्यासीत्। सा समस्तमपि दिनं मार्गे मार्गे अधावत्। साम्प्रतमवसादेन तस्याश्चरणौ पीडितावास्ताम्, मस्तकं च घूर्णते स्म। किन्तु सर्वमिदं विस्मृत्य नूतनमिदं दृश्यं सा सविस्मयमीक्षते स्म। तस्या: परिधानीयं तदेव रक्तसिक्तमासीत्। दूरे स्थिता सा पान्थावासस्य मोहकमिदं दृश्यं विलोकयन्ती मनस्यचिन्तयत्– 'मन्ये अयमेव स्वर्ग:। इह गतान् मन्ये क्षुत्तृषो: क्लेशो न बाधते।

'अरे अपसर, इतो दूरमपसर!' इति द्वाररक्षकोऽभर्त्सयत्। अवसन्नचरणा लतिका लोलुपदृष्ट्या पान्थावासस्य सुसज्जितकक्षान्यवलोकयन्ती ततो दूरमपासरत्।

परदिने प्रातरेव रामकृष्णबाबुमहोदयं रथ्यायां द्रुतपदं प्रयान्तं दृष्ट्वा तत्प्रतिवेशी पुण्डरीक: प्रोवाच– 'कथं भो रामबाबुमहाशय एतावत्त्वरितं क्व प्रयासि– 'अये! रक्षाविभागगुल्मे (थाना)यामि। मम भ्रातु: कन्या ह्य:प्रभृति अन्विष्यमाणापि न दृश्यते।'

'अये, किं कथयसि? हन्त हन्त सर्वनाश:। संवादपत्रे यदहमपाठिषम् अपि तदेव?'

'किम् किम्?'

पुण्डरीक: संवादपत्रस्य एकतमं भागमभिमुखमदर्शयत्–

'सन्देहजनको मृत्यु:'

(रक्षाविभागीयानां गवेषणा)

''गतरात्रौ द्वादशवादनसमये एको गौराङ्गो दुर्गसम्मुखस्थे प्राङ्गणे (मैदान) गच्छन् शाद्वलस्य प्रान्तभागे वृक्षस्यैकस्याधस्तात् एकस्या बालिकाया मृतदेहमपश्यत्। बालिकाया वय:क्रमो दशैकादशवर्षाऽऽसन्न:। परिधानवस्त्रं रक्ताक्तम्। आकारप्रकाराभ्यामुच्चकुलसम्भूता प्रतीयते स्म। मोहमय्या रक्षाविभागीया एतस्यान्वेषणे संलग्ना: सन्ति। अनुमानमस्ति, अलङ्काराणां लोभात् केनचिद्दुरात्मना सेयं निहतेति। हन्त! भारतीयबालानामलङ्कारजनित: सोऽयमकालमृत्यु: कदा विरमेत्।''

(३२)

## प्रत्युत्पन्नमतिर्हालिकः

नगरोपकण्ठगतायां प्रपायामेकः कृषीवलो मुखाग्रनिहितपल्लवितकरः पानीयं पिबन्नासीत्। भूकर्षणजलोद्धरणादिकृषिकार्यैर्भुग्नीकृतकठिनाङ्गुलेरस्य करतः प्रवहदासीत्पानीयपानसमये सलिलम्। इतश्च पश्चादागता जलपानार्थिनः केचिन्नागरिकास्तदेतत् सकुतुकमवैक्ष्यन्त। तेषु नागरिकम्मन्यःकश्चिदात्मनो धर्मविज्ञानाऽभिज्ञतां प्रकाशयन् सगौरवं प्रोचे– 'ऐश्वरमियज्जलं मुधैव प्रवाहयत्, किमस्योत्तरं दास्यसि'।

जलमपिबत्कृषको, नैतस्योत्तरमपारयद्दातुमिति निभृतमश्रौषीत् सर्वम्। जलपानान्निवृत्ते त्वैतस्मिन् स हि नागरिकमानी प्रववृते जलं पातुम्। किन्तु ततः पूर्वं निजनागरिकतामुत्स्फुटयन्नेष प्रभूतेन पानीयेन सुनिपुणमक्षालयत् करयुग्मम्, अनिच्छत्यपि प्रपायके प्राकरोत् कतिचिद् गण्डूषान्। निपीतसलिलः कार्षिकः साम्प्रतं सविनयाकूतमभाषत– 'श्रीमन्! ममाङ्गुलिभ्यो यज्जलं प्रावहत् तदर्थमेवोत्तरमाकांक्षितं मन्ये भवता। किन्तु प्रातरारभ्य सायं पर्यन्तं, कदाचित् कदाचित्तु निशीथपर्यन्तं प्रत्यहं नैतावन्मात्रमेव, अपितु प्रवाहरूपेणैव प्रवाहयाम्येवमेव सलिलमविश्रान्तं भूमौ। हन्त मे मन्दस्य जन्मैवाऽखिलमतीतमेतेन। अत एवैतस्योत्तरं युगपदेव मे देयं स्यात्। स्वच्छताप्रियेण भवता तु मन्ये सज्जितमेव स्यादेतस्योत्तरं सम्यक्।

किमासीदेतस्योत्तरं पौरमानिनः समीपे? अत एव अर्द्धप्रबुद्ध एव निरुत्तरमसौ गन्तुमियेष। मर्मवेदी गुणग्राहकः कश्चिदुत्तरेणाऽनेन परमचमत्कृतः सुगूढमस्य तात्पर्यं तमपि नागरिकमानिनं बोधयितुमिच्छन्नूचे–'ग्रामवासिनापि हालिकेनाऽनेन किमुत्तरितम्, अपि परिग्रहीतं तद्भवता? मम पानीयपानसमये यत्किञ्चज्जलं विवशतया व्यगलत्, तस्य परिवर्ते ऐश्वरेण जलप्रवाहेणाऽनेन भुव एवोपकारः साधितः स्वजीवनेऽद्यावधि मया। सोऽपि न केवलमात्मनः, अपि तु परेषामेवाऽधिकम्। किन्तु केवलं स्वच्छतामिषेण प्रचुरं जलप्रवाहं व्यर्थमेवापगमयन्तो नागरिकाभासाःकिमस्य प्रतिशोधं दातुं प्रतिदानं शक्नुयुः?

## क्षत्रियशोणितम्

## ( १ )

निरन्तरं शारीरिकपरिश्रमेण निजगार्हस्थ्यजीवनं यथाकथञ्चिन्निर्वाहयद्भिः पितृचरणैर्भूयसी चेष्टाकृता किन्तु नाहं सरस्वत्याः कृपापात्रतामासादयम्। मद्द्वारा कृतैर्नित्यनवीनैरुपद्रवाणामाविष्कारैर्ग्राम्यविद्यालयस्य मास्टरमहोदयश्चकितोऽभवत्। पितरं सम्प्रार्थ्य स हि ग्रामविद्यालयान्मम मुक्तिमकारयत्। एवमहं शिक्षितवायुमण्डलाद्दूरगामी समभवम्। मम प्रतिवेशे न्यवसतः कतिचिद्विद्यार्थिनः। ते हि मम शारीरिकबलं दृष्ट्वा प्रासीदन् समये समये। देशसेवां कर्तुमुपादिशंस्ते नानाप्रकारैः। ममापि समभूदुत्साहो यत् स्वयंसेवको भूत्वा शरीरेण समाचरेयं मातृभूमेः सेवाम्, किन्तु विधाता सर्वं दृश्यमेवाऽदृश्यं चक्रे।

रात्रिन्दिवा परिश्रमेण जर्जरशरीरस्तातः समभून्मद्विषये नितरां निराशः। अत्यावश्यकतां विना संलापमपि नाकार्षीत्सः। किन्तु हार्दिकमसन्तोषं तेषां जानन्नपि न प्राभवमहं तान्प्रसादयितुम्। परं विधाता दारिद्र्यपूर्णगार्हस्थ्यदुःखं नाधिकमन्वभावयद् तदेतेन। अनशनजर्जरां जननीं रोगपीडितां भगिनीं च रुदतीं परित्यज्य पितृचरणा समभुवन् सहसा स्वर्गवासिनः। आसमहं तदा पञ्चदशवर्षवयस्कः। एतां निःसहायावस्थामनुभूय ममापि प्रादुरभूत्प्रबोधः। निरन्तरेण शासनेन प्रबलतमेनोद्योगेनापि च यज्ज्ञानं नाभवत्तत्स्वत एव सम्प्रति मे हृदये जजागार। देशसेवातः प्रबला मातृसेवा मे प्रतीताऽभूत्। तद्दिनं मे जीवने चिरस्मरणीयं भविष्यति यस्मिन्हि वाष्पं वर्षन्तीं जननीं, रोगपीडितां भगिनीं चैकाकिनीं विसृज्य द्रव्योपार्जनाय गृहाद्बहिरभवम्। आश्रयहीनस्य निरूपायस्य युवकस्य दृष्टौ निरन्तरशोभामयी सा राजस्थानवसुन्धरा विकरालवेषेव साम्प्रतं प्रतीयते स्म। दृश्यमिदं संस्मृत्य साम्प्रतमपि वेपते हृदयम्।

शिरसि जाज्वल्यमानज्येष्ठस्य प्रचण्डश्चण्डरश्मिर्वर्षति स्म वह्निं किन्तु हतभागिनीं जननीं रोगशीर्णां भगिनीमसह्यानि तत्कष्टानि च सञ्चिन्त्य वाष्पः प्रास्रवत्। ममन्थ च घोरा वेदना मे हृदयम्। सम्पूर्णं दिनं मार्गमुल्लङ्घ्य नितान्तं श्रान्तशरीरः सायं समासदं धर्मशालामेकाम्। आसीन्मे सविधे चर्व्यं (चणकादि) किञ्चित्, घोरपरिश्रान्तोऽपि तदेव भुक्त्वा पानीयमपिबम्। अखण्डदिनपरिश्रमेण शरीरं मे क्लान्तमसीन्नितान्तम्, निद्रादेव्याः सुखमये क्रोडे व्यसमार्षमहं दुःखमखिलम्।

प्रकारेणानेन बहुतरान्दिवसान्मार्गमलङ्घयमहम्। एकदा महति प्रत्यूषे दैहिककृत्यतो निवृत्तोऽहं रात्रिनिवासस्थानान्निरगमं बहिः। प्रचलन्नासं निर्जने पथि। प्रभातवायोः कोमलस्पर्शेन व्यस्माहर्षमहं कियन्तं कालं यावद्दुःखमखिलम्। प्रातःकालस्य प्राकृतसौन्दर्येण मनसि मे मद इव समुदियाय। शनैः शनैः पूर्वानुभूतानि बाल्यसुखानि हृदये एकैकशो यावज्जाग्रति तावदेव तुरगौ द्वौ नक्षत्रवेगेन मदभिमुखमेव धावन्तावदृश्येताम् निमेषेणैव तौ मत्सम्मुखमुपागमताम्। द्वयोराश्वारोहयोरेकाऽऽसीद्बालिका, द्वितीयश्चैको बालकः। नेदं मार्मिकेभ्यो वक्तव्यं स्याद् यद् द्वावप्यमू गौराङ्ग (अंगरेज) सन्तानौ। बालकस्य हस्ताद्वाजिनो वल्गा विस्खलिताऽऽसीत्। नासौ केनचिदपि यत्नेन निरोद्धुमपारयत्तुरगम्। केवलं घोटकस्य सौशील्यं दयां वा विश्वस्य निराशभावेन स हि तत्पृष्ठमध्यतिष्ठत्। भयाकुलयोस्तन्नेत्रयोः प्रतिक्षणं प्रतीक्ष्यमाणेवाऽसीद्विपत्तिः।

बालिका बालकस्य साहाय्यमाचरितुं निजमपि तुरगं प्राणपणेनाऽद्रावयत्, किन्तु पृष्ठस्तुरगखुरखडात्कारेण द्विगुणं सम्भ्रान्तस्तुरङ्गस्ततोऽपि तीव्रवेगेनाऽद्रवत्। बालिकाया हितावहापि चेष्टा विपरीता पर्यणमद्बालकस्य पक्षे। मामवलोक्य बालिका दूरादेवाऽक्रन्दत्– 'अहो! भवत एवेदानीमवलम्बः। रक्ष मे भ्रातरम्। यत्त्वं याचिष्यसे दास्यामि।'

क्षत्रियस्योत्तप्तं शोणितं प्रावहन्मे धमनीषु। भयं किं भवतीति नासीन्मे तदवधि परिचितम्।

अत एव नेतोऽधिका प्रार्थना कर्तव्याऽभून्मम। एकेनैवोत्फालेनोत्प्लुत्य वाजिनो वल्गामहमधारयम्। आजानेयस्तुरङ्गमो वल्गे गृहीतायामुत्प्लुत्य तत्रैवातिष्ठत्। भयाकुलो बालकस्तुरगस्य सहसैव निरोधेन प्रत्याघातमवाप्य घोटकपृष्ठात्पतन्नासीत्। वामहस्ताऽऽलम्बेन तमहं सम्प्रधार्य भूमावस्थापयम्।

बालिकाऽप्यनुपदमवाप तत्स्थाने। भवेत्तस्याः चतुर्दश पञ्चदशवर्षात्मकं वयः। परिश्रान्ते कान्तेऽस्या मुखे समशोभन्त विकीर्णाः स्वेदबिन्दवः। किञ्चिन्नीलाः स्वर्णकान्तयः केशाः पवनेनासन्नितस्ततो विलुलन्तः। पाटलप्रभं सुन्दरमिदं वदनं प्रभातसूर्यस्य रश्मिभिः शैवल–नीहारसम्पृक्तं कमलमिव निर्भरं विरेजे। बालकस्य तुरगं वृक्षशायाखायामासज्य, निजकराऽवलम्बेन बालिकामपि घोटकादवातारयम्।

अत्यन्तं भीतयोर्घोरतरं श्रान्तयोश्च बालकबालिकयोः समपद्यत कियताऽपि कालेन स्वस्थता। तावदहं प्रतिष्ठं तत्रैव निःशब्दम्। व्यतिगते किञ्चित्समये कृतज्ञतामपि प्रकाशयन्ती बालिका जिज्ञासते स्म मे परिचयम्। संक्षिप्य समसूचयं मे वृत्तान्तम्। आसीद्बालिका बालकतो वयसि ज्येष्ठा। सा मां जीविकाऽर्जनाय समुपगतं ज्ञात्वा प्रासीदत्। अविलम्बितमेव सा प्रत्युपकर्तुं पारयिष्यतीत्याशया स्फुटं प्रस्फुरन्ती प्रसन्नता समलक्ष्यत तस्या मुखे।

परमसभ्यम्मन्या आङ्गलजातिर्भारतीयान्प्रति कृतज्ञताप्रकाशनं स्वल्पमेव जानाति। मामप्राक्षीद्बालिका 'किं न निवसितुं शक्नुयाद्भवानस्मद्गृहे ?' प्रत्युक्तं मया– 'नैतदवधि मया किञ्चित्स्थिरीकृतम्, किन्तु वर्तमानपरिस्थितौ यत्रापि मे कार्योपलब्धिः स्यात्तत्रैवाहं तिष्ठेयम्।'

किञ्चित्स्मयमाना प्रोवाच बालिका – 'तर्हि चलतु भवानावाभ्यां सह'।

द्वावपि गौराङ्गबालकौ पुनरारोहतां तुरगम्। प्राचलं चाहं ताभ्यां सार्द्धम्। बालिकायाः पिता प्रान्तीयकृषिविभागस्यासीत्सुप्रतिष्ठितोऽधिकारी। नाम 'रेमण्ड' इति। अर्बुदनगरे (आबू) सुरम्यमेकं प्रासादमध्यवात्सीदसौ। बालिकाया नाम 'एदिथा'। नाभवद्भृतिकार्यलाभे मम विलम्बः। बालकयोर्निरीक्षणे समभूवं नियतः समुचितवेतनेन। दुःखिनीं जननीं भगिनीं च संस्मृत्य भगवतो दयाभावस्य प्रादामनेकान्धन्यवादान्।

## (२)

व्यत्यगुस्त्रीणि वर्षाणि कर्मकुर्वाणस्य मे। चतुर्दशवार्षिकी सा बालिका 'एदिथा

रेमण्ड' साम्प्रतं मधुमयी षोडशीरूपे परिणता। सा चपलता, तदितस्ततः पलायनम्, मया सह तौ क्रीडापरिहासौ, सर्वमिदमिदानीं विलुप्तम्। साम्प्रतमेदिथा सुरम्यसरोवराणां तटे निषीदत्येकाकिनी। उपवनानामेकान्तकुञ्जेषु सा सायं परिभ्रमति। तुङ्गमेतस्या वक्षो दीर्घनिःश्वासैः कदाचित्कम्पते तर्हि कदाचित्प्रतीयते मधुरम्। कान्तयोः कपोलयोः सा लज्जाहास्यस्यारुणिमा संविकसत्यतर्कितमेव। वक्षसः समुन्नत्या मनस्येव क्षीणा कटिः प्रकटीकरोत्यनुदिनं दौर्बल्यम्। लज्जामिश्रिता चक्षुषोश्चञ्चलता चक्षुभ्यामेव विलोकनीया नूनं न तत्र चारो वाचाम्।

ममापि पदोन्नतिर्यथेष्टमभूत्। नेदानीमहं 'बॉय्' बालकः, साम्प्रतमहमङ्गरक्षक (एडी०सी०) वेषं परिधाय एदिथाया रथस्य पश्चादवस्थितो दूरदूरतरं करोमि वायुसेवनम्। यावन्मात्रभृत्यानामहं करोम्यनुशासनम्। किन्तु वत्सरेष्वेतेषु मम हृदयस्य याभूत्समुन्नतिस्तस्याः संमुखे सेयं पदोन्नतिरतिसामान्या। एदिथायाः पदशब्दमेवाकर्ण्य भवति मे हृदयं वेपथुः। तस्या सा मधुमयी धीरवाणी प्रस्रवति मे कर्णयोरमृतम्, न मे साहसं भवति तस्या मुखमवलोकयितुम्। तस्याः करस्पर्शेनैव भवति मे रोमाञ्चः सर्वाङ्गे। ज्योत्स्नामय्यां मधुरनिशीथिन्यामेदिथायाः पश्चादवस्थितस्तत्तनुलताया मनोरमं गन्धमाघ्राय विस्मराम्यहमात्मानमपि।

कार्यस्वीकारादुत्तरं नाहं गतो गेहम्। प्रतिमासं प्रेषयामि रूप्यकाणि, पत्राण्यपि गच्छन्ति यथासमयम्। तत्रत्येन संवादेन न मे काचिच्चिन्ता। जननी भगिनी च यापयतः सुखेन दिवसान्। ममाह्वानाय व्यलिखतां ते पत्रं कतिधा, किन्तु न मे मनो भवत्येदिथां विहाय गन्तुम्। माता प्राकरोदनुनयविनयौ मे बहुधा, इदमपि सानुरोधं सा पर्यलेखीद्यत् त्वामदृष्ट्वा नाहं शक्नुयां जीवितुम्। किन्तु नाशकं गन्तुं तथापि।

आत्मनः कल्मषं निवेदयिष्यामि सत्यं सत्यम्। एदिथायाः प्रणयः समाकर्षन्मां शनैः शनैरात्मनोऽभिमुखम्। इयं प्रीतिरेकनिष्ठैवासीदुत मह्यमस्निह्यदिति नाहं शक्नोमि स्पष्टं वक्तुम्। किन्तु प्रत्येककर्मणि सा मां सहचरं व्यधात्। अहोरात्रे सर्वाधिकः समयो ममैव च सविधे व्यत्यगात्तस्याः। एतावदहमवश्यं जाने। किन्तु महाकविः कालिदासोऽत्र वक्ष्यति – 'कामी स्वतां पश्यति।'

आत्मनश्चरित्रं यदा प्रकटीकरोमि तदा नाहं पाठकेभ्यः किञ्चिदपलपिष्यामि। आसीन्मम विचारो यन्मातुः स्वसुश्च कृते किञ्चिद् भोजनं संस्थानं विधाय समर्पयिष्याम्यात्मानं मातृभूमेः सेवायाम्। किन्तु अत्रत्यैस्त्रिभिर्वर्षैर्मे सर्वेऽपि विचाराः समूलमुन्मृष्टाः। अहमत्रत्यायां परिस्थितौ तथा विलिप्तोऽभूवं यत्स्थानान्तरे गन्तुं न प्रासरतां मे पादौ। अहं बहुवारानकार्षमात्मनस्तिरस्कारमात्मनैव, अधःपातस्यास्य कृते व्यधामनुशोचनं बहुधा, किन्तु सर्वमिदमेदिथाया विलोकनात्प्रागेव। तत्समक्षमुपगतो व्यस्मार्षं सर्वमिदमेकान्ततः। न्यायदृष्ट्यः पाठकाः शक्नुयुरेतस्य कृते निर्भरं तिरस्कर्तुमेनं माम्। अद्य प्रातरारभ्यैव विलोकयाम्यहमेदिथामत्यर्थं विषण्णाम्। पृच्छाम्यहमेतस्य कारणमेतामिति व्यचारयं कति वारान्, किन्तु नाहमपारयं प्रष्टुम्। यतोहि न साम्प्रतमेदिथा मया सह क्रीडाशीला, साम्प्रतं सा सभ्यपत्नी (मैंम साहब)। विनाऽऽह्वानं मुहुस्तत्समीपे गमनमास्खलेदत्रत्यानामपि दृष्टौ। 'चाय'

समर्पणार्थमाह्वानस्यावसरमहं प्रत्यैक्षिषि किन्तु न तां व्यलोकयताऽभितस्ततोन्विष्यापि। यथैवाहं परावर्तेयं तथैव तडिद्वृत्तपत्रं मे हस्ते प्रादीयत तत्कर्मचारिणा। रेमण्डमहोदयस्य भवने कार्यस्वीकारानन्तरमाङ्गलभाषाया लेखनपठनं किञ्चिदासीदभ्यस्तं मया। यस्याः सरस्वत्याः पुरा विसर्जनमक्रियत साम्प्रतमावाहनं तस्याः कर्तव्यमभूत्। आङ्गलसंलापमहं सम्यग्बोधिषि परं न प्राभवं यथेष्टं वक्तुम्। तडित्पत्रमुद्घाट्य व्यलोकयं यन्माता मरणासन्ना रुग्णा। व्यघूर्णत मे मस्तकं, व्यलोक्यत परितोऽप्यन्धकार इव। हा हन्त एतावत्कालं रुग्णां मातरमेकदाप्यनवलोकयता मया किमिदमनुष्ठितमकृत्यम्।

स्वामिनमदर्शयं तत्तडिद्वृत्तपत्रम्। दयालुस्वाभावोऽसौ पञ्चादशदिनानामवकाशं स्वीकृत्य मासस्य वेतनमग्रिमं मे समार्पिपत्। तस्मिन्नेव क्षणे प्रस्थातुमकार्षमहं सन्नाहम्। आवश्यकवस्तूनि सम्बध्य यथैवाहं द्वारोपरि समागमं तथैव सम्मुखतः समागच्छन्तीमेदिथामपश्यम्। ललाटे स्वेदबिन्दवो हस्ते पाटलगुच्छको मुखे वेदनायाश्छायाऽस्याः समलक्ष्यत। एदिथामालोक्य प्राद्रवन्मे हृदयम्। प्रोक्तं मया– 'श्रीमति! जननी मेऽत्यन्तं रुग्णा, गृहमहं गच्छामि। किन्तु भवतीमेतावद्विषण्णां किमित्यवलोकयामि?'

न प्रायच्छत्सा मे प्रश्नस्योत्तरम्। अवाङ्मुखी भूत्वा हस्तपरिगृहीतस्य पुष्पस्तबकस्यैकैकं पत्रमचूर्णयत्सा करेण। छिन्नस्य पाटलपुष्पस्य प्रभा प्रभासते स्म तत्कपोलयोः। किन्तु लज्जारुणं तद्वदनं नाधिककालमहमालोकयितुमपारयम्। 'महाभागे! गच्छाम्यहम्' इत्याभाषमाण इव ततः प्रास्थिषि किन्तु मार्गमुल्लङ्घयतो मे हृदि मातुः शोकशीर्णमूर्त्या सह रक्तकपोलायास्तस्या मधुमयमूर्तेर्दारुणो विवादो वारं वारमावर्तते स्म।

## ( ३ )

जनन्या रोगवृत्तान्तो नासीत्सत्यः। कम्पमानेन हृदयेन यथैवाहं गृहद्वारे प्राविशं तथैव माता प्राहसत्सहसा, प्रावोचच्च– 'किं भोः! आङ्गलानां गृहे भृतिकार्यं करोषि तत एव मन्ये श्यामवर्णा भारतीया न तेऽभिरोचन्ते!'

हर्षोच्छ्वासेनाहमप्यहसम्, प्रावदं च– 'तडित्संवादं सम्प्रेष्य कियति सङ्कटेऽहं निपातित इति न वो विदितम्। अत्यावश्यकं कार्यं विहाय समादाय च घोरां व्याकुलतामुद्विग्नः सोऽहं समागतोऽस्मि।'

एषु दिनेषु किं ममासीदत्यावश्यकं कार्यं तद्विजानाति मे हृदयमेव। परं प्रतारणाया अमुष्याः कृतेऽन्तरात्मा मे कशाघातमिवानुभवति स्म। प्रावदज्जननी– 'एतस्मिन्वारे तादृशं दृढप्रबन्धं कर्तास्मि येन तडिद्वृत्तप्रेषणस्याऽऽवश्यकतैव पुनर्न भवेत्।'

समभूद्धृदये मे सन्देहः। भोजनादेरनन्तरं प्राचालयज्जननी विवाहस्य मे प्रसङ्गम्, परं प्रादर्शयं विमुखभावं प्रारम्भ एव। किन्तु जनन्याः नयनजलप्रवाहे मे धीरत्वमिदं न स्थातुमशकद्बहुकालम्। अभून्मे पराजयः। अपूर्यत सर्वमिदमभिलषितं जनन्याः, परं विवाहोऽयं नासीन्मे सुखविवाहः। एदिथाया लज्जाकणेन तेन वदनेन विकलीकृतोऽहमेकवारमेव। वाष्पपूर्णाभ्यां दृग्भ्यां दुःखपूर्णेन च हृदयेन यथाकथञ्चिन्निरवर्तयं विवाहविधिमेनम्। सर्वेऽपि

जना: प्रशशंसु: प्रसन्ना:– 'वधूरत्यन्तं सुन्दरी'ति। किन्तु ततो दृष्टिं निपातयितुमपि नासीन्मे मन:। अत्यावश्यकं कार्यं मे समुपस्थितमिति कृत्वा द्वितीयस्मिन्नेव दिने गृहात्प्रस्थानमकरवम्।

'बहुकालानन्तरमेदिथां विलोकयिष्यामीति विचिन्तयतो ममासीच्चेतसि प्रकम्प इव सम्मुखमेव तु महाहर्म्यस्य द्वारमिदम्। अये! इयमेदिथैव तु सम्मुखे समुपस्थिता! परमेतस्या: सहचर: कोऽयम्?' विचारयन्नेवेदं कम्पमानहृदयोऽहमुपागां द्वारसीमनि। दृष्टं यदेकोऽपरिचितो गौराङ्ग: एदिथाया: श्रोणिदेशे करबन्धमासज्याऽवस्थितोऽस्ति।

तां दृष्ट्वैव मे हृदयं न जाने किमिति विदग्धमभूत्। यदि कश्चिदवधानेन दृष्टिमपातयिष्यत्तर्हि तस्मिन् समये मम मुखे घृणाया: क्रोधस्य निष्ठुरतायाश्च प्रतिच्छविं स्वच्छमलक्षयिष्यत्। एदिथा मां दृष्ट्वैव गौराङ्गात्तस्माद्दूरमपासरत्, व्यनमयच्च लज्जया वदनम्। तस्यै अभिवादनं कृत्वा प्रावादिषमहम्– 'जननी मे सर्वथा स्वस्थाऽस्ति।' एदिथा प्रत्यवदत् –'दिष्ट्या ईश्वरस्य धन्यवाद:। तत्कृते समभूच्चेतसि चिन्ता।' एतत्सहानुभूतिप्रकटनं केवलमासीन्मौखिकम्, न कथञ्चिदप्यान्तरमिति बोधे नाभवद्विलम्ब:। अहं पुनरिमामभिवाद्य भवनस्यान्त: प्राविशम्। तस्मै गौराङ्गाय शिष्टाचारानुमोदितमप्यभिवादनं कर्तुं नासीन्मे प्रवृत्ति:। पृष्ठं परावर्तयतैव श्रुतं मया यद् गौराङ्गोऽसौ किञ्चिदालपति किन्तु किमेतस्योत्तरं दत्तमेदिथयेति न किञ्चिदप्यश्रूयत। शनै: शनैरहं निजनिवासप्रकोष्ठकं प्राविक्षम्।

## (४)

तेन गौराङ्गेण सह निश्चितोऽभूदेदिथाया विवाह:। आसीदसौ चायोपवनस्य कस्यचित्प्रबन्धकर्ता। नामासीद् 'बैण्डाल' इति। अयमासीदत्रत्यस्य रक्षाप्रबन्धकर्तु: सहोदरो भ्राता। अद्यतस्त्रयाणां मासानामनन्तरं सम्भवेद्विवाह:। विवाहनिर्धारणस्य महोत्सवनिमित्तमद्य रात्रौ प्रमोदगोष्ठी। नृत्यगानयो: पानभोजनयोश्च प्रचुरमायोजनं रजन्याम्। एदिथाया: प्रमोदो न माति हृदयेऽद्य। निसर्गादेव मधुरा तदाकृति: प्रमोदप्रभया नितान्तमेव मधुराऽद्य विद्योतते।

'चाय' पानादनन्तरमेव समागत्य एदिथा मामब्रवीत्– 'शार्दूलसिंह! शीघ्रमेवाश्वयानं सज्जय, अहं 'साहब'श्च वनविहारायाद्य गमिष्याव:।' एदिथा न ममाभिमुखं सम्यक्प्रकारेण दृष्टिमनयत्। तस्या: कोमलकपोलयोर्मधुरलज्जाया अरुणाऽऽभा प्रभासते स्म मुहुर्मुहु:। अहं 'सम्यक्' इत्येव यथाकथञ्चित्प्रत्यवदम्। नासीदधिकं वक्तुं मे शक्ति:। कष्टावरुद्धैरश्रुभिर्न्यरुध्यत मे कण्ठतटम्।

भवेन्नववादनस्य समय:। अश्वरथं सज्जयित्वा एदिथाया गौराङ्गेण तेन साकमहं प्राचलं भवनाद्बहि:। इतोऽर्द्धक्रोश एवासीद् गहनं वनम्। काननस्योपकण्ठ एव शकटिं विसृज्य वनाभिमुखं प्रचलतोरेदिथागौराङ्गयो: पश्चाद्भोजनसज्जामादाय प्राचलमहमपि। अस्थाच्छकटोपरि शकटिचालक:।

वन दूरं गत्वा वटवृक्षस्यैकस्याधस्तादतिष्ठतां तौ दम्पती। अहमपि भोजनसज्जां सम्मुखे निधाय किञ्चिद्दूरे न्यषीदम्। किञ्चित्कालान्तरं मदारुणनयन: स गौराङ्गो मत्समीपं समागत्याब्रवीत्– 'त्वं किमित्यत्र तिष्ठसि? पलायस्व।' अतिकष्टेन कोपमात्मनोऽहं न्यरुधम्।

विंशति-पञ्चविंशतिवृक्षाणामन्यदप्यन्तरमुल्लङ्घ्य न्यसदमेकस्य वृक्षस्याऽधस्तात्।

गौराङ्गदम्पत्योरट्टहासध्वनिर्व्यदारयदिवाऽऽकाशम्। महाकाशं कामं न व्यदारयत्परं मम हृदयाकाशं क्षणे क्षणे विदीर्णमकरोदसौ। अहमात्मनो हृदयं यथाकथञ्चित्पर्यवस्थाप्य न्यषीदमवाङ्मुखः कष्टेन।

मद्यस्यार्द्धकूपिकां निःशेषीकृत्य बेण्डालस्य वीरतावह्निः प्राज्वलत्सहसा। व्यकथयत महाशयः- 'अलम्! एदिथे! अहं गच्छामि भल्लूकस्यैकस्य मृगयां चाऽऽचरामि।' वनेऽस्मिन् नासीद्भल्लूकानां न्यूनता। प्रत्यवादीदेदिथा- 'मा मैवम्। नेदमावश्यकं सम्प्रति। न जाने काचिदापत्तिः समुपतिष्ठेत्!'।

बेण्डालः प्रत्यवदत्- 'अंग्रेजसन्तानस्य कृते भयम्! न कदाचिदिदम्। शब्दोऽयं कोषाद्बहिर्भूतः।'

एदिथा प्रशंसापूर्णाभ्यां नेत्राभ्यां बेण्डालस्य वीरमूर्तिमवलोकयन्ती निर्निमेषमतिष्ठत् कांश्चित्क्षणान्।

वीरवर 'चा-प्रबन्धक' महाभागो लगुडमात्रमेकं सहायकमादाय भल्लूकमृगयायै सगर्वं प्रस्थितः।

एदिथायाः सगर्वः स विस्मयभावो नातिष्ठद्बहुकालम्। साहबे दृष्ट्यन्तरिते सत्येव सा समुपगत्य प्रावोचत्- 'शार्दूलसिंह! गच्छ त्वं साहबेन सार्धम्। कदाचिदुपतिष्ठेत् - काचिदापत्तिः।'

एदिथाया वाक्यमुल्लङ्घयितुं नासीन्मे शक्तिः। आत्मनः सुदीर्घां वंशयष्टिमादाय बेण्डालस्य किञ्चिद्दूरे प्राचलं पृष्ठदेशे मन्दं मन्दमहम्। एदिथाऽपि प्राचलत्पृष्ठदेशे मे। किञ्चिद्दूरमुपगत्यैव दृष्टं साहबमहोदयेन यदेको भल्लूकस्तस्य मार्गमवरुध्य समवस्थितोऽस्ति। साहबमहोदयः पृष्ठं परावर्त्य व्यलोकयदेकवारम्। आसीत्सम्भवो यदि साहबमहाभागो नावां व्यलोकयिष्यत्तर्हि लज्जायै तिलाञ्जलिं दत्त्वा पलायिष्यत निःशङ्कम्, किन्त्वावां विलोक्य निजवीरताप्रदर्शनस्य घोरा लालसा दुर्दमनीयाऽभवत्साहबकुलचूडामणेः। महाभागो भल्लूकस्य भाले प्रकरोल्लगुडप्रहारमेकम्। किन्तु भल्लूकोऽयं नासीत् 'चायोद्यानस्य' कुली भृत्यः। स हि लगुडप्रहारस्य प्रत्युत्तरे साहबस्य पदचुम्बनं कृत्वा महता प्रेमभावेन तमालिङ्ग्य बाहुपाशे निर्भरं निष्पीडयामास। साम्प्रतं साहबमहोदयो वीरनादस्य परिवर्ते प्राकरोदार्तनादं सहसा। एदिथा मत्करमवलम्ब्य प्रार्थयत दीनभावेन-शपथस्ते ईश्वरस्य। संरक्ष मे स्वामिनं यथा कथञ्चिदपि।

अहं क्षण एव भल्लूकस्य सम्मुखमुपागाम्। क्षत्रियमुद्राङ्कितमकमुत्तमं वंशप्रहारं चास्थापयमृक्षराजस्य मौलिदेशे। प्रचण्डप्रहारेण भ्रान्तमस्तिष्कोऽभूद्भल्लूकभूषणो नूनम्। किन्तु शीघ्रमेव कोपोत्तेजितो भल्लूकः साहबं विहाय प्रकरोन्मदुपर्याक्रमणम्। एतदन्तरालेऽहं तीक्ष्णकरवालिकां कटितो निस्सार्य करे समधारयम्। क्रुद्धभल्लूकस्य मदुपरि निपतन एव सा करवालिका मुष्टिपर्यन्तं तस्य वक्षःस्थले प्राविशत्। एदिथा प्रधाव्य मत्पृष्ठे करं विन्यस्य

कृतज्ञतया प्रावदत्प्रसादेन– 'धन्योऽसि शार्दूल! यदि त्वं नाभविष्यस्तर्हि न जाने मम कीदृशः सर्वनाशः समुपस्थास्यत्।'

प्रणयिन्याः साधुवादमेकस्य कृष्णमनुष्यस्योपरि वर्षन्तमालोक्य साहबमहोदयो भयङ्करभावेन विकृतोऽभूत्। क्रोधगद्गदकण्ठमजल्पत्– 'कथं रे पामर! मामकं भल्लूकमिमं कथमिव त्वमवधीः ? अहमेकाकी दशाधिकानेवंविधभल्लूकान्निहिंसितुं समर्थः।'

अहं क्षुद्रचित्तमिमं कृतघ्नं समुचितमुत्तरं दातुमग्रतः प्रासरत्, किन्तु एदिथायाः प्रार्थनापूर्णे नतनयने विलोक्य महता कष्टेनाऽऽत्मानमवारुधम्।

## ( ५ )

अद्य रेमण्डमहोदयस्य हर्म्ये महामहोत्सवः। सन्ध्यासमयस्यानन्तरादेव नानाविधा वेशभूषाः, नानाविधानि प्रसाधनसाधनानि च वहन्तो गौराङ्गास्तत्पत्न्यश्च संघशः समायान्ति। लताकुसुमैरालोकमालाभिश्च प्रमोदगृहमद्य नाट्यशालारूपे परिणतमालोक्यते। सुन्दरमहिलानां तुषारधवलेषु वक्षःस्थलेषु, स्फटिकधवलेषु सुराभाजनेषु, हीरकजटितेष्टाभूषणेषु च नानावर्णानामालोकमालानां किरणाः प्रस्फुरन्ति परितः प्रतिफलिताः। 'एसेंस' गन्धमिश्रितेन कुसुमसौरभेण सकलमपि प्रमोदभवनमामोदतो महमहायते नूनम्। सुमधुरवाद्यानां सुरम्यसङ्गीतस्य च स्वरलहरीं संवहन् नैशकालिको विविक्तपवनः सर्वतः संसूचयतीव महोत्सवमिमम्। शनै शनैः समायाद्भोजनसमयः। ततो हृदयङ्गमहासपरिहासैः सह समाप्ते प्रीतिभोजे प्रारब्धो-ऽभून्नृत्यमहोत्सवः।

कः कया सह नर्तिष्यतीति मिथुनविचार एव व्यत्यगाद्भूयान् समयः। अस्मिन् सुयोगे मिथः 'प्रेमालापः' प्रीतिपोषकावनुनयविनयौ च परस्परमलक्षिताः समभवन्। साम्प्रतं प्रारभ्यत नृत्यमहोत्सवः। हृदयस्योत्तेजना यथाक्रममधिकाधिकमुन्मेषं प्राप। मधुमयमदिरातः समुद्दीप्तं प्रणयाऽनलं मानसे सन्धार्य सुतरामुत्तेजिता युवकयुवतिगणाः स्वच्छन्देऽस्मिन्नावेगे निर्मर्यादमनृत्यन्।

भारतीययोर्मम नेत्रयोस्तदिदं दृश्यमतिवीभत्समिवाऽऽभसत। आरामे स्थितोऽहं मन्दप्रभेषु नक्षत्रेषु निक्षिपन् दृष्टिं शनैरत्यजं शीतलनिःश्वासम्। साम्प्रतमतीतजीवनस्य भूयांसि दृश्यानि मे हृदये जागरुकाण्यभूवन्। एदिथायाः सरलसुकुमारः स मनोहरो हासः, स वै प्रेमोच्छ्वासः, उन्मादिनी सा प्रणयदृष्टिः सर्वमिदमद्यारभ्य चिरकालार्थं विलुप्येत। किञ्चित्कालानन्तरं मे स्मृतिमात्रमपि तद्धृदयादपसरेत्। हन्त एतस्यै दुराशायै किमित्याहं निजहृदये स्थानमदाम्। एकेनाऽऽङ्ग्लेन साकं भारतीयस्यैकस्य सद्भावो नूनमाकाशकुसुमायितः।

नासीन्मे स्मृतिर्यत्कियत्कालादारभ्य शून्यहृदयोऽहमेवमस्थाम्। हर्म्यस्य स्वामी रेमण्डमहोदयो मत्समीपमागत्य मामब्रवीत् – 'शार्दूलसिंह! एदिथा न कुत्रापि विलोक्यते। रात्रिरत्यधिकं व्यतीता। त्वं बेण्डालमहोदयं तस्य निवासस्थाने प्रापयिष्यसि।'

बेण्डालस्य नाममात्रतोऽपि मे हृदयमदह्यत। तं निजगृहमेव किम्, यमगृहपर्यन्तमपि प्रापयितुं नासीन्ममापत्तिः। स्वामिनो निदेशानुसारमहमगवेषयमेदिथामितस्ततः। परं नाऽदृश्यत

सा कुत्रचित्। अन्ततो लघुप्रकोष्ठकस्यैकस्याभ्यन्तरे सहसाऽश्रूयत एदिथायाः कण्ठस्वरः। अहं निःशब्दमतिष्ठं तत्रैव। एदिथाया मुखान्मे नामधेयं श्रुत्वा भूयस्तरां प्रावर्धत मे कौतूहलम्।

एदिथा समालपन्त्यासीत्– 'शार्दूलसिंहेनाद्य' ते या संरक्षा विहिता तस्योपकारममत्वा तत्परिवर्ते दुर्वाच्य सम्प्रदानं न ते समुचितमभूत्। बेण्डालः प्रावोचत् – 'ऊँः, त्वमेषां कृष्णचर्ममनुष्याणां स्वभावं न परिचिनोषि। उपानद्भिर्यष्टिभिश्चैषां समादरः कर्तव्यो भवति। कदाचित् 'चायोद्याने' त्वं चलिष्यसि तर्हि योग्यतामेतेषां दर्शयिष्यामि। कृतज्ञता, अपरस्योपकारः, शूरता एवं विधा गुणा न तेषां चरित्रे कदाचित्संसृज्यन्ते।'

**एदिथा**– सर्वेषु भारतीयेषु समानरूपेण दुश्चरित्रस्थापनं नूनमन्यायः। आरम्भे, अनेनैवास्माकं कीदृगुपकारः कृतस्तस्य वृत्तमखिलं ते निवेदितवत्यस्मि।

**बेण्डालः**– सोऽयमुपकारो नास्ति, केवलमुदरभरणस्य लालसा।

**एदिथा**– नैतद्भवान् समर्थयितुं शक्नुयात्। अहं शार्दूलाय शतमुद्राणां शुल्कपत्रं समर्पयितुं प्रासरं किन्तु नासौ तत्स्पर्शमपि वाञ्छितवान्।

**बेण्डालः**– अहह सम्यक्! कशायाः पावनाः प्रहाराश्चेत्पृष्ठेऽपतिष्यन् तर्हि सर्वं समञ्जसमभविष्यत्।

एतदुपरि एदिथा नरपशुश्चासौ द्वावप्यट्टहासमकुरुताम्। घृणाया धिक्कारस्य च घर्षणेन खण्डखण्डमभून्मे हृदयम्। तस्मिन्नेव क्षणे रेमण्डमहोदयस्य भवनाय तिलाञ्जलिम् समार्पिपमहम्।

## ( ६ )

गृहमागतस्य मे व्यत्यगुस्त्रयो मासाः। तत्रत्यः प्रेमविकारः साम्प्रतं प्रशान्तप्रायः। प्रणयिन्याः स्निग्धस्य सलज्जस्य च प्रेम्णोऽनुभवं विधाय सम्यक्तया निर्णीतं मया यदस्मिन्देशे आङ्ग्लैः सह निबद्धं प्रणयफलं न तिष्ठेद्बहुकालमविकृतम्। जातु यत्नशतैः स्थापितमपि नास्माकं कृते तद्भवेत्सुपचम्। हन्त सर्वमिदं जानतोऽपि एदिथायाः कृते न जाने मनः कीदृशं मे भवति कदाचित्। चेतसो विस्मारितापि तत्स्मृतिः समुदेत्येव बलान्मानसपटले। अद्य तस्याः परिणयदिवसः। परिणयेन सा सुखिनी जाता नवेति परिज्ञातुमुदियाय मे प्रबलतरोत्कण्ठा। बेण्डालं प्रति सुस्थिराऽभून्मे घृणा। ममान्तरात्मा मह्यमसूचयन्निभृतं यद् बेण्डालेन सह परिणयं विधाय न भवेदेदिथा सुखिनी।

सुकठिनमभूदुत्कण्ठाया दमनं मत्कृते। उत्कण्ठापरवशो गृहान्निष्क्रान्त एव। अलक्षितेन सूत्रेण बलादाकृष्टोऽहं यदा प्राप्नुवं रेमण्डभवने तदा समतीताभूत्सन्ध्या। उपातिष्ठत विवाहसमयः। रात्रैर्नववादितान्यभूवन्। किन्त्वाश्चर्यम्, विवाहभवनेऽप्यस्मिन्नासीदायोजनमालोकमालायाः। उदपद्यन्त मे हृदये नानाविधा आशङ्काः। निःशब्दमहमुपागामेदिथाभवनम्। दृष्टं मया– शून्यभवनेऽस्मिन् शून्यहृदया सा वेत्रासनमेकमधिष्ठिताऽस्ति। अम्लायत्तस्याः सरसं तन्मुखकमलम्। विशालयोस्तन्नयनयोरधस्तादभासन्त कालिम्नो रेखाः। कोमलयोः पाटलकपोलयोः सा वै अरुणाऽऽभा चिराय मन्ये मीलिताभूत्। दृष्ट्वैव मे

प्रापतन्नेत्राभ्यामश्रुबिन्दवः। शनैः शनैः संस्थितोऽभूवमहमेदिथायाः सम्मुखे। अवलोक्यैव मामेदिथा निर्भरमरुदत्। प्रोक्तं मया– 'एदिथे! किमिदम्? अद्य तु भवत्याः परिणयः।'

अश्रूणि प्रोञ्छन्ती प्रावददेदिथा – 'विश्वासघाती मे सर्वनाशमकरोत्। अद्य सप्ताहो व्यतीतः, नास्ति तस्यानुसन्धानम्।' तस्या अङ्गानि दृष्ट्वा पूर्वमेव मे सन्देहोऽभूत्, इदानीमनेनाऽनुतापेन सर्वमेव निश्चितमभूत्। सर्वाङ्गः मे क्रोधेन प्रादीप्यत। स्वत एव जातं मेऽनुमानं सत्यमभूत्। स्वार्थिनमिमं नराधममालोक्यैव मे समभूदतर्किता घृणा।

अकथयदेदिथा– 'वञ्चकस्य तस्य कृते निजजीवनमपि त्वया सन्देहग्रस्तमक्रियत। क्षमस्व माम्। नाहमस्मिन् जीवने पारयेयं सुखिनी भवितुम्।' मामितः प्रस्थातुं सा व्यदधादिङ्गितम्। अजल्पहं गद्गदकण्ठम् – 'एदिथे! विश्वस्तसहायकस्य यदि कदाचिदावश्यकता स्यात्तर्हि स्वैरं मां स्मरेः।' एदिथया विसृष्टः समायासिषं बहिः।

शनैः शनैर्गृहाभिमुखमागच्छन्नासम्। मार्गे सवेगं धावन्तीमेकामश्वशकटिं विलोक्य सहसा चकितोऽभूवम्। अरे! अयं तु स एव नीचकर्मी बेण्डालः! भस्मावृतो मे क्रोधानलः प्रोददीप्यत सहसा। आसमहमेषु दिनेषु सर्वदैव शान्तेः पक्षपाती। देशसेवायामपि मे लक्ष्यमासीद्यत् देशस्य यदि कल्याणं तर्ह्यहिंसायामेव। मत्प्रतिवेशिनः स्वयंसेवका अपि सदा शान्तेरेव पक्षपोषका आसन्। परं सत्यमहं वक्ष्यामि–तस्मिन् समये न जाने क्वापाऽगमन्मे सोऽयं भावः। मम 'राजन्यशोणितम्' क्षत्रियशोणितम् एकान्ततः समुद्वेलितमभूत्। क्रोधावेगादुत्फुल्लमुरःसम्मुखे कृत्वा सामर्षमतिष्ठं मध्येमार्गम्। बेण्डालोऽपि मामलक्षयदिति जाने। स मयि कियत्प्रसन्न आसीदिति जानन्ति सर्वेऽपि। सम्मुखमुपयात्येव तस्मिन्प्रावदमहम्– 'त्वमेदिथया सह कथमिव पशुवद् व्यवाहर इति ज्ञातुमिच्छामि।'

तस्य मस्तिष्कं पूर्वत एव विकृतमासीत्। दीनेषु 'कुलि'षु निजवीरतायाः परिचयं प्रदाय बह्वमन्यत सोऽयं निजमात्मानम्। स हि हस्तगतां कशां मदङ्गे प्राहरत्। किन्तु तस्य विचारो नितान्तमासीद्भ्रमपूर्णः। 'चायोद्यानस्य' कुलिनस्तिरस्कृत्य समवर्द्धत तस्य सा इयम्। परं नायं समसृज्यत कदाचित् क्रूरेण राजपुत्रेण। अहं पश्यत्येव तस्मिन्निमेषमात्रेण धावन्तीं शकटिमध्यारोहम्। शकटादाकृष्य तमहं नीचैरपातयम्। ततस्तस्यैव कशया सर्वाङ्गपूजामेतस्य समकल्पयम्। आघातैर्यदा विसंज्ञोऽयं जातस्तदा मार्गसमीपवर्तिनी केदारे विनिक्षिप्य प्राचलं निजभवनाय। किन्तु कियदेव दूरं गत्वा समभून्मे विचारः – 'विसंज्ञस्य मार्गे एवं प्रक्षेपो न कथञ्चिदुचितः'। परावृत्त्य तमहमकरवं ससंज्ञम्। उत्थाय च बलाच्छकटमारोहयम्। गच्छन्तं तमहमिदमप्यवादिषम् – 'यदि भवेदिच्छा तर्हि स्वैरं सञ्चालयेरभियोगं मदुपरि' किन्तु नासौ तथा चक्रे।

बहोः कालादनन्तरमद्राक्षमेकदा एदिथाम्। सा हि लाहौरनगरस्थे 'मुक्तिसैन्य' सम्प्रदायं प्राविक्षत्। निसर्गमनोहरा तस्यास्तनुलता संयमतेजसा नितान्तमेवोज्ज्वला समवालोक्यत।

# चतुरवञ्चकः

कुण्डलनारायणमिश्रः कुलीनब्राह्मणेषु गणनीयः। कर्णपुरग्रामे कुण्डलनारायणमिश्रस्य कुलञ्च गृहञ्च सर्वजनसम्मान्यम्। प्रायः कुण्डलमिश्रो निजपूर्वजानां कुलीनतां ग्रामजनसमक्षं ससम्भ्रमं स्म सम्मण्डयति ''मम पूर्वजा एतावतो विवाहानकार्षुः''– ''अमुकश्वशुरादियन्ति रूप्यकाणि एकवारमेवाकर्षितानि'' ''जातिभोजने पूर्वजैरमुककुलोनकुलमेकवारमेव बाढं कदर्थितम्'' इत्यादि इत्यादि।

तदनुसारमेव च कुण्डलमिश्रस्यापि बहवो बभूवुर्विवाहाः। ग्रामजनाः कथयन्ति– वर्षमेतादृशं कदाचिदेव व्यत्येति यस्मिन्कुण्डलमिश्रो न वैवाहिकमुकुटं शिरसा बध्नाति। मिश्रस्य पञ्चाशद्वर्षाण्यतिक्रान्तं वयस्तथापि प्रायः कन्यापक्षीयजनानां बहुधा दृश्यते मिश्रसदने गमनागमनम्। सत्येवमपि मिश्रगृहमेकतोऽधिकेन स्त्रीजनेन नाधिष्ठितमालोक्यते! श्रूयते पुत्रपुत्र्यादयोऽपि बहुशो मिश्रस्य सन्ति परं ते कीदृशाः सन्तीति न कोऽपि ग्रामजनो वक्तुं पारयते किं बहुना स्वयं मिश्रमहोदयोऽपि विकटस्यास्य प्रश्नस्य कष्टादेवोत्तरं दातुं प्रभवति। अस्तु यत्किमपि भवतु। प्रतिवर्षं प्रतिग्रामं प्रतिश्वशुरसदनं सदनपावनौ चरणौ निक्षिप्त्वतो मिश्रमहाभागस्य साधीयसी भवति द्रविणप्राप्तिः। यदि कश्चन श्वशुरो मिश्रसत्कारेंऽशतोऽपि दर्शयेत् त्रुटिं तदा कुण्डलमिश्राणामुदात्तस्वरः प्रायोऽखिलमपि ग्रामसन्निवेशं मुखरयतीति मूर्द्धन्यो नियमः।

तथा च कुलीनतारूपां जीविकामालम्बमानः कुण्डलमिश्रः सुखमात्मनः कालं क्षिपति। स्वग्रामेऽपि पूर्वतनी ''यजमानयाजनवृत्तिः'' बहुतरं लाभमुद्भावयति कुण्डलनारायणस्य।

आश्विनमासे समागत एव मिश्रमहोदयस्यापि समागच्छति श्वशुरसदनयात्राकालः। एकदा नियमानुसारमाश्विनमासारम्भे ससम्भारं वार्षिकजीविकोद्ग्रहणाय कृतयात्रः श्रीमान् कुण्डलमिश्रः श्वशुरसदनेषु ग्रामतो ग्राममाहिण्डमानः प्रतापपुरपत्तनपथे रचयामास शुभां यात्राम्।

प्रतापपुरात्क्रोशदशकान्तराले मिश्रस्यैकतमं श्वशुरसदनम्, मिश्रस्य कियदासीदौदार्यमिति प्रश्नस्योत्तरं तु इयतैव यद्बहुभ्यो ग्रामेभ्यः समधिकं धनमात्मसात्कृतवानप्यस्माकं मिश्रमहाभागो ग्रामपर्यन्तप्रयाणाय यानीयव्ययमपि नाङ्गीचकार, किन्तु बहुतरश्वशुरपूजिताभ्यां पादाभ्यामेव ग्रामयात्रां स्वीकृतवान्।

बलदेवपण्डितो धामपुरग्रामे गण्यमान्यपुरुषेष्वन्यतमः। सम्पत्त्यापि प्रायः पण्डितमहाशयो निकामं सुखितः। अयमपि च कुण्डलमिश्रमहाभागस्यैकतमः श्वशुरः। बलदेवपण्डितगृहे दीपावल्युत्सवो भूयसा सम्भारेण निर्वर्त्यते। व्ययोऽपि भूयान् भवति कुण्डलमिश्रोऽपि तस्मिन्नेव समये दीपाल्युत्सवे प्रायः समवेतो भवति स्म।

कक्षधृतगुरुतरग्रन्थिर्मिश्रमूर्द्धन्यः कियन्तमेव पन्थानमुल्लङ्घितवान्। एतावतैव च मिश्रस्य शरीरं शिथिलं, शिरश्च स्वेदभरसम्भृतमासीत्। कियदग्र एव च नवोज्ज्वलवेष एको बाबुमहाभागो मिलति स्म। एतस्य भारो भारवाहकशिरस्यासीत्। बाबुमहाशयकरे तु चमत्कारसार एकः ''पटसम्पुटकः'' (१) केवलमासीत्।

मार्गमुल्लङ्घयतोरनयोर्मध्ये कियताऽपि कालेन संलापः समभूत्। वार्तास्वेव मिश्रमहाभागः समभाषत– ''धामपुरग्राममहं प्रयामि। तत्रत्यो बलदेवपण्डितमहाशयो मे श्वशुरो भवति।''

**बाबू०** – अहह! तदा तु श्रीमन्तो मे मातृष्वसृपतयः। सन्ति! अभिवादये महाभागाः!! न मया श्रीमन्तः प्रत्यभिज्ञाता इति क्षम्यतां श्रीमद्भिर्मेऽपराधः।

**मिश्र०** – को दोषः! बहूनि दिनानि जातानि सङ्गतस्य मे। विशेषतः कुलीनेष्वस्मादादिषु परिचयविषये प्राय एवमेव भवति। नात्र चित्रम्।

**बाबू०** – गृहे तु ननु सर्वं कुशलम्? अहह! अद्य महान् मे भाग्योदयो यच्छ्रीमतां संजातं सुदुर्लभं दर्शनम्। अद्य मया सह समागतान् भवतो दृष्ट्वा गृहसदस्याः सर्वेऽपि निकामं मोदिष्यन्ते। प्रायः सर्व एव श्रीमतां दर्शनाय भूयो लालायिताः सन्ति। मातृष्वसुस्तु दिनेष्वेषु व्याधिर्बद्धमूलो जातः। साऽचिरादेव तीर्थेषु पर्यटिष्यति। श्रीमतां प्रतीक्षयैव तु विलम्बो जातः। अद्य भवतो दृष्ट्वा श्रीमती मातृष्वसा कियत्सुखिनी भविष्यतीति न प्रभवामि वाचा प्रकटयितुम्।

एतावदुक्त्वैव च ससमादरं नवीनो बाबुमहाशयो मिश्रसकाशाद् ग्रन्थिभारं गृहीत्वाऽऽत्मनो भारवाहकशिरसि न्यस्तवान्।

पुनश्चाब्रूत– 'इदन्त्वेकं जातम्! परं यदि श्रीमान् पद्भ्यामेव समागत इति श्रोष्यन्ति मातामहास्तदाऽतीव तेषां चित्ते विकारो भविष्यति, मातृष्वसापि निकामं क्रोत्स्यतीति यानमहमन्विष्यामि। क्षणमिह तिष्ठतु श्रीमान्।''

कुण्डलमिश्रस्तु समादरातिशयमिममालोक्य कुण्डलाकार एव बभूव। उपरितस्तु ''आँ'' ''न'' इत्यादि साधुरूपेणाभिनीय समभाषत– ''अहो! तर्हि भवान् शिवठाकुरतनयः सम्यक्! कथं गृहे तु सर्वमनामयम्?

''सर्वं श्रीमदाशीर्भिर्मङ्गलम्'' इति सङ्क्षेपेणैव समुत्तीर्य बाबुमहोदयो यानानयनोद्योगे निरगात्।

शकटिविश्रमस्थानं समीप एवासीत्। तत्र गत्वा बाबुमहाभागेन यानमेकं भाट्या कृतं स्वायत्तम्। आगत्य च '' श्रीमान् यानमिदं यथासुखमारोहतु '' इति प्रोक्तं मिश्रमहाशयाय। उपरितस्तु मिश्रेण ''मार्गः कठिन आसीत्। साधु कृतम्'' इत्येवोक्तम् । परं मनसि ''न जाने भारमिमं शिरसोद्वहन् दुर्दशामापन्नः कदाऽऽलोकयिष्यं ग्रामम्, सम्प्रति तु सर्वं साधु सम्पन्नम्। यानव्ययोऽपि न जातः। सहचरोऽपि भाग्यान्मिलितः।''

इतो बाबुमहोदयेनापि एकमुद्रास्थाने मुद्रात्रयं प्रदाय स्यन्दन आत्मसात्कृतः। सभारं मिश्रमहोदयं याने समारोप्य स्वयमपि ससुखं समारुक्षत्। भारवाहस्तु तद्देयं दत्त्वा विसर्जितः।

मार्गे मिश्रेण साकं बाबुमहाशयस्य समधिकं समघटत सङ्गतिः। बाबुमहाशयेन नानाविधा देशवृतान्ताः विविधा युद्धसङ्कथाः, विचित्राश्च राजकीयघटनाः, तादृशेन प्रवचनमाधुर्येण प्रोक्ता येन कुण्डलमिश्र आर्द्र एवाऽभूत्। केवलम् ''आम्'' ''अहो ?'' ''हरे हरे !'' इत्यादिभिरेव मध्ये मध्ये प्रदत्तमुत्तरम्। एवमेव मधुरालपनादिभिर्मिश्रमहोदयो निकाममेव स्निह्यति स्म बाबुमहाशयम्।

इतः सन्ध्यापि सन्निधीयते स्म। अस्तं-जिगमिषोर्भगवतो भास्वतो लोहितायमानः प्रकाशः शनैः शनैर्विलयं यातुमारभत्। अधुनापि मिश्रस्य श्वशुरसदनं क्रोशचतुष्टान्तरितमासीत्।

प्रातः कालमारभ्यैतावत्कालपर्यन्तं कुण्डलमिश्रेण जठरपूजनं न कृतमासीत्। उदरं वारं वारमेव त्वरयति स्म। समयेऽस्मिन् क्षुधा कर्तव्यपाटवं जहार मिश्रस्य। परं बाबुमहोदयस्य तु मार्ग एव विचित्र आसीत्। उदरं परामृशता प्रोक्तं तेन- ''अहो ! चित्तमतीव व्याकुलीभवति। न जाने किमिति शिरोघूर्णति। वेदनापि किमपि किमपि भवति।''

ग्राममभिमुखमालोक्य शकटचालकाय प्रोक्तवान् बाबुमहाभागो रथं स्थापयितुम्। यानादुत्तीर्य च मुखेऽङ्गुलिं दत्त्वा वमनोद्योगमिव चकार। द्वित्रिवारं सशब्दमूर्ध्ववायुमप्युत्ससर्ज। मिश्रमहोदयेन दृष्टं यद्वराको वहुतरं कष्टमनुभवतीति।

कियत्कालान्तरं प्रोवाच बाबू- ''महाभागाः ! अद्य तु गमनं न सम्भवति। श्वस्त्वश्यमेवाभीष्टस्थलं प्राप्स्यावः। तर्हि रात्रिमस्मिन्नेव ग्रामेऽतिवाहयाम इत्येवोचितं प्रतिभाति। न मे प्रकृतिः साधीयसी।''

इतः शकटिचालकोऽपि भोजनाय व्याकुल आसीत्। तेनापि तत्र स्थितावेव सुखं प्रदर्शितम्। पुनः किमसीत्! तत्रैव स्थितिः सिद्धान्तिताऽभूत्। प्रदोषान्धकारमुद्वीक्ष्य प्रोक्तं बाबुना- ''हन्त ! हन्त ! अतीव लज्जाकरणमद्यापतितम्। यन्मदुपस्थितौ श्रीमद्भिर्दुःखमनुभूयते।

**मिश्र०** -किमिह दुःखम् ?

**बाबू०** - इदमेव यदहं तु न प्रकृतिस्थः। भक्ष्यादिसम्पादने न पारयामि साहाय्यमापादयितुम्। ततश्च वस्त्वानयनं, भक्ष्यादिसम्पादनं च श्रीमतामेव कर्तव्यमापतितम्।

इदमुक्त्वा च प्रदत्तमेकं रूप्यकं मिश्रहस्ते। मिश्रेणापि- ''वत्स ! किमिदं दुःसम्भवम् ? यदि शरीरमस्वस्थं स्यात्तर्हि कोऽत्र मानुषवशविषयः ?'' इति सस्नेहं वदता गृहीतं रूप्यकं हस्ते प्रोक्तश्च- ''किं साम्प्रतं भक्ष्यं रोचते भवते ? तदेवानयामि।''

सविह्वलजिह्वं प्रोक्तवान् बाबुमहाशयः ''नैव नैव यद्यहं किमपि अभ्यवहरिष्यामि तर्हि शरीरमधिकमस्वस्थं भविष्यति। गृहपर्यन्तं गमनं दुर्घटं भविष्यति। तथा च श्रीमतां यदभीष्टं स्यात्तेदवाऽऽनेयम्। यदि च कियत्कालानन्तरं किमपि शरीरं स्वस्थं भविष्यति तर्हि कियच्चन पथ्यं ग्रहीष्यामि।

नाधिकः समुपालभ्यत विचारावसरो मिश्रमहोदयेन। प्रसन्नेन चेतसा भक्ष्याद्यानयनाय

जगामापणाभिमुखम्। परकीयद्रव्येणैव यानव्ययो जठरानुपानव्ययश्च निर्वाह्यत इत्येव विचारे वराको मिश्रो मुदितमना समभूत्।

गमनसमये प्रोक्तं बाबुना– ''श्रीमद्भिः शीघ्रमेवेह समुपस्थातव्यम्। तावत्कालं यानमिहैव स्थास्यति।''

कुण्डलमिश्रगमनानन्तरं बाबुमहाभागः प्रोवाच् शकटिचालकम्– ''नूनं नाद्यास्माकं गृहगमनं सम्भवति। मम व्याधिः समधिकं प्रवृद्धः। नापि च शीघ्रमेवोपशमं यास्यतीति दृश्यते। श्वः पर्यन्ते भवतः स्थितिरपि न सम्भवतीति चेद्वाञ्छसि पथा सुखमात्मनिवासं प्रयाहि। श्वोऽहं पुनः प्रबन्धं करिष्यामि यानस्य। भाटिद्रव्यतोऽधिकश्च रूप्यकमेकं भोजनाव्ययार्थं दास्यते।''

शकटिचालकस्य उच्चागता ग्रहाः! एकदिनपूर्वमेव नियतं द्रव्यम्! ततोऽप्यधिकमेकमुद्राया अपरो लाभः! पुनः किं तेन प्रतीक्ष्येत? बाढं प्रसन्नाननः स्वीयं द्रविणमादाय सवेगमात्मस्यन्दनं स्वसदनं निन्ये। किमिति क्रियेत् क्षणमपि विलम्बः?

शकटादर्शनानन्तरमेव सर्वाङ्गसुन्दरेण बाबुमहाशयेन समुद्घाटितः कुण्डलमिश्रवस्तुग्रन्थिः! तदन्तर्गतं पुरातनमाधिं, व्याधिं च परिहाय ततो द्रविणग्रन्थिरेवात्मनः पटसम्पुटके न्यक्षिप्यत। अवशिष्टञ्च सर्वमवकरजातं कोण एकस्मिन्नकार्षीत्। स्वीयं च सर्वं वस्तु सावधानमात्मसात्कृत्य नैशान्धकारतिरोहितमेतत्स्थलमेकवारमेव तत्याज। गमनसमये चैकस्मिन् पत्रखण्डे इति विलिख्य कुण्डलमिश्रवस्तूपरि निक्षिप्तवान्।

''महाशयाः! प्रणमामि''

इतश्च कियन्तं समयमतिवाह्य एकस्मिन् हस्ते दधिभाण्डमपरस्मिंश्च अन्यद्भक्ष्यव्यञ्जनं वहन् कुण्डलमिश्रो यदा समागतस्तदा ददर्श यत्तत्र न शकटिः, न च शकटिचालकः, नापि च मृदुमधुरभाषी बाबुमहोदयोऽस्ति। केवलं झिल्लीझाङ्कर एवारम्भ्यमाणो निशम्यते! हन्त! सर्वं शून्यम्।

दूरे दूरे गत्वा कुण्डलमिश्रेण द्रष्टास्तास्ता भूमयः, पृष्टाश्च सवैक्लव्यं यातायातं कुर्वाणा ग्रामजनाः– ''किन्नु दृष्टमासीदिह यानमेकम्?'' परमेतदुत्तरे कैश्चन– ''अहो! एते नवीना वा ता ध्माताः? – कैश्चित्! ''सत्यं दर्शनीयः पुच्छविकलः शाखामृगः'' कैश्चन च ''अयं विचित्रः पशुः कस्माद्वेनादायातः'' इत्याद्येव, असभ्यासम्भाषितमभिमुखीकृतम्! सहासं तत्पृष्ठस्तालिका वादनं कुर्वद्भिश्च बहुभिः क्षते क्षारनिक्षेप एवाऽक्रियत।

हन्त! हन्त! ग्रामे ग्रामे प्रतिश्वरशुरसदनमाहिण्डमानेन कुण्डलमिश्रेण यद्वार्षिकं भूयसा कष्टेनोपार्जितं तत्समग्रमेव चतुरचूडामणिना केवलं ''मातृष्वसृपतिं'' मधुराभिर्वार्त्ताभिर्व्यामोह्य संसौकर्यमात्मसात्कृतम्! अवशिष्टः केवलं दण्डायमानः कुण्डलमिश्रः!

अन्ततः पुनः पुनः क्रन्दता श्रीमता कुलीनकुलचूडामणिना कुण्डलनारायणमिश्रेण गृहीतः स्वभावस्वच्छो निजमार्गः? भूयसापि च प्रयत्नेन न स समुपालभ्यत कुण्डलमिश्रस्य पाटवपण्डितो ''योषिद्भगिन्यात्मजः!''

# ममाध्यापनम्

## ( १ )

विश्वविद्यालयस्य नियमितपुस्तकभारं मस्तकादुत्तार्य, तत्परिवर्ते शास्त्रिपदकमुपलभ्य, पञ्चविंशवर्षे गुरुदेवस्य सकाशात् चिरविसर्जनमग्रहीषम्। मन्ये पाठकमहाशयाः अकथितमपीदं स्वयमेवानुमास्यन्ति, यद् गृहागतोऽपि कतिपयमासपर्यन्तं निजबाहुबलेन अन्नसंस्थानस्य न प्राभवं संघटनं कर्तुम्। प्रेषितं खलु बहुषु विद्यालयेषु योग्यतापत्रसहकृतमावेदनपत्रम्। परं बहुभ्य एवोत्तरमुपलब्धम्– 'इतोऽप्यधिकमिङ्गलिशभाषाप्रावीण्यमपेक्ष्यते। हन्त! कोऽयं संस्कृतभाषायामभिसम्पातः। अस्तु कियत्कालानन्तरं धवलपुरग्रामस्य इंग्रेजीमाध्यमिकविद्यालये (हाईस्कूल) प्रधानसंस्कृताध्यापकपदमुपलभ्य मातापित्रोः स्नेहाश्रुजलेमाभिषक्तिः सन् कार्यस्थले यात्रामकरवम्। तदा हि मम जीवनस्य शोभनः प्रभातकालः। शरीरे बलम्, मनसि साहसम्। मम नवीनजीवनस्योपरि तदिदं स्रोतोद्वयं निरर्गलं प्रवहति स्म।

धवलपुरग्रामः प्रकृतिदेव्याः सौन्दर्यक्रोडे पालितः। ग्रामस्य चरणतलं प्रक्षालयन्ती, स्रोतोऽभिघातमुखरा प्रवहति खलु कलकलनादिनी तरङ्गिण्येका। नद्या नाम लक्ष्मी। गङ्गायाः शाखानदी। एतस्या एव नद्यास्तटे क्षुद्रमेकं लताभवनं (वङ्गला) निवासार्थं नियतमभूत्। जनकलकलविक्षुब्धमशान्तिदायकं नगरनिवासं विहाय, शान्तिसुखपूर्णस्य निर्जनतामयस्य ग्रामस्याश्रयमुपलभ्य समाश्वस्तोऽभूवम्। आसीन्ममैकः पाचकः, यो हि पाकादिसमस्तकार्याणि निर्वाह्य सन्ध्यातः पूर्वमेव निजगृहं प्रयाति स्म। अहमपि समस्तदिनं विद्यालयच्छात्रेभ्यः समर्प्य परिशेषे श्रान्तदेहः सन् वासस्थानं प्रत्यागच्छम्। गृहे किञ्चिद्विश्रमान्तरं लक्ष्मीनदीतीरे शान्तिदायकस्य निर्मलवायोः सेवनाय पुनरपि गृहाद्बहिरभवम्। एवं प्रसर्पति सन्ध्यान्धकारे पुनर्वासस्थानं परावृत्तः आहारादिकं समाप्य बकशुभ्रयनीयमाश्रितो निशीथपर्यन्तं साहित्यचर्चायां व्यापृतः समभवम्। तदनन्तरं च निद्रा देव्याः क्रोडे आत्मानं समार्पयम्। एतदेव मम दैनिकं कार्यविवरणम् ।

## ( २ )

पाठकगणस्य सविधे तदिदं निवेदनमावश्यकं मन्ये यत् आख्यायिकाप्रणयनस्य

कवितालेखनस्य च रोगो मम हृदये बाल्यादेव प्रबलोऽभूत्। अहमनेकेषां मासिकपत्राणां नियमितलेखकः। धवलपुरग्राममागत्य मम रचनावेगो द्विगुणपरिमाणेन वर्द्धते स्म। यत्किञ्चिदस्तु एतस्या निर्जनपल्ल्यां प्रकृतिदेव्याः क्रोडमाश्रितस्य मम षण्मासाः सानन्दं व्यतीयुः। ग्रीष्मस्य दीर्घोऽवकाश समुपस्थितोऽभूत्। गतेष्वेषु षण्मासेषु धवलपुर- वास्तवस्य नव्ययुवकदलस्य बालकवृन्दस्य चोपरि मम भूयान् प्रभावविस्तारोऽभवत्। सर्वेऽपि सन्ध्याकाले मम निवासगृह-मागत्य संवादपत्राणि मासिकपत्रिकाश्चापठन्। तदन्तर्मुद्रिता मम नामाङ्किताश्च रचनास्तेषां मनस्सु महान्तं प्रभावमुत्पादयामासुः। केचित्केचित्तु ममैतावद्भक्ताः समभवन् यत्तेषां चक्षुष्यहं भारतस्य प्रधाननेता (लीडर) प्रतीतोऽभवम्।

किं वा भूयसा, अस्माकं समवेतचेष्टायाः फलेन अनतिविलम्बमेव ग्रामस्य मध्ये ''स्वदेशहितसाधनी समिति'' नाम्नी एका सभा संस्थापिताऽभवत्। सर्वेषामिच्छानुसारमहमेव सभापतिर्मनोनीतोऽभूवम्। देशहितरूपे महत्युद्देश्ये प्रणोदिता बहवो युवका बालकाश्चास्माकं सभायां योगदानमकुर्वन्। अस्मदादीनां वक्तृतायाः प्रबन्धपाठस्य च कलसम्भारेण क्षुद्रो धवलपुरग्रामः कम्पमान इवाभूत्। कियद्दिनानन्तरमेव मम सम्पादकतायां 'स्वदेशहितसाधनी पत्रिका' धवलपुरग्रामान्नियतसमये प्रकाशिताऽभवत्। महता वेगेन लेखप्रवाहः प्रासरत्। ग्राममध्ये विद्युत्प्रवाह इवैकः प्रावहत्। किन्तु ग्रामस्य प्राचीनाः पण्डिता मद्द्वारापहृतां कीर्तिवैजयन्तीसाशङ्कमानाः क्षीणकण्ठं नानाविधान् विवादान् मद्विषये प्रोद्भावयामासुः। परमस्मदादीनामुत्साहे, अध्यवसाये वक्तृताप्रवाहे च तेषां क्षीणकण्ठस्वरः कुत्रापि विलीनोऽभवत्। अस्माकं कार्यं चाप्रतिहतगत्या प्राचलत्।

परं हा हन्त भारतस्य दुर्भाग्यम्। मानुषाः कुर्वन्त्यन्यत् दैववशात्सम्पद्यते चान्यत्। अस्माकं सभायाः कार्यं बहुतरमग्रेसरमभवत्। एतस्मिन् समयेऽकस्मादेव एकः खण्डप्रलयोऽस्माकं सभां, वक्तृताम् प्रबन्धपाठञ्च सुदूरमुड्डाययामास! तदेवाग्रे प्रकाशयामि।

## ( ३ )

ग्रीष्मावकाशसुखं गृह एवोपभोक्तुं समागमन् गृहाद् द्वित्राणि पत्राणि। किन्तु सभायाः कार्यकलापस्तस्मिन् समये सुचारुरूपेण प्रचलति स्म, अत एवाहमुत्तरं प्रादाम्- ''अतीव व्यस्तोऽस्मि, नाहमिदानीमागन्तुं शक्नोमि''। इदमुत्तरमवाप्य, आत्मीयगणो नाधिकं ममानुरोधमकार्षीत। मन्ये, अस्मिन् समयान्तराले प्रणयदेवः सुनिपुणमलक्षितः सन् मयि शरसन्धानं करोति स्म।

श्रीमत्याः प्रीतिदेव्याः स्वनामाङ्किता कवितावली प्रति मासमेवास्माकं पत्रिकायाः कार्यालये समागच्छत्। प्रतिमासमेव चेयं पत्रिकायाः कलेवरपूर्तिं कर्तुं प्रारभत। हरिहरस्य पिता एको 'नव्यतन्त्रावलम्बी' पुरुष आसीत्। स हि स्वयं एम.ए. उपाधिधारी, एवं राज्यतन्त्रतो लब्धविश्रमः प्रधानप्राड्विवाकोऽभूत्। एतस्य नामधेयमासीत् चन्द्रनाथशर्मा। 'हरिहरस्यैका

भगिन्यप्यासीत्। एतस्या एव नाम प्रीतिदेवी। हरिहरस्य मुखादेवावगतं मया यत्तस्य पिता देशहितविषयकैरेभिः कार्यैर्मम महतीं प्रशंसा करोतीति। एतदाकर्ण्य मम मनसि महान् प्रमोदः प्रभवति स्म।

## ( ४ )

अकस्मादेव एकस्मिन् दिने हरिहरः समागत्य मामसूचयत्– अद्य सन्ध्याकाले तद्गृहे मम निमन्त्रणमस्तीति। वेषभूषादिभिः सुसज्जितो भूत्वा प्रदोषसमये चन्द्रनाथशर्मणो गृहे निमन्त्रणारक्षार्थमयासिपम्।

चन्द्रनाथस्तस्मिन्समये नीचै स्तलस्यैकस्मिन् प्रकोष्ठकेऽस्थितः। किञ्चित्पुस्तकं पठन्नासीत्। दृष्ट्वैव मामुदतिष्ठदसौ, अहमपि सविनयमकार्षं नमस्कारम्। स हि मदभिमुखे वेत्रासनमेकमुपसार्य प्रावदत्– ''स्थीयताम्।''

अहं वेत्रासनोपरि आत्मनो देहभारमर्पयित्वा, चन्द्रनाथस्तस्थितपुस्तकोपरि दृष्टिपातमकरवम्। सेयं मत्सम्पादिता मासिकपत्रिका। जिज्ञासितं मया– ''कतमो लेखः पठ्यते ?''

उपनेत्रमण्डितनेत्रेण मामवलोकयन् प्रोवाच चन्द्रनाथमहाशयः– ''भवल्लेखः– समाजोन्नतिः।'' एतदनन्तरं च पत्रिकां सम्मुखेऽवस्थाप्य वस्त्रप्रान्तेनोपनेत्रं मार्जयन् समालपदसौ–

''भवन्निवासः पाटलिपुत्रे ?''

उत्तरितं मया– ''आम्''

''पितुर्नाम ?''

''श्रीसिद्धेश्वरशर्मा त्रिवेदी''

''कान्यकुब्जः ?''

''आम्''

अन्यत्किञ्चिदकथयित्वा चन्द्रनाथमहाशयोऽन्यत्र दत्तचितोऽभवत्। एतदनन्तरमनेन साकं मम स्वदेशविषयिकाः समभूवन् बह्वयो वार्ताः। फले च चन्द्रनाथमहाशयोऽस्माकं 'स्वदेशहितसाधन्याः समिते' विशिष्टश्रेण्याः सभ्योऽभवत्, प्रतिमासे पञ्चमुद्राप्रदानसाहाय्यं च प्रतिजानीते स्म।

एतस्मिन् समये हरिहरः समागत्यावदत्– ''सोमेश्वरमहाशयाः! समागन्तव्यं प्रतीक्षते भोजनस्थाली।'' एतेन साकमहमन्तःपुरे प्राविशम्। चन्द्रनाथशर्मणो गृहं वैदेशिकोपकरणैः सुसज्जितमासीत्। समस्तस्यापि गृहस्याङ्गाभूमिः सुदृश्येनास्तरणेनाच्छादिता। गृहभित्तिषु महामहान्ति तैलरङ्गचित्रितानि चित्राणि विलम्बितान्यासन्, येभ्यो दर्शनमात्रेण वैदेशिकशिल्परुचिः प्रकाशते स्म। गृहस्य प्रसाधनपरिपाटी द्रष्टुर्मनोहारिण्यासीत्। चन्द्रनाथमहाशयेन, आहारार्थमपि महदायोजनं कृतमासीत्।

एका उपचतुर्दशवर्षवयस्का बालिका परिवेषणादिकार्यं कर्तुमुपाक्रमत। बालिका अतिसुन्दरी। प्रोक्तं चन्द्रनाथेन ''सोमेश्वरशर्मन् एषा मम कन्या''

न किञ्चिदप्युक्तं मया। आहारादिकं परिसमाप्य चन्द्रनाथशर्मणो गृहात्परावर्तिषि। समस्तमपि पन्थानं चिन्ताभराक्रान्तेन चेतसाऽत्यक्रामम्। मम नयनयोः समक्षं केवलमुज्ज्वलायते द्वे चक्षुषी शोभमाने अभूताम्।

## ( ५ )

वासस्थानमागत्य शयनीयस्याश्रयमगृह्णाम्। शयनीयार्पितदेहभारस्य मे मनसि भावना प्रादुरभूत्– ''चन्द्रनाथमहाशयस्य दुहितुर्मुखं कीदृङ्मनोहरम्! चक्षुषी कीदृगुज्ज्वलायते! कीदृग्वपुर्लावण्यम्!'' अनेकक्षणपर्यन्तमेवंविधाः कियत्यो वा चिन्ताः प्रादुरभूवन्मे मनसि, न खलु तद्वक्तुमावश्यकम्, न चाहं सर्वस्वं इदानीं शक्नोम्येव वा स्मर्तुम्। सत्यं त्वेतत् पूर्वपठितस्य काव्यकदम्बस्य प्रथमदर्शनविषयका एकैके विचारा मम मनसि जागराबभूवुः। 'अनाघ्रातं पुष्पं किसलयमलूनं कररुहैः' 'तत्प्रश्येयमनङ्गमङ्गलगृहं भूयोऽपि तस्या मुखम्।' इत्यादीनि यानि यानि वा पद्यखण्डानि मे मनसि यातायातमकुर्वन्, तेषां सर्वेषामेवोल्लेखे अभिनवमहाभारतसमारम्भ इव भवेत्।

अस्मिन् समये ग्राम्यख्रिष्टीयधर्मयाजकानामुपासनामन्दिरस्य घटिका 'टन् टन्' स्वरेण मध्यरात्रमसूचयत्।

सा रजनी अतीव सौन्दर्यपूर्णासीत्। अहं वातायनमुद्घाट्य लक्ष्मीनदीशोभां द्रष्टुमवातिष्ठे। समस्तोऽपि ग्रामः समधिकनीरवः सन् गभीरसुषुप्तेः क्रोडे विश्रान्त आसीत्। अनन्तनीलाम्बरे तारकाराजिविराजतो दशम्याश्चन्द्रस्तदेतन्निभृतदृश्यं वीक्षते स्म। कतिपये नारिकेलतरवो रजनीनाथमुत्स्प्रष्टुमिव मस्तकमुत्तोलय दण्डायमाना आसन्। नीचैश्च कलकलनादिनी लक्ष्मीनदी स्वर्गीयसङ्गीतमिव गायन्ती अविरतं प्रवहति स्म। ऊर्मिबहुले लक्ष्मीनद्या वक्षसि चञ्चला बालिकेव, ज्योत्स्ना तरङ्गैः साकं खेलन्ती रजतमयं तज्जलमकार्षीत्।

अस्मिन् प्रवासे एकाकिनो मम ज्योत्स्नामये कविहृदयोन्मादिनि निशीथेऽस्मिन् शय्यापार्श्वे अन्यस्यैकजनस्याभावो वारं वारं जागर्ति स्म। स्थित्वा च भर्तृहरेस्तदिदं पद्यं ममाभिलाषविषयमुज्ज्वलमकार्षीत्–

अर्द्धं नीत्वा निशायाः सरभससुरतायासखिन्नश्लथाङ्गः
प्रोद्भूतासह्यतृष्णो मधुमदनिरतो हर्म्यपृष्ठे विविक्ते।
सम्भोगाक्लान्तकान्ताशिथिलभुजलतावर्जितं कर्करीतो
ज्योत्स्नाभिन्नाच्छधारं पिबति न सलिलं शारदं मन्दभाग्यः।।

सभ्यानां पाठकमहोदयानां पुरतो हन्त! किमिदं प्रोक्तवानस्मि? मम हृदयस्य कथां स्पष्टमद्य वर्णयामीति किमु पाठकमहाभागाः क्षाम्येयुर्ममापराधम्?

## ( ६ )

एषु दिनेष्वहं प्रायः प्रतिदिनमेव चन्द्रनाथमहाशयस्य गेहे यातायातं करोमि। गृहवर्तिभिः सकलैरेव साकं मे परिचयः सञ्जातोऽस्ति।

एकदा चन्द्रनाथशर्मणा प्रोक्तम्– ''सोमेश्वरमहाशय! अपि तृतीयप्रहरे प्रीतिमपि किञ्चित्किञ्चित्पाठयेद्भवान्?''

प्रीतिं पाठयितुं मम नासीत्किञ्चिदापत्तेः कारणम्। सत्यपि कारणे, वर्तमानेक्षेत्रे 'आपत्तेः' आधिपत्यविस्तारस्य नाभविष्यत्सुयोगः। सुतरां चन्द्रनाथशर्मणः प्रस्ताव सम्मतोऽभवम्। असूचयं चैतं–यद्भवत्प्रास्तावानुयायि कार्यं कर्तुं प्रस्तुतोऽस्मीति।

एतस्य परस्मिन् दिन एव नवीनायाश्छात्र्याः शिक्षाभारमगृह्णाम्। हरिहरमुखादाकर्णितं च मया यत्तस्य पिता मासान्ते विंशतिमुद्राः पारिश्रमिकरूपेण देयादित्यस्तयाशा।

किन्तु दृष्टं मया ममच्छात्री मयि शिक्षकगौरवं न प्रदर्शयति। सा हि मामात्मनो व्यस्यमिव मन्यते स्म। मम आदेशस्य बाध्यताचरणमपि करोति स्म सा। शिक्षकस्य सविधे छात्र्याः इयं महती त्रुटिः। तथाप्यहं छात्रामेतां नापारयं कमपि दण्डं दातुम्! प्रीतिदेवी एकस्मिन् दिने कस्य विचारस्य वशे भवतीति नासीत्किमपि निश्चितम्। एकस्मिन् दिने हठात्प्रश्नमकरोन्मयि – ''अध्यापकमहाशयाः! एतस्यां पृथिव्यां सर्वप्रधानं कीदृशं वा सुखम्?'' मया दृष्टम् – प्रश्नो गुरुतरोऽस्ति। सत्यं वच्मि ममाप्यस्योत्तरे कश्चन गूढोऽभिसन्धिरासीत्। सुतरां प्रीति प्रावोचम्– ''श्वः कथयिष्यामि।''

गृहमागत्य शयनीयतले विश्रमं प्राप्तवम्। प्राप्तविश्रमं पुनर्मां चिन्तापिशाची पीडयितुमारभत्। समुदभूवन् नानाविचाराः। एव विचारमग्न एवाहं लेखनसाधनानि गृहीत्वा पत्रमेकमलिखितम्–

''प्रीते!

नानाविधं खलु सुखम्। केचन धर्माचरणं विधाय आनन्दमुपभुञ्जते, तमेव चानन्दं जीवनस्य प्रधानसुखं विवेचयन्ति। केचित्तु अधर्ममेवाचरन्तः सुखं मन्वते, तदेव च सुखमात्मनो

जीवनस्य सुखं ते भावयन्ति। सर्वोऽपि हि आत्मनाभिलषितं वस्तु समधिगम्य सुखं प्राप्नोतीति सारम्। दृष्टान्तरूपेण पश्य! अहं भवतीं --- कियत्सुखी भवामि।''

पत्रमेतद्विलिख्य व्यचारयम् - ''प्रीतये प्रदास्याम्येतत्पत्रम्? यदि सा क्रोधं कुर्यात्, तर्हि समग्र एव मम सुखस्वप्नो भग्नो भवेत्। अथ यदि न प्रददामि तर्हि कियत्कालं यावत् इमां दग्धयातनां वक्षसि गोपयित्वा स्थास्यामि।

एतस्याः कथायाः प्रकाशने फलमेव वा किम्? प्रीतिर्हि निजपितुः सम्पूर्णतोऽधीना। चन्द्रनाथो येन साकं प्रीतेर्विवाहं चिकीर्षिष्यति, तेनैव साकं भविष्यति प्रीतेर्विवाहः।''

एवं रूपेण बहुतरं विचारयन्नहं परिशेषे प्रीतये पत्रमेतत्समर्पयितुमेव स्थिर्यकार्षम्। स्वयमेव च पत्रमेतत्परस्मिन्दिनेऽध्यापनोत्तरं प्रीतये समर्प्य, कौतुकाकुलं हृदयमादाय समागच्छं गृहे।

## ( ७ )

एतस्य द्वितीयस्मिन् दिने आसीद्रविवारः। प्रातः कालस्य सुशीतलो वायुर्वहति स्म। ममापि तस्मिन् दिने नासीत्किमपि कार्यम्। वेत्रासनोपरि अर्द्धशयानावस्थायामवस्थितः कालिदासस्य सर्वस्वमभिज्ञानशाकुन्तलं पठन्नासम्। कवेरेकैकस्य विचारस्योपरि नानाविधविचारलहरी खेलति स्म मन्मनसि। दुष्यन्तोक्तीरात्माने घटयन्- आलङ्कारिकाङ्गीकृतं 'भावकत्व' व्यापारं चरितार्थयन्नासम्। मध्ये मध्ये च तरुणतपनस्य पीतकिरणैरुद्भासितं शस्यश्यामलं क्षेत्रमालोकयमानः प्रकृतिदेव्या महिमानमस्तौषम्। परं पुनर्मां स्वार्थपरा विचाराः समुत्तेजयाञ्चक्रुः। अहं भावयन्नासम्- ''ह्यः समर्पितस्य पत्रस्य किमु दास्यति प्रीतिरुत्तरम्? अहमेवोत्तरमकार्षम्- ''आम्! कुतो वा न दास्यति? यदि मयि नाभविष्यदेतस्याः प्रेमा, तर्हि नैवंविधं प्रश्नमकरिष्यदसौ। यदि च लज्जया नैवमाचरेत्? पुनर्मामाशापिशाची भ्रामयांबभूव- ''यत्किञ्चिदस्तु अस्मिन् व्यतिकरे कार्यसिद्धेराशा शक्यते कर्तुम्। अत एव तु तद्दिने चन्द्रनाथमहाशयेन सस्नेहं निवासादिप्रश्नः कृत आसीत्।''

''तर्हि केन वा प्रकारेण प्रीतिरात्मनः प्रीतिं मयि सूचयिष्यति। शकुन्तलया तु कमलपल्लवं प्रीतिलेखमुल्लिख्य प्रियम्वदा नियमिताऽभूत्समर्पयितुम्। तर्हि किं ममाभ्यर्पणेऽपि काचित्प्रियम्वदा समागच्छेत्?'' एवमहं मनः कल्पितेर्नानाविधैः सुविचारैः प्रफुल्लहृदयोऽभूवम्, एतस्मिन्नेव समये चन्द्रनाथस्यैकः परिचारको ममाभिमुखमुपस्थितोऽभवत्। भावितं मया मनसि- ''अस्तु प्रियम्वदायाः परिवर्ते प्रियम्वद एवास्तु! दृश्यतां किं वा प्रियमुपस्थितं भवति।''

परिचारकेण समर्पितमेकं पत्रम्। तदुपरि आसीच्चन्द्रनाथमहाशयस्य लेखः। तदिदमालोक्यैव आशायाः कलेवरसङ्कोचोऽभवत्। अस्तु, किञ्चिदावश्यकं भविष्यतीति विभाव्य पत्रमुन्मुक्तावरणमकार्षम्। किन्तु यदा समस्तमिदं पत्रमपठं तदा ममान्तःकरणे भीषणा आत्मग्लानिरुद्भवत्। अहमेवात्मनो हस्तेन मम सुवर्णप्रतिमां भग्नवानस्मीत्यजानाम्। आसीदिदं पत्र लिखितम्।

''सोमेश्वरमहाशय!

भवन्तमहं सुचरितं सुजनं च पूर्वमजानाम्, परमद्य अपगतः स विश्वासः। प्रीतये भवता ह्यः कीदृक्पत्रं समर्पितमासीत्? किमेतद्भद्रोचितं कर्म? हा धिक्!''

नाहमेकं दिनमपि प्रतीक्षितुमपारयम्। तस्मिन् दिन एव आशातीतमिदमध्यापनाकार्यं विसृज्य स्वदेशं परावर्तिषि!

## प्रतिशोधः

देशस्य दुर्भिक्षेण दारुणदुर्दशाऽभूत्। ग्रामाः खर्वटाश्चोच्छिन्ना अभूवन्। दिनकरेण द्योतमानमपि दिनं तामसी रात्रिरिव भूरितमं भयमजनयत्। दीनाः धान्यकणानां कृते दूरदूरमधावन्, क्षुधया व्यलोठन् धरणौ, व्यक्रीणत कतिपयपणानां कृते देहमप्यात्मीयम्। हा हन्त! दुर्दैवस्य कीदृश आसीत्परिहासः, कालस्य कीदृशोऽभूद् दुर्विलासः। नेत्रे कोटरग्रस्ते, हस्तपदं निःसहम्, शरीरं च सर्वतोऽपि निर्बलमलोक्यत जनानाम्।

ग्रामवृद्धा अकथयन्–ईश्वरस्य कोपोऽस्ति। वर्षा व्योम विलोकयतां व्यत्यगुः, शिशिरः शीतेन वेपमानानां व्यत्यगात्, सम्प्रति निदाघश्चण्डरश्मेर्ज्वलनज्वालया व्यत्येति। हन्त! कीदृशी भयङ्करी कालस्य क्रीडास्ति। सत्यं सत्यमयमकालः। भूमिः शून्यमञ्चलं प्रसार्य विषण्णा व्यतिष्ठत। गोपग्रामो दीर्घनिश्वासानिव गृह्णाति स्म। भगवान्निशाकरः पर्णकुटीनां तासां मन्दतमं प्रकाशमचोरयत्[1]। चन्द्रजयोत्स्ना निजस्योत्सङ्गे संस्थाप्य तासां दीनकुटीनां दैन्यपूर्णां कथामिव शृणोति स्म। दूरे शृगालानां, ग्रामे शुनां शब्दो निस्तब्धतामभिनत्। अन्यथा सर्वत्र व्याप्तासीन्निस्तब्धता। रजनी निभृतमपश्यत्ताण्डवनृत्यम्।

दैत्येन सर्वथा मन्दो नन्दो विषण्णायामेकस्यां पर्णकुट्यां कन्थोपरि पतितः शोचति स्म निजदिनानि। जाग्रत एव तस्य सा रात्रिर्नेत्रयोर्व्यत्यगात्। हन्त, ग्रामपतये कृषिशुल्कं शोधनीयमस्ति। अन्यथा कृषिक्षेत्रं हस्तान्निस्सरेत्, गृहमुच्छिन्नं भवेत्, सर्वस्वमपह्रियेत। आसीन्नन्दोऽतिदीनः, सर्वेषामाज्ञावहो भृत्यः। मन्दभाग्यः पामरः।

महिषीछाग्यो वृषभाश्च ऋणपूरणे निःशेषा अभवन्। अवशिष्टमासीत् केवलं क्षेत्रम्। नानोपायैस्तस्य रक्षणचेष्टायामपि नाभूत्सफलता। क्षेत्रमिदं नन्दस्याधिकाराद्विच्युतमभूत्। नन्दस्य समीपे साम्प्रतमेका 'श्यामा' (गौः) अवाशिष्यत। नन्दस्तस्यामत्यन्तमस्निह्यत्। क्षेत्रे कर्षणं कुर्वाणो यदा स नन्दः समाह्वयत् 'श्यामे!' तदैव सा धावन्ती तत्राऽगात्। पालितः सारमेय इव सा गौर्नन्दस्य पश्चात् पश्चादभ्राम्यत्। यदा सा नवमासानां वत्सतरी आसीत्तदारभ्यैव नन्दस्तामपालयत्। अत एवासीन्नन्दस्य तस्यामतिप्रणयः।

पत्नीं गङ्गां पितृगृहे प्रापय्य मोहमयीनगरं नन्दो गच्छेत्, तत्रैव भृतिकार्यं कुर्यात्, द्रव्यमर्जयेत्, निरन्नमरणादात्मानं रक्षेत्। धूमयानाऽऽरोहणाय त्रिकटस्य[2] कृते नासीत्तस्य निकटे द्रव्यम्। सम्प्रति नन्दः श्यामां विक्रीणीत। गङ्गा भृशमनुरोधमकार्षीत् यत् श्यामां नासौ विक्रीणीत,

किन्तु सर्वथा किंकर्तव्यमन्दो नन्दो विवश आसीत्। मोहमयीं

१. अर्थात् चन्द्रप्रकाशस्याग्रे स लुप्तोऽभवत्।

२. त्रिकट, त्रिषु स्थानेषु कट्यते व्रियते (वाञ्छ्यते, दृश्यते) इति त्रिकटम्। 'कटे' वर्षावरणयोः।

गन्तुं रूप्यकाण्यपेक्षितानि, तानि च न नन्दस्य निकटे। अत एव श्यामाया विक्रय एवैकमात्रोपायः। रात्रिन्दिवमत्याचारान् सहमानस्य नन्दस्य हृदयमभूच्छनैः कठिनम्। स कदाचिदपि श्यामां न व्यक्रेष्यत, निजशरीरं कामं स व्यक्रेष्यत। किन्तु सहनशीलताया अप्यस्ति काचित्सीमा। निरन्तरपातिभिर्दुखैस्तस्य साम्प्रतमन्तःकरणं पाषाणायितम्।

गङ्गायाः पिता द्वितीये ग्रामे आसीद् यामिकः। कृषेयभूमिरप्यासीत्तस्य निकटे। अत एव गङ्गा निजपतिं तत्रैव गत्वा निवसितुमददान्मन्त्रणाम्। गङ्गायाः पितापि भूयांसमनुरोधमकार्षीत्। किन्तु श्वशुरगृहे उदरपूरणं नाभ्यरोचत नन्दाय। दीनोऽप्ययं नन्दो निसर्गादमन्दो मनस्वी।

गङ्गां पितृगृहे प्रापप्य परावर्तिष्ट निजगृहं नन्दः। स्वामिनो विसर्जनसमये संस्मृतदुःखानुषङ्गा गङ्गा वाष्पमवमुञ्चती प्रावोचत्–प्रेषयिष्यसि शीघ्रं शीघ्रमात्मनः संवादम्। यावत्सम्भवं वर्षाभ्यन्तर एव परावर्तेथाः।

**नन्दः**–यथा परमेश्वरस्येच्छा।

मेघमिव जलपूर्णं हृदयमादाय परावृत्तवान् गेहं नन्दः। नन्दस्य गृहे नारायण–तिवारिणो भूयान्सम्मानः। आसीदपि सोऽयमतिसरलो ब्राह्मणः। नायं ग्रामवासिनां कस्मिन्नपि प्रपञ्चे पर्यपतत्। नन्दस्य श्यामा नारायणस्यासीदतिप्रिया। मार्गे यदा कदाचिदपि साऽमिलत् तस्याः पृष्ठं करेण परामृशन् पुचुत्कारेण तामस्निह्यत्। नन्दो जानाति स्म यन्नारायणस्य गृहे श्यामा सुखिनी भवेत्। अत एव श्यामामादाय नन्दो नारायणस्य द्वारमुपागच्छत्। सबहुमानं प्राणमत्।

तिवारी पर्यपृच्छत्–'कथं भो नन्द! कुतः सिद्धेरिच्छा'।

'महाराज, सर्वमप्यपगतम्, इदानीमहमपि मोहमयीं गच्छामि।' सविषादमुत्तरमदान्नन्दः।

**तिवारी**– सत्यमेव, किं त्वं कुर्याः? दिनानां परिवर्तनमिदं दुर्लङ्घ्यम्। भूस्वामी चाऽयं नितरां निष्ठुरः। ग्रामे सुतरामप्रबन्धोऽस्य। कर्मचारी यथा वाञ्छति तथैव सर्वैर्व्यवहरति। भूस्वामिनश्च विलासविभ्रमेभ्य एव नाऽवकाशः।

उक्त्वैव चेदं, स हि सस्नेहदृष्ट्या पर्यपश्यत् श्यामाम्।

'भाग्ये यदासील्लिखितं संघटितं तत्। सम्प्रति भवादृशानामाशीर्वादं गृहीत्वा प्रयामि। किन्तु मार्गव्ययार्थं न मत्सविधे किञ्चित्। विंशतिरूप्यकाणि वाञ्छामि। श्यामा भवत्सविधे स्थास्यति।' महत्या निराशया प्रावोचदिदं नन्दः।

**तिवारी**– (किञ्चिद्विचार्य हन्त, नाऽभूत्तवोपरि लेशतोऽपि दया ग्रामाधीशस्य? सर्वनाशं कृत्वैव पर्यतुष्यत्। कदा ते प्रस्थानम्।?

गृहाभ्यन्तरादानीय समार्पिपद् विंशतिमुद्रास्तिवारी। किन्तु नन्दो रूप्यकाणि हस्ते गृहीत्वा सविषादां दृष्टिं पर्यपातयत् श्यामाया उपरि। साऽपि तं दीनभावेन ददर्श। अतिकरुणं दृश्यमासीत्तत्। नन्दः श्यामायाः कन्धरायां हस्तमासज्य करुणभावेन चुचुम्ब निःशब्दं नतमस्तको जगाम च।

किञ्चिद्दूरं प्रयाणे शुश्राव स 'बाँ, बाँ' इति हृदयद्रावकं शब्दम्। उरसि शिलामिव वहन् विचिचिन्त नन्दो यत् दीनतममाह्वयति श्यामा। किन्तु दृढीकृतहृदयस्तदिदं जल्पन् जगाम गेहं नन्दः- श्यामे! यदि तव भाग्येनाहं समर्थोऽभविष्यम् तर्हि......'

हन्त, निःशेषीकृतनिखिलो नन्दः। कोऽस्य भाग्यं जानीयात्?

## (२)

मोहमयीमवाप्नोन्नन्दः। राजमार्गानभिवीक्ष्यैव स भ्रान्तचित्तोऽभूत्। यतः पश्यति तत एव तस्य दृष्टिः पर्यबध्यत। स कर्तव्यं विस्मृत्य इतस्ततो निरुद्देश्यं प्रवाहितोऽभूत्। ग्रामजातो दीनः सोऽयं न केनचिदासीत्परिचितः। मरुत्तरस्य भों भों रवेण, घोटकशकटीनां च दूरापसारणस्वरेण स नितान्तमुत्त्रस्तोऽभूत्। 'कुत्र गच्छामि, किं करोमि, भृतिकार्यं कुत्र लप्स्य इत्येव प्रश्नाः पुनः पुनरुदतिष्ठन्नन्तःकरणे तस्य। व्यतीयुः कतिचिद्दिनानि। न वराकस्यास्य समुदैत्साहसं केनचित्सह संलापं कर्तुम्।'

संन्यधीयत सन्ध्या। न्यलीयत भगवान्मार्तण्डः पश्चिमगगनकोणे। लक्षलक्षजनकलकलादुद्विग्न इव नन्दो नगराद्दूरमपासरत्। वेतनकार्यस्यान्वेषणे न वराकस्याभूद्विदितं यत्कियद्दूरमुपगतोऽस्मि। किन्तु जठरे ज्वलन्ती क्षुधाज्वाला कथङ्कारं विस्मर्येत? अभूदधुना निकामं क्षुत्क्षामः, एकत्र स्थितः पर्यपातयत् परितो दृष्टिम्। आसीन्महाविशालं वाटकम्[१]। तत्रैव बहुतरा महिष्यो गावश्चासन् निबद्धाः। स्वसदृशा मलिनवस्त्रधारिणः कर्मकरान्यपतँस्तस्य दृष्टौ सेवाकार्यं कुर्वाणाः। किञ्चिदाश्वस्त इव भूत्वा समभ्यसरत्तान्। समभूत्संलापः। पर्यबध्यत परिचयः। नन्दः प्रकटीचकार स्वाभिप्रायम्। अभूत्सहानुभूतिस्तेषां तेन सह। तस्मिन्नेव दिने निजस्वामिनः सन्निधावनीयत नन्दः। अभूद्दुग्धशालायां कर्मचारी नन्दः।

आसीद्वैदेशिकस्य धनपतेरियं विशाला दुग्धशाला (डेरी)। अभूद्दुग्धस्य व्यवसायो महति परिमाणेऽस्याम्। नन्देनालभ्यत तत्र कार्यं गवादीनां दोहनस्य। निपुणोऽप्यासीन्नन्दोऽस्मिन् कार्ये। प्रत्यक्षं परिक्षितोऽसौ कार्यालयाध्यक्षेण। पर्यतुष्यत्तस्य कार्येण स्वामी। व्यतीयुर्दिनादनन्तरं दिनानि। स हि महता परिश्रमेण पर्यपूरयन्निजनियोगम्। स्वाभाविकेन विनयेनाऽभूत्सर्वजनप्रियो नन्दः। शालाध्यक्षो धनपतिः परमं प्रासीदत्तेन। उत्तरोत्तरं पर्यवर्द्धत विश्वासो नन्देऽमुष्य।

प्राप्यत गङ्गया लेखितं पत्रं नन्देन। नन्दस्य कुशलवृत्तादिकमपृच्छ्यत तस्मिन्। नित्यनिर्वाहार्थं प्रार्थितान्यभूवन् रूप्यकाणि। कदा च निजदेशं परावर्तिष्यते इत्यपि तस्मिन्

पृष्टमासीत्।

प्रैषयद् रूप्यकाणि नन्दो गङ्गायै। प्राहिणोच्च प्रत्युत्तरम्– 'साम्प्रतमहं पूर्णसुखी। स्वामिनः समीपे वेतनरूप्यकाणि सञ्चिनोमि। प्रान्तेऽस्मिन् भूयान् लाभो दुग्धव्यवसाये।

१. बाडा 'आहाता'।

एतद्व्यापारविषये सञ्जातो मे भूयाननुभवः। कञ्चित्कालं भृतिकार्यं कृत्वा द्रव्यं राशीकरिष्यामि। ततः स्वयमहमिमं व्यवसायं परिचालयिष्यामि। निश्चितं महतीं लाभसम्भावना। भवतीमपि तदैवाऽऽनाययिष्यामि।'

## ( ३ )
## व्यत्यगाद् वर्षद्वयम्

नन्दो देहलीतो गोमहिषीश्चानाययत्। त्वरितमेवाऽस्य भाग्यतारा समदीप्यत सफलतागगने। शनैरभूद् घनिष्ठता सफलतया सह। निजकार्यालये दुग्धं नवनीतं घृतं च व्यक्रीणीताऽसौ। उन्मीलिते अभूतां व्यवसायनेत्रे एतस्य। धान्यकणानां कृते वितृष्यन्नन्दः साम्प्रतं धनराशेरुपरि धनराशिं समचिनोत्।

एकं बान्धवं सह नीत्वा गङ्गापि समागान्मोहमयीम्। प्रबन्धविषये नाभूत्कष्टं नन्दस्य। इदानीं सर्वोऽपि गृहप्रबन्धो निर्व्यूढोऽभूद् गङ्गाया। महता सुखसौभाग्येन व्यवसतां दम्पती। नन्दो दिवानिशं निजे व्यवसायकार्ये संलग्नोऽभूत्। न प्रतीयते स्म व्यतीयमानोऽपि कालस्तस्य। किन्तु नाऽभ्यरोचत नागरिकजीवनं गङ्गायै। केवलं प्रभूतपरिमाणेन समुपागच्छतो धनस्य लोभेन सन्तुष्टचित्तासौ समयं व्यत्यगमयत्।

## व्यतीयुर्दश वर्षाणि

दुग्धशालाध्यक्षो निजदेशं परावर्तिष्ट। नन्दस्तस्य दुग्धशालामिमामक्रीणान्निजधनेन। पर्यगण्यताऽसौ महाव्यवसायिषु साम्प्रतम्। स हि सम्प्रति नन्दान्नन्दरामः संवृत्तः। किन्तु मोहमय्या जलवायुभ्यां प्रत्यहमस्वस्थोऽयमस्थात्।

समगादीद् गङ्गा ह्येकस्मिन्दिने– 'पश्याम्यहं, भवान् दिनं प्रतिदिनं देहेनाऽपचीयते। बहोः कालादत्र मनोऽपि नौ विषण्णं तिष्ठति। प्रचुरं धनं दत्तवान्परमेश्वरः। सम्प्रति निजदेशं परावर्तावहे, तत्रैव कृषिव्यवसायेन निर्वक्ष्यावहे। अत्रत्यजीवने सम्प्रति न प्रतीयते सुखम्।'

गङ्गायाः कथनोपर्यचिन्तयन्नन्दोऽपि समये समये। तस्यापि मनसि कृतपदाऽभवत्सेयं

वार्ता। एकदा सोऽप्यभाषिष्ट–'चलावो निजग्रामं सम्प्रति। नेदानीमत्र स्थास्याव:। अतिपरिमाणस्य धनस्य सङ्ग्रहेण किं न: कर्तव्यम्? अहह, तानि नौ दिनानि कीदृशान्यासन् सुखपूर्णानि यदा हि समस्तं दिनं क्षेत्रे कार्यं कृत्वा सायं निजकुटीरं परावर्तिष्वहि। अहह, सर्वमिदं स्वप्नायितमभूत्।'

कियत: कालस्य पश्चान्नन्दराम: स्वव्यवसायमुपसमहार्षीत्। एकस्य श्रेष्ठिनो हस्ते सर्वं विक्रीय धनं राशीचकार।

गङ्गया पृष्टम्–'संहत्य सर्वं कियत्?'

'लक्षद्वयात्किञ्चिदधिकम्'।

हर्षविस्मयाभ्यां जडीकृताङ्गा गङ्गा पाञ्चलिकेव प्रमोदाऽमन्दं पर्यवैक्षत नन्दम्। तस्मिन्नेव दिने प्रातिष्ठेतां निजदेशं द्वावपि।

## (४)

सर्वभावैरवन्ध्याऽभूत्सा सन्ध्या। एकयुगतोऽप्यधिकं कालं बहिर्व्यतिगमय्य निजगृहं परावर्तिष्ट नन्द:। तस्य जीर्णकुटीरोपरि महाविशाल: प्रासादोऽभून्निर्मीयमाण: महदभूत्परिवर्तनम्। दुर्लङ्घ्यो भगवत्या लक्ष्म्या: प्रभाव:। ग्रामस्य प्रतिष्ठिता अपि पुरुषा: सम्प्रति नन्दरामस्यालिन्दे सानन्दमवातिष्ठन्त। स हि निजस्य वृत्तान्तमश्रावयत्सर्वानमायिकभावेन। ग्रामवासिनां संलापेनैव विदितं नन्दरामेण यद् ग्रामाधिपतिर्भूस्वामी साम्प्रतं पतनस्य सीमानमुपागत:।

श्यामामवलोक्य नितरां खिन्नोऽभवन्नन्द:। अभूत्सा जरती। नाभूत्तस्या दुग्धमपि। अस्थिपञ्जरमदृश्यत तस्या:। नन्दराम: प्रचुरेण धनेन परितोष्य वृद्धब्राह्मणमिमं तस्मिन्नेव दिने समानैषीच्छ्यामामिमाम्।

अद्याऽऽसीद् ग्रामस्य विक्रयदिनम्। ग्रामाधीशस्य राजहर्म्ये समताड्यत विक्रयसूचिका ढक्का। महामहान्तो व्यापारिणो भूस्वामिनश्चासन् समवेतास्तत्क्रयणाय। विलासिताऽगुण्ठने निलीनो भूस्वामी निजदशायां नग्नं दृश्यमपश्यत्साम्प्रतम्। नन्दरामोऽध्यगच्छत्संवादमिमम्। नितरां व्यषीदन्नन्द:। शुल्कपत्राणां महापुटकं सम्बध्य बहिरभूदसौ गेहात्। गङ्गा समतर्कयन्निजमनसि यन्नन्दरामो ग्रामोपरि स्थापयेन्निजाधिकारम्। ग्रामवासिनोऽन्येऽपि भूयस्तरामिदमेवाऽनुमानमकुर्वन्।

अह ह नन्दरामो ग्रामविक्रयस्याऽश्रौषीद् भीषणां घोषणाम्। हन्त, पूर्वकालस्य भयानकानि दिनानि समनृत्यन्नेत्राभ्यन्तरे तस्य। अकम्पिष्ट करुणशीलस्य तस्य हृदयम्। अतीव विषण्णो मृतप्राय इव जडीकृतनेत्र: सम्मुखेऽवातिष्ठत दीनो भूस्वामी। परानुकम्पया नितराममन्दो नन्दो नात्मानमवस्थापयितुमशकत्। ग्रामाधीशस्य दीनदशां विलोक्याद्रवद् हृदयं तस्य। स हि तत्कालं शुल्कपत्राणां पुटकं तस्य सम्मुखेऽवस्थाप्य दीनमगदत्– 'स्वामिन्! अहमिदं दु:खमनुभूतवानस्मि पूर्वम्। न कुर्याद् भगवान् यत्कश्चिदिदं दारुणदिनं द्रष्टुं बाध्यो भवेत्। गृह्णीत धनराशिमेनम्। अनेन हि संरक्षत निजं ग्रामम्। भवता कृतेनाऽप्यपकारेण मे

समभून्महानुपकारः। सोऽयं धनसङ्ग्रहो भवत्कारणात्, अत एवास्त्यधिकारो भवतः।'

हर्षविस्मयलज्जानुतापैरनीशो ग्रामाधीशो मूर्च्छित इव तदभिमुखं पश्यन्नेवातिष्ठत्।

## हृदयव्रणः

### ( १ )

अतीतभारतस्यातीतगौरवचिह्नानि सुविशाले निजवक्षसि वहन्ती सेयमुज्जयिनी अद्यापि महिष्ठं मौलिमुन्नमय्य मौनमवस्थिता। सुभगसलिला नन्दितविप्रा भगवतीशिप्रा त्रिभुवनैकमालस्य भगवतो महाकालस्य चरणस्पर्शेन मुदितपुलकतेव नूनमनन्ताभिमुखमभिधावति। सोऽयमस्याः प्रकारोऽप्येवमेवाऽव्याहतमनन्तकालात्प्रचलति। संसारचक्रमपीदम्, भाविनं वर्तमाने परिणमय्य, वर्तमानं चातीतगर्भे विनयन्नित्यमेवमेवाबाधितमभिवर्तते। शिप्रे !, जगदुज्जयिन्या उज्जयिन्याश्चिरसङ्गिनि शिप्रे ! दर्शितनानारङ्गैर्भवत्यास्तरङ्गैरनेकेभ्यो व्यथितहृदयेभ्यः शान्तिरर्पिता स्यात्। दूरीकृतविषादैर्भवत्याः कलकलनादैरनेकेषूत्साहशून्येष्वन्तःकरणेषु सञ्चारिता स्यात्कार्यकारिणी शक्तिः। निविडपादपघनेऽस्मिन्निर्जने रोधसि समास्थिता ह्यनेके संसारविरताः प्राप्तवन्तः स्युरनन्तस्य साक्षात्कारम्। सरलतरले तरङ्गिणि शिप्रे! शिप्रे निदाघर्तोर्यस्मिन् कस्मिंश्चिदहनि महाराजो भर्तृहरिरवश्यावश्यमिदं भवत्यास्तटमुपगतो भवेत्। सान्ध्यप्रकाशस्य च दृश्यं तावदवश्यं तटादेवाऽवलोकितं स्यात्, तत एव चावलोकितं स्यान्निस्तन्द्रेण चन्द्रेण भासुरं तन्नैशमम्बरम्।

एकमेकं कृत्वा रात्रेर्दश वादितानि घटिकया। एकैकक्रमेण च समभूवन् सर्वेऽपि निर्वाणाः प्रदीपाः। प्रशान्तोऽभूत्सर्वतोऽपि कोलाहलः। कलकलोज्जयिनी उज्जयिनी। प्रशान्तेः प्रतिमूर्तिरिवाऽलोक्यत साम्प्रतम्। नीरवनिस्तब्धाया नगर्या मण्डितमस्तकोपरि भगवान् रजनीनाथः सहस्रकिरणैर्व्यराजत्। किं सङ्कुचितासु प्रलोलिकासु, किं प्रशस्तेषु राजपथेषु सर्वत्रापि गृहावलयो मौनमवस्थिता आसन्। गृहे गृहे सुखशय्यामध्यशेरत सर्वेऽपि। नैशीं नीरवतां खण्डयदकस्मादश्रूयत मधुर कण्ठगीयमानमिदम्– ''हरिरभिमानी रजनिरिदानीमियमपि याति विरामम्''।

एकस्मिन् प्रकोष्ठे प्रज्वलति स्मैकः प्रदीपः। शुभ्रशयनीयोपरि रुग्ण एकस्त्रयोदशवार्षिको बालको निरुत्साहशिथिलमासीदधिशयानः। मुखमस्यैकान्ततो म्लानम्, शरीरं च भृशं कृशम्। विशाले तस्याक्षिणी अभूतां गर्तगते। शिरोभागे चान्य एकोयुवकोऽवस्थितो यस्योत्सङ्गे निहितमासीद्रोगिणो मस्तकम्। रोगिणा प्रोक्तम्– 'आर्यक![१] जलम्। शुष्यति मे

कण्ठः। किमेवं भोः पश्यसि, दीयतां मे पानीयम्'।

युवको मधुरेणाऽपि करुणतरेण स्वरेण प्रोक्तवान्– 'वत्स भानो! पूर्वमिदमौषधं गृहाण, पश्चात्ते जलं दास्यामः'। भानुरवदत्– 'आर्य विमल! नाहमधुना भेषजं पास्यामि। जलम्---

१. दादा/बड़ाभाई

-----'। विमलेन प्रोक्तम्– 'किमिति वत्स? किमेवमद्य हठमाचरसि?'। भानुः प्रशान्तेन स्वरेण प्रात्यवदत्– 'पितामह मुखाद्बहुधाऽश्रूयत--'औषधं जाह्नवीतोयं वैद्यो नारायणो हरिः'।

न किञ्चिदवादीद्विमलः। भानुः शनैः शनैर्न्यमीलयन्नयने। किन्तु शीघ्रमेव नयने उन्मील्य करुणकरुणया दृष्ट्या व्यलोकयद्विमलाभिमुखम्। भानोरयं दृष्टिपातः पूर्वः पद्यखण्डश्चातीव हृदयभेदकोऽभूद्विमलस्य। स ह्यतीव धैर्यबन्धेन निरुरोध वाष्पप्रवाहम्।

किन्तु भानुः पुनरवोचत्---'आर्य! साम्प्रतं मे प्रतीयते यद्भवन्तो दुराशावशीभूताः। न ममायं साधारणो व्याधिः। भवान्....... अहो भवान् रोदिति'। नेदानीं सोढुमशक्यत विमलेन। स हि बालक इव मुक्तकण्ठमरुदत्। पत्नी सरला समीप एवाऽवस्थिताऽभूत्। भानुरवादीत्– 'पश्य भ्रातृजाये! न जानेऽद्य तातस्य किमभूत्?'

सरला नेतः पूर्वं विमलस्य नेत्रयोर्बाष्पमालोकयत्। अद्य तया प्रत्यक्षीकृतं यद्विमलस्य हृदयेन धैर्यस्य बन्धः साम्प्रतमेकान्ततो भग्नः। अवादीत्सा विमलम्– 'किमिदम्? यदि भवानेव बाल इवैवमश्रूणि विमोक्ष्यति तर्हि.......।'

विमलोऽवदत्– 'मा मैवम्। नाहं रोदिमि'। विमलः पर्यमार्जयन्नयने।

भानुरवोचत्– 'यदि भेषजस्याऽग्रहणेन भवति भवतो दुःखं तर्हि दीयताम्। अहमापिबामि।'

विमलो भेषजपात्रमोष्ठसविधमानयत्। अपिबच्च भानुर्भेषजम्।

पुनरवादीदसौ – 'इदानीं तु मे पानीयं दास्यथ?'

विमलस्तप्तपानीयमानेतुमकरोत्सङ्केतं सरलायै। सा ह्येकं जलपात्रमददाद्विमलस्य हस्ते। स हि भानुमवदत्– 'गृहाण'। भानुः किञ्चित्पीत्वैव मुखं परावर्तयत्– 'हन्त तप्तमस्तीदम्। शीतलमानीयताम्।'

इदानीं सरलाऽवदत्– 'भवान् विवेकशीलोऽपि कथमेवमागृह्णाति? साम्प्रतमिदमेव पिब'। विमलोऽवदत्– 'वत्स शीतलं ते जलं प्रातरेव दास्यामि'।

श्रुत्वैवेदं भानुः – कयाचिदान्तरिकप्रेरणयेव सहसा प्रावदत्– 'कदा! प्रातः किन्तु कस्मै? इदमुक्त्वैव सोऽभवत्तूष्णीम्। अदृश्यत मुखोपरि काचित्स्मितरेखेव। एतस्यैतद्वाक्यमाकर्ण्य, साकूतं स्मितं चावलोक्य विमलो व्यकम्पत। भानो! किं प्रातःकालात्पूर्वमेव त्वमज्ञेये कस्मिंश्चन पथिपथिको भवितुमिच्छसि? किं त्वं साकूतेनाऽनेन

स्मितेन सत्यमेव मामुपालभसे ''यत् मन्दभाग्य! त्वया तु शीतोदकेन मे तृष्णापि नापनीता!''

## ( २ )

'टन् टन् टन्' विमलश्चकितो भूत्वा घटिकां व्यलोकयत्। त्रीन् टङ्कारान् कृत्वा यन्त्रस्य बृहत्सूची प्राचलदग्रतः। भानोर्नेत्रयोर्व्यलोक्यत साम्प्रतं निद्रेव। विमलो बहिरागमत्प्रकोष्ठकस्य। दृष्टं परितो यन्निद्रादेवी सम्पूर्णेऽपि जगति निजं मोहनजालमास्तृतवती पूर्णरूपेण। शीतलो मन्दश्चावहति सर्वतोऽपि समीरणः। धात्री प्रकृतिः प्राणिमात्रमपि सम्प्रति शाययतीव सुखावहेन निजकरसंवाहनेन। भगवान् कुमुदिनीनायको निजसहचरीं विभावरीं ज्योत्स्नाजालकेन स्वैरमामण्डितवान्। सम्प्रति कौतूहलेन महाकालमन्दिरस्योच्चचूडां करैः परामृशन् परिहसतीव प्रमोदेन। सहचरी यामिनी प्रेमपरवशा संलपतीव निभृतनिभृतं चन्द्रदेवेन, किन्तु तारकाः प्रणयालापमिममाकर्ण्य माद्यन्ति निजमानस एव। कीदृशः प्रशान्तः कान्तश्च सुसमयः!। किन्तु सन्तापितानां क्व शान्तिः? प्रसृता सम्प्रति सर्वतोऽपि नीरवता। तामिमाम् (नीरवताम्) क्वचित्क्वचित् जागृत जागृतेतिकलकलैर्भञ्जन्ति यामिका एव। समीपावस्थिते तिन्तिडीतरौ सम्प्रति निषीदन् दिवान्धदेवो वा निजघर्घरारवेण तामिमां प्रतिबध्नाति।

विमलो बहिरागत्य शून्यदृष्ट्या विलोकयामासेतस्ततः। अस्मरत्स हि – नाभूत्प्रभूतः समयो यदा सः (विमलः) पूर्वमेकस्यां रजन्यामेवमेव गगनाभिमुखदृष्टिरालोकयति स्म। किन्तु नासीत्पूर्वमेवं नैराश्यान्धकारपूर्णं तद् हृदयम्। अद्य तु तस्य प्राणप्रियो भ्राता यस्य हि रक्षणावेक्षणं तस्यैवाधीनं मृत्युशय्यामधिशेते। तस्मिन्दिने परितः स आलोकभासिताः सर्वा दिशः समलोकयत्, किन्त्वद्य घोरनिबिडेऽन्धकारे क्षीणक्षीणमेकं ज्योतिरालोकयितुमपि निराशः। अद्य हि महत्सङ्कटं तस्य। स्नेहः पापशङ्कीति कथानुसारं स हि प्रतिक्षणमाशङ्कते स्म तस्य जीवनज्योतिषो निर्वाणम्। स हि निजहृदय एव प्रश्नमकरोत् – 'यदि तज्ज्योतिर्निर्वाणमेव स्यात्तर्हि?' हन्त हन्त कीदृग् भयानकोऽभूत्स प्रश्नो यस्य विचारमात्रेणाऽपि विमलस्य हृदयं विमूर्च्छितमिवाभूत्। नैतस्योत्तरमलभ्यत, अशुभश्रवणभयेन स एव वा नास्योत्तरं श्रोतुमैच्छत्। किन्त्वासंस्तानि यवनानां 'रमजान' दिनानि। अत एव दूरे एको यवनभिक्षुरगायत्–

**'चुन चुन मिट्टी महल बनाया, लोग कहैं घर मेरा है।**
**ना घर मेरा ना घर तेरा, चिडिया रैन बसेरा है।।'**

विमलेन तदिदमुत्तरं श्रुतं न वेति न विजानीमो वयम्, किन्तु तस्मिन्नेव समये पृष्ठदेशात्कोऽपि तस्य स्कन्धे हस्तं न्यदधात्। कोमलकरस्पर्शेनाऽनेन चकितोऽभूद्विमलः। परावृत्य दृष्टम्– सरला अवाङ्मुखी म्लानं तिष्ठति। अप्राक्षीद्विमलः– 'किमस्ति?'

सरला मन्दमुखमवादीत् – 'भानुर्न जाने किं प्रलपति'। विमलः किमप्यनुक्त्वा ततः प्रास्थित। प्रकोष्ठके समागत्य दृष्टं यद्भानुर्निद्राऽऽवेशे किञ्चिद्वदति। स हि समीपमागत्योपाविशत्। भानुर्निद्रायामासीत्संलपन्– ''...... महत्........ मम ....... कर्तव्यम्। ......किन्तु अहं ......पूर्वमेव ......प्रस्थानं करोमि....भगवन्.....।''

विमल: सधैर्यमाह्वयत् – 'भानो!'

भानुश्चकितमकम्पत। विमलोऽपृच्छत् – 'वत्स भानो! किं त्वमकथय: ?'

भानुर्मौनी आसीत्। स हि विमलस्य मुखाभिमुखमालोकयन्नस्थात्। किन्तु त्वरितमेव प्रारभ्यन्त तस्य हिक्का:। अलक्षयदिदं सरला। अत एव सा धावित्वा भृत्यमवादीत्– 'डाक्टरं त्वरितमाकारय'। भृत्य आदेशपालनाय त्वरितमधावत्।

किञ्चिद्विलम्ब्य कथमपि नेत्रेङ्गितद्वारा भावं प्रकटयन् भानुरभाषत– 'साम्प्रतमहं प्रयाणोन्मुख:। किन्त्वैकमिदं प्रार्थये। मम जीवनस्य कर्तव्यभारो भवता वोढव्य: स्यात्।'

इदमुक्त्वैव स व्यलोकयद्विमलाभिमुखम्। आसीद्विमलस्तूष्णीम्। भानु: पुन: प्रावदत्– 'ममात्यन्तमनुतापोऽस्ति यत् यदर्थमहमिहाऽऽगाम् तमपूरयित्वैव गच्छामि। यदि भवाँस्तस्य पूरणं प्रतिजानीत तर्हि सुखेनाऽहं प्रतिष्ठेय।'

विमलो मायामुग्ध इव स्तब्धमतिष्ठत्। कश्चन दिव्यपुरुषो, योगी वा कश्चिदसाधारणं कार्यं किञ्चित्सम्पादयितुमस्मिन् कुटुम्बे समागच्छत्। काऽन्यथा त्रयोदशवार्षिकस्य बालकस्यैषा मति: ? हन्तैवं विधस्य कर्मयोगिन: कत्तर्व्यभारं वोढुमस्ति मे शक्ति: ? स हि भावानुप्राणित: स्वहृदये हस्तं निधाय व्यलोकयत्, आसीत्तत्साम्प्रतं वेगेन कम्पमानम्। सम्मुखे दृष्टं यद्बालस्य कनीयसो भ्रातु: कार्यं पर्वत इव विशालतमम्। विमल: स्वहृदयमामन्त्रयत – 'अपि त्वमेतत्कर्तव्यसाधने सम्भवे: सफलम्?' किन्तु न किञ्चिदुत्तरमलभ्यत।

विमलमनेन प्रकारेण वाचंयममालोक्य भानुरुत्तेजितोऽभवत्। अवादीत्स:– ''आर्य विमल! तर्हि किमहं निराश: सन्नित: प्रस्थास्ये। अस्तु इदमपि मे सम्यगेव। यद्येवमेवाऽनुतापानलेन दह्यमानोऽहं प्राणान् विसृजेयं तर्हि मे पूर्णो विश्वासो यज्जन्मान्तरेऽहमात्मन: कर्तव्यमवश्यं पूरयितुं प्रभवेयम्। पूजनीयार्य! नायं भारो भवता स्वीकार्य:। इ...दा......नीं....दे.......हि.......मे........अनुम....तिम्।''

विमलोऽल्पवयस्कस्य भ्रातु:, न हि नहि कर्तव्यायावतीर्णस्य कस्यचिद्योगिनोऽपूर्वमिमं प्रभावं महोत्साहं चावलोक्य स्तब्धोऽभूत्। न मुखात्तस्य किञ्चिदपि वाक्यमुदगच्छत्। किन्तु परक्षण एव महोत्साहस्य सङ्गत्या प्रारम्भिकमुत्साहमलभत, धैर्यं चाऽऽवालम्बत। हन्त पशोरिव निरुद्देश्यं मे जीवनं धिक्। येन हि महोत्साहपूरणीयं तत्कर्तव्यं न श्रुतं कर्णाभ्यामपि, दूरे कथा तत्सम्पादनस्य। अवादीद्विमल:– 'भ्रातर्भानो! अहं ते कार्यं प्रतिजाने।'

एतावत्समयान्तराले अभूद्भानोर्भावान्तरम्। स हि विच्छिन्नविच्छिन्नैरक्षरैरवदत्– ''नैव आर्य......प्रणामो........ मे/ ........ मम....कार्यं ........ म .........या..... सह........ भ्रातृजाये....... आर्य......मम.........अप .......रा...धा, प्र...ण'' (एका हिक्का) अलम्।

सरला चीत्कारं कृत्वा भूमावलोठत्। चीत्कारं श्रुत्वैव डाक्टरमहोदयो द्वारादेव यथागतं प्रत्यावर्तत। विमलस्य न किञ्चित्प्रत्यभासत। आसीत्सर्वत्रान्धकार:।

भानुर्नास्मिन् संसारे। व्यतीतस्तस्य भूयान्काल:। किन्तु सृष्टे: सर्वाणि कार्याण्यविकलं पूर्ववत्प्रचलन्ति। सूर्य उदेति, अस्तं गच्छति। दिनं भवति, रजनी व्यत्येति। शीतलीकृतवप्रा

शिप्रा कलकलं वहन्ती तथैवाऽविरामं वहति। उज्जयिनीवासिनः सर्वेऽपि सानन्दमनुरक्ताः संसारयात्रायाम्। भगवतो महाकालेश्वरस्य मन्दिरं सायं प्रातस्तथैव 'हरीओम् हर' ध्वनिभिर्भवति मुखरितम्। सायं आर.एम.शाखाया रेलशकटिर्नियतमुपतिष्ठति। भानुं विना न किञ्चित्कार्यमवरुद्धं दृश्यते।

सायमासन्नम्। अवसानवेलायामुपशमशाली भगवानंशुमाली प्रसादयति रक्तैः करैः पश्चिमां दिशम्। शोभया सर्वनगरीणामुज्जयिनी सेयमुज्जयिनी सौधशिखरेष्वावहति रक्तां रुचम्। नागरिकाः शिप्रातटेष्वारामनिकटे सानन्दमासेवन्ते सान्ध्यं समीरणम्। विमलः साम्प्रतं पौरोद्याने शीतलाऽऽसन्दिकायामासीनः समवलोकयति गगनम्। व्यचिन्तयत्सः- 'आकाशमिदमनन्तम्। अहमप्यनन्तस्य गर्भेऽवस्थितः। भानोरात्माऽप्यतन्तस्य गर्भमधिवसति। तदा किमिति नाहं भानुं पश्यामि? आम् अवश्यं द्रक्ष्यामि। किन्तु कदा? अनन्तस्य गर्भे सन्त्यनन्तानि वस्तूनि। भानुरप्यनन्तवस्तूनामेकम्, अहमपि चैकम्। अनन्तेषु वस्तुषु कथमहमेकमन्वेष्टुं प्रभवेयम्? तर्हि किं करोमि? एतदर्थे किमहमप्यनन्ते विलीनः स्याम्? तदा ह्यहं भानुश्च द्वावप्येकतां प्राप्स्यावः, न भविष्यति तदन्वेषणस्याऽपेक्षा।

एतस्मिन्नेव काले समभूत्तस्य समाधिभङ्गः। निरीक्षितं यन्निकट एव चूर्णविक्रेता सञ्चरतां चित्तावर्जनाय चरुति चारुचाटूनि चण्डस्वरेण। विमलस्तत उत्थाय गृहमागात्। शिरोवेदनाव्यपदेशेन भोजनमकृत्वैव शयनीयमाश्रयत्। सरला समीपेऽवस्थाय शनैः शनैः परामृशत्करेण शिरः। एवमवस्थायामेवाऽवातरद्विमलस्य नेत्रयोर्निद्रा। किन्तु विचारतरङ्गैर्नाभूद्विमुक्तस्तदापि। व्यलोकयदसौ स्वप्ने- यथा स हि गहने वने सञ्चरति। शनैः शनैरावृतमभूद् गगनं घनघटाभिः। प्रावहद् झञ्झा। निबिडेनान्धकारेणाच्छाद्यन्त दशदिशः। अवर्षच्च मुशलधारावर्षं पर्जन्यः। अन्धकारेण न हस्तो हस्तमलोकयत्। एतावतैव प्रास्फुरन्महता वेगेन विद्युत्। दृष्टं तेन तत्प्रकाशे भानुर्मुशलधारावर्षायामस्यां सानन्दमाऽक्रीडति बालचापलेन। दृष्टं च तेन यत्सः प्रकाममापिबति शीतलं पयः। निद्रायामेवाऽवदद्विमलः- 'भानो! किमिदम्? वत्स! मा क्रीड शीतले जले। रुग्णो भविष्यसि'।

भानुः प्रहस्याऽवदत्- 'हन्त नृशंस विमल! दीनं याचितोऽपि मम भवता तु न नाम निर्वापिता तृषा'।

विमलः प्रकाममनुतप्तं हृदयं कथञ्चिदवस्थाप्य प्राचलदग्रे। उत्कण्ठया सहसैवाऽयमशब्दायत- 'भानो! क्वासि?'। किन्तु झञ्झावातविक्षुब्धेऽस्मिन्नरण्ये केवलं प्रतिध्वनिरेवाऽयमश्रूयत- 'भानो त्वं क्वासि'।

इदानीं विमलस्तदरण्यमुल्लङ्घयितुमचेष्टत। शनैःशनैर्व्यलीयत घनघटा। भगवान् शर्वरीनाथः पुनरात्मनो मनोरमं मुखमदर्शयत्। इदानीं दृष्टं विमलेन यन् मन्ये निर्जनेऽस्मिन्वने शैलमधस्ताद् द्वयोर्नद्योः सङ्गमः। तत्र चैका सुभगवाटिका। वाटिकायामस्यामेकं कुटीरम्। वाटिकामध्ये कदलीकुञ्जेषु क्रीडन्ती शुभ्रस्फटिकशिलास्वापतन्ती, विटपि विटपानाकम्पयन्ती स्रवन्ती चैका द्वितीयस्यां नद्यामात्मानमर्पयन्ती भवति दृशोर्गोचरे। शान्तिकुटीरेऽस्मिन्नेको

निषीदति युवा संन्यासी। विमलो वाटिकां प्रवेष्टुमैच्छत्। तस्य तमिमं भावं विज्ञायैव सन्यासी प्रावदत् – 'ज्येष्ठार्य विमल! नैतत्स्थलं कर्तव्यपराङ्मुखानां कृते। भवता मत्कर्तव्यं कर्णाभ्यामपि नाकर्णितं हन्त!'।

विमलश्चकितो भूत्वा उच्चैरवदत् – 'अये भानुः।।'।

विमलस्य निद्रा व्यगलत्। स हि शिरोभागे निषीदन्तीं केवलमलोकयत्सरलाम्। उदतिष्ठदयं सहसैव शयनीयं परित्यज्य। सरला प्रणयमधुरेणाऽपृच्छत्स्वरेण– 'किमस्ति?'।

विमलः कम्पितकण्ठमवदत् – ''वक्षसि व्रणोऽस्ति''।

## स्वावलम्बनम्

कश्चिद्व्यापारी निजपुत्राय किञ्चिद्धनं दत्वा व्यापाराय वस्तुसङ्ग्रहं कर्तुं विदेशं विसर्जयामास। गमनसमये स निजसुतमाश्वासयाञ्चकार– 'वत्स! ईश्वरोपरि कार्यस्त्वया दृढविश्वासः। स एव सर्वेभ्यः फलदाताऽस्ति। निजशक्तेरनुसारमुद्यमोऽस्माकं कर्तव्यम्'।

पूर्वकाले वर्तमानकालवत् वाष्पयान[१] प्रभृतीनि नासन् वाहनानि। न च समाचारप्रेषणस्यैव तारयन्त्रादि[२] वस्तुविधाऽभूत्। पादाभ्यामेव मार्गोल्लङ्घनं पुरा कर्तव्यमभूत्। अतएव स वणिक्पुत्रः पादचर एव गन्तव्यदेशं प्रति प्रातिष्ठत। एकदा मार्गे गच्छत एव तस्य रात्रिरुपतस्थौ। समीपे नाऽदृश्यत कश्चिद्ग्रामोऽपि। अतएव घोरे वन एव स्थातुं स विवशोऽभवत्। भयात्स निशि निद्रामपि न लेभे। सुरक्षितं वृक्षकोटरमधितिष्ठता तेन दृष्टं यदेकः शृगालः समीप एव पतितोऽस्ति। रोगात्स तावदशक्तो यद् गन्तुमपि न सामर्थ्यम्। तं दृष्ट्वा तेन व्यापारितनयेन विचारितम्– 'अहो अयमत्यन्तं रुग्णोऽस्ति। नायं पदात्पदमपि गन्तुं समर्थः। हन्त कथमयं वराको निजोदरं पूरयेत्? एवमेव गच्छति काले काऽस्य जीवनस्याशा।'

एवं विचारमग्न एव स मार्गश्रमान्निद्रामुपगतवान्। किन्तु किञ्चित्कालानन्तरमेव घोरात्सिंहगर्जनात्स जागरितोऽभवत्। भयाकुलः स कोटरे निभृतं व्यलीयत। एवस्मिन्नन्तराले स सिंहः क्वञ्चिद्वन्यपशुं हत्वा तन्मांसं बुभुजे। अवशिष्टमंशं तत्रैव त्यक्त्वा यथागतं वनान्तरमगच्छत्। सिंहे दूरं गते स वणिग्बालकः कोटरद्वारादपश्यत्– यस्मिन्स्थाने स शृगालः पतितोऽभूत्तत्समीप एव सिंहेन स वन्यपशुर्व्यापादितः। सिंहगमनान्तरं मांसगन्धं प्राप्य रुग्णः स जम्बुकः शनैः शनैस्तत्रागत्य तन्मांसेन निजोदरं पूरयामास, तत्रैव च सुखेन सुष्वाप।

व्यापारिबालकस्तदेतद् दृष्ट्वा सुविस्मितोऽभवत्। स मनसि व्यचिन्तयत्– 'अहो ईश्वरः प्रत्येकदशायामुदरपूरणाय यदा भोजनं ददाति तदा किमिति परिश्रमेणाऽस्माभिरात्मा पीडयितव्यः।' विचार्यैव तदिदं स परावृते गृहान्। निजभवनमुपेत्य सर्वमिमं वृत्तान्तं निजपित्रे निवेदयामास, प्रोवाच च– 'सर्वदैव यदा भगवानस्माकमुदरपूर्तिं करोति तदा विफलेनास्माकमुद्यमेन किम्? विदेशेषु वस्तुक्रयणस्य विक्रयणस्य च परिश्रमं किमिति मुधा कुर्याम?'

एतदाकर्ण्य पिता तूष्णीमतिष्ठत्, किन्तु क्षणानन्तरमेव पुत्रमशिक्षयत्– 'वत्स! यत्त्वया प्रोक्तं तदेतत्सर्वं सत्यम्। किन्तु जाने त्वं बुद्धिमानसि। वद त्वमेव, किं त्वं रुग्णशृगालवत्

निजजीवनमन्येषामुच्छिष्टेन निर्वाहयितुं वाञ्छसि, आहोस्वित्सिंहवत्? अहं तु वाञ्छामि यत्त्वं सिंहवत् स्वावलम्बनो भवेः। अतएवायमुपदेशो मम यत्त्वं शार्दूलवत्स्वयमेव निजभोजनमुपार्जयेः, अन्येभ्यश्च तदवशेषं प्रयच्छ। येन तव सर्वत्र प्रभावो व्याप्नुयात्'।

पितुरिमां शिक्षामाकर्ण्य विचारशीलः स व्यवसायिबालको मनसि भृशं ललज्जे। नैतदनन्तरं स विचारमेवम्विधं चकार। व्यवसायव्यापृतः स महद्धनं प्रभूतं च यशः प्रापत्।

**सिंहवत्स्वयमुद्योगी परेषामाश्रयो भवेत्।**
**परोच्छिष्टोपजीवी तु गर्ह्यो रुग्णशृगालवत्।।**

## स्वामिभक्तः

### ( १ )

ज्येष्ठमासस्य प्रखरो मध्याह्नः। सूर्यस्य किरणा वह्निमिव वर्षन्ति। जननिवासाद् बहिः, कान्तारे[१] वह्निं वर्षता तप्तवायुना सर्वथा निरुद्धो लोकानां सञ्चारः। एतस्मिन्नेव घोरतरे मध्याह्ने जीर्णमश्वमारूढः कृषीवल एकः शून्यं वनमुल्लङ्घयन्नवलोक्यते। अयमापादमस्तकं स्वेदैः स्नातः। तप्तबालुकया दग्धो घोटकोऽपि दीनदीनं सञ्चरति। सर्वतः कष्टमिदम्, यदस्य पालितः कुक्कुरोऽपि एतस्यानुगमने साम्प्रतमसमर्थः। सशब्दं निःश्वसतोऽस्य जिह्वातो जलबिन्दवो निपतन्ति।

शुनो[२]ऽश्वस्य च तामिमां दशामवलोक्य नैकपदमपि गन्तुमशकत्कृषीवलः। मार्गस्य समीप एव वृक्षगुल्मे[३] विलश्रमं कर्तुं विवशोऽभवत्। घोटकं वृक्षमूले निबध्य, तत्पल्याणं[४] च भूतले प्रस्तार्य, तदुपरि स विशश्राम। तत्समीप एव विह्वलः कुक्कुरोऽपि न्यषीदत्।

### ( २ )

एष पथिकः काञ्चनपुरस्य प्रतिष्ठितः पट्टकिलः[५]। वंशपरम्परातोऽस्य ग्रामे मुख्यता समागच्छति। अयमासीत्पूर्वं धनिकः, किन्तु न साम्प्रतं तादृशी स्थितिः। अतर्कितं[६] प्रवृत्तया धान्यस्य समर्घतया[७] बाढमस्य क्षतिरभूत्। भूमिकर[८]मप्यसौ सम्प्रति शोधयितुं नाऽलम्। ग्रामाधिकारी च भूमिकरमप्राप्य एतस्य कृषिमेव प्रत्यबध्नात्[९]। अतएव वराको ग्रामान्तरादृणं कृत्वा प्रभूतं च धनमादाय भूमिरक्षानिमित्तमस्मिन् घोरे मध्याह्न एव मार्गमुल्लङ्घयति।

भूमेरपगमनचिन्तया बह्वयो रात्रयोऽप्राप्तनिद्रस्यास्य व्यतिगताः। ग्रामान्तरं गतस्यापि नाऽभून्निद्राऽवकाशः। अतएव दूरतरमार्गोल्लङ्घने परिश्रान्तः सोऽयं साम्प्रतं निद्रां लब्धवान्। यदा ह्यस्य प्रबोधोऽभवत्तदा दृष्टमनेन यत्स्वल्पमेवाऽवशिष्टं दिनस्य। रजनिभयाद्भीतोऽसौ तत्कालमेव घोटकोपरि पल्याणमासज्ज्य द्रुततरमारूढोऽसौ ग्राममार्गमनुससार।

१. जङ्गल।
२. कुक्कुरस्य।
३. 'झुरमुट'।
४. घोड़े की पीठ का बिछावन।
५. 'पटैल'।
६. अचानक।
७. 'सस्तापन'।
८. जमीन का लगान।
९. प्रतिबन्धनम् अकरोत्।

किञ्चिद्दूरं गत्वा दृष्टमेतेन यत् कुक्कुरो न मामनुसरतीति। मार्गे स्थितोऽसौ श्वानमाह्वातुं सीत्कारध्वनिमकरोत्, नामग्राहं[१] चाऽशब्दायत[२], परं नागच्छत्तस्य कुक्कुरः। इदानीं घोटकादवतीर्य अत्युच्चस्वरेण तन्नाम गृहीत्वाऽऽह्वयदसौ। किञ्चित्कालानन्तरं दृष्टमनेन यत् कुक्कुरः समागतः परं पुनः प्रतिनिवर्तते। तमपि च प्रतिनिवर्तितुमिङ्गितं[३] कुरुते। कुक्कुरस्य सङ्केतं बोद्धुमप्रभवन्नयं सहाऽऽगमनाय तमाज्ञाप्य सत्वरं चलितुमारेभे।

( ३ )

आसीत्सन्ध्या सन्निहिता। शून्येऽस्मिन्मार्गे लुण्टाकानां चाऽभूत्प्रचुरं भयम्। अत एवान्धकारं दृष्ट्वा भयभीतोऽसौ शीघ्रमेव ग्राममवाप्तुं मनश्चक्रे। किन्तु कुक्कुरः प्रतिनिवृत्त्य वारं वारं तत्रैव गन्तुमैच्छद् यत्र तेन मध्याह्नो व्यतिगमितोऽभूत्। परं तत्त्वमज्ञात्वा क्रोधाविष्टोऽसौ लगुडेन तं सवेगमाजघान। हन्त! दण्डाघातः कुक्कुरस्य शिरसि पपात। अतएव रुधिरं क्षरन्नसौ तत्रैव निपपात।

शिरसि पतितं दण्डमवलोक्य भृशं पश्चात्तापोऽभूत्कृषीवलस्य। परं किं भवेत्सम्प्रति? क्रोधान्धो यन्न कुर्यात्तदेव न्यूनम्। किन्तु कीदृशस्य कुक्कुरस्योपरि तेन दण्डः प्रक्षिप्त इति न साम्प्रतमसौ वराको जानाति। अस्तु, अनुतापतप्तं हृदयमावहन्नयं त्वरितमेव ग्रामाभिमुखो बभूव।

घोटकमुत्प्लावयन्नसौ[४] शीघ्रमेव निजग्राममाजगाम। आसीत्सर्वतोऽप्यन्धकारसाम्राज्यं सम्प्रति। गृहस्वामिनश्चिन्तायां सर्वेऽपि गृहजना अभूवन्नुत्कण्ठिताः। अतएव गृहागतमेनं सर्वेऽपि साऽऽमोदं पर्यवारयन्[५]।

पल्याणस्थं वस्तुजातं यावदसौ अवतारयति, तावदेवाऽस्य, शरीरं कम्पमानमभूत्। नेत्रयोश्चान्धकारः प्रासरत्। दृष्टमनेन– ऋणं कृत्वा यद्धनमसावानीतवान्, तस्य ग्रन्थिर्नास्ति पल्याणे! हा हन्तेति कृत्वा विषण्णोऽसौ भूमावपतत्। गृहजनाश्चकिता भूत्वा कारणमस्य पर्यपृच्छन्। अश्रुगद्गदया गिरा सर्वमयं संक्षेपेणाऽवदत्। बहुधा विचारयन्नप्यसौ न निश्चेतुमपारयद् यद्धनग्रन्थिः कुत्र गता? नासौ मार्गेऽपतत्, नापि वा केनचिदपहृता।

वृद्धानां मन्त्रणयाऽस्यापि शङ्काऽभवत् यत् सा ग्रन्थिः कदाचित्तत्रैव विस्मृता यत्र मध्याह्नोऽतिवाहितः। यदा च कुक्कुरस्य पुनः पुनः परावर्तनवृत्तं तेन कथितं तदा तु सर्वैरेव निश्चितं यद् ग्रन्थिर्विश्रमस्थल एव पतिताऽस्ति। अतएव तु कुक्कुरस्तदानयनार्थं मुर्हुमुहुः

सङ्केतमकरोत्।

१. नाम गृहीत्वा (अर्थात् नामग्रहणपूर्वकम्)।

२. शब्दं करोति शब्दायते। तस्य लङि (अनद्यतनभूते) अशब्दायत, 'नाम लेकर आवाज दी'।

३. इशारा।

४. दौड़ाता हुआ। उत् + प्लु, प्रेरणार्थक (शतृ)।

५. परि + वृ (प्रेरणार्थक)। वर्त. परिवारयति। अनद्य.बहु. पर्यवारयन्।

## (४)

सुदृढान् सहायकान् सहाऽऽदाय काचदीपिका[१]सनाथोऽसौ तत्क्षणमेव तदानयनार्थं परावर्तत। समस्तेऽपि विपिने घोरस्यान्धकारस्य राज्यमासीत्। नास्मिन्समये दृढहृदयोऽपि पुरुषः स्थानेऽस्मिन्गन्तुमग्रेसरो भवेत्, किन्तु निजप्रयोजनव्यग्रा एते कस्मिन्नपि भये दृष्टिमनिक्षिप्य तस्यैव स्थानस्य समीपगता अभवन् यत्र कृषीबलेन मध्याह्नोऽतिगमितोऽभवत्।

काचदीपिकाभाजनमग्रे कृत्वा यथैव तैस्तदिदं स्थानमवलोकितं तथैव कश्चन पशुः शयानस्तैरालोकितः। सहसा तेषां भयमभवत्, किन्तु सावधानदृष्ट्या यदा स्वामिनाऽवलोकितं तदा दृष्टं यत्तस्यैव स्वामिभक्तः कुक्कुरस्तस्या रूप्यकग्रन्थेरुपरि द्वावपि चरणौ मस्तकं च निधाय भूमौ पतितोऽस्ति!

यदाऽसौ कृषीवलेन सबलं दण्डेनाऽऽहतस्तदा वराकस्याऽस्य शिरो विदीर्णमभवत्, मूर्च्छा च समभवत्। कियतापि कालेन तस्य किञ्चिन्मात्रमेव संज्ञा, क्षीणतमा शक्तिश्च समभवत्। यथा कथञ्चित् शनैः शनैश्चलन्नसौ स्वामिनो धनरक्षायै अस्मिन्नेव स्थाने समागमत्। मस्तकाद्रुधिरं प्रवहदासीत्, किन्तु निर्गच्छतः प्राणान् यथाकथञ्चिन्निरुध्य ग्रन्थेरुपरि विसंज्ञोऽपतत्।

स्वामिना तन्नाम गृहीत्वा यथैवोच्चस्वरेणाऽऽहूतं तथैवाऽसौ अतिकष्टेन नेत्रे उन्मील्य विलोकयामास। स्वामिभक्तिपूर्णयोस्तन्नेत्रयोर्मध्ये तस्मिन्समये एकः सफलतागर्व इवाऽखेलत्। मन्ये, स निःशब्दं कथयति स्म- 'हे स्वामिन्! प्राणानपि बलान्निरुध्य यद्धनं मया रक्षितं तद् गृहाण सम्प्रति, देहि च मह्यं परलोकप्रस्थानस्याऽनुमतिम्'।

शोककारुण्यवत्सल्याऽऽकुलः कृषीवलो हा हेति कृत्वा तमेनं हृदये जग्राह। अतिकष्टलब्धाया धनग्रन्थेरुपर्यपि तस्य दृष्टिर्नासीत्तस्मिन्समये। किन्तु स्वामिभक्तस्याऽस्य नयने एकवारमुन्मील्य चिरकालार्थं निमीलिते अभूताम्।

१. लालटैन।

# दीक्षा

## ( १ )

''पुरुषो वा स्यान्नारी वा भवेत् आत्मनः परसात्करणे तिरस्करणे वा न तस्य स्वातन्त्र्यं नूनम्। मानवो हि परमेश्वरस्य प्रमुखः सर्गः, विश्वस्मिन्ननुपमा शक्तिः। तस्य स्वातन्त्र्यचूर्णने न मनुष्यस्याऽधिकारः। शिक्षा ह्येषा मनुष्यस्यात्मानमुचितानुचितविवेकिनं शक्तिशालिनं च निर्माति। यदि शिक्षितोऽपि निजस्यात्मनः सत्वानि नावधारयति तर्हि किं कृतं शिक्षया? अत एव शिक्षितस्त्रीसमाजे निजाधिकाररक्षायाः प्रश्नः साम्प्रतं प्रवृत्तोऽस्ति, यमादायाऽस्माकं समाजे नानारूपेणटीकाटिप्पण्योऽपि प्रचरन्ति। किन्त्वात्मनो हितं स्वयमिदं विचारणीयं स्त्रीजातेरेव।'' सगौरवमिदमगादीदुच्चशिक्षिता बाल्यसखी सरोजिनी।

भालबिन्दुं शिरःसिन्दूरं च दर्पणेन यथास्थानमारचय्य देवपूजासंविधानमायोजयन्ती अन्नपूर्णा सस्मितविनयं प्रत्यवादीत्– ''सखि शिक्षितानां वार्तां वेत्ति किल शिक्षित एव। सहपांसुक्रीडासख्यपि न चाहं तथा। आजन्मनो यादृशे समाजे परिपालितास्मि तादृशैरेव विचारैर्मे परिचयः। कथमहमेतावद्बोद्धुंशक्नुयाम्?''

सरोजिनी – भगिनि! मैवं मां प्रतारयस्व। अन्यः कदाचिन्न जानीयात्परमहं शैशवादेव ते विचारगम्भीरतां वेद्मि। पुस्तकरटनाभावेऽपि भवन्ति केचिन्निसर्गादेव परिष्कृतात्मानः, इत्यहं जाने तावत्। तत एव तवात्मनो महत्त्वमालोच्यैव चर्चामिमां प्रचालितवत्यस्मि। अस्तु साम्प्रतमहं याचे गमनानुमतिम्।

अन्तर्गृहादश्रूयत– ''वधु! अपि मङ्गलकलशः सज्जीकृतः?'' ''आम् मातः यथास्थानं स्थापितोऽसौ मया।''

एकमासस्यावकाशमादाय पद्मनाभो निजगृहमागमत्। किन्त्वपरिज्ञातमेवाव-काशदिनानीमानि व्यत्यगमन्। अवकाशसमयश्चिरादेवमेव व्यतिगच्छन्दृष्टः। अद्य सायं पञ्चवादने पद्मनाभः स्वकार्यस्थले कुर्यात्प्रस्थानम्। अत एव स्नेहमयी जननी पुत्रस्य शुभकामनया माङ्गलिकानुष्ठानेषु व्यापृता। सा ह्यपृच्छत्पुत्रवधूमन्नपूर्णाम्– 'अपि जलकलशं स्थापितवत्यसि?'

वारिपूर्णस्यैकस्य घटस्य मुखे एकामाम्रशाखां द्वे बिल्वपत्रे कुसुमकुङ्कुमं चाभिचर्च्य वधूः प्रत्यवदत्– 'आम् मातः स्थापितवत्यस्मि।'

पुत्रः पद्मनाभः पूर्णकुम्भस्य पादमूले प्रणामं कृत्वा मातुश्चरणधूलिमनयन्निजशिरसि। ततः स्नेहशीलायाः प्रेममयमूर्तेः पत्न्याः सकाशाद् गमनानुमतिमादातुमुपातिष्ठत। एकः पञ्चवार्षिकः पुत्रः द्विवार्षिकी चैका कन्या जनन्या हस्तमवलम्ब्य पितुमुखमवलोकयन्तावतिष्ठताम्। नासीत्कस्यापि मुखे वार्ता, सर्वे नीरवाः। पद्मनाभस्य चक्षुषी वारिपूर्णे अभूताम्। बालकबालिकयोः कपोलमाचुम्ब्य, पद्मनाभो वाष्पगद्गदकण्ठः पत्नीमाभाषत–'प्रिये! मे प्राणः.....'

अन्नपूर्णा नाशक्नोत्प्रतिवदितुम्। स्वामिनो मुखाभिमुखमलोकयत्केवलम्। पद्मनाभोऽवदत्– 'पुनरहं शीघ्रमेव गृहमायास्यामि। त्वां विरहय्य कियत्कालमहंस्थातुं शक्नुयाम्' चक्षुषी प्रमार्जयन्पद्मनाभः प्रकोष्ठात्प्रस्थानमकरोत्।

अमावस्याया निबिडतममन्धकारराशिं हृदये आवाह्य विषादशीर्णाऽन्नपूर्णा तस्मिन्नेव स्थाने न्यषीदत्। व्यचारयत्– 'सर्वदैव तु विदेशं प्रत्येवमेवगच्छन्ति। तर्हि किमित्यद्य मेऽन्तरात्माऽभूतपूर्वभावेन नीरवं रोदिति? स्वयमुद्भूतयाऽमङ्गलाशङ्कया न जाने किमिति मे प्राणा वेपन्ते। दयामय भगवन् किमिदम्?'

## ( २ )

गच्छत्सु कतिचिद्दिनेषु समलभ्यत संवादो यत्पद्मनाभो रोगशय्यामधिशयितः। गृहे प्रावर्तत हाहाकारः। पद्मनाभस्य जननी वत्सतरवियुक्ता गौरिव यथाकथञ्चिद् गृहमध्यतिष्ठत्। अवशेषे स्नुषया सह परामर्शं विधाय पद्मनाभस्य कार्यस्थाने यात्रां विधातुमुद्युङ्क्त, किन्तु नाशक्नोद्गन्तुम्। शीघ्रमेव संवादोऽलभ्यत– 'पद्मनाभो ग्रन्थिज्वरेणाक्रान्तः प्राणानत्याक्षीत्'। जननी कात्यायनी धूलौ निपत्योन्मादिनीवाऽकार्षीच्चीत्कारान्। पतिप्राणाऽन्नपूर्णा विसंज्ञा भूत्वा भूपृष्ठे व्यलोठत्। हा हन्त! अनयैवाशङ्कया मन्ये पतिव्रताया अस्याः प्राणाः पूर्वत एवाऽक्रन्दन्।

## ( ३ )

दिनत्रयोत्तरमन्नपूर्णाया ज्ञानसञ्चारोऽभूत्। तदा हि सा शनैर्नयने समुन्मील्य परितोऽपश्यत्। दृष्टं तया पुत्रकन्ये समीपावस्थिते सदैन्यं क्रन्दतः। गृहेऽनेकाः स्त्रियः समवेताः, सकलानामेव मुखं विषादाच्छन्नम्। विस्मितनयनमन्नपूर्णा सर्वासां मुखाभिमुखमवालोकयत्, किंतु परस्तादेव सा कथा, सर्वनाशस्य स संवादो विद्युद्वेगेन तस्या हृद्यजागरीत्। अन्नपूर्णा पुनश्चैतन्यं हारयित्वा भूमावलुठत्।

प्रतिवेशिनीनां यत्नैरन्नपूर्णाऽचिरमेव चेतनामलभत। तदा श्वश्रूः कात्यायनी वध्वा मुखे जलमासिच्याऽवदत्– 'वधु! उत्तिष्ठ, व्यतीतानि त्रीणि दिनानि, न त्वया जलमपि मुखे कृतम्। हा हन्त! मानुषस्य कपाले एवमपि वेदना विलिखिताः।'

कात्यायनी विवशमक्रन्दत्। अन्नपूर्णायाः पुत्रकन्ये मातुःशरीरं हस्तेन परामृशन्त्यौ गद्गदमवदताम्– 'मातरुत्तिष्ठ, भुङ्क्ष्व सम्प्रति'।

अन्नपूर्णोदतिष्ठत्, किन्तु न कोऽपि तां किमपि भोजयितुमपारयत्। पूर्णनिदाघस्य जलपूर्णो मेघखण्ड इव शनैः शनैरुत्थायाऽन्नपूर्णा जनशून्यमेकं गृहमाविश्य अन्तर्भागात्पिदधौ कपाटाभ्याम्। ततो भूमितले लुठन्ती, बाष्पधाराभिर्धरणिमासिचन्ती दीनतरमवादीत्– ''स्वामिन्, प्रभो! दैवत! व्यतीतान्यद्य त्रीणि दिनानि। त्यक्तवानसि दासीमिमाम्। यदि गतोऽसि, सुखं गच्छ, दास्यपि सेयं त्वामनुगच्छेत् किन्तु यस्मिन् लोके त्वं गतोऽसि, किमहं तं लोकं प्राप्तुं शक्नुयाम्? तं लोकमुपगन्तुं किमहमधिकारिणी? मा मैवम्। नाहमधुना देहं परित्यजेयम्। पूर्वं साधनाबलेन त्वद्दर्शनं लब्धुं योग्यतां सम्पादयेयम्, ततः पाञ्चभौतिकमिदं भाण्डं भुङ्क्त्वा भवन्तमनुसरेयम्।''

अन्नपूर्णा उदतिष्ठत्। चक्षुषी अपरिमृज्यैव बद्धाञ्जलिरगदत्– 'त्वं मे इष्टदेवः, त्वमेव मे धर्मः। अद्यारभ्य यावन्ति दिनान्ययं देहस्तिष्ठेत् तावदिमामेव योगसाधनामनुतिष्ठेयम्। अन्तरिक्षे क्वावस्थितोऽसि प्रभो! देहि मह्यमाशीर्वादं येन दास्याः साधना सेयं सर्वथा सिध्येत्।'

अन्नपूर्णा नेत्रे प्रमृज्य साम्प्रतं गृहादभ्युत्थिताऽभूत्।

## (४)

दिनानि यथा व्यतियन्ति तथैव व्यत्यगुः। भानुदेवः किरणान्प्रसार्य यथैव भूमिमुद्भासयति स्म तथैव साम्प्रतमप्युद्भासयति। निशीथे सुनीलनभः समाश्रित्य समोदं स्मयमानः शशधरो यथापूर्वं जगति माधुर्यं विकिरति। गन्धवाहस्तथैव लीलाखेलया प्रवहन्विचरति चतुर्दिक्। मानवस्तथैव हसन्विलसन्विहरति सर्वतः। न कोऽपि कञ्चित्प्रतीक्षते। एकजनस्य सर्वनाशेऽपि सृष्टेर्न कश्चिद्व्याघातः।

संसारे नास्ति पद्मनाभो तथाप्येको वत्सरो व्यतिययौ। समयो नातिष्ठत्प्रतीक्षायाम्। सृष्टेर्नाऽघटत कश्चिद्व्याघातः। सर्वमपि तथैव प्राचलत्, केवलं शोकशीर्णाऽन्नपूर्णा सधवावेशं विमुच्य ब्रह्मचारिणीवेषमदधात्। अन्नपूर्णायां नाधुना यौवनजन्यं चाञ्चल्यम्। चाञ्चल्यमिदं पराहत्य प्रौढोचितं गाम्भीर्यमिदानीं खेलति, यथा प्रावृड्जनितस्य प्रचण्डजलताण्डवस्योत्तरं गभीरा प्रसन्नता भगवतीं प्रकृतिमधिश्रयति। अन्नपूर्णा तामेव प्रसन्नतां वक्षसि वहन्ती विचरति संसारयात्रायाम्। मन्ये, नासीत्तस्याः पूर्वमेतावद्रूपम्। निराभरणाश्वेतवसना स्वामिध्याननिषण्णाऽन्नपूर्णा प्रतिदिनमुद्भासितेव भवति सौन्दर्येण। हन्त को वा वदेदलङ्कारैः परिवर्द्धते रूपमिति।

अन्नपूर्णा श्वश्र्वा आदेशेन सांसारिनककार्येषु नृत्यति पुत्तलिकेव, किन्तु निजस्य कर्तव्यं न विस्मरति मुहूर्तायापि। अरुणोदयात्पूर्वमेव उद्यानोद्यानेषु परिभ्रम्य चिनोति सा पुष्पाणि। ततश्चन्दनमुद्घृष्य स्वामिनोऽर्चनाय सा तिष्ठति। यस्मिन्दिने सा बहूनि कुसुमान्यलभत तस्मिन् पुष्पहारमेकमागुम्फ्य परिधापयति स्म सा स्वामिनम्। अवशिष्टमेकमेकमपि पुष्पमाचित्य

स्वामिनश्चरणोद्देशे सा समार्पिपत्। हन्त न सा समार्पयदेकमपि जगदीश्वराय।

कदाचित्कदाचिद्दिवा द्वितीयप्रहरे पुत्रकन्यादीनामाहारं परिसमाप्य द्वितीयवारमन्नपूर्णा पूजायामुपाविशत्। कदाचित्कदाचित्तस्याः पूजैव न समपद्यत्त, आन्तरिकाश्रुप्रवाहे सर्वमितस्ततः प्रावहत्। तस्मिन् समये मुद्रितात्तस्या नयनयुगलात्प्रवहन्ति वाष्पधारा यदा ह्यञ्जलिनिषण्णं पुष्पनिचयमसिचत्तस्मिन् समये यस्य सौन्दर्यस्य सृष्टिरभूत्तद्धि गगनस्य गात्रे, प्रकृतिदेव्या वक्षसि केवलं चित्रितमलक्ष्यत। परतोऽन्नपूर्णा यदा ह्यश्रुसिक्तं चन्दनचर्चितमिमं पुष्पाञ्जलिं मानसमन्दिरस्थापितस्य पतिदेवस्य चरणोद्देश्ये भक्तिप्लुतहृदयमर्पयति स्म तदा ह्यभवन्मनसि यदिदं चित्रं हिन्दुमहिलानां हृदयं व्यतिरिच्य न क्वचित्त्रिभुवनेऽपि चित्रितं शक्येत विलोकयितुम्।

( ५ )

'पुत्रि! कथमहमाहूतः ?'

'गुरुदेव महति सङ्कटे पतितास्मि'

'कीदृशं सङ्कटम् ?'

'पुत्रं हारितवत्याः सम्प्रति पुत्रवधूं नीत्वा मे सङ्कटम्।'

'पुत्रवधूं नीत्वा सङ्कटम् ? कीदृशं तत् ?'

कात्यायनी नेत्रयोर्जलमञ्चलेन परिमृज्य प्रत्यवदत्- 'वधूर्न खादति पिबति, न गृहं निरीक्षते न पुत्रकन्ये विलोकयति, न जाने कथमुन्मत्तेव सञ्जाता।'

गुरुदेवः सशब्दं नासिकायां नस्यमापूर्य, सगाम्भीर्याभिनयमददादुत्तरम्- 'वधूः पतिशोकाभिभूता सञ्जाता, सम्प्रति तद्व्यवस्था नः कर्तव्या'।

**कात्यायनी** - कां व्यवस्थां करिष्यसि ?

**गुरु** - मन्त्रदीक्षां दास्यामि।

**कात्यायनी** - यथा रोचते। कदा सा दीयेत ?

**गुरु** - श्व एव शुभदिनमस्ति। तद् यतस्व सामग्रीमायोजयितुम्।

गृहिणी दीक्षोपकरणानामायोजने व्यापृताऽभवत् किन्तु न किञ्चिदवादीदन्नपूर्णाम्। अन्नपूर्णाऽप्यसौ न किञ्चिदज्ञासीद्रहस्यम्।

( ६ )

परदिने प्रातरेवाऽन्नपूर्णा स्नानं समाप्य पुष्पचयने प्रावर्तत। अद्य बहूनि पुष्पाण्यलभ्यन्त। अन्नपूर्णा करण्डिकामापूर्य परावर्तत भवनम्। पूजागृहे निभृतमुपविश्य, एकाग्रचित्तप्रारभत मालां ग्रथितुम्। मालामुपग्रश्नन्त्यास्तस्याः कण्टकैः सूच्या च हस्तः क्षतविक्षतोऽभूत्, किन्तु नास्योपर्यन्नपूर्णाया दृक्पातः। सा परावृत्त्याऽप्येकवारं नाऽपश्यत् यत् शुभ्रकायाया मल्लिकाया अङ्गं रुधिररागेण कथमभूद्रञ्जितम्, पाटलवर्णाऽपि पाटला रक्तोपलिप्ता भूत्वा सन्ध्याभ्रकपिशा नूनमुषा इव कथं दृश्यते इत्यादि नासीदन्नपूर्णायाः कुतोऽपि मनोयोगः। स्वामिनश्चरणयुगलं

ध्यायन्ती सा मालाग्रथनं समापयत्।

ततश्चन्दनघर्षणम्। स्वामिचरणार्पितचित्ततया चन्दनं घर्षयन्त्यास्तस्याः सहसैव प्रतीतमभूद्यत् पाषाणफलके स्वामिनश्चरणम्, चन्दनकाष्ठे स्वामिनश्चरणम्, घर्षितचन्दने स्वामिनश्चरणम्। तस्याः समस्ताऽपि देहलता पुलककुलकैः कण्टकिताऽभवत्। चन्दनघर्षणाद्विरता सा पाषाणफलकाभिमुखं विलोकयन्ती निश्चलमतिष्ठत्। एतावत्परिश्रमेणावघृष्टश्चन्दनोऽसावशुष्यत्। सयत्नं ग्रथिता पुष्पमालाऽम्लायत्। सायासमवचितः कुसुमराशिरुपेक्षितोऽभवत्। अन्नपूर्णा निविष्टचित्तमनन्यकर्मा सती चन्दनघर्षणपाषाणफलकमनिमिषमालोकयन्ती निस्पन्दमतिष्ठत्।

क्रमात्पाषाणफलकोऽप्यन्तर्हितोऽभवत्। सम्प्रति केवलं चरणमवाशिष्यत। परिशेषे चरणोऽप्यदृश्योऽभूत्। सम्प्रति नाऽदृश्यत किञ्चित्। गगनं, पृथिवी, उद्द्योतः, अन्धकारः, पुष्पं चन्दनम्, स्वामिचरणं न किञ्चिदप्यवाशिष्यत। सर्वमपि कुत्रचिददृश्यभूत्।

अन्नपूर्णा भूम्यासनोपविष्टा, स्पन्दनरहिता ज्ञानशून्या। तस्याः शिरोऽञ्चलमवस्रस्य भूमावपतत्। विलुलितः सिक्तश्च तस्याः केशराशिर्भूमावलम्बत। तस्या देहः सुस्थिरः, नेत्रद्वयमर्द्धनिमिलितम्, श्वासो निरुद्ध।ः अधरोष्ठो वियुक्तः। अन्नपूर्णा निजदेहं विमुच्य मन्ये प्रगता कुत्रचित्।

अस्मिन्नेव समये कात्यायनी तद्गुरुदेवमहोदयश्चोभावपि तस्मिन्कक्ष्ये समुपातिष्ठताम्। सम्मुख एवादृश्यत ताभ्याम् अन्नपूर्णाया ज्ञानशून्यः समाधिस्थो देहः। पुष्पं चन्दनं माला च सर्वमेकतः पतितम्। पूजाया उपकरणानि समन्तादितस्ततो विकीर्णानि। मध्ये च निष्कम्पमवस्थिता ज्ञानविरहिताऽन्नपूर्णा। नासीन्नयनयोर्निमेषः, न नासिकायां विश्वासः, न च देहे स्पन्दनम्। गुरुदेवो नीरवं निःस्पन्दनयनं चाऽन्नपूर्णाभिमुखमवलोकयन्नतिष्ठत्कतिचित्क्षणन्। किन्तु गृहिणीनाऽपारयद्धैर्यं धारयितुम्। सा हि वध्वा अमङ्गलाऽऽशङ्कया सरभसमुपसृत्य

तामेनामवलम्बितुमुद्यताऽभवत्। गुरुमहोदय इङ्गितेन गृहिणीं निवार्य मृदुस्वरेऽवदत्– 'वधूः सम्प्रतिध्याननिमग्ना, नैतस्या विघ्नमाचरेः।'

वार्तायामस्यां नाभूद्विश्वासो गृहिण्याः। यतो हि हरिनाममालां करे वहन्ती साऽपि प्रायः प्रत्यहं जपं ध्यानं च करोत्येव। किन्त्वेवं मृतमनुष्यस्येव नाऽस्याः कदाचिदपि जाताऽवस्था। प्रत्युत ध्यानावस्थायां तस्या बुद्धिशक्तिः कार्यतत्परता च तावत्प्रबला भवति यथा सा तस्यामवस्थायां गृहस्यायव्ययादिकं स्थिरीकरोति, बिडालकुक्कुरादेर्निभृतपदशब्दमपि श्रृणोति, शासनादावपि तेषां सा प्रभवति। मृताऽवस्था दूरे, प्रत्युत सा तस्यामवस्थायामधिकां सजीवतां लभते। अत एव सर्वमिदं परिभाव्य गृहिणी गुरुदेवस्य कथायामभूत्सन्दिहाना, परं तस्य शासनलङ्घने नाभूदस्याः साहसम्। किञ्चिदप्यनुक्त्वा वध्वाः पार्श्वे वध्वा मुखं सोत्कण्ठमवलोकयन्ती निस्पन्दमवस्थिता।

गुरुदेवः शनैःशनैरुदतिष्ठत्, निःशब्दपदसञ्चारं च समागच्छद् गृहाद्बहिः। इङ्गितेन चाऽऽह्वयदसौ निजशिष्याम्। कात्यायनी शिष्या समागत्य सविषादमतिष्ठत्समीपे। इदानीं गुरुदेवो मृदुस्वरमवादीत्, 'भवत्याः पुत्रवध्वा दीक्षा निष्फला'।

गृहिणी सविस्मयमगादीत्–'किमेतद् गुरुदेव?'

**गुरु.**–सा हि पूर्वत एव दीक्षिता समपद्यत। गृहिणी वस्त्राञ्चलमालम्ब्य मन्दं स्मयमानाऽवदत्–'नैवं गुरुदेव! वध्वा मन्त्रदीक्षा नाद्यापि समभवत्। नैतद्विजानाति तत्र भवान्।'

**गुरु.** – विधेहि मे वचसि विश्वासम्। सुस्पष्टमहं वदामि यज्जाता दीक्षा वधूदेव्याः।

**कात्यायनी** – तर्हि को मन्त्रं दत्तवान्? भवानहं वा?

**गुरु.** – न केनचिद्दातव्योऽसावभूत्। स्वयमिवमङ्कगतमलभत।

कथायामस्यां नाभवत्कात्यायन्या विश्वासः, किन्तु गुरुदेवस्तत्वमबुध्यत। स ह्यवदत्– 'श्रृणु भद्रे! गुरोर्वचसि नाऽविश्वासमारचयन्ति सन्तः। अहमस्मिन् सप्ततिवर्षात्मके वयस्यपि यत्कर्तुं न प्राभव सेयं क्षुद्रबालिका स्वल्पकाल एव तत्कर्तुमपारयत्। दिव्यतेजोदीप्ताया बालिकाया अमुष्या नावश्यकता दीक्षायाः।'

**कात्यायनी** – तदा श्रूयतां गुरुदेव! अहं हि निभृतमवस्थिता वधूदेव्याः सर्वामपि पूजामर्चनां च दृष्टवत्यस्मि। न कदाचिदप्यहं भगवन्तमाह्वयन्तीमिमामपश्यम्। न तुलसीं, न देवं विठ्ठलं, न वा जगन्नाथमहं प्रणमन्तीमिमामद्राक्षम्। या ह्येवं मूढा, धर्महीना कथमहमेनां वदेयं यदियं दीक्षां लब्धवतीति।

**गुरु.** – तर्हि त्वमेव वद! तव वधूरियं निस्पन्दमवस्थिता किं करोति?

**कात्यायनी** – किमियं करोतीति कथमहं शक्नुयां बोद्धुम्? किन्त्वस्पष्टं यत्किञ्चिद् ब्रवीति। मध्ये मध्ये 'स्वामी स्वामी'त्यप्याह्वानं करोति किन्तु न विस्मृत्यापि कदाचित् 'हरे हरे' इत्यारटनमश्रूयत। तुलसीकाष्ठस्यैकां मालां भगवतश्चरणपूजां कृत्वा प्रादामहमस्यै, किन्तु न स्वप्नेऽपि सा तस्या हस्तगता दृष्टा।

**गुरु.** – वधूदेवी जपात्तपसश्चातीता। न्यासः, प्रणामः, प्रणवो, धर्मः, कर्म वा त्वत्कृते

मत्कृते वा। सम्मुखे यामेनां समाधिस्थामालोकयसि न तस्याः कृते। अपि बुद्ध भवत्या ? कात्यायनी- किं वा बोद्धव्यम  या नारी देवानां नाम विस्मृत्य जीवनमखिलं स्वामी स्वामीत्येतावदारर

**कात्या.** - किं वा बोद्धव्यम् ? या नारी देवानां नाम विस्मृत्य जीवनमखिलं स्वामी स्वामीत्येतावदारटनेनैव व्यक्षिपत् तस्या धर्मो मम धर्मापेक्षया श्रेयान् ? किमिदमुपदिशसि देव ?

**गुरु.** - वत्से विस्मरति भवती, आर्यसदाचारे स्वामिपूजैव नारीजन्मनि श्रेष्ठो धर्मः।

## प्रेम्णो विजयः

### ( १ )

नवयौवनारम्भ एव युरोपाद्भारतवर्षमुपागतो मिस्टरहोममहोदयः सम्प्रति समग्रस्य एटावाप्रान्तस्य शासकः। लघु-मन्द-मध्यम-श्रेणीयेषु पदेषु यथाक्रमं शासनानुभवं सञ्चितवतोऽस्य साम्प्रतमुपगतं वार्द्धकम्, किन्तु विजितजातीयैः सह घृणाव्यवहारस्य नासीदस्मिन् लेशोऽपि। प्रत्युत भारतीयानां सरलतां स्वाभाविकशिष्टतां च हृदयेनाऽयमभिरोचयति स्म। समग्रं जीवनकालं भारतवर्षीयैरेव यापितवतोऽस्य प्ररूढस्तेषु प्रणय इति तत्परचिताः प्राहुः। हरिपुरग्रामनायको रायवेणीप्रसादमहोदयोऽस्य अभिन्नमित्रमासीत्।

मिस्टरहोममहोदयस्य पत्नी पूर्वमेव दिवमगात्। केवलं पञ्चवार्षिकः पुत्रो जेम्सनामक एवास्य प्रणयावलम्बनमासीत्। यदा हि होमस्य अन्तसमयः समुपास्थित तदा वेणीप्रसादमाहूय निजपुत्रस्य करं तद्धस्ते निहितवान्, सस्मितमभिहितवांश्च- 'डियर वेणी ! साम्प्रतमहं रामस्य समीपे गच्छामि। मत्समीपे केवलं सार्द्धत्रयलक्षमुद्राः सन्ति ता इमा गृहाण। अयं पुत्रस्तवैवाऽस्ति। यथेच्छमिमं पाठय। आई. सी. एस् परीक्षा अवश्यमनेन दापयितव्या, इत्येव मे हृदयरूढो विचारः। अस्तु, अन्तसमये इदमेव मे दानपत्रम्। अयमेव च मे तुभ्यमनुरोधः।

### ( २ )

वेणीप्रसादस्य गृहं ग्रामेऽभूत। विंशतिसहस्रमुद्राः प्रतिवार्षिको भूसम्पत्तेरायः। ग्रामनायकस्य गृहमागत्य सुशीलबालको जेम्सः शनैः शनैर्दम्पत्योरासीत्प्रणयभाजनम्। दैवयोगादासीद्वेणीप्रसादस्य गृहं सन्तानशून्यम्। सम्प्रति जेम्सिममुपलभ्य ग्रामनायकपत्नी

प्रणयनिःश्वासममुचत्। जेम्सस्य भारतीयं नामाऽभूत् 'ललिताप्रसाद' इति। गृहमागत्य त्रयोऽध्यापकास्तमिमपाठयन्। संस्कृत–हिन्दी–अंग्रेजीनां शिक्षा नियमतः पर्यचलत्। ललितः कदाचिच्चोलकं धौतवस्त्रं चाधारयत्, कदाचित्तु 'कमीज' 'पैण्टं' च पर्यधत्त। यथा स ललितनाम्ना सम्बोधितः प्रत्यवदत्तथा जेम्सेत्याहूतोऽपि प्रत्यभाषत। निचितमभूत्तस्य नामद्वयम्।

जेस्सोपनामकोऽयं ललितो वेणीप्रसादं पितेति, तत्पत्नी च अम्बेत्याह्वयत। यदा ह्ययं प्रावेशिक (ऐंट्रेन्स) परीक्षामुदतरत्तदैव दैवयोगाद् ग्रामनायकस्यान्तसमयः समुपातिष्ठत्। स हि निजपत्नीं सधैर्यमवादीत्– 'एषोऽहं गच्छामि गोविन्दचरणारविन्दे। न भवत्या विक्लवया भाव्यम्। ललितोऽयम् आई. सी. एस. परीक्षापर्यन्तमवश्यं पाठनीयः। एष हि प्रेषणीयो युरोपान्प्रति। अयं तत्र बी. ए. परीक्षां दत्त्वा आई. सी. एस. परीक्षा प्रवेक्ष्यति। किं प्रोक्तेन, चिरमित्रस्य होममहोदयस्येच्छाऽवश्यं पूरणीयैव, कामं मे भूसम्पत्तिः सर्वाऽपि गच्छेत् तिष्ठेद् वा ।अयमौरसः पुत्र इव द्रष्टव्य इति तु न वक्तव्यं स्वभावतः प्रणयवत्यै भवत्यै, किन्तु जेम्सनाम्ना याः सार्द्धत्रयलक्ष्यमुद्राः कोषे निहितास्ताः सङ्कटेऽपि न स्प्रष्टव्याः।

( ३ )

जेम्सो युरोपमगात्। तत्र पञ्च वर्षाण्यपठदयम्। प्रथमम् आक्सफोर्डविश्वविद्यालयस्य बी. ए. परीक्षामुदतरत् तदनन्तरं आई. सी. एस. परीक्षायां प्रथमोऽभूत्। एतस्य माता परस्सहस्रमुद्राः पठनव्ययार्थं प्राहिणोदस्मै। एषा हि औरसपुत्रादप्यधिकमस्मिन्नस्निह्यत्। यदि जेम्सः पञ्चशतमुद्रा अभ्यलषत्तर्हि तस्य धर्ममाता सप्तशतमुद्रास्तस्मै प्रैषयत्। मम पुत्रः 'परदेशे' न क्लेशमवाप्नुयादित्येव प्रतिक्षणमचिन्तयन्माता।

इतोऽस्वामिकां भूसम्पत्तिमवाप्य कर्मचारिभिर्ग्रामोत्त्थो लाभः स्वकीय एव परिगणितः। कश्चिदंशः स्वामिन्यै दत्तस्तर्हि भूयान्भागो ग्रामप्रबन्धकार्ये लुप्तः। यः कश्चिदवशेषः स हि कृषीवलेभ्यः सङ्ग्राह्यतया ऋणशेषः परिकल्पितः।

ग्रामेऽस्मिन् त्रयोऽन्येऽपि भूस्वामिनोभूवन्। स्वर्णावसरेऽस्मिन् ऋणं दत्त्वा दत्त्वा सर्वापि भूसम्पत्तिस्तैर्बन्धकीकृता। अर्थलोलुपैर्भृत्यैश्चौर्यस्य मिषेण वेणीप्रसादस्य सर्वापि गृहसम्पत्तिर्द्वित्रिवारेषु निजगृहमनीयत। अवाशिष्यत केवलं गृहं गृहस्वामिनी च सा वृद्धा।

तस्मिन् समय एव जेम्समहोदय एटावाप्रान्तस्य शासको भूत्वा भारतं पराववृत्ते। एष ह्यष्टदिवसानेव प्रधानकार्यालये स्थित्वा स्वप्रान्ते भ्रमण–निरीक्षणस्याज्ञां प्राचारयत्। सर्वतः प्रथमं हरिपुरग्रामं प्रापत, यत्र ह्यसौ ललितो भूत्वा शैशवस्य ललितक्रीडाश्चक्रे। ग्रामाद्बहिर्महत्येकस्मिन्नारामे प्रान्तीयशासकस्याऽस्योपनिवेशः पर्यकल्प्यत।

प्रातर्धौतवस्त्रं चोलकं च परिधाय, हस्ते वेत्रयष्टिमादाय, मण्डलीयशासकीयं मातुर्दर्शनाय

प्रातिष्ठत। शैशवपरिचिते गृहेऽस्मिन्प्रविश्य सस्नेहसंरम्भमाह्वयत्– 'अम्ब!'

सम्प्रति सर्वतो निःसहाया निर्धना गृहस्वामिनी वृद्धा ललितम् (जैम्सम्) एव स्वावलम्बनं मेने। रात्रिन्दिवं तत्प्रतीक्षायामगमयत्कालम्। अकस्मात्पुत्रस्य परिचितं स्वरं श्रुत्वा– 'ललित त्वं समागतः' इति ससम्भ्रमं जल्पन्ती बहिरागमत्। माता पुत्रं वक्षसाऽऽलिलिङ्ग। प्रेमाश्रुणो वर्षा प्रारेभे। इतो माता, ततः पुत्रो द्वावपि निःसङ्कोचमरुदताम्। पञ्चवर्षानन्तरमयं मातापुत्रयोरभूत्समागमः।

( ४ )

**माता**– पुत्र! त्वया आई. सी. एस्. परीक्षा उत्तीर्णा?

**जैम्सः**– आम्, अम्ब भवत्कृपया।

**माता**– दिष्ट्या, अद्याहमनृणा संवृत्ता। तव पिता म्रियमाणो मामवदत् 'ललितोऽयं विलायत–परीक्षां दापयितव्यः। एतत्कृते ग्रामसम्पत्तिस्तिष्ठेद् गच्छेद्वा।'

माता भूमावतिष्ठत्। जेम्सस्तदुत्सङ्गे शिरो निधाय भूमावेव समविशत्। तन्मस्तकं हस्तेनाऽऽमृशन्ती माता सप्रणयमवोचत् त्वया पत्रे लिखितमासीत्– 'मया निजविवाहोऽपि सम्पादितः' इति तत्क्वेदानीं मे स्नुषा?

**ललितः**– सा द्वितीये भवने वर्तते। सा हि भवतीं सविनयमाहूतवती। अद्यप्रभृति भवत्या अपि निवासस्तत्रैव भवेत्। ततो निकट एव मथुरा। तत्र हि यमुनास्नानं द्वारकाधीशदर्शनं च सहजं सम्भवेत्।

**माता**–वत्स! वधूरिदं तु न कथयेत् यन्मम परितरङ्गरेजः, तन्माता हिन्दुःकथं स्यादिति।

''मैवमम्ब! मया सर्वमपि वृत्तं तस्यै सूचितम्। सा भवतीं शुश्रूषितुमिच्छति''

**माता**–तव त्वयं भोजनस्य समयः। मन्ये क्षुधितः स्यास्त्वम्।

**ललितः**– सत्यमम्ब। प्रबला सम्प्रति क्षुधा। भवत्या हस्तपाचितमन्नं भुक्तवतो मे पञ्च वत्सरा व्यत्ययुः। यदा यदा ह्यहं भोजनायोपाविशं तदा तदैव भवतीमस्मरम्।

**माता**– तेमनमोदनं च ते प्रियम्। अपि तदेव पचामि?

**ललितः**– आम आम्, तदेव भोज्यम् तदेव भोज्यम्।

वृद्धा मृद्भाण्डमेकमादाय तक्रमानेतुं प्रतिवेशिगृहेऽगच्छत्। हन्त! असूर्यम्पश्याया यस्या द्वारदेशे परिचारका अप्यपरेभ्यस्तक्रं व्यतरन् सैवाऽद्य तक्रबिन्दोः कृते गृहाद्गृहमटति। अस्तु, अवसरमिममधिगत्य जेम्सः समुत्थाय सर्वमपि गृहं सम्यङ् निरैक्षत। नासीद् गृहे किञ्चिदपि। स्वार्थिनः सर्वमप्यर्थजातं निजगृहमनयन्। शास्त्रागारे शस्त्राणि, अमूल्या × आसन्द्यः,

महार्घवस्त्राणि, शय्याः किञ्चिदपि नाऽवाशिष्यत। राजभवनं भिक्षुगृहादपि दयनीयं दृष्ट्वा जेम्सस्य सुमहदभूद्दुःखम्।

( ५ )

'पञ्चवर्षानन्तरमद्य मे तृप्तिरभूत्' इति वदता जेम्सेन परिसमाप्यत भोजनम्। पुनरेवमभूद् द्वयोरालापः–

**जेम्सः**– भूसम्पत्तिस्तु सुस्थिरा वर्तते?

**माता**– न सेदानीम्। ऋणाग्नौ सर्वापि हुता।

**जेम्सः**– ऋणं किमित्यक्रियत?

**माता**– यदि तन्नाऽकरिष्यं तर्हि तुभ्यं किं प्रैषयिष्यम्?

**जेम्सः**– तर्हि वार्षिको ग्रामाणामायः?

**माता**–कर्मचारिभिरुक्तम्– देशे दुर्भिक्षमभूत् अतएव कर्षकेभ्यो न तत्सङ्ग्रहीतुमशक्यत।

**जेम्सः**– 'आई. सी.' (आः ज्ञातम्), अस्तु, गृहस्थं सर्वमुपकरणजातं किमभूत्?

**माता**– वारत्रयं गेहे चौर्यमभूत्पुत्र!

**जेम्सः**– ज्ञातम्! सर्वसम्पन्नापि मदर्थे विपन्नाभूद्भवती। नरपतेरासनाऽऽसीनापि मत्कृते भिक्षुरिदानीं भवती। हन्त धिङ् मामधन्यम्।

**माता**–मैवं पुत्र! मया मम प्राणपतेरभिलाषः, तव पितुरभिलाषः, तव चाभिलाषः सर्वथा पूरितः, किमयं न्यूनो लाभः? भवन्तमद्य सफलं विलोक्य सर्वथा निर्वृतं मे चेतः। सम्पत्तेः किमहमकरिष्यम्? सर्वामपि सम्पत्तिं विक्रीय त्वं मया क्रीतः। त्वमेवाद्य मे सम्पत्तिः। किमिदानीं मे अपेक्षितम्? द्वे मुष्टी तण्डुलानाम्! तत्तु भवान् दद्यादेव। यदि न दद्यास्तर्हि यतः कुतश्चिदन्नसत्राद्भोजनमहं लभेय।

**जेम्सः**– राम राम! किमिदममङ्गलमुच्यते मातः!

( ६ )

धर्ममातरं सहादाय जेम्सो निजं प्रधानस्थानमगच्छत्। तत्र हि निजोपनिवेशे पृथगेकं गृहं सर्वोपयुक्तसामग्रीभिः सज्जं मातुः कृते पर्यकल्प्यत। दासी, भृत्यश्चैकस्तत्परिचर्यार्थमभूतां नियतौ। जेम्सोऽपि प्रत्यहं मातुः पाकशालायां भोजनमकरोत्। जेम्सपत्न्याः प्रात्यहिकं भोज्यमपाक्षीत्सूदः। स्नुषा सेयमतीव सम्मानेन सौशील्येन च मातरमसेवत। तदेवं मिथः

स्नेहसंविभागेन सर्वेऽप्यानन्दमविन्दन्।

एतदनन्तरं ४२० तमधारानुसारमनुचितरूपेण परस्वलुण्टाकानामुपरि पर्यचाल्यताऽभियोग:। प्रान्तस्य तस्य त्रयोऽपि ते भूस्वामिन:, गृहोपकरणलुण्ठका: पञ्चापि परस्वापहर्तार:, सर्वेऽपि च गृहकर्मचारिणोऽभियुक्ता: समभवन्। एकमासं यावन्नि:शब्दमिमे निगडिता अक्रियन्त येन प्रान्तीयशासकस्य धर्ममातुर्वञ्चनस्य प्रतिफलमिमे लभेरन्।

सर्वविधक्लेशानां कदाप्यपरिचितास्त्रयोऽपि भूस्वामिन: प्रान्तीयशासकसविधे सन्देशं प्राहिण्वन् यदि श्रीमतामभिमतं तर्हि मूलमात्रमस्माकमृणं दीयताम्, अपगच्छतु तद्वृद्धि:। यदि मूलमपि प्रतिकूलं तर्हि तदप्यप्रदाय वेणीप्रसादभूसम्पतिरधिक्रियताम् चेदुचितं तर्कयन्ति श्रीमन्त:। किन्तु निरवधि निगडनान्मुच्यामहे वयम्।

गृहलुण्ठका: खलास्ते प्रार्थयन्त–श्रीमतां भवनात्सर्वमुपकरणं रक्षार्थं स्थानान्तरे निहितं यद् भवत: प्रत्यागमने प्रत्यर्पयितुं शक्येत दीयतां निदेश:, सर्वापि सज्जा गृहे तथैव सन्निवेश्येत। वयं ग्रामनायकस्य भवत: पितु: पारम्परिका: शुभचिन्तका:। अत एव सुरक्षानिमित्तमेव तथा प्रख्याप्य सर्वा सामग्री स्थानान्तरमनीयत। अनुगतेषु प्रसीदन्तु श्रीमन्त:।

कर्मचारिणो न्यवेदयन्–गतेषु वर्षेषु दुर्भिक्षोपद्रवादवश्यं ग्रामाणामायो नाभूत्, किन्त्वैषम: सर्वथा सुभिक्षम्। सर्वतोऽभिनन्दनीया कृषि: सुदृढमाशास्यते कृषीवलेभ्य: पूर्वावशिष्ट: करो नि:शेषमुपादीयेत। दीयतामस्मभ्यमेकवत्सरस्यावकाश:, येन वयं सर्वमप्याऽपव्ययजातं नि:शेषं शोधयेम्।

सिद्धिं विभाव्य सर्वेऽपि मुक्तास्ते जेम्समहोदयेन। न्यायमनुल्लङ्घयता च तेन प्रतिशतमेकमुद्रावृद्धिं प्रदाय सर्वेऽप्युत्तमर्णा: शोधिता:।

सर्वापि भूसम्पत्ति: सङ्कटात्समुद्धृत्य धर्ममातुश्चरणे समर्पिता। लुण्टाकै: सर्वापि गृहसज्जा स्वत: प्रत्यार्प्यत। गृहकर्मचारिभिश्छलादपहृतं द्रव्यं सविनयमुपहृतं सम्प्रति कुतो न स्यात्। सदाचरणशालिनो चरणयोर्लोठति लक्ष्मी: प्रसीदति भूतभावनो भगवान्।

तदेवं जातीयताया उपरि प्रेम्णो विजय:।[१]

१ 'कल्याण' कथाया आधारेण रचितः

# निराशप्रणयः

**( १ )**

नमितकन्धरेण प्रोक्तं भिषजा–"गुर्वी पीडा, परं न साम्प्रतं चिकित्सातो बहिर्भूता। तथाप्यवश्यं कियान् समयोऽपेक्ष्यते चिकित्सायै। किन्तु, एतेन सह रीत्यनुसारं शुश्रूषाप्यावश्यकी।"

कम्पितकण्ठं प्रोक्तवान् हरिमोहनः–"समस्तोऽपि भारो भवदायत्तः। मम तावदियमेका कन्या। येन शीघ्रमेव भवेन्नैरोग्यं तदर्थं भवतामादेशानुसारमेव भवेदुपचारादिकम्।"

भिषक्–एवंविधेषु रोगेषु शुश्रूषार्थमेका प्रौढा धात्री अपेक्षिता। अहं वसुकुमारीं प्रेषयामि। सा हि सर्वदा स्थास्यति प्रसूताया निकटे। एषु कार्येषु विशेषनैपुणं तस्याः। सम्भवतः नास्मिन् कार्ये साऽऽपत्तिं करिष्यति। अयाचितापि सा बहुधा पीडितानुपचरति।

अवसानोन्मुखी साम्प्रतं रजनी। उषसस्तरुणालोकच्छटा वातायनपथेन प्रविशति गृहाभ्यन्तरम्। कुसुमपुरस्य राजमार्गे प्रारब्धं खलु द्वित्रैर्लोकैर्यातायातम्।

हरिमोहनः–मम जामाता साम्प्रतं कलिकातानगरे निवसति। किमु तदाह्वानार्थं तडित्समाचारप्रेषणमावश्यकं विवेचयन्ति भवन्तः?

"इदानीमेव तदाह्वानसय नास्ति तथावश्यकता। ईश्वरो न कुर्यात्– परं यदि तेषामाकारणं नितरामावश्यकं भविष्यति, तर्हि पूर्वमेव सूचयिष्यामि भवतः।"

वैद्यराज औषधः पथ्यस्य च व्यवस्थां कृत्वा गृहमगमत्।

( २ )

सुदीर्घा दिवसाः कथं वा व्यतीता भवन्ति, एवं रात्रेरनन्तरं प्रभातम्, प्रभातानन्तरं च रात्रिः कदा वा व्यतीता भवतीति मृणालिन्या नासीद्बोद्धुं शक्तिः।

कस्मिन् कस्मिंश्चिद्रोगे समये समये समस्तान्यपीन्द्रियाणि स्वप्नगतानीव, इन्द्रजालाच्छन्नानीव सम्भवन्ति। वर्तमानविषयेष्वेका ईदृशी जवनिका निपतति, यद्रोगिणो दुर्बला इच्छाशक्तिः केनापि प्रकारेण तस्मात्स्वप्नजालादात्मानं मोचयितुं न भवति समर्था।

मृणालिनी पश्यति नानाविधान् स्वप्नान्। स्वप्नादनन्तरं स्वप्नः। विच्छिन्नः, असंलग्नः, अर्थहीनः स्वप्नः ?! स्वप्नेषु पश्यति स्म सा– एका स्नेहमयी देवीमूर्तिर्निरन्तरं तच्छय्यापार्श्वे स्थिता करोति शुश्रूषाम्। तस्याः सुन्दरे मुखे सेवापरायणाया मातृमूर्तेरपूर्वा श्रीर्विराजते। सुधास्निग्धे स्वरे प्रवहति करुणास्रोतः।

स्वप्नादनन्तरं गाढनिद्रा। तदुत्तरं च, अहो कीदृक् शान्तिपूर्णं जागरणम्! मृणालिन्या नयने उन्मील्य दृष्टं यत्सा स्वीये एव शयनकक्षे शयाना।

गृहमध्ये चतुष्पादिकोपरि प्रज्वलति स्म प्रदीपः। प्रज्वलितस्यास्य दीपाधारस्य सम्मुखे स्वप्ने दृष्टा सैव रमणीमूर्तिरुपविष्टा। मृणालिनी दुर्बलकृशाभ्यां कराभ्यां मार्जयामास निजे चक्षुषी। इदानीमपि किं तस्या दृष्टेरुपरि स्वप्नच्छाया परिभ्रमति ?

करकङ्कणनिक्वणं श्रुत्वा अध्ययनरता रमणी रुग्णां प्रति दृष्टिं निचिक्षेप। शय्याप्रान्ते घोपविश्य धात्री वसुकुमारी प्रोवाच–'अपि साम्प्रतं प्रतीयते किञ्चित्स्वस्थता ?'

मृणालिनी कृशतरौ निजकरौ पश्यन्ती क्षीणकण्ठं प्रोवाच ''मम किं समधिकं रोगावेगः समभूत् ? कियत्कालमहं विचेतना आसम् ?''

धात्री किञ्चिद्विहस्य प्रत्युक्तवती– ''अद्य पञ्चदशदिवसेभ्यः पश्चात्, भवत्याश्चैतन्य-मभवत्। हस्तं ददातु भवती पश्यामि।''

वसुकुमारी नाड्या गतिं सम्यक् परीक्षितुमारभत।

पञ्चदशदिवसाः! एतावन्ति दिनानि यावन्नाभूत्तस्या ज्ञानम्! भ्रामं भ्रामं मृणालिन्या दृष्टिर्विस्तृते तस्याः शय्यापार्श्वे मल्लिकापुष्पस्तबकस्येव कोमलस्य शयानस्य क्षुद्राशिशोरुपरि न्यपतत्। तस्मिन्क्षण एव चैका सुमधुरा वेदना, अपूर्वा रागिणी तस्या हृदयमुच्छ्वसितमकरोत्। अनिमेषनयनयोः स्निग्धा उत्फुल्ला च दृष्टिशक्तिर्बालकस्य प्रत्येकाङ्गानामालिङ्गनमिवाकरोत्। मुहूर्तमध्ये तस्याः समस्ताः कथाः स्मरणपथमारुरुहुः। यदेकस्मिन्दिने गभीरनिशीथे एकया तीव्रया वेदनया तस्याः समस्तानीन्द्रियाण्यभिभूतान्यभवन्। प्रदीपस्यालोकश्चक्षुषोस्तिरोधत्ते स्म। एतत्समस्तमपि वृत्तं तस्या मनसि सम्यक् प्रतिभातमभवत्।

मृणालिनी सविस्मयमवदत्– ''एषु पञ्चदशदिवसेषु तदा भवती मत्सविधे दिवानिशमतिष्ठत् ? अहं स्वप्ने एकां देवीमूर्तिमद्राक्षम्। तत्सर्वं मन्ये नास्ति मिथ्या।''

एकस्मिन्पात्रे औषधिमादाय वसुकुमारी प्रावोचत्– ''इदमौषधं निपीय पुनर्निद्रातुं चेष्टतां भवती। अद्य नेतोऽधिकं सम्भाषणं विधेयम्। जानामि, अद्य न भविष्यति ज्वरः।''

मृणालिनी शनैः शनैर्बालकाभिमुखं पार्श्वपरिवर्तनं कृत्वा निद्राया मधुमयक्रोडे व्यश्राम्यत्।

( ३ )

दिने दिने मृणालिनी आरोग्यलाभं कर्तुमारभत्। तस्या रक्तहीनयोः पाण्डुरकपोलयोः स्वास्थ्यस्य कोमलाऽऽभा पुनः प्रत्यायातुं प्रारभत। किन्त्विदानीमपि सा शय्यां विहाय नाधिकदूरं प्रयातुं समर्था। वसुकुमारी प्रतिदिनं मध्याह्ने तस्याः समीपे समायाति स्म। कथावार्ताभिर्हास्यगानैः सा मृणालिन्या अवसन्नायां हृदयतन्त्र्यामेकामानन्दलहरीं प्रवाहयामास।

नवपरिचितायाः स्निग्धमूर्त्या एतस्या युवत्याः स्निधहास्ये, अपरिमिते स्नेहे, सङ्गतस्य श्रुतिमधुरस्य कथोपकथनस्य विचित्रे मोहे, स्वल्पैरेव दिनैर्मृणालिनी एतावदाकृष्टा समभवत्, यत्कस्मिंश्चिद्दिने तस्या आगमने सम्भवेद्विलम्बस्तदा मृणालिनी उन्मना भूत्वा वातायनद्वारे तदागमनपथं निरीक्षमाणा तिष्ठति स्म। तस्मिन् समये सा हि नान्यस्मिन्कार्ये, नान्यस्मिन् कथोपकथने, मनो निवेशयितुं प्राभवत्।

तस्या हास्यम्, तस्याः संलापः, तस्याः सङ्गीतम्, तस्याः पुस्तकपाठस्य भङ्गी, सर्वमेव मृणालिन्याश्चित्ते विचित्रं भावमङ्कुरयामास। एवं सौष्ठमेव नान्यः कश्चन हसितुं शक्नोति। एवं मधुरभाषायां नान्यः कश्चित् संलपितुं जानाति। किञ्च तस्याः सङ्गीतम्! एवंविधं गानं नेतः पूर्वं सा कदाप्यशृणोत्। हारमोनियमवाद्यस्य स्वरेण सह यदा हि वसुकुमारी गातुं प्रारभत्, तदा मृणालिन्या इदमेव प्रतीतमभवत् यत्पुनः सा स्वप्नकल्पिते एकस्मिन्नभिनवराज्ये प्राप्तास्ति। तस्मिन् सङ्गीते प्रेम्णो मानाभिमानस्य परस्परमादानप्रदानस्य च काचित्कथा, निराशप्रणयस्य करुणक्रन्दनम्, अतृप्ताकांक्षाया दीर्घोच्छ्वासो वा नासीत्। एतस्य हि सङ्गीतस्य स्वरे स्वरे महावैराग्यस्यैक औदास्यभावो झाङ्कारमुत्पादयति स्म।

व्यर्थं जीवनं कर्मप्रवाहे प्रवाह्य, अनन्तस्यापरिज्ञेयस्य, चिररहस्यमयस्य, परमेश्वराय चरणतले शान्तिलाभस्य साग्रहं प्रार्थनं रागिण्याः स्तरे स्तरे खेलति स्म। अहो तत्सङ्गीतं कीदृक प्राणस्पर्शि! कीदृक् अमृतमयम्!

गानसमये गायिकाया नयने ईशन्निमीलिते अभूताम्। दीप्तं मुखमण्डलं करुणया च महिम्ना च सौन्दर्येण च प्रेम्णा चोद्भासितप्रभवत्।

सङ्गीतस्य शेषालापे शेषझङ्कारे विलीयमाने सति मोहाविष्टे इव द्वे अपि इमे क्षणकालं नीरवमतिष्ठताम्। तदनन्तरं जिज्ञासते स्म कदाचिन्मृणालिनी– ''भवती कुतो वां न करोति विवाहम्? नाधिकं जातं भवत्या वयः। किमु चिरकालमनेनैव भावेन यास्यति वयः?''

वसुकुमारी सहास्यं प्रसङ्गान्तरमुत्थापयति स्म। कदाचिन्नवप्रकाशितस्य कस्यचिन्मासिकपत्रस्य काञ्चिदाख्यायिकां श्रावयति स्म। कदाचिच्च मृणालिन्याः शिशुं क्रोडे कृत्वा लालयामास। शिशुं वक्षसा परिष्वज्य कथयति स्म सा– ''संसारबन्धने यदि किञ्चित्सुखं स्यात्तदा तदस्मिन्नेव। हृदयज्वाला यथानेन परिशाम्यति, नैवमन्येन वस्तुना सा शीतलीभवति।''

( ४ )

कम्पमानपदो नृत्यत्येको बालकः। नृत्यन् नृत्यन् कदाचित्पतति भूमितले। पुनरुत्थाय स्नेहस्निग्धात्कण्ठान्निस्सृतस्य मधुरस्वरस्य ताले ताले नृत्यति।

शिशोर्जननी वातायनान्तिकेऽवस्थिता चैत्रमासस्य वर्णवैचित्र्यबहुलं सान्ध्याकाशं निरीक्षते स्म। तस्याः शरीरं सम्प्रति सर्वतः स्वस्थम्।

उल्लङ्घितसार्द्धैकसंवत्सरः शिशुर्हास्यलहरीं प्रवाहयन् कदाचिन्निपतति वसुकुमार्याः स्नेहाकुले वक्षसि। कदाचिच्च दूरमागत्य उदारेण शान्तेन च नयनद्वयेन सकौतुकविस्मयं पश्यति ताम्। वसुकुमारी मुग्धस्य मुखस्य सौन्दर्यम्, नवनवनीतकोमलस्य वपुषः कमनीयताम्, उच्छ्वसितं च कलहास्यम्, अतृप्तनयनमनुभवति स्म।

शिशुरिव नास्त्यन्यः संसारे कोऽपि हृदयाकर्षकः। बन्धनहीनं विद्रोहि हृदयमपि शिशोः सरलहास्यं पुनः कर्मबन्धने सहजमेव शक्नोति विनिपातयितुम्। शोकार्तस्य सन्तप्तप्राणस्य ज्वालां निर्वापयति स्निग्धेन मोहस्पर्शेन।

मृणालिनी किमपि सत्कुकामैवासीदेतस्मिन्नेव समये द्वादशवर्षीयो बालको मोहितचन्द्रः सरभसं प्राविशद् गृहमध्यम्। अवदच्च–अत्तिके? आह्वयति त्वां जननी। शीघ्रमेहि! नरेन्द्रमहाशयः समायातः।

मृणालिन्या मुखमण्डलं लज्जारुणमभवत्। स्निग्धहास्यमधरयोः सङ्गोप्य किञ्चिदवरुद्धकण्ठमवदत् "भगिनि? आस्यतां किञ्चित्। आकर्णयामि किन्विति।"

वसुकुमारीं बालकमपृच्छत् "किमुक्तं मोहितचन्द्र? कः समायातः?"

बालकः– नरेन्द्रमहाशयः। मन्ये न तं परिचिनोति भवती। स खल्वस्माकं जामाता। अत्तिकाया वरः। दृश्यताम्। एतत्खलु चित्रं तस्य।

मोहितचन्द्रः सहर्षं हस्तमुन्नमय्य स्फुटचित्रं तस्याः सम्मुखमकरोत्।

बालकः–नरेन्द्रमहाशयः कलिकातातश्चित्राण्येतान्यानीतवान्। अहमेकमिदमपहृतवानस्मि।

कम्पितहस्तं प्रतिददौ चित्रमिवं वसुकुमारी। बालकः सोत्साहमुच्चैरभाषत "कथं कीदृगुत्तमं चित्रम्? गत्वा दर्शयामि जनन्यै अपि?"

बालकः सरभसमधावत्।

वसुकुमारी हस्तद्वयेन वेपमानं हृदयमवष्टभ्य वातायनसम्मुखमपासरत्। गवाक्षद्वारस्य लोहशलाकामवलम्ब्य, अनिमेषनयनं तिमिरमग्नस्याकाशस्याभिमुखमन्यमनाः समवलोकयन्ती तस्थौ।

एकाकी बालकः सचीत्कारमरोदीत्।

शिशोः क्रन्दनमाकर्ण्य मृणालिनी सत्वरं प्रत्यायाति स्म। तनयमुत्थाप्याह्वयत्सा– "भगिनि"

वसुकुमारी वदनं परावृत्याऽपश्यत्। मृणालिनी चकिताऽभवत्। वसुकुमार्या वदनमेतावद् विवर्णम्!

मृणालिनी–'किमु भवत्याः किञ्चिदसुखं जातम्! आह्वयामि जननीम्।' दक्षिणहस्तमूर्द्धमुत्तोल्य क्लिष्टस्वरमवदद्वसुकुमारी ''मैवम्, तिष्ठतु भवती। मध्ये मध्ये जायते मम वक्षसि सेयं वेदना, साम्प्रतं दूरीभूता सा।''

मृणालिनी व्यजनेन वसुकुमारीं वीजयामास। किन्तूत्थाय समवदद्धात्री– ''आस्ताम्। इदानीं सुस्थामि सम्पन्ना। किन्तु करोत्विदं भवती। एका अश्वशकटिराहूयताम्। पुनरिदानीं रमेशगृहे गमनमावश्यकं मे।''

मृणालिनी समवोचत्– ''द्रक्ष्यामि परस्मिन् दिवसे भवतीम्?''

वसुकुमारी शुष्कं विहस्य प्रत्यवोचत्– ''कथयितुमिदं व्यस्मार्षं भवत्यै। आगामिनि दिवसे गयां प्रयातुं विचारः। यदि भवेत्प्रयाणं तर्हि मन्ये पक्षपर्यन्तं न स्याद्भवत्या सह साक्षात्कारः।''

## (५)

दम्पत्योः सम्भवति साम्प्रतं संलापः। व्यजनं कुर्वती प्रोवाच मृणालिनी– ''इदानीं यत्किमपि वदतु भवान्। परमेतच्चिरकालं स्थास्यति मन्मनसि। ममैतावदसुखमाकर्णयन्नपि निश्चिन्तमतिष्ठद्भवान्। मदपेक्षया वेतनमेव प्रियं भवतः। एतावति रोगे मम मरणमेवाऽभविष्यत्तर्हि?

अभिमानेन मृणालिन्या रक्ताभमोष्ठद्वयमाकुञ्चितमभवत्। प्रायः प्रत्यहम्, एवमेव सा स्वामिनः कर्तव्यशैथिल्यस्य कथां स्मारयन्ती तृप्तिमलभत।

आसीदेतस्याः कथाया उत्तरम्। परं नरेन्द्रनाथः प्रेयस्या हृदयोच्छ्वासे बाधाप्रदानं नोचितममन्यत। किञ्च सेवाकार्यम्क्षुण्णं पालयतानेन पत्नीं प्रति यः खल्वविचारः कृतोऽभूत्, सोऽप्यस्य हृदये मुहुर्मुहुराघातमकरोत्। नरेन्द्रः प्रतिदिनमिवाद्यापि, अभियोगस्य अभियोगस्य तीक्ष्णं शराघातं निःशब्दं सहमानो धूमपाने वनोनिवेशमकरोत्।

परं मृणालिनी नैतावतापि पर्यमुञ्चदेनम् अवदत्सा– ''सेवावृत्तिः सेयं परित्याज्यैव भवता। का वा त्रुटिर्भवतः? श्वशुरमहाशयो यद्धि धनं परित्यज्य लोकान्तरमयात्, तेन हि भवानेव एवंविधान्, द्वित्रान् कर्मचारिणः शक्नोति नियोक्तुम्। अकिञ्चित्करस्य द्रव्यस्य निमित्तं न चिरकालं भवान् विदेशे शक्नुयादिदानीं परिभ्रान्तुम्।''

अन्ययमनस्कः प्रत्यब्रवीन्नरेद्रः–''अहमप्येतदेव विचारयामि। निवेदयिष्याम्येकवारं कार्याध्यक्षाय। यदि भवेन्ममास्मिन्नेव देशे कार्यपरिवर्तनं तर्हि सम्यक्। अन्यथा पालयिष्याम्येव भवदनुरोधम्।''

मृणालिनी–साम्प्रतं न केवलमावामेव। शिशुर्वर्धते क्रमेण। एतस्यापि सुखं विचारणीयं भवेत्।

पञ्जरावस्थितः शुको मध्याह्नस्य नीरवतां भनक्ति स्म मध्ये मध्ये। नरेद्रो निमीलितनयनं परिचिन्तयति स्म किञ्चित्। पत्नी स्वामिनश्चिन्तागम्भीरं मुखं पश्यन्ती नीरवं व्यजनमचालयत्।

सत्वरमागता निवेदयामास दासी– 'आह्वयति भवतीं जननी'।

मृणालिनी प्रायात्।

पुनः शीघ्रमेव परावृत्य, स्वामिनो हस्तमाकर्षन्ती प्रोवाच मृणालिनी– ''नेदानीं भवतः शयनं सम्भवति। वसुकुमार्याः प्रयामो गृहम्। भवानप्यद्य सह गमिष्यति।''

नरेन्द्रः सकौतूहलं सस्मितं चावदत् ''केयं पुनर्वसुकुमारी ? कस्माच्च स्थानादाकृष्टा सैषा ?''

प्रत्युवाच मृणालिनी– ''न मया प्रोक्तं भवते। रुग्णावस्थायामेका धात्री दिवानिशं मां शुश्रूयते स्म। सा यदि नैवं मामुपाचरिष्यत्तर्हि न भवान्मां द्रष्टुमपारयिष्यत्। एवंविधा रमणी न मे दृष्टिपथमायाता। श्रूयते महदसुखं तस्याः। सा ह्यकवारं मामीक्षितुं कामयते।''

सत्वरमुत्थाय प्रोक्तवान् नरेन्द्रः– ''पूर्वमेवेदं वक्तुमुचिमासीत्। अस्तु, भवत्या इदानीं गमनं परमावश्यकम्।''

मृणालिनी – मासीन्मम विदितमिदम्–यत्सा प्रयाता गयाम्। किन्तु नैतत्, इतः प्रयाताया एव समभूदसुखं तस्याः। सेयं षोडशानां सप्तदशानां वा दिनानां कथा।

स्वामिना प्रोक्तम्– ''तर्हि न पुनर्युज्यते विलम्बः। करोम्यहं शकटिसज्जीकरणस्य प्रबन्धम्।''

( ६ )

दास्याः क्रोडे बालकं समर्प्य मृणालिनी उपरितलमारुहत्। भृत्यो नरेन्द्रनाथाय वसुकुमार्या निवासकक्षं निरदिशत्।

सूर्यास्तमने आसीत्कियानपि विलम्बः। पश्चिमाभिमुखेन वातायनेन सन्ध्यारुणस्य भगवतो भास्करस्य शेषा रश्मयो गृहमध्यं प्रविश्य खेलन्ति स्म गृहसज्जोपकरणेषु। एकस्याः सुदृश्यायाः त्रिवलेः उपरि सयत्नरक्षितानि कतिपयपुस्तकानि, लेखनोपकरणम्, काचाच्छादितमेकं स्फुटचित्रं चासीत्।

नरेन्द्रो वेत्रासनमध्यास्य, धूमवर्तिकामोष्ठाभ्यां निष्पीडयन् मुक्तवातायनपथे सञ्चारयामास विधुरां दृष्टिम्। बहिः राजपथम्, तत्पार्श्वे वसति बाह्यं प्रान्तरम्। दूरस्थां वृक्षश्रेणिं घननीलमाकाशं च मुहूर्तमध्येऽभिवीक्ष्य पुनर्गृहमध्ये परावर्तत दृष्टिः।

अन्यमना नरेन्द्रः काचाच्छादितमिदं चित्रमुत्थाप्य समपश्यत्। समयप्रभावेण चित्रमेतत् समभूत्किञ्चित् म्लानम्। न तथा स्पष्टमवभासते स्म। उत्तरीयेणावमृज्योपनेत्रं नरेन्द्रनाथस्तीक्ष्णया दृष्ट्या सम्यगालोकयामास।

सहसा स्वभावगम्भीरस्य तन्मुखस्योपरि मेघावरणमिव समभवत्। शनैः शनैश्चित्रमेतत्परित्यज्य वातायनाभिमुखमागच्छत्। वातायनागतः सान्ध्यसमीरणः स्वेदाप्लुतमेतस्य

तप्तं ललाटं मन्दमन्दमस्पृशत्। बहुकालावस्थितस्यास्य यदा खिन्नमभवच्चेतस्तदा नरेन्द्रः शनैः शनैर्वेत्रासने एकस्मिन्नुपाविशत्। पुस्तकमेकमुद्घाट्य विषण्ण मनो विनोदयितुं चेष्टामकरोत्।

पुस्तकस्य प्रथमपृष्ठे लिखितमासीदेकं नाम। अक्षराणां मसी कालक्रमेण समजायत विवर्णा। पुस्तकमिदं त्रिवलेरुपरि सोद्वेगं प्रक्षिप्य शरविद्धः कुरङ्ग इव स हि ससम्भ्रममुदप्लवत्। स खल्वद्य कुत्रागतः ? प्रदीपालोकेऽपि मानुषः किं स्वप्नमवलोकयति ?

एतस्मिन्नेव समये प्रकोष्ठकस्यास्य द्वारमुद्घाटितमभवत्। मृणालिनी रुद्धनिःश्वासमवढदत्– ''हंहो! शीघ्रमुपरि आगम्यताम्! भगिनी न जाने कीदृशी सञ्जाता।''

द्वारपालं चिकित्सकमानेतुमादिश्य नरेन्द्रनाथस्तत्क्षणात्पत्न्या सह उपरिखण्डे जगाम। गृहस्य सकलान्यपि वातायनान्यासन्नवरुद्धानि। त्रिवलेरुपरि प्रज्वलति स्मैकः प्रदीपः। मृणालिनी वसुकुमार्या निकटे गत्वा भयनिरुद्धकण्ठमवदत्– ''अये! एतत्किम्! निःश्वासप्रश्वासा आरब्धाः! शीघ्रमेहि निकटे।''

नरेन्द्रः कियत्कालावधि चिकित्साशास्त्रस्याप्यालोचनमकरोत्। दृष्ट्वैव बोद्धुमपारयत् यद्–रोगिणः सञ्जाता मूर्च्छा। पत्नीमाश्वासस्य प्रावदत्–''नास्ति भयम्? त्वं किञ्चिद् दुग्धमुष्णीकृत्यानय। पश्याम्यतीव दौर्बल्यं जातम्।''

मृणालिनी द्रुतपदमगच्छत्।

रोगिणीं सम्यक् परीक्षितुमालोकशिखां किञ्चिदुत्तेजयामास नरेन्द्रः। तदनन्तरं च शनैः शनैः शय्याप्रान्ते आगत्यातिष्ठत्।

उज्ज्वला आलोकरश्मयो रोगिणः सर्वस्मिन्नपि देहे पतिता आसन्। विलुलितस्तस्याः केशपाशः अयत्नविक्षिप्तः। शोभनं वदनं च रोगस्य पाण्डुरच्छायया आसीन्मलिनम्। यौवनसहचरस्य निस्तुल्यसौन्दर्यस्योपरि पीडायाः सर्वग्रासि एवंविधमाक्रमणमालोक्य निमेषमध्ये नरेन्द्रस्य चक्षुषी निर्निमेषे अभूताम्। तस्य मुखं सहसैव विवर्णमभवत्। एकेन प्रबलेनाघातेन तस्य समस्तान्यन्तरिन्द्रियाणि आलोडितान्यभूवन् नरेन्द्रो द्वाभ्यामपि हस्ताभ्यामाच्छादयामास

चक्षुषी। एकस्तं आर्तनःदस्तस्य वक्षसि भयङ्करगर्जनमकरोत्सहसा।

नवेन आलोकस्पर्शेन स्वभाववशेनैव या रोगिणश्चेतना शक्तिः पुनः प्रत्यावर्तते स्म। वसुकुमारी चक्षुरुन्मीलयामास।

एकमपरिचितं युवकं एवंविधायामवस्थायामात्मनः शय्याप्रान्तेऽवस्थितमालोक्य प्रथमं सा चकिताऽभवत्। परस्मिन् क्षण एव सहसा प्रोवाच सा– ''ओः? 'त्वमसि, 'त्वमसि।'

समस्तं हृदयमवमथ्य वेदनानिरुद्धः स हि स्वरः कम्पते स्मेव, क्रन्दति स्मेव।

द्वे अति जानुनी अवनम्य नरेन्द्रो रोगिणः कृशतमं शीतलं च वामहस्तमतितप्तयोरात्मनः करयोर्निष्पीड्य, उन्मत्त इवावदत्– ''नलिनि? नलिनि।'' नास्ति ममापराधस्य मार्जनम्। त्वया सह यमहं नृशंसव्यवहारमकरवम्, समस्तसंसारस्य कापि शास्तिर्न तदुपयुक्ता।'' एतद्वदतो नरेन्द्रस्योच्छ्वसितेनावेगेन कण्ठरोधोऽभवत्। क्षीणकण्ठमवदद्वसुकुमारी– 'भवान् खल्वपराधी, एतां कथां कदाचिदप्यहं मनसि नाकरवम्।'' शनैः शनैर्वसुकुमारी नरेन्द्रस्य हस्तादात्मनो हस्तमपसारयामास।

एतस्मिन् समये मृणालिनी दुग्धपात्रमादाय शनैः शनैर्गहमध्ये प्राविशत्।

नरेन्द्र उदतिष्ठत्। उत्तेजितस्वरे पत्नीं सम्बोध्य प्रावोचत् ''एहि! मम जीवने मसीलिप्त यं खलु निगूढमंश त्वत्तो गोपापितवानस्मि, तमद्य मुस्पष्टमवलोकय। शृणु मृणालिनि! एषा भवत्याः सपत्नी!! मन्ये श्रुतं स्यात् त्वया यदध्ययनदशायां मम ब्रह्मसमाजे किञ्चिदभिनिवेशोऽभवत्। तस्मिन्नेव समये पितृचरणानामविदितमेतां परिणीतवानस्मि। परम्, अतुलसम्पत्तेर्लोभेन बन्धूनां परामर्शेन च दुर्बलं मम मनो विचलितमभवत्। सम्पत्तेर्हारणभयात् पितृचरणानामभिप्रायानुमारम्, एकस्याधर्मपत्न्या विनिमये पुनरन्यां धर्मपत्नीमुदवहम्। किन्तु मनसः शान्तिमाजीवनमहापरितवानस्मि। अत एव कक्षच्युताउ उल्केव विदेशे विदेशे परिभ्रमामि। न मेऽधुना क्षमापयितुं साहसं भवति। त्वमेतस्याश्चरणाववधृत्य, कुरुष्वाशीर्वादभिक्षाम्।''

तीव्रेण वेदनाभरेण मृणालिन्या हृदयं विदीर्यते स्म। किन्तु साध्वी समस्तमपि हृदयस्य बलमेकत्र कृत्वा, आघातमेतं सोढुं कथञ्चिदशकत्। अकम्पितपदं शय्याप्रान्ते नतजानुतिष्ठन्ती रुग्णायाश्चरणसुगं शिरसि कृत्वा प्रोवाच मृणालिनी– ''भगिनि! त्वमेकवारं माम् मृत्युमुखाद्रक्षितवत्यसि। इदानीमवलम्बस्व माम्, क्षमस्व, कुरुष्वाशीर्वादम्।''

धात्र्याः स्तिमितयोर्नयनयोः प्रान्ते अश्रुबिन्दवः प्रादुरभूवन्। वाष्परुद्धकण्ठमवदद्वसुकुमारी– ''अवश्यं क्षंस्यति सः। प्रतिदिनमहं तस्य निकटे एतामेव प्रार्थनामकार्षम्। यूयं सुखिनो भवत्! भगिनि! देह्येकवारं बालकं ममोत्सङ्गे।''

मृणालिनी मुक्तकण्ठमक्रन्दत्।

कुसुमपुरस्य गङ्गातरङ्गमुखरे शान्ते उपवनप्रान्ते मर्मरप्रस्तरमयः सन्दृश्यते एकः समाधिस्तम्भः। स हि घनीभूता ज्योत्स्नेव शुभ्रश्च सुन्दरश्च। एतस्य शीर्षदेशे स्वर्णोज्ज्वल ओंकारो मुकुटमिव शोभते। समाधिलिपेः शिखरदेशे शरविद्धहृदयस्यैकस्य कपोतस्य चित्रम्। तन्निम्नभागे च कमलकुमुदमाल्याना वेष्टनमध्ये लिखितमस्त्येतत्–

**अधिजीवनकाललालिता इह गूढास्ति 'वियोगिनी' लता।**
**पथिकाः! क्षणमात्रमास्थिताः! स्मृतिजन्याश्रुजलैर्निषिच्यताम्।।'**

वसन्तस्य पूर्णिमारजनौ ज्योत्स्नावभासेन् यदा समस्तमपि दिङ्मण्डलं जायतेऽवभासितम्, कुसुमसौरभेण परितृप्त इव यदा वहति समीरणः, एवमुदारानवद्यया मङ्गलमधुरया महिमश्रिया सकलमपि चराचरं परिपूर्णं भवति, तस्मिन् समये प्रतिवत्सरं त्रयस्तीर्थयात्रिणः समाधिस्तम्भस्यास्य पादमूले सम्भवन्ति भक्तिभरेणावनताः। अश्रुशिशिरसिक्तेन पुष्पभारेण पद्ममुकुटेन च सज्जितः समधिस्तम्भश्च शशधरस्य किरणैः प्रकाममुद्भासतेऽद्यापि।

एते के वा त्रयो पात्रिण इति यैर्नाद्यापि बुद्धं तेभ्य उपन्यासपाठकेभ्योः प्रणामान्निवेदयन्तः प्रार्थयामहे गमनानुमतिम्।

## प्रेम्णः प्रतिदानम्

### ( १ )

प्राकृतशोभानिरीक्षणार्थं देशाटनाय निर्गतस्य चारुचन्द्रस्य व्यत्यगुः कतिपयसप्ताहाः। अद्य गोदावर्यास्तटे, श्वः शालवने, परश्वः पर्वतोपत्यकायामिति सोत्साहं भ्रमतोऽस्य व्यत्येति रसमयः समयः। नैतेन सह भूयान् परिकरः। केवलमर्द्धाङ्गिनी रुचिरा रुचिरामणीयकं वहन्ती साहचर्यमस्याऽऽदधाति।

सञ्जातविवाहयोरनयोर्व्यतीतानि पञ्च वर्षाणि। समयान्तरालेऽस्मिन् प्रत्यहमुपचीयमानः प्रेमबन्धो निर्भरनिबिडतां भेजे। पाठकमहाभागानां परिज्ञानाय तदिदमपि निवेदनमावश्यकं मन्ये यदयं प्रणयो दम्पत्योः स्वतन्त्ररुचिनिरूढो न यौवनाऽऽवेगमयः। प्रत्युत कैशोर्ये मातापितृभ्यां वंश-वयो-विज्ञान-वित्त-वपुः सौष्ठवादिरनिरीक्षणोत्तरं कृतसम्बन्धयोरनयोर्मिथः प्रतीक्षोत्कण्ठादिभिः प्रतिदिनं प्रवर्धमानः सहजः स्वाभाविकश्च।

चारुचन्द्रस्य वयः पञ्चविंशतिवत्सराः। शरीरेण सुदृढो गौरः सुन्दरश्च। रुचिरा चोनविंशतिवार्षिकी मांसलकोमलाङ्गी लावण्यमयी प्रकृतिरुचिरा च। चारुचन्द्रो जात्या ब्राह्मणः प्राच्यपाश्चात्योभयशिक्षानिष्णातः। आरम्भत एवास्य चित्रकर्मणि नैसर्गिकी रुचिरासीत्। अत एव विद्यया सह चित्रविद्यायामपि सोऽयं क्रमशः पाटवं प्राप। यथैव सोऽयं विद्यालयशिक्षां समापयामास तथैव हृदयाभिरुचिते चित्रकर्मणि विशिष्य मनोयोगं ददौ। सम्प्रति तु चारुचन्द्रो

रुचिरश्चित्रकरः। दूरदूरदेशेष्वस्य चित्राणि मार्मिकाणामादरभाजनानि।

**नियतिनियमानुसारं साम्प्रतं चारुचन्द्र एव गृहस्याधिकारी।**

आसीद् गृहे पारम्परिकी भूयसी सम्पत्तिः। स्वोपार्जितेन धनेनापि नाऽऽसीत्काचिन्न्यूनता। अत एवैकेन 'मरुत्तर' यानेन प्राकृतिकसौन्दर्यनिरीक्षणार्थं सपत्नीको बहिर्निर्ययौ। पुण्यपत्तनाञ्चलमुपयातस्यास्य पञ्चमो दिवसः। सोऽयं प्रान्तः प्राकृतसौन्दर्यार्थं सुप्रसिद्धः। अत एव परितः पलीग्रामेषु प्रकृतिचित्रणं प्रेक्षमाणस्यास्य प्रययुः पञ्च दिवसाः। एषु दिनेषु सप्रमोदं भ्रमतोऽस्य यत्रैव दिनसमाप्तिरभूत्तत्रैव किञ्चिदावासोचितं स्थानं प्रेक्ष्य सोऽयं रात्रिं विशश्राम। पुनः प्रातः कृतावश्यककृत्यः सपत्नीकोऽसौ मरुत्तरशकटिमारुह्य पुनरग्रे प्रचचाल।

यातायातोचितं मार्गमतिक्रम्य इमौ दम्पती अद्य सुदूरं वनाञ्चलमुपयातौ स्तः। सन्ध्याकालस्याऽव्यवहितपरमेव चैकस्मिन्नतिक्षुद्रे वनग्रामे इमावाश्रयं जगृहतुः। नासीत्तस्मिन् ग्रामे ईदृशः कश्चिद् गृहस्थो यस्य प्रश्रये निवास उपकल्प्येत। परतस्तु ग्रामीणानां निर्देशानुसारं ग्राममात्राय पण्यानि प्रददतो वणिज एकस्य गृहसम्मुखमुपययतुः। वणिङ्महोदयः प्रशस्तां मरुत्तरशकटिम्, उत्तमां वेषभूषाम्, तदुपरि च रजतपूर्णां धननीवीं दृष्ट्वा साध्यातीतया चेष्टया दम्पत्योराहारस्य रात्रिनिवासस्य च सुप्रबन्धं चकार। स्वकीयं शयनगृहं प्रशस्तया गृहसज्जया प्रसाध्य तदर्थमुपकल्पयामास।

रात्रेः प्रभातमभूत्। प्रत्यूषे नवदम्पती ग्राम्यगृहस्य वातायने उपविश्य प्राकृतशोभां निरीक्षमाणावास्ताम्। दशदिगन्तराण्युज्ज्वलीकृत्य निर्मलनीले नभसि भासमानो भगवान् भुवनभास्करो ग्रामनिकटवर्तिनो गिरेरुपरि स्वर्णशलाकानुकारिणः किरणान् विस्तारयामास। गिरिगात्रतो निर्झरतां निर्झराणां विमलवारिणि प्रतिफलन्तो नवीनाऽरुणकिरणाः। काञ्चिदद्भुतामेव सुषमां परितः प्रसारयामासुः। प्रभातसमीरः पार्वतपुष्परेणून् निर्झरशीकरांश्चोपादाय दम्पत्योरुपायनमिव कल्पयामास। ग्रामस्याऽपरपार्श्वे एवाऽऽसीन्नदी। क्षुद्रक्षुद्रास्तरणीरादाय मत्स्याजीवाः स्वकार्यार्थमग्रसरा बभूवुः। महीरुहमूर्द्धसु मधुरं नदन्तो विहङ्गमाः प्राभातिकीं भगवदाराधनगीतिमिव जगुः।

तामेतां प्राकृतशोभां परिलङ्घ्यानाऽभूदग्रे गन्तुं द्वयोरपि मनः। प्रातर्भोजनं परिसमाप्य दम्पती शैलमेकमारुरुहतुः। किञ्चित्कालपूर्वं येषां पर्वतकुसुमानां सौरभं प्रातः समीर उपददौ तानि पुष्पाणि लतां चेमामभिमुखमालोक्य रुचिरा परमं प्रियते स्म। उवाच सा प्राणेशम् – ''रात्रौ यानि पत्राणि निष्पिष्याऽस्माकमातिथेयो वणिक् लेह्याम् (चटनी) निर्ममौ, मन्ये तान्येवैतानि।'' चारुचन्द्रः पत्रमेकमाच्छिद्य मुखे ददौ– 'अहो आस्वादो निकृतेन'। तदनुकरणेन रुचिराऽपि पत्रमेकं मुखे दत्तवती। एवं कौतुकक्रमेण दम्पती एतौ बहूनि पत्त्राणि त्रोटयामासतुः, तदास्वादं च जगृहतुः। विकसितैस्तत्पुष्पैरङ्गं प्रसाधयन्तौ प्रमुदितमानसावेतौ स्वावासं समा जग्मतुः।

गृहमागत्यैव रुचिराया मुखं सहसा विवर्णमभवत्। परक्षण एव सा स्थातुमपि नाऽशकत्। भूमौ पतेदिति लक्षणं दृष्ट्वा चारुचन्द्रस्तामवलम्ब्य आस्तरणे उपवेशयामास। किन्तु मुखे फेना ददृशिरे। हन्त हन्त विषवेगस्य सर्वाणि लक्षणान्यालोकयतश्चारुचन्द्रस्य शिरो जुघूर्णे। वेपमानगात्रः स गृहस्वामिनं वणिजमुच्चैः स्वरेणाहूय रुचिरायाः सविधे तस्थौ! किन्तु परक्षण एव तस्यापि चेतना लुप्यमानप्रायाऽभवत्। विवशगात्रः सोऽपि रुचिरायाः पार्श्व एव विवशः पपात।

गृहमागतेन गृहस्वामिना दृष्टं यद् द्वावपि आस्तरणे पतितौ स्तः। द्वयोरपि अतिस्वल्पाऽस्ति चेतना। उभयोरेकैव पीडा, एकमेव च लक्षणम्, शोकभयाभिभूतो वणिग् वराको न किमपि निश्चेतुं प्राभवत्। प्रथमं तु स ग्राम्यः, तदुपरि निरक्षरः। ततोऽपि गृहागतयोः सहसैव युगपत् सेयं दशा, इति विचारयतस्तस्य शरीरे कम्पोऽभवत्। हन्त इदानीं क उपायः? हठात् तस्य मनसि बभूव यदेतद्ग्रामनायकस्य प्रबन्धको मनीषी (मुंशी) मन्ये किञ्चित्कर्तुं पारयेत्।

सौभाग्यवशतो विट्ठलः (प्रबन्धकः) स्वावास एवासीत्। संवादमिमं श्रुत्वैव स पलायमानः समाजगाम। दृष्टम्, गृहे 'कोल' लतायाः पुष्पाणि सर्वतो विकीर्णानि गन्धश्च तेषां सर्वतो गृहे व्याप्तः। स आगत्यैव सर्वाण्येतानि राशिकृत्य वातायनाद्बहिर्निचिक्षेप इङ्गितेन च वणिजे सूचयामास यदुभयोरेव समयः सन्निहितः।

निमीलिताक्षो विट्ठलः प्रतिकारं विचारयामास यत्किञ्चिदौषधं शीघ्रमेव चेत्क्रियेत भवेत्कदाचिदेतयोः प्राणरक्षा। सहसा धावमानः स वणिक्पत्न्याः सविधे प्राप, दुग्धं च प्रार्थयामास। किन्तु सञ्जातोऽयं मध्याह्नः। अस्मिन् समये एक 'गिलाश' तोऽधिकं दुग्धं नासीद् गृहे। हन्त विट्ठलस्य सञ्जातो महान् विषादः। यद्यस्योपरि पूर्णमात्रया दुग्धं दीयेत तर्हि विषस्य प्रतीकारो भवेत्। किन्तु अतिलघीयानयं वनग्रामः। नास्मिन् समये दुग्धप्राप्तेराशा। अतित्वरितं परित आहिण्डमानोऽपि एक- 'गिलाश' तोऽधिकं दुग्धं नाधिजगाम। एतावन्मात्रेण तावदेकजनस्य प्राणरक्षा भवेत्। इयानेव ईश्वरस्याऽनुग्रहः।

हरिणीप्लुतैः पलायमानः स गृहं प्राप, किन्तु परक्षण एव तस्य विचारोऽभवद् यद् द्वयोर्मध्ये कस्मै इदं दास्यामि? कस्य च प्राणान् रक्षिष्यामि? एकतरनिश्चयं कर्तुमपारयन् स शयनीयस्य सविधे समागत्य कर्णे अत्युच्चस्वरेणाऽवादीत्- 'विषप्रतीकारार्थमेतावदेव दुग्धं प्राप्तवानस्मि। एतस्मिन् द्विधा विभक्ते कस्यापि प्राणरक्षा न भवेत्। साम्प्रतं त्वेकस्य प्राणरक्षाऽवश्यं भवेत्। अतएव एकतर एतत्पिबतु। अहमितस्ततोऽन्यदपि दुग्धमन्वेषयिष्ये, यदि कदाचिल्लभेय।'' इत्युक्त्वा उत्थापनादिनाऽनयोः किञ्चिच्चेतनां सम्पाद्य ग्रामप्रबन्धकस्त्वरिततरमितस्ततो दुग्धान्वेषणार्थं बहिर्निर्जगाम, गृहस्वामी वणिगपि तत्साहाय्याय- तत्परोऽभवत्। गृहे दम्पती विहाय नासीत्कश्चिदन्यः।

चारुचन्द्रः अतिकष्टेन पयः पात्रं धृत्वाऽवदत्- रुचिरे! अतिशीघ्रमेतत्पिब।'

रुचिरा मृत्युयन्त्रणया कातरतमा। तस्याः स्वर्णोपमे देहे प्रवर्तमानासीत्। अतिकष्टेन

शीर्णशीर्णैरक्षरैरवोचत्स्वामिन् पिब।'

चारुचन्द्रोऽस्मिन् वारे अतिकष्टेन किञ्चिदुत्थायाऽभाषत–'अहं प्रार्थये, त्वं पिब। नाहं पास्यामि। त्वदपेक्षया अहं दृढः। वणिजः प्रत्यावर्तनपर्यन्तं जीवितुं पारयेयम्। त्वं पिब'।

प्रियविपत्त्या व्याकुला रुचिरा शनैः शनैरतिकष्टेन प्रियतमस्य हस्तं धृत्वा सानुनयमवादीत्– 'मा मा, प्रियतमहं सत्यं वदामि, मम शक्तिः पुनः परावृत्ता अहं चिरं स्थातुं शक्नुयाम्। कृपया त्वमेव पिब।'

अस्मिन् वारे प्रणयातुर्येण रुदन्निव चारुचन्द्रोवोचत्– 'रूचिरे! प्रियतमे! मां पातुं किमिति त्वं वदसि? त्वमेव पिब। प्रत्येकमुहूर्तः सम्प्रति मूल्यवान् पिब पिब, अतिशीघ्रं पिब।'

रुचिरापि चरणयोः प्रणमन्तीव अतिकातरकण्ठमवदत्– 'प्राणप्रिय! मत्प्रार्थनां स्वीकुरु। मम जीवनापेक्षया तव जीवितमतिमहार्घम्। संसारे तव अनेकानि कार्याणि। मम जीवनं केवलं त्वद्दृष्टावेव मूल्यवत्। त्वज्जीवनं तु पृथिव्याः कृते मूल्यवत्।'

चारुचन्द्रश्चीत्कारं कृत्वा जगाद– 'हे भगवन्, रुचिरे रुचिरे! किमित्यनर्थकं वाग्व्ययं करोषि। प्रत्येकमुहूर्तो मूल्यवानिति किं मुधा विस्मरसि? त्वमेव भावयितुं शक्ष्यसि यन् मदायत्तरक्षां त्वां स्वहस्तेन विपाद्य नाहं जीवितुं शक्नुयाम्।'

रुचिरापि सहैवाऽवादीत्– ''आर्यपुत्र! त्वमपि विचारयेः किञ्चिद् यत् अकिञ्चित्करस्य क्षुद्रस्य मज्जीवितस्य कृते किमहम् अपरिमितमूल्यं त्वज्जीवनं विपादयेयम्? इदमेव किं प्रेम्णः प्रतिदानम्?''

चारुचन्द्रेणोक्तम्– ''नैतत्। एतत्त्वया पातव्यमेव स्यात्। त्वं किं न किञ्चिद्विचारयसि यत्तवेदं कष्टमालोक्य मे प्राणापगमतोऽप्यधिकं कष्टं भवति। रुचिरे! ...... प्रियतमे! ममैनमन्तिममनुरोधं रक्ष। शीघ्रमेतत्पयः पिब।''

रुचिराऽवादीत्– 'प्राणनाथ! त्वं किं हृदये भावयसि यदहं त्वत्प्राणान् विगमय्य निजजीवितं रक्षिष्यामीति। तव किं नेदं विदितं यत्त्वद्विरहिताया मे न केवलमयमेव लोकः प्रत्युत लोकान्तरमपि विषमयं भवेत्।'

निराशश्चारुचन्द्रः शयनीये निःसहमपतत्। अवादीच्च– ''सत्यम्, नाहमेतदभावयम्। त्वं यद् वदसि तत्सत्यम्। एकस्याऽभावे अपरो न प्राणितुं पारयेत्। अस्तु, इदमेवेश्वरस्येच्छा, द्वावपि सहैव प्राणानुत्स्रक्ष्यावः।''

रुचिराया अधरयोः स्मितरेखाऽदृश्यत सम्यक् तर्हि, द्वावेव युगपल्लोकान्तरयात्रां करिष्यावः। प्रेष्ठ! अस्मिन् मृत्यावपि कियत्सुखम्! प्रियतम! समीपमुपसर! अन्यत्समीपम्, अन्यदपि किञ्चित्। अन्यत् ...... अन्यत् ......।

पयः पात्रं तथैव पतितमतिष्ठत्

( ३ )

वैद्यमेकं सह नीत्वा ग्रामप्रबन्धको विट्ठलो, गृहस्वामी च भवने परावर्तेताम्। गृहं प्रविष्य दृष्टं यद् द्वयोरपि श्वासप्रश्वासौ न प्रवर्तेते। वैद्येन परीक्षां कृत्वा निश्चितं यदधुनापि द्वयोर्जीवनप्रदीपो नैकान्ततो निर्वाणोऽस्ति।

समीपे दुग्धपूर्णं पात्रमालोक्य वैद्यो विट्ठलश्च विस्मयचकितौ परस्परस्य मुखमवालोकयताम्। एतदनन्तरं विषप्रतीकारपटोर्वैद्यस्य कौशलेन भगवतश्चानुग्रहेण द्वावपि दम्पती पुनः प्राणानवापतुः। पक्वकेशो ग्रामवैद्यस्ततोऽप्यधिकपलितशिरा विट्ठलश्चेति द्वावेव मनसि निश्चितमकुरुताम्- ''नैवं विधः पारस्परिकप्रणयः कुहचिद् दृष्टः, नापि चैवं विधस्य प्रेम्णः सङ्कथाप्यस्मिन् जीवने श्रुतेति।

## जले ज्वाला ( ऊजली-जेठवा-प्रेमाख्यायिका )

( १ )

विक्रमस्य द्वादशशताब्द्यां सौराष्ट्रप्रान्तस्य पोरबन्दरे (यस्य हि प्राचीनं नामधेयं सुदामापुरीति) 'जेठवा' जातीयो हारमणिर्महीपो' राज्यशासनमकरोत्। एतस्य राज्यकाले एकस्मिन् वत्सरे घोरतमाऽनावृष्टिरभूत्। सम्पूर्णः श्रावणः समस्तो भाद्रपदश्चापि शुष्को व्यत्यगात्। तस्मिन् समये आसीज्जनताया विश्वासो यद् धान्यस्य व्यापारिणो यतिभ्यो (श्वेताम्बरजैनसाधुभ्यः) द्रव्योपहारस्य लोभं दत्त्वां तेषां द्वारा यन्त्रमन्त्रान् प्रयोजयन्ति येन हि वृष्टेरवरोधो भवति। तेषां धान्यं चातिमहर्घं विक्रीयते।

यदा हि देशे भीषणं दुर्भिक्षमभूत्तदा सर्वाऽपि जनता स्वीयं पशुधनमादाय दूर-दूरदेशे बहिः प्रतिष्ठत। यत्रैव पशूनां कृते तृणमवालोक्यत तत्रैव कुटीरं निर्माय जना न्यवसन्। अमरश्चारणोऽपि पशुसार्थमादाय जनानां समूहे सममिलत्। आसीत्सोऽप्यनावृष्ट्या नितरां व्याकुलः। अतएव पोरबन्दरं परित्यज्य 'हालार प्रान्ते' (वर्त्तमानकाले द्वारकाप्रदेशः) प्रावसत्। तत्र हि प्रचुरपरिमाणे प्राऽवर्षत्पर्जन्यः। आसीत्पुष्कलं तृणम्, समभूत्प्रशस्यं शस्यम्। अतएव सुप्रसन्नोऽसौ विपिने पर्णकुटीं निर्माय निर्भयं न्यवसत्। तस्य परिवारे पुत्रिकामेकामतिरिच्य

नासीदन्यः कश्चित्। आसीत्तस्या अष्टादश विंशतिर्वा वर्षाणि वयः। किन्तु साम्प्रतमप्यासीत्सा कुमारी। नाम तदीयमुज्ज्वलेति। तस्याः पितुः सविधे नासीत्तावद् वित्तं यावता यौतुकादि दत्त्वा केनचित्सह तस्याः परिणयं सम्पादयेत्। अमरो वने गत्वा निजान्पशूनचारयत्, उज्ज्वला च कुट्यां निवसन्ती भोजनमपचत्।

शनैः शनैः सैषा किंवदन्ती पूर्णेऽपि पुरबन्दरे प्राचरद् यत् एकेन यतिना एकस्य कृष्णमृगस्य शृङ्गे एकं यन्त्रं विलिख्याऽस्ति निबद्धं, मृगश्चासौ जनदृष्टिगोपितः। अतएव हि बिन्दुमात्रमपि न वर्षति मघवा। नगरनिवासिनो राज्ञः समीपे गत्वा यतेरस्य दण्डनाय प्रार्थनामकुर्वन्। प्रोवाच पृथिवीपतिः- 'यावदहं कृष्णसारङ्गं निजनेत्राभ्यां न विलोकयेयं तावत्कथमिव दण्डयेयं यतिम्?'। जनताया अयं विश्वासः कस्मिंश्चिदंशे समभूत्सत्योऽपि। यतोह्येकेन यतिना मृगा कतिपये पालिता अभूवन्निजावासे। तेषु कृष्णः कुरङ्गो बहुभ्यो दिनेभ्यो जनदृष्टितो विलुप्तोऽभूत्। एतस्य मृगस्य निवासाद् बहिर्भावो लोकानामाशङ्कायाः प्रधानमभूत्कारणं यत्- यत्र यत्र हरिणोऽसौ भ्राम्यति तत्र तत्रैव वृष्टिर्निरुध्यते। एकस्मिकन्दने कुरङ्गोऽसौ यदृच्छया भ्राम्यन्नगरस्योपकण्ठं प्राप्नोत्। जनास्त्वरितमसूचयन्महीपतिम्। राजा निजमश्वमधिष्ठाय सारङ्गमन्वसरत्। दृष्टं नरपालेन यत्कुरङ्गस्य शृङ्गे पत्रमेकमस्ति निबद्धम्। अतएव निजां प्रजामनावृष्टिमुखान्मोचयिष्यन्नरपतिः साङ्गमिमं निहन्तुमैच्छत्। स हि सुशिक्षितस्य निजतुरगस्य वल्गामाकर्षत्। अधावद्वायुवेगेन तुरङ्गः। किन्तु कुरङ्गस्तस्याप्यग्रतो द्विगुणवेगेनोदचलत्।

## (२)

व्यतिगतः सम्पूर्णोऽपि दिवसः। सम्प्रति भगवान् वासरमणिरस्ताचलाभिमुखोऽभवत्। मृगोऽपि परिश्रान्तः स्थानेऽस्मिन् निषीदति स्म किञ्चित्। आश्वस्तो नरपतिस्तस्मिन्नेवावऽसरे शरासनाद् बाणममुञ्चत्। मृगोऽप्यमुञ्चत्प्राणान्। मृगसमीपगतो राजा शृङ्गात्पत्रमिदमगृहणात्। पाषाणतो वह्निमुत्पाद्य पत्रमिदं तत्कालमधाक्षीत्।

यथैव महीपालेन यन्त्रमिदं पावकसात्कृतं तथैव वारिधरा व्योमनि विपुलतया व्याप्नुवन्। प्रारभ्यत घन-घोरा वृष्टिः। महीपतिस्तुरगं निजराजधान्यभिमुखमधावयत्। किन्तु मूसलधारावर्षां वर्षति वारिधरे नगरे समवाप्तिस्तुरभूदतिकठिना। समभूत् कज्जलकृष्णा रजनी। मार्गमपरिचिन्वन् पर्यभ्राम्यदितस्ततो नरपतिः। सूचीभेद्येऽस्मिन्नन्धकारे नाऽपश्यन्नरपालो मार्गं वा तुरगं वा। वृष्टिरपि या किलैतावन्तं समयं बलादवरुद्धाभूत्, सम्प्रति भयङ्कररूपेण प्रापतत्। विद्युतां वज्रध्वनिः, वारिदानां घोरगर्जना, पर्जन्यस्य मुशलधारावर्षा, समस्तैरेभिर्व्याकुलीकृतो नरपतिः समग्रदिन-परिश्रमेण तुरगस्थित एव मूर्च्छितोऽभवत्। किन्तु सुशिक्षितो जात्यश्च तुरगोत्तमो मूर्च्छितं स्वामिनं वहन्नतिसतर्कतया मार्गमुदलङ्घयत्। राजा कदाचिन्मूर्च्छामगमत् कदाचिच्चेतनाम्। विद्युतः प्रकाशे दृष्टं तुरङ्गेण यत्सम्मुखे एका कुटी वर्तते। स हि तस्या एवाभिमुखमासाद्य कातरहेषामकरोत्। कुटीरेऽस्मिन्नमरस्तत्पुत्री च निजाङ्गानि सङ्कोच्य द्वावपि

खट्वाकोणे निपतितावास्तां तस्मिन्नेव समये घोटकस्य हेषारवस्तयोः कर्णे न्यपतत्। अमरो व्यचारयन्मानसे यत्– प्रबलवर्षाभिर्व्याकुलः पथिकः कश्चिदाश्रयाय द्वारि तिष्ठति। अतः खट्वास्थित एव सोऽशब्दायत– 'द्वारे यस्तिष्ठति। स हि तृणाऽऽवरणमपसार्य निःशङ्कमुपयातु गृहमध्यम्। किन्तु न किञ्चिदुत्तरमलभत्, घोटकस्तु पूर्ववत्पुनहेषत्। इदानीं विवशः सन्नमरो गृहाद्बहिरागच्छत्। विद्युत्प्रकाशे समधिकसमवधानेन व्यालोकयत्सः – अचेतनाऽवस्थायामेतस्याऽतिथिस्तुरपृष्ठे तिष्ठति। साम्प्रतमयं तुरग एव एतावत्पर्यंतं निजसादिनमानीतवान्।

अमरस्तुरगपृष्ठादवतार्य हारमणिं निजपृष्ठे समवहत्। कुटीरे चानीय खट्वायामशाययत्।

## ( ३ )

पुनर्गृहाभ्यन्तरे प्रविष्य पाषाणादग्निसमुत्पादनस्य चेष्टामकरोदमरः। किन्तु सूत्रपुञ्जस्य ('तोडा') आर्द्रतया नाऽभूत्सफलः। विवशः स शुष्कमास्तरणं, शुष्कवस्त्राणि च कुटीरेऽन्वैषयत् येन हि तानि अतिथेरचेतने शीते च शरीरे वेष्टयेत्। किन्तु कुटीरे जलप्रस्रवणात्सर्वाण्यपि वस्त्राण्यभूवन्नार्द्राणि। इदं विलोक्य मूर्च्छितस्याऽतिथेर्मरणाऽऽशङ्कया नितरामकम्पिष्टाऽमरः। अन्ते स हि निजस्य वस्त्राणि शरीरादुन्मुमोच। आगन्तुकस्य पार्श्वे च शयित्वा निजशरीरस्योष्णतां तच्छरीरे सङ्क्रामयितुमैच्छत्। किन्तु वृद्धस्य गात्रे तावती क्वोष्णता यया स निश्चेष्टमतिथिं सचेष्टं निष्पादेयत्। इदानीं पुत्रीमाहूय समादिक्षत्– ''वत्से, कुटीरे नाऽस्मिन्समये वह्निर्न च दीपक एव। वस्त्राणि च सर्वाण्यार्द्राणि। अचेतनाऽवस्थायां च कुटीरे ममाऽतिथिः समायातः। यदि वयं तस्य सचेष्टतां सम्पादयितुं न पारयेम, शीतस्य बाहुल्याद् यदि प्राणानसौ जह्यात्तर्हि वयं पापभाजो भवेम।

सम्प्रत्ययमेवोपायः केवलमवशिष्यते। यत्त्वमसि युवतिः स्त्री। तव वपुषि प्रकाममुष्णता। त्वं निजवस्त्राण्यवतार्य, निजबाहुपाशे परिवेष्ट्य, स्वीयामुष्णतां सञ्चारयेः। येन त्वद्गात्रस्योष्णता एतच्छरीरे सङ्क्रामेत्, अयं चोपलभेत चेतनाम्''

उज्ज्वला नितरामधोमुखी मूकभावेन पितुरादेशम् अश्रौषीत्सर्वम्। व्यरमत्तस्या वाक्शक्तिः। मुखात्तस्याः स्वीकारो वा नकारो वा नकिञ्चिन्निरगात्। किन्तु यदा भूयान् समयो व्यतिगतः, न किञ्चिदुत्तरमुपलब्धं तदा पुनरयमभाषत– ''पुत्रि! हे हृदयभावमहमवगच्छामि। तव नारीधर्मस्त्वामेतदर्थं नाऽऽज्ञापयति। परमहमप्यात्मनो धर्मं सम्यगवधारयामि। त्वं तु साम्प्रतमपरिणीता। स्वपुरुषस्य परपुरुषस्य वा त्वत्सम्मुखे प्रश्न एव नोपतिष्ठति। 'यस्मै अहं दद्यां स एव ते पतिर्भवेत्।' एतदवधार्य ममैतामाज्ञां पालयेः, आतिथेर्जीवनरक्षां च कुर्याः।''

इममादेशं प्रदाय तत्कालमगादमरः कुटीराद्बहिः।

पितुर्गमनान्तरं कञ्चित्कालं यावत्किङ्कर्तव्यविमूढापितुरादेशोपरि मर्मविचारम–

करोदुज्ज्वला। अन्ते सा निजं कर्तव्यमकरोन्निश्चतम्। अतिथेः खट्वां परितः सप्तवारान् सा प्रदक्षिणामकरोत्। मनसि निजपूज्यां जगदम्बां ध्यात्वा प्रार्थनामकरोत- ''भगवति! कौमार्यावस्थायां केनचित्सह शय्यामधिरोढुं नास्ति मेऽधिकारः। तथापि पितुराज्ञया सम्पादयाम्येतत्। अयमतिथिः कामं कस्या अपि जातेर्भवेत्, पितुराज्ञाऽनुसारमहमेनं निजपतित्वेन वृणोमि। साम्प्रतमहमस्यार्द्धाङ्गिनी भूत्वा मृत्युमुखे पतितस्याऽतिथेः सहशय्यामधिरोहानि। रक्ष मे सौभाग्यम्, मदगात्रस्योष्णतया निश्चेष्टस्याऽस्य शरीरे सञ्चारयेरुष्णताम्।

साम्प्रतं स्वयं समर्पिताया उज्ज्वलायाः सौभाग्यसिन्दूरं तस्या एव मूर्च्छितव्यक्तेर्जीवनोपर्यासीदवलम्बितम्। अतएव येनैव प्रकारेण तस्याः साध्यमभूत्तेनैव प्रकारेण उष्णतामानेतुं सा प्राणपणेनाऽचेष्टिष्ट।

प्रातःकालिकः सुखदः पवनः सम्पूर्णामपि रजनीं निरन्तरं जागरुकामुज्ज्वलामिमामशाययत्। इतश्चोष्णतासञ्चारादतिथेरपि संज्ञा पुनः परावर्तिष्ट। स ह्यात्मानमेकस्मिन् तृणकुटीरे परमसुन्दर्या युवत्या दृढबाहुपाशे बद्धं व्यलोकयत्। नासीत्तस्याऽश्चर्यस्य परिसीमा।

## (४)

वृष्टिरासीदवरुद्धा। भगवतोंऽशुमालिनो निर्मलः प्रकाशः प्रासरत्कुटीरेऽप्येतस्मिन्। अतिथिर्युवतेर्बाहुपाशादात्मानमवमोचयितुं यथैव चेष्टामकरोत्तथैव सेयमुज्ज्वलापि जागर्ति स्म। सा सहसैव समुत्थाय वस्त्राणि परिदधती सम्मुखमवातिष्ठत। अतिथिरपि जीर्णाऽऽस्तरणेन निजशरीरमाच्छाद्य परिचयमेतस्या जिज्ञासते स्म। रात्रेः सम्पूर्णामपि घटनामानुपूर्व्येण वर्णयित्वा न्यवेदयत्साम्प्रतमुज्ज्वला- 'इतः प्रभृति भवान् मे भर्ता। अत्रैव मत्पित्रा सह गृहमिदमधिष्ठाय मामर्द्धाङ्गिनीरूपेणाऽङ्गीकुरु।'

अतिथिरुज्ज्वलायाः प्रार्थनामिमां निभृतमाकर्ण्य न किञ्चिदुत्तरमदात्। अभूत्सज्जोऽसौ प्रस्थातुम्। इदानीमतिथिं यात्रायै सन्नद्धमवलोक्य प्रोक्तवानमरः ''यस्यामवस्थायां ममाऽसौ तनया भवतश्चेतनामानेतुं सर्वतः साहाय्यमकरोत्तामवस्थां संस्मरन्नपि भवान् किमस्मानित्थं विहाय गन्तुमुचितं प्रतर्कयेत्? किं मानवधर्मस्तदिदमेवाऽऽज्ञापयति?''

परमतिथिर्नाऽस्याऽपि किञ्चदुत्तरं ददौ तुरगोपरि स्थापयामास स ह्यासनम्। उज्ज्वलामाश्वास्य तुरङ्गमध्यारुरोह सोऽयम्। गमनस्याऽऽज्ञां याचमानः, प्रावोचदमरं नरपालः 'अहमस्मि पोरबन्दरस्य शासको हारमणिर्जेठवा। भवतो जामातृभावेन ममात्र निवासः सर्वथा असम्भवः। सम्प्रति भवान् मामाज्ञापयतु राज्ये गन्तुम्। अहं भवतस्तनयां पोरबन्दरे सादरं सप्रतिष्ठं चाह्वयेयम्।

उज्ज्वला प्रातः कालात्सायम्पर्यन्तं प्रत्यहं निजाङ्गुलेः पर्वसु दिनानि गणयामास। प्रतीक्षमाणायास्तस्या व्यत्यगुः पञ्चदशदिवसाः। परं पोरबन्दरान्न कोऽपि नरः समगात्। व्याकुला

तावदुज्ज्वला हृदये समुत्पन्नं प्रणयपातिव्रत्याङ्कुरं गलदश्रुधारया निषिञ्चन्ती न्यषीदत्।

उज्ज्वलाया मानसिकदु:खमनुमाय, अमरो राज्ञा सह सङ्गन्तुं गृहात्प्रास्थित। पोरबन्दरं प्राप्य राजदर्शनस्येच्छां प्राकाशयदसौ, किन्तु न सा सफलाऽभवत्। द्वित्राणि दिनानि इतस्ततो बभ्राम्, प्रयत्नं चकार, फलं न दृष्ट्वा पुनर्गृहमाजगाम। सर्वमिदमवधार्य सती सा विचलिताऽभवत्। पितरं सहाऽऽदाय स्वयमुज्ज्वला पोरबन्दरं प्राप। राजद्वारं प्राप्य राज्ञो दर्शनं लब्धुं सा प्रार्थनां प्रेषयामास। किन्तु किमप्युत्तरमलब्ध्वा, अनशनव्रतं स्वीकुर्वती सती सा तत्रैव स्थितवती। अस्मिन्नन्तराले भूपतिर्निजनिवासात्पदमपि बहिर्न निदधौ।

भूपतेरुपेक्षापूर्णमिमं व्यवहारमवधार्य तस्या हृदयं विदीर्णमभूत्। करुणं विलपन्ती सा सदैन्यं न्यषीदत्। तस्या हृदयतन्त्री शोकाऽवेगाज्झाङ्कुर्वती करुणमक्रन्दत्। निस्सरत्तस्या मुखात्–

**''निजयूथाद्विभ्रश्य व्यथते हरिणमनोऽप्यहो।**
**प्रियविरहं निर्विश्य जीतति कथमिव मानुषः।।''**

पर्यन्ते विरहविह्वलाया उज्ज्वलाया: प्रगाढं प्रणयबन्धं निर्धार्य द्रवति स्म हृदयं जेठवानरपते:। स हि तामाह्वयति निजसमीपे। त्रीणि दिनान्यखण्डमुपोषिता निजपरिगृहीताद् व्रतात्सुभृशमविचला सेयमुज्ज्वला यदा हि राजनिकटमवाप्नोति तदा शुष्यन्त्यपि तस्या आशालता लहलहायिताऽसहसा।

तस्या: हृदये समभवत्सोऽविश्वासो यत्सा निजं प्रियतमं सर्वदार्थं समधिगतवती।हृदयतन्त्री तस्या: सुमधुरं झङ्कृतवती–

**तपने तपति सुतीक्ष्णमारोहति शिखरं गिरेः।**
**विह्वलवपुषाऽभीक्ष्णमुपलब्धा छाया घना।।**

किन्तु द्वयो: समागमे मिथ: संलापो यदा प्रारभ्यते तदा 'जेठवा' नरेन्द्रस्तामे-तामुज्ज्वलां 'भगिनी' इति सम्बोधयति, प्रबोधयति, चासौ, ''प्रियभगिनि, योर्विभिन्नजात्योर्मध्ये आवयोर्जन्माभवत्तयोर्नियमानुसारमावयोर्मिथ: पतिपत्नीसम्बन्धो नाऽद्यावधि कदापि समभवत्– न चाप्यन्ते कदापि सम्भविष्यति। एतयोर्मध्ये भ्रातृभगिनी सम्बन्ध एव पुराऽप्यभूद्, युज्यते चापि। एवमस्थायामन्यविधा प्रत्याशा कथमिव कर्तुं युज्यते त्वया? आम्, यदि त्वं वांछेस्तर्हि सम्भ्रान्तकुलोत्पन्नेन केनचिदुच्चारणयुवकेन ते विवाहमहं सम्पादयेयम्। त्वत्कृतस्योपकारस्य परिवर्त्ते तु ममैतदर्थं राज्यम्, अर्धं च मे प्रासादमहं समर्पयेयं तुभ्यम्। किन्तु नेयमाशा कदापि स्थापनीया यदावयोर्मिथो दाम्पत्यसम्बन्धो भवेदिति।''

हन्त! भिन्नहृदञ्चला ह्युज्ज्वला किं वा साम्प्रतमुत्तरं दद्यात्? नि:सरति तस्या मुखात्–

**जगति मिथुनमश्रावि सारसयोरथ चक्रयोः।**
**नान्यद् भुवने भावि, श्रान्ता भ्रान्ता भूरिशः।।**

परन्तुजेठवानृपतिर्नात्मनो निश्चय कथमपि परिवर्त्तयितुं सन्नद्ध:। स हि प्रबोधयति ताम् – ''भगिनी भूत्वा त्वं मे प्रासादे निवसेर्नि:शङ्कम् अहम् आजन्म ते भ्राता भूत्वा सुखं

निवत्स्यामि।''

किन्तु तन्मयं तस्या हृदयं श्रोतुमपि नेदं वाञ्छति। प्रस्रवद्बाष्पजला प्रावोचदुज्ज्वला–

**यमृते क्षणो न याति तमृते जन्म कथं चलेत्?**
**रुदतीं भवान् जहाति किमु कृत्वा मां योगिनीम्?**

परिणामो यादृशो भवितुं युज्यते तादृश एव सम्मुखगतोऽभूत्। दैवदुर्बलाया आशालता नितान्तमम्लायत। प्रस्रवन्नयनजला ह्युज्ज्वला जेठवानरपतेः सम्मुखात्परावर्त्तत। आगमनसमये प्रोक्तं तया– ''प्रभो, दीनयाऽनया निजहृदयं भवते समर्पितम्। मत्समीपे योऽपि विधिरासीत्तस्य स्वामी मया भवानेव निर्मितः। जानेऽहं भवान् राजा, अक्षयसम्पत्तेः स्वामी। मम निर्धनायाः सम्पत्तिः श्रीमन्तं समाक्रष्टुमतितुच्छा। किन्तु त्रैलोक्यपतिं कृष्णं प्रीणयितुमासन् सुदाम्न समीपे केवलं तण्डुला एव। निर्धनोऽसौ हीरकान् मणीन् वा कुतः समाहरेत्? अस्मिन्संसारे दीनदुःखिताया मे सम्प्रति न कोऽपि सहायकः। अहं गच्छामि, भवतो मूर्त्तिं हृदयमन्दिरे संस्थाप्य भवत्सम्मुखात् सर्वदार्थं व्रजामि। नाहं भवतो जातिप्रणये बाधिका भवितुमिच्छामि। भवद्–हृदये जात्युपजातीनां यो हि निर्बन्धोऽस्ति स न तावदीश्वरनिर्मितः। अपि तु केवलं समाजकल्पितः सः। चेदयं सिद्धान्तः सत्यो मान्यते भवता यच्चारणजातौ जन्ममात्रेणैवाऽहं भवतः प्रेमभिक्षाया अनधिकारिणी भवांश्च मे प्रणयनिधिं चरणाभ्यामवमन्य दासीमात्रमपि मां निर्मातुं सुस्पष्टं निषिध्यति, तर्हि सूचयाम्यहम्– निराश्रयाया मम कृते '' सहजशीलताञ्जलराशेरग्निरेवोदभवेत् यस्मिन्नहं सर्वदार्थमात्मनं समर्पयेयम्। समग्रः संसारो मे सत्यस्य परीक्षकः साक्षी व सम्भवेद्। यदि समुद्रे प्रवेशसमयेऽग्निदेवो मे शरीरमङ्गीकुर्यात्, मां चेद् भस्मसात्कुर्यात्तर्हि ततस्तृतीयदिने अर्थात् मम मरणस्य तृतीययाह्वे भवतः शरीरमपि विनैव वह्निं प्रज्वलेत्। मम भवतश्च समागमः परमपितुस्तस्य समक्षं परलोके सम्भवेत्।''

इदमुक्त्वा विह्वला सेयमुज्ज्वला राजभवनाद् बहिरभवत्। समुद्र आत्मानं समर्पयितुं सा तेनैव मार्गेण राजपथे प्रायासीत् येन समायाताऽभूत्। नागरिकाणामपारः समुदायस्तस्याः समन्तादासीत्परिवृत्तः। राजभवने जायमानया घटनयाऽनया समग्रमपि नगरमुत्कर्णमासीत्। आबालवृद्धं सकलमपि नगरं सतीदर्शनार्थं निजनिजनिवासात् प्राचलत्।

कश्चिद्राज्ञो दुराग्रहमनिन्दत्तर्हि कश्चिदुज्ज्वलायाः हठमकुत्सयत् गृहस्थमहिलाः एतस्याः साध्व्याश्चरजसा निजललाटमपावयन्। निजाङ्कगोपितान् हृदयसर्वस्वान् (शिशून्) तच्चरणयोर्निपात्याऽऽशीर्वादमगृह्णन्। एवं किल जनसमुद्रेण परिवृता उज्ज्वला सेयं समुद्रं प्राप। इतस्ततः कुतश्चिदपि दृष्टिमक्षिपन्ती सेयं समुद्रे प्राविशत्। यथा–यथा च सेयं जले अग्राग्रतः प्रसरन्ती अभूत्तथा तथा जलमप्यस्यै मार्गमददात्। अनुमानतः सार्धशतपदानि यावत्सेयमेव परिस्थितिरभूत्। अर्थात् इयं जले प्रविशन्ती प्रासरत्, जलं चास्यै मार्गं प्रददिव तस्या अग्रे प्रावर्धत। अन्ते या घटनाऽदृश्यत सा किल मानवेतिहासे अभूतपूर्वा। सत्यव्रतादुज्ज्वलायाः शरीरात् सहसैव जाज्वल्यमानो वह्निः प्रादुरभूत्। गगनं चोचुम्बमानासु प्रदीप्तशिखासु तस्याः पावनं शरीरं चिरकालार्थमन्तर्हितमभूत्।

जठवानरपतिर्हारमणिः सतीशिरोमणेस्तस्याः अग्निस्नानस्य यथैव संवादमशृणोत्तथैव तस्य हृदि सुदृढो विश्वासोऽभवत् यत् अद्यतस्तृतीये दिने मम मृत्युरवश्यम्भावी। न तस्य निरोधः कोटियत्नैरपि सम्भवेत्। दिनद्वयमनेन परमेश्वरोपासनया व्यतिगमितम्। नाऽभूदस्य लेशतोऽपि भयमनया वार्त्तया यत्तस्य मृत्युस्तस्य शिरसि निर्भरं नृत्यतीति। प्रत्युताऽसौ पूर्वतोऽपि प्रसन्नः प्रालक्ष्यत। तस्य हृदये सेयमासीत्प्रमोदलहरी यत् स हि निजधर्मरक्षार्थं प्राणान् विसृजतीति, न कश्चिद् विलासलोलुपः कामुक इव।

ऐतिहासिक सेयं घटना प्रख्यायते यत् तृतीये दिने प्रातः कालस्य सुशीतलेऽपि वातावरणे जेठवानरपतेः शरीरे सहसैव भयानकस्तापः समुदभवत्। ''हन्त, दह्ये, दह्ये,'' इत्यनवरतं प्रजल्पन्नेव स हि ऐहलौकिकलीलां समापिपत्।

**टिप्पणी**- डिङ्गल (राजस्थानीय) भाषायाः ''जेठवा की बात'' इति नाम्ना सुविख्यातमिदं जेठवा-ऊजली-प्रेमाख्यानं राजस्थानप्रान्ते। एतस्य कथानकस्य चरितनायिका उजली राजस्थानीसाहित्यस्य चरमा तेजस्विनी विभूतिः। सीता-सावित्री-प्रभृति-भारतीय-सतीनामिवालौकिकी पातिव्रत्यक्षमता सुदुर्लभा तावदितिहासेषु। आख्यानलेखकेन ''अभिज्ञानशाकुन्तल'' स्येवेदं स्नेहतिरस्कारस्य कथानकमनुकृतं स्यादैतिहासिकी वा सेयं घटना स्यादिति नाहं किमप्यत्र निर्णेतुमिच्छामि, किन्तु साहित्यमार्मिकाः समालोकयेरन् यत् सदाचरणवैभवे कियदिदं कथानकं सफलमभूदिति।

## मिस्टरस्य 'गीताज्ञानम्'

षड्रिपु- षड्धातु-षडैश्वर्य-षडाननप्रभृतिषडङ्कघटितकोष्ठकेषु शास्त्रस्य रत्नराशिः सुरक्षितोऽस्ति। एतन्मध्ये षड्रिपुचक्रं सर्वापेक्षया सुतीक्ष्णां सुपरीक्षितं सुसमादृतं च। भगवद्गीतायां स्फीताक्षैर्विलोक्यते-

**''ध्यायतो विषयान् पुंसः सङ्गसतेषूपजायते।**
**सङ्गात् सञ्जायते कामः कामात् क्रोधोऽभिजायते।।**
**क्रोधाद्भवति सम्मोहः सम्मोहात् स्मृतिविभ्रमः।**
**स्मृतिभ्रंशाद् बुद्धिनाशो बुद्धिनाशात् प्रणश्यति।।'' (तृ.अ. ६२/६३)**

**(१)**

मिस्टरगौरचन्द्रः जर्मनीप्रभृतिषु देशप्रकाण्डेषु चङ्क्रमणं विधाय परिशेषे तदेतत् स्वीकर्तुं परवशोऽभवत्- ''गीता खल्वेकः सारग्रन्थः''। परं तदयं परमपरितापस्य विषयो

यद् गौरचन्द्रमहाशयो बहुकालं विदेशेषु स्थित्वा मातृभाषां हिन्दीं प्रायो बहुतरं विस्मृतवान्। अर्थात् प्रचलितभाषायां वार्तालापं कर्तुमवश्यमशक्नोत्-परं कदाचित् कदाचित् उपयुक्तं शब्दं विस्मृत्य तदन्वेषणाय विस्फारितनेत्रं पर्यन्ततो विलोकयामास। एवमुपायविहीनः सन्-

१. हस्तपदं सञ्चाल्य अथवा मस्तकं विधूय चेष्टाविशेषमकरोत्। किं वा-

२. अन्यं कञ्चिदुपादेयं शब्दं तत्परिवर्ते स्थापयितुं बाध्योऽभवत्।

यदा हि मिस्टरगौरचन्द्रेण भारतवर्षे पुनः पदार्पणं कृतमभूत्, तदा मिस्मन्दाकिनी प्रबलस्फुटनोन्मुखं कुसुममिव सुसज्जितासीत्। एकः कपोलो रक्तवर्णः, अपरश्च आपाण्डुः' एतद्धि होमियोप्याथीमते रोगस्य चिह्नम्। परं मिस्टरगौरचन्द्रस्य मते मिस्मन्दाकिनी नायिकानामादर्शभूता। अर्थात् मन्दाकिन्या नायिकास्वरूपेण ग्रहणे कृते सति षड्रिपूणां मध्ये कस्यापि उत्तेजनस्य नास्ति सम्भावना। शनैः शनैः अविश्रान्तभावेन एतदेव लक्ष्यीकत्य गौरचन्द्रो मन्दाकिन्या ध्यानं कर्तुमारब्धवान्।

मन्दाकिनी विषयभूता। गौरचन्द्रः अकरोत्तस्या ध्यानम्। तथा चात्र आसङ्गोत्पत्तेर्बहुष्वंशेषु सम्भावना। यतो हि मन्दाकिनी युवतिः! किन्तु आसक्तिनामकस्य पदार्थस्योत्पत्तिः प्रायो मानसिकप्रवृत्तेरूपरि निर्भरा। आसक्तिः प्रत्येकविषयस्योपरि नियतं भवेदेव, एषा नास्ति नियता कथा।

मिस्टरगौरचन्द्रेण दृष्टम्-मिस्मन्दायाः कण्ठनली सङ्कुचित-विस्तृता। कण्ठस्वरो विकृतहारमोनियमवाद्यस्य 'नि' (निषाद) स्वरप्रतिरूपकः। हावभावभङ्गीविषये मन्दाकिनी जडपदार्थ इव। अर्थात् उत्तेजनामप्राप्य न कथञ्चिदपि उत्तेजनस्य सम्भावना। उत्तेजनाप्रदाने च पाषाणादयो-जडपदार्था अपि चैतन्यं प्रकाशयन्ते एतद्धि आचार्यस्य वसुमहाशयस्याविष्कारेण प्रमाणितमभूत्। अत एव गौरचन्द्रेण स्थिरीकृतं यन्मन्दाकीनीविषये कथञ्चिदप्युत्तेजनं न दास्यामिति। यतो हि मानवप्रकृतेरपेक्षया जडस्य कियद्व्यवधानमिति परीक्षणे दत्तचित्तोऽभूद्गौरचन्द्रः। सुतरां,

( २ )

गौरचन्द्रो मन्दाकिनीमवदत्- ''भवत्या साकं.....कृत्वा अतिप्रीतोऽभूवम्।'' ''संलाप'' पदं विस्मृतवान् गौरचन्द्रः। एतत्पूर्त्तिं हस्तमुखं सञ्चाल्य कथञ्चिदकरोत्।

मिस्मन्दाकिनी-भवान् अस्माकं प्रतिवेशी। एवं भवतो भगिनी मे शैशवसहचरी। आवामेकस्मिन्नेव पाठालये अपठाव। भवद्धस्ते किमेतदस्ति?

**गौरचन्द्रः**- गीतायाः टिप्पणीपुस्तकम् (नोटबुक)।

**मन्दाकिनी**- भवता मूलं संस्कृतपुस्तकमधीतमस्ति।

**गौरचन्द्रः**- एवं विज्ञानमपि, उभयोर्मध्ये निगूढः सम्बन्धोऽस्ति। अनेके संस्कृतशब्दाः वैज्ञानिकसरणिमनुसरन्ति। न सन्ति तथा हिन्दीभाषायाम्। साहित्यानुरागिणो व्यक्तिमात्रस्य कर्तव्यं यद् विज्ञानस्य दुरूहशब्दानां प्रतिशब्दान् संस्कृतभाषातः सङ्गृह्य दैशिकसाहित्यस्य मुखमुज्ज्वलं कुर्युरिति।

**मन्दाकिनी**- अति सदुद्देश्यम्।

**गौरचन्द्रः**- एषु दिनेषु षड्रिपुसम्बन्धे आलोचनां करोमि।

**मन्दाकिनी**- किम्?

**गौरचन्द्रः**- मम विवेचनायां षडपि रिपवो नैकस्मिन् समये उत्तेजिता भवन्ति। एतस्य प्रमाणं गीतायामस्ति। कर्मक्षेत्रेऽपि तथैव दृश्यते। यदा हि कामः प्रबलो भवति, तदा क्रोधो न भवति। क्रोधे सति लोभो न भवति। किन्तु मम जिज्ञास्यमस्ति यत्..... एवं कामना, एक एव पदार्थो भिन्नो वा?

गौरचन्द्रः 'प्रणय' पदं न स्मृतवान् तस्मिन् समये। अत एव हस्तमुखचेष्टया तस्यार्थं बोधितवान्। एवं पुनः प्रोवाच- ''मूलपदं विस्मृतवानस्मि। 'लव' इत्येकः शब्दोऽस्ति, तस्य कः प्रतिशब्द?''

**मन्दाकिनी**- प्रेम, प्रणयः, प्रीतिः। भवान् तत्त्वानुसन्धित्सुः, न चेत्....

**गौरचन्द्रः**- न चेत्, किम्?

**मन्दाकिनी**- न चेत्.....न तु वा....मम कथनस्य एतदुद्देश्यम्.......मिस्मन्दाकिन्या मुखं लज्जारुणं भूत्वा पुनः पाण्डुरच्छायामचुम्बत्।

**गौरचन्द्रः**- भवत्याः खलु यथेष्टं क्षमता। प्रतिशब्द, प्रतिबिम्ब, प्रतिशोध, प्रतिप्रेम, प्रभृतेः सर्वेषां न विलोक्यते क्षमता। भवती यदि, अध्यापनकर्मणि मम सहकारिणी अभविष्यत् तर्हि अहमति....अभविष्यम्।

**मन्दाकिनी**- कृतज्ञः?

**गौरचन्द्रः**- आम्-आम्-तथैव।

गौरचन्द्रमहाशयो यस्य विषयस्य ध्यानं करोति स्म, तन्मध्ये कामनाया लेशमात्रमपि नास्ति। तथापि मन्दाकिन्याः सङ्गलाभस्य चेष्टा किमिति प्रादुरभूत्? एतदन्तराले उत्तेजनायाः किञ्चिदपि लक्षणमनभिवीक्ष्य गौरचन्द्रस्य कौतूहलमुद्दीप्तमभवत्। शारीरककामना, मानसिककामना च एतयोरुभयोः क्षेत्रं मन्ये नैकम्। ज्ञानलिप्साप्रभृति मानसिककामना। जानीमो गौरचन्द्रो यदन्विष्यति स्म, तत्खलु मन्दाकिन्यामस्ति। तस्य ज्ञानपिपासा मन्दाकिन्यां पूर्णरूपेण वर्तमाना। ये हि गौरचन्द्रस्याविदिताः, एवंविधान् बहून् विषयान् मन्दाकिनी जानाति। इयमेव मानसिकी सहानुभूतिः, समवेदना च, जगति प्रयोजनस्य वस्तु। ''अत एव स्पष्टप्रजल्पनमेव सम्यक्''।

**गौरचन्द्रः**- भवत्याः....करणे अस्ति काचिदापत्तिः?

'विवाह'पदं विस्मृतवान् गौरचन्द्रः।

**मन्दाकिनी**- यदि मम विचलनं न कुर्यासुर्भवन्तस्तर्हि तत्सम्पन्नप्रायमेव।

**गौरचन्द्रः**- विचलनं किम्?

**मन्दाकिनी**- उत्तेजनाप्रभृति,

**गौरचन्द्रः**- कदापि कथमपि किञ्चिदपि न भवेत्। सुतरामुभावपि परिणयसूत्रेण

समबध्येताम्।

( ३ )

येयं प्रादुरभूद् विवाहस्येच्छा, सा किं कामः ? अवश्यं टीकाकारः किमपि नाब्रवीद् विषयेऽस्मिन्। परं नैतत्कदापि सम्भवेत्, कामपदार्थः स्वतन्त्र एव।

एवंरूपेण कामस्यार्थं ध्यायतो गौरस्य क्रोध उपस्थितोऽभवत्। न मयानिश्चितमेव स्त्रीलाभं कर्तुं वाञ्छितमासीत्, अथ च अधिमस्तकमियमापत्तिः कथं वा निपपात। किं च तस्या एव वा बुद्धिः कीदृशी? स्वल्पेन संवादमात्रेणैव एवंविधं महारम्भं कर्तुं कुतो वा सम्मताऽभवत्? हन्त कीदृक् सङ्कीर्णं हृदयम्!

प्रातःकालस्य 'चा' पानमारभ्य, सायंकालस्य हार्मोनियमवाद्यपर्यन्तं सकलमेव मन्दायाः कार्यजातं मिस्टरगौरस्य निकटे विषवत्प्रतीतमभवत्। गौरचन्द्रेण प्रोक्तम्–"विरमतु तव हार्मोनियमवादनम्!"

मन्दाकिनी–दृश्यताम्, सावधानम्! न स्यान्मे विचलनम्। विचलनस्य प्रतिशब्दः 'उत्तेजना,।

गौरचन्द्रः–यः कोऽपि भवतु प्रतिशब्दः। समग्रे दिनमभिव्याप्य चीत्कारः, आलापः, हासपरिहासः, हार्मोनियमस्य 'पें पें, ध्वनिर्न मह्यं रोचते।'

( ४ )

मन्दाकिन्या स्पष्टमवबुद्धं यद् गौरचन्द्रस्य मोहप्रादुर्भावस्योपक्रमोऽस्ति। हार्मोनियमवादनं हासपरिहासप्रभृति सकलमेव विरतमभूत्। भवनमध्ये कठिना नीरवता परितः प्रतिष्ठिताऽभवत्।

मन्दाकिनी स्वसखीं विमलामाजुहाव। विमला प्रतिवासिनो युगलचन्द्रस्य नवपरिणीता सहधर्मिणी। अस्ति सेयं परमरसिका। विमला समागत्य एकान्तप्रकोष्ठे मन्दाकिन्या सह परामर्शमकरोत्। गौरचन्द्रो विलोकितवानेतत्। सन्ध्यासमये विमला सुस्वरमगायत्। गौरचन्द्रस्यैतत् श्रोतुं कौतूहलमभवत्। जवनिकान्तराले गायनं यथा यथा वर्द्धते स्म, तथा तथा गौरचन्द्रस्य एतदाकर्णयितुं लोभः प्रवृद्धोऽभवत्। मोहितोऽभूद् गौरचन्द्रः। मनसि विचारयामास-''किन्तु 'मोह' सम्पर्कादेव ''मोहितः''।

गौरचन्द्रः शनैः शनैरुत्थाय मन्दाकिन्याः प्रकोष्ठके जगाम। निजगाद-''किञ्चित् पुनरपि गीयताम्।....''

मन्दाकिनी-भवतः स्मृतिविभ्रमः सङ्घटितोऽस्ति।

विमला.-(सहास्यम्) किन्तु 'बुद्धिनाशो' नाधुना जातोऽस्तिः गौरः अप्रतिभो भूत्वा स्वगृहं प्रत्यायात्। शय्यायां शयित्वा भावयति स्म- 'अस्मिन् वारे 'प्रणश्यति' उपस्थितो भवेत्किम्?'

**( ५ )**

गौरचन्द्रो निरीक्ष्य भावयामास-'काम, क्रोध, लोभ, मोहाः' एतदेकमेव वस्तु। अमुक (अन्यस्य)स्योपरि कामनायां सत्यां (स्वस्य) अमुकस्य क्रोधो भवति। स्वीयः अमुको यदि प्रबलो भवेत्तर्हि (दृग्गोचरीभूतस्य) पूर्वोक्तामुकस्योपरि भवेल्लोभः। एवं केन प्रकारेण (तामेतां) प्राप्नुयामिति निरन्तरं भावयतो 'बुद्धिभ्रंशो' भवति। गौरचन्द्रस्य मन्दाकिनीमुद्दिश्य क्रोधोऽभवत्। किन्तु भयमपि न्यूनं नासीत्, सुतरां मोहाक्रान्तः सन् ''प्रणश्यति'' निमित्तं भीतिमयं स्वप्नमवलोकयामास।

छागप्रभृतयो गृहोद्याने यदा चौर्येण 'पत्रं पुष्पं फलं' भक्षयितुं प्रयान्ति तदा लगुडाघातेन व्याकुलीभूताः सन्तः पलायन्ते। किन्तु लगुडाघातः, पलायनम्, पुनर्गमनं च एतदभ्यासत्रयं समानभावेन वर्द्धते नाम। अत एव ते पुनः पुनरायान्ति, पलायन्ते, पुनः पुनर्लगुडाघातं च सहन्ते।

किन्तु मानवस्य पक्षे एतत्स्वतन्त्ररूपम्। तस्य हि भवेद्बुद्धिभ्रंशः। एकद्ववारयोरेव लगुडाघातेन स्यादेतस्य सम्मोहः। न प्रसरेद्बुद्धिः। बुद्धिप्रचलनाभाव एव च मोहः। यदि बुद्धिरेकान्तत एव विनष्टा भवेत्तर्हि तमेतं वदन्ति मस्तिष्कस्य पक्षाघातम्। मा भूदेतादृशी अवस्था कस्यापि।

मिष्टरघोषो गौरस्य बाल्यसुहृत्। गौरस्तमेतं जिज्ञासते स्म- ''इदानीं क उपायः?''

घोषः-भवद्बुद्धेः किं सर्वथैव विलोपोऽभवत्?

गौरचन्द्रः-बुद्धिर्मे विलक्षणा, परं तस्याः समीपे चातुर्यं न मे परिचलति।

घोषः-तर्हि द्वन्द्वयुद्धमारभ्यताम्।

गौरचन्द्रः-सेयं कापुरुषता।

घोषः-तर्हि परित्यज 'उत्तेजनाम्'।

गौरचन्द्रः–पूर्वमेव एतत् सङ्कल्पं स्थिरीकृतवानस्मि।

घोषः–त्वं सम्पूर्णतया शीतलावाहनमसि। तव मनसि नास्त्यात्माभिमानः। यस्य नास्त्यहङ्कारः तस्य जीवनं भारभूतम्, बाधामयम्।

गौरचन्द्रेण निश्चितम्–'एतदेव सम्यक्'। एतद् बुद्ध्वा तस्याहङ्कारः प्रादुरभूत्। अभिमानपरवशः स नालपत्कमपि। आरब्धवान् स हि 'गीतापाठम्'। मन्दाकिनी एतत्स्वाभाविकं परिवर्तनमालोक्य परिजहास। अभिमानोत्फुल्लं स्वामिनो वदनमण्डलं चुचुम्ब। गौरः प्रोवाच– ''मन्दा.! त्वं खलु रमणीरत्नम्। नावलोक्यते तव.......कापि।''

''तुलना'' शब्दो गौरस्य विस्मृतिसागरे निममज्ज।

मन्दाकिनी–तर्हि विमला?

गौरो नासिकामाकुञ्च्य मुखतः प्रावदत्–''नैतस्याः भवत्या सह तुलना।''

किन्तु हृदये समपश्यत्–''अहङ्कारमध्ये, यदि परकीयं सुन्दरं वस्तु दृग्गोचरं भवति तदा मनसि क एको विलक्षणो भावः समुदेति।''

## चपण्डुकः

### ( १ )

चूडामणिमिश्रो विलक्षणप्रकृतेर्विद्वान्। दुरूहाणामप्रचलितानां च शब्दानां विचित्य विचित्य प्रयोगे तस्य महानभिनिवेशः। हेम–चन्द्र–हारावली–वैजयन्तीप्रभृतयो ये प्राचीनाः कोषास्तेषामद्भुताद्भुतशब्देषु तेन रक्तचिह्नमेव कृतमासीद् यदिमे तत्तदवसरेषु प्रयोज्या इति। अभिधानसङ्ग्रहो हि मिश्रमहाभागस्य सदा सहचर एव बभूव, यो नानाविधटिप्पणीभिश्चित्रितस्तस्य चेतस्तरङ्गं बहुधा सूचयाञ्चकार। किं बहुना, भोगीन्द्र–कात्यायनप्रभृतयो ये वा चिरन्तना अप्रकाशिताः कोषास्तेषामपि शब्देषु बहुधा मिश्रमहाभागस्य प्रयोगानुग्रहोऽभूत्। व्याकरणस्याद्भुताद्भुतेषु धातुरूपेषु सन्धिषु समासेषु तस्य प्रतिभा तथा प्रववृते येन हि लोकविलक्षणानां वाक्यानां स हि सृष्टिमकार्षीत्। प्रगल्भा अपि पडितास्तत्प्रयुक्तवाक्यानां किञ्चिद्विचिन्त्यैवाऽर्थं बुबुधिरे। वैयाकरणोऽपि वराकः शब्दानां सन्धौ बहुधा बभ्राम।

अखिलभारते सुप्रसिद्धोऽयं राजकीयः संस्कृतमहाविद्यालयः। महाविद्यालयेऽस्मिन् दूरदूरतस्ते शिक्षार्थिनः समाजग्मुर्येषां हि सुदृढपाण्डित्यमभीष्टं न केवलमुपाधिपत्रप्राप्तिमात्रम्।

परन्तु विद्यालयस्य प्रायो बहव एव विद्वांसो मिश्रमहाभागाद् बिभ्यति स्म–न कदाचिद्दुरूहप्रयोगेण दुरवसरेऽयं दुःखयेदिति। विद्यालयस्य वार्षिकोत्सवे विहितवक्तृताय वासुदेवविद्याविशारदाय प्रशंसन् प्रावोचन्मिश्रमहाशयः– 'निर्भरमचकादाहो'। विशारदवराकोऽर्थे व्यामुह्यन्नपि 'श्रीमतामनुग्रहः' इति गोलार्थं गदन् स्वासने निषसाद। पृष्ठतः स्थितैर्विद्यार्थिभिस्तु पृष्टमेव वराकैः– 'मिश्रमहोदयाः! वाक्यस्यास्य तात्पर्यं न ज्ञातम्। 'निर्भरमचका' इत्यस्य कोऽर्थः ?

**मिश्रमहोदयः**–आहो (अहो) निर्भरम् अचकाद् अशोभत (भवान्)।

आसीत्पण्डितानां प्रमोदगोष्ठी। भोजनसमये सहसा प्रावदन्मिश्रमहोदयः– 'बृबूकमानीयताम्'। विस्मयमिश्रं हास्यमनुभवत्सु सर्वेषु सकौतुकमप्राक्षीत्पाण्डेयः– 'महाशय! किमिदं बृबूकम्?'। स्वर्गतानां श्रीमधुसूदनविद्यावाचस्पतिमहाभागानां 'वैदिककोष'शोधकः शाण्डिल्यो मध्य एव प्रत्यूचे–'जलवाचकोऽयं शब्दः, किन्तु सोऽयं वैदिकः, न लोके प्रयुज्यते।'

**मिश्रः**– तर्हि इरा–उदकमित्यादयः शब्दा अपि वेदे प्रयुक्ताः। अत एव बहिष्क्रियन्तामिमेऽपि लोकगोष्ठीतः ?

जनार्दनो जनान्तिकमुवाच शाण्डिल्यम्– 'किमिति मुधा प्रगल्भसे,नाऽयमाग्रहिलो जातु मन्येत।

बालानां सरलसंस्कृतशिक्षणाय लिखिते पुस्तके 'रई' (मन्थदण्ड) इत्यस्य संस्कृतानुवादमाह मिश्रः– 'क्षुब्धमिति'। मार्मिकैः पृष्टमपि–भाव! बालानां कृते नायं शब्दः सरलः स्यात्। न चायं तथा प्रसिद्धोऽपि। अमरोऽपि– 'वैशाखमन्थमन्थानमन्थानो मन्थदण्डके' इत्येव तन्नामान्याह, नेदम्। किन्तु मिश्रमहाराजः सहुङ्कारं प्रत्यूचे–'क्षुब्ध–स्वान्त–ध्वान्तेत्यादि–पाणिनीयसूत्रे क्षुब्धमिति मन्थनदण्डस्य नाम किमिति तर्हि निर्दिष्टम्?

स हि सविस्तरं समर्थयते स्माऽपि यत् सरलानां प्रचलितानां च शब्दानां प्रयोगोऽपि किं पाण्डित्यं नाम? प्रौढिस्त्वियमेव यद्वयं वदामो लोकास्तु अस्मन्मुखप्रतीक्षिणो भवेयुरिति। मिश्रमहाशयो यत्र क्वचिन्नवीनं शब्दमश्रौषीत्त्वरितमिमं टिप्पणपुस्तकेऽलेखीत्। यावच्च शब्दस्यास्य प्रयोगं नाऽकरोत्तावन्नायं निर्वृतिमलभत। अध्यापनसमयेऽपि एवं विधानामेक–द्वशब्दानां प्रयोगो मिश्रमहाभागस्याऽनिवार्य आसीत्; यदाहि वराका विद्यार्थिनः केवलं परस्परं मुखनिरीक्षणमेवाकार्षुः। अर्थे जिज्ञासिते तु मिश्रमहोदयस्तान् सोत्प्रासं भर्त्सयामास–'हन्त ईदृशा अपि विद्यार्थिनः संस्कृतपण्डितानां सम्प्रति भाग्ये लिखिताः, इत्यादि। सर्वेऽपि विद्यालयस्य विद्यार्थिनो वराका दुःखमतिष्ठन्।

एकदा सदानन्दः कैलाशनाथश्चण्डीप्रसादश्चेत्येमे सम्भूय मन्त्रणामकार्षुर्यन्मिश्र–महोदयायाऽस्मिन् विषये काचन शिक्षाऽवश्यं देया स्यादन्यथा विद्यालयेऽस्मिन् वासो दुर्घटः।

कैलाशनाथेनोक्तम्– 'अहमस्मै शिक्षां त्वेवंविधां दद्यां यदयमाजन्मापि न विस्मरेत्,

किन्तु भवदादीनां सहयोगोऽपेक्ष्यते। नैवं भवेद् यदयमभियोगः अध्यक्षमहोदयपर्यन्तं गच्छेत्, अहं च वराको निर्वासनपुरस्कारं लभेय। अध्यक्षो हि विदेशिषु पूर्वमेव वक्रदृष्टिः।

चण्डी-सदानन्दाभ्यां साग्रहं प्रतिज्ञातम्- 'आवां ते सहकारिणाविति'।

कैलाशः- तर्हि अवसरः प्रतीक्ष्यताम्। इत्थमहं शिक्षायेयं येन अप्रचलितशब्दप्रयोगस्य शपथमेव कुर्यात्। आमरणं च दुरूहं शब्दं न प्रयुञ्जीतैव वराकः।

## ( २ )

हस्तगतोऽभूदवसरः।

तृतीयमन्तरमसूच्यत घण्टाघोषेण। समाजगाम मिश्रमहाशयस्याऽध्यापनकालः। श्रेण्यां स्थितो मिश्रमहाशयोऽध्यापनमकरोत्, कैलाशस्त्वाकाशं निरैक्षत, यथा नाऽस्य सम्बन्धः स्यादध्यापनेन।

मिश्रमहोदयः सोत्तेजनमाह्वयत्- 'कैलाश!'।

**कैलाशः**- (आकाशाद्दृष्टिं प्रत्याहरन्) 'श्रीमन्'।

**मिश्रः**- त्वं गगने किं पश्यन्नभूः?

**कैलाशः**- भवदध्यापनं शृण्वन्नभूवम्।

**मिश्रः**- मिथ्या त्वं भाषसे।

**कैलाशः**- (निर्विशङ्कं तथैव तिष्ठन्) सत्यमहं निवेदयामि।

**मिश्रः**- तर्हि वद, किं मयोक्तम्?

**कैलाशः**- श्रीमद्भिः प्रतिपादितम् अभिधामूला व्यञ्जना सा भवति, यत्र अभिधावृत्तिः----अभिधावृत्तिः---।

**मिश्रः**- अभिधावृत्तिः किम्?

**कैलाशः**- (सवैलक्ष्यम्) मम चित्तवृत्तिः क्षणमात्रमन्यत्र.......

**मिश्रः**- भोः सत्यं वद.......

**कैलाशः**- अहं क्षमां याचे।

**मिश्रः**- हन्त त्वमद्यावधि सर्वेषु कर्मसु एडमूक एव निरीक्षितः।

**कैलाशः**- भविष्यत्यहं भवदुपदेशेन चपण्डुकः सेत्स्यामि।

मिश्रो नवीनं शब्दमाकर्ण्यचकितोऽभूत्। साभिनिवेशं प्रत्यवादीत्- 'किमुक्तं भवता?'

**कैलाशः**– अहं भविष्यति चपण्डुको भविष्यामि।

**मिश्रः**– कोऽस्य शब्दस्याऽर्थः ?

**कैलाशः**– यः चातुर्यपुरस्सरं स्वकर्मणि निविष्टः स्यात्।

छात्रेषु दूरस्था मुखं परावृत्त्य, समीपस्थाश्च पुस्तकं व्यवधानीकृत्य हास्यवेगं गोपयाञ्चक्रुः। मिश्रमहाभागो हस्तस्थितं पाठ्यपुस्तकं सम्मुखस्थे पुस्तकाधारे न्यक्षिपत्, उच्चैरवदच्च–'चपण्डुक इति कोऽपि शब्दः संस्कृते नास्ति'।

**कैलाशः**– श्रीमतामविदितश्चेत्किमन्यो वराकः कुर्यात्। मया ह्ययं शब्दः कोषे दृष्टोऽस्ति।

मिश्रमहाभागो महताऽवधानेन मेधां परिचालयामास साहित्यसागरे, किन्तु निरुद्धप्रतिभः प्रोक्तवानन्ते–'नाद्यावधि मया सोऽयं शब्दः श्रुतः ?'

कैलाशस्य पुनरधिकं साहसमभूत्। प्रोक्तवानयम्– 'काशीतो महापण्डितैर्नवप्रचारितं 'दिव्यज्योतिः' पत्रं ह्यः पठन्नासम्, तत्रैवायं शब्दो मया व्यलोकि।

मिश्रमहोदयः सवैलक्ष्यक्रुधं शब्दमिमं निजटिप्पणपुस्तके व्यलिखत्, अपृच्छच्च–तस्य कोषस्य किं नाम ?

**कैलाशः**– वाचस्पत्यं बृहदभिधानम्!

तृतीयान्तरस्य समाप्तौ त्रयोऽपि सुहृदः सममिलन्।

**चण्डी.**– भवताऽयं चपण्डुकः सम्यगन्विष्टः।

**कैलाशः**– (हस्तस्थितं पुस्तकमास्फाल्य) अथ किम्। स जानाति नवनवान् शब्दानहमेव जाने। इदानीं कीदृशमुत्तरं प्राप्तम् ?

**सदानन्दः**– स शब्दो लिखित्वा गृहं नीतोऽस्ति। अवश्यं कोषेष्वन्वेषणं भवेत्।

कैलाशः– क्रियतां गवेषणम्। वयमपि प्रगल्भामहे यदेकः शब्दोऽस्माभिरपि तेभ्यः शिक्षितः। आजीवनकालं कोषपृष्ठानि कामं परिवर्तयन्तु नाम। अहमपि पश्यामि कुतोऽयमन्विष्यते ? अयं तु ममैव तावदाविष्कारः।

**सदानन्दः**– अये! भवता ईदृशः शब्दः निर्दिष्टो यो नास्त्येव संस्कृतभाषायाम् ? तर्हि त्ववश्यं निग्रहो भावी। किं तदा उत्तरं प्रतिपत्स्यसे ?

**कैलाशः**– अलं चिन्तया। तूष्णीं स्थिताः कौतुकं पश्यत।

**चण्डी.**– कदाचित्पाशपतितो न भवेः ? अतीवाऽऽग्रहिलोऽसौ।

**कैलाशः**– यदि भवतां सर्वविधं साहाय्यं स्यात्तर्हि अस्पृष्टो बहिर्मुच्येय।

**सदानन्दः**-एतत्कृते तु न चिन्ता कार्या।

(३)

अपरस्मिन्दिने श्रेण्यामागत्यैव कैलाशं सम्बोध्य प्रोक्तं मिश्रमहाभागेन 'वाचस्पत्यं बृहदभिधानं तु मत्सविधे नास्ति, किन्त्वन्येषु सर्वेष्वपि कोषेषु मया भूयोऽन्विष्टम्, स हि शब्दो नास्त्येव। वाचस्पत्यमभिधानं ते द्रष्टुमिच्छामि।'

**कैलाशः**- यद्गृहे तत्पुस्तकमासीत्तत्पण्डितस्य पुत्रः संस्कृतं विहाय सम्प्रति वैदेशिकभैषज्यं प्रयागेऽधीते। स मे मित्रम्, तदागमने एव तत्पुस्तकमानेतुं शक्येत।

**मिश्रः**- न किल जीर्णं तत्पुस्तकं तेन सहैव नीतं स्यात्। अतः किं गृहे तत्र शक्येत द्रष्टुम्? अस्तु कदा तद् द्रष्टुं शक्येत?

**कैलाशः**- दुर्गापूजाया अवकाशे, यस्य हि साम्प्रतमप्येकमासोऽवशिष्यते।

**मिश्रः**- कैलाश! अहं सर्वं ते भाषितं सम्यगवगच्छामि। चपण्डुकः कोऽपि शब्दः कोषे नास्ति। एकवारं मिथ्या समुदीर्य तत्कृते मिथ्याशतमिदं स्पष्टं कल्पयसि।

**कैलाशः**- (दृढतया) मैवं श्रीमन्।

**मिश्रः**- अस्तु । दशहराऽवकाशोऽप्यागमिष्यत्येव। तत्समये तत्पुस्तकं तस्मात्सङ्ग्राह्यम्।

मिश्रमहोदयस्य मनसि महान् क्षोभ आसीत्। विजयदशम्या अवकाशे समाप्ते, द्वितीयस्मिन्नेव दिनेऽप्राक्षीत्सः- 'अप्यागतः स ते सुहृत्? क्व तानि कोषस्य पत्राणि?'

**कैलाशः**- पत्राणि मयाऽवश्यमानीतानि, किन्तु मन्ये महेन्द्रस्य प्रकोष्ठके तानि विस्मृतानि।

**मिश्रः**- तर्हि छात्रावासो न विद्यालयाद्योजनान्तरितः। गत्वा त्वरितमेवानीयताम्।

**कैलाशः**- किञ्चिद्विलम्ब्यैव परावृते तत्र।

**मिश्रः**- प्राप्तानि तानि पत्राणि?

**कैलाशः**- न। प्रकोष्ठकं तन्निबद्धतालकम्।

निरोधयत्ने कृतेऽपि जहसुः सर्वे छात्राः।

मिश्रमहोदयो विषदिग्धोऽभवत्। दुग्धमुख एकश्छात्रः श्रेणीस्थानां सर्वेषां सम्मुखे एव मामयं प्रतारयति। अत एव क्रोधेनाऽवादीत्- 'भिन्धि तालकमिदम्'।

**कैलाशः**- तालकमूल्यं को दद्यात्?

**मिश्रः**– अहम्।

**कैलाशः**– तर्हि गच्छानि? तालकयन्त्रं त्रोटयानि?

कैलाश उत्थाय ततोऽगच्छत्। मिश्रमहाभागः क्रोधाविष्टो नाऽऽसने स्थातुमशकत्। क्षोभेण श्रेणीभवने इतस्ततश्चङ्क्रमणमकार्षीत्।

कैलाशः सहसैव पत्राणि तान्यादाय तत्राऽऽगच्छत्। त्रोटितं च तत्तालकं पुस्तकाधारे न्यधात्।

मिश्रमहाभागो बृहदभिधानस्य पत्रेषु तेषु सावधानां दृष्टिं प्राहिणोत्। इतश्छात्रास्तु सर्वे निर्निमेषदृष्टयो मिश्रमहाभागमभ्यलोकयन्।

**कैलाशः**– श्रीमन्! अपि दृष्टः स शब्दः?

**मिश्रः**– (आश्चर्येण) आम्, अर्थोऽपि च स एव दत्तोऽस्ति।

**कैलाशः**– श्रीमद्भिरुक्तम्– अहं मिथ्याभाषीति।

**मिश्रः**– किन्त्वाश्चर्यम्। अन्येषु कोषेषु काव्यादिषु वा नाद्याप्ययं शब्दः कुत्रचिद्दृष्टः।

मिश्रमहाभागेन तालकस्य मूल्यं सार्द्धं रूप्यकं तदैव तस्मै वितीर्णम्।

विद्यालयस्याऽवकाशे जाते सर्वेऽपि छात्राः कैलाशं पर्यवारयन्। अकथयंश्च– 'त्वयाऽद्य दर्शितो विचित्रश्चमत्कारः।'

**कैलाशः**–नायं चमत्कारः, अयमप्येको ममाविष्कारः, किन्तु साम्प्रतं सर्वेषामपि वः साहाय्यस्याऽऽवश्यकता।

सर्वेऽपि सोत्साहमवदन्– 'वयं सर्वेऽपि भवन्तमनुसरेम'।

**कैलाशः**– अलमन्येन। अस्य शब्दस्य विषये यदि क्वचिद्भवतः पृच्छेत्तर्हि स्पष्टं निषिध्यत। इयं घटना यथा जातैव न, तथा सर्वमपि विस्मरत।

सर्वैरुक्तम्– 'वयं सर्वेऽप्यस्यां प्रतिज्ञायां सुदृढाः'।

**(४)**

मिश्रमहाभागः साम्प्रतं नवीनस्याऽस्य शब्दस्य प्रयोगार्थमत्युत्कण्ठितोऽभवत्। दैवयोगात्तेषु दिनेषु महाविद्यालयस्यास्य वार्षिकोत्सवः सन्निहित आसीत्। तदुपरि नाट्यसंघेन नाटकाभिनयस्याप्यायोजनमक्रियत। तस्य च प्रबन्धो मिश्रमहोदयस्यायत्तोऽभूत्। अत एवैकदा कालेजाध्यक्षमहाभागाश्चूडामणिमिश्रमपृच्छत– 'नाटकस्य विषये साम्प्रतं का परिस्थितिः?'

**मिश्रः**– अशास्यते–श्रीमतामुपालम्भस्याऽवसरो न स्यादिति।

**अध्यक्षः**– अपि सुरेन्द्रेण स्वीयोऽभिनयःसर्वोऽपि सज्जीकृतः? प्रगते ह्यभ्यासाभिनये

स एव सर्वतः कुण्ठः शिथिलश्चाऽवलोकितः।

नाधुना मिश्रमहाभागेन धैर्यं रक्षितुमपार्यत। स हि त्वरितं प्रत्यूचे– साम्प्रतं स एव चपण्डुकः प्राप्येत।

अध्यक्षश्चकितः सन्नपृच्छत्–'किमुक्तं भवता, स कीदृशः प्राप्येत?'

मिश्रेणाऽऽम्रेडितम्– 'चपण्डुकः।'

अध्यक्षः– कोऽस्यार्थः?

**मिश्रः**– यो हि चातुर्यपुरस्सरं स्वकर्मणि निविष्टः।

**अध्यक्षः**– अपि कस्मिञ्चित्पुस्तकेऽयं दृष्टो भवता?

**मिश्रः**–नैव। वाचस्पत्ये वृहदभिधाने विलोकितः।

अध्यक्षः– तदभिधानमहमपि द्रष्टुमिच्छामि।

मिश्रः– अहं श्वस्तदानयेयम्।

मिश्रमहाभागः स्वस्थानं समुपेत्यैव कैलाशमाह्वयत्, प्रावदच्च–'बृहदभिधानस्य तानि पत्राणि श्वोऽत्राऽऽनेयानि।'

**कैलाशः**– परं तानि पत्राणि तु मनोहरेण सह गतानि।

**मिश्रः**– स क्व गतः, कदा च परावर्तिष्यते?

**कैलाशः**– अध्ययनाय शर्मण्यदेशं गतः चतुर्वर्षानन्तरं परावर्तेत।

**मिश्रः**–अरे! एतत्तु विषममुपस्थितम्। (पुनः किञ्चित्कालं विचार्य) तद्'दिव्यज्योतिः' पत्रं यस्मिन्स शब्दः पठितस्तदेवाऽऽनय।

**कैलाशः**– तत्कृते तु मद्गृहे महान् कलहोऽप्यभूत्। तद्धि बालकैः खण्डशः कृत्वा प्रक्षिप्तम्।

**मिश्रः**– भद्र! यथैव भवेत्तथा तदभिधानस्य पुस्तकमन्यतः कुतोऽपि सङ्ग्राह्यं भवता। अध्यक्षस्तद् द्रष्टुं काङ्क्षति।

**कैलाशः**– यदाज्ञापयन्ति श्रीमन्तः। यावच्छक्यमहं यतेय। श्रीमद्भिरपि चैष्टितव्यम्।

नगरे सर्वतोऽप्यन्विष्यंश्चूडामणिमिश्रो वङ्गीयपण्डितस्यैकस्य गृहे वाचस्पत्यमभिधानमलभत। अहो ईश्वरेण सङ्कटो निवर्तित इति, स हि परमं प्रासीदत। किन्तु यदा तत्स्थलं दृष्टं तदा विस्मयस्य नाऽऽसीत्परिसीमा। सर्वोऽपि पूर्वदृष्टो विषयस्तत्रैवासीत् किन्तु चपण्डुकशब्दः स तत्र नासीत्। अतीव व्यामोहे न्यपतद्वराकः। प्रसङ्गस्याऽसम्भवेऽपि पुस्तकस्य प्रत्येकपत्रं निरैक्ष्यत ।

विद्यालये समागत्यैव कैलाशमन्यान्यांश्च विद्यार्थिनस्तदेतस्य शब्दस्य विषये बहुतरमपृच्छत्, किन्तु सर्वेऽप्यभूतपूर्वं विस्मयं प्रकाशयन्तः प्रत्यवदन् 'नैवंविधः शब्दोऽस्माभिर्ज्ञातः, न वा पठितः, न च श्रुतः।'

मिश्रमहाशयः क्रोधेऽग्निशर्माऽभूत्, किन्त्वासीत्परवशः। कस्य किं कुर्यात्? विद्यालयस्य सम्पूर्णेऽपि कार्यकाले अध्यक्षस्य साम्मुख्यं यत्नेन पर्यहरत्। मनसि सभयमचिन्तयत्- 'चेदध्यक्षमहोदयो बृहदभिधानं दद्याचेत्तर्हि किमहं कुर्याम्?

(५)

विद्यालयस्य मध्यविश्रामे पुण्डरीकपाण्डेयोऽपृच्छत्- 'अयं चपण्डुकः कुतः समाहूतः? अस्मादादिभिस्तु नायं शब्दः कदाचिदाकर्णितः।' मिश्रमहोदयोऽतीव चकितः सन्नपृच्छत्। 'केनाऽयं शब्दो भवते सूचितः?'

**पाण्डेयः**- बहवो विद्यार्थिनः समागत्याऽपृच्छन् प्रावदंश्च यदयं शब्दो भवत्सकाशाच्छ्रुत इति। मम विचारे नायं शब्दः संस्कृतभाषायां कुहचित्प्राप्येत। भवता क्वायं दृष्टः?

मिश्रस्तूष्णीमासीत्। एतावतैव, अध्यापकचिन्तामणिचतुर्वेदस्तात्राऽऽगमत्। सोऽप्यपृच्छत्- 'अहह मिश्रमहोदय! चपण्डुकाख्या केयं नवीनाऽऽपत्?'

मिश्रमहोदयो रूक्षतयाऽवदत्- 'नाहं जानामि।'

**चतुर्वेदः**- अतीव विस्मयकरमिदम्। भवान्नवीनमेकं शब्दं पूर्वं जल्पति पश्चाच्च

निषिध्यति–नाहं जानामीति।

**मिश्रः**– कः कथयति यदयं शब्दो मया प्रवर्तित इति?

**चतुर्वेदः**– आचार्यश्रेण्या विद्यार्थिनो वदन्ति।

मिश्रमहोदयस्य नेत्राभ्यां स्फुलिङ्गा इव वर्षिताः। सोऽवदत–'ते सर्वे धूर्ताः सन्ति। मुधाऽपवदन्ति माम्।'

मिश्रमहोदयः सङ्कटादस्माद्यथाकथञ्चिदात्मानमवमोच्याऽवकाशसमये गृहं गच्छन्नासीत्। एतावतैवाऽध्यक्षमहोदयः सम्मुखेऽमिलत्, किन्तु अनुकूलदैववशान्न किञ्चिदप्राक्षीदसौ।

यथैव मिश्रो विद्यालयाङ्गणं गच्छति तथैव उपाध्यायश्रेण्या ग्रामीणः कश्चिद्विद्यार्थी समागत्याऽपृच्छत् 'माननीयाः! चपण्डुकपदस्य कोऽर्थः?'

मिश्रः सिंहगर्जनयाऽवदत्– 'तव शिरः।'

परप्रेरणया समागतो विद्यार्थ्यसौ ह्रीत–भीतोऽभवत्।

मिश्रमहोदयो यथैव गृहमुपागच्छत्तथैव भृत्यः पत्रमेकं तद्धस्तेऽदात्। आसीत्तत्र लिखितम्– 'प्रिय चपण्डुकमहोदय!' इतोऽग्रे नाऽशक्नोत्पठितुमयम्। पत्रस्य खण्डखण्डान्यकरोत्।

महाविद्यालयस्याऽस्य विद्यार्थिभिर्नवीनमिदं कौतुकं हस्तगतमक्रियत। यत्र यत्रैव मिश्रमहाभागोऽव्रजत्तत्र तत्रैव परस्परमिङ्गितेनाऽसूचयन्– 'इमे चपण्डुकमहोदया गच्छन्ति'। विद्यालयभवनस्य कापि भित्तिरेवंविधा नासीद्यत्र चपण्डुकशब्दो नाङ्कितः स्यात्। शनैः शनैरन्येषां विद्यालयानां छात्रा अपि वृत्तमिदमविदन्। एकदा कस्यचिद्विद्यार्थिनः पत्रमध्यक्षस्य सविधे समागच्छत् 'अहम् अध्यापकचपण्डुकमहोदयस्य सेवायां पुस्तकमिदमुपहर्तुमिच्छामि' इति।

एकदा चलच्चित्रपटदर्शनाय समगच्छत मिश्रमहोदयः। तत्र मध्येभवनमेव सर्वैरेव विद्यार्थिभिर्हर्षनादोऽक्रियत–'धन्यवादः श्रीचपण्डुकमहोदयाय'। वराकस्य मिश्रस्य गृहाद् बहिर्निःसरणमपि दुष्करमभूत्।

अन्ते कण्ठागतप्राणेन मिश्रमहोदयेनैकदा रहसि कैलाशमाहूय प्रोक्तम्–'कैलाश! त्वं मे शिष्यः, अहं च ते गुरुः। एवं सत्यपि साम्प्रतं मित्रभावेन त्वां पृच्छामि–किमिदं रहस्यम्। बृहदभिधानस्य पुरातनेषु तेषु पत्रेषु मया स्वयं निजनेत्राभ्यां स शब्दः स्पष्टं विलोकितोऽभूत्। परमिदानीं कस्मिन्नपि तत्पुस्तके स शब्दो नाऽऽलोक्यते। किमिदमिन्द्रजालम्?'

मिश्रमहोदयस्य दैन्यभावेनानेन कैलाशस्य चित्तं सम्प्रति बलाद् दयापरवशमक्रियत। स हि निर्भयभावेनाऽवादीत्– 'सत्यं त्विदमस्ति यद् वृहदभिधाने न कोऽपि चपण्डुकशब्दोऽस्ति। मया ह्येकस्मिन् मुद्रायन्त्रालये प्रबन्धं कृत्वा एकपुटका (फार्म) त्मकः स कोषो नवीनतया मुद्रापितो येन हि प्रकरणानुसारी स शब्दः सन्निविष्टः स्यात्। पुस्तकस्य अक्षरसञ्चिकादिकं सर्वमपि प्राचीनपुस्तकवन्न्यवेश्येत येन वः सन्देहो न स्यात्।'

**मिश्रः**– एकमन्यदपि ज्ञातुमिच्छामि....

**कैलाशः**– (विनयेन नतवदन एव) तदपि निवेदयामि। इदं सर्वमेतदर्थमायोज्यत यद् वयं सर्वेऽपि नवनवशब्दान्वेषणव्यसनितया भवतामतीवाकुला अभूम।

**मिश्रः**– कथय कथय। किमिति मध्ये विरमसि। एतदर्थं यदहं व्यसनमिदं परित्यजेयम्?

**कैलाशः**–आम्, श्रीमन्! सम्प्रति क्षम्यताम्। नाग्रे कदाचिदेवमविनयः स्यात्।

**मिश्रः**– अस्तु, प्रतिपदवकाशदिने मद्गृहे भोजगोष्ठ्याः प्रबन्धोऽस्ति। भवानपि तत्र सङ्गच्छताम्।

**कैलाशः**– अहमेकाकी नागन्तुं शक्नुयाम्। चण्डीप्रसादसदानन्दावपि सहचरौ स्याताम्।

**मिश्रः**– किमर्थम्?

**कैलाशः**– अस्मिन्कर्मणि तावपि समस्वत्वाधिकारिणौ। मुद्रणव्ययोऽपि ताभ्यां सोढः, श्रेण्या अन्ये विद्यार्थिनोऽपि ताभ्यां वशीकृताः।

चिन्तापगमेन लघूकृतचित्तश्चूडामणिमिश्रः सस्मितमवोचत्–'भवत्वेवमपि। किन्त्वपूर्वमिदं शिखित्रयं निजगृहे स्वयमहमामन्त्रयामि। शिवः शिवं विधेयात्।'

# शिष्या

## (१)

संस्कृतसाहित्यसम्मेलने समागतानामस्माकं व्यत्युस्त्रीणि दिनानि। नैतेषु दिनेषु चिराद्दिदृक्षितापि वाराणसी केनापि सुहृदा विलोकयितुमशक्यत। दिने सम्मेलनम्, रात्रौ विषयनिर्वाचिनीति चर्याचक्रेणैव सम्पूर्णसमयस्य चूर्णनमक्रियत। गङ्गास्नानसमये विश्वेश्वराऽन्नपूर्णादिदर्शनं यत्किञ्चिदभूत्तदेव वाराणसीसमागमनसाफल्यममन्यत मनसि। किन्तु चिराददृष्टानां नानानगरेभ्यः समागतानां मित्राणां संलापसौख्येन सर्वाऽपि विनोदसामग्री साङ्गोपाङ्गा समपाद्यत। अस्तु ,तृतीयादिने यथैव सम्मेलनकार्यसमाप्तिर्जाता तथैवास्माकमावासधर्मशालाया

दृश्यमेवाऽन्यादृशमभूत्। स्थाने स्थाने गृहयात्रार्थं स्रस्तरादीन्यबध्यन्त। कश्चित्पेटिकां पूरयति, तर्ह्यन्यः पत्र-पुस्तकादीनि निबध्नाति। बहूनां कोष्ठकद्वारे तु अश्वशकटिरप्यागता यामास्थाय ते धूमशकटिदर्शनार्थमातुरा बभूवुः।

इतोऽस्माकं मण्डल्यामपि यात्रालहरिः प्रावर्तत। सर्वतः पूर्वं रमेश इतस्ततो विकीर्णानि निजवस्तूनि सञ्जग्राह। जयकान्तस्तदिदमालोक्याऽवोचत्-'कथं रमेश! किं रात्रेर्मन्त्रणा न मनसि संलग्ना? इयद्धनव्ययं कृत्वा समायातोऽस्येतावद्दूरम्, तर्हि कञ्चिद्विनोदमप्यनुभव। दिनद्वये न संसारः शून्यो भवेत्।'

रमेशः-किं करोमि सखे! कालेजः कालयति।

''अरे कालेजोऽपि काले कस्मैचित् कालाय कमप्यवकाशं ददात्येव। किमित्यन्यथा नियतदिनानामवकाशो नियतः ?( **अध्यापको वत्सरे, मासस्यैकस्याऽवकाशं प्राप्तुं शक्नोति।** ) किं वयं सर्वे निष्कर्माणः।''

आसन् सर्वेऽपि तस्मिन्समये उत्कर्णाः। अत एव संलापशब्दं श्रुत्वैव सुहृन्मण्डल्यास्तत्रैवाऽधिवेशनमभूत्। हरिहरः समुत्त्थाय सपरिहासमवदत्- ''समित्यामस्यां ममैकः प्रस्तावोऽस्ति यदस्माकं प्रियसुहृत श्रीमान् रमेशचन्द्रमहोदयः स्वदेशयात्रायाः पवित्रे कार्ये संलग्नोऽस्ति। अत एव तत्रभवन्तोऽस्मिन् साहाय्यं सम्पादयन्त्विति''।

मनोहरः-'अहं हृदयस्यान्तस्तलेन तदेतत्समर्थयमानः साहाय्यकार्यस्य प्रारम्भमेव कर्तुमिच्छामि। भो रमेश! देहि ते वस्तुस्तूपम्, यावत्सज्जयामि' इति ब्रुवन् बन्धनरज्जुं विस्रस्य स्रस्तरं विस्तारयामास। एकः सुहृत्तदुपरि निषसाद।

जयकान्तेनोक्तम्-''वस्त्रप्रावृतेषु सर्वेषु भवत्सु निरावरणाङ्गो 'हंसमध्ये बको यथा' नाहं शोभे।'' इत्युक्त्वा रमेशस्य राङ्कवं( **दुशाला।** ) गात्रे प्रावारयत्।

गोपेशः-वावदूकानां सम्मेलने शुष्ककण्ठस्य न मे निर्वाहः। भवतु, जलेनैव तावत्कण्ठमार्द्रीकरवाणीत्युक्त्वा कूपाज्जलाहरणाय रमेशस्य पात्रं गृहीत्वा प्रकोष्ठाद्बहिरभवत्।

रमेशः-ज्ञातं मया यन्मूर्तिमत्सु शुभशकुनेषु श्रीमत्सु समुपस्थितेषु मम यात्रा न सेत्स्यतीति। किन्तु भवन्तः किं चिकीर्षन्तीति नाद्यापि बुध्यते।

गोविन्दः-किं चिकीर्षाम इति तु कार्यकाले ते सम्यग् विदितं भवेत्। परं वयं सर्वे 'शकुनाः'( **पक्षिणः, 'शकुनिशकुन्तशकुनद्विजाः' अमरः।** ) इति भवता प्रोक्ते, कः कीदृशः शकुन इति जिज्ञासा तावदुदेति।

गोपेशः-अवश्यं रमेशः 'शुकः', सुहृत्प्रीतिं विस्मृत्य 'तोताचश्मतया' पलायमानत्वात्।

हरिहरः-जयकान्तः अवश्यं 'कान्तैका', कलकण्ठतया च कलितनीलावगुण्ठनतया च तथैव प्रतीयमानत्वात्।

इदानीं सर्वेऽपि जयकान्तं वेष्टयामासुः। जयकान्तः सर्वेषामपेक्षया वयसि लघुर्गौरनिर्लोमशरीरो मृदुलगात्रयष्टिश्चासीत्। अत एव सर्वेपि तम् 'कान्ता' इति मित्रप्रीत्या परिजहसुः।

रमेशः-अस्तु- विरमतु परिहासः। इदानीं निश्चीयतां किं वाऽस्यां यात्रायां चिकीर्षितम्? यदि कश्चिन्मनोविनोदः स्यात्तर्हि तु विलम्बोऽपि स्थाने। अन्यथा व्यर्थमेव कार्यक्षतिः कस्मै फलाय स्यात्?

गोविन्दः-दृश्यताम्, मित्रगोष्ठ्यां परिहासो यदि विरमति तर्हि तु प्रस्थीयतामस्मिन् क्षण एव सर्वैर्गृहं प्रति, न कस्यापि कार्यक्रमस्यावश्यकता। इह हि सर्वत्रापि परिहासोऽनुस्यूतो भवेत्। 'मुहुर्रम' मूर्तिर्न कश्चिदिह दृश्यते। अस्तु, भवत्प्रस्तावाक्षरेषु एतावन्मात्रमेव मे परिशोधनमासीत्, इदानीं निश्चीयतां यथेच्छं कार्यक्रमः।

वाद-विसंवादैरिदं निश्चितमभूत् यत्सम्प्रति दिनद्वयं स्थितिर्भवेत्, तत्रैकदिवसेन वाराणसीदर्शनम्, एकेन च वासरेण मध्ये प्रयागदर्शनं क्रियेत। तत्र प्रयागे मनोविनोदस्य प्रबन्धस्तन्नगरवासिना गोविन्देन कर्तव्यम्। सोऽयं च विनोदो यावच्छक्यमभूतपूर्वः सदा स्मरणीयश्च स्यादिति सर्वेषामेकमुखेन प्रस्तावः समभूत्।

कार्यनिर्वाचनसमितेरस्या विसर्जनोत्तरं यथैव सर्वे आवश्यककार्येषु समलगन् तथैवाऽकस्माद् जयकान्तनाम्ना **(टेलिग्रामः।)** तडिद्वृत्तमुपालभ्यत। यत्रासील्लिखितम्-(अतिशीघ्रमागम्यताम्)'। नासीत्कार्यस्य निर्देशः। न केवलं जयकान्तस्यैव, अपि तु सर्वेषामेव मनसि चिन्तारेखेवोत्कीर्णा। अस्तु, निजवस्तूनि सज्जीकृत्य त्वरिततरमेव जयकान्तः कान्हपुरं प्रास्थित। नैतादृशे समये तं प्रतिरोद्धुं कस्यचिन्मनः प्रावर्तत।

यावच्छक्यं काश्याः सुप्रसिद्धानि स्थानानि दृष्ट्वा सायं यदा वयं निवासस्थाने समागतास्तदा गोविन्दचन्द्रेण प्रोक्तम्-'यदि सर्वेषामनुमतिर्भवेत्तर्हि अहं भवद्भ्यः पूर्वगामिना वाष्पयानेन प्रयागं यामि, येन तत्र सर्वेषां वो निवासादिप्रबन्धं यथावत्सम्पादयामि। भवद्भिस्तु अपररात्राऽऽगामिन्या वाष्पशकट्या यथानिश्चयमागन्तव्यमिति।'

केषुचिन्मित्रेषु विमतेष्वपि, सुहृन्मण्डल्या एव कार्यमिति कृत्वा बहूनामस्मिन्ननुमतिरप्यजायत। अत एव बहुमतानुरोधेन गोविन्दचन्द्रः पूर्वमेव प्रयागं प्रातिष्ठत।

(२)

गोविन्दचन्द्रेण स्वगृह एवास्माकं निवासप्रबन्धो व्यधीयत। आसीत्तद्गृहमतिविस्तीर्णं विशालं च। नीचैःखण्डस्याऽऽस्थानभवनेऽस्माकं सर्वेषामावासोऽभवत्। उपरिखण्डे तु गोविन्दस्य पारिवारिकनिवासोऽभूत्।

त्रिवेणीस्नानं कृत्वा प्रयागस्यावश्यकावश्यकस्थलेष्वभ्रमाम। एकस्य परिचितमित्रस्याऽऽग्रहान्माध्याह्निकभोजनमपि सर्वेषां तद्गृह एव समपद्यत। अत एव भोजनादितो निवृत्ता वयमपराह्णेऽपि भ्रमणक्रमं नाऽत्यजाम। प्रसिद्धप्रसिद्धस्थानानि दृष्ट्वा यदा वयं न्यवर्तामहि तदाऽप्यासीत्सायंकाले विलम्बः। अत एव सर्वेषामिच्छानुसारं नौकारोहपूर्वकं 'सङ्गम' दर्शनं निरधार्यत। नौकामारुह्य सलिलकणशिशिरं मारुतमासेवमानेषु सर्वेषु मनोहरेणोक्तम्-'कथय रमेश! त्वादृशस्य मारवजीवस्य भाग्ये यदेतत्सुखमघटत तत्पुण्येऽस्माकमधिकारोऽन्यस्य वा?'

रमेशः–वासन्तिकरात्रौ प्रतीक्षापरस्य कस्यचित्कोमलजीवस्य दीर्घनिःश्वासानां दायभागपि भवानेवास्ति, अन्यो वा?

गोविन्दः–स जीवः कोमलोऽस्ति कठोरो वा इति तु दूरस्थितानां नास्कमाकं विदितम्, परं कामसूत्रपण्डितः स जीव इति त्वनुमिनुमः।

मनोहरः–अयि भोः किमेतत्? कथमिदमनुमितम्?

हरिहरः–रमेशस्य कपोलस्थितैर्नखक्षतैः।

सर्वेऽपि जहसुः।

गोविन्दः–नहि नहि। रमेशस्य मतमस्ति यत्पण्डितपत्नीभिः संस्कृतमवश्यमध्येयं तत्रापि च कामसूत्रम्।

गोपेशः–तर्हि तत्परीक्षा कुत्र भवेत्?

गोविन्दः–प्राचीनमिदं शास्त्रम्। अत एव प्राचीनरीत्या गृह एव परीक्षाप्रबन्धः कर्तव्यः स्यात्।

गोपेशः–प्रबन्धो गृहे वा भवतु, रमणीये कस्मिंश्चिदुपवने वा एतन्न मे प्रष्टव्यम्। किन्तु परीक्षकः काशीकलकत्तादिसुप्रसिद्धपीठस्थो भवेदन्यो वा?

गोविन्दः–नहि नहि। 'हाउस एग्‌जामिनेशन (गृह्यपरीक्षा)' नियमेन अध्यापक एव परीक्षायामधिकृतो भवेत्। कथं भो रमेश! एतदेव न?

हरिहरः–अहो त्रिवेणीतटे कीदृशी पुण्यचर्चा परिचालिता पण्डितैः। कुतो न स्यात्, सुसभ्याः संस्कृतपण्डितास्तावत्! अत एव हि स्वरुचेरनुसारमादर्श उपस्थाप्यते।

गोपेशः–आदर्शस्तु भवता उपस्थाप्यतां नापितेन( **दर्पणं दर्शयित्वा मेलकादिषु नापितेन पारितोषिकं प्राप्यत इति राजपुत्रदेशाचारः।**) वा। अत्र तु वसन्तोत्तेजितस्य मनसो विनोदः क्रियते।

हरिहरः–अहह गृहादागतानां दिनान्येव कति व्यतीतानि, यद्वसन्तोत्तेजनापि समजायत।

अस्तु. सान्ध्यभ्रमणं कृत्वा यदा वयमावासं प्रतिन्यवर्तिष्महि तदा समभवद्भूयान् विलम्बः। गोविन्दस्य गृहजना भोजनसामग्रीं सज्जयित्वाऽस्मत्प्रतीक्षायामतिष्ठन्। यथैव वयं गृहमागमाम तथैवास्मानुपरि (तृतीयखण्डे) समाहूय साङ्गोपाङ्गं भोजनमकारयन्। भोजनं निर्वर्त्य उपरिखण्डात्सोपानमवतरद्भिर्दृष्टमस्माभिर्यद् मध्यमखण्डस्य प्रसाधिते एकस्मिन् प्रकोष्ठके स्थितो गोविन्दस्ताम्बूलानि सज्जयतीति। तस्मिन् कक्ष्ये गोविन्दस्य पारिवारिकं जनं कञ्चिददृष्ट्वा एकाकिनं गोविन्दमेव च ताम्बूलान्युपयुञ्जानमालोक्य ताम्बूलत्वराकुलो हरिहरस्तत्सविधे गत्वा तद्धस्तात्ताम्बूलमाच्छिद्य सविनोदमभ्यवजहार।

एतस्मिन्नेव समये जवनिकाऽऽच्छन्नाद्भवनान्तरान्निःसृत्य सुन्दर्येका गोविन्दस्य चरणयोः सविनयं प्राणमत्। कृतमुखावगुण्ठनामेनामालोक्य 'गोविन्दस्य काचित्पारिवारिकमहिलेयम्' इति मनसि सङ्कुचन् हरिहरः प्रत्यागन्तुमैच्छत्। परं गोविन्दोऽवगुण्ठितामेतामवदत्–'एते उज्जयिनीनिवासिनः प्रसिद्धाः संस्कृतपण्डिताः। साहित्याचार्याः मम मित्राणि'।

सा तु संयोजितकरद्वया अतिविनतगात्रयष्टिर्हरिहरमपि सादरं प्राणंसीत्। तस्या आकारप्रकारयोर्भक्तिर्विनयः सौष्ठवं च सुस्फुटमस्फुरत्। हरिहरस्तु किञ्चित्सङ्कुचितश्च विस्मितश्च सुप्रीतश्च स्तब्धमतिष्ठत्।

व्यतिकरमिमं दृष्ट्वा नीचैस्तलं गच्छन्तो वयं सर्वेऽपि मध्येसोपानमेवाऽवातिष्ठामहि, कौतुकपरवशो न कश्चिदपि नीचैर्गन्तुं प्राभवत्। गोपेशेनोक्तम्–'मन्ये, गोविन्दचन्द्रस्य काचित् पोष्यसम्बन्धे वधूः। अथवा, इदानीमेव परदेशादागता काचित्सम्बन्धिनी। अत एवाऽत्राऽस्माकमवस्थितिर्नोचिता।'

**मनोहरः**– धन्योऽसि! यदि पोष्यसम्बन्धिनी, तर्हि हरिहरेण सह परिचयस्य कासीदावश्यकता? गोविन्दस्य यत्र कुटुम्बस्त्रियो निवसन्ति, तत्र न कृत्वा अत्र प्रणामस्य वा कोऽभिप्रायः?

**रमेशः**– यत्किञ्चिदस्तु। ताम्बूलमत्रैव गृहीत्वा गमिष्यामः।

इत्युक्त्वा स हि गोविन्दाधिष्ठितस्य विस्तीर्णस्यास्य सौधपृष्ठस्य एकस्मिन् कोणे गत्वा तस्थौ। वयमपि सर्वे तमनुसरन्तस्तत्पार्श्वगा अभवाम। रमेशेनोक्तम् 'कथं हरिहर! एकाक्येव ताम्बूलं प्रहीष्यसि?'

**हरिहरः**– अवश्यमेवेदं भावि। यतः सम्प्रति गोविन्दो द्विभुज एव ताम्बूलवीटिकाः सम्पादयति ततो यथाक्रममेव ताम्बूलानि लभ्येरन्, न तु खलेकपोतन्यायेन।

दृष्टमस्माभिर्यत् प्रणामपर्यस्तगात्रयष्टिर्विनय-सङ्कोचावनतवदना सेयमवगुण्ठिता गोविन्दस्याऽऽज्ञां प्रतीक्षमाणेव पार्श्वतस्तिष्ठति। आसीत्तस्मिन् समये पार्श्वप्रकोष्ठके हरितवर्णो विद्युत्प्रकाशः। यो हि द्वारमुखादागत्य अनावृत्तेऽस्मिन् सौधपृष्ठेऽपि प्रतिफलति स्म। अत एव परिमित-मधुरे प्रकाशे स्थितया अस्या वस्त्रच्छटा साधारण्यपि हारिणीव संवृत्तासीत्। साधारणमूल्यत्वेऽपि स्वच्छसुन्दरसूक्ष्मवसननिर्मितमधः परिधानीयम्। उपरि च हारि-हरितवर्णं सूक्ष्मसुन्दरमुत्तरीयवस्त्रं प्रावृतम्, अग्रतोऽवलम्बितेन येनास्या वदनं साम्प्रतमवगुण्ठितमभूत्। परं वस्त्रस्य सूक्ष्मतया तन्मध्यतस्तद्गात्रसुषमा स्फुटमभितः प्रसरन्तीवाऽऽसीत्।

आसीत्सा गौर-सुन्दर-सुघटितसर्वावयवा। अतएवैतस्मिन्नुज्ज्वले विद्युत्प्रकाशे सूक्ष्म-हरितवस्त्रान्तरात्परितः स्फुरितं तल्लावण्यं प्रकटमिव प्रतीयते स्म। वस्त्रान्तरात्प्रतिफलितानि विरलानि भूषणानि सान्ध्यतमसि नक्षत्राणीव प्रतिभासन्ते स्म। किशोर्या अस्या वयःक्रमोऽष्टादशवर्षेभ्यो नासीदधिकः। अत एवोज्जृम्भमाणनवयौवनमांसलेऽस्या वक्षसि निबिडनिबद्धा पाटलकौशेयकञ्चुलिका उत्तरीयवस्त्रान्तरितापि स्वाच्छाद्ययोरुत्तुङ्गतामनक्षरं घोषयन्त्यासीत्।

## (३)

वसन्तयामिन्यामस्यां नवयौवनामिमामालोक्य रसभावनापरिनिष्ठितः सर्वोऽप्ययमस्माकं सहृदयसमाजश्चकितचञ्चलोऽभवत्। प्रत्येकमनसि नानाविधा विचारतरङ्गाः प्राचलन्, किन्तु

गोविन्दस्य काचित्पारिवारिकमहिला न भवेदिति सन्देहेन संदानितो वाञ्छन्नपि न कश्चित्कञ्चित्किमपि वक्तुं प्राभवत्। एतस्मिन्नेव समये आज्ञां प्रतीक्षमाणायै अस्यै प्रोक्तं गोविन्देन– 'मालति! अद्य नास्मिन् समये भवत्याः पाठनं सम्भवेत्।'

**मनोहरः**– अरे एतत्किम्! इयं गोविन्दस्य शिष्या? किञ्च, 'एतस्मिन् समये' इति किं रात्रौ पाठो भवति?

इतो हरिहरेणातीव सभ्यतया पृष्टम्–'किं श्रीमती किञ्चित्पठति?'

**गोविन्दः**– आम्। एतस्या अस्मत्प्रतिवेश एव निवासः। एतस्मिन्समये इयं मत्तः किञ्चिदभ्यस्यति।

**हरिहरः**– किं भवतः सजातीया श्रीमती?

**गोविन्दः**– नहि नहि। वैश्यजातीया सेयम्। अस्मत्प्रतिवेशे यः श्रेष्ठिमहोदयो निवसति तत्पुत्रवधूरियम्।

**गोपेशः**– काञ्चिल्ललितकलां शिक्षते, उत हिन्दीभाषादिकम्?

गोविन्दः प्रश्नाकूतं परिजानन्नपि धैर्येण संवृत्त्य गभीरभावेनोत्तरयामास–'सम्प्रति संस्कृतं पठति।'

सर्वेषां परमं कौतुकमभूत्। मनोहरेण पृष्टम्–'अपि संस्कृतम्! सम्प्रति किमधीते?'

**गोविन्दः**– अधुना काव्याध्ययनमारब्धम्।

सर्वेषामुत्तरोत्तरं कौतुकवृद्धिरभूत्। श्रेष्ठिनः पुत्रवधूः, संस्कृतं चाधीते। स्फुरन्नवयौवनया चानया सम्प्रति काव्याध्ययनमुपक्रान्तम्। रात्रिश्चाध्ययनकाल इति भूरि भूरिकौतुकायाऽऽसीत्, किन्त्वपरिचितैः सहसा कथं प्रष्टव्यमिति सङ्कोचोऽर्गलायितोऽभवत्। अस्तु, गूढोक्तिचतुरेण मनोहरेण प्रसङ्गं परिचाल्य युक्त्या पृष्टम्- 'अहो साधीयसी उन्नतिर्जाता। कियन्ति वर्षाणि जातानि?'

**गोविन्दः**– इयं त्रयोदशवर्षीयाऽऽसीत् तदानीमेवाऽनया मत्सविधे संस्कृतभाषा प्रारब्धासीत्। सम्प्रति पञ्चवर्षाण्यतीतानि।

**मनोहरः** – कथं सहसैव संस्कृताध्ययनस्य योग्यताऽभवत्?

**गोविन्दः**– नहि। इयं हिन्दीभाषायां पूर्वत एव शिक्षिताऽभूत्। पितृगृह एवास्यास्तावती योग्यताऽभवद्यथा हिन्दीभाषायाः साहित्येऽस्याः समुचितः प्रवेशोऽभवत्। इह तु धर्मानुरागी श्रेष्ठिमहोदयः संस्कृत-स्तोत्रादिकमेव पाठयितुमैच्छत्।

**मनोहरः**– श्रेष्ठिमहोदयस्य धर्मानुगः सत्यं पुनः पुनः प्रशंसार्ह एवास्ति यो हि वयस्थामपीमां स्तोत्रपाठकर्मठां द्रष्टुमैच्छत्। इतो भवतोऽपि विद्यानुरागो न नाम न्यूनमभिनन्दनीयो यो हि स्तोत्राणां स्थाने औचित्यानुरोधात्सरसकाव्यानां पाठनमेवारेभे!

संलापक्रमः शनैः शनैर्विकासोन्मुखो जायत इति मध्ये एव प्रसङ्गं परिहरता प्रोक्तं गोपेशेन–'सत्यमेव श्रेष्ठिमहोदयस्य न केवलं धर्मोत्साह एव, अपि तु हृदयदार्ढ्यमपि प्रशंसनीयमस्ति यत्प्रतिवेशस्य वधूः सत्यपि श्रीमती भवतः समीपे निर्विशङ्कं पठितुमायाति।'

**हरिहरः**–साम्प्रतिकलोकानां पक्षे तु नेदं नवीनम्, किन्त्ववरोधप्रथापक्षपातिनां परिवाराणां विषये अवश्यमिदं दृढतास्थानम्। विशेषतश्च, श्रीमत्या मुखावगुण्ठनमिदं प्रश्नस्यावसरमुपस्थापयति।

**गोविन्दः**–सम्यगिदम्। परमस्माकं च श्रेष्ठिमहोदयस्य च परिवारयोः पारम्परिकः परस्परसम्बन्धः। विशेषतस्तु, मत्पत्न्याः श्रीमत्यां प्रचुरः स्नेहः। अत एवोदार–धार्मिकेण श्रेष्ठिमहोदयेन समये सति स्तोत्राध्यापनं मय्येव निसृष्टम्।

**गोपेशः**–तर्हि रात्रिकालिकमिदमध्यापनं कथं प्रारभ्यत?

**गोविन्दः**–दिवा जीविकाकार्यव्यासक्तस्य न मेऽवसरो भवति। इयमपि च गृहकार्यव्यग्रा तिष्ठति। अत एवायमेव समयः प्राप्यते।

**मनोहरः** – को दोषः। भवतः श्रीमती इयं च श्रीमती यदा वयस्ये, तदा यः कोऽपि समयोऽस्तु। का बाधा?

एतदुपरि महेशेन मनोहरस्य पृष्ठमतिनिभृतमामर्दितं यत्किमिदं करोषि, भद्रमहिला मनसि किं कथयिष्यतीति।

गोविन्दस्तु व्यङ्ग्यमिदं बुद्ध्वापि अजानन्निव सरलं प्रोवाच– 'वयस्या तु नास्ति, इयं हि मत्पत्न्याः लघीयसी।'

**महेशः**–स्पष्टमेवेदम्। श्रीमत्पत्नी सततिद्वयं सूतवती, श्रीमती तु सम्प्रति किशोर्येव।

एतदुपरि सर्वेषां हास्यमुदैत्। परमतिकष्टेन तदुपरुद्धम्। उक्तं गोपेशेन–'अध्ययनपक्षे त्वेतदुपयुक्तमेव। अध्यापनस्य हि समयः साहित्यविद्भिरयमेव मनोरमः प्रोक्तः। किन्तु स्तोत्रपाठस्य स्थाने सरसकाव्याध्यापनं कथमारब्धमभूत्?'

**गोविन्दः**–प्रारम्भिकसंस्कृताध्ययनं विना शुद्धोच्चारणं चार्थज्ञानं च न जायते। अत एव नवीनपद्धत्या आवश्यकव्याकरणबोधोत्तरं पूर्वं पञ्चतन्त्रादि सरलगद्यं पाठितम्। ततस्तु उत्तरोत्तरमभिनिवेशं पश्यता मया पद्यकाव्याध्यापनमिदमारब्धम्। आश्चर्यं यदस्याः प्रतिभाऽसामान्या। प्रतिदिनं चानुरागः प्रवर्द्धते।

महेशः–अनुरागवृद्धिः कुतो न स्यात्। पञ्च वर्षाण्यतीतानि। विशेषतस्तु भवत्सदृशः साहित्यमार्मिको यदाऽध्यापकस्तदा कथं वा अनुरागो न भवेत्?

एतदुपरि सर्वैर्नयनाभ्यां भूरि भर्त्सितो महेशः परं स तादृग्भावमभिव्यञ्जयामास यथा नाऽस्य किञ्चिद् व्यङ्ग्यमासीदिति। किन्तु सर्वेषां सन्देहोऽभूत् यदियमस्माकं परिहासं परिज्ञास्यतीति। परं तद्दर्शनेन प्रतीयते स्म यत्सा अतीव मनस्विनी दृढचरित्रा च। अत एव नास्योपरि तस्या भ्रूक्षेपोऽपि। गोविन्देन प्रसङ्गान्तरं चालयितुं प्रोक्तम्– 'भवन्तः किञ्चन पृच्छन्तु, येन सर्वं परिज्ञातं भवेत्'।

दिनमखिलमितस्ततो भ्राम्यतां सुहृदां वसन्तरजनी तु तावत्परिहासविनोदेन व्यतीयादिति तादृशमेव प्रक्रममापादयितुं पुस्तकाधारस्थाद्रघुवंशात् षष्ठसर्गस्थं श्लोकमेकमुद्घाट्य अङ्गुल्या निरदिक्षन्महेशस्तां प्रति। सा तु लज्जावरुद्धस्वाभाविकस्वरमपि सुविस्पष्टाक्षरं यथार्थंनिर्व्यूढयति-विराम-पदभङ्गमनोहरं तथा मधुरं पपाठ यथा प्रत्येकपदे अर्थावबोधपाटवं तस्याः प्रकटं प्रस्फुरति स्म-

**'तमालवल्लीपरिणद्धपूगास्वेलालतालिङ्गितचन्दनासु।**
**तमालपत्रास्तरणासु रन्तुं प्रसीद शश्वन्मलयस्थलीषु।।'**

दण्डान्वयं विधाय प्रत्येकपदस्यार्थं सूचयन्ती शैलीनिबद्धया हिन्दीभाषया समञ्जसं श्लोकार्थं निजगाद सा।

अखिलाद्रघुवंशादन्विष्य सभ्यमहिलां प्रत्येतादृशः प्रश्न एव पूर्वं सर्वेषां हृदि( **'अखरना' हिन्दी।** ) आस्खलति स्म, परं समधुरप्रौढया तदुत्तरप्रणाल्या विस्मयः प्रमोदश्च तथाऽकस्मात् प्रादुरभूद्यथा न कस्यचिद्धृदि भावान्तरस्याऽवसरोऽभवत्। अनेन हि सफलतागर्वमिव मनस्यनुभवन् निजगाद गोविन्दः-'पाठितादतिरिक्तं स्वाभाविकबुद्धिविमर्शेऽपि न मन्दा प्राप्येत भवती. परीक्ष्यतां मनागेतदपि।'

पूर्वमेवोद्रिक्तेन लब्ध इदानीमवसरो महेशेन। अथवा केवलं महेशेनैवेति कुतो वदामः, आसीदान्तरिकीच्छा सर्वेषामेव। अत एव गोविन्दाभिमुखीकृतमुखमेवाऽप्राक्षीत्सः-'उक्तिरियं स्वयंवरप्रसङ्गे। ततश्च वैवाहिककुमारीं प्रति राजसभामध्ये एतादृशः संलापः कथमुचितः, सोऽपि च स्त्रीद्वारा!'

प्रश्नोऽयं न केवलं गोविन्दशिष्यामेव तामेतां पस्पर्श, अपि तु सर्वैरेव स्व-स्वहृदि निभृतं विचारितोऽभूद् यत् सत्यं किमेतस्य समाधानं स्यात्?

सा तु क्षणं निध्याय नीचीकृताननैव निजगाद-'वर्ण्यमानस्य नरपालस्य वरणेन भाविजीवने को वा ते लाभ इति सूचनमात्मकर्तव्यं भावयन्ती परिचयकारिणी कुमार्याः समवयस्का विवाहमङ्गलप्रसङ्गे सख्युचितपरिहासेन तदिदमाह। अनया च सह सख्या इव परिहासव्यवहारः सूचितोऽप्यग्रे कविना--'तथागतायां परिहासपूर्वं सख्यां सखी वेत्रभृदाबभाषे' इति। किञ्च पूर्वपद्ये 'दिशः सपत्नी भव दक्षिणस्याः' इति सूचनोत्तरं सपत्नीविलसितमिदं सूचनीयमेवासीत्कविना।'

यावद्वयमेतस्य समाधानमालोचयामस्ततः पूर्वमेवैतस्यास्तदिदमुत्तरमाकर्ण्य सर्वेऽपि स्तब्धा इवाऽभवन्। नानादिग्देशेभ्यः सम्मेलने समागता विद्वांसोऽपि यं प्रश्नं विचारणीयमनुभवन्ति तत्समाधानं नवशिक्षितैका महिला प्रत्यक्षमेव करोतीति कस्य वा न विस्मयाय स्यात्? अवश्यमियमसामान्या नारीति सर्वेषां हृदयेऽङ्कितमासीत्। किन्तु विनोदकाण्डेऽधिकमग्रे प्रसरन्महेशः पुनः पप्रच्छ-'ताम्बूलवल्ल्या सह पूगानाम्, एलालतया सह चन्दनानां च सहयोगस्य किं स्वारस्यम्?'

सर्वैरेव नयनाभ्यामत्यर्थं भर्त्सितोऽधुना महेशः-'किमेवं सभ्यतासीमानम-

प्यतिक्रामसीति'। गोविन्दोऽपि तदिदमसमञ्जस समीकुर्वन्निव तां प्रत्याह'मलयस्थलीना-मेवंविशेषणेन किं वात्र तात्पर्यमित्येषां प्रश्नः।'

सा तु परितः किञ्चिदपश्यन्तीव ग्रन्थविमर्शैकताना निम्नदृष्टिरुचरयामास-'क्रीडास्थानस्य तत्सामयिकशोभासूचने कवेस्तात्पर्यम्।'

अवगुण्ठिताया महिलायाः कृते प्रश्नोऽयमतीव दुरुत्तर आसीत्। प्रतिपदं लज्जोल्लङ्घनस्य भयमभूत्, किन्तु मनस्विन्यास्तस्याः 'क्रीडा' 'तत्सामयिकशोभेति' च पदद्वयं तटस्थमिव स्थितमपि सर्वविधमप्यभीष्टमर्थं सूचयामाम। सर्वेऽप्यभूतपूर्वेण विस्मयेनाक्रान्ता अभवन्।

एतस्मिन्नेव समये जवनिकाच्छन्नात्तस्माद्भवनात्खटात्कार इवाश्रूयत यदुपरि सा मन्दगम्भरीमुत्थाय वक्षोभरावनतपूर्वकायेव सविनयं प्राणंसीद् गोविन्दम्। ततः सर्वेषामस्माकमभिमुखीभूय शिरसि मुकुलीकृतकोमलगौरकरपुटा तथा विभ्रमेण प्राणमद्यथा विद्युत्प्रकाशेऽस्मिंस्तस्या गात्रसौष्ठवमत्यन्तमेव समाकर्षकमासीत्। ततो जवनिकामपसार्य भवनान्तरितायामपि तस्याम्, व्यतीतेष्वपि कतिचित्क्षणेषु सञ्जातया नवीनयाऽनया घटनया सर्वेऽपि स्तब्धा इवातिष्ठन्।

अस्तु, एतद्विषयिणीभिः परिहासविनोदमयीभिर्वार्ताभिश्चिरेण सुप्तानामस्माकं सा रजनिः क्षण इव व्यत्यगात्। प्रत्यूषे वाष्पयानेन स्वस्वगृहानवाप्तानामप्यस्माकं सा घटना न बहुं कालं यावन्मानसादपासरत्। परस्तात्तु विदितं गोविन्दाद् यदस्याऽभिनयस्य सूत्रधार एव किं सर्वस्वभूतः कान्तेति मित्रैः परिहसितो जयकान्त एव। अतर्कितं जयकान्तसमीपे तडिद्वृत्तोपलम्भादेव तस्यारम्भः। 'अभूतपूर्वस्य सदा स्मरणीयस्य विनोदस्य' समन्वयः साम्प्रतं सर्वेषामभूत्।

## फाल्गुनगोष्ठी

### ( १ )

सुस्पष्टविपरीते लोकानां *गड्डुरिकाप्रवाहे दययाऽश्रुमोचनधीरः कबीरोऽवश्यं व्यमनायिष्यत यदि संसरणमिदं व्यलोकयिष्यत। अहो यदुपरि हस्तपरिमिताया धूलेः साम्राज्यं तदपि पक्कं ×संसरणं व्यपदिश्यते? किन्तु गोष्ठीनिमन्त्रका में सुहृदस्तु न मिथ्या वदिष्यन्ति। तैरासीदुक्तं यत्पथि सुदृढो राजमार्गः। वायुशकल' मारुह्य सुखं गोष्ठीस्थलमागष्यिसीति। हन्त धूलिरपि कीदृशी या सूक्ष्मतायां वासन्तिकपुष्पपरागादपि श्रेष्ठा, ऊर्ध्वगमने वायोरपि जेष्ठा। तया

हि मे नासायां तावानधिकारौ लब्धो येन श्वासागमनस्यापि विश्वासो व्यलुप्यत। नूनं वायुशकलमिदं मे धूलिसमुद्रेऽस्मिन्नवश्यं विलुप्तमभविष्यद्यदि मे हस्ते *हस्तदण्डो नाभविष्यत्।

अस्तु, परिकल्पितविविधदेवतोपचारः पूर्वपुण्यबलेन यथा कथञ्चित्प्राप्नवं तदेतदुपवनं यत्र मे मित्राणि प्रातरारभ्यैव भोजगोष्ठीप्रबन्धाय कृतोपनिवेशान्यासन्। धूलिवैतरणीं विलङ्घ्य सोऽयमारामः साक्षात्स्वर्ग इव मे प्रतीयते स्म। अभूदपराह्णस्य द्विवादनम्। जठरकुहरे समुदतिष्ठन्प्रबलाः क्षुधाकल्लोलाः। अहं विचारमात्रेणाऽपि प्रमोदमन्वभवं यन्मित्रैः सर्वाऽपि भोज्यसाम्रगी सज्जीकृता स्यात्। आसीन्मे प्रस्तावो यदद्य 'चूर्णमा' भोज्ये पयः सारोऽपि मिश्रीक्रियताम्, अनुभूयतां चाऽभूतपूर्वः स्वादः। अवश्यं ते सम्प्रति मदागमनं प्रतीक्षन्ते।

प्राविशमहमारामम्। आसीन्मध्यदेशेऽस्य द्वादशाद्वारिका। निश्चितवानहमवश्यमस्यामेवोद्दण्डमण्डली सा स्थिता स्यादिति। उपसर्पतो मे विचाराः प्राचरन्मनसि– 'यदुपगत एव सर्वानहं गाढमुपालप्स्ये यद् गोष्ठयाः कृते केन महाबुद्धिना तदिदं स्थानं नियमितम्? नगरादियद्दूरे, मार्गोऽपि मरोर्मातामहः?' किन्तु नासीत्कोऽपि तस्मिन्स्थाने। मयाऽनुमितं यद् वृक्षगुल्मे कुत्रचिन्निषण्णाः स्युः, यतो हि बहिरुद्यानस्य तत्रैवाऽऽनन्द इति। किन्तु सर्वमहमारामं व्यचिनवं नासीत्कस्यचिदपि गन्धो बान्धवस्य। ननु किमेतदजनि? वृक्षमधः स्थितो मालाकारो दूरे भूमिमवखन्नासीत्। गत्वाऽहमेनमपृच्छम्– 'अपि प्रातरद्य केचन नागरिकजनाः समागमन्नुद्यानेऽस्मिन्?।'

'न कोऽपी' ति स प्रत्यवदत्।

'अहो मुरारिनामा नाऽऽगमत्कश्चिज्जनः? आसीत्स हि गौरवर्णः, स्थूलप्रायकायः, वार्तासु चपलश्चलने चटुलतमश्च।'

'न नाम कश्चिदेवंविधो दृष्टः।'

'अहो मोहनेति मण्डल्यां मिथः प्रख्यायमानोऽपि नागमत्? यस्य मुनेरिव दीर्घाः केशा कृशप्रायः कायश्च।

नैतादृशोऽप्यदृश्यत'।

'अये मण्डल्यां सर्वतोऽपि मुखरतमो माधवेति माधवेति मिथः सम्बोध्यमानोऽपि नालोकितः कश्चित्?'

कोपकषायितः स प्रत्युदतरत्– 'न माधवो न मुरली न मनोहरो न मेघराजो न मान्धाताऽपि कश्चिदिह दृष्टः'।

हृदयमवस्थाप्य खिन्नोऽहं तत्रैव न्यषीदम्। हन्त तृतीयोऽयं वारो मे वञ्चनस्य। एकदा नौकागोष्ठ्यां मामाह्वयन् यत्र भङ्गारसमाकण्ठमापाय्य तत्रैव मदनिद्राणं मां विमुच्य समागच्छन् गृहे। द्वितीयवारे दूरोद्यानं मां नीतवन्तः, यत्र भङ्गापान– शौच–जलविहारादि सर्वं मया सह

विधाय भोजनसमये कदलीपत्राहरणाय मां दूरे विसृज्य सर्वेऽपि कृतसङ्केताः स्थानान्तरमगच्छन्। ननु द्विर्बद्धमेव सुबद्धं भवति, किन्तु सोऽयं तृतीयेऽवसरो मे मूर्खीकरणस्य।

आसीन्निदाघर्तुः। घोरोऽपराह्णः। इयती दूरता, तादृशश्च सुखकरो मार्गः। किन्तु परवशोऽहं कषायितहृदयः प्रत्यावर्तिषि यथा कथञ्चिन्नगरम्। गृहमगत्वा प्राप्नवमहं मुरारेर्गृहे। किन्तु नासीत्स तत्र। मार्गे माधवस्याऽपि मन्दिरमपश्यं किन्तु नास्याऽप्यनुसन्धानमलभ्यत। ज्ञातं मया–यत्सर्वेऽपि कृतसङ्केताः कुत्रचिद् बुद्धिपूर्वं विलीनाः।

गृहमागच्छतो मे मार्गे समभूत्समागमो दीनानाथेन। एष हि समीपवर्तिनो मानगञ्ज' धूमशकटिस्थानस्य प्रधानाधिकारी। अयं मे निकटसम्बन्धी, आसीच्चास्योपरि मत्कृतो महीयानुपकारभारो येनाऽसौ ममानुरोध पूर्णतममन्यत। नमस्कारोत्तरमपृच्छमहम्– 'अपि कुशली भवान्। कथय क्वेदानीं साधयसि?'।

'मासद्वयावकाशमयाचिषं निजाधिकारिभ्यः, तस्य किल स्वीकृतिरद्यैव लब्धा। सप्ताहे प्रयातोऽस्मि गृहम्। अत एवाऽवश्यकानि कानिचिद्वस्तूनि सङ्ग्रहीतुं समायासिषं नगरे। भवांस्तु कतिधा प्रार्थितोऽपि न कदाचित्समायाति तत्र। भूयसी मे वाञ्छा यदेकां रात्रिं तत्रैव विश्राम्येद्भवान्।'

'बाढम्। समायास्यामि भवत्कार्यस्थाने। यावच्छक्यं च भवद्गृहगमनस्य पूर्वमेव भवद्दर्शनं कर्तास्मि।'

क्षुत्क्षामकण्ठो नाधिकमालपितुमशक्नवम्। अत एव कष्टशतैर्यथाकथञ्चिदवाप्नुवं गेहम्।

## ( २ )

कतिचिद्दिनानि न समभूत्समागमो मित्रेण केनाऽपि सह। स्वकार्यनियोगे निलीनस्य ममेव सर्वेषामपि व्यत्यगमन् कतिचिन्मासाः किन्तु समुपस्थित एव फाल्गुने पुनः सर्वेषामन्तराशये समुदतिष्ठद्विनोदलहरी। अत एव सर्वेऽप्येकदा सम्भूय समागच्छन्मम गृहम्। सर्वेषाममीषां दर्शनेन जागरूकवञ्चनदुःखो यावदहं किञ्चिद्वदामि ततः पूर्वमेव सर्वेऽप्यट्टहासेन मे गृहमपूरयन्। एकैकशः पूर्वघटनामुल्लिख्य, अन्तःकषायितां मन्मूर्तिं चावलोक्य सर्वाऽपि सुमतिसमितिः सेयं कतिचिन्मुहूर्तान् प्रचण्डेनाट्टहासेनैव समत्यवाहयत्। साहित्यवर्णितस्य विहसितस्य प्रत्यक्षोदाहरणस्वरूपो मुरारिर्मामवादीत्– 'यावदस्मभ्यं भोजगोष्ठीमेकां नोपहरसि तावन्न ते विमुक्तिरेवंविधेभ्यः सुखशतेभ्यः। अपि ज्ञातं भवता?।

कोपाऽऽवेगमन्तर्निगृह्य प्रोक्तं मया– 'नाहं गृहे गोष्ठीं वः कर्तुमर्हामि। सुचरितैस्तत्रभवतामाप्यायितः सर्वोऽपि गृहजनो वराकः।'

'अस्तु तर्हि बहिरेव कुत्रचित्।'

माधवोऽवदत्-'न चेदमतिक्रमणयोग्यं फाल्गुनमहापर्व'।

'अपि मानगञ्जस्थानमनुमन्यन्ते भवन्तः? *लघुशाखायास्तदिदमितस्तृतीयं +वाष्पशकटिविश्रमस्थानम्। अतीव रमणीयः प्रदेशः। जनसम्मर्दाद्विविक्तप्रायं सर्वसौलभ्यजुष्टं च तत्स्थलम्। विशेषतश्च संक्षिप्ता धूमशकटियात्राऽपि विनोदाय स्वतः सम्भवेत्। तत्रत्यः - प्रधानाधिकारी मे मित्रम्। तत्साहाय्येन गोष्ठीप्रबन्धेऽपि भवेत्सौकर्यं बहुधा।'

ममेयं सम्मतिरभूत्सर्वेषामनुमता। शुभस्य शीघ्रमिति श्व एव तत्र गमनस्याऽभून्निश्चयः। द्वितीयदिने चतुर्वादनस्य धूमशकट्या प्रास्थिष्महि वयं सर्वेऽपि, पञ्चवादने चाऽवापाम मानगञ्जमिदम्।

दीनानाथो मया सह नररत्नसमारोहमिममालोक्य समभूत्सम्भ्रान्तः पूर्वम्। किन्तु मया पृथङ् नीत्वा प्रोक्ताः काश्चिद्वार्तास्तस्य कर्णे। स हि विहस्य समभूत्तूष्णीम्। सर्वेषां प्रकाशे पृष्टं मया अपि भवान् श्व एव गृहं गन्ता?।

'श्वः किम्, अद्यैवोत्तररात्रे चतुर्वादनस्य शकट्या प्रतिष्ठेय भवनं स्वम्। मम स्थानापन्नोऽधिकारी समायातोऽत्र। श्व एवारभ्य मेऽवकाशः प्रारभ्येत'।

इतो मित्रमण्डल्यां मुरारि-मोहनयोः प्रावर्तत वादसंरम्भो यत्कुत्र स्यादासनसन्निवेशः सर्वेषाम्। मोहनोऽवदद् गोष्ठीस्थानमितः किञ्चिदेव दूरगतः सोऽयं वृक्षगुल्मः स्याद् यतो धूमशकटिकौतुकमप्यक्षिगोचरं भवेत्। मुरारेरासीत्सम्मतिर्यत्कूपस्य सन्निधानगतायाममुष्यां *वेद्यामेव नर- पावकानामेषां स्थापनं स्याद्यत्र सुखेन भोज्यहविषो होमः प्रारभ्येत। परं या सम्मतिर्मया प्रादायि सा हि निजनवीनतायाः कारणात्सर्वेषां हृदयङ्गमाऽभवत्।

धूमशकटिविश्रमस्थानस्य पार्श्व एव *लोहलेखानां किञ्चिद्दूरे समभूदूर्ध्वगतो — जलटङ्क एकः। एष हि पञ्चविंशतिः हस्तोच्चतायां लोहस्तम्भानामुपर्यवस्थितोऽभूत्। आरोहणाय लोहनिर्मिता निश्रेणिरस्यासीत्संलग्ना। स चाऽयं टङ्क उपरितो दृढाच्छादितोऽभूत्। प्रोक्तं मया- 'प्रधानाधिकारिणो मित्रतावशात्किमिति वयमस्योपरि नाधिकारं करवाम? निशि चन्द्रिकाचमत्कारे महानानन्दो भवेत्। समन्तादुन्मुक्तपवनमिदं स्थानम्। नीचैश्च सलिलशीतलतया गङ्गायां घोष इव शैत्य-पावनत्वयोरप्यनायासेन लाभः स्यात्। समन्ततः समुन्नतवृक्षावृततया न कस्यचिद् दृष्टिनिक्षेपस्याऽप्यवसरः। वयं सर्वानवलोकयामो न च कश्चिदस्मानवलोकयेदित्यस्य तदिदं प्रत्यक्षनिदर्शनम्।'

विविक्तप्रणयिनां मण्डलेऽस्मिन् सेयं सम्मतिः सर्वेषामपि सर्वात्मना सम्मानिताभूत्। मम विलक्षणप्रतिभायाः प्रमोदकोलाहलेनाऽक्रियत सर्वैरभिनन्दनम्। अस्तु, टङ्कस्यास्योपरि समभूदास्तरणस्य प्रबन्धः। सहृदयमण्डलस्याऽस्य समभूतत्रैवाऽधिवेशनम्। उज्जृम्भते स्म

प्रमोदकलकलस्य साम्राज्यम्। हासपरिहासैः प्रणयप्रमोदैः क्रीडाकौतुकैश्च न प्रतीयते स्म व्यतीतोऽपि द्वित्रघण्टात्मकः कालः। अष्टवादने समभूत्सर्वेषां सम्मतिर्यत् साम्प्रतं प्रारभ्यतां भोजनम्। अत्रैव च सोऽयं **सग्धि**महोत्सवः समनुभूयेत। प्रेषितोऽहमभवं प्रबन्धार्थमेतस्य।

( ३ )

दीनानाथमहाशयः शकटिविश्रमस्थानस्थे निजकार्यालये आसीदवस्थितः। तमुपसृत्याऽहमवदम्–'श्रीमन्! सम्प्रत्यादिश्यतां कश्चित्कर्मकरो यो निश्रेणिनिपातने मे विदध्यात्साहाय्यम्। किन्तु पूर्वमेको जलकुम्भः प्रहीयतामुपरि। एष्वेव दिनेषु प्रबलः साम्प्रतमूष्मा।'

स हि प्रेषितवान् भृत्यमेकं सह मया। कर्मकरो यथैव प्रापयामास जलकुम्भमुपरि तथैवानुमितं सर्वैर्यद्भोजनमपि साम्प्रतमुपस्थितप्रायम्। गण्डूषादि कृत्वा सर्वेऽपि समनह्यन्त भोजनाय। किन्तु नीचैरवतीर्य भृत्योऽयं मत्साहाय्येन निपातयामास लोहनिश्रेणिमेताम्। अहं च नीचैरवस्थितो व्यलोकयं कौतुकम्। घण्टार्द्धं यावत्प्रतीक्षितः सर्वैरपि भोजनकालः। किन्तु ततोऽपि चिरयति भोजने **समन्त्रितं** सर्वैर्यन्नीचैरवतीर्य कश्चिदनुसन्दध्याद्यद्भोजने किमिति साम्प्रतं विलम्बः। मुरारिरेतद्गवेषणायै नीचैरवरोढुमभवत्सन्नद्धः। किन्तु किमिदम्? निश्रेणिरियं कुत्र विलुप्ता? अधो निरीक्ष्य दृष्टं मुरारिणा यदियमधिरोहणी भूमौ निपतिताऽस्ति।

तदेतस्मिन् खण्डजगति यद्धि जलटङ्कोपर्यासीदुपनिविष्टम्, महती क्रान्तिरुपातिष्ठत्। ममाद्यापि महानेवानुतापो यत्पर्याप्तप्रकाशाऽभावात् भयविषादखेदाप्लुतं मित्रमण्डल्या मुखमण्डलं न तदाऽहमलोकयितुमपारयम्। किन्तु कोलाहलः पूर्णरूपेणाऽश्रूयत।

नीचैः स्थित एवाहमप्राक्षम्–'कथं भो मुरारिमहोदय! कोऽयमकाण्डे कोलाहलः?'।

'अयि भोः! अत्रत्या निश्रेणिः कथमियं नीचैरवापप्तत्?'

'उपरि स्थिता भवन्त एव विद्युः, भोज्यप्रबन्धार्थमितो गतः कथमहमिदं जानीयाम्।'

'अरे महदिदं सङ्कटमुपस्थितम्। कथं वयमवरोक्ष्यामः?'

'का नूनमावश्यकता नीचैरवरोहणस्य। प्रातस्तदिदं प्रतीक्ष्येत नाम। हन्त महाभाग्यैरेवमुच्चस्थानमवाप्यते।'

'मा मुधा प्रलपैः'

'पश्य, कीदृङ् निरभ्रं गगनमण्डलम्। परितो ज्योत्स्नयाऽऽप्लाविता सेयं मही। शीतलो मन्दः सुगन्धिश्च गन्धवाहः परितः प्रसरति। विजृम्भमाणश्च सम्प्रति विरहिदुरन्तोऽयं बसन्तो नूनम्।'

'जोषमास्स्व। न खेदय मुधा दुरुक्तैरान्तरं नः'।

'अयि भोः पश्य परितः किञ्चित्। आदर्शशोभाकरः कुसुमाकरः सोऽयम्। रमणीयतमश्चाऽयं समन्ताद्वनोद्देशः। कैश्चिदप्यनाक्रान्तपूर्वं महाभागधेयलभ्यं चेदमुच्चैः पदम्। किमितोऽधिकः सौभाग्यसमायोगः स्यात्? निश्चिन्तमवस्थितः सम्प्रति कुर्याः प्रकृतिदेव्या निरीक्षणं निभृतम्। नूनमभिनन्दत वो भागधेयं यत्स्वर्गलोकस्य कियत्सन्निहिताः सम्प्रति भवन्तः।'

आदिष्टोऽभून्मया दीनानाथभृत्यः पूर्वम्। स हि यथानिदेशं विशालपरिष्कृते भोजनपात्रे विस्तृतां भोज्यसामग्रीमापूर्य स्थापयामास मे सम्मुखे। अहमपि नीचैरवस्थाय सुहृदां दृष्टिभिः सर्वतः करम्बितः प्रारप्सि यथासुखं भोजनम्। अहमवादिषम्– 'अहो रसगोलकास्त्वमी स्वादेन सुराणामपि मनोदोलका नूनम्। किं च कर्चूरिकाणां मनोरमगन्धस्त्वयं नीरन्ध्रमनुबध्नाति मदुदरमिव समग्रमपि परितः प्रदेशम्। भवन्तो नूनं धर्मशास्त्रज्ञाः। अत एव सञ्जातमिदमर्द्धभोजनं भवतामपि। उक्तं हि शास्त्रे 'आघ्राणे ह्यर्द्धभोजनम्'।

नैतस्य किञ्चिदुत्तरमलभ्यत। किन्तूर्ध्वदृष्टिना मया लक्ष्यीकृतं यत्सम्मिलितानि बहूनि दृशां द्वन्द्वानि जलटङ्कादुपरितो मय्यवर्षन् तिग्मतमं कोपकृशानुम्। भोजनं परिसमाप्य प्रतिष्ठमानेन प्रोक्तं मया–उपरि शीतलजलकलशः स्थापित एव समीपे भवताम्। रिक्तोदरे हि शीतलजलपानं त्रिदोषनाशकमाख्यातमायुर्वेदे। किञ्चिद्-दूरे गत्वा, पुनः परावृत्त्य प्रोक्तवानहम्– एकमन्यदपि सूचनीयमावश्यकं मन्ये। दीनानाथेन मे सन्दिष्टमस्ति निशि चेत्कलकलः स्यात्तर्हि नाहमिमं प्रतिविधातुं शक्नुयाम्। नियोगपरवशः सूचयेयं रक्षापुरूषेभ्यो यत्केचन बाह्यपुरुषा बलाज्जलटङ्कमारुह्य कुर्वन्त्युपद्रवमिमे साम्प्रतम्।'

नीरवकरुणाऽऽक्रन्देन मिश्रितः समाकर्ण्यत निगूढकोपध्वनिरूर्ध्वप्रदेशात्।

अभूदेकादशवादनं रजन्याः। शकटिविश्रमस्थलमुपेत्य संविष्टवानहमेक-स्यामाऽऽसन्द्याम्। मानगञ्जमिदं लघुशाखाया लघुतमं विश्रमस्थानम्। नास्मिन् रात्रौ शकटीनां यातायातम्। अत एव स्थानमिदमासीच्छान्तिपूर्णम्।

अतिप्रत्यूषे चतुर्वादनस्य वाष्पयानेन प्रातिष्ठत गृहं दीनानाथः। अहमपि तथैव शकट्या प्रत्यावर्तिषि निजगृहम्। दीनानाथः प्रस्थानसमये प्रोक्तवान्नवीनं निजस्थानापन्नं यो ह्यासीत्तस्य सुहृत्– मम केचित्प्रघुणिका जलटङ्कोपरि स्वपन्ति श्रान्ताः साम्प्रतम्। प्रातः षड्वादनस्य शकट्याः पूर्वमेव निश्रेणिमारोप्य कृपया ते समवतारणीयाः श्रीमता ।

## विषमसमस्या

शङ्करः श्रमेण विद्यामधिजगे। मर्मानुशीलकोऽपि जातः। परीक्षासरितमुत्तीर्य वर्तमानयुगस्य शिक्षितानां परमपुरुषार्थोऽपि साधितस्तेन (अर्थाद् भृतिर्लब्धा)। किन्तु न

प्रासीदद्भाग्यदेवता। अन्यदृष्ट्या प्रचुरेऽपि मासिकवेतने न निरुह्यते स्म तस्य गृहव्ययः। गृहिण्या दाक्षिण्येन गृहस्य व्यये कथञ्चिन्निर्वाहितेऽपि तस्य स्वव्ययो न पूर्यते स्म कथञ्चित्। अद्य पुस्तकान्यानायितानि तर्हि श्वो वस्त्रव्यापारिणे मूल्यं प्रहेतव्यम्। मित्राणां भोजगोष्ठीविरहितस्तु व्यत्यगात्कश्चिदेवामङ्गलः सप्ताहः। मित्राणामपि संख्या नाधिकं न्यूना येषु हि शिक्षितानारभ्य शिल्पि-गायक-मल्ल-कृषी-वलप्रभृतयः प्रायः समभूवन्सर्वश्रेणीया एव। गृहिण्यैव किम् द्रव्यसङ्कोचेनापि भूयो भूयः प्रबोधितोऽपि नायमासादयत्प्रकृतेरुपरि विजयम्। तत एव ऋण-पादपः शनैरुद्भूय पुष्पितः फलितः सन्नधिजगाम विचारणीयं रूपम्। किन्तु किं सिध्येत्केवलं विचारेण? लघुलघूनां देयानां परिशोधन एव वराकस्य मासिकवेतनस्य मेरुदण्डो भज्यते स्म। स्थायिन ऋणस्य कथयत कथं भवेन्मुखमुद्रणम्?

शङ्करश्छन्दानुवर्तिनी तस्य श्रीमती चेत्युभावेव साम्प्रतमगाहतां विचारसागरम्। मनस्वी शङ्करो नाभिरोचयते स्म यस्य कस्यचित्सविधे याचनालाघवमपि। क इदानीमुपाय ऋणपरिशोधस्य? सुखदुःखयोः सत्यभावेन सङ्गिनी गृहिणी वराकी दूयते स्म मनस्येव। शङ्करपत्न्या ज्येष्ठो भ्राता न्यवात्सीन्नागपुरे। आसीत्स हि तत्र सुप्रसिद्धो द्राक्तरः। द्रविणमपि तेन प्रभूतमुपार्जितमिति चिराच्छ्रूयते स्म। स ह्यस्निह्यत्स्वसारम्। शङ्करेणापि सहासीत्तस्य मैत्रीभावः। अत एव विचारितमेकदा चेतसि शङ्करगृहिण्या-न चेल्लिखामि पत्रमेकं ज्येष्ठभ्रात्रे। कदाचन स एव सङ्कटे नः स्यात्सहायकः।

ज्येष्ठभ्रातुरासीत्स्वभावोऽतिसरलः स्नेहशीलश्च। स हि भगिन्याः सङ्कटसंवादमधिगत्य भूयस्तरामखिद्यत। वेतनोपजीविनामवस्था नासीत्तस्याऽविदिता। विशेषतश्च शङ्करस्योदारेण व्यवहारेणाप्यासीदसौ परिचितः। अत एव भगिन्या दुःखमनुमाय तत्सहाय्याय विद्रुतहृदयोऽभवदसौ। तस्मिन्नेव दिने औषधप्रेषणस्य समुद्गकमेकमादाय तस्मिन्दशस्वर्णमुद्रा वस्त्रविनिबद्धा विनिधाय मुद्रितमुखे तस्मिन् भगिन्याः स्थानसङ्केतादिकं विलिख्य प्रजिघाय पत्रप्रेषणया तत्समीपे।

यस्मिन् समये समवाप स समुद्गकः शङ्करसदने तदा दम्पत्योरुभयोरेव विस्मयेन सह प्रादुरभूत्प्रमोदोऽपि। किन्तु यथैव पत्रावरणमपसार्य ताभ्यां समुद्गकमुद्घाटितं न्यमज्जतां द्वावपि विस्मयसागरे। आसीदेतस्याभ्यन्तरे स्वल्पमेकमौषधनिधानपुटकम्, येन सह स्वयं द्राक्तरकरविलिखितमभूद् व्यवस्थापत्रम्-

रोगः-दारिद्र्यम्।

औषधिः-स्वर्णमुद्रावाटिका।

मात्रा-उपयुक्तो व्यवहारः।

अहह! औषधं त्ववश्यमिदममोघम्।

द्राक्तरमहोदयस्याद्भुतं रोगनिदानं ततस्तदुपयुक्तमौषधविधानं चालोक्य द्वावेवोन्मुक्तहृदयमहसतां पूर्वं बाढम्। किन्तु यथैवौषधिपुटकमुद्घाट्य ताभ्यां विलोकितम्, नाऽवाशिष्यत तयोराश्चर्यस्य परिसीमा। नाभूत्तयोश्चक्षुषोरेव विश्वासः पूर्वम्। दश दश स्वर्णमुद्राः!

नेदं सम्प्रति स्वल्पं धनम्। अकस्मात्समघटत किमेतादृक् सौभाग्यम्? आनन्देन प्रानृत्यद् द्वयोरेव मनः। शङ्करस्त्वरितमेव निरचैषीद् यदेवंविधस्य प्रमोदस्योपभोगो न नाम समुचितस्तावदेकाकिनः। अत एवाद्यैव रात्रौ भोजगोष्ठ्या निमन्त्रणं प्रेषयामास मित्राणां समीपे।

शिशिरर्तोः सा रात्रिरतीव शीतलासीत्। सायमारभ्यैव प्रावहच्छिशिरः पवनः। मेघावृताद् गगनात्प्रारभ्यत किञ्चित्किञ्चिद् वृष्टिरपि। निमन्त्रितानां लोकानामुपातिष्ठन्केवलं सप्तैव भोजगोष्ठ्याम्। परमासीत्तेषां परमो विस्मयो यदकस्मादेव शङ्करस्य कुतोऽयं द्रव्यलाभो येन सर्वेऽप्यनेनाऽतर्कितं निमन्त्रिताः। सामग्र्यपि निमन्त्रणस्य नासीत्साधारणी। किन्तु नाऽभवदधिको विलम्बो विस्मयस्यापगमने। अवसिते एव भोजनकार्ये सरलहृदयः शङ्करो द्राक्तरसम्बन्धिनं समग्रमेव वृत्तान्तं कौतुकप्रवृत्तये वर्णयामास मित्रेषु। प्रमाणस्वरूपे च प्रावरणवस्त्रादपसार्य व्यवस्थापत्रसहितं तं समुद्गकमुपनिन्ये समितेः पुरतः।

व्यवस्थापत्रमनुवाच्य सर्वेऽपि युगपत्तथा जहसुर्यथा प्रकोष्ठकमिदमट्टहासेन समभून्मुखरितम्। शङ्करवत्सर्वेऽपि दारिद्र्यरुजाग्रस्ता आसन् सर्वतोऽपि। प्रत्युत केचित्तु प्रत्यक्षमुदाहरणमासन् रोगविजयस्य, पुनः स्वर्णमुद्रावटिकायाः प्रशंसां किमिति ते न कुर्यूः? वर्तमानयुगे तदिदमौषधमेव तथा रामबाणायितं यथा तदग्रे रोगवराको न स्थातुं शक्नुयात्कथञ्चित्। सर्व एव चिकित्सकमहाभागस्य निदानबुद्धिविभवं चिकित्साचातुर्यं च प्रशशंसुर्भूरि भूरि। हासपरिहासाभ्यां प्रमुदितेष्वखिलेषु मन्दमुत्स्मयमानो जगाद शङ्करः- यद्यनुमन्येध्वं तर्हि पुनरियं वटिका निषेवतां निजाधारगृहम्। मञ्जूषायां विनिधाय दीनारान्परिगणयञ् शङ्करः सहसैवा-भूद्विचकितः। अहो दशानां स्थाने कथमिमे मवैव?

शङ्करस्य वार्तामभिनिशम्य सर्वेऽपि स्वस्वपरिधानीयान्यास्फोटयामासुः, दर्शनादिसमये मा कदाचिदियम (स्वर्णमुद्रा) स्मद्वस्त्रेषु भून्निगूढेति। परं न क्वाप्यलभ्यताऽनुसन्धानं दीनारस्यास्य। इदानीं सर्वेष्वपि प्रावर्तत मिथश्चर्चाअतीवाश्चर्यमिदम्। अ हो क्व तिरोहिता सेयं स्वर्णमुद्रा?

शङ्करोऽपि वराको महानासीत् खिन्नः। किमियमनिष्टा घटना प्रावर्तिष्ट यया प्रत्येकपुरुषस्य मनसि प्रमोदस्थाने विषादस्योद्भवः। कथमिमानहं सान्त्वयेयम्। अस्यामेव किंकर्तव्यविमूढतायां प्रास्फुरत्तस्य मतिः। ललाटे हस्तमाघ्नन्नवोचदयम्- 'अहो कथमहम-प्युन्मादेनाक्रान्तः। एको निष्को मयैव तु निषद्यायां व्ययीकृतः, कथमहमन्यथा श्रीमतामभ्यर्थंनामि-मामशक्ष्यं कर्तुम्। साम्प्रतं नवैव तु निष्का अवाशिष्यन्त मञ्जूषायाम्। हन्त दृश्यतां मे बुद्धिः।' इत्यालपन्नवैतान्दीनारानसौ सरभसमवस्थाप्य समुद्गके प्राववार पूर्ववत्पत्रेण।

किन्तु यथा शङ्करः शिष्टतामूर्तिरासीत्तथा तन्मित्राण्यपि नासन्नेकान्तमेव तद्गुणाच्छून्याः। ननु 'समानशीलव्यसनेषु मैत्री' इत्याभाणके भवेदंशतस्तु तथ्यांशः। नाभूदागन्तुकानां विश्वासः शङ्करस्य वार्तायामस्याम्। स्पष्टमिदमबुध्यत तैर्यत्प्रसङ्गमिममुपसंहर्तुं शिष्टतया प्रोक्तमिदं ~~शङ्करेण। ते हि साग्रहमन्योऽन्यं जगदुः-सत्यं~~ त्विदमेव, यन्निष्काः प्रत्यक्षं दशैवासन्। अवश्यमस्य सावधानमनुसन्धानं कर्तव्यं स्यात् सहसा क्व गच्छेदयमस्मन्मध्याद्दीनारः?

एतां वार्तामाकर्ण्यैव या व्यक्तिः[१] शङ्करस्याव्यवहितं स्थितासीदुत्थाय सा स्वयमेकैकं निजवस्त्रमवतारयामास। एवमिव स पुरुषः केनाप्यनुक्त एव प्रददौ निजस्य नग्नगवेषणाम्। ततस्तत्समीपस्थो द्वितीयः पुरुषोऽप्युत्थाय पूर्ववदेकैकं वस्त्रमपसार्य दर्शयामास निजदेहशुद्धिम्।

किन्तु किमेतत्? द्वितीयपुरुषस्य नग्नगवेषणा नाद्युनापि परिसमाप्यत, ततः पूर्वमेव तत्समीपस्थस्य तृतीयपुरुषस्य मुखमभूद्रक्तवर्णम्। लज्जाभराच्छन्नोऽपि स वराकः किञ्चित्कालमतिष्ठन्निजासने, किन्तु कियत्कालमेवमवस्थायामवातिष्ठेत वराकोऽसौ? सहसैवोत्थितोऽयं करावूर्ध्वीकृत्य दुःखगद्गदया प्रोवाच वाचा–'प्रिया भ्रातरः! जीवनमिदं सुकठिना समस्येत्यद्य मे परिज्ञातम्। हानिलाभौ जीवनमरणे यशोऽपयशसी च विधिहस्तगे इति सत्यमभियुक्ताः प्रोचुः। किं भवेन्मम नग्नगवेषणया। अस्ति मत्समीपे एका स्वर्णमुद्रा। गृहात्प्रस्थानसमये सेयं समनीयत साकं स्वेन। अद्य निश्चितमारोपणीयो भून्मयि तस्करताकलङ्कः परमेश्वरस्य, अन्यथा निजेन सह निष्कोपहरणस्य कथमियमभून्मम मतिरतर्कितम्। अवश्यमयं मे प्राक्तनपातकानां परिणामः। किन्तु किमिदानीं परिदेवनया। साम्प्रतं तु मे जीवनस्य तदिदमवसानमेव' इति सविषादमुद्गदन्नसौ सज्जोऽभूदात्महननाय।

इदं दुःखकरमालोकयन्तः सर्वेऽपि सरभसमुत्थाय निवारयामासुस्तं परिसान्त्वयामासुश्चैकस्वरेण– हन्त भोः! किमिदमध्यवस्यसि। भवता तु सत्यं सत्यमुक्तं वृत्तं स्वकीयस्य दीनारस्य। किमिति भवानपहरेद्दीनारमिमम्? निश्चितं वयं सर्वेऽपि दीनाः, इदमपि च तथ्यं यन्न वयं सर्वदा दीनारान्नयन्तो बहिर्भ्रमामः। किन्तु निपुणमन्वेषणे कृते सर्वेषामेव गृहेष्वन्ततो निःसरेदेवैकस्तु निष्कः।

मन्ये सेयं वार्ता तैरात्महत्याया भयानकं काण्डमवरोद्धुमेवोदीरिता स्यादथवा आत्माभिमानस्य कश्चिदावेश एव तेषामुदितो भवेत्तस्मिन्काले। यतः परस्मिन्नेव क्षणे, निजस्य प्रकृतिस्थतायां स्वत एव तेषां विदितमभूद्यदस्यां वार्तायां स्वयमस्माकमन्तरात्मैव न विश्वसिति। केचित्केचित्त्वेतदप्यभावयन् यत्स्वर्णमुद्रायाः का कथा, गृहेऽस्माकं रजतमुद्रैव कष्टा ह्लभ्येत।

व्यतियत्सु कियत्स्वेव क्षणेषु सा तृतीया व्यक्तिरवोचत्–मत्तः कलहायित्वा[२] पृथङ् निवसन्ती ममान्धवृद्धा माता लोकान्तरोपयानसमये निजस्य कण्ठाभरणं प्रददौ मम भार्यायै इति तु विदितमेव सर्वेषां भवताम्। प्राचीनशैलीनिर्मितं जीर्णं च तदाभरणं नाभिरोचते किल वर्तमानकालिकमहिलानामत एव पत्न्याः परमाग्रहेण

१. यः पुरुषः इत्यर्थः। लोके व्यक्तिशब्दः पुँलिङ्गे प्रासिध्यत्।

२. कूलहं कृत्वा, शब्दवैरेति क्यङ्।

द्वितीयं मे निर्मितिसितमभूत्[३]। तस्यैव नवीकरणे तु मिश्रितधातुसंयोगाद् भूषणस्य निर्माणे वैरूप्यमित्याह रामधनः स्वर्णकारः। अत एव तत्सम्मत्या जीर्णभूषणं विक्रीय लब्धे धने किञ्चिदन्यत्संयोज्य नवीनभूषणनिर्माणस्यासीत्प्रसङ्गः। तत एव रामधनद्वारा जीर्णभूषणमूल्येन सेयमक्रीयत स्वर्णमुद्रा। तदिदमखिलमावर्णयेज्जिज्ञासितो रामधनः किन्तु किमनेनोक्तेन सम्प्रति। मम सम्मानस्त्ववसित एव साम्प्रतम्। स्वर्णमुद्राऽऽनयनस्य आकस्मिकसंयोग एव मे प्राणवैरी जातः। अस्तु मरणमेव मे सम्प्रति शरणमिति किं वाधुना कथान्तरेण। किन्त्वेकोऽयमन्तिमोऽनुरोधो मेऽवश्यं श्रीमद्भिरवधातव्यः- यत्सत्यवकाशे रामधनोऽवश्यमिदं प्रष्टव्य इति।

निजकथनमपरिपूर्यैव निजपरिकरात्तेनाऽसिधेनुराकृष्यत यया स ह्यात्मानमवसादयेत्। छुरिका बहिरपि कोषान्न पूर्णं निष्क्रान्ताऽऽसीदेतस्मिन्नेवान्तराले एकोऽतिथिश्चीत्कृत्याऽवदत्- 'अये! तिष्ठत तिष्ठत। प्राप्तेयं स्वर्णमुद्रा। दीपाधारस्य नीचैः किमियं तिष्ठति! अहह! दीपतलेऽन्धकार इति सत्येयं प्राक्किंवदन्ती'।

सर्वेऽपि प्रमोदस्य शीतलनिःश्वासमगृह्णन्। अहह संरक्षिता वकारस्य प्राणाः, अन्यथा क्षणमात्रविलम्बे सम्भावनाऽऽसीन्महाऽनर्थस्य। ततः प्रसन्नाः सर्वे प्रोचुः परस्परम्-अहह, विचार्यताम्। अद्याऽस्माकमनवधानस्य कीदृशः फलोन्मुखोऽभूद् दुष्परिणामः। आत्मना प्रमादं कृत्वा भागधेये दोषाऽऽधानमिति सत्यसत्योऽयमद्याऽऽभाणकः। किन्तु सकलसहायकेन भगवता वयमवसरे संरक्षिताः। धन्योऽसौ चराचरनायकः। ततः परस्परस्मै धन्यवादान्वितरन्तः प्रमोदसङ्कथाभिरयापयन्कामपि कालकलाम्। प्रमोदपरिहासयोर्लहरिः परितः प्रसरन्त्येवासीदेतस्मिन्नेव क्षणे गृहाभ्यन्तराद्धावन्ती शङ्करपत्नी सरभसमाययौ सोच्चैः स्वरमवादीच्च-चित्रं पश्यत! वयं सर्वतोऽन्यत्रान्विष्यामः। स्वर्णमुद्रा तु सेयं मञ्जूषाया उपर्यावरणे संलग्ना!'

''अयि भोः किमेतत्! अतीवाश्चर्यमिदमालोकयामः। अद्य हि चित्राच्चित्रतरमिदमनुभवामो नूनम्। श्रीमतः शङ्करमहोदयस्य धर्मपत्नी न नामोदीरयेन्मृषा। किन्तु तथा सति दशदीनाराणां स्थाने एकादशेमे सम्भवन्ति। प्रश्नः सोऽयमुपतिष्ठति यद्दीपाधारस्य तले या स्वर्णमुद्रा प्राप्यत, कुत आगमस्तस्याः? अवश्यं शिष्टेन केनचिदतिथिना भीषणकाण्डमिदमुपसंहर्तुं दीपस्याधस्तात्सा प्रक्षिप्ता। किन्तु केन सा निहिता?'' परस्परमवालोकयदेकोऽन्यस्य मुखम्। 'अहह दरादीनाराणामेकादशाद्य सञ्जाताः। अहो शङ्करमहाभाग? सुप्रसन्नाद्य ते भाग्यदेवता' इत्युक्त्वा पुनः सर्वेऽपि प्रमोदेनाट्टहासमकार्षुः।

किन्तु विचित्रघटनोद्भूतो विस्मयो नापयाति स्म नूनम्। अस्मिन्प्रमोदोत्सवे शङ्कराश्रितस्य विद्यालयस्य प्रबन्धकर्ताऽपि सममिलत्। स हि सर्वानभिमुखीकृत्याऽवोचत्- ''महाभागाः, श्रुतमेव भवद्भिर्यद्दश दीनाराः समभूवन्पूर्वम्, तेषामेकस्मिंस्तिरोहिते नवाऽशिष्यन्त, किन्तु स

३. निर्मातुमिष्टम्, माधातोः सन्।

दीनारः पुनरलभ्यत। अत एव ते पुनः पूर्ववद्दशैव समभवन्निति तु सर्वमिदं बुद्धिगम्यं नाम। किन्तु दशानां स्थाने एकादशानामुत्पत्तिर्न मयाऽद्यावधि श्रुतम् सत्यमिदमदृष्टाश्रुतचरम्। निश्चितमहमिदं जाने– यत् सङ्कटमिदमपनेतुं श्रीमत्स्वेव केनचित् सा स्वर्णमुद्रा दीपाधारतले प्राक्षेपि। भगवदनुकम्पया स शान्तोऽस्माकं प्रत्यूहः। अत एव येन महाभागेन दीनारोऽसौ निहितः ससानुग्रहमिममात्मीय प्रत्याहरतु। सर्वस्मिन् समीभूते नेदानीमवसर सङ्कोचस्य।''

एवं किल प्रबन्धकमहोदयेन, तथा स्वयं शङ्करेणापि नितान्तमनुरोधे कृते, मुहुर्मुहुरनुनयविनययोरपि कृतयोर्यदा न कोऽपि स्वर्णमुद्रामिमां स्वीकर्तुमुद्यतोऽभूत्तदा तु सर्व एव नूनमसमञ्जसमिवान्वभवन्। एकस्मिन्नपगते सङ्कटे द्वितीयमिवोपस्थितमभावयन्सर्वेऽपि। सञ्जातो भूयान्विलम्बः। एवमवस्थायां निषीदतां तेषां श्रम इव प्रतीयतेस्माऽखिलानाम्। परमतिरिक्तस्य तस्य दीनारस्य स्वामिनो नाभूदनुसन्धानं कथञ्चित्। सत्यकथनं न चेदपराधस्तर्हि वक्तव्यं स्याद्यद् व्यतिकरेणानेन शङ्करस्यानन्दगोष्ठ्याः सर्वोऽपि प्रमोदः समभूद्विषादशबलः। अन्ते प्रोक्तं व्यवस्थापकमहोदयेन– 'अहमेकां युक्तिमुद्भावयामि, परं सा यदि सकलानामभिमता स्यात्तदैवाहमावेदयेयम्!'

विलम्बेन खिन्नाः सर्व एव सममन्यन्त। ततः प्रोक्तं तेन महाभागेन– 'कुरुत तदिदं कार्यं यद्दीनारमिमं मञ्जूषायामस्यां निधाय ग्रहोपवनस्य प्राकारसमीपे यः कूपोऽस्ति तदन्तिकेऽवस्थापयत। भवन्तश्च सर्वेऽपि तेनैव मार्गेण प्रगच्छेयुरेकैकं निजगृहम्। प्रत्येकं जनो गमनसमये गृहस्यास्य द्वारमपिदध्यात्, तथोपवनस्यापि प्रतीहारं निबध्यात्। यावत्कालं च बहिर्द्वारस्य कपाटपिधानशब्दो न श्रूयेत् तावदस्मदभ्यन्तरात्कोऽपि जनो नास्मात्स्थानात्परिचलेत्। एतस्मिन्नवकाशे यस्य किल महाभागस्य सनिष्को भवेत्स निःशङ्कमिमं स्वीकरोतु'।

समुद्गकेऽस्मिन्पिधाय स दीनारो न्यधीयत कूपस्यान्तिके। एकैकक्रमेण च सर्वेऽपि निजगृहान्प्रतिजग्मुः। गतेषु च सर्वेषु शङ्करस्तत्पत्नी च मञ्जूषामिमामाहर्तुमगमतां तस्मिन्स्थाने। नासीन्मञ्जूषायां स्वर्णमुद्रा।

अथ कथयत, सा स्वर्णमुद्रा कस्यासीत्? केन च स्वीया सा प्रत्याहृतेति नाद्यावधि जानीते कोऽपि। किन्तु सर्वेषामेव सोऽयं सुदृढो विश्वासो यद्यस्य सा स्वर्णमुद्रा, तेनैव सा स्वयमधिगता। यतः किल सा गोष्ठी विवेकशीलानामात्मविश्वासिनां चासीत्, अन्यथा एकाधिकवृद्धेरेव कथमुपेयादवसरः? आत्माभिमानी च जनो न प्रसारयति जातुचिदपि करं परकीयायेति किं वा विवेकिषु विवेचनीयम्?

## करुणा कपोती च युवती च

( १ )

अङ्गणस्य कोणे राशीकृतस्याऽवकरनिकरस्योपरि सुन्दरौ द्वौ विहगौ कपोतश्च कपोती च भक्षयन्तावास्तां धान्यकणान्। द्वावप्यानन्दमग्नौ। कन्धरां फुल्लयित्वा मन्दमन्दमगुञ्जतां मध्ये मध्ये। एतयो: समीप एव विमला च महेशश्च पाञ्चालिकाभिरक्रीडताम्। समयेऽस्मिन् क्रीडातो विनिवृत्त्य समपतत्कपोतयोरुपरि विमलाया दृष्टि:। विमला व्यग्रतयाऽवदन्महेशम्– 'महेश अयि महेश! त्वरितमुपेहि, एतौ गृह्णीम:। अहो पश्य, कीदृक्सुन्दरौ द्वावपि। सत्यं महेश, निश्चितमिमौ पञ्जरे पालयाव:।'

महेश: प्रत्यषेधद्विमलाम्। सह्यभाषिष्ट– 'अकथयन् तातचरणा:– विमले! पक्षिण: कस्यचिद्बन्दीकरणं नोत्तमं भवति'।

**विमला**– 'उत्तमं किं न भवति?'

**महेश:**– 'पापं भवति विमले!' 'ऊँ, पापं किं भवति?' वदन्ती विमला बलान्महेशस्य हस्तमाकर्षन्ती कपोताभिमुखमनयत्। तत्र च द्वावप्यमू बालकौ कपोतयोर्ग्रहणाय सुभृशं प्रायस्यताम्, किन्तु विफलम्।

आसीद्विपिने हरितमहीरुह:। तस्योपरि सुनिर्मिते नीडे न्यवास्तां द्वावप्यमू कपोतौ। द्वयोरासीदगाध: प्रेमा। द्वयोर्देहौ द्वौ प्राणा: पुनरेके। द्वावपि सहैव गगनमगाहताम्, क्षेत्रेषु धान्यकणान्प्राश्य सानन्दमतृप्यताम्, सरित्सरोवरेषु सहैव सलिलमापिबताम्, विमलमारुते सहैवाक्रीडताम्, कमलकोमलायां नद्या वालुकायामानन्दातिरेकत: पक्षौ प्रसार्य सुचिरमलोठतामक्रीडताम्! न कदाचिदपि मिथो व्ययुज्येताम्।

स्वर्णवर्णा ह्युषा अनयोर्नीडस्य तृणनिर्मितौ कपाटौ यदा समुदघाटयत्तदा बहिर्निर्गत्य द्वावप्यमू अनन्ते नभसि सुदीर्घमुड्डीनमवालम्बेताम्, अभ्रमतां च सुचिरं तत्रैव। पुनर्दूरम्, दूरातिदूरं प्रान्तरे कुत्रचिद् भूमाववातरताम्। अभक्षयतां शालिकणान्, अपूरयतामुदरम्, पुन: सायं परावर्तेतां च तदेव निजनीडम्। द्वयोरयमेव नित्य: कार्यक्रमोऽभूत्, आस्तां द्वावपि पूर्णसुखिनौ।

कपोतौ द्वावप्यभूतां नभस्युड्डीयमानौ। द्वयोरपि दृष्टिरकस्मात्पपात प्राङ्गणेऽस्मिन् विकीर्णानां धान्यकणानामुपरि। समीप एव पूर्वोक्तौ द्वावपि बालकाविमौ (विमलामहेशौ) निर्भयमक्रीडताम्। कपोतौ शनैरवातरताम्, अभक्षयतां च धान्यकरणान्। आमन्त्रणं विनैव विहगाविमावभूतां निमन्त्रितौ, प्राङ्गणे परिवेषितं पदार्थं चेमं सप्रेम मिथो मुखमवलोकयन्तौ प्रारभेतां भक्षयितुम्। विमला व्यलोकयदिदम्। अभूत्सावधाना, अतिसतर्कतया सा निजं चोलकम् (कुर्ता) अवतार्य त्वरिततरं पक्षिणोरुपर्यपातयत्। कपोती सरभसं पक्षौ हस्तपदं चास्फाल्य ततो निरगच्छत् पलायाञ्चक्रे च ततो दूरे। परं दैवात्कपोत: पटे निबद्धपदोऽभूत्, न प्राभवदसावुड्डयितुम्।

निर्मुक्ताऽपि कपोती कञ्चित्कालं भ्रान्ता व्याकुला चेतस्ततो व्यलोकयत् अन्ते उड्डीय भवनपृष्ठस्य वृतेरुपर्यतिष्ठत्। कपोती आसीद् बन्धनमुक्ता स्वतन्त्रा च। किन्तु सैयं स्वतन्त्रताऽद्य तस्याः कृते लक्षलक्षबन्धनेभ्योऽपि दुःसहा विषादकरी च। हृद्येव सा व्यालुठत्, दीनमरुदत् प्राणास्तस्या न जाने किमवस्थाः। हन्त तस्याः पीडामद्य को वा वेदितुं प्रभवेत्?

वक्षसि आशाव्रततिं चक्षुषि वाष्पसन्ततिं च दधत्याः कपोत्या निःसहावस्थया वृतेरुपरि तिष्ठन्त्याः समभूत्सन्ध्या। किन्तु बालकौ वराकस्य कपोतस्य मोक्षं न किञ्चिदस्मरताम्। कपोती श्रान्ता क्लान्ता दीनं मनस्याक्रन्दन्ती तथैव विषण्णा वृतेरुपर्यतिष्ठत्। आसीत्कपोत्या नीडम्, किन्तु तदद्य शून्यमभूत्। सर्वस्वं गमयित्वा नीडे तस्मिन्नकिञ्चनं तिष्ठन्त्याः किमेतस्याः शान्तिः सम्भवेत्?

विमला गृहात्तण्डुलानानयत्। महेशः पानीयमाहरत्। द्वावपि संगत्य कपोतं भोजयितुं पाययितुं च प्रायस्यताम्, किन्तु कणमपि कपोतो नाऽस्पृशत्। अद्य क्वासीत्तस्य क्षुधा? यदीमौ

द्वावपि सहैव बन्धने न्यपतिष्यतां तर्हि मरणमपि तस्मै पर्यरोचिष्यत। किन्त्वेकाकिनोऽद्य कपोतस्य नि:सहायमिदं बन्दीजीवनं कियन्नि:सहम्, कियच्च ममताशून्यमासीत्!

विमलामहेशौ कपोतं समासाद्य नि:सीमं प्रासीदताम्। द्वावपीमौ वंशकण्डिकाया अधस्तात् कपोतस्य निवासमकल्पयताम्। इतो विषण्णं सशङ्कं च चित्तमादधती कपोती भवनपृष्ठस्योपरि तथैव नि:सहा निश्चला च तिष्ठति।

(३)

निशीथिन्या निबिडे तमसि समस्तापि जगती यदा ह्यासीन्नि:। सहं निद्राणा तदा नित्यनित्यं निद्राभ्यासिनौ द्वौ प्राणिनौ [कपोतश्च कपोती च] एको वंशकरण्डिकाया अधस्तात्, द्वितीयो गृहपृष्ठस्य वृतेरुपरि निरन्तरं जागरूकावास्ताम्। तयोर्नेत्रयोर्नासीन्निद्रा, न चालस्यम्। आसीदेकमात्रमभिलाष: पुन: समागमस्य। किन्तु क इदमज्ञासीद् यद् अद्यतनमिदं तयोर्जागरणं सर्वदार्थं कपोतस्य तस्य कृते दीर्घनिद्रा भविष्यति।

अशेषे प्रतिवेशे भ्राम्यन्ती मार्जारी अङ्गणेऽमुष्मिन्नप्युपागात्, यत्र हि करण्डिकाया अधो बालकयोरनयो: क्रीडनकं, कपोत्यास्तस्या जीवनधनमासीन्निहितम्। मार्जारी पूर्वं करण्डिकायास्तस्या: प्राचीरस्याऽकरोत्प्रदक्षिणाम्। तत: करण्डिकामजिघ्रत्। ततश्चौर इव निभृतपदं करण्डिकामिमामुपर्यपसार्य शनै: कपोतमिमं मुखे निष्पीड्य निभृतं पलायिष्ट। उपरितस्तदिदं दृश्यमपश्यत्कपोती, अपश्यच्च नयनयो: समक्षमेव विलुण्ठ्यमानं निजस्य जीवननिधिम्। पुनरपश्यत् नि:सह निरीहावस्थायां वेदनया विलुठतो निजान् प्राणान्। यद्दृश्यं तयाऽदृश्यत तदभूत्तस्या असह्यम्। अन्तर्वेदनया निरसरत्तस्यामुखाच्चीत्कार:। चीत्कारमिमं निशम्य वृक्षेष्ववस्थिता अन्येऽपि पक्षिण: सहानुभूत्यां चीत्कृतिमकुर्वन्। इतोऽधिकं किं वा ते कर्तुं प्रभवेयु: ?

कपोती नेद् बीभत्संदृश्यमशक्नोद् द्रष्टुम्। सा हि कपोतस्य रक्षायै भवनपृष्ठादुड्डीय नीचैस्तथा न्यपतद्यथा मार्जारीं निगलिष्यति दयितं कपोतं च कृतान्तस्य दंष्ट्रात: समाकर्क्ष्यति। किन्तु दीनाया वश एव क्वासीत्? निराशा सा म्रियमाणचित्ता पुनस्तस्या एव वृतेरुपरि न्यपप्तत्। विवशं निर्निमेषं विलोकयन्त्यामेव कपोत्यां विडाली सा निजमाखेटं शनैरुदरस्थमकरोत्। न च किञ्चित्पर्यशेषयत्। स्मृते: संरक्षायै पक्षानेव कश्चित्कपोतस्य सा पर्यत्यजत्!

(४)

सम्प्रति बालकौ तौ विमलामहेशौ नवकिशोरौ, मिथो वैवाहिकबन्धनेन सम्बद्धौ च। दाम्पत्यस्य सुखविलासे विस्मृतवन्तौ तौ व्यतीते पापपुण्ये। तयो: स्मृतयो मलिना भूत्वा न

जाने कस्मिन्ननन्ते सर्वदाऽर्थं व्यलीयन्त। तयोर्द्वयोरेव सकामे हृदये रागसागरस्तरलं तरङ्गायितोऽभूत्। मनसि व्यहरन्ननन्ता आकाांिः। आकाांिः अपि ताः किशोर्यः। आसीद् हृदयमुद्वेलितमिव। मन्ये द्वयोरप्यभ्यन्तरे प्रमोदपयोधिरुल्लासे कल्लोलितः सन् सीकरासारैः परस्परं परिषेक्तुमासीदुत्कण्ठित इव। द्वावप्यमू जगत्या विषाद-वेदनानामास्तामनभिज्ञौ। सुखानि केवलमासन् तयोः सीमायाम्। पूर्णप्रमुदितौ तौ।

आसीद् ग्रीष्मस्य भीष्मः समयः। समस्तं दिनमत्युष्णः प्रचण्डो वायुर्लोकान् व्यकलयत्। सर्वेऽपि कण्ठागतप्राणाः। सायं किञ्चिदशाम्यद्वायोरुष्णता। विमला विशिष्टाऽऽग्रहेण महेशमवोचत्- 'समुपेहि, अद्य नद्यां स्नातुं चलावः। रात्रौ तु यथाकथञ्चिल्लप्स्यावहे निद्राम्। समस्तदिनस्य सन्तापेन प्रज्वलतीव शरीरम्।

महेशः प्रत्यषेधत्प्रथमम्। प्रावोचदसौ- ''विमले! सायंकालोत्तरं गृहाद्बहिर्दूरगमनं न प्रशस्यते प्राज्ञैः।' विमला प्रत्यवदत्- ''अहो किं न प्रशस्यते?'' इत्युक्त्वा च महेशस्य वाञ्छातो विरुद्धमपि सा प्रापयत्तं सरित्तटम्। ततो द्वावपि तौ परस्परस्य हस्तं गृह्णन्तौ समवातरतां सलिले। अवतीर्य च शीतलाभिर्जललहरीभिः प्रकाममक्रीडताम्। सलिले इतस्ततः प्रक्रीडन्तौ तौ समस्तदिनस्य तापसन्तापं शीतलजलधारायां व्यसर्जयतामिव। विमला महेशम्, महेशश्च विमलां पयः प्रक्षेपैरौक्षतां परस्परम्। द्वावप्यास्तां जलक्रीडामग्नौ। सर्वमपि विस्मृत्य समभूतां द्वावपि साम्प्रतं सुखसमाधिगौ।

पयसि परिक्रीडमानयोस्तयोर्यदा समभूद् भूयान् कालविलम्बः, प्रासरच्च यदा परितस्तमोलहरी तदा महेशो विमलामवादीत्- ''विमले! अलं सम्प्रति। एहि व्रजावो भवनम्। अभूद् भूयान् विलम्बः। कोपिष्यन्ति तात....'' एतावदेव तेनोक्तमासीत्। एतावतैव सोऽकस्माज्जलाभ्यन्तरे प्राविशत्। अभूच्चाऽदृश्यः।

किञ्चिद्दूर एव विमलया दृष्टं यदेको महाकायो जन्तुर्महेशमतिगभीरे पानीये नीत्वा उदरसात्कर्तुं मुखेनोन्मज्जयन्निमज्जयंश्च त्वरितमपगच्छति।

विमला पलाय्य तटमुपारोहत्। नाभूत्तस्या रोदनं, न च मुखाच्चीत्कारः। किंकर्तव्यविमगूढेव सा यत्किञ्चित्पृच्छद्भ्यामिव नेत्राभ्यां, कृतान्तमुखमाविशन्तमेकवारं महेशम्, एकवारं चानन्तानन्तं तं जलराशिं प्रति पश्यन्ती काष्टपुत्तलिकेव निभृतमस्थात्। चक्षुषोः समक्षमेव तस्या जीवनधनमासील्लुण्ठ्यमानम्, सा च निश्चलमवस्थिता केवलमासीत्पश्यन्ती। सा यदि कञ्चिदाह्वयेत्सहायतायै तर्ह्यपि कम्? न कोऽप्यासीत्तत्र।

वाष्पपूर्णाभ्यां तस्या नयनाभ्यां मुक्तास्थूलौ जलबिन्दू तत्रैव भूमौ न्यपतताम्। हन्त स्मृतिपथमुपागच्छद् भूमौ विलुठन्ती वराकी सा कपोती।

# मृगयुः

## ( १ )

अतीव दीर्घा सा शीतरजनी आसीत्। दन्तवीणां **( शीतवेगजनितेन कम्पेन दन्तशब्दः )** प्रवर्तयन् हिममारुतः परितः प्रवहति स्म। न केवलं मनुष्यस्यैव, प्राणधारिमात्रस्य रक्तं जडीभूतमिव। मनुष्योऽयं समर्थ इति नीरन्ध्रनिर्वाते गृहे निलीयते। वस्त्रवह्न्यादिभिरात्मानं रक्षति। ईश्वरमात्रसहायकाः पशुपक्षिणस्तु वराकाः प्राणधारणाय प्रयतन्ते यथासाध्यम्। यदि प्रभवन्ति, कालमतिवाहयन्ति अन्यथा निःशब्दं मृतानां तेषां शवशरीराणि स्थाने स्थाने प्राप्यन्त एव।

नद्यास्तटे चित्रकपोतस्य नीडम्। रजन्या: शिशिरो वायुर्वारं वारं नीडमाक्रामति। नूनं प्रतीयते, प्रचण्ड: पवनो हस्ताघातैस्तं निपातयितुमिच्छति। हन्त वराकी कपोती शीतेनाऽऽकुञ्चितसर्वाङ्गा; तथापि मुहुर्वेपते। किन्तु न तस्या: स्वशरीरे दृष्टि:। शिशिरपीडया मुहुश्चुङ्कुर्वत: शावकस्य यथा रक्षा स्यात्तथैव तस्या: प्रयत्न:।

उष्णेन निजवक्षसा सङ्गोप्य पक्षाभ्यां तमाच्छादयामास। शावक एवायं सम्प्रति तस्या जीवनेऽवलम्बनम्। कतिपयदिनानि व्यतीतानि, कपोत: श्येनेन नीत:। तत: प्रभृति सर्वत: खिन्नापि वराकी शिशोरस्य मोहेन जीवति। 'प्रातरुदयति सूर्ये शिशुरयं क्रीडेत्, अहं च क्षेत्रस्य धान्यकणान् प्रसन्ना भोजयेयम्।' आशयाऽनया सर्वारण्याक्रमणानि सोढवती।

व्यतीता रजनी। अभूत्प्रत्यूष:। किन्तु शीतस्य प्रभातम्। नद्यास्तटम्। गगनं चापि घनाऽऽच्छन्नम्। तदुपर्यपि शीत: पवन: प्रवहति स्म सन् सनिति।

## ( २ )

नद्यास्तटे, एकस्य विशालवटवृक्षस्य शाखायामेका कपोती स्थिता, किन्तु सङ्कुचितसर्वाङ्गा, उत्फुल्लतनूरुहा। समीपे च शावकस्तिष्ठति।

''ठाँय''

नलिकास्त्रस्य भयानक: शब्दो वायौ परित: प्रतिध्वनितोऽभूत्। भयत्रस्ता: पक्षिण: फडितिपक्षरवं कुर्वन्तो गगनमुत्पेतु:। निशि जागरणेन सम्प्रति निमीलितनयना कपोती भयातिशयादुन्मीलयामास सहसा नयने!

आ:, तस्या: स्वल्पवयस्क: प्राणप्रियश्च शिशुर्भूमौ लोठति। रक्तधूलिभ्यां लिप्त: स मृत्युयन्त्रणया दीनदीनतरं भुवि विपरिवर्तते। भग्ना तस्य शिरोधरा न सम्प्रति चलति।

सा सर्वमबुध्यत। इदमपि च तया सम्यग् ज्ञातम्-मृत्युर्मे शिरशि खेलति। अतीवासीत्सङ्कटसमय:। एकत: प्राणप्रियस्य शिशोर्ममता, अपरतश्च प्राणानां भयम्। किन्तु नासीदधिकविचारसमय:। वेपमाना सा वृक्षविटपादुदपतत्।

मृगयुर्निजनालिकास्त्रस्य मुखमुपर्यकरोत्- तां प्रति लक्ष्यमवध्नात्। सन्धानस्य प्रयत्नं कुर्वाण आसीन्मृगयु:। इत: कपोती तु प्राणप्रियस्य शिशो: शवोपरि मण्डलेन गगने भ्राम्यन्ती आसीत्। प्राणव्याकुलतावशाददृष्टपूर्वो वेग: समभूत्तदा।

स हि लक्ष्यं सन्धातुं नाऽशकत्। प्रतीक्षते स्म-यथैव कपोती मन्दा स्यात्तथैवाहं लक्ष्यानुसन्धानेन प्रहरेयमिति।

सम्प्रति व्यचारयन्मृगयु:-'किमित्यहमेवमशान्तचित्तो मुधैव? कपोती मृतस्य प्रियशिशो: समीपे स्वयमेवायास्यति।'

मातृहृदये शिशोरनुराग: सर्वथाऽदम्यो भवति। तत्रापि तत्कालमृतं वत्सं सम्मुखमालोकमानायास्तस्या: प्रणय: सर्वथा उद्वेल एव भवति। किन्तु जानीथ, को वाऽस्य हृदयरहस्यस्य तत्त्वज्ञो भवति? यस्य सविधे हृदयमस्ति, हृदये च मानुषरक्तं सञ्चरति।

मातुर्दृष्ट्यां निजजीवनस्य मूल्यं किञ्चिदपि न भवति यदा सा निजसुतस्योपचारे तत्परा भवति। मृगयुरवश्यं मृगयुः, परमयं मनुष्यः। कठोरचित्तोऽपि मानुषस्य हृदयविकारान् स जानाति। स गृहे वसति, गृहिणी बालकाश्च तस्यापि। यदि संसारत्यागी अभविष्यत्, संसारयात्रानिर्वाहार्थं किमेवमकरिष्यत्?

मातुर्निजसुते ममतामन्वमात्सः। निजशावकस्य कृते सा मरणाय सन्नद्धा। यतः सा माता, नानाक्लेशैः पालितः प्रियशिशुः सङ्कटगतः सम्मुखे। किमियमुपेक्षां कुर्यात्? किन्तु मृगयुर्ममताया उपयोगं कस्मिन् कार्ये कर्तुमिच्छति?

## ( ३ )

मृगयोर्नालिकास्त्रं साम्प्रतमपि लक्ष्याभिमुखमासीत्, परम्-अयमनुभवति यत् तस्य हस्तयोः शक्तिः क्षणे क्षणे क्षीयमाणाऽस्ति। तस्य हृदयं मूर्च्छति।

मण्डलेन भ्रमन्ती कपोती सम्प्रति भूम्यभिमुखमपतत्। विक्षिप्तेव निरालम्बेव विसंज्ञेव सा सुतस्य शवनिकटे निषसाद। किन्तु सा किं कुर्यादिति न निश्चेतुं प्राभवत्।

नालिकास्त्रं मृगयाकारिणः करगतमासीत् किन्तु नानेन निजलक्ष्यमभिनत्। नासीत्तस्याङ्गुलिषु सा शक्तिरवशिष्टा, यया स नालिकस्य कीलकं निष्पीडयेत्।

कपोती सम्प्रति मृतशावकस्यात्यन्तं निकटगताऽऽभूत्। विषादपूर्णया दृष्ट्या सा एकवारं परितो वनोद्देशं ददर्श। सा निश्चितं जानाति स्म-मृगयुर्मम लक्ष्यसन्धानाय सन्नद्धोऽस्ति। किन्तु मम प्रियशावकस्य केयं दशा जाता! रात्रौ कियन्ति कष्टानि सोढानि? हन्त प्रातरयं परिणामः?

शोकेन विसंज्ञा सर्वं व्यस्मरत्कपोती। तस्या निश्चला च निरुद्देश्या च दृष्टिर्मृतशावके निमग्नाऽऽसीत्। सा प्रतीक्षते स्म-पुनरप्येकवारं 'ठाँय' इति शब्दं श्रोतुम्।

स एवासौ क्रूरो ध्वनिर्येन तस्याः प्रियशावकस्येयं दशा कृता, तस्या जीवनाधारो विच्छिन्नः। अहह प्रियशावकस्येव ममापि जीवनस्यान्तं स कुर्यात्।

आः, आन्तरिकव्यथया तस्याः किंविधेव दशाऽऽसीत्? हा हन्त न मृता, नापि जीविता।

## ( ४ )

मृगयोर्हस्तान्नालिकास्त्रं न्यपतत्। अन्यदीयवेदनया तस्य हृदयमद्यैव उन्मथितमिवाभवत्। अयमेव स प्रथमो वारो यत्र मृगव्यं दृष्ट्वा तस्य हृदयं विषीदति। नयनयोः कारुण्यस्य गङ्गा प्रावहत्। प्राणिषु विजयं प्राप्तं सञ्चरन्नद्य स स्वयं पराजितोऽभवत्।

असौ प्रतिज्ञामकरोत्- अद्यप्रभृति नाहं हिंसायाः पातकेनाऽपराधीस्याम्। न च कञ्चित्प्राणधारिणं प्रभवन् पीडयेयम्। हा हन्त! मांसं भुक्तवा मांसोपचयापेक्षया घासोपजीवनमेव श्रेयः।

# दानी दीनेशः

## ( १ )

[१]कैलामातुर्मेलकमतीव सङ्‌कुलमासीत्। देहली–कलिकत्तादिभ्यः समागतैर्धनिक–परिवारैर्ग्रामस्य प्रत्येकस्थानमरुध्यत। दूरदूरतः समाजग्मुरापणिका यैर्नानाविधानि विक्रय्यवस्तूनि पुरतः प्रसारितानि। प्रत्येकम् आपणश्चमत्कुर्वद्भिः पण्यैर्दर्शकानां नयनाऽऽहरणायाऽलम्। स्थाने–स्थाने कौतुकानां समारोहः। 'लाँगुरिया'पदचिह्नितानि प्रेमगीतानि सप्रमदं गायन्तो लोकाः प्रतिपदमदृश्यन्त। सह कांस्यतालेन डमरुकध्वनिं कुर्वन्तः प्रपदलम्बिरक्तप्रावारकवाहिनो याचक–गायकाः परितोऽभ्राम्यन्। कैलामातुः सत्यस्य साम्राज्यस्य जयध्वनिभिर्गगनमगुञ्जत्।

यात्रिणां संघर्षेण नाऽऽसीदितस्ततः सञ्चलनस्याऽप्यवकाशः। प्रतिवर्षमागामिनो लोकाः कथयन्ति यन्नैवंविधो मेलकसमारोहः पूर्वं कदाचिददृश्यत। प्रत्येकजनो भक्तिप्रह्वो मातुर्दर्शनलालसः संघर्षाद् व्यग्रश्चालोक्यत, नासीत्कस्यचिदितस्ततो भ्रूक्षेपस्याऽप्यवसरः।

किन्तु मालत्या नासीन्मेलके मनागपि मनोयोगः। भवनपृष्ठस्था सा लोकानामाग्रहान्मेलकाभिमुखमवश्यं स्थिता, परं तस्या नयने किञ्चिदन्यदेव पश्यतः। हृदयमन्यदेव ध्यायति। तस्या मानसे प्राणप्रियस्य शिशोर्मुग्ध–मधुरा अस्पष्टाश्च ते ते आलापाः, क्रीडाश्च तास्ताः सुभृशमभ्राम्यन्। 'गतवत्सरेऽस्मिन्मेलकदिने स कियदुल्लासमयो व्यवहरत्। अतीव हठेन मां मेलकमनयत्, नानाविधानि च क्रीडनकान्यक्रैषीत्। हा हन्त, क्रूरेण कृतान्तेन तन्मे हृदयधनमकस्मादपहृतम्। निष्करुणा किमहं पुनरपि मेलकं गमिष्यामि, क्रीडनकानि च क्रेष्यामि? हन्त नेदं मे शरीरात्सम्भाव्यम्।

## ( २ )

पृष्ठतोऽश्रूयत–'मातुलि! अयि भो मातुलि! किमद्य मेलकदर्शनार्थं बहिर्न चलिष्यसि?'

''किमिति?''

'ह्यस्त्वया किं स क्रीडनकविक्रेता न दृष्टः?'

'अये कीदृशः क्रीडनकविक्रेता?'

१ राजपुत्रप्रान्ते जयपुरनगरात् उपषष्टिक्रोशान्दूरे 'करौली' राज्याधिकृतः कैलाग्रामः। तत्र हि कैलामातेति प्रसिद्धाया महिषमर्दिन्याश्चमत्कारकं स्थानम्। यत्र हि चैत्रनवरात्रेषु प्रत्यब्दं मेलको भवति।

'मातुलि! स एव यो नानाविधानि विविधवर्णानि चमत्कारीणि क्रीडनकानि सप्रमोदमनर्तयत्'।

'तर्हि पुनः किं तेषां दर्शनेन? तान्येव क्रीडनकानि, स एव च मेक्षको यो गतदिने दृष्टः।'

'प्रिये मातुलि! तस्य क्रीडनकान्यतीवोत्तमानि'।

'कामं भवेयुः'।

स्निग्धमधुरस्य प्रश्नस्योत्तरं मातुली रूक्षकर्कशमदात्। अत एव बालकस्य दिनेशस्योत्साहपूर्णं हृदयं नितरां व्यषीदत्। मातुल्या रूक्षं स्वरं विषण्णां च मुखाकृतिमालोक्य स मौनमतिष्ठत्। क्रीडनकं क्रेतुं पणयाचनार्थमवश्यमागच्छत् परमिदमवस्थाया मातुल्याः सकाशाद्याचनस्य नाभूत्सम्प्रति साहसम्। किन्तु क्रीडनकस्य लालसां नाऽसौ त्यक्तुमशकत्। अत एव आरुद्धेन स्वरेण स मन्दमकथयत्– 'मातुलि! एकं क्रीडनकम् अहमपि....'

'दिनेश! क्रीडनकविक्रेता तु स प्रतिगतः।' इत्युक्त्वा सा दीर्घमेकं निःश्वासममुञ्चत्। दिनेशस्य संलापेनाऽनेन निजप्राणधनस्य प्रियशिशोः सर्वेऽपि पूर्वसंलापास्तस्याः स्मृतौ जागरूका अभूवन्। अत एव पूर्वकथाः स्मृत्वा दुःखितं व्याकुलं च तस्या हृदयं शोकसागरे न्यमज्जत्।

हन्त अबोधः स शिशुः कथमिदं बोद्धुं प्रभवेत्– यन्मातुल्या हृदयस्य साम्प्रतं करुणा दशा। किन्तु सम्प्रति मातुल्या नम्रेण स्वरेण वर्द्धितसाहसोऽसौ नम्रमवादीत्– 'मैवं मातुलि! मया पृष्टोऽसौ ह्य एवाऽवदत्– यदहं दिनद्वयं यावन्मेलके तिष्ठेयमिति। मातुलानि! अहमप्येकं क्रीडनकं नेतुमिच्छामि।'

'क्रयणाय पणाः क्व सन्ति?'

'हुम्। एकेनैव पणेन तु तत्क्रीडनकं लभ्यते। किमेकमपि पणं मे न दास्यसि? मदनाय कथं ह्यस्त्वया बहवः पणा दत्ताः?'

अबोधो दिनेशो नेदं तारतम्यं परिजानातिस्म यन्मदनस्तस्याः साक्षाद्भगिन्याः सुतः, अहं च तत्पत्युर्भगिन्या इति।

बालस्वभावोक्तेनाऽप्यनेन वाक्येन शोकस्य स्थाने मालत्याः किञ्चित् क्रोधोऽभूत्। क्रोधावेशादस्फुटं बडबडायन्ती सा झगिति समुत्थाय नीचैर्भवनं प्राविक्षत्।

( ३ )

दिनेशस्य दृशौ अश्रुभाराऽऽक्रान्ते अभूताम्। भग्नोत्साहस्य तस्य न पुनर्मातुलीं प्रति पणयाचनस्य साहसमभूत्। 'मातुलो न जाने कदा आगच्छेत्, तावत्कालं क्रीडनकविक्रेता किं

तत्रैव तिष्ठेत्।' अयमेव विचारस्तस्य लघुनि हृदये वारं वारमावर्तत। एवं-विधा निराशता नेतः पूर्वं कदापि तेनाऽनुभूता। अत एव शून्यगृहस्यैकस्मिन् कोणे निभृतं निलीय जानुनोरन्तर्निहितमुखोऽसौ करुणमरोदीत्।

खिन्नस्य तस्य मानसे स्वर्गताया मातुः स्मृतिः सहसैवाऽजागः। जनन्यास्तद्वात्सल्यम्, निरवधिः प्रेमा च हृदयमाच्छादयामास। तप्तहृदयादुद्गतः शोकाऽऽवेगो नेत्राभ्यां बहिः प्रावहत्। व्यचिन्तयदसौ यदद्य ममापि माताऽभविष्यत्तर्ह्यहमपि किमेकपणार्थमेवमवमानितोऽभविष्यम्? स्नेहमयि जननि! क्वासि, या त्वमेकं क्रीडनकं याचिता बहूनि मह्यमदाः। दिनेशस्य हृदये मातुरवसानकालिकी घटना सा जागृताऽभूत्। पथ्याऽऽसेवनेन नितरां व्याकुलायै तस्यै यदाऽन्तसमये अभिरुचितं भोज्यमदीयत तदा दिनेशोऽपि तत्रोपातिष्ठत्। अबोधोऽयमप्यङ्कमारुह्य भोज्यमयाचत्। अश्रुकलिलाक्षी माता किञ्चिन्मात्रमास्वाद्य सर्वमस्मै प्रायच्छत्।

इदमपि च दृश्यं तस्य नेत्रयोः सम्मुखमनृत्यत्-यदा हि तस्य माता मातुलं सम्बोध्य प्रार्थयत-'भ्रातः! दीनोऽयं दिनेशोऽद्यप्रभृति त्वदायत्तः। मातुरभावं यथाऽयं नानुभवेत्तथा करिष्यसि। अयमेव मे दीनाया हृदयसर्वस्वम्। यद्यस्य कष्टं भवेत्तर्हि न ममात्मा शान्तिं लभेत।' अन्तिमं वाक्यमिदं जल्पन्त्येव सा शयनीयेऽशयिष्ट। तथा चाऽशयिष्ट यथा न पुनः कदाचिदपि जागरितुं प्राऽभवत्। बाढमारुदन्मातुलो मामुरसाऽऽश्लिष्य बहुतरमसान्त्वयत्। करुणापूर्णा मातुल्यपि मामङ्कमारोप्य प्राबोधयत्- 'वत्स माता ते सम्प्रति शेते, यदा सा जागृयात्तदा त्वया संलपेत्। अङ्कमारोप्य ते स्नेहं कुर्यात्' इत्यादि।

बहिस्तः समागतश्चारुचन्द्रो दिनेशमदृष्ट्वा मालतीमपृच्छत्- 'किं दिनेशो मेलके गतः? एकाकी स किमिति प्रेषितः।'

'किमहं जानीयाम्?'

'त्वं न ज्ञास्यसि तर्हि कोऽन्यो जानीयात्?'

रुदत्या मालत्या प्रोक्तम्- 'नाहं वेद्मि। अत्रैव कुत्रचित्स भवेत्। नाहमेनं ग्रन्थौ बद्ध्वा सञ्चरामि। भवानपरस्य सुखं दुःखं वा किमु कदाचिद्भावयति? अपरो म्रियेत जीवेद्वा न ते भ्रूक्षेपोऽपि।'

चारुचन्द्रो मृदुमधुरैः शब्दैरवादीत्- 'नेदमहं ज्ञातुं प्रभवामि यद् यतः प्रभृति मदनोऽत्राऽऽगतस्तत आरभ्य भवत्या हृदयभावो दिनेशं प्रति प्रतिदिनं किमिति प्रातिकूल्यं भजते। (निरूप्य) धिङ् मुग्धे किमित्यकाण्डे शोचसि। रात्रिन्दिवमपि निबद्धया चिन्तया किं भवेत्? संसारस्याऽस्य कर्ता धर्ता तु कश्चिदन्य एव। तव मम वा विचारैरत्र किं सिध्येत्? स एव सृजति स एव च संहरति। स शिशुस्तस्यैव निक्षेपोऽभूदस्मत्सविधे, अत एव यथेच्छमनेन प्रतिसंहृतोऽसौ। कोऽस्माकमत्राऽधिकारः? एतावत्कालार्थमेवाऽयमत्राऽऽगच्छत्। तस्य यावदेव ऋणमासीत्तावत् प्रतिशोध्य परावृत्तोऽसौ। यत्किल सुखदुःखादिकमस्माभिर्भोग्यं तद्धि निष्प्रतिरोधं

भोग्यमेव। किं वा मुधाविषादेन लभ्यते? भगवती कैलादेवी सर्वमवगच्छति। दृढमिदं विश्वसिहि यत्सा सर्वेषां प्रार्थनमाकर्णयति। वयमेतदर्थमेव तच्चरणमूलमुपयाताः। सा हि त्वरितमेव नो मनोरथं पूरयेत्। किन्तु वर्तमानकाले दिनेश एवाऽस्माकं विनोदस्थानम्। अयमेवाऽऽवयोः पुत्रः। न चेदग्रेऽप्ययमेवाऽवलम्बनं नो भवेत्।'

''हुम्! सत्यमेवाऽभिदधासि। तव यत्किञ्चित्तत्सर्वं। दिनेश एव। किमन्यैर्भवतः प्रयोजनम्?'' संलापं विच्छिद्य मध्य एव प्रोक्तं मालत्या।

उपेक्षया सर्वमिदमनाकर्णयन्निव चारुचन्द्रो व्याकुलं च कम्पितकण्ठं चोच्चैराह्वयत्– 'अरे दिनेश! क्वासि, किमित्युत्तरं न प्रतिपद्यसे?'

'आम्, मातुल' इति गद्गदकण्ठेन दिनेशः प्रत्यवदत्।

'अरे तत्रान्तर्निलीनः किं करोषि? एहि, बहिरागच्छ।'

नागच्छद्दिनेशः। चारुचन्द्रः स्वयं गृहाभ्यन्तरमगच्छत्। तमुत्थाप्याऽवदत्– 'अये किं रोदिषि वत्स! एहि, मेलके चलावः। ततः क्रीडनकानि स्वादूनि भोज्यानि चाऽऽनयावः। त्वयाऽद्यावधि भुक्तं न वा?'

शिरःकम्पेन दिनेशः प्रत्यषेधत्।

'एतावत्कालं किमिति न भुक्तवान्? हन्त मातुल्या पणो न दत्त इत्येवाकुप्यः? गृहाण, अयमहं ते पणं ददामि' इत्युक्त्वा चारुचन्द्रो दिनेशस्य हस्ते पणं न्यदधात्। हासनाय चाऽस्य भुजमूलं करेणाऽऽमृशत्, येन सरलोऽसावहसत्।

## (४)

मेलकमार्गो नीरन्ध्र इवाऽऽसीत्। स्त्रीपुरुषाः, बालकबालिकाः, युवानो वृद्धाश्च सर्व एव मेलके भ्रमन्तः प्रमोदमविन्दन्। मधुराऽऽस्वादरसिकानां समूहेन यथा आग्रानगरीयो मधुरव्यञ्जनापणः सङ्कुलोऽभूत्तथैव बालकानां वृन्देन क्रीडनकविक्रेताऽप्यवेष्ट्यत। विक्रेताऽयं मधुरस्वरेण गायन् क्रीडनकमनर्तयद् येन बालकानामान्तरमपि बलादनृत्यत्। अस्मिन्नेव बालसम्मेलने एको लघुर्बालको वृद्धां निजपितामहीं वदन्नासीत्– 'अहमपि ग्रहीष्यामि।'

'किं वत्स?'

'क्रीडनकम्'।

'नेदं वत्स गृह्यते, अपि तु दूरत एव दृश्यते।'

'तर्हीमे बालका: कथमिदं गृह्णन्ति?'

वृद्धा सतृष्णनेत्राभ्यां क्रीडनकाऽभिमुखं निरीक्ष्य बालकं पुनरवोचत्- 'वत्स किं वदामि, किं वाऽऽचरामि? तेषां सविधे पणा: सन्ति। तेषां पितरौ स्त:। आवां चाऽनाथौ। नाऽऽवयो: कश्चिदाश्रय:। उपरि गगनं नीचैरिदं शून्यं धरातलम्। यदि ममापि सविधे पणोऽभविष्यत्तर्हि निजं जीवनधनं किमेवं भूतले अलोठयिष्यम्। क्रीडनकं किं नाऽदापयिष्यम्?'

**बालक**:- 'पितामहि? न मां वचनै: प्रतारय। अद्यैकं क्रीडनकं दापय, अहं ते चरणयोर्निपतामि।'

कारुण्यपूर्णैर्बालकस्य मार्मिकशब्दैर्वृद्धाया हृदयमभ्यन्तरे अरोदीदिव। सकृद् बालकं सकृच्च क्रीडनकानि निरीक्ष्य मर्माऽऽहता सा दीर्घं न्यश्वसत्। अतिकष्टेन चाऽऽत्मानमवष्टभ्य तत: स्थानात्प्रयाणस्य चेष्टामकरोत्।

दिनेशोऽपि मातुलेन सह तत्राऽऽगच्छत्, क्रीडनकं चाऽक्रैषीत्। सर्वमन्यद् विस्मृत्य प्रमोदेन नृत्यन्नसौ मातुलमवादीत्- 'दृष्टं मातुल! मे क्रीडनकं कीदृशं नृत्यति?'

समीप एव स्थितस्य वृद्धाया: शिशुपौत्रस्य कर्णयोरिमे शब्दा: पेतु:। 'अहो कीदृशं नृत्यति। अहो कीदृशमुत्तममस्ति' इत्यादिभि: शब्दैर्बालकस्य धैर्यं नितरां चूर्णीकृतम्। दु:खादुच्छ्वसितहृदयोऽसौ सम्प्रति सचीत्कारमरुदत्, पितामहीं च वक्षसि सकरुणमालिङ्गत्।

वृद्धा पितामही नेदानीं सोढुमशकत्। विद्रुतहृदयायास्तस्या: कृते बालकस्येदं हृदयविदारकं दु:खमसह्यमभूत्। धैर्यविलोपेन किङ्कर्तव्यविमूढा सा नात्मने प्रबभूव। अत एव भिक्षां याचितुमनभिज्ञापि श्रेष्ठिनमेकं विवशतया सदैन्यदर्शनमवादीत्- 'एकं पणं मे दत्त। केवलमेकं ताम्रखण्डमहं याचे। शिशवेऽस्मै क्रीडनकमिदं क्रेतव्यम्। गृहादहं नाऽऽनीतवती। ग्रामश्च मे दूरे, तत् अबोधस्याऽस्य शिशोरुपरि दयां विधत्त।'

सर्वमिदं करुणदृश्यं श्रेष्ठी यदि सावहितमद्रक्ष्यत्तर्ह्यवश्यमस्य हृदयमद्रविष्यत्। पणमेकं किम्, रूप्यकमप्यदास्यत्। परं न सर्वस्य सविधे दर्शनाय नेत्रे भवत:। स हि तां भिक्षाव्यवसायिनीमविदत्, अत एव साऽवज्ञमवोचत्- 'गच्छ दूरम्, पश्यत! वृद्धापि क्रीडनकार्थिनी सेयं समागता! बालाय क्रीडनकमावश्यकं तर्हि पणं नि:सारय।'

मर्माऽऽहता वृद्धा स्तब्धेवाऽभवत्। मनस्येवाऽभावयत्सा-'हा हन्त इमेऽपि मनुष्या: सन्ति। एतेषामपि शिशवो भवेयु:। पश्यन्त्या एव मे ताम्बूलार्थमेवैभि: कियन्त: पणा नि:शेषिता: हन्त क्षणिकानन्दार्थम्, आमोदप्रमोदार्थं चेमे कियद् धनमपगमयन्ति, परं दीनानां जीवनरक्षायै एक: पणोऽपि दुर्लभ:। अस्मिन्समये सेयं बालकस्य जीवनरक्षा। किन्तु वास्तवे परोपकारे,

नि:सहायानां साहाय्ये च दानं नूनं कठिनतमम्।'

प्रमुदितचित्तो दिनेशः क्रीडनकं नर्तयन् वृद्धायाः पार्श्वतोऽव्रजत्। वृद्धायाः शिशुः पौत्रो निकटाऽऽगतं क्रीडनकं दृष्ट्वा धैर्यं धातुं न प्राभवत्। अत एव रुदन्नसौ दिनेशस्य क्रीडनकाभिमुखं हस्तं प्रासारयत्। वृद्धा तमिमं सभर्त्सनं प्राबोधयत्– 'चपल किमिदं करोषि। न कस्यचिद्वस्तुनि हस्तं प्रक्षिपन्ति। सन्तोषं कुरु, दीनेभ्यो भगवानेव ददाति।'

विवशो बालको हस्तं समकोचयत्। सलालसमजल्पच्च–'अम्ब! स भगवान् क्वास्ति। शीघ्रमिदानीं तमाह्वय।'

इदं ब्रुवन्नेव समुक्ताक्रन्दमरोदीत्, भूमौ लुठंश्चाऽवदत्– 'भगवन्! शीघ्रमागम्यताम्। विलम्बेन क्रीडनकविक्रेता स्वगृहं गच्छेत्। अहमेकं क्रीडनकम्......'।

निसर्गतो दयालुर्दिनेशो नेदं सोढुं प्राभूत् अवादीदसौ वृद्धाम्– 'अम्ब! अस्मै क्रीडनकं किमिति न दापयसि?'

मर्माहता वृद्धा किमस्मै बालकाय बोधयेत्। प्रत्यवदत्सा सनि:श्वासम्– 'दापयिष्यामि वत्स!'।

**दिनेशः** – तर्हि दापय। पश्य, दीनोऽसौ कियद्रोदिति?

**वृद्धा**– जात! दीर्घमायुस्ते भूयात्। बालकेन सताऽपि त्वया इयत्तु परिसान्त्वितम्। भगवाँस्ते मङ्गलं क्रियात्। किन्तु पुत्र न मे सविधे पणोऽस्ति। यद्येकोऽपि पणोऽभविष्यत्तर्हि एकमात्रमपि मे जीवनावलम्बनमिमं किमित्येतावदरोदयिष्यम्।

**दिनेशः**– 'तर्हि भ्रातः! क्रीडनकमिदं गृहाण। क्रीडितं मया, इदानीं त्वमनेन क्रीड।' वदन्नेवेदं दिनेशो झटिति निजं क्रीडनकं वृद्धायाः शिशोर्हस्ते न्यदधात्।

बालको रोदनाद्व्यरमत्। प्रमोदेन नृत्यन्नसाववदत्– 'अपि पितामहि! अयमेवाऽस्माकं भगवान्?'

**वृद्धा**–आम्। वत्स दीनानां दु:खे नि:स्वार्थभावेन ये साहाय्यमारचयन्ति त एव भगवत्स्वरूपाः।

हर्षाद्वात्सल्याच्च वृद्धा विद्रुतहृदयेवाऽभवत्। 'कदाप्यमङ्गलं ते मा भूत्' इत्याशीर्भिरभिवर्धयन्ती सा बालकस्य हस्तमचुम्बत्, आनन्दाश्रुभिस्तमभ्यषिचन्मस्तके। दूरे तिष्ठन् दिनेशस्य मातुलः सर्वमिदं कौतुकमदर्शत्। स हि सरभसं धावित्वा दिनेशमुत्सङ्गेऽनयत्, वक्षसा चाऽश्लिक्षत्।

एष कारुण्यवृत्तान्तः कतिलक्षजनव्यापिनं सर्वमपि मेलकं क्षणादावृणोत्। तद्दिनादारभ्य दिनेशोऽयं दानी दिनेश इति नाम्ना सर्वतः प्रासिध्यत्।

# वीरो बालचरः

## ( १ )

**दुर्गादेवी**–भ्रातर्दीनेश! किमेतदद्य सज्जयसि? अहह परिपूरिता सेयं नानावस्तुभिर्महती ग्रन्थिः। अपि विवाहस्य वरयात्रायां क्वचित्प्रस्थातव्यम्?

**दीनेशः**– हन्त विघ्नायिता त्वमुपस्थिताऽस्येव। समागत्यैव च पुनः प्रारब्धः सोऽयं प्रश्नकाण्डः? सम्प्रति विततैः प्रश्नशतैर्मे मस्तिष्कमाकुलयिष्यसि। किन्तु नेमा वार्तास्तव बुद्धिगम्या इति विद्धि। अपि ज्ञातम्?

**दुर्गादेवी**– किमिदं भ्रातः? अहमपि तु विद्यालये पठामि। ततो मह्यं सूचने का वा भवतो हानिः? नाहं सहनयनाय भवन्तमागृह्णामि। केवलमहमिदमेव जिज्ञासे यत् इयन्त्युपकरणान्यादाय कुत्र वा भवान् कामयते गन्तुमिति।

**दीनेशः**– वस्तून्यमूनि दृष्ट्वाऽपि किं न शक्नोषि बोद्धुम्? न किं जानीषे यद्वयं बालचराः। अद्य विद्यालयस्य सर्वेऽपि बालचरा वनभ्रमणाय बहिः प्रस्थास्यन्ते, परावर्तिष्यन्ते च दिनद्वये नगरम्। तदर्थमेव सेयं सकलापि सामग्री। अपि परिज्ञातमिदानीम्?

वस्तुतः सत्यमिदम्। सज्जाव्यग्रस्य दीनेशस्य न रात्रावपि समभून्निश्चिन्तनिद्रा। यथाकथञ्चित्स हि विचारैरेव व्यत्यगमयद्रजनीम्। प्रातरुत्थित एव च ऊहापोहेऽस्मिन्प्रसक्तोऽभूद् यद् बालचरयात्रायां किं किं वा मया सह नेतव्यमिति। यः कोऽपि सहचरोऽमिलत्स हि समपृच्छत्तम्– 'केषु केषु वस्तुषु सहनीतेषु यात्रायां न स्यादसुविधा?' बहुतरमितस्ततो गवेषणां कृत्वा, सहचरान्पृष्ट्वा च स हि यात्रोपकरणानां विस्तृतामेकां सूचीं समलिखत्। सामग्रीतालिकां चेमां पुरो निधाय स हि सर्वाणि वस्तून्यकार्षीद् ग्रन्थिबद्धानि। एतस्मिन्नेव समये समागादेतस्य भगिनी दुर्गादेवी, या हि विपुलविस्तृतं वस्तुस्तूपमिममालोक्य समभूच्चेतसि चकिता।

**दुर्गादेवी**– ननु बालचराणां का वाऽऽवश्यकता तत्र दर्पण–कङ्कतिका–केशतैलाङ्गरागा–दिप्रसाधनसामग्रीभिः? भ्रातः! भवता तु स्तूपायितः सोऽयं वस्त्रपुञ्जस्तथा राशीकृतो यथा द्वित्रवर्षाणां कृते क्वचित्प्रवससि। पुनश्चाय–विषकूटयोः समुद्गकैरेभिः किं तत्र कर्तासि? मन्ये, यदि सर्व एव च्छात्राः सगृह्णीयुरेतावन्त्येवोपकरणानि तर्हि भवेद्धूमशकटेरेकस्या आवश्यकता!

**दीनेशः**– हन्त पुनरारब्धं बुद्धेः श्राद्धं भवत्या अत एव तु प्रोक्तं मया यत्त्वं नेदं बोद्धुं पारयिष्यसीति। अरे न वयं तत्र मरणाय तपश्चरणाय वा गच्छामः। तत्र हि वनविहारेण सानन्दं

मनो विनोदयिष्यामहे। चाय-विषकूटयोः प्रभावेण सर्व एव बालचरा मामनुवर्तिष्यन्ते, सर्व एव च मां प्रणयात्प्रतीक्षिष्यन्ते। चेदेकाकिन एव मे सेवानियोगः समापतेत्तर्हि सर्वे एव मे सहाय्यमनुतिष्ठेयुः। न च मे भवेदंशतोऽपि कष्टं किञ्चित्।

**दुर्गा.**- तर्हि तु साधीयान् बालचरो भवान्! यदा हि स्रस्तरोपधानादिसुखसामग्री सह सङ्गृह्यते तदा सम्यगेव साधयिष्यते लोकसेवा भवता!

**दीनेशः**- अत एव तु प्रोक्तं मया, कस्त्वया सह कुर्याद् वाग्व्ययम्। नूनमुल्लङ्घिता बुद्धेश्चरमसीमा भवत्या। अस्तु, इदानीं दर्शय पृष्ठं त्वरितम्। अन्यथा न ते हितं भवेत्। महामूढा पूर्णा च दुर्दुरूढा।

( २ )

वह्नेः शिखा उत्तरोत्तरमचुम्बन्नम्बरम्। प्रथमतो निदाघस्य दिवसाः, ततो जलस्याभावः, तदुपरि तृणनिर्मितं कुटीरम्। कहार्या वर्षद्वयवयस्कः शिशुर्गृहाभ्यन्तर एव रोदिति। सा च बही रथ्यायां स्थिता दीनदीनतरमाक्रन्दति। न च कस्यचिद् गृहान्तः प्रवेष्टुं साहसम्। बहवस्तु तस्यामेव दोषारोपणं कुर्वन्तः कलहायन्ते किन्तु न कोऽपि दुग्धमुखस्य तस्य शिशोः संरक्षणायाऽवदधाति। कहारी प्राणधनस्य निजशिशोः कृते कण्ठागतप्राणा। बालचरो दीनेशश्चकार सकृत्साहसम्, किन्तु करालाभिर्वह्निज्वालाभिः प्रशमितः सर्वोऽपि धैर्योद्यमः। स हि किंकर्तव्यविमूढस्तत्रैवावस्थितोऽभूत्। आन्दोलितोऽभूत्स ह्यस्मिन्नेव विचारचक्रे यत् बालचराणां कतमा युक्तिरत्रोपयुक्ता स्यादिति। सहस्रशिखाः समभूवन् वह्निशिखाः। अगलत्सर्वेषां साहसम्। पुत्रैकमात्रावलम्बना दीना कहारी शोकाद्विलुलोठविचेतना भूमौ।

एतावतैव दृष्टं दीनेशेन यद् वायुवेगेनैको बालचरस्तत्रागच्छत्, प्राविशच्च सहसैव गृहान्तः। प्रायतत दीनेशः सरभसमुपसर्प्य तं निवारयितुम्, किन्तु तडित्प्रतिमया तस्य शीघ्रकारितया व्यधीय ताऽसौ हतबुद्धिः। स हि चित्रलिखित इवावस्थितस्तदिदमेवाशोचद् यदस्य हन्त को भवेत्परिणामः। बालचरस्यास्य साहसोपरि चित्रीयन्ते स्म सर्वेऽपि।

यस्मिन् समये स हि बालचरः कुटीराद्बहिरागच्छत्तदा तस्य हस्ताभ्यां विमुच्य निपपात भुवि रुदन्बालकः। स्वयं चाप्ययं निपपात विसंज्ञो मूर्च्छितः सन्। अदह्यन्त सर्वाण्यप्यस्य वस्त्राणि। आसंश्चास्य श्यामवर्णानि हस्तपादाद्यङ्गानि। यदा ह्यस्य समभूच्चेतना तदा दृष्टमनेन यद् दीनेशस्तस्य मस्तकमुत्सङ्गे वहन् प्रवाहयति शोकतः प्रेमाश्रूणि, पर्यवेष्टयच्चैनं परितो महान् जनसम्मर्दः।

यथैवाऽस्याऽक्षिणी उन्मीलिते तथैवालेखत्तस्यौष्ठयोः सूक्ष्मा स्मितरेखा। स हि क्षीणतरे स्वरे पप्रच्छ दीनेशम्- भ्रातः! बालचरस्त्वमसि अहं वा?'

दीनेशस्य मुखान्न निश्चक्रम किञ्चिदप्युत्तरम्। किन्तु पुनरयमप्राक्षीत्- 'उत्तर देहि मे

भ्रातः ?'। दीनेशेन तस्य मुखमाचुम्ब्य सस्नेहमुदीरितम्– 'त्वम्'।

अयं बालचरो नासीत्कश्चिदन्यः। अयं ह्यासीदस्य लघुभगिनी 'दुर्गादेवी'!!

## धर्मधनयोर्युद्धं धर्मस्य विजयश्च

### ( १ )

विश्वव्यापिनो युरोपयुद्धस्य माहात्म्याद्देशमात्रे धान्यस्य महर्घतापिशाची भयानकं रूपमापेदे। प्रचुरधान्योत्पत्तावपि भारतीया जना एकैकमुद्राया अपि न प्रापुरन्नं समये। दुर्लभमभूद् गोधूमानां दर्शनम्। धान्यव्यापारिभिरितोऽप्यधिकमहर्घतालोभेन स्थाने स्थाने गुप्तीकृत्यं धान्यम्, विक्रयाय न बर्हि प्रसारितम्। अत एव राजतन्त्रेणा(कंट्रोल)ऽधिकृतमखिलं धान्यम्। राजाज्ञामन्तरेण न कश्चिद्धान्यं सङ्ग्रहीतुम्, न च स्थानात् स्थानान्तरं प्रेषयितुं शक्नुयात्। राजानुमतेषु परिमितेष्वापणेषु एकमनुष्याय एकमुद्रामात्रस्यादीयत त्रिप्रस्थमात्रं गोधूमम्। एतदपि नियते समये। समयमुल्लङ्घ्य समागतानामेकादशी तिथिरेव सम्मुखगताऽभवत्। अत एव राजनियतधान्यापणेषु तावान् सम्मर्दोऽभवद् यद्धान्यं क्रीत्वा बहिरागतस्य पुनर्जन्मेवाऽगण्यत सर्वमन्यत्सोढुं शक्येत, किन्तूदरज्वाला केन केन वा शक्येत मर्षयितुम्? सापि च धनसत्तायाम्। अत एव धान्यव्यापारिणां कृते समपद्यत स्वर्णमयः समयः। प्रचुरधनलोभाद् गुप्तरूपेणाऽचलद्धान्यस्येतस्ततः प्रवाहः।

यद् गोधूमं षोडशप्रस्थमितमेकमुद्राया अलभ्यत तस्य हि घृततोऽप्यधिकमहर्घतामालक्ष्य धान्यव्यवसायः सुवर्णाकरः पर्यगण्यत जनैः। दुर्लभगोधूमेषु स्थानेषु राजाज्ञाविरोधेऽपि गुप्तरूपेण प्राहीयत गोधूमराशिः। राजतन्त्रेण धान्यबहिर्निर्गमनस्य घोर कठोरः प्रतिषेधः प्रचारितः परं सीमाधिकारिणां लोभाग्रैः सहस्रजिह्वतया न यथावत्कर्तुमपार्यत। नानाविधानां छलप्रपञ्चानां सृष्टिरभूत्। केऽप्युत्कोचेन, तर्ह्यन्ये कपटजालेन स्वार्थं साधयामासुः। निर्गमनसीमाधिकृतस्य पदं सुवर्णष्ठीवि समभूत्। तत्पदप्राप्तये धनकर्षणशीलानां वाक्कीलानामपि लालसाऽङ्कुरिताऽभूत्। राजनियम (कानून)– शिक्षां परिसमाप्य पं. गङ्गाधरोऽप्यधिकारप्राप्तये गृहाद्बहिरभवत्।

तस्य वृद्धः पिता पुरातनोऽनुभवी, स ह्यबोधयत् 'वत्स! शिक्षाव्ययादिना गृहस्य या दुष्परिस्थितिस्तां प्रत्यक्षं पश्यस्येव। ऋणभारेण गृहस्य मेरुदण्डो भङ्गोन्मुखः। साम्प्रतं त्वमेवास्य सहायकः। सेवाकार्ये अधिकारपदस्य प्रतिष्ठाया उपरि न दृष्टिर्दातव्या। तत्कार्यमङ्गीकार्यं यत्र संसिध्येदुपरितनोऽप्यायः। मासिकवेतनं हि पूर्णिमायाश्चन्द्रः यो ह्येकस्मिन् दिने दृश्यमानः सन् प्रत्यह क्षीणक्षीणो लुप्यतेऽन्ततः। उपरितन आयस्तु प्रवहत्, स्रोतो येन सर्वदैव तृष्णा निर्वाप्यते। वेतनं मनुष्यो ददाति, अत एव न तस्मिन् समृद्धिर्भवति। उपरितनं लाभमीश्वरो

वितरति, अत एव हि तेन गृहं समृद्धयति। त्वं साम्प्रतं शिक्षासम्पन्नः, किं ते बोधयितव्यम्। एतस्मिन्विषये विवेकस्यावश्यकता। पूर्वं हि मनुष्यः परिचेतव्यः, ततस्तस्याऽऽवश्यकता निर्धारणीया, अन्ते चावसरोऽनुपालनीयः, एतदुत्तरं यदुचितं प्रतीयेत, कर्तव्यम्। अपेक्षावतः पुरुषस्योपरि कठिनताऽऽचरणेऽपि चतुर्दिक्ष्वेव लाभः, किन्तु निरपेक्षस्याऽऽयत्तीकरणं महत्कठिनम्। अस्तु, अवधारय तावत् स्थूलतममिदं तत्त्वम्।'

शुकनासोपदेशोत्तरं ददौ स पुत्रायाऽऽशीर्वादम्। आज्ञाकारी पुत्रः सर्वमिदमवधार्य उपार्जनस्य यत्नायाग्रेसरो बभूव। धैर्यं तस्य मित्रं बुद्धिश्चासीत्पथिप्रदर्शिका। शुभशकुने चासौ गृहात्प्रतस्थे, अतएवास्याभूत्सफलो यत्नः। अभूदयं धान्यनिर्गमनसीम्नोऽधिकारिपदे प्रतिष्ठितः। पुष्कलं वेतनम्, बाह्यस्याऽऽयस्य तु नासीत्परिसीमापि। सुखसंवादमिदं श्रुत्वा वृद्धः पिता न ममौ स्वाङ्गेषु।

( २ )

शिशिरर्तुस्ततोऽपि रात्रेः समयः। गुल्मस्य कर्मचारिणः, प्राहरिकाश्चे सर्वेऽपि मदमत्ता निद्रायामासन् विचेतसः। पं. गङ्गाधरस्य षण्मासतो नाभूदधिकः समयोऽत्रागतस्य, किन्त्वेतस्मिन्नेव समये कार्यकुशलतया सदाचरणेन चायं सर्वानप्युच्चाधिकारिणो वशीकृतवान्। तस्याधिकारिणामासीत्तस्योपरि पूर्णो विश्वासः। सीमाधिकरणस्थानस्य[१] पूर्वदिशि क्रोशार्द्धे प्रावहद् बाणगङ्गा। आसीत्तदुपरि नौभिर्निर्मित एकः सेतुः। गुल्माधिकारी गङ्गाधरो निद्रानुषङ्गादासीत्सम्प्रति विचेतनः। किन्तु सहसैव यथा तस्य प्रबोधो भवत्तथैव नद्याः प्रवाहोपरि भारशकटानां खडखडारवं, कैवर्तानां कलकलं चाश्रौषीत्। शयनीयादुदतिष्ठत्। एतस्मिन् घोरनिशीथे किमिति शकट्यः सेतुमुल्लङ्घयन्ति? अप्यस्ति काचित्कपटकल्पना? स हि नियोगपरिधानीयमधात्[२]। पार्श्वपुटके[३]गुलिकास्त्रकं[४] निधाय त्वरितमेव तुरङ्गमारूढोऽसौ प्राप्तवान् सेतूपरि। शकटीनां पङ्क्तिमालोक्य सोत्तेजनमवादीत्– 'कस्येमाः शकट्यः?।'

अभूत्स्वल्पं समयं निस्तब्धता। प्रावर्तत मनुष्येषु निभृतनिभृतं मन्त्रणा। ततः प्रमुखः शकटिवाहोऽवदत्– पं. नरेन्द्रनारायणस्य'

'को नरेन्द्रनारायणः?'

'राजपुरस्य'

गङ्गाधरस्याङ्गानि समकुचन्नेकवारम्। पं. नरेन्द्रनारायणः प्रान्तस्यास्य सर्वप्रतिष्ठितो भूम्यधिकारी। न केवलं भूम्यधिकार्येव, परोलक्षमुद्राणां कुसीदव्यवसायमसौ[५]चक्रे। अस्मिन्प्रान्ते लघुमारभ्य को वा महानपीदृशो भवेद् योऽस्य न स्यादधमर्णः[६]। व्यापारोऽप्यस्य विपुलोऽभूत्। एतदन्तरा लवणाकरस्य, पाषाणखनेश्चाप्यस्याधिकारोऽभूत्। आसीदपारा सम्पत्तिः, प्रान्तमात्रे च महती प्रतिष्ठा। अवसरचतुरोऽप्ययमेक एवासीत्। सर्वेऽपि राजाधिकारिणोऽस्य संव्यवहारिणः। प्रान्तीयः शासकः समये समयेऽस्य गृहे जगाम, लेभे च सर्वतः प्रमोदवर्द्धकं सत्कारम्।

१. मालनिकासी का 'नाका'(राहदारी का दफ्तर)

२. वरदी।

३. जेब।

४. तमंचा।

५. व्याज (लेनदेन)

६. कर्जदार (ऋणलेनेवाला)

पृष्टं गङ्गाधरेण–'शकट्य: क्व गमिष्यन्ति?' उत्तरमलभ्यत 'विजयपुरम्'। किन्तु 'शकटिषु किमापूर्णम्' इति यदा प्रश्नोऽभूत्तदा पुनर्नीरवता व्याप्यत। किञ्चित्कालमुत्तरस्य प्रतीक्षां विधाय गङ्गाधर: कोपानुषङ्गादुवाच–'किं यूयं मूका:? अहमापृच्छे ''शकटिभि: किमुह्यते?''

इदानीमपि यदा नोत्तरमलभ्यत तदा गङ्गाधरस्तुरङ्गायाग्रे गन्तुमिङ्गितमकरोत्। एकस्या: शकटे: समीपमुपगत्य बोरकमेकं विदार्यं दृष्टं यच्छकट्यो गोधूमै: पूर्णा:।

पंण्डित नरेन्द्रनारायण: सर्वविधाभिरामण्डिते निजरथे किञ्चिच्छयान: किञ्चिच्च जाग्रत्समायाति स्म शकटिपङ्क्ते: पृष्ठत:। समुपस्थितसंशयेऽस्मिन व्यापारविषये स्वयमपि सहैव यात्रामुचितां मेने। सम्भ्रान्तै: शकटिवाहकै: समागत्य सहसैव जागरितोऽभूत भूम्याधिकारी। उक्तं च तै –'महाराज ! सीमाधिकारिण: शकटयो निरुद्धा:। सेतुतटेऽवस्थित: स भवन्तमाह्वयति।'

पं. नरेन्द्रनारायणस्य भगवत्या लक्ष्म्या उपर्यासीदखण्डो विश्वास:। स ह्यकथयद्बहुधा–'का कथा संसारस्य, वैकुण्ठेऽपि भगवत्या लक्ष्म्या एव राज्यम्।' मन्ये यथार्थमेतत्कथनम्। न्यायो नीतिनिर्णयो नियमाश्चेमे निखिला अ पि सम्प्रति भगवत्या: कमलालयाया: क्रीडनकानि। यथा सा साम्प्रतमिच्छति तथैव नर्तयति नि:शङ्कम्। शयान एव स हेलया कथयामास–'गच्छत यूयम्, अहमागच्छामि'।

निश्चिन्ततया ताम्बूलमेकमासज्ज्य मुखे पूरयामास, ततस्तूलैकसारं नीशारं सर्वत: परिवेष्ट्य सीमाधिकृतस्य समीपमुपगत: प्रावदत् 'महाभाग!' उपस्थितोऽयं जन:। आदिशत्, कीदृशोऽपराध: सुंवृत्तो येन शकट्य इमा अवरुद्धा:। ब्राह्मणानामुपरि तु श्रीमतां कृपादृष्टिरेवाशास्यते'।

गङ्गाधरो रूक्षतया प्रोचे– 'राजाज्ञा'।

नरेन्द्रनारायणो विहस्यावोचत्– 'अस्मदादयो न जानन्ति राजाज्ञाम्, नापि राजानम्। अस्माकं राजा भवानेव। मम भवतां च गार्होव्यवहार:। किमहं भवतां सकाशाद्दूरे भवितुं शक्नोमि? व्यर्थमेवात्र परिश्रान्तं भवता। नेदं कथमप्युचितं यत्क्षेत्रे गच्छाम:, क्षेत्रपालश्चापूजितो भवेत्। अहं तु स्वयमेव सेवायामागच्छन्नासम्।'

सर्वानुरञ्जकेनाप्यैश्वर्यस्य प्रबलप्रकाशेन नाऽदृश्यत गङ्गाधरोपरि रङ्गावेश:। कर्तव्यपालनस्यासीदारम्भिक: सोत्साह: प्रवाह:। अतएव सोल्लुण्ठनमवादीत्– 'नाहं तेषु

कापुरुषेषु ये कतिपयकपर्दिकानां कृते कर्तव्यं कदर्थयन्ति। भवान् सम्प्रत्यभियुक्तः। प्रातर्नियमानुसारं प्रेषयिष्यामि भवन्तमधिकरणे। न च साम्प्रतमधिकसंलापस्य कृते मे समयः। गुल्मरक्षक गजसिंह! अहं त्वामादिशामि नयेतान् निजनिरीक्षणे।'

नरेन्द्रनारायणो निस्तब्धं न्यषीदत्। शकटिवाहकवर्गे समाच्छाद्यत सम्भ्रमः। नरेन्द्रनारायणस्य जीवने कदाचित्सोऽयं सर्वप्रथमोऽवसरो यत्रेवंविधा नग्ना कठोरता सम्मुखगताऽभवत्। गजसिंहः किञ्चिदग्रेऽवर्द्धत्, किन्त्वैश्वर्यस्य महाप्रभावतया नेदं साहसमभूद् यन्नरेन्द्रनारायणस्य हस्तं स्पृशेत्। धर्मद्वारा धनस्यैवं निरादरो नादृश्यत नरेन्द्रेणेतः पूर्वम्। मनसि व्यचिन्तयत्- 'सोऽयं सम्प्रत्युद्दण्डो नवयुवकः। मायामोहजाले नाधुनापि पतितः। किञ्चिच्च भीरुरपि, भयानकादस्मात्कार्यात्सम्प्रति सङ्कुचित।'

अतिदीनभावेनाऽवादीत्-'बाबुमहोदय! नैवं कठोरता मय्याचरणीया। मानसम्भ्रमः सर्वोऽपि मे व्यालुप्येत। जीवनं कलङ्कितं स्यात्। न च ममापमानेन भवतोऽपिलाभः। सज्जोऽस्म्यहं भवतस्तोषणाय।'

रौक्ष्यानुषङ्गाद् गङ्गाधरः परुषतरमुवाच- 'नाहमेवंविधां वार्तां श्रोतुमपि वाञ्छामि'।

नरेन्द्रनारायणो यं तावदाश्रयं पाषाणशिलां मेने स हि चरणतलाददूरमपासरत्। स्वाभिमानस्य धनैश्वर्यस्य चाप्युपरितः समभूद् घोरः समाघातः, किन्तु साम्प्रतमपि धनस्य संख्याशक्तेरुपर्यासीत्पूर्णो विश्वासः। स ह्यवदन्निजकर्मचारिणम्। 'भाव! एकसहस्रस्य शुल्कपत्रमुपनय तत्रभवतः सेवायाम्। अस्मिन्समये श्रीमान्पूर्णतया कोपमापन्नः।'

शान्तिभङ्गाद् गङ्गाधरः सरोषमुवाच-'एकसहस्र' किम्, एकलक्षमपि मां सत्यमार्गान्न प्रच्यावयेत्।'

धनं धर्मस्य बुद्धिशून्यायामस्यां धृष्टतायाम्, देवदुर्लभे त्यागे चापि महत्क्रुद्धमभूत्। सम्प्रति समघटत द्वयोः शक्त्योर्मध्ये भीषणः सङ्ग्रामः। धनेनोत्प्ल्युत्योत्प्ल्युत्य भीषणमाक्रमणमकारि। एकस्मात्पञ्च पञ्चतो दश, दशतः पञ्चदश, पञ्चदशतो विंशतिसहस्रपर्यन्तमक्षिप्यत, किन्तु धर्मोऽदृष्टपूर्वया वीरतया सह बहुसंख्यकस्याप्यस्य सैन्यस्य सम्मुखमविचलभावेनाऽचलवदवस्थित।

नरेन्द्रनारायणो निराशो भूत्वाऽभाषत- 'इतोऽधिका न मे शक्तिः, साहसमेव वा, सम्प्रत्यधिकारो भवताम्।'

कोपतरङ्गाद् गङ्गाधरस्तर्जयामास कर्तव्यपालनाय गजसिंहम्। स हि मनसि गङ्गाधरमङ्गारेषु निपातयन् नरेन्द्रनारायणस्याभिमुखं धैर्यं बद्ध्वा प्रासरत्। नरेन्द्रो भयाकुलो भूत्वा द्वे पदे पश्चादुपावर्तत। स हि पूर्वमनभ्यर्थतयापि दीनतया सह सकरुणं प्रार्थयत- 'बाबूमहोदय! ईश्वरमभिलक्ष्य दयाभिक्षा मे दीयताम्। एषोऽहं पञ्चविंशतिसहस्र व्यतिकरोपशमाय सन्नद्धः।'

'असम्भवम्'

'तर्हि त्रिंशत्सहस्रैरस्तु।'

'दुरापास्तमिदम्।'

'किं चत्वारिंशत्सहस्रैरपि न स्यात्?'

गङ्गाधरोऽङ्गार इव भूत्वाऽभर्त्सयत्- 'चत्वारिंशत्सहस्रैरेव न, चत्वारिंशल्लक्षैरपि नेदं सम्भवति। गजसिंह! नयैनं नरं निगडे। नाहं सम्प्रत्येकमपि शब्दमिच्छामि श्रोतुम्।'

धर्मो धनस्य धृष्टतां धूलिसादकरोत्। स हि तस्य चपलतां चरणचपेटाभिश्चूर्णयामास। नरेन्द्रनारायणो हृष्टपुष्टमेकं सैनिकं[१] हस्तनिगडमादाय निजसम्मुखमागच्छन्तमपश्यत्। निःसह-निराशः स हि कातरदृष्ट्या समन्ततो व्यलोक्यत् ततः सहसा मूर्च्छितो भूत्वा भूमावपतत्।

## (४)

संसारः स्वयमशेत् परं तस्य जिह्वाऽजस्रं जागर्ति स्म। प्रातरेव पर्यन्ततो बालक-वृद्ध-युवकानां सर्वेषामेव मुखात्सेयं वार्तैवाऽश्रूयत्। प्रत्येकपुरुषः पं. नरेन्द्रनारायणस्य व्यवहारोपरि टीकाटिप्पणीरकरोत्। सर्वतो निन्दाया निर्झराः प्रावहन्। मन्ये संसारात्पापस्य नामैव निःशेषीभूतम्। पानीयं दुग्धनाम्ना विक्रीणानोगोपः, श्वेतमपि कृष्णीकुर्वन्तोऽधिकारिणः, विना त्रिकटं[२] रेलयात्रापरा बाबुवराः, कूटाऽऽयव्ययलेखकाः श्रेष्ठिनः, सर्वेऽप्यमी देवता-वत्पुण्यमूर्तयः सन्तो जिह्वां ग्रीवां च सञ्चालयामासुर्युगपत्। द्वितीयस्मिन्दिने नरेन्द्रनारायणोऽभि-युक्तः सन् हस्तयोर्निगडम्, हृदये ग्लानिम्, कन्धरायां च लज्जाभारं वहन् यदा हि राजपुरुषैः सह न्यायालयाभिमुखोऽभूत्तदा नगरमात्रे विक्षोभोऽभवत्। मेलकेष्वपि नैवं नरनयनानि कदाचिद् व्यग्राण्यभूवन्।

किन्तु न्यायालये गमनमात्रस्यैवासीद्विलम्बः। नरेन्द्राणां नारायणोऽयमगाधेऽस्मिन् सागरे सर्वदैव निःसंशयं शेते स्म। अथवा गहनस्याप्यस्य वनस्यासीत्सोऽयं सिंहः। अधिकारिवर्गोऽस्य भक्तः, तत्परिकरोऽस्य सेवकः, वाक्कीलास्तस्याज्ञावाहिनः, प्रतीहारि-यामिकादयस्तस्य गृहदासाः। तं दृष्ट्वैव सर्वेऽपि समन्ततः ससम्भ्रममभ्यगमन्। आसन् सर्वेऽपि विस्मिताः। नाऽनया घटनया यत्किमिति नरेन्द्रनारायणेनैवमपकर्माऽऽचरितम्, अपि त्वनेन, यन्नियमनिर्मातृणां जामातृकल्पोऽपि राजनियमशृङ्खलायां कथमयमापतितः। यस्य सविधे असाध्यसाधनं धनम्, अनुपमिता च वाक्पटुता स किमिति निपतेन्नियमनियन्त्रणायाम्?

प्रत्येकमनुष्यस्तेन सह समदर्शयत्सहानुभूतिम्। असम्भावितमिदमाक्रमणं प्रतिकर्तुं वाक्कीलानां महत्येका सेना सन्नद्धाऽऽसीत्। न्यायस्य पवित्रेऽस्मिन्क्षेत्रे धर्मधनयोर्मिथस्तुमुलयुद्धमाबध्यत। गङ्गाधरो ह्यङ्गान्यवकुच्य तूष्णीमस्थात्। तस्य सविधे सत्यातिरिक्तं न किञ्चिद्बलम्, स्पष्टभाषणातिरिक्तं न किञ्चिच्छस्त्रम्। आसन् तस्य साक्षिणः किन्तु लोभात्सर्वेऽपि क्षोभापन्नाः।

अभियोगः शीघ्रमेव समाप्तोऽभवत्। प्रधानाधिकरणिकेन निजनिर्णये लिखितम्- 'पंण्डितनरेन्द्रनारायणस्य विरोधे दत्तानि प्रमाणानि निर्मूलानि भ्रमात्मकानि च। अयं हि

सम्पत्सम्भारशाली सम्भावितपुरुषः। तदिदं कल्पनातो बहिर्भूतं यदनेन महोदयेन स्वल्पस्य

१. हथकड़ी।

२. त्रिषु स्थानेषु (प्रस्थान-मध्य-अवतरणेषु) कट्यते वृत्तं भवति तत् त्रिकट 'टिकटं' (कटे वर्षावरणयोः)

लोभस्य कृते दुस्साहसमिदमाचरितं स्यात्। यद्यपि सीमाधिकृतस्य पं. गङ्गाधरस्य नाऽस्मिन्नधिको दोषः, किन्तु सोऽयं महान् खेदो यत्तस्योद्दण्डताया अदूरदर्शितायाश्च कारणादेकः सम्मानितपुरुषः कष्टभारबभूव। वयं प्रसीदामो यत्सीमाधिकृतः स्वकार्ये जागरूकः, किन्तु सीमाधिकारिणः सेयं जागरूकता सीमालङ्घिनी बभूव। भविष्यति भाव्यं तेन सतर्केण।'

वाक्कीलैर्यथैवायमाकर्णितो निर्णयस्ते हर्षभरान्निर्भरमनृत्यन्। पं. नरेन्द्रनारायणः स्मितमुखमागच्छद्बहिः। स्वजनबान्धवास्तस्योपरि रौप्यमुद्रा अवर्षन्। उदारतायाः सागर एव समुद्वेलितोऽभूद् यस्य तरलतरङ्गैर्न्यायालयस्य भित्तयोऽप्यकम्पन्त। यदा तु गङ्गाधरो न्यायरङ्गाद्बहिरभूत्तदा समभूवँस्तस्योपरि व्यङ्ग्यबाणवर्षा, प्रकर्षात्। अद्य हि संसारस्य खेदजनको ह्येको विचित्रोऽनुभवस्तस्याऽभवत्। न्यायश्च विद्वत्ता च, दीर्घदीर्घा उपाधयः,

नाभिप्रलम्बा: कूर्चा:, पादविलम्बिप्रावारका:, नैतेष्वेकमात्रमपि सत्यादरस्य पात्रम्।

( ५ )

धनेन सह घोरविरोधं निर्मूल्यमेव क्रीतवान् गङ्गाधर:। सम्प्रति तस्य मूल्यपरिशोधनमासीदनिवार्यम्। सप्ताहोऽपि कठिनतया व्यत्यैत, एतावतैव पदच्युतेरादेश: प्राप्यत। कर्मपरायणताया: प्रत्यपद्यत पुरस्कार:। खेदेन निर्वेदेन च भग्नहृदय: स्वगृहाभिमुखोऽभवत्। वृद्धो गङ्गाधरपिता पूर्वमेव पुत्राय कुप्यति स्म यद् गमनसमये बहुतरमवबोधितोऽपि नायं किञ्चित् कर्णे करोति। अस्माभिरपि अधिकरणकर्मचारिता पुरा निर्वाहितैव किन्तु यत्कार्यं कृतं तत्सर्वथा फलेग्रहि। एष तु धारयति धर्मिकधुरन्धरताम्। गृहे सर्वतोऽन्धकारम्य साम्राज्यम्, किन्तु देवालये दीपोऽवश्य प्रज्वाल्येत। धन्य ईदृशो विवेक: ! अप्येतदर्थमेव शिक्षाव्ययोनिरूढ: ?'

एतस्य स्वल्पैरेव दिनैर्जीविकाभङ्गाद्यदा गङ्गाधरो निजगृहमगात्, वृद्ध: पिता चेदमशृणोत्तदा दुखाल्ललाटमाहन्। नानाविधैरनुतापै: पुनर्नवीचकार हृदयव्रणान्। वृद्धाया मातुरत्यातुरता भृशं ववृधे। जगन्नाथ-रामेश्वरयात्राया मनोरथा मनोरथा एवाभूवन्।

व्यत्ययासीदेवमेव सप्ताह:। आसीत्सन्ध्यासमय:। वृद्ध: पिता ह्यलिन्देऽवस्थाय मन्देन मनसा रामनाम्नो मालामावर्तयति स्म। एतस्मिन्नेव समये सर्वत: प्रसाधित एको रथस्तस्य द्वारदेशे व्यश्राम्यत्। महान्तौ नागोरवृषभौ ययो रौप्यच्छटाविच्छुरितौ विषाणौ, कन्धरायां च बन्धुरा स्वर्णशृङ्खला व्यलम्बत्, अनेके स्कन्धधृतदण्डा: पुरुषप्रकाण्डास्तं परित: पर्यचलन्। वृद्ध: सादराभिगमनायाऽधावत्। दृष्टं यत्सोऽयं पं. नरेन्द्रनारायण:। सादरं प्रणम्य चाटुभिश्चेत:प्रसादनस्य चेष्टामकरोत्- 'अद्य मे महान् भाग्योदयो येन महादयो मे दीनस्य गृहमुपगत:। भवान्न केवलं ममैव, अपि तु प्रान्तमात्रस्याभ्यर्हणीय:। किन्तु केन मुखेनाहं संलपामि? अभाग्येन कुपुत्रेण कलङ्कितं मे जन्म। सत्यम्, वरं नि:सन्तानता, पुनर्नैवंविधा सन्तति:।'

न्यगादीन्नरेन्द्रनारायण:-'भ्रातृवर! मैवं वादी:'। चकितो वृद्ध: प्राह- 'एवंविधे संताने किमन्यदहं कथयेयम्?' नरेन्द्रो मन्द्रेण स्वरेणाऽवदत्-'निजपूर्वजानां कीर्तिमुज्ज्वलयन्त: कियन्त: स्युरेवंविधा: संसारे ये निजकर्तव्यस्य निर्वहणाय धर्मस्य च रक्षणाय निजसर्वस्वार्पणेऽपि सन्नद्धा: स्यु: ?'

ससङ्कोचमलिन्दकोणेऽवस्थिताय प्रोक्तं च तेन गङ्गाधराय-'सीमाधिकारिमहोदय! इयमुक्तिर्न मे चाटुश्चिन्तनीय:। चाटुकारितायै इयद्दूरागमनस्य नासीन्मे प्रयोजनम्। तस्यां रजन्यामधिकारबलेनाऽहमभवं निगडे नियन्त्रित: किन्त्वद्याहं स्वेच्छया भवन्नियन्त्रणे समागतोऽस्मि। मया परश्शता भूस्वामिनो दृष्टा: ,परस्सहस्राश्च धनादिकारिणोऽधिकृता:, सहस्राधिकाश्च राजपदाधिकारिणो मे व्यवहारिण:, किन्त्वहं चेत्पराभूतस्तर्हि भवतैव। मया ह्यखिला अप्यमी निजस्य निजधनस्य च दासीकृत्य विसृष्टा:। अस्तु. अनुमन्ये यत्त-

किञ्चिदहमभ्यर्थये भवन्तम्।'

विनयानुषङ्गादुत्थाय गङ्गाधरो नरेन्द्रस्याभ्यर्थनामकरोत् किन्तु स्वाभिमानसहितम्। मनस्यतर्कयत् यदयं महाशयो मामनुतापयितुं लज्जया ग्लापयितुं च समागतः। नायमकरोत् क्षमाप्रार्थनस्य मनागपि चेष्टाम्। प्रत्युत पितुश्चाटुकारिताप्यस्यासीदसह्या। परं सम्प्रति नरेन्द्रनारायणस्य भाषितमभ्याकर्ण्य मनोमालिन्यमगलत्। निरैक्षतायं नरेन्द्रं प्रति निस्पृहनयनाभ्याम्। प्रकटं प्रतीयतेस्म तस्मिन् सद्भावः। गर्वोऽपि लज्जायाः सम्मुखे सम्प्रति मौलिमनयत्। स हि सलज्जमजल्पत्- 'सेयमुदारता भवतां यदेवमुदीर्यते। क्षम्यतां स मेऽविनयो यो हि पुरा निष्पन्नः। आसमहं तदा कर्तव्यशृङ्खलया निगडितः, अन्यथा सोऽहमनुचरो भवताम्। यत्साम्प्रतमाज्ञाप्येत्, संस्थाप्येत तच्छिरसि।'

विनयपरायणेन नरेन्द्रनारायणेनोक्तम्-'नद्यास्तटे न मे प्रार्थना पुरा स्वीक्रियते स्म, किन्तु पितुर्निकटे साऽवश्यमद्य स्वीकार्या स्यात्।'

गङ्गाधरोऽभ्यधात्-'अनर्होऽयं किंयोग्यः, किन्तु या सेवा मे साध्या न तस्यां त्रुटिरापाद्येत'।

राजमुद्राङ्कितमेकं पत्रमाकृष्य गङ्गाधराभिमुखे स्थापयन्नवादीन्नरेन्द्रनारायणः-'पदमिदं स्वीक्रियताम्, क्रियतां च हस्ताक्षरैरिदमङ्कितम्। अहमस्मि ब्राह्मणः, यावन्न मे प्रार्थनं स्वीक्रियते न तावद् द्वारदेशं वो मोक्ष्यामि'।

पपाठ पत्रमिदं गङ्गाधरः। किन्तु कृतज्ञताऽनुषङ्गादभूत्साश्रुनयनः। पं. नरेन्द्रनारायणेन निजायाः सम्पूर्णसम्पत्तेः सर्वप्रधानं प्रबन्धकोऽयं नियमितः। षट् सहस्त्राणि वार्षिकं वेतनम्। आरोहणायाऽश्वः, परिचर्यायै भृत्याः, निवासाय सौधः, एतदादि पृथक्। कम्पितस्वरेणाऽण्गादीद् गङ्गाधरः 'पण्डितमहाभागाः! न मे तादृक् सामर्थ्यं यद् भवतामिदमौदार्यं शक्नुयां प्रशंसितुम्। किन्तु नाहमेवंविधस्योच्चपदस्य योग्यः'।

नरेन्द्रनारायणः सहासं प्रत्यवदत्-'मम हि सम्प्रत्ययोग्यस्यैव मनुष्यस्याऽपेक्षा।'

गङ्गाधरो गम्भीरभावेनाऽगादीत्-'अहं भवतामनुगतः। भवादृशस्यागाधहृदयस्य सेवनं मे सौभाग्याय। किन्तु न मे विद्या, न बुद्धिः, न चापि सोऽनुभवो यो ह्यनयोर्द्वयोस्त्रुटीरपि निराकरोति। ईदृशस्य महतः कार्यस्य कृते महानेको मर्मज्ञः, अनुभवो च पुरुषोऽपेक्ष्यते।'

नरेन्द्रनारायणेन लेखसम्पुटकाल्लेखनी निःसारिता, तां च गङ्गाधरस्य हस्ते प्रदायाऽवदत्- 'मम हि न विद्याऽपेक्ष्यते नानुभवो न मर्मज्ञता, न चापि कार्यकुशलता। एतद्गुणानां महत्त्वस्य पूर्णं परिचयं प्राप्तवानस्मि पूर्णतया। मत्सौभाग्येन तादृशं मौक्तिकं मे सम्मुखगतं यस्य सम्मुखे योग्यताया विद्वत्तायाश्च कान्तिस्तिरस्कृता भवति। शिक्षायाश्चरमचूडामणयो राष्ट्रस्य प्रतिनिधयोऽपि लोभस्य सम्मुखे धर्मस्य बलिं ददतो दृष्टाः। गृह्यतामियं लेखनी, नाधिकविचारस्यापेक्षा। क्रियन्तामत्र स्वाक्षराणि। परमात्मानमिदमेवाऽर्थये यत्स भवन्तं नदीतटनिकटगतं निरनुरोधमुद्दण्डं कठोरं किन्तु कर्मनिष्ठं सीमाधिकारिणमेव सर्वदा कुर्यात्।'

गङ्गाधरस्याङ्गानि न तावन्तं कृतज्ञाताभारं निश्चेष्टं सोढुमशकन्। नेत्राभ्यां प्रादीयत्

वाष्पोपायनम्, अङ्गैः प्राकाश्यत पुलककुलम्। अयं ह्येकवारं पुनर्नरेन्द्रनारायणं भक्त्या श्रद्धया चावेक्ष्य कम्पितकरेण नियोगपत्रे व्यधान्निजहस्ताक्षराणि।

नरेन्द्रनारायणोऽपि प्रफुल्लः सन् वक्षसा तमालिलिङ्गः।

# न्यायाधिकारी

## ( १ )

आसीत्प्रावृषेण्यः सन्ध्यासमयः। न्यचीयन्त नभसि नीला नीरधराः। एतस्मिन्नेव समये 'बुद्धगया' ग्रामे धर्मपालब्राह्मणस्य गृहद्वारे समायासीदेकः पारदैशिको लोकः प्रावोचच्चासौ– 'अपि रात्रिव्यतिगमनाय लभ्ये ताऽत्र किञ्चित्स्थानम्?'।

धर्मपालोऽस्मिन् ग्रामे सर्वतोऽधिकं निर्धनः। घोरेण दारिद्र्येण क्षुत्क्षामस्य वृक्षभस्येव प्रकटं प्राकाश्यताऽस्य दीनोऽस्थिपञ्जरः। एतस्य जीविका स्वल्पतमाया भूमेरायोपरि कथञ्चित्स्म निरुह्यते। तथाप्यागन्तुकं सम्प्रति निजद्वारोपरि विलोक्य तस्य मुखं प्रासीदत्, सूर्योदये कमलमिव तन्नितरां प्राफुल्लत्। स्मयमानोऽसौ सोल्लासमवदत्–'निःशङ्कमुपगम्यताम्, अतिथिचरणाभ्यां पूयतां मे पाकस्थानम्।'

अतिथिर्ब्राह्मणश्चोभावपि प्राविशतां गृहाभ्यन्तरम्। भारते चिरात् प्रचलितामतिथि-सत्कारप्रथां प्रत्यक्षमादर्शयामास धर्मपालस्याऽऽचरितम्। ब्राह्मणस्य पुत्रः प्रेम्णा प्राकरोत्सप-र्यामतिथेः। अभूत्प्रणयमुग्धो वैदेशिकः। स ह्यवादीद् ब्राह्मणम्– 'भवदीयस्तनयो नूनमत्यन्तं कर्मशीलः। सेवयाऽमुष्य समजनिषि भूयस्तरामहं प्रसन्नः।'

धर्मपालस्तादृशभावेन शिरः समुदतोलयद्यथा पन्नगः केनचित्प्रकोपितः स्यात्। अक्षिभ्रुवमुन्नाम्य समगादीदसौ– 'भवानस्माकमतिथिः। अन्यथा ब्राह्मणो न श्रोतुमभ्यस्त एवंविधान् शब्दान्।

पारदैशिको निजप्रमादे विलक्षो भूत्वा प्रावोचत्– 'क्षाम्यतु भवान्, नासीन्मे तादृशोऽभिप्रायः। किन्तु साम्प्रतमेवंविधा विप्राः क्वोपलभ्यन्ते? साम्प्रतं हि वितृष्यतो नयने तादृशानां दर्शनाय।'

धर्मपालो दृढतया प्रत्यवदत्– 'ब्राह्मणास्तु सन्ति साम्प्रतमपि, किं तु न्यूनतास्ति केवलं क्षत्रियाणाम्।'

'नाहमवगच्छं भवतोऽभिप्रायम्।'

धर्मपालः सुदीर्घामेकां वक्तृतां प्रादाद्यामवाकर्ण्य वैदेशिकः समभूच्चकितः। तस्य सङ्कथा एव युक्तियुक्ताः प्रभावशालिन्यश्चासन् याभिर्वैदेशिकोऽसौ भृशमाक्रम्यत प्रभावेण। एवंविधे लघुग्रामे एवंविधो विद्वान् तत्त्वदर्शी चापि भवितुं शक्नोतीति नासीत्तस्य कल्पनापि। स हि धर्मपालस्य युक्तियुक्तं तर्कं शासनपद्धतेरेवंविधमसामान्यं ज्ञानं चावगम्य चाकित्येनावोचत्- 'श्रीमन्! जासीन्मे प्रबोधो यत्पङ्केऽस्मिन्पङ्केरुहमुत्फुल्लमिति। सम्राडशोको यदीदमवेदिष्यत्तर्हि न्ययोक्ष्यत भवन्तमुच्चाधिकारे।'

धर्मपालस्य शुष्कयोरोष्ठयोरखेलत्स्मितरेखा। यस्यान्तःकरणं सर्वदा पुटपाकमनुभवेत्, यस्य नेत्रे सर्वदा वाष्पं वर्षेताम्, यस्य मस्तिष्कं न भवेत्सुस्थं तस्यौष्ठयोर्हास्यरेखा तादृशी भासते भयङ्करी यथा श्मशाने चन्द्रिका। धर्मपालस्य व्यनमतां नयने। स हि किञ्चिद्विलम्ब्य शिरः समुदतिष्ठिपत्प्रावदच्च- 'दिनेष्वेषु महानन्यायो राष्ट्रे। यदाऽहमवलोके तदाह्युत्कथतीव मे रक्तम्'।

वैदेशिको विप्रतिपद्य साभिनिवेकशमब्रवीत्-सिंहच्छागमेकस्मिन् घट्टे पयः पिबति।'

'अपैतु तदिदम्, सर्वमेतदहं जाने'।

'दोषदर्शनं सुकरम्, किञ्चित्कृत्वा प्रदर्शनं तु दुष्करं नूनम्!'

धर्मपालः पावके प्रपतितं पत्रमिव प्रज्वल्य प्रावोचत्-'यद्यवसरः प्राप्येत तर्हि दर्शयेयं न्यायः कीदृशो भवतीति।'

'तर्हि भवानवसरं प्रतीक्षते?'

'आम्-प्रतीक्षे कामम्'।

'तदा तु न सम्भवेदन्यायः?'

'न भवेत्सर्वथा।'

'कश्चिदपराधी न निर्मुच्येत दण्डात्?'

कदापि न निर्मुच्येत।

वैदेशिकः सहजभावेनावोचत्-'तदिदं महत्कठिनम्'।

'ब्राह्मणस्य कृते न किञ्चित्कठिनम्। अहं न्यायस्य विजयडिण्डिममाहन्यां सर्वतः संसारे'।

वैदेशिकस्य मुखे प्राखेलन्मन्दस्मितं नेत्रयोश्च मधुरं ज्योतिः। स हि साभिप्रायं विहस्य समगादीत्-'यद्यहमशोको भवेयं प्रपूरयेयं तर्हि भवतः कामम्।'

सहसैव समदृश्यत ब्राह्मणस्य हृदये सन्देहरेखैका, किन्तु परं परस्तादेव दूरेऽभूत्सा यथा प्रबलवात्यया वारिदखण्डः।

## ( २ )

द्वितीयदिने महाराजाशोकस्य राजसभायां समाहूयत धर्मपालः। सम्वादेनानेन ग्रामेऽप्यखिले प्राज्वलज्ज्वलन इव। आसीदयं स समयो यस्मिन् सम्राजोऽशोकस्य शासनं प्रारेभे, प्रचक्रमे च दुर्दमा दमननीतिः। समयेऽस्मिन्महाराजः प्रासिध्यत्तादृशो निष्ठुरो यद् ब्राह्मणान् स्त्रियश्चापि समारोपयच्छूलायाम्। तस्य हि निष्ठुरदृष्टितः समशुष्यन्प्रवीराणामपि प्राणाः। लोकाः समवाबुध्यन्त यद्धर्मपालाय तदिदमाह्वानं मृत्योः सन्देशः। आसीद् दृढो विश्वासः सर्वेषां न परावर्तेत गृहं जीवितो धर्मपालः। स्वल्प एव काले धर्मपालस्याखिला अपि सम्बन्धिनो दुःखेन भयेन चाऽभ्यभूयन्त, प्रारुदंस्ते मुक्ताक्रन्दम्। लोका यथाशक्यमाश्वासनाय प्रायतन्त किन्तु नासीदीषदपि भयरेखा धर्मपालभाले।

अभ्यधादसौ–यदा नाहं किञ्चिदपि विप्रियमवाचरम्, न च कञ्चन राजनियममुदलङ्घयं तदा किमिति मां कश्चिद्दण्डयेत्? निःसंशयमिदम्–राजा एवमन्यायो निर्विचारश्च न शक्नोति भवितुं यन्निर्दोषान् स मुधैव शूलायामारोपयेत्। दुःखानां साध्वसानां च प्रबलतरङ्गेष्वपि तादृशमसौ निश्चलभावेन समवातिष्ठत यथा सामुद्रः पर्वतः। प्राबोधयत् धर्मपालः पुत्रं पत्नीं चापि, ततः प्रातिष्ठत पाटलिपुत्रं प्रति।

समभवत्सन्ध्या यदा हि धर्मपालः प्राप्नोत्पाटलिपुत्रम्। नासीदस्य किञ्चिदपि कस्यचित्साध्वसं यावदसौ राजहर्म्यमवाप्नोत्। राजहर्म्यंत्वालोक्य प्रादुरासीत्सहसाऽस्य भयम्। राजसौधस्य श्रीः कान्तिश्चापि समचारयत्साध्वसं हृदयेऽमुष्य। मनुष्यो हि स्वल्पसलिले समवस्थितो न जानाति भयम्। किन्तु यथा यथानुभवति गहनतां तथा तथाऽभिभूयते भयेन। प्रादुरभवंस्तस्य हृदये नानाविचाराः। कदाचिदचिन्तयत्– 'केनचित्पिशुनेन मे दोषस्तु मुधा न सूचितः। अहं हि स्वैरमुपजल्पामि निजनिवेशने यत्किञ्चिदपि, अप्येतस्य फलमुपभुञ्जीय साम्प्रतम्?'। कदाचिदभावयत्– 'स पारदैशिको न जाने कोऽभूत्। सम्भवोऽस्ति स भवेद् गुप्तचरः। भवेच्चायमग्निस्तेनैव प्रयोजितः। तदा तु प्रोक्तं स्यात्तेन निखिलमपि। हन्त कीदृशीयं मूर्खताभूद् यदेकेनाऽपरिचितेन विश्रब्धमहमालपम्। हन्त भूयस्तरामनुतप्ये साम्प्रतम्।'

कदाचिदाध्यायत्– 'मम दारिद्र्यसङ्कथा कदाचिदेतत्पर्यन्तं प्राप्ता स्यात्। महाराजः किञ्चित्प्रदातुमेव मामाह्वयेदेतदपि तु सम्भवति।' विचारेणानेन मुखकमलं तस्य प्राफुल्लत् परं समुपगच्छत्येव विचारान्तरे सुभृशमम्लासीत्तत्। एतावत्येव व्याजहार प्रतीहारी–'समागच्छति महाराजाधिराजः'।

अकम्पत सहसा धर्मपालस्य हृदयम्। प्रतिभासते स्म तस्य यत्प्राणाः प्रापुरोष्ठपर्यन्तम्। पृथिवीपतेः प्रतापः कीदृशो भवतीति प्रतीतमभूदद्य प्रथमवारम्। दृष्टिर्द्वारि दुर्दुरूढाभूत्। महाराजोऽशोकः समागमत् सदानाभ्यन्तरे राजसम्भारेण। समवोचच्च स्मयमानः– 'विप्रचूडामणे! स्यामहं तु प्रत्यभिज्ञात एव भवता?'

धर्मपालो भयसम्भ्रमेण समभूदुत्थितः। प्राकम्पत तस्य रोमरोमापि समयेऽस्मिन्। अयमासीत्स एव पारदैशिकः!!

## ( ३ )

आम्, अयमासीत्स एव प्राघुणिकः। स्तब्ध इवातिष्ठद् धर्मपालः। क इदमजानीत यच्छीतकालस्य भीतकारिण्यां रात्रौ दीनब्राह्मणस्य गृहे समाश्रयं ग्रहीतुं विनीतप्रार्थी पारदैशिको भारतस्यास्य सम्राड्भवितुमर्हति। धर्मपालस्त्वरितमेव हृदयमवष्टभ्य समभाषत मन्दमन्दम्– 'नैतदासीन्मे विदितं यत्तत्रभवानेव महाराजाधिराजः, अन्यथा नाहमालपेय तादृक् स्वतन्त्रतया'।

सम्राडशोकः। प्रत्यवदत्– 'ओम्'।

'परं नाहमतिरञ्जितं किञ्चिदवादिषम्।'

'ओम्'।

'प्रमाणान्यपि शक्नोम्यहं दातुम्'।

महाराजः प्रत्यवादीत्– 'नैतदहं वाञ्छामि'।

'तर्हि मत्कृते को नियोगः?'

'वाञ्छाम्यहं भवतः परीक्षां कर्तुम्'।

धर्मपालस्य हृदि समुदैषीद्विचारः सहसा– अपि मद्विचिन्तितं तत् सत्यं भवेत्?

प्रत्यभाषत महाराजः– 'प्रोक्तमासीद्भवता यन्मह्यं चेदवसरो दीयेत तर्हि न्यायस्य डिण्डिममहमाहन्याम्। वाञ्छाम्यहमस्मिन्विषये तत्र भवतः परीक्षाम्। अपि सम्मतो भवान्?'

मराल इव धर्मपालः पर्यचालयद् गलनालमूर्ध्वम्, समालपच्च– 'यदि महाराजाधिराजस्य सेयमेवेच्छा तर्ह्येषोऽहं सन्नद्धः'।

'श्वः प्रातःकालादेव भवान्नियतो न्यायमन्त्री। सम्पूर्णनगरोपरि भवेद्भवतः प्रभुत्वम्'।

'बाढम्'।

पाटलिपुत्रस्य रक्षाविभागीयः प्रत्येकमधिकारी भवेद्भवदधीनः। शान्तिरक्षायाश्चोत्तरदायित्वमापतेत केवलं भवत्येव।'

'सम्यक्'

'यदि घटेत काचिद् घटना, संघटेत चेत्प्राणहत्या, जायेत चेज्जनताविद्रोहस्तर्हि भवेद्भवत एवोत्तरदायित्वम्।'

'सम्यक्'

'यदि भवेन्न्यायनिराकरणं सम्भवेदन्यायाश्रयणं तर्हि गृह्णीयां त्वत्त एवोत्तरम्'।

'सम्यक्'

अतिष्ठन्महाराजाधिराजः क्षणकालमवाक्। हस्ताच्चाङ्गुलीयकमामुञ्चन्नवोचत्– सेयं राजमुद्रा। त्वं श्वः प्रातःकालस्य प्रथमकिरणोद्गमेनैव साकं न्यायाधिकारी परिबुध्येथाः। द्रक्ष्याम्यहं केन प्रकारेण त्वमात्मानं सफलशासकं साधयितुं प्रचेष्टसे।

## ( ४ )

व्यत्यमान्मासः। न्यायाधिकारिणो न्यायस्य सुप्रबन्धस्य च प्राचरत् परितः प्रख्यातिः। धर्मपालेन पुरस्यास्योपरि मोहनमन्त्र एव प्रयोजितो भवेदित्येव प्रतीतमभूत्। दस्यवश्चौराश्च तेन तथा वशे कृता यथा गारुडिकस्तुम्बीवाद्येन पन्नगान्। दिनेष्वेषु सेयमासीत्परिस्थितिर्य्यज्जना द्वारमप्युन्मुक्तमवमुच्य प्रायान्बहिर्गृहात्, किन्तु कस्यासीद्दर्पो यत्कस्यचित्कोऽपि हानिंकर्तुं शक्नुयात्। धर्मपालस्य न्यायो ह्यन्धश्च बधिरश्चासीत् यो न कस्यचिन्मूर्तिं प्रत्यैक्षत न च कस्यचिदनुरोधमश्रौषीत्। स हि केवलं दण्डप्रदानमाज्ञासीत्। दण्डोऽप्यसौ शिक्षाप्रदः। नगरस्य पूर्वपरिस्थित्यां समघटत नूनमाकाशपातालयोरिवान्तरम्।

आसीद् घोरनिशायाः समयः। पर्यखेलद्विहायसि तारकाराजिः। धनिकः कश्चिद्विशालस्यैकस्य भवनस्य खटखटायाञ्चकार द्वारमधुना उपरिगवाक्षान्मुखमभिनिष्क्रमय्य महिलैका पर्यपृच्छत्–''कोऽस्ति ?''

''अहमस्मि, द्वारमुद्घाटयेः''।

'किन्तु न गृहे गृहस्वामी सन्निहितः'।

''भवेत्तथा, त्वं तु द्वारमुद्घाटयेस्त्वरितम्''।

क्षणं विचिन्त्य प्रत्युक्तं महिलया–'नाहमुद्घाटयेयम्। प्रयातु भवान् यथागतम्'।

धनिकः क्रोधेन समवोचत्– ''द्वारमपावृणु, अन्यथा भिन्द्यामहम्''।

स्त्रिया प्रत्युक्तम्– 'न किं विजानासि, नगरे धर्मपालस्य राज्यम्। नाधुना कश्चिदेवं बलात्कारायाऽलम्'।

धनिकः खड्गमवकृष्य द्वारमाक्राम्यद्बलेन। सहसा यामिकः कश्चित्पार्श्वतः समुपेत्य धनिकस्य करमवाष्टभ्नात् अभ्यधाच्च– 'किमेतत्त्वं विचेष्टसे ?'

धनिकस्तं प्रति तथा दृष्टमक्षिपद्यथा वृकश्छागं प्रति। अगर्जच्च क्रोधेन– 'कस्त्वम् ?'

'अहमस्मि प्राहरिकः'।

'कस्त्वां न्ययमयत् ?'

'न्यायाधिकारी'।

'मा मूर्खतां विधाः। तमप्यहं भूमिसात्कर्तुं प्रभुः'।

प्राहरिकः साहसेन प्रत्यवोचत्–'परं त्वस्मिन्समये स्वयमशोकोऽपि सम्राट् समुपेवात्तदापि नाहं प्रतिगच्छेयम्।'

'किमिति मुधा मृत्युमाह्वयसि'?

यो मया प्रणो विहितस्तमहं निर्वहेयमाप्राणपातम्।

'कस्मात्प्रणो विहितः ?'

'न्यायमन्त्रिणः'।

'कीदृशः ?'

'अयमेव यद् यावन्मे वपुषि प्राणाः सन्ति, यावच्च रुधिरस्यान्तिमोऽपि बिन्दुः संधुक्षेत मे वक्षो न तावत्पश्चात्पदो भवेयं कर्तव्यात्'।

धनिकः खड्गमाकृक्षत्। प्राहरिकः पश्चादवसृत्य प्रावोचत्- 'प्रमादमाचरति भवान् साम्प्रतम्। अहमस्मि सम्प्रति सेवापदमारूढः।'

परं धनिकः सर्वमिदमुपेक्षमाणः कौक्षेयकेणाक्राम्यत्तदुपरि। यामिकोऽपि करवालमवकोशयामास। पमासीत्स साम्प्रतं नवीनः। एकस्मिन्नाक्रमण एव स पर्यपप्तत् प्रागमच्च पञ्चत्वम्। रुधिरमशुष्यद्धनिकस्य, जडीभावमगच्छतां तत्करौ। नासीत्तस्येच्छा यत्प्राणेभ्यो वियोजयेयं प्राहरिकम्। स हि केवलं भीषयितुमवाञ्छद् यामिकम्, परं मण्डलाग्रो मर्मणि न्यपप्तत्। धनिकस्तस्य शवमक्षिपन्निभृतस्थाने स्वयं च पलायाञ्चक्रे त्वरिपदम्।

## ( ५ )

प्रातरेव प्रासरत्परितो नगरमेतस्या घटनायाश्चर्चा। लोका व्यस्मयन्त नितान्तं यत्कस्येदमभूत्साहसं यद्रक्षाविभागस्य रक्षापुरुषमेवं निहन्यात्, तदपि धर्मपालस्यास्य शासने ? प्रासरद्राजधान्यामातङ्कः सर्वतः। रक्षाविभागीयाः पुरुषाः पर्यधावन्परितः परिशोधनायैतस्य, यथा हीदमेतेषां जीवनमरणयोर्व्यसितं भवेत्। न्यायाधिकारी स्वयमपि घटनाया एतस्याः परिशोधे दिनं रात्रिं चैकीचकार। घटना सेयमासीच्छासनकाले तस्य सर्वतः प्रथमा। स हि पानं भोजनं च सर्वं व्यस्मरत्, निद्रा नेत्राभ्यां निरगच्छत्। घातकस्यान्वेषणे न तेन काचिद्व्यधीयत न्यूनता, परं नाऽलभ्यत तस्यानुसंधानम्।

असफलतायाः प्रत्येकं दिनमशोकस्य क्रोधाग्नेः समिन्धनाय समभवत्। समलपत्सक्रोधमसौ- 'त्वं कियताऽऽग्रहेण न्यायस्य विकत्थनमकार्षीः, किमिदानीं समभवत् ?' न्यायमन्त्री नमयामास मौलिं लज्जया। महाराजः प्रावदत्- 'घातकः कियत्पर्यन्तं निगृह्येद ?' न्यायाधिकारी प्रत्यभाषत- 'प्रकामं यत्नमातिष्ठामि, शीघ्रमेव नियन्त्रयेयमेनम्'। कतिचिद्दिनानि विश्रम्य पुनः पर्यप्राक्षीन्महाराजः- 'अपि गृहीतो हत्याकारी भवता ?' न्यायमन्त्री प्रत्यवादीत्- 'नैव'। महाराजस्य कोपाब्धिर्वेलामुल्लङ्घयितुं प्रासरत्। नेत्राभ्यां तस्य कोपाग्नेर्विस्फुलिङ्गाः प्रासर्पन्परितः। जीमूत इव गर्जन्नमर्षेण प्रजल्पति स्म महाराजः- 'अहमिदं नैव इति प्रत्युत्तरं शृण्वन् शृण्वन् विकलीभूतोऽस्मि्'।

एवमेव व्यत्यगादेकः सप्ताहः। परं न प्राप्यत घातुकस्यानुसन्धानम्। अन्ते महाराजो धर्मपालमाहूयाऽवादीत्-'दीयते तुभ्यं त्रीणि दिनान्यवधिः। एतस्मिन्नन्तराले यदि न गृह्येतत घातुकस्तर्हि दीयेत तुभ्यं शूलारोपदण्डः'। संवादेनानेन प्रासरन्निखिलेऽपि नगरे विचित्रैका व्याकुलता। एकेनैव मासेन धर्मपालोऽयं प्राभवत्प्रकामं प्रजाप्रियः। तस्य न्यायस्य प्राचरच्चतसृष्वपि दिक्षु नितान्तं गौरवम्। घटनयाऽनया महाराजमक्रोशँल्लोकाः। यत्रैव चत्वारो मानवाः समवायन् तत्रैव घटनामिमां समालोचयन्नाक्रोशेन। लोकाः सुदृढं निरचैषुः 'कामं

किमपि भवेत्परं धर्मपालस्याणुमात्रमप्यनिष्टं न सम्भवेदस्मासु जीवितेषु'। धर्मपाल: स्वयमपि प्राणपणेन धातुकान्वेषणे निलीनोऽभूत्परं सर्वं विफलम्। अस्मिन्नेव वैकल्ये वैफल्ये च समागादवधेस्तृतीयमपि दिनम्। अवशिष्टा आसन् केवलं कतिपया घण्टा: !!

आसीद्रात्रे: समय:। किन्तु धर्मपालस्य नेत्रयोर्निद्रा कास्ति ? स हि नगरस्य निबिडतमे प्रान्ते परित: परिबभ्राम। सहसा भवनस्यैकस्य वातायनमभूदुन्मुक्तम्, महिला चैका समपश्यद्वदनं बहिर्निस्सार्य। आसीत्परितोऽपि निस्तब्धता व्याप्ता। नारी सेयं निभृतमवोचत्– 'कोऽसि त्वम्, अपि प्राहरिक: ?'

निराशाया निबिडेऽन्धकारे आशाया द्युतिरपि प्रकाशायिताऽभवत्। धर्मपाल: प्रत्यवदत्– 'अहमस्मि न्यायाधिकारी !'

'क्षणमत्रैव तिष्ठे:'

वनिता वातायनादपासरत्। दीपं गृह्णती च द्वारे समुपागात्। न्यायमन्त्रिणं सह नीत्वा सा निजनिवासनिकेतनं प्राविक्षत् प्रावदच्च– 'अद्याऽन्तिमा रजनी ?'

न्यायमन्त्री मर्मभेदिन्या दृशा योषां पश्यन्नवादीत्– 'आम्, अन्तिमा !'

आसन् शब्दा: साधारणा: किन्त्वर्थोऽमीषां नासीत्साधारण:। महिला व्याकुला भूत्वा समभूदुत्थिता प्रत्यवादीच्च– 'अहमिमां घटनां तत्त्वत: परिजानामि'।

धर्मपालस्य मृतप्राये काये प्रत्यागमनप्राणा: धैर्यमाबध्य निरगादीदसौ– 'ब्रूहि'।

वामाऽवोचत्– 'रात्रेरासीत्समय:। घातको गृहस्यास्य द्वारं खटखटायामास। स हि समायाति प्रायो रोहेऽस्मिन्।'

'किन्तु किमर्थम् ?'

'नेदमहं जानामि।'

'भवेत्, अग्रे ब्रूहि !'

''मया प्रत्युक्तम्– 'यस्य समीपे त्वमुपागा: नासौ साम्प्रतं गेहे। किन्तु नायं मे कथनं सत्यमबुद्ध। स हि द्वारं भङ्क्तुमुद्यतोऽभूत्। प्राहरिकस्तत्कार्ये प्रतिबन्धकोऽभूत्, अत एव निहतोऽभवत्।''

'किन्तु घातकोऽसौ कोऽस्ति ?'

युवती तस्य कर्णे किमप्यवोचत्, किन्तु भीताकपोतीव परितो दीनां दृष्टिमक्षिपत्।

## ( ६ )

द्वितीयस्मिन्दिने महाराजाशोकस्य राजसभा समभासीज्जनसंघै: सङ्कुला नासीत्तिलार्थमपि तनीयानवकाश:। अद्य हि भावी भाग्यनिर्णयो न्यायाधिकारिण:। अशोक: सिंहासेन चरणमास्थापयन्नेव प्रावोचत्– 'न्यायमन्त्री !'

धर्मपालः समागमत्सम्मुखे। नासीत्तस्य वदने चिन्ता वा किञ्चिदशान्तिर्वा प्रतिफलिता।

महाराजः पप्रच्छ– 'घातुकस्य लब्धमनुसन्धानम्?'

न्यायाधिकारी मौलिमानमय्य किञ्चिदचिन्तयत्। समयेऽस्मिन् तस्य हृदये द्वयोर्विरोधिन्योः शक्त्योः समाबध्यत संग्रामः। सोऽयं च भावस्तस्य मुखे सुस्पष्टं प्रत्यफलत्। सहसा सोऽयं सुदृढसङ्कल्पेन शिरः समुदतिष्ठिपत्, स्वाधिकृतमेकमुच्चाधिकारिणं च लक्ष्यीकृत्य समजल्पत्– 'रणवीर!'

'श्रीमन्!'

'पाशैर्बधान्, अहमाज्ञापयामि।'

राजसभायां भयस्य निस्तब्धतायाश्च समाक्राम्यत्सर्वतः साम्राज्यम्, यतो ह्यासीदिङ्गितं महाराजाधिराजं प्रति!

महाराजाऽशोकस्य मुखमासीदत्यधिकं ताम्रम्, मन्ये तद् भवेत् तापितं ताम्रम्। नेत्राभ्यां प्रासरन् सर्वताग्निकरणाः। कोपेन कम्पमानो महाराजाधिराजः सहसा समुदतिष्ठत् प्रावदच्च– 'रे ब्राह्मण! तवैतावत्साहसम्?'

न्यायाधिकारी तथा प्रकटयामास यथा न तेन किञ्चित्कर्णेऽपि कृतम्। स हि पुनः स्वीयान् शब्दानाम्रेडयामास– 'अहमाज्ञापयामि, निबधान पाशैः!' रणवीरः काष्ठपुत्तलिकेव प्रासरत्सम्मुखे। सभास्थितानां न्यरुध्यत निश्वासवायुः। महाराजाधिराजः सिंहासनान्नीचैरवातरत्। न्यायाधिकारी सक्रोधमाज्ञापयत्– 'अयं घातुकः, प्रवेशय तमेनं समाधिकरणे।'

रणवीरो न्यगडयदशोकं हस्तशृङ्खलाभ्याम्, समाकर्षच्च धर्मपालस्य न्यायाधिकरणं प्रति। तत्र ह्यासीत्समग्रमपि नगरं समुपस्थितम्। धर्मपालो निर्भीकमाज्ञापयत्– 'अपराधी राजकुलजः, अत एवायमेकाकी समानीयतामधिकरणम्।'

महाराजाधिराजो नेत्राभ्यामकरोदिङ्गितम्। सचिवगणा दूरमपासरन्। महाराजस्तस्मिन् काष्ठवाटके प्राविशद् यो ह्यासीन्नियतोऽभियुक्तानां कृते। छत्रपतेर्महाराजाधिराजस्य, स्वकीये तस्य साम्राज्ये, स्वयं तस्य भृत्यस्यैव हस्तेन, अयं सम्मानो भवितुमर्हतीति नासीत्कस्यचित्स्वप्नेऽपि सम्भावना। परं धर्मपालः सुदृढसङ्कल्पेन समध्यासिष्ट न्यायसिंहासनम्। स हि प्राणमन्नेत्राभ्यां महाराजाधिराजम्। हस्तावास्तां न्यायरज्ज्वा दृढनिगडितौ। स हि मन्दस्वरमवोचन्महाराजम्–'भवदुपरि प्राहरिकहत्याया भीषणोऽभियोगः, किमेतस्योत्तरं दिशसि?'

महाराजोऽशोको निजाधरं दशन्प्रत्यवदत्–'आसीत्स उद्दण्डः।'

'तर्हि त्वमपराधमङ्गीकरोषि?'

'आम्, मया स निहतः, किन्तु न ज्ञानपूर्वकम्।'

'नासीत्स उद्दण्डः, चिरकालादहं परिचिनोमि।'

'स आसीदुद्दण्डः'।

'त्वं मृषा भाषसे। अहं ते प्राणदण्डस्याज्ञां ददामि।'

अशोकस्य नयने माञ्जिष्ठे अभूताम्। सचिवाः करवालमाकर्षन्। बहवो जनो दुर्वाच्यैरक्रोशन्धर्मपालम्। बहवस्त्वेतावदवादिषुः– 'हन्त वराको न्यायाधिकारी वाताध्मातोऽभूत्।' एकतः शब्दः समागच्छत्– 'त्वं निजस्य शिरः पूर्वं रक्ष!' परितोऽप्यभूद्राजसभा संक्षुब्धा। कोलाहलैरपूर्यत सभाभवनम्। अशोकः करमुत्थाप्य निःशब्दमवस्थातुमकरोदिङ्गितम्। चतुर्दिक्षु पुनः सैव निस्तब्धता व्याप्नोत्। न्यायाधिकारिणा सोत्तेजनमुक्तमुच्चस्वरे– 'भवतां क्रोधप्रकटनं सर्वथाऽप्यनुचितम्। अहमस्मि साम्प्रतं न्यायाधिकारिणो धर्मासनमधिष्ठितः। न्यायं च कर्तुमधिकरणे समासीनः। महाराजाधिराजस्याशोकस्य शासनमुद्रा मे हस्ते। यदि कश्चिदिदानीं विघ्नमाचरेत्तर्हि तमहं न्यायाधिकरणस्यापमानाऽपराधे निगडमेयम्।'

'अशोक! त्वया राजकर्मचारिणो वधोऽनुष्ठितः, अत एवाहं ते वधस्याज्ञां ददामि।'

महाराजो मौलिमवानमयत्। समयेऽस्मिन्नस्य हृदि ब्रह्मानन्दसागरः, समुद्वेलितोऽभूत्। व्यचारयदयं हृदि ''मनुष्योऽयं काञ्चनम्, यद्धि पावके निपत्य समसिध्यद्विशुद्धतमम्। अकथयदयं 'मम न्यायो जगति डिण्डिममाहन्यात्।' नेदं वचनमस्य मिथ्या। निरूढाऽनेनात्मनो वचनस्य मर्यादा। एवंविधा एव ते मनुष्या भवन्ति येषामुपरि समाजस्याभिमानो भवतियेषां कृते समाजो निजस्य तनु–मनो–धनानि न किञ्चित्परिगणयति।'' महाराजो विचित्रेण भावेन निजशिरः समुदतोलयत्प्रावदच्च– 'नाहमेतस्या आज्ञाया विरुद्धं किञ्चिदपि शक्नोमि वक्तुम्।'

न्यायाधिकारी समाज्ञापयदेकमधिकृतम्। स हि स्वर्णमूर्तिमेकामादाय समुपातिष्ठत्। न्यायाधिकारी समुत्थायऽभ्यभाषत– 'महाभागाः'। सत्यमिदं यदहमस्मि न्यायाधिकारी। तच्चेदमपि सत्यं यन्मे कर्तव्यं न्यायनिर्णयः। इदमपि च वज्रसत्यं यदेकस्य राजकर्मचारिणो हत्या निर्दयवृत्त्या समपद्यत। एतस्याः कृते पापकृते[1] दण्डोऽप्यवश्यम्भावी। परं त्वस्मत्सभ्यतायां राजा ईश्वरस्य[2] विभूतिः। ईश्वर एव तस्य दण्डदाने समर्थः। कर्तव्यमिदं न्यायाधिकारिणः शक्तेर्बहिर्भूतम्। अत एवाहमाज्ञापयामि– प्रबोधनं कृत्वा महाराजस्याऽव्याहतिः कर्तव्या। तत्प्रतिमूर्तिश्चेयं शूलायामारोपयितव्या, येन लोकैः प्राप्येत समुचिता शिक्षा।

समघोष्यत परितो न्यायमन्त्रिणो जयजयकारः। लोकाः समभवन्मुग्धा न्यायनिर्णयस्यास्योपरि। सोच्चैर्घोषमवदंस्ते– 'अयं न मनुष्यः, साक्षाद्देवता। यो न कस्माच्चिद्बिभेति, न च कस्याश्चिच्छक्तेः सम्मुखे नमयितुमिच्छत्यात्मनो मस्तकम्। शृणोत्यऽसौ निजान्तःकरणस्य निगूढमाभाषितम्। अत एव निर्भयं तस्योपर्येवात्मनो गन्तव्यपथमयमन्विष्यति निर्भरम्। अन्यश्चेदिदानीमभविष्यत्तर्हि महाराजस्य सम्मुखे विनतमस्तकमस्थास्यत्। परमयं निर्भीकतया तमेनं 'त्वम्' इति समबोधयत् यथा सर्वसाधारणेऽभियुक्तः स्यात्।' समभवत्सकलानामपि जनानां रोमाञ्चितं वपुः। सहस्रसहस्रैर्नेत्रैरानन्दजं वाष्पमासीत्प्रवाहितम्। सहस्रसहस्रैर्जिह्वाभिर्घोररवमाघोषितम्– 'न्यायाधिकारिणो जयः, न्यायाधिकारिणो विजयः'।

रजनी समभवत्समुपस्थिता। न्यायाधिकारी राजहर्म्यमाविशत्। सम्मुखे चाऽशोकस्य अङ्गुलीयकं मुद्रां च विन्यस्य समभाषत– 'महाराज! स्वीक्रियतामिदं स्वीयं वस्तु। साम्प्रतमहं निजग्रामं परावर्तिताहे'।

अशोकः सम्मानसम्भृतया दृशा विनिरीक्ष्य तमेनमभाषत– 'अद्योन्मीलिते मे लोचने तत्रभवता। इतः परं कथमिदं सम्भवति?'

'परन्तु श्रीमन्!..........'

अशोको वाक्यं विच्छिद्यैव प्रावोचत्–भवतः साहसं धैर्यं च न कदाचिद्विस्मर्तास्मि। तामिमां न्यायधुरां समर्थो भवानेव वोढुम्। मद्दृष्टौ न दृश्यते द्वितीयो जनः पदस्यास्य समुचितः।'

निरुत्तरं न्यषीदन्न्यायमन्त्री।

१ पापं करोति पापकृत् पापकारी, तस्मै (चतुर्थ्येकवचनम्) सुकर्ममन्त्रपापेत्यादिना प्रतिपदोक्तः क्विप्।

२ 'नराणां च नराधिपम्' भगवद्गीता। 'बालोऽपि नावमन्तव्यो मनुष्य इति भूमिपः। महती देवता ह्येषा नररूपेण तिष्ठति'। मनुः।

# द्वे स्पर्द्धे
## (प्रथमा स्पर्द्धा)

विजयपुरविद्यालये छात्राणां व्यायामस्पर्द्धामहोत्सवस्य (टूर्नामेण्ट) महान् समारोहः। सम्पूर्णमपि नगरं शोभया सुसज्जितमभूत्। वाष्पयानविश्रमस्थलमारभ्य विद्यालयपर्यन्तं सरणेरुभयपार्श्वे नानावर्णा ध्वजाः समारोप्यन्त। कार्यव्यग्राणि मरुत्तर (मोटर) शकटान्यधावन्नितस्ततः। स्पर्द्धाकौतुकेऽस्मिन् पारितोषिकवितरणाय प्रान्तीयः प्रधानशासकः (कमिश्नरः) स्वयमागमिष्यति। अत एव नगरस्य सर्वेऽपि शासनाधिकारिणः सामन्ताश्चासन् व्यग्राः। अद्य विद्यालयस्य विस्तृते प्राङ्गणे दर्शकानामासीन्महासमारोहः। नागरसज्जासमितेः (म्यूनीसिपलिटी) सदस्याः, मन्त्री, कार्याध्यक्षश्च सर्वेऽप्यासन्नुपस्थिताः। दर्शकेषु महमहतां व्यापारिणां धनकुवेराणां चापि नासीदभावः। पाठशालाध्यक्षः समागतसज्जनानां स्वागते समभूदेकान्ततो व्यस्तः। इतश्छात्राणामासीदन्यविध एवोल्लासः। यद्यपि छात्राः प्रान्तमात्रस्य विद्यालयेभ्यः समभूवन्सम्मिलिताः, परं प्रधानस्पर्द्धा द्वयोरेव विद्यालययोरासीन्नियमिता जयदुर्गस्य विजयपुरस्य च। विजयलक्ष्मीरपि द्वयोरेवाऽनयोर्विद्यालयं प्रत्यलम्बत तर्हि कदाचिज्जयदुर्गं प्रत्यानुकूल्यमदर्शयत्। सर्वेषामेव छात्राणामासन् हृदयान्याकम्पितानि। सर्वेषामेव चान्तःकरणान्यासन्नुत्सुकानि– 'दृश्यतां द्वयोर्मध्ये विजयस्रक्कस्य कण्ठगता भवति'।

प्रथमदिने शतगज्जधावनस्पर्द्धाऽऽसीत्। जयदुर्गस्य विद्यार्थी विजयपुरविद्यार्थिनं पराजेष्ट। परं द्वितीयदिने विजयपुरस्यैकश्छात्रः स्वीयविद्याक्षयस्य मानसम्भ्रममरक्षत्। एवं द्वयोरेव नागरविद्यालययोरासन् योग्यताङ्काः सम्प्रतिपर्यन्तं समाना एव। केवलमवशिष्टासीदर्द्धकोशस्य धावनस्पर्द्धा। विजयमाल्यं तस्यैव कण्ठगतं भवेद्योऽस्यां स्पर्द्धायां विजयी स्यात्। जयदुर्गाद्यो विद्यार्थी धावनाय समनह्यत तस्य वयो विंशतिवर्षात्मकम्। पलायने परः पवन एव। विजयपुरपक्षादेकः सप्तदशवर्षवयस्को बालकः समुदतिष्टत्,

नामासीज्जगदान्देति। शरीरे सोऽयं दुर्बलप्रायः, परं मुखे कान्तिशाली चक्षुषोस्तेजस्वी। अध्यापकस्तस्य पृष्ठमास्फाल्य सोत्साहमकथयत्– 'साम्प्रतं तवैव भरवशः'। परं स बालको नेत्रपर्यन्तमपि नोत्थापयामास। अध्यापकः किमकथयत्, किं वा तस्य वक्तव्यमेतस्योपरि नासीत्तस्यावधानम्। अधुनाऽध्यापकस्तस्य सहपाठिनमेकमाहूयाऽकथयत्– 'जगदानन्दो रुष्ट इवालोक्यते। बोध्यतामसौ, यदि प्रसन्नेन चेतसाऽसौ धावेत्तर्हि विजयस्य निश्चिता ममाऽऽशा। अन्यथा तु पराजयः सम्मुखस्य एव।'

छात्रोऽसौ धावमानः समसरज्जगदानन्दस्य समीपे, सोत्तेजनमवादीच्च– 'एवमुदासीनतया किं सिध्येत्? सन्नह्यतामुत्साहेन'। जगाद जगदानन्दः– 'ममैव पृष्ठे किमितयारोहथ। काञ्चनं किमिति न कथयथ। स एवाध्यापकमहाभागस्य नासाकेशः साम्प्रतम्। स एव सर्वोपरि विद्यालये।' विद्यार्थी प्रत्युवाच–विद्यालयस्य चिरायाऽपकीर्तिभवेत्। किन्तु जगदानन्दो न मुखमुद्घाटयामास। छात्रो बहुतरमबोधयत्परं न पदमप्यग्रे दधार जगदानन्दः। एतावति समये जयदुर्गस्य विद्यार्थी भुवनमोहनो धावनाय बहिरभूत्। स हि जगदानन्दं सम्मुखे विलोक्य प्रावोचत्– 'अहह! भवान् सन्नद्धः स्पर्द्धायै?' पुनर्निजसहपाठिनं मध्यस्थीकृत्य सव्यङ्ग्यमजल्पत्–'उत्तमानां सहवासो भाग्यलभ्यः'। जगदानन्दस्य चक्षुषी चमत्कृते अभूताम्। हृदि जज्वालाभिमानः। स हि सहचरमवोचत्– 'न सम्प्रति चिन्तयेः। एषोऽहं धावनाय संनद्धः।'

प्रारभ्यत स्पर्द्धाधावनम्। प्रथमचक्रे जगदानन्दो भुवनमोहनश्च सहैवाधावताम्, न कोऽप्यग्रे प्रासरत्। परमेतावता वेगेनाऽधावतां यथा सेयं शतगजधावनस्पर्द्धा भवेत्। अन्ये सर्वेऽपि धावमाना भूयस्तरां पृष्ठगा अभूवन्, न कोऽपि शशाक सहगामी भवितुम्। द्वितीये चक्रे जगदानन्दः समभूदग्रगामी, किन्तु भुवनमोहनोऽप्यासीत्पदद्वयपृष्ठग एव। इदानीं तृतीयं चक्रमासीदन्तिमम्। जगदानन्दः प्रथमं पञ्चाशत्पदान्यभूदग्रगामी परं तस्य शक्तिरक्षीयत शनैः, चक्षुषोस्तस्य तिमिरमिव व्याप्नोत्। भुवनमोहनः सरभसं प्रसृत्य समभूदग्रसरः। जगदानन्दस्तेन सहाग्रे वर्द्धितुम कार्षीद्यत्नम्, परं तस्य पादाभ्यामदीयतोत्तरम्। जयदुर्गस्य छात्राः 'जयदुर्गम्' जयदुर्गम्' इति उच्चैर्नेदुः। प्रोत्साहितो भुवनमोहनो भृशमग्रे प्रासरत्। किन्तु साम्प्रतमपि गजानां शतद्वयमासील्लङ्घनीयम्। सहसा जगदानन्दो निजमस्तकमुदतिष्ठिपत्। अष्टसहस्रमक्षीणि युगपदपतंस्तस्योपरि। प्रारभताऽसौ त्वरितपलायनम्। निमेषमात्रेऽसौ समभूत्समीपगामी भुवनमोहनस्य। विजयपुरस्य छात्राः प्रोन्नेदुरुच्चैः– 'विजयपुरम्, विजयपुर'मिति। जगदानन्दस्तेनैव त्वरितवेगेनाभूदग्रगामी। लोचने तस्य समभूतां लोहिते। स हि भुवनमोहनं बहुपश्चात्परित्यज्य समापयामास विजयधावनम्। छात्रा जयध्वनिमकुर्वन् दर्शकाश्च करतलध्वनिम्। मार्मिकाः प्राशंसन्– 'बालकस्य नेदं पलायनम्, अपि तु स्पष्टमुड्डयनम्'।

अहो छात्रजीवनं कियन्मधुरम्। समयेऽस्मिन्नस्माकं मनोवृत्तिरेवाऽन्यादृशी भवति। येषामेकमात्रं लक्ष्यमुदरपूर्तिर्धनसञ्चयः कीर्तिलिप्सा वा तेषु स उत्साहः सा स्फूर्तिः शक्तिश्च सा किं सम्भवेत्?

## ( द्वितीया स्पर्द्धा )

बहवः किल छात्रजीवने विश्वविद्यालयानां परीक्षाः समुत्तीर्य सर्वेषां मानमुत्कर्षं च लभन्ते। परं जीवनयात्रानिकषे कषितास्तेषां कियन्तः सन्तः सिध्यन्ति? जीवनयात्रास्पर्द्धायां जगदानन्दस्य कियन्त एव सहपाठिनस्तदपेक्षयाऽग्रामिनोऽभूवन्, किन्तु न कोऽपि तस्य वार्तामप्यपृच्छत्, का कथा साहाय्यस्य? जीवननिर्वाहस्य चिन्तायां जगदानन्दो ग्रामं ग्राममाहिण्डत। ऋणभार एतावानवर्द्धत यत्तस्य गृहपर्यन्तमपि विक्रीतमभूत्। आसीत्तस्यैका माता लघीयांश्चैकः सहोदरः। तदनुरोधेन जगदानन्दः स्वीयमधमर्ण मोहमलं भूयस्तरामबोधयत्, दीनतया अनुनयविनयावप्यदर्शयतपरं मोहमलो नैकमपि कर्णेऽकार्षीत्। सर्वस्वं हुत्वा यथाकथञ्चिन्मुक्तोऽसौ यामान्तरमाश्रयितुं विवशोऽभूत्।

एकदा दूरवर्तिग्रामान्तरान्निजनिवासग्राममासीत्परावर्तमानो जगदानन्दः। अभूत्सन्ध्या, प्रासरत्परितस्तिमिरम्। घोटकमारूढः स आसीच्छनैः शनैर्मार्गमुल्लङ्घयन्। रात्रावतिभयानकं जीर्णारण्यमेकमासीदुल्लङ्घनाय। तस्मिन्नासीद्वृकाणां महद् भयम्। तमसि प्रसृते न कोप्यरण्यमेतदुल्लङ्घयितुमदर्शयत्साहसम्। किन्तु जगदानन्दो निजचिन्ताचकेनितरां निमग्नो निरवधानमासीदतिक्रामन्मार्गम्। किञ्चिद्दरमतिक्रामत्येव पृष्ठतः कश्चिच्छब्दायञ्चक्रे- 'तिष्ठ तिष्ठ'। जगदानन्दास्तुरगमवारुधत् पृष्ठतः परावृत्त्य प्रेक्षाञ्चक्रे च यदेको वृद्धः प्राणानपि पणीकृत्य

पलायमानः प्रवर्द्धते तस्याभिमुखमेव। यदा च पार्श्ववर्ती प्रबभूव तदा परिचिकाय जगदानन्दः- स आसीन्मोहमलः। जगदानन्दो जिज्ञासाञ्चक्रे- 'किमस्ति ?' दैन्यभयगद्गदोऽयमगादीद्वृद्धः 'प्राणान्मे रक्षत, वृका मे पृष्ठलग्नाः सन्ति। घोटके समारोप्य नयत माम्'।

क्षणाय समुदियाय मानसे जगदानन्दस्य – यत्तुरगं त्वरितमभिप्रधाव्य पलायेय सोऽहम्। दुष्टश्चायमत्रैव निजकृतपाप्मनां भुञ्जीत फलम्। परं हृदयाभ्यन्तरतः प्रतिषिषेध कोऽपि तदिदम्। जगदानन्दस्तमपि वाजिनि समारोपयामास प्रधावयामास च त्वरिततमं तुरगम्। परमासीत्सैन्धवः श्रान्तः, स हि द्वौ पुरुषौ पृष्ठे समारोप्य त्वरिततरं धावितुं नासीत्प्रभुः। इतो विचारणे विलम्बस्य नासीदवकाशः। जगदानन्दो निमेषमात्रे निश्चिकाय निजकर्तव्यम्। वृका वेगेन वर्द्धमाना आसन्। जगदानन्दस्त्वरितं तुरगाद्वातरत्। न्यूनीभूतभारतस्तुरगो मोहमलमात्रं वहन् क्षणादेव नेत्राभ्यां तिरोदधौ। वृका अपि समीपमुपासर्पन्। सम्प्रति जगदानन्दो धावनस्य विचारमानिनाय मानसे। स हि छात्रजीवनस्य सस्मार पुरातनीं धावनस्पर्धाम्। पुरातनं पलायनमासीत्परस्परस्पर्द्धायै, इदं च प्राणारक्षायै। जगदानन्दो धौतेन निबिडमबध्नात्परिकरम् प्रादाच्च वृकेभ्यः समानसूत्रे समागन्तुमवसरम्। स हि हसित्वा प्रावदत्- इदं मे जीवनस्यान्तिमं धावनम्। किन्त्वस्मिन् धावने न भवद्भ्यः कञ्चिदपि लाभमहं वाञ्छामि। पश्यामः कोऽद्य धावने विजयी भवेत्! गर्जन्तो वृकास्तावता निकटतरमुपासर्पन्।

इदानीं जगदानन्दः प्रारेभे पलायनम्। त्रीणि क्रोशार्द्धानि प्रवृत्तम्विरतं तदिदं पलायनम्। न कोऽपि जयध्वनिमकरोत् न चापि कोऽप्यकरोत्करतलध्वनिम्। केवलं मूका प्रकृतिस्तदिदं धावनं चकिततरमलोकयत्। जगदानन्दो विसस्मार सर्वम्। तस्य कृते समभूद्दृश्या वसुन्धरा। धावन्नेष केवलं प्रवृद्धोऽभूत्स कान्तारपथे।

द्वितीयस्मिन्दिने भगवत्पुरस्य कृषीवल एकः प्रेक्षाञ्चक्रे प्रत्यूषे-यद् गृहस्य सम्मुख एव जगदानन्दस्य मृतं शरीरमापतितमस्ति। नास्ति शरीरे क्षतादिचिह्नं किञ्चिदपि, किन्तु मुखे हास्यरेखा साम्प्रतमप्यवभासते। अपि तदिदं विजयहास्यम्!!

## जरीयान् ज्यौतिषी

भारतेऽस्मिन यथा ज्योतिषशास्त्रस्य प्रचुरः प्रचारः तस्मिन्नपरिमिता यथा जनानां श्रद्धा, सर्वाणि कार्याणि शुभमुहूर्त एव सम्पादयितुं यथा- ग्रहस्तथा एशियाप्रान्तीये-

ष्वन्यान्यदेशेष्वपि तस्य शास्त्रस्य भूयानादरः। निदर्शनाय गृह्यतामयं 'पारस्य'देश एव। अत्रापि (ज्योतिषी, ज्योतिषम्।) 'नजूमी नजूमं' च सर्वेषामादरभूमिः। अनयो राजसभायामपि प्रचुरः सम्मानः। पारस्यदेशस्य 'शाह अब्बास' प्रकामं प्रसिद्धो नरेशः। ''शा-बाश'' इति परितोषे समादरोक्तिः तस्यैव नाम्नोऽपभ्रंशः, यो हि मोगलशासकानां भाषाप्रचारपाटवं सूचयन् समुचितकार्यकारिणे लोकभाषायां साम्प्रतमपि प्रयुज्यते। शाहअब्बासस्य तज्ज्यौतिषिक य चैकाऽऽख्यायिका प्रसिद्धा तावदितिहासे-

अब्बासः स्वराजहर्म्यस्य पृष्ठदेशे विहारवाटिकामेकामारोपयितुमैच्छत्। उपवनाध्यक्ष-माहूय स तत्प्रबन्धार्थमाज्ञापयत्। राजमालाकारो निष्कुटार्थं भूमिं परिशोध्य निरचैषीदेकस्मिन्दिवसे यथास्थानमारोपयितुं महीरुहान्। तावता शाहअब्बासाय कश्चिदसूचयद् यद् वृक्षारोपणस्य शुभो मुहूर्तश्चेदशोधयिष्यत समुचितमभविष्यत्। अनुमुमुदे तदिदमब्बासोऽपि। आहूयत राजज्यौतिषी। स हि निजपुस्तकैर्गणितं कृत्वा निरणैषीद् यत् एकहोरामध्य एव चेदुपवनमारोप्यत तर्हि तत्प्रचुरं शुभोदर्कं स्यात्। एतन्मुहूर्तोल्लङ्घने भृयांसं समयं यावदन्यो मुहूर्तो नावलोक्यते। अद्यतने मुहूर्ते समारोपिता वृक्षास्त्वरितं प्रवृद्धाः शीघ्रमेव च पुष्पिताः फलिताः स्युर्न जातुचिदप्यनिष्टस्य सम्भावना। अस्मिन्नेव शुभमुहूर्ते समारोपयितुमेषीद् वृक्षानब्वासः, किन्तु नासीदस्मिन् समये समुपस्थितो राजमालिकः। किन्तु मुहूर्तोल्लङ्घनभयेन सम्राडब्वासः परिवारकाणामन्येषां साहाय्येन स्वयमारोपयत्स्वहस्तेन सर्वान्वृक्षान्, ये हि समारोपणार्थमासन्निचिता राजमालाकारेण। यथामुहूर्तं मध्याह्नस्यैकवादनपर्यन्तं परिसमाप्यत समारोपणविधिः।

राजमालाकारो यदा निरैक्षत सायं वृक्षवाटिकां तदा सर्वानेव वृक्षान्विक्रमविरोपितानवापत् यस्मिंश्चत्वरे चम्पा चयनीयां तत्र पाटलापटलमलोकयत्, यत्र नागरङ्गा निधेयास्तत्र रम्भास्तम्भानैक्षत। यत्र सेव्याः[१](१. सेब।) समारोप्यास्तत्राक्षोटानैक्षत। एवमेव सर्वत्र कुकविकाव्य इव क्रमभङ्गमलोकयत्। परिश्रमात्समाहतानां पादपानां दूरदुर्दशामालोक्य नितरामकुप्यत्पर्यतप्यत च मालाकारः। स हि सर्वानुत्पाट्य, तन्मूलान्यार्द्रमृत्तिकयाऽऽच्छाद्य निदधौ दूरे। संवादमिममाकर्ण्य ज्वलन इव प्राज्वलद्राजज्यौतिषिकः। तत्कालमेवाऽयमब्वासस्य समीपे समुपस्थाय मालाकारस्य मूर्खतामवर्णयत्सालङ्कारं च सविस्तरं च। अब्वासस्तत्क्षणमेव पाशैर्निबध्य मालाकारमिममानेतुमाज्ञापयामास। यदाऽयमब्वासस्य सम्मुखे समुपातिष्ठत्तदाप्यतिष्ठत्तत्समीपे ज्यौतिषिकोप्यम्।

सम्राडाक्तनेत्रः सन्नपश्यन्मालाकारमवादीच्च 'रे दुष्ट! स्वयं स्वहस्तेन ये वृक्षा मया मध्याह्ने समारोहितास्ते त्वया निर्विचारमुत्खाताः? ते ह्येतादृशे शुभमुहूर्ते समारोपिता यदेतादृशो मुहूर्तो न लभ्येत साम्प्रतं जीवनपर्यन्तमपि। न च कदाचिदेतस्मिन् स्थाने मनोज्ञमुपवनं सम्पद्येत नूनम्। हन्त न शोभनो मुहूर्तो मुहुरुपलभ्यते' औपवनिकः सोऽयं मुद्रितमुखः सर्वमिदमशृणोत्। न च किञ्चिदवोचत्। किन्तु अब्बासस्य सेयं वक्तृता यदा परिसमाप्ता तदा तं प्रति किञ्चिदनुक्त्वा दैवज्ञमहोदयाभिमुखं मुखं विधाय साकूतमसौ प्राशंसीत्- ''अहह धन्यं भवदीयं ज्यौतिषज्ञानम्! न भवान् केवलं ज्यौतिषी, आप तु महामहाज्यौतिषी! परिमितयाऽनया वाचा किमहं प्रशंसेयम्?

भवत्परिशोधिते मुहूर्ते समारोपितमुपवनं, वर्षाणां दिनानां वा का कथा, कतिचिद्घण्टानन्तरमेवोच्छिन्नमभूत्! साधु साधु, सत्यमयं महानेवोत्कृष्टः शुभमुहूर्तोऽभूत्!'' सम्राडब्बासस्य व्यङ्ग्येनानेन कोपावस्थायामपि निरगाद् बलवान् हासः। दैवज्ञमहोदयं प्रति पृष्ठं विधाय समयासीत्ततः स्थानात्।

# जीविते ममता

(१)

हिमगिरेस्तुङ्गे तस्मिन् पुण्यप्रान्ते सूर्यकिरणैर्हीरकवच्चमत्कुर्वन्त्यो हिमशिलानेत्रयोश्चा-कचाक्यमुत्पादयन्ति स्म। शैत्यातिशयाच्चरणौ विशीर्णमाणाविवाभूताम्, शरीरे रक्तस्य गतिर्निरुद्धे-वाऽऽसीत्। वृक्षस्य का कथा, न तस्मिन् मार्गे तृणमप्यासीत्। उपरि स्वच्छं नीलगगनं परितश्चोच्चावचाः सहस्रं हिममण्डिताः पर्वतश्रेणय एव केवलमालोक्यन्त।

प्राणिमात्रशून्ये तस्मिन् प्रान्ते निःसहायः स यात्री महता कष्टेन मार्गमुदलङ्घयत्। क्षणे क्षणे दूरवीक्षणयन्त्रं नेत्रयोराधाय महताऽवधानेन इतस्ततो विलोकयति किन्तु न क्वचिदालम्ब-नमालोकयत। नैराश्येनाऽऽसीत् तस्य मुखं मलिनम्। स हि मार्गश्रमात् प्रकामं खिन्नोऽभूत्। तदुपर्यपि पृष्ठावलम्बिनि तज्झोलके यात्रोपयोगिवस्तुसम्भारो नासीन्न्यूनः। इतः परिधानीय-वस्त्रभाराद् गात्रं भुग्नमिव आसीत् किन्तु यदि वस्त्राणीमानि नाऽभविष्यन् तर्हि क्षणमात्रमप्यत्र नायमस्थास्यत्।

किञ्चिद्दूरे एकं लघुस्रोतः समवलोक्यत, मध्याह्ने यात्री तत्रैव हिमकुट्टिमोपरि वस्त्रसम्भारं निपात्य स्तोकं व्यश्राम्यत। नासीत् तत्सविधेऽद्यमात्रमपि क्षुधानिवृत्युपयुक्तं भोजनम्। यदासीत् तेनैव किञ्चिदाधारमात्रमकार्षीत्। किन्तु कीदृशस्तत्र विश्रमः। महामहत्यो हिमशिलाश्चण्डराशेरुष्णकिरणानां स्पर्शेन प्रतिक्षणं विशीर्यमाणा न्ययतन्। हृदयकम्पी तासां घोरः शब्दः शून्येऽस्मिन् गह्वरे भीषणं प्रतिध्वनति स्म। कदापि कापि शिला पतेत्तदुपरि तर्हि न चिह्नमप्यवशिष्येत शरीरस्य। भयाद्वेपमानो यात्री ततोऽग्रे प्राचलत्।

(२)

नासीत्तस्य निश्चयः क्व मया गन्तव्यमिति। निरुद्देश्यं निरवधारणं चाऽवशीर्यमाणशरीरः

स कथङ्कथमपि मार्गमुल्लङ्घन्नासीत्। यथा यथा दिनमक्षीयत, उपचीयत तथा तथा यात्रिणो व्याकुलता। हा हन्त! रात्रावस्मिन् प्रदेशे कथं शक्येत स्थातुम्? प्रस्थानात् पूर्वम् आसामापत्तीनामुपरि न किञ्चिदवधानमदीयत यात्रिणा। यात्रानिषेधकारिणस्तस्मिन् समये कातराः प्रतीयन्ते स्म। ये किल दुर्गमस्याऽस्य प्रदेशस्य यात्राकाठिन्यमावर्ण्य प्रस्थाननिवारणमकामयन्त, तेषामुपरि स मनसि निभृतमुपाहसत्– 'अहो! एते निजदृष्टान्तेन मामपि भीतमेव भावयन्ति।' तस्मिन् समये मृत्युर्न किञ्चिद् वस्त्वासीत्। प्राणानां नाभूत् किञ्चिदपि चिन्ता।

किन्तु प्राणानां सेयं ममता न जाने तस्मिन् समये हृदयस्य कस्मिन् कोणे निलीना आसीत्। येन हि अस्मिन् समये समस्तोऽप्युत्साहो व्यालुप्यत। सकलमपि साहसं निश्शेषं न्यलीयत। केवलमभावयत्स मानसे– 'यदि किञ्चित्सुरक्षितं स्थानं प्राप्येत तर्हि यथाकथञ्चिद् धारयेयमिमान् प्राणान्। हा हन्त! रात्रियापनाय क्षुद्रक्षुपस्य छायामात्रमपि किं मद्भाग्ये नास्ति?

किन्त्वितो दिनं शनैरवसानोन्मुखमेवाऽभवत्। कस्य वा प्रतीक्षां कुरुते प्रकृतिरियम्? अस्तमुपगच्छतः किरणमालिनो रक्तिमा समस्तमपि हिमप्रान्तमिममरञ्जयन्नूनम्। प्रालेयशिलानां प्रतिकणाद्विकीर्यमाणो रागः समस्तमपि प्रदेशं रम्यतनमकार्षीत्। भाग्यवद्भिर्नेत्रैर्निरीक्षणीयमभूदिदं भव्यं दृश्यम्। चतुर्दिक् चमत्कुर्वतोऽरुणरागस्यैव सर्वत्र साम्राज्यमासीत्। किन्तु यात्री मनोरमादप्येतस्माद् दृश्यादतितमां भीतोऽभूत्। स किलैतावत् पीडितोऽभूद् यथा तस्य वपुषो रक्तमेवेदं सर्वासु दिक्षु परितः प्रकृत्या विकीर्यत इति। नासीत् पदयोः स्तोकाऽपि स्पन्दस्य शक्तिः। समग्रमपि शरीरं शिशिरेण जडीभूतमिवाऽऽसीत्। रागः शनैरक्षीयत कालिमा च प्रतिक्षणमुपाचीयत। अरुणाः प्रालेयशिलाः शनैरन्धकारेणाऽऽशिलष्यन्त। पथिकोऽस्मिन् सन्तमसे मृत्योर्भीषणं कालिमानमुपसर्पन्तमपश्यत्। अभूदसौ नितान्तं व्याकुलः। धैर्यस्याऽऽसीत् सर्वथा समाप्तिः। भयाकुलो यात्री सहसैवाऽक्रन्दत् – भगवन्! त्रायस्य निरवलम्बं दीनमिमम्। तस्मिन् क्षण एव च चेतनाया विलोपान्निःसहं न्यपतत् प्रालेयशिलानामुपरि।

मूर्च्छावस्थायामेव अवलोकितं तेन यत्कस्यचित् कोमलाभ्यां कराभ्यां तस्य मस्तकं स्वात्मन उत्सङ्गोपरि निहितमस्तीति। पान्थो नितान्तमभूच्चकितः। नेत्रे निःशेषमुदालसत्– दृष्टं तेन यदेकोऽरुणवर्णाः भिर्लम्बजटाभिर्मण्डितमस्तकः सुदीर्घकूर्चः कृष्णोज्ज्वलवर्णो महापुरुष शिरोभागेऽस्याऽवतिष्ठते। दयालुरयं शनैः शनैर्मस्तकमिदं मे निजहस्तेन परामृशतीति।

न जाने हस्तेऽस्मिन् कीदृशी शक्तिरासीत् येन हि मे शरीरे पुनरुष्णतायाः सञ्चारोऽभवत्। अपरिचितस्याऽस्य महापुरुषस्य मुखमभितो विचित्रमेकं तेजः परितः प्रासरत्, नयनयोश्च प्रेम्णः करुणायाश्च वृष्टिरिवाऽभवत्। यात्री निःसम्भ्रममुदतिष्ठत्, दिव्यपुरुषस्य चरणयोश्च मस्तकमस्थापयत्। मुखान्न किञ्चिदुक्त्वा, निजानुसरणस्य सङ्केतं कुर्वन्नयं महापुरुषः सम्मुखदिशामभ्यसरत्। विवशः पान्थोऽप्यसौ केनापि नीयमान इव तमन्वसरत्। अभूदस्मिन् समये यात्रिणोऽस्याऽभूतपूर्वं साहसम्। प्रत्यावर्तत पुनः शरीरशक्तिः।

(३)

सिंहलद्वीपवासी सौगतः साङ्कृत्यायनो बहोः कालादेव योगिनामाश्चर्यजनकेषु वृत्तान्तेषु मनोयोगमदात्। आत्मभाषासाहित्ये यावदुपलब्धानि महामहतीराशाश्चेतसि सङ्ग्रह्य सोऽयं पोतिनपारावारमुदलङ्घयत्। परं भारतमागत्य तासामेकस्या अपि पूर्तेर्योगं नासावपश्यत्। अपरिचिते देशे तादृशानां महापुरुषाणामधिगमः किं सहजः? ये हि स्वत एव जनसमाजान्निलीनास्तिष्ठन्ति। इतस्ततो यत्र यत्र महात्मनां स्थानादिकं तीर्थपुरोहितेभ्यः, भारतीयेभ्यस्तेन परिचितेभ्यः, यात्राशीलसाधुभ्यश्च यथासाध्यमासीत् तत्र तत्रैव साभिलाषमगात्। नासीद् व्ययस्य चिन्ता, न चाभूत् शरीरकपरिश्रमे दृष्टिः। किन्तु वास्तविकयोगिनां दर्शनं किमु यस्य कस्यचिद् भाग्ये सहजं संघटते? आम्। भारतीयभाषाया यत्किञ्चिदभ्यासोऽवश्यमस्मिन्व्यतिकरे लाभरूपेण परिगणनीयो नाम।

प्रायः सर्वाण्येव तीर्थानि, प्रसिद्धप्रसिद्धाधिष्ठानानि चाऽवलोकितानि परं नाऽभवत् सन्तोषः। बहुभिर्महात्मभिः समगच्छताऽपि, परं स्वोपयुक्तो गुरुर्नाध्यगम्यत। पूर्वतोऽयमज्ञासीद्यत् हिमालयस्य हिमाच्छन्ने दुर्गमप्रदेशे महान्तो योगिनोऽधिवसन्तीति। भारतमुपेत्य ये ये जनाः पृष्टास्तैरेवाऽस्य पुष्टिः। पठितानि हि तेन योगपुस्तकानि। अत्राऽऽगतानां योगिनां कृतोऽपि भूयान् सहवासः। श्रुताश्च प्रामाणिकेभ्यः पुरुषेभ्यो योगिवृत्तान्ताः। शनैरेतस्य रुचिर्योगाभिमुखं सुभृशं प्रावर्द्धत। भारतवर्षं हि योगमार्गगुरुः, अत एव यः कोऽपि सुप्रसिद्धो भारतीयः सिंहलमुपागात्तेनैव सह साङ्कृत्यायनः साभिलाषममिलत् अपृच्छच्च योगिनां निवासस्थानादिविषये। स्वयं चाऽप्यनेन बौद्धागमानुसारेण त्राटकमिच्छाशक्तेः साधनं चाक्रियत। परं नाऽनेन आसीदस्य सन्तोषः। स हि भारतीययोगिनः शिष्यतामङ्गीकृत्य पूर्णं योगसाधनमैच्छत्।

न खलु पुस्तकेभ्यो भारताद् आगन्तुकेभ्यश्च स्वेष्टसाधनस्य योगमपश्यत्। अत एवाऽन्ते स्वयमयं भारतयात्रां निश्चैषीत्। स्वयं तत्रोपगत्य योगपरिनिष्ठितस्य गुरुदेवस्य अन्वेषणं स हि सुदृढं मनसि निरधारयत्। कोऽत्रासीत् प्रतिरोधः? स्वयमयं प्रतिष्ठिते धनसम्पन्ने च कुलेऽभिजातः। तत एव शीघ्रमेव आवश्यकीं यात्रासामग्रीं संघटय्य भारतं प्रति प्रातिष्ठत।

महामहतीराशाश्चेतसि सङ्गृह्य सोऽयं पोतिनपारावारमुदलङ्घयत्। परं भारतमागत्य तासामेकस्या अपि पूर्तेर्योगं नासावपश्यत्। अपरिचिते देशे तादृशानां महापुरुषाणामधिगमः किं सहजः? ये हि स्वत एव जनसमाजान्निलीनास्तिष्ठन्ति। इतस्ततो यत्र यत्र महात्मनां स्थानादिकं तीर्थपुरोहितेभ्यः,भारतीयेभ्यस्तेन परिचितेभ्यः, यात्राशीलसाधुभ्यश्च यथासाध्यमासीत् तत्र तत्रैव साभिलाषमगात्। नासीद् व्ययस्य चिन्ता ,न चाभूत् शारीरकपरिश्रमे दृष्टिः। किन्तु वास्तविकयोगिनां दर्शनं किमु यस्य कस्यचिद् भाग्ये सहजं संघटते?

आम्। भारतीयभाषाया यत्किञ्चिदभ्यासोऽवश्यमिन्व्यतिकरे लाभरूपेण परिगणनीयो नाम।

प्रायः सर्वाण्येव तीर्थानि, प्रसिद्धप्रसिद्धाधिष्ठानानि चाऽवलोकितानि परं नाऽभवत् सन्तोषः। बहुभिर्महात्मभिः समगच्छताऽपि , परं स्वोपयुक्तो गुरुर्नाध्यगम्यत। पूर्वतोऽयमज्ञासीद्यत् हिमालयस्य हिमाच्छन्ने दुर्गमप्रदेशे महान्तो योगिनोऽधिवसन्तीति। भारतमुपेत्य ये ये जनाः पृष्टास्तैरेवाऽस्य पुष्टिः कृता। किन्तु योगिनां तेषां दर्शनं दुर्लभम्, तत्प्रदेशे यात्रा च कथञ्चिदपि

साध्येति सर्वैदेकमुखेन समीरितम्। किन्तु द्विधाऽपि हठयोगिनः सांकृत्यायनस्य नाऽभूदुत्साहभङ्गाय मार्गकाठिन्यवर्णनमिदम्। एष हि निजनिश्चये निसर्गत एव सुदृढोऽभूत्। अत एव अदम्यमुत्साहम्, अप्रतिरोध्यं च साहसमादाय स हि योगिगुरोरन्वेषणाय हिमालयमन्वसरत्। आसीदस्य हृदये सुदृढो विश्वासो यदवश्यमहं योगिनमधिगच्छेयमिति।

भारतस्य मानचित्रमपश्यत्, हिमालयस्य दुर्गमप्रदेशानां यात्रावर्णनमपठत्, तत्रत्य निवासिभ्यः परिस्थितिमविदत्। अन्ते च परिचितमार्गान् द्वित्रान् दृढपुरुषान् भृत्यरूपेण हृषीकेशादादाय केदारनाथस्य यात्रायै प्राचलत्। सानन्दमियं केदारयात्रा परिसमाप्यत, परं नायं तादृक् तीर्थयात्री योऽत्रैव निरस्तो भवेत्। एतस्य हि गन्तव्यमितोऽप्यतिदूरे, परं न कोऽपि भृत्यस्ततोऽग्रे गन्तुं स्वीचकार। तत्रत्यैः तीर्थपुरोहितैः अन्यान्यैश्च अयमग्रे गन्तुं साग्रहं विनिवारितः। परं 'क ईप्सितार्थस्थिरनिश्चयं मनः पयश्च निम्नाभिमुखं प्रतीपयेत्?'' अन्ते स्वयमयमेकाकी हिमानीमुल्लङ्घयितुमग्रसरोऽभवत्।

तत्प्रदेशोपयुक्तां भोजनसामग्रीम् ऊर्णावस्त्राणि चास्थापयत् स्कन्धझोलके। शीतादात्म-रक्षायै पर्यधात् स्थूलस्थूलान्यूर्णावस्त्राणि। दूरवीक्षणयन्त्रं दण्डकाष्ठमन्यानि चाऽवश्यकवस्तून्यादाय विनैव मार्गं मार्गप्रदर्शकं वा स हि हिमप्रान्तरे प्रास्थित। नाऽत्राऽत्यन्तसम्मुखमार्गः, केवलमनुमा-नेनैव स हिमानीमगाहत। लोकैरयमुन्मत्तः पर्यज्ञायत। हृदि निश्चितं सर्वैर्यदयमपुनरागमनाय इतः प्रस्थितः। नाऽस्य पुनः प्रत्यावर्तनं सम्भवि।

क्वासीत् तत्र मार्गः हिमशिलानामुपरि उच्छलन्निव सोऽग्रेसरत्। अदृढीभूते हिमे कदाचिद् आजानु निलीनोऽभवत्, क्वचित् प्रालेयस्तूपे उत्प्लवमान इवाऽधावत्, क्वचन हिमशिखरमध्यारोहत्, क्वचन शिलासु रिङ्गन्नवातरत्। हिमोपरि क्वचित् क्वचित् तृणान्यासन् रूढानि। कियद्दूरं यावत् तरवोऽपि क्वचित् क्वचिदवाप्यन्त। भोज्यमासीन्निकटे। अत एव दिनं यावदलङ्घयद् दिनमार्गम्। रात्रेरारम्भे यावदवशादलभ्यत तरुरेकः, स एवाऽन्तिमो वृक्षोऽभून्मार्गेऽस्मिन्। अत एव तत्रैव रात्रियापनं निरधारयत्। निद्रा तु कथं व्यपदिश्येत्, स्थूलवस्त्रावृतः कथञ्चित् तत्र पर्यपतत्।

रात्रेर्भयङ्करेण शिशिरेण प्रथमदिनपरिश्रमेण च न पर्यवशिष्यत शरीरपरिस्थितिस्तादृशी ययाऽग्रे गन्तुं शक्येत। मुहुः प्रत्यावर्तनाय प्रेरयेद् व्याकुलं मनः किन्तु विफलप्रत्यावर्तने प्रतीयते स्म निकामं लज्जा। विचारद्वन्द्वनिपतितः स हि यथा कथञ्चिदग्रेऽभ्यसरत्। साम्प्रतमग्रे केवलं हिमप्रान्तरमेवाऽऽसीत्। हिमोपरि तत्तृणमपि नाऽवलोक्यत। भोज्यमपि स्वल्पमेवाऽशिष्यत। किन्तु प्राणान् पणीकृत्य सोऽग्रे पर्यचलत्। न पृष्ठतो मार्गस्य चिह्नमासीत्, नाग्रतः। दूरवीक्षणेन इतस्ततो बहु पर्यवैक्षत परं तत्र योगिनां निवासगुहाः क्व आसन् या दृष्ट्यामस्य निपतेयुः। केवलमाशाकुहकिनी तमिममग्रतोऽकर्षत्।

(४)

महापुरुषमिममनुसरन् साङ्कृत्यायनः स्वल्प एव काले स्थानमेकमवाप्तवान्। आसीदियं विपुला गुहा अस्या अभ्यन्तरे नाऽऽसीदंशतोऽपि हिमः। दृढपाषाणघटिता सेयं

स्वच्छा दरी। एकतो जीर्णं मृगचर्म, अपरतश्चासीन्निहित: कमण्डलुरेक:। एतावत्येवासीत् सामग्री तत्र। महात्मना सह सोऽपि गुहामाविक्षत। अभूत् तत्र तावत् स्थानं यावता द्वौ मनुष्यौ सुखं संविशेताम्। समुदत् साहसं सम्प्रति साङ्कृत्यायनस्य। दृढं हृदि व्यश्वसत् यदयमवश्यं कश्चिन्महायोगी। समीहित-सिद्ध्याऽनया प्रासीदन्मानसमेतस्य। मार्गक्षमशीतजनिता व्यथा च न जाने क्वान्तर्हितेऽभूताम्। नवीना स्फूर्तिर्नूतना विचारा: नवं च जीवनमुपालभ्यत।

तृणानुकारीणि कतिचित्पत्राणि महापुरुषोऽसौ निजकराभ्यां निष्पीडयामास। निजग्रन्थित: पात्रं निस्सारयितुं यात्रिणमिममादिश्य रसमेतं तत्र च्यावयामास। क्षुधानिवृत्तये पर्याप्तोऽयं भवत:। पीयतामसौ। तत्कालमनुपालितोऽभून्निदेश:। आश्चर्यम्, क्षुधा च परिश्रान्तिश्च सत्यं क्वाप्यलीयेताम्। पर्याप्तमद्यैतावत्। शेष्व साम्प्रतम्। श्वो भवत्प्रयोजनं विचार्येत। महापुरुषो मृगाजिनोपरि न्यषीदत्, यात्री च निजवस्त्रेषु सुखमस्वपत्।

प्रातरुन्मीलितनेत्रो यात्री व्यपश्यदात्मानमेकाकिनम्। किञ्चित् कालं तु प्रतीक्षाञ्चक्रे- नित्यकर्मतो निवृत्य गुरुदेव: शीघ्रमायास्यतीति। किन्तु चिरं निश्चेष्टो नाऽशक्नोदसौ स्थातुम्। कन्दरद्वारि समागत्य दृष्टम्, प्रबला हिमवात्या सम्प्रति बहि: प्रवहति। विवश: पुन: परावर्तत कन्दरामेव। महताऽवधानेन गुहामिमां परितो ददर्श। परं गुहायामासीदेव किम्? केवला: पाषाणशिला:। मृगाजिनं तत् तत्रैव आस्तीर्णम् आसीत्। अकस्मात् तत्र दृष्टिर्निपपात, यत्रासौ सुष्वाप। अहो! इयं लेखनी मे पत्रिका च केन नि:सारिता? पत्रिकामिमामुत्थाप्य ददर्शाऽसौ। आकुञ्चितमेकं पत्रं पत्रिकातो भूमौ न्यपतत्। खिन्न: विस्मित: पथिक: पपाठ -

'यावत् किल प्राणानां ममता, शरीरे स्नेह:, जीवनस्येच्छा चावशिष्यते, तावदियं पित्र्यभूमिर्मुमूर्षाणामगम्या निष्फल दु:साहसस्य परिणामो न कस्यचित्सुखावह:।

यदि किञ्चिदिष्यते तर्हि निकटगतं त्रिविष्टपमधिष्ठाय कुरु किञ्चित्साधनाम्। एकं मानचित्रमधो निर्दिश्यते। तद्द्वारा सारल्येन कैलासमुपगमिष्यसि। परावर्तस्वेत:'।

कतिवारान् स पपाठ पत्रमिदम्। मुहुर्मुहुरालोचयामास मानचित्रम्। अन्ते च किञ्चिन्मनसि निश्चित्य, मृगाजिनमिदं सभक्ति सम्प्रणम्य गुहातो बहिरभवत्। मानचित्राधारेण तस्मिन्नेव दिने प्राप त्रिविष्टपम्।

(५)

त्रिविष्टपराजधानीत: किञ्चिदेव दूरे पर्वतोपत्यकायामासीदेकं कुटीरम्, यत्रैको बौद्धभिक्षुनिर्वसति स्म। लोकास्तमेनमुन्मत्तमविदु:। एष हि वस्त्रेणाऽऽबद्धमध्यदेशो निरावरणाऽखिलाङ्ग: स्वैरं पर्वतेष्वितस्तत: पर्यटति स्म। कदाचित्तु बहुभिरहोभि: परावव‍ृते। प्रसिद्धास्त्रिविष्टपगुरवो (लामा) योगिनमिमामाहु:। एष हि किमुपभुज्य जीवतीति न कश्चिद्वेत्ति।

यदा च कश्चिदेतत्सविधमाजगाम, बहुधाऽसौ तं पप्रच्छ- अपि अस्ति ते प्राणानां मोह:? यदि स 'आम् इत्युत्तरयति, तदासौ मुखं परावर्तयति। यदि तु 'नेति' परिहासेनापि कश्चित् समलापत् तर्हि तत्पादावुपसङ्गृह्य साश्रुगद्गदमसौ प्रार्थयते - 'मम गुरुदेवसविधे गत्वा तमेनामिहागन्तुं प्रार्थयेथा:। स ह्यवदत् - 'गुरुचरणा: सुदूरे तस्मिन् पर्वतकन्दरे वसन्ति।

तत्समीपे स एव गन्तुं शक्नोति, न यस्य प्राणानां मोहः।

एकदा ह्यकस्मात् स प्रभातप्रायायां रात्रौ प्रबुध्य प्रावदत् – 'अहो! गुरुचरणा मामाह्वयन्ति! तस्मिन्नेव कन्दरे, तेनैव पथा!! प्रातरेव स सर्वं परित्यज्य पर्वताभिमुखं प्रास्थित नासीत्तेन सह किञ्चिदपि। महाशीतेऽस्मिन् गात्रोपर्यपि प्रावरणं नाभूत्। न चातः परं स पश्चात् परावर्तिष्ट, नापि च कुत्रचित् केनचिदयं दृष्टोऽपि। एतस्य सम्बन्धी कश्चित् सिंहलाद् भारतवर्षं परिभ्रम्य तमेनमन्विष्यन् प्राप्तः किलैतत्पर्यन्तम्। परं शून्यमेतत्कुटीरमभिवन्द्य निराशः परावर्तत। त्रिविष्टपगुरवः सिद्धस्थानमिति कुटीरमिदं बहुधा श्रद्धया निर्दिशन्ति। करालक्रीडया पाषाणमात्रशेषेऽप्यस्मिन् स्थले ये किलावासमधिगच्छन्ति गुरुदेवस्याह्वानमद्यापि तेषां हृदयेऽङ्कुरितं भवति। अत एव अश्रुसलिलाञ्जलिभिः स्थानमिदमभिषिच्य पूतान्तःकरणाः प्रतिनिवर्तन्ते।

## वीरवाणी

### (१)

'गृह्णीत, खण्डशः कुरुत, हिन्दूनां कूपे निपातयत' इत्यादिघोरकलकलैर्गगनतल-माकुलयन्तः कियन्तः सशस्त्राः पुरुषा येषु केषाञ्चन करे वंशयष्टयः केषाञ्चन करे लगुडाः केषाञ्चन छुरिकाः केषाञ्चिच्च खड्गा आसन्नेकस्य साधोरुपरि पर्यापतन। सर्वेऽप्यासन्मोगलाः। दीनस्यैकस्य विरागिणो निग्रहणं बलान्निबर्हणं च तैर्निजपुरुषार्थ एव किम् स्वधर्मनेतर्णिमादेशानुसारं पुण्यकार्यं बत पर्यगण्यत। विवशो विरागी महता कौशलेन निजहस्तदण्डं परिभ्रमयन्नात्मरक्षायै पर्यचेष्टिष्ट।

सुरतनगरे राजरथ्यायां विपणीनां सम्मुख एव तदिदम ब्रह्मण्यमारभ्यत। तया रथ्यया गच्छन्नेको गौराङ्गः कलकलमिममाकर्ण्य कौतुकवशः सहचराभ्यां सह जनसम्मर्दमिमं कठिनतया विच्छिद्याभ्यन्तरं प्राविशत्। दृष्टं तेन– दृढशरीरसन्धेर्भस्मावृतवपुषः साधोरेकस्योपरि सर्वेऽपि यवना युगपदाक्रमणमकार्षुः। स च केवलमेकेन लघुलगुडेन निजप्राणरक्षायाः प्रयत्नं यथाकथञ्चिदाचरतीति। चत्वारिंशत्पञ्चाशन्मुगला निःशस्त्रमेकं पुरुषमाक्रमन्, निजयष्टीनां प्रहारैः प्रापीडयन्, कियद्वा कोऽपि वराको रक्षायै विचेष्टेत? कोऽपि पाषाणमक्षिपत् तर्हि कश्चिद् गोमयं वा मार्गस्थमवकरनिकरं वा प्रक्षिपन् प्रादर्शयन्निजतवीरताम्। अन्यो ह्यसभ्यैर्दुरुक्तैरेव निजमानसमतर्पयत्। विषमायामस्यां दशायां वराको विरागी कियन्तं कालं वा निजात्मानं गोपायेत्? अकस्मादेकस्य पाषाणप्रहारस्तस्य ललाटाल्लोहितं प्रावाहयत्। यथैव तन्निरोद्धुं स हि द्वाभ्यां कराभ्यां मस्तकमगृह्णात्तथैवान्यमहावीरस्य यष्टिस्तस्य शिरस्यपतत्। प्राघूर्णतः साम्प्रतं साधोः शिरः। स हि विसंज्ञो भूत्वा भूमौ न्यपप्तत्।

निजपराक्रमेण प्रफुल्लाः सर्वे मृतमपि पुनर्मारयितुमधावन् वीरविक्रमेण। किन्तु साक्षात्तस्मिन्नेव समये गौराङ्ग एकः पर्यापतत्तस्मिन् स्थले। तस्य हृदयमनौचित्येन मानवोचितदयाभावेन चाद्रवत्। सरभसमेष निजसहचरयोः साहाय्येन विरागिणमिममनयत् स्थानान्तरम्। सक्रोधातिशयमाक्रमन्मोगलास्तमेनमपि, किन्तु गौराङ्गस्य तत्सहचरयोश्च हस्ते सज्जान्यासन् नलिकास्त्राणि। द्वित्राणां गुलिकानामुपायनेनैव सर्वेषां वीरता विजहार व्योममण्डले।

संज्ञामुपलभ्यैव साधुरयमुदतिष्ठत्। दृष्टं तेन– एकोऽपरिचितो गौराङ्गो निजसहचरयोः साहाय्येन क्षतस्थाने पटमाबध्य मे सेवां करोतीति। विरागी पूर्णया कृतज्ञतया तस्योपकारभारममन्यत समभाषत च सस्नेहम्– 'वीर किं तत्र भवतो नाम? अद्य यस्त्वं मे प्राणानरक्षीर्नेममुपकारमहं कदाचिदपि विस्मर्तास्मि। भारतीया मनस्विनो निजोपकारमपकारं वा चिराय हृत्पटलेऽङ्कयन्ति न विस्मरन्ति चादेहपातं तत्प्रतिशोधं नूनम्। सप्ताहाभ्यन्तर एवास्य प्रमाणं प्राप्ता भवान्'। एतावदुक्त्वा पुनरपृच्छत्तस्य फिरङ्गस्य नामधेयं साधुः। महता स्नेहेन च तद्धस्तं संस्पृश्य यथागतं गच्छन् नेत्रयोरन्तरितो बभूव।

जॉन रो महोदयो (गौराङ्गः) विस्मयस्तिमितः स्थूणेव तस्थौ तथावस्थ एव।

# भट्टश्रीमथुरानाथशास्त्रिणां कृतयः

| | | | |
|---|---|---|---|
| १ | **साहित्यवैभवम्** | – | मञ्जुनाथग्रन्थावल्याः प्रथमभागे द्वितीयखण्डे प्रकाशितम्<br>(प्रथमं १९३० वर्षे निर्णयसागरात् प्रकाशितमभूत्) |
| २ | **जयपुरवैभवम्** | – | मञ्जुनाथग्रन्थावल्याः प्रथमभागे प्रथमखण्डे प्रकाशितम्<br>(प्रथमं १९४७ वर्षे मञ्जुनिकुञ्जात् प्रकाशितम्) |
| ३ | **गोविन्दवैभवम्** | – | मञ्जुनाथग्रन्थावल्याः प्रथमभागे प्रथमखण्डे प्रकाशितम्<br>(पूर्वं गीताप्रेसतः १९५९ वर्षे प्रकाशितम्) |
| ४ | **संस्कृतसुबोधिनी** | – | पूर्वप्रकाशिता |
| ५ | **आदर्शरमणी** | – | मञ्जुनाथगद्यगौरवे सङ्कलिता<br>(मञ्जुनाथग्रन्थावल्याः द्वितीयभागे प्रथमखण्डे प्रकाशिता) |
| ६ | **गीतिवीथी** | – | जयपुरात् लेखकेन १९३० वर्षे प्रकाशिता |
| ७ | **गाथारत्नसमुच्चः** | – | जयपुरात् प्रकाशितः |
| ८ | **संस्कृतगाथासप्तशती** | – | मञ्जुनाथग्रन्थावल्याः प्रथमभागे तृतीयखण्डे प्रकाशिता |
| ९ | **गीर्वाणगिरागौरवम्** | – | केन्द्रीयसंस्कृतविद्यापीठम्, जयपुरम्, १९८९<br>(मञ्जुनाथग्रन्थावल्यां प्रकाशितम्) |
| १० | **प्रबन्धपारिजातः** | – | केन्द्रीयसंस्कृतविद्यापीठम्, जयपुरम्, १९८८<br>(मञ्जुनाथग्रन्थावल्यां प्रकाशितम्) |
| ११ | **शिलालेखललन्तिका** | – | निर्णयसागरात् प्रकाशिता १९४१ |
| १२ | **सुलभसंस्कृतम्** | – | जयपुरात् १९७० वर्षे प्रकाशितम् |
| १३ | **शरणागतिरहस्यम्** | – | गीताप्रेस, गोरखपुरम् |
| १४ | **ब्रज कविता वीथी** | – | जयपुरात् १९४७ वर्षे प्रकाशिता |

१५ **चतुर्थी स्तव** – जयपुरात् प्रकाशितम्

१६ **चन्द्रदत्तपरिचय** – जयपुरात् प्रकाशितम्

१७ **भारतवैभवम्** – प्रथमतया मञ्जुनाथग्रन्थावल्यां प्रकाशितम्

**सम्पादिता ग्रन्थाः –**

१ **कादम्बरी** – निर्णयसागरतः प्रकाशिता

२ **रसगङ्गाधरः** – सरलामर्मप्रकाशसनाथितः, निर्णयसागरात् प्रकाशितः

३ **गीतगोविन्दम्** – मुम्बई निर्णय सागरात् १९३७ वर्षे प्रकाशितम्

४ **ईश्वरविलासमहाकाव्यम्** – १९५८ वर्षे प्रकाशितम्। २००९ वर्षे रमाकान्तपाण्डेयेन सहिन्दीभाषानुवादं जयपुरात् प्रकाशितम्।

५ **पद्यमुक्तावली** – प्राच्यविद्याप्रतिष्ठानम्, जोधपुरम् १९५९

६ **वृत्तमुक्तावली** – प्राच्यविद्याप्रतिष्ठानम्, जोधपुरम्, १९६२

**अप्रकाशितग्रन्थाः**

१ धातुप्रयोगपारिजातः

२ आर्याणाम् आदिभाषा

३ काव्यकुञ्जम्

४ रससिद्धान्तः

**पत्रकारता**

१ संस्कृतरत्नाकरः १९०४ तः १९४९ यावत्।

२ भारती– अत्र नैके विशेषाङ्काः प्रकाशिताः। १९५२ तः १९६४ यावत्

**भट्टमहोदयानां साहित्यमाश्रित्य प्रणीता ग्रन्थाः –**

१. **मञ्जुनाथवाग्वैभवम्** – सम्पा. डॉ. गङ्गाधरभट्ट प्रकाशकः राजस्थान संस्कृत अकादमी, जयपुरम् (पृ.क–झ, १–२१६) १९९०

२. **श्री मथुरानाथशास्त्रिणः** – (निबन्ध संकलन) संपा. डॉ. प्रभाकरशास्त्री
**कृतित्वसमीक्षणम्** – प्रका. राजस्थान–संस्कृत अकादमी जयपुरम् सन् १९९५

३. **मञ्जुनाथगद्यगौरवम्** - सम्पादकः डॉ. रमाकान्तपाण्डेयः प्रका. प्रतिभाप्रकाशनम्, दिल्ली, २००४

४. **मञ्जुनाथवाग्वैजयन्ती** - सम्पा. देवर्षि कलानाथशास्त्री, ज.रा.रा.सं.वि.वि, जयपुरम्

५. **भट्टस्मृतिविशेषाङ्कः** - भारती संस्कृतमासिक वर्ष १४ अङ्क सम्पा. श्रीहरिशास्त्री, भारती भवन, जयपुर सितम्बर १९६४

६. **भट्टजन्मशताब्दीविशेषाङ्कः** - स्वरमङ्गला संस्कृतत्रैमासिकः सम्पा. डॉ. गङ्गाधर भट्ट प्रका. राजस्थान संस्कृत अकादमी, जयपुरम्। सन् १९९०


## शोधप्रबन्धः-


१. **भट्टश्रीमथुरानाथशास्त्री व्यक्तित्व एवं कृतित्व** -

(पी.एच.डी के लिए शोध प्रबन्ध) शोधकर्त्री डॉ. उषा भार्गव, राजस्थान विश्वविद्यालय, शोध निर्देशक डॉ. प्रभाकर शर्मा शास्त्री, १९७५

२. **भट्टमथुरानाथशास्त्रिकृत समस्या सन्दोह**-

एम.फिल. के लिए शोधप्रबन्ध, डॉ. दीपा पन्त, शोध निदेशकः डॉ. गङ्गाधरभट्ट, राजस्थान विश्वविद्यालय, १९८०-८१

३. **संस्कृतमुक्तकपरम्परा को भट्टजी का योगदान** -

पी.एच.डी. के लिए डॉ. कमलेश कौशिक जोशी, शोधनिर्देशक डॉ. गङ्गाधर भट्ट राजस्थान विश्वविद्यालय सन् १९८१

४. **संस्कृतनिबन्ध साहित्य में भट्टजी का अवदान** -

पी.एच.डी के लिए डॉ. सुनीता शर्मा, शोधनिर्देशक डॉ. शिवसागर त्रिपाठी, राजस्थान विश्वविद्यालय, जयपुरम

५. **गौविन्दवैभवम्- समीक्षात्मक विवरण** -

डॉ. कमलेश जोशी (कौशिक) एम.फिल के लिए, शोधनिर्देशकः डॉ. गङ्गाधर भट्ट, १९७८

# भट्टमहोदयानां कथासाहित्यम्

| क्र. | कथा | पत्रिका |
|---|---|---|
| | **( क ) ऐतिहासिककथाः** | |
| १. | अलक्ष्येन्द्रश्च दस्युश्च | भारती, ८.२ |
| २. | वीरबालकः | संस्कृतरत्नाकरः, ५.७–८ |
| ३. | वीरपरीक्षा | संस्कृतरत्नाकरः, ५.८.८ |
| ४. | धन्योऽसि धर्मवीर | संस्कृतरत्नाकरः, ५.८.१२ |
| ५. | अत्याचारिणः परिणामः | संस्कृतरत्नाकरः, ५.९.१ |
| ६. | सिंहदुर्गे सिंहवियोगः | संस्कृतरत्नाकरः, ५.९.३ |
| ७. | पुरुराजस्य पौरुषम् | संस्कृतरत्नाकरः, ५.९.५ |
| ८. | अङ्गुलिमालः | संस्कृतरत्नाकरः, ५.१०.१ |
| ९. | पृथ्वीराजपौरुषम् | संस्कृतरत्नाकरः, ५.१०.२ |
| १०. | आल्हा च ऊदलश्च | संस्कृतरत्नाकरः, ५.१०.४ |
| ११. | मातृसेवायां चिरममरे द्वे बलिदाने | संस्कृतरत्नाकरः, ५.१०.६ |
| १२. | सामन्तसङ्ग्रामः | संस्कृतरत्नाकरः, ५.१०.८ |
| १३. | भारतध्वजः बालवीरः | संस्कृतरत्नाकरः, ५.१०.१०–११ |
| १४. | अनुतापः | संस्कृतरत्नाकरः, ५.११.२–३ |
| १५. | चन्द्रहासः | संस्कृतरत्नाकरः, ५.११.४ |
| १६. | कृत्रिमबूँदी | संस्कृतरत्नाकरः, ५.११.६ |
| १७. | वीरवाणी | संस्कृतरत्नाकरः, ५.१२.१२ |
| १८. | प्राणानां भाषा | संस्कृतरत्नाकरः, ५.१३.५ |
| १९. | विजयिघण्टा | संस्कृतरत्नाकरः, ५.१२.१०–११ |
| २०. | कर्णश्चाऽर्जुनश्च | संस्कृतरत्नाकरः, ५.१३.६ |
| २१. | सत्यो बालचरः | संस्कृतरत्नाकरः, ५.१३.९ |

| | | |
|---|---|---|
| २२. | धन्यो भारतीयवीरः | संस्कृतरत्नाकरः, ५.१३.१२ |
| २३. | पुरुषपरीक्षा | |
| २४. | शस्त्रपाणिः क्षत्रियाणी | |
| २५. | भाग्यरेखा | |
| २६. | अमूल्यं वस्तु | |
| २७. | बालवीरः | |

## ( ख ) सामाजिककथाः

| | | |
|---|---|---|
| २८. | असमसाहसम् | संस्कृतरत्नाकरः, ५.३-४-७ |
| २९. | पश्यतोहरः | संस्कृतरत्नाकरः, ५.-१-२-५ |
| ३०. | सरला | संस्कृतरत्नाकरः, ५.७.११ |
| ३१. | एकवारं दर्शनम् | संस्कृतरत्नाकरः, ५.१.४-५ |
| ३२. | दयनीया | संस्कृतरत्नाकरः, ५.२.४ |
| ३३. | अनादृता | संस्कृतरत्नाकरः, ५.३.९ |
| ३४. | प्रत्युत्पन्नमतिर्हालिकः | संस्कृतरत्नाकरः, ५.११.११ |
| ३५. | अद्भुतचिकित्सा (अप्राप्ता) | संस्कृतरत्नाकरः, |
| ३६. | प्रतिशोधः | भारती ३.१० |
| ३७. | क्षत्रियशोणितम् | |
| ३८. | चतुरवञ्चकः | |
| ३९. | ममाध्यापनम् | |
| ४०. | प्रतिशोधः | |
| ४१. | हृदयव्रणः | |
| ४२. | स्वावलम्बनम् | |
| ४३. | स्वामिभक्तः | |
| ४४. | दीक्षा | |

## ( ग ) प्रणयकथाः

| | | |
|---|---|---|
| ४५. | प्रेम्णो विजयः | संस्कृतरत्नाकरः, ५-९-१० |
| ४६. | परीक्षा | संस्कृतरत्नाकरः, ५.१०.७ |

| | | |
|---|---|---|
| ४७. | निराशप्रणयः | संस्कृतरत्नाकरः, ५.७-३-७ |
| ४८. | प्रेम्णः प्रतिदानम् | संस्कृतरत्नाकरः, ५.३.४ |
| ४९. | जले ज्वाला | |

## ( घ ) प्रतीकात्मककथाः

| | | |
|---|---|---|
| ५०. | बालकभृत्यः | संस्कृतरत्नाकरः, ५.२.७-८ |
| ५१. | न कुहचिद् गुणतत्त्ववेदी | संस्कृतरत्नाकरः, ५.९.९ |

## ( ङ ) हास्यकथाः

| | | |
|---|---|---|
| ५२. | मिस्टरस्य गीताज्ञानम् | संस्कृतरत्नाकरः, ५.७.१२ |
| ५३. | चपण्डुकः | संस्कृतरत्नाकरः, ५.८-५-६ |
| ५४. | शिष्या | संस्कृतरत्नाकरः, ५.८.७ |
| ५५. | फाल्गुनगोष्ठी | संस्कृतरत्नाकरः, ५.९.७ |

## ( च ) मनोवैज्ञानिककथाः

| | | |
|---|---|---|
| ५६. | विषमा समस्या | संस्कृतरत्नाकरः, ५.११.८ |

## ( छ ) विविधविषयिण्यः कथाः

| | | |
|---|---|---|
| ५७. | करुणा कपोती च युवती च | संस्कृतरत्नाकरः, ५.१३.८ |
| ५८. | मृगयुः | संस्कृतरत्नाकरः, ५.८.२ |
| ५९. | दानी दीनेशः | संस्कृतरत्नाकरः, ५. |
| ६०. | वीरो बालचरः | संस्कृतरत्नाकरः, ५. |
| ६१. | धर्म-धनयोर्युद्धं धर्मस्य विजयश्च | संस्कृतरत्नाकरः, ५. |
| ६२. | परीक्षा | संस्कृतरत्नाकरः, ५. |
| ६३. | न्यायाधिकारी | संस्कृतरत्नाकरः, ५. |
| ६४. | द्वे स्पर्धे | संस्कृतरत्नाकरः, ५. |
| ६५. | जरीयान् ज्यौतिषी | संस्कृतरत्नाकरः ११ १२ |
| ६६. | जीविते ममता | |

**मञ्जुनाथगद्यगौरवे प्रकाशिता रचनाः**

उपन्याससाहित्यम्

१. आदर्शरमणी

२. मोगलसाम्राज्यसूत्रधारो महाराजो मानसिंहः

३. भक्तिभावनो भगवान्

**कथासाहित्यम्**

१. दयनीया

२. चतुरवञ्चकः

३. प्रेम्णः प्रतिदानम्

४. अनादृता

५. ममाध्यापनम्

६. जले ज्वाला

७. भाग्यरेखा

८. क्षत्रियशोणितम्

९. शस्त्रपाणिः क्षत्रियाणी

**शोधनिबन्धाः**

१. काव्यलक्षणं तद्विषये विभिन्नमतानि च

२. रसस्वरूपं विभिन्ना रससिद्धान्ताश्च

३. कश्मीरकमहाकविर्विह्लणस्तस्य काव्यं च

**रेडियो नाटकम्**

१. मञ्जुला

----

# भट्टमहोदयानां निबन्धसाहित्यम्

**वर्णनात्मकनिबन्धाः -**

| क्र. | शीर्षकम् | पत्रिका | वर्षम् | अङ्कः |
|---|---|---|---|---|
| १. | अहं मोहमय्याम् | सं.रत्नाकरः प्रा. | ५ | १,२ |
| २. | चीन-देशे धर्म-चर्चा | सं.रत्नाकरः प्रा. | ६ | ५,६ |

| | | | | |
|---|---|---|---|---|
| ३. | कार्नेगी-कारू-विद्यालयः | सं.रत्नाकरः प्रा. | ७ | २ |
| ४. | संस्कृत-सेवा-कुञ्जम् | सं. रत्नाकरः प्रा. | ८ | ९,११,१२ |
| ५. | स्वतन्त्रताया मङ्गलप्रभातम् | सं. रत्नाकरः प्रा. | १२ | २ |
| ६. | भारतस्य राष्ट्रीयपताका | सं. रत्नाकरः प्रा. | १२ | २ |
| ७. | व्रज-विहारिणा विहारिणो द्वन्द्वम् | सं. रत्नाकरः प्रा. | १३ | ११ |
| ८. | सत्यम् | भारती | ३ | २ |
| ९. | परोपकारः | भारती | ३ | ५ |
| १०. | कलिकातातः प्राचीनसाहित्यप्रकाशनम् | भारती | ८ | ८ |
| ११. | हिमालयाञ्चले मणिकूट-पवर्तः | भारती | ९ | ८ |
| १२. | भारतमिदम् असीम-मूल्येनाऽपि निजसीम्नो रक्षां कुर्यात् | भारती | ९ | ९ |
| १३. | सोवियतसंघे संस्कृतस्याध्ययनम् | भारती | १० | ६ |
| १४. | राजधान्यां संस्कृततोन्नतेः प्रयत्नः | भारती | १० | १० |
| १५. | सोमनाथे यवनाक्रमणम् | सं. रत्नाकरः प्रा. | ९ | १० |
| १६. | अमरकण्टकम् | सं. रत्नाकरः प्रा. | १२ | ७ |
| १७. | स्वागतं महाराजस्थानस्य | सं. रत्नाकरः प्रा. | १३ | १० |
| १८. | मरुस्थल-निरोधस्य योजना | भारती | ३ | ८ |
| १९. | भगवतो बुद्धस्याऽवशेषोपरि लिच्छविनिर्मितः स्तूपः | सं. रत्नाकरः प्रा. | ८ | ८ |

**विवरणात्मकनिबन्धाः -**

| | | | | |
|---|---|---|---|---|
| १. | प्रभातवायुः | सं.रत्नाकरः प्रा. | ६ | ५,६ |
| २. | भारतपर्यटनम् | सं.रत्नाकरः प्रा. | ७ | ६,८,११.१ |
| ३. | वर्तमाने युरोपीय-महायुद्धे भारतीयाः | सं.रत्नाकरः प्रा. | ९ | ८,९ |
| ४. | कांकरोली-यात्रा | सं.रत्नाकरः प्रा. | ९ | ७ |
| ५. | विक्रमार्कस्य द्विसहस्राब्दी | सं.रत्नाकरः प्रा. | १० | ३ |
| ६. | महायुद्धस्य जगति जाज्वल्यमानः प्रभावः | सं.रत्नाकरः प्रा. | १२ | २ |

| | | | | |
|---|---|---|---|---|
| ७. | प्राचीनाऽऽर्याणां वस्त्राणि | भारती | १२ | ९ |
| ८. | प्राचीनभारते पोत-निर्माणकला | भारती | ३ | ८ |
| ९. | आर्याणां होलिकामहोत्सवः | भारती | ५ | ५ |
| १०. | हिमालयाञ्चले बद्रीनाथयात्रा | भारती | ६ | १२ |
| ११. | आर्याणाम् उत्सवसमाजश्च दीपावली च | भारती | ७ | १ |
| १२. | होलिकामहोत्सवः | सं.रत्नाकरः प्रा. | १२ | ९ |

**विचारात्मकनिबन्धाः -**

| | | | | |
|---|---|---|---|---|
| १. | दीपावली | सं.रत्नाकरः प्रा. | ७ | ८ |
| २. | हिन्दुविश्वविद्यालयः | सं.रत्नाकरः प्रा. | ७ | ८,९ |
| ३. | एशियाप्रदेशे अदृष्टवादः | सं.रत्नाकरः प्रा. | ७ | ९,१०,११ |
| ४. | भारतीयानां राजभक्तिः | सं.रत्नाकरः प्रा. | ७ | ११ |
| ५. | चलच्चित्रपटे समुद्रगर्भस्य | सं.रत्नाकरः प्रा. | १ | ११ |
| | रोमाञ्चकारीणि दृश्यानि | | ३ | १२ |
| ६. | वर्तमानयुगस्य परीक्षाप्रणाली च संस्कृतशिक्षा च | सं.रत्नाकरः प्रा. | २ | १,२,३ |
| ७. | दीर्घजीवनार्थमायोजनानि | सं.रत्नाकरः प्रा. | ८ | ४ |
| ८. | निबन्धलेखस्य विराट् प्रवाहः | सं.रत्नाकरः प्रा. | ३ | २,३,४,५ |
| ९. | संस्कृतपण्डितान् क्व निनीषन्ति शिक्षाधिकारिणः ? | सं.रत्नाकरः प्रा. | ९ | २ |
| १०. | प्रिये मधुरवाणि! | सं.रत्नाकरः प्रा. | ९ | ३ |
| ११. | भारते संस्कृतभारती राष्ट्रभाषा प्रश्नश्च | सं.रत्नाकरः प्रा. | ९ | ४ |
| १२. | हंसवाहना सरस्वती मयूरवाहना कथं जाता (शोधलेखः) | सं.रत्नाकरः प्रा. | १० | ४ |
| १३. | पशुपक्षिषु मनुष्यस्य सभ्यता | सं.रत्नाकरः प्रा. | १० | ५ |
| १४. | संस्कृतपण्डिताः पश्यन्तु | सं.रत्नाकरः प्रा. | १० | ६ |
| १५. | सम्राडवरङ्गजीवस्य निजपुत्रं प्रति पत्रम् | सं.रत्नाकरः प्रा. | १० | १०,११ |
| १६. | संस्कृतं च तच्छिक्षा च | सं.रत्नाकरः प्रा. | १० | १०,११ |
| १७. | संस्कृतभाषा च प्रारम्भिकी शिक्षा च | सं.रत्नाकरः प्रा. | ११ | ७ |

| | | | | |
|---|---|---|---|---|
| १८. | संस्कृत-शिक्षा-परिष्कारः | सं.रत्नाकरः प्रा. | ११ | ७ |
| १९. | साहित्यस्य सत्ता मानवस्य महत्ता | सं.रत्नाकरः प्रा. | १२ | ८ |
| २०. | संस्कृतभाषा च तदुपजीविनश्च | सं.रत्नाकरः प्रा. | १३ | १, २ |
| २१. | भारतस्य का स्यात् संस्कृतिः ? | सं.रत्नाकरः प्रा. | १३ | २ |
| २२. | संस्कृत-पण्डिताः | सं.रत्नाकरः प्रा. | १३ | ३,४ |
| २३. | संस्कृतस्य सङ्कटम्, सेवकानां साम्प्रतिकं कर्तव्यम् | सं.रत्नाकरः प्रा. | १७ | २,३ |
| २४. | वर्तमान-युगस्यापेक्षा संस्कृतभाषा च | सं.रत्नाकरः प्रा. | १७ | ६,७ |
| २५. | संस्कृत-भाषा-विषये संस्कृतज्ञानां कर्तव्यम् | भारती | ५ | ४,५ |
| २६. | ९३ कोटिमुद्राणां करभारो भारतीयानामुपरि | भारती | ७ | ९ |
| २७. | विद्यायाः महिमा | भारती | ८ | १ |
| २८. | नवसाहित्य-निकषः | भारती | ८ | ४,५ |
| २९. | बालशिक्षां प्रति पितुः कर्तव्यम् | भारती | ८ | ७ |
| ३०. | आंग्लसंस्कृतिरपसार्यताम् | भारती | ८ | ८ |
| ३१. | संस्कृतं राजभाषाऽवश्यं भवेत् | भारती | ८ | ८ |
| ३२. | काश्मीर-विषये पाकिस्तानस्य दृष्टिकोणः | भारती | ८ | ८ |
| ३३. | समस्त-संसारः संस्कृतं प्रत्युन्मुखः किन्तु भारतीयाः ? | भारती | ९ | ६ |
| ३४. | चरित्र-बलं विना देशस्य सम्पूर्णा अपि योजना निष्फलाः | भारती | १९ | १ |
| ३५. | श्रीहनुमतः आदर्शचरितम् | भारती | १ | १ |
| ३६. | अन्येषामुषकारको भवेत् | सं.रत्नाकरः प्रा. | ९ | ११ |

**समीक्षात्मकनिबन्धाः -**

| | | | | |
|---|---|---|---|---|
| १. | अपि जापानः स्यात् अस्माकम् आदर्शः | सं.रत्नाकरः प्रा. | ५ | ९,१० |
| २. | जर्मन-शिक्षा-नीतिः | सं.रत्नाकरः प्रा. | ६ | १,२ |
| ३. | सीता | सं.रत्नाकरः प्रा. | ६ | ९,१० |
| ४. | फ्रांस-देश-वासिनां दृष्टौ भारतम् | सं.रत्नाकरः प्रा. | ७ | २ |
| ५. | गाथासप्तशती अमरुकश्च | सं.रत्नाकरः प्रा. | १ | ४ |

| | | | | |
|---|---|---|---|---|
| ६. | प्राकृत-भाषा कै: कै: कारणै: संस्कृततो मधुरा ? | सं.रत्नाकर: प्रा. | १ | ५ |
| ७. | गाथा-सप्तशती बिहारी-सतसई च | सं.रत्नाकर: प्रा. | १ | ६ |
| ८. | प्राप्त-पत्रस्य प्रत्युत्तरम् | सं.रत्नाकर: प्रा. | २ | ९ |
| ९. | समादधतु सज्जना: | सं.रत्नाकर: प्रा. | ११ | ४,६ |
| १०. | संस्कृतानुरागिण: शृण्वन्तु | सं.रत्नाकर: प्रा. | ११ | ५ |
| ११. | अपि सत्येयं कोकिलानां परपुष्टता ? | सं.रत्नाकर: प्रा. | ९ | ४ |
| १२. | अपि नासाभूषणमिदमासां यवन-जातीनां सहवासादनुकृतम् | सं.रत्नाकर: प्रा. | ९ | ६,७,८,९ |
| १३. | सांख्य-शास्त्रस्य चिर-विस्मृतो ग्रन्थकार: | सं.रत्नाकर: प्रा. | १२ | ३ |
| १४. | रेऊ महोदयस्य आर्य-विधानम् | सं.रत्नाकर: प्रा. | १२ | १०,११ |
| १५. | आगरानगरस्यैतिहासिकता | सं.रत्नाकर: प्रा. | १२ | १०,११,१२ |
| १६. | भारतीयं भोजन-शस्त्रं शष्कुली (जलेबी) च | सं.रत्नाकर: प्रा. | १२ | १०,११,१२ |
| १७. | पी.के. गोडे महोदयस्य गवेषणाकार्यम् | सं.रत्नाकर: प्रा. | १२ | १०,११ |
| १८. | अनुपलब्धं सङ्गीतसूत्रम् | सं.रत्नाकर: प्रा. | ११ | ८ |
| १९. | गन्धर्वसेनस्य स्वर्गयात्रा | सं.रत्नाकर: प्रा. | १२ | १४४,९ |
| २०. | प्राचीना ऋषयश्चौद्भिद्तत्त्वं च | अमरभारती | २ | १,४ |
| २१. | अद्भुतचिकित्सा | अमरभारती | १ | १०,११ |
| २२. | मुद्राराक्षस्य चाणक्य: | अमरभारती | १ | १,२ |
| २३. | अमरकोषे टीकाकाराणां कृपा | अमरभारती | १ | ६ |
| २४. | साम्प्रतिकशिक्षाया धनभिक्षा | अमरभारती | १ | ७ |
| २५. | नवीन-शिक्षितानां दृष्टौ प्राचीनमस्मत्साहित्यम् | अमरभारती | २ | ७ |
| २६. | अपि नाम सेयमव्यावहारिकी ? | सारस्वती सुषमा | ७ | २ |
| २७. | संस्कृतभाषाया: महत्त्वम् | सर्योदय: | ८ | १ |

**ललित- निबन्धा: -**

| | | | | |
|---|---|---|---|---|
| १. | श्रद्धाया: पराकाष्ठा | सं.रत्नाकर: प्रा. | ५ | ११,१२ |

| | | | | |
|---|---|---|---|---|
| २. | वासन्तिकः प्रमोदः | सं.रत्नाकरः प्रा. | ९ | ८,९ |
| ३. | किन्तोः कुटिलता | सं.रत्नाकरः | १ | ७,८,९,१० |
| ४. | संस्कृतज्ञानां महाशयता | सं.रत्नाकरः | १९ | १०,११ |
| ५. | अङ्ककौतुकम् | सं.रत्नाकरः प्रा. | ६ | १,२ |
| ६. | कवि–कौतूहलम् | सं.रत्नाकरः प्रा. | ६ | ३,४ |
| ७. | अपि अस्वार्थिनो ब्राह्मणाः शूद्रेषु ? | सं.रत्नाकरः प्रा. | ६ | ७,८ |
| ८. | संस्कृतस्य नवीनं संस्कृतम् | सं.रत्नाकरः | ३ | ११ |
| ९. | संस्कृतभाषा च तत्कोषश्च | सं.रत्नाकरः | ९ | ५ |
| १०. | विद्वद्भ्यो निवेदनम् | सं.रत्नाकरः | ९ | ६ |
| ११. | महर्घतापिशाची | सं.रत्नाकरः | ९ | ६ |
| १२. | कुतो वा न प्रसरेतां चरणौ ? | सं.रत्नाकरः | १० | ३ |
| १३. | दन्तकथा | सं.रत्नाकरः | १० | ९ |

एतेषु प्रमुखकथा निबन्धाश्च मञ्जुनाथग्रन्थावल्यां प्रकाशिताः सन्ति।